Barcode : 1990020102821
Title - Rasaratna Samucchaya
Author - Vagbhattacharya
Language - sanskrit
Pages - 818
Publication Year - 0
Barcode EAN.UCC-13
1990020102821

प्रकाशक—पण्डित-श्रीमदाशुबोध-विद्याभूषण
तथा
पण्डित-श्रीमन्नित्यबोध-विद्यारत्न ।

प्राप्तिस्थान—२न०, रमानाथ मजुमदार ष्ट्रीट्, आम्हार्ष्ट-ष्ट्रीट्—पोष्ट-अफिस । कलिकाता ।

प्रिण्टर—वि, वि, मुखर्ज्जी ।

२ न०, रमानाथ मजुमदार ष्ट्रीट्, कलिकाता ।

सूचीपत्रम् ।

विषया	पृष्ठाङ्का ।

प्रथमोऽध्यायः ।

मङ्गलाचरणम्	१
ग्रन्थकर्तॄणां नामानि ग्रन्थस्याभिधेयञ्च	२
हिमालयवर्णनम्	४
रसोत्कर्षवर्णनम् ..	७
रसस्य जीवन्मुक्तिकारणता ..	१३
रसोत्पत्तिवर्णनम् ..	२०
रसस्य पञ्चविधत्वकथनम् ..	२१
रसादीनां लक्षणानि .	२२
,, निरुक्ति ...	२४
रससंस्कारकारणम् ..	२६
रसस्य स्थानान्तरगतिवर्णनम् .	२८
हिङ्गुलोत्पत्ति ..	,,

द्वितीयोऽध्यायः ।

महारसाः .	२९
गन्धाभ्रयोः स्वरूपम् ..	३०
अभ्रकगुणाः	,,
अभ्रभेदाः ...	३१
पिनाकादीनां लक्षणानि .	,,
श्वेतादिवर्णस्याभ्रस्य क्रियाविषय	३२
प्रशस्ताभ्रलक्षणम् .	,,
ग्राह्याग्राह्याभ्रम्	३३
निश्चन्द्र सचन्द्राभ्रयोर्गुणदोषौ	,,
अशुद्धाभ्रस्य दोष .	,,
अभ्रशोधनमारणे ...	३४
धान्याभ्रलक्षणम् ...	,,
धान्याभ्रमारणम् ..	३५
अभ्रमारणम् ..	,,
मतान्तरम्	,,
सत्त्वपातनम् .	३६
प्रकारान्तरम् ...	,,

विषया	पृष्ठाङ्का ।
-भ्रिद्दात् सत्त्वग्रहणम् .	३७
सत्त्वशोधनम ..	,,
सत्त्वानां मृदूकरणम् ..	,,
अभ्रमारणम ...	३८
मारणे प्रकारान्तरम् ..	,,
सत्त्वस्य शोधनमारणे ...	३९
अभ्रद्रावणानुक्तेः कारणम्	,,
अभ्रप्रयोग ...	,,

वैक्रान्तः .. ४०

वैक्रान्तस्वरूपम ...	,,
वैक्रान्तस्य वर्णभेदाः ...	,,
,, गुणाः ...	,,
वैक्रान्तोत्पत्ति	४१
वैक्रान्तस्य अवस्थितिस्थान निरुक्तिश्च	,,
मतान्तरे वर्णभेदकथनम् .	,,
वर्णभेदेन कार्य्यभेदकथनम् .	४२
शाहरणविधि ..	,,
गुणान्तरम् ...	,,
शोधनम ..	,,
मतान्तरे शोधनमारणम्	,,
मतान्तरम्	४३
सत्त्वपातनम् .	,,
मतान्तरम	,,
मृतवैक्रान्तस्य प्रयोगविधिर्गुणाश्च	४४
प्रयोगान्तरम् ..	,,

माक्षिकम् . ,,

माक्षिकोत्पत्तिस्थाननिर्देश .	,,
माक्षिकस्य गुणाः .	४५
,, द्वैविध्य परिचयश्च	,,
गुणान्तरम् ...	,,
शोधनानि ...	४६
मारणम् ...	,,

विषयाः	पृष्ठाङ्का ।
मतान्तरम्	४६
सत्त्वपातनम् ...	,,
माक्षिकस्य सीसकयोग ..	,,
प्रकारान्तरेण सत्त्वपातनम् .	४७
विशुद्धमाक्षिकसत्त्वस्य लक्षणम्	,,
माक्षिकसत्त्वस्य प्रयोगविशेष .	,,
माक्षिकसत्त्वद्रावणम्	४८
विमलः	,,
विमलभेदा .	,,
विमलस्य लक्षण गुणाश्च	,,
त्रिविधस्य तस्य क्रियाविशेष .	,,
विमलशोधनम .	,,
विमलमारणम्	४९
सत्त्वपातनम्	,,
मतान्तरम्	,,
प्रयोगविधि	,,
शिलाजतु ...	५०
शिलाजतुनो भेद ..	,,
,, उत्पत्तिकथनम् .	,,
त्रिविधस्य तस्य गुणा	५१
विशुद्धशिलाजतुलक्षणम् ..	,,
गुणा	,,
शोधनम	५२
मतान्तरम् .	,,
,,	,,
मारणम .	,,
प्रयोगविधि .	,,
सत्त्वपातनम् ...	५३
कर्पूरशिलाजतुनो लक्षणादिकम्	,,
तस्य शोधनम् .	,,
सस्यकः ..	५४
सस्यकोत्पत्ति	,,
प्रशस्तसस्यकलक्षणम् ..	,,
सस्यकस्योत्कर्षकथनम ...	,,

विषयाः	पृष्ठाङ्का ।
गुणा .	५४
शोधनम .	५५
मतान्तरम् .	,,
तुत्थखर्परमारणम् ...	,,
सत्त्वपातनम् ...	,,
मतान्तरम्	५६
,, ..	,,
प्रयोगविधि .	,,
भल्लातकतैलयोगविधि	,,
प्रयोगान्तरम् .	५७
चपल	,,
चपलस्य भेदाश्लिकथन निरुक्तिश्च	,,
गुणा	,,
वर्णाकृतिभेदेन गुणभेद	५८
चपलस्य महारसत्वकथनम्	,,
शोधनम्	,,
सत्त्वपातनम् .	,,
रसक .	५९
रसकस्य भेदलक्षणे	,,
तयो प्रयोगविषय गुणाश्च .	,,
शोधनम्	,,
मतान्तरम्	,,
,, ..	६०
रसकस्य ताम्रादिरञ्जनविधि ..	,,
सत्त्वसङ्ग्रह .	,,
मतान्तरम्	६१
,,	,,
,,	,,
सत्त्वमारणम	६२
प्रयोगविधि .	,,

विषया		पृष्ठाङ्का ।
तृतीयोऽध्यायः ।		
उपरसा साधारणरसाश्च		६३
उपरसाना नामानि	.	,,
गन्धकः		,,
गन्धकोत्पत्ति	.	,,
गन्धकस्य भेदनिर्देश	..	६४
मतान्तरम्		६५
गुणा	..	,,
वन्निवसाख्यगन्धकोत्पत्ति	..	,,
शोधनम	..	६६
मतान्तरद्वयम्	...	,,
मतान्तरम्		६७
प्रयोगविधि	..	,,
गन्धकतैलविधि		,
प्रयोगविधि		६८
अन्यविधप्रयोगविधि	..	,,
गन्धकसेवने अपथ्या	.	,,
कुष्ठरोग गन्धकप्रयोगविधि		६९
प्रलेपयोग		,,
लेपयोगान्तरम्	.	,,
गन्धकतैलान्तरम्	..	७०
शुद्धगन्धकगुणा		,,
गैरिकम्	.	,,
गैरिकस्य भेद	..	,,
द्विविधगैरिकयो लक्षणम्	.	,,
, ,, गुणा	...	७१
शोधनम्	..	,,
गैरिकस्य सत्त्वरूपताकथनम		,,
,, सत्त्वरूपतायां मतान्तरम्		,,
कासीसम्	...	,,
कासीसस्य भेद	...	,,
बालुका-कासीसगुणा	. .	७२
पुष्प-कासीसगुणा.	...	,,
शोधनम्	...	,,

विषया		पृष्ठाङ्का ।
सत्त्वपातनविधि	.	७२
शोधनान्तरम्	.	,,
प्रयोगविधि	..	,,
तुवरी	..	७३
तुवर्या परिचय	..	,,
,, भेदकथनम्	..	,,
फटक्या गुणलक्षणे	.	७४
फुल्लिकाया ,,	..	,,
द्विविधस्य तस्य सामान्यगुणा		,,
शोधनम्	..	,,
सत्त्वपातनम्	..	,,
मतान्तरम्	.	७५
तालकः	.	,,
तालकस्य भेदनिर्देश	.	,,
पत्रतालकलक्षणम्	..	,,
पिण्डतालकलक्षणम्	.	,,
गुणा	...	,,
शोधनम्	...	७६
अशुद्धस्य दोषनिर्देश	.	,,
मतान्तरे शोधनम	..	,,
,, शोधन मारणञ्च		,,
सत्त्वपातनम्	.	७७
मतान्तरम्		,,
,,	...	७८
,,	...	,,
मनःशिला	...	७९
मनःशिलाया भेदा	...	,,
त्रिविधाना लक्षणानि	.	,,
गुणा	.	,,
अशुद्ध शुद्धशिलयोर्दोषगुणौ	...	८०
शोधनम्	...	,,
प्रकारान्तरशोधनम्	..	,,
सत्त्वपातनम्	..	,,
मतान्तरम्	...	८१

विषयाः	पृष्ठाङ्काः ।
अञ्जनानि ...	८१
अञ्जनानां भेदनिर्देशः ...	,,
सौवीराञ्जनगुणाः ...	,,
रसाञ्जनगुणाः ...	८२
स्रोतोऽञ्जनगुणाः ...	,,
पुष्पाञ्जनगुणाः ...	,,
नीलाञ्जनगुणाः ...	,,
शोधनम् ...	,,
सत्त्वग्रहणम् ...	,,
स्रोतोऽञ्जनलक्षणम्	८३
अञ्जनेन रसबन्धनोपायः ...	,,
रसाञ्जनस्य विशेषशोधनम् ...	,,
स्रोतोऽञ्जनात् सत्त्वग्रहणम्	,,
कङ्कुष्ठम् ...	,,
कङ्कुष्ठस्योत्पत्तिस्थानं भेदश्च ...	,,
कङ्कुष्ठद्वयलक्षणम् ...	८४
कङ्कुष्ठस्योत्पत्तौ मतान्तरद्वयं लक्षणञ्च	,,
नालिकाकङ्कुष्ठस्य प्रयोगविषये रेणुकाकङ्कुष्ठस्य अप्रशस्तता च ..	,,
गुणाः ...	,,
रसोपरसानां सामान्यतः शोधनं सत्त्वपातनञ्च ...	८५
कङ्कुष्ठशोधनम् ...	,,
कङ्कुष्ठस्य सत्त्वरूपताया कथनम्	,,
अस्य विरेचनार्थप्रयोगे मात्रादिनिर्देशः	,,
,, अविधिप्रयोगे दोषः ...	८६
विषनाशार्थं कङ्कुष्ठप्रयोगविधिः	,,
साधारणरसाः ...	,,
साधारणरसानां नामानि	,,
कम्पिल्लः ..	८७
कम्पिल्लस्य स्वरूपलक्षणमुत्पत्तिस्थानञ्च	,,
गुणाः ...	,,
गौरीपाषाणः ..	८८
गौरीपाषाणस्य पर्यायो भेदश्च	,,
शोधनम् ...	८८
सत्त्वग्रहणम् ...	,,
गुणाः ...	,,
नवसारः ...	,,
नवसारस्योत्पत्तिः पर्यायश्च ...	,,
उत्पत्तौ मतान्तरम् ..	८९
गुणाः ...	,,
वराटिका ..	,,
वराटिकालक्षणम् ..	,,
उत्तमादिभेदेन तस्या द्वैविध्यनिर्देशः	,,
गुणाः ..	९०
वराटस्य लक्षणगुणौ	,,
शोधनम् ...	,,
अग्निजारः ...	,,
अग्निजारस्य स्वरूपलक्षणम् ..	,,
गुणाः ...	९१
स्वभावतः शुद्धत्वनिर्देशः	,,
गिरिसिन्दूरम् ...	,,
गिरिसिन्दूरस्य स्वरूपलक्षणम्	,,
गुणाः ...	,,
हिङ्गुलः ...	,,
हिङ्गुलस्य द्वैविध्यम्	,,
शुकतुण्डाख्यस्य परिचयः	९२
हंसपाकस्य लक्षणम्	,,
गुणाः ..	,,
हिङ्गुलाकृष्टसूतस्य गुणाः ...	,,
शोधनम् ..	,,
शोधनविशेषेण गुणविशेषः ...	९३
हिङ्गुलात् सत्त्वाकर्षणविधिः ..	,,
मृद्दारशृङ्गकम् ...	,,
मृद्दारशृङ्गस्य परिचयः ...	,,
गुणाः ...	९४
साधारणरसानां सामान्यशोधनम्	,,

विषयाः	पृष्ठाङ्काः ।
सत्त्वानां सामान्यशोधनम्	९४
चतुर्थोऽध्यायः ।	
रत्नानि	९५
मणयः	„
मणीनां सामान्यकार्य्यम्	„
„ नामानि	„
श्रेष्ठमणीनां „	९६
दुष्टग्रहाणां प्रसादकरत्नानि	„
अन्यविधानि दुष्टग्रहाणां प्रसादक रत्नानि	„
रत्नधारणस्य सिद्धिप्रदत्वोक्तिः	„
माणिक्यम्	९७
द्विविधमाणिक्यनिर्देशः	„
प्रशस्तपद्मरागमाणिक्यलक्षणम्	„
प्रशस्तनीलगन्धिमाणिक्यलक्षणम्	„
निकृष्टमाणिक्यलक्षणम्	„
माणिक्यस्य गुणाः	९८
मौक्तिकम्	„
प्रशस्तमौक्तिकलक्षणम्	„
मौक्तिकगुणाः	„
निकृष्टमौक्तिकलक्षणम्	९९
मौक्तिकस्य गुणान्तरम्	„
प्रवालम्	„
प्रशस्तप्रवाललक्षणम्	„
निकृष्टप्रवाललक्षणम्	„
प्रवालगुणाः	१००
तार्क्ष्यम्	„
प्रशस्ततार्क्ष्यलक्षणम्	„
अप्रशस्ततार्क्ष्यलक्षणम्	„
तार्क्ष्यगुणाः	„
पुष्परागः	१०१
प्रशस्तपुष्परागलक्षणम्	„

विषयाः	पृष्ठाङ्काः ।
अप्रशस्तपुष्परागलक्षणम्	१०१
पुष्परागगुणाः	„
वज्रम्	„
वज्राणां त्रैविध्यनिर्देशः	„
पुं वज्रलक्षणम्	१०२
स्त्रीवज्र नपुंसकवज्रलक्षणे	„
तेषां जातिभेदेनाधिकारिभेदनिर्देशः	१०३
„ वर्णभेदेनाधिकारिभेदनिर्देशः	„
वज्रगुणाः	„
सर्वरत्नानां साधारणदोषनिर्देशः	१०४
वज्रशोधनम्	„
वज्रमारणम्	„
मारणान्तरम्	१०५
मतान्तरम्	„
„	१०६
„	„
„	„
प्रयोगविशेषेण गुणविशेषकथनम्	„
प्रयोगान्तरम्	१०७
नीलम्	„
नीलस्य द्वैविध्यकथनम्	„
नीलद्वयस्य सामान्यलक्षणम्	„
प्रशस्तशक्रनीललक्षणम्	१०८
जलनीलस्य विशेषलक्षणम्	„
गुणाः	„
गोमेदः	१०९
गोमेदस्य निरुक्तिः	„
प्रशस्तगोमेदलक्षणम्	„
अप्रशस्तगोमेदलक्षणम्	„
गुणाः	„
वैदूर्य्यम्	११०
शुभवैदूर्य्यलक्षणम्	„

विषया	पृष्ठाङ्का ।
अशुभवैदूर्य्यलक्षणम्	११०
गुणा	”
नवरत्नाना शोधनम	
रत्नाना मारणम्	१११
” द्रावणम	”
मुक्ताद्रावणे विशेषक्रम	११२
वज्रद्रावणे ”	११३
वैक्रान्तद्रावणे ”	”
मतान्तरम्	”
”	”
सर्वरत्नाना सामान्यद्रावणम्	११४
राजावर्त्त.	”
उत्तममध्यमराजावर्त्तलक्षणम	”
गुणा	”
राजावर्त्ताद्युपरत्नाना सामान्यशोधनम्	”
राजावर्त्तशोधनम्	”
राजावर्त्तमारणम्	११५
सत्त्वपातनम	”
द्रुतीना दीर्घकालरक्षणोपाय	”
रत्नधारणगुणा:	११६
गैरिकम्	”
गैरिकस्य शोधन सत्त्वपातनञ्च	”

पञ्चमोऽध्यायः ।

विषया	पृष्ठाङ्का ।
लोहानि	११७
लोहाना जातिनिरूपणम्	”
स्वर्णम्	११८
स्वर्णस्य पञ्चविधत्वनिर्देश	”
स्वर्णरौप्ययो सामान्यगुणा	११९
प्राकृतस्वर्णस्योत्पत्ति	”
सहजस्वर्णोत्पत्ति	”
वह्निजस्वर्णोत्पत्ति	१२०
प्राकृतादित्रयाणा लक्षणगुणौ	”

विषया	पृष्ठाङ्का ।
खनिजस्वर्णस्योत्पत्तिलक्षणगुणा	१२०
रसेन्द्रवेधजस्वर्णस्योत्पत्तिगुणौ	”
गुणा	१२१
अशोधितामारितस्वर्णस्य दोषा	”
सुवर्णस्य सुवर्णसम्पादनम्	”
लोहमारकद्रव्येषु उत्तमादिनिर्देश	”
स्वर्णमारणम	१२२
मतान्तरम्	”
”	”
स्वर्णद्रावणम्	”
द्रावणान्तरम	१२३
मारितस्वर्णस्य प्रयोगविधि	”
अमारितस्य स्वर्णस्य दोष	”
रजतम्	१२४
रौप्यस्य त्रैविध्यनिर्देश	”
सहजरौप्यस्योत्पत्तिगुणाश्च	”
खनिजरौप्यस्योत्पत्तिगुणाश्च	”
कृत्रिमरौप्यस्योत्पत्तिर्गुणाश्च	”
उत्तमरौप्यलक्षणम	”
अपकृष्टरौप्यलक्षणम्	१२५
रौप्यगुणा	”
गुणान्तरम्	”
रौप्यादिशोधनम्	”
अशोधितामारितरौप्यस्य दोषा	”
रौप्यस्य विशेषशोधनम्	१२६
मतान्तरम्	”
रौप्यमारणम्	”
मतान्तरम	१२७
रौप्यस्य निरुत्थभस्मीकरणम	”
निरुत्थभस्मीकरणे मतान्तरम्	”
स्वर्णरौप्ययोर्द्रावणम्	”
रौप्यप्रयोग	१२८
ताम्रम्	”
ताम्रस्य द्वैविध्यनिर्देश	”
म्लेच्छताम्रस्य लक्षणम्	”

विषया	पृष्ठाङ्का ।
नेपालताम्रलक्षणम्	१२८
रसकर्मानर्हताम्रलक्षणम् .	१२९
ताम्रस्य गुणा .	,,
अशोधितामारिततामस्य दोषा	,,
ताम्रशोधनम् .	,,
मतान्तरम्	१३०
,,	,,
,,	,,
ताम्रमारणम् .	,,
रसरत्नाकरोक्ताम्रतीकरणम्	,,
मारणान्तरम्	१३१
सोमनाथोक्तताम्रप्रयोग	,
ग्रन्थान्तरोक्तताम्रप्रयोग .	१३२
अयः .	,,
अयोभेदा	,,
मुण्डलौहस्य वैविध्यम्	१३३
मृदुमुण्डलक्षणम्	,,
कुण्ठमुण्डलक्षणम्	,,
कडारमुण्डलक्षणम् .	,,
मुण्डगुणा .	,,
अशुद्धलौहस्य दोषा ...	,
तीक्ष्णलौहस्य षड्विधत्वम् .	१३४
खरतीक्ष्णलक्षणम्	,,
सपर्य्यायपोगरलक्षणम् .	,,
सारतीक्ष्णलक्षणम्	,,
हन्नालतीक्ष्णलक्षणम्	१३५
वाजिरतीक्ष्णलक्षणम्	,,
काललौहाख्यतीक्ष्णलक्षणम् ..	,,
खरतीक्ष्णगुणा	,,
सारतीक्ष्णादीना पञ्चाना गुणा	१३६
कान्तलौहस्य पञ्चविधत्वम् ..	,,
पञ्चविधस्य कान्तस्य भेदान्तरनिर्देश	,,
वर्णभेदेन कान्तस्य कार्य्यभेदानिर्देश	,,
भ्रामकादीनामधममध्यमत्वादिनिर्देश	१३७

विषया	पृष्ठाङ्का ।
भ्रामक कान्तलक्षणम् ...	१३७
चुम्बक कर्षक कान्तद्वयलक्षणम्	,,
द्रावक कान्तलक्षणम् ...	,,
रोमकान्त कान्तलक्षणम् ..	,,
एकादिमुखभेदेन कान्तस्याधम मध्यमत्वादिनिर्देश ...	,,
भ्रामकादीना कार्य्यनिर्देश	१३८
रसकर्मणि कान्तस्य विशेषोपयोगिता	,,
कान्तस्य ग्राह्यवर्ज्यत्वनिर्देश .	,,
कान्तलौहलक्षणम् .	,,
कान्तलौहगुणा	,,
लौहस्य शोधनमारणयोरावश्यकता	१३९
मारणार्थे लौहस्य परिमाणनिर्देश	,,
लौहमारणे मन्त्रम् .	,,
लौहत्रयाणामुत्तरोत्तरगुणाधिक्यम्	१४०
सर्वलौहाना सामान्यशोधनम्	,,
लौहाना गिरिजदोषशोधनम् ..	,,
मतान्तरम् ..	१४१
,,	,,
मतान्तरे शोधन मारणञ्च ...	,,
,, मारणम्	१४२
तीक्ष्णलौहस्य , .	,,
कान्तलौहस्य रससिन्दूरगुणा	,,
सर्वलौहाना मारणे मतान्तरम्	१४३
तीक्ष्णलौहस्य विशेषमारणम् .	,,
मतान्तरम् ..	१४४
मतान्तरे सर्वलौहाना मारणम्	,,
मतान्तरम्	१४५
,, .	,,
,, ...	,,
तीक्ष्णलौहद्रावणम् ...	,,
मतान्तर द्रावणम् ...	१४६
लौहप्रयोग	,,
कान्तलौहस्य रामराजोक्तसाधनम्	,,

विषयाः	पृष्ठाङ्काः ।
सर्वविधलौहानां रामराजीयोक्त मारणम् ..	१४७
लौहानां रामराजीयोक्तगुणाः	१४८
उत्तमकान्तलौहस्य लक्षणम्	१४९
कान्तलौहस्य विशेषमारणम् ...	,,
अष्टलौहानां द्रावणम्	,,
मतान्तरम्	,,
मण्डूरः ..	,,
मण्डूरशोधनम् .	,,
मतान्तरम् .	१५०
लौहमण्डूरयोः तुल्यगुणत्वनिर्देशः	,,
मण्डूरस्य लौहानाञ्च उत्तरोत्तर-गुणाधिक्यम्	,,
अशुद्धलौहस्य ग्रन्थान्तरोक्तदोषाः	१५१
शुद्धलौहस्य ग्रन्थान्तरोक्तगुणाः	,,
वङ्गम् ..	,,
वङ्गस्य द्वैविध्यनिर्देशः .	,,
खुरकवङ्गस्य लक्षणम् .	,,
मिश्रकवङ्गस्य ,, ..	,,
वङ्गगुणाः .	१५२
खुरकवङ्गशोधनम् ...	,,
मिश्रकवङ्गशोधनम्	,,
नागवङ्गकांस्यतामाणां सामान्यशोधनम्	,,
वङ्गमारणम् ...	१५३
मारणे मतान्तरम् ...	,,
मतान्तरम् .	,,
,, ...	,,
वङ्गप्रयोगः .	१५४
सीसकम् ..	१५५
शुद्धाशुद्धसीसकलक्षणम्	,,
सीसकगुणाः ...	,,
सीसकशोधनम्	,,
सीसकमारणम् ..	१५६
मतान्तरम् .	,,

विषयाः	पृष्ठाङ्काः ।
सीसकस्य निरुत्थभस्मीकरणम्	१५७
निरुत्थभस्मीकरणे मतान्तरम्	,,
सीसकप्रयोगः ..	,,
पित्तलम् ...	१५८
पित्तलस्य द्वैविध्यनिर्देशः .	,,
रीतिकालक्षणम् ...	,,
काकतुण्डीलक्षणम् ...	,,
रीतिकायाः गुणाः	१५९
काकतुण्ड्याः ,, ..	,,
शुभरीतिकालक्षणम् .	,,
अशुभरीतिकालक्षणम् .	,,
रीतिकाशोधनम् ..	,,
रीतिकाद्रावणम् ..	१६०
रीतिकामारणम्	,,
मतान्तरम्	,,
पित्तलप्रयोगः	,,
कांस्यम्	१६१
कांस्यस्य उत्पत्तिनिर्देशः .	,,
प्रशस्तकांस्यलक्षणम्	,,
अप्रशस्तकांस्यलक्षणम्	,,
कांस्यगुणाः	,,
कांस्यशोधनम् ...	१६२
कांस्यमारणम्	,,
मतान्तरम् .	,,
वर्त्तलौहम् ...	,,
वर्त्तलौहस्वरूपम् ...	,,
वर्त्तलौहगुणाः .	१६३
वर्त्तलौहशोधनम्	,,
वर्त्तलौहमारणम् .	,,
रसोपरसलौहानां सूतसाधकत्वनिर्देशः	,,
भस्मीभूतरत्नादीनामेव सूतयोगे प्रयोज्यतानिर्देशः .	१६४
भूनागः ...	,,
भूनागसत्त्वपातनम् ...	,,

विषयाः	पृष्ठाङ्काः ।
मतान्तरम् ...	१६५
भूनागसत्त्वप्रयोगविधिः .	१६६
तैलपातनविधिः ...	१६७
अङ्कोल्लबीजात् तैलपातनम् ...	,,
मतान्तरम् .	,,
,, ...	१६८
,, ...	,,
बाकुचीबीज-घोषाबीजाभ्यां तैलपातनम् ...	,,
विषमुष्टितैलपातनम् ..	,,
जैपालात तैलपातनम् ...	१६९
बाकुचीबीजात तैलपातने प्रकारान्तरम् ...	,,
कृष्णामिश्रश्वेतगुञ्जाबीजात् तैलपातनम्	,,

षष्ठोऽध्यायः ।

शिष्योपनयनम् ...	१७०
रसशास्त्रप्रकटने हेतुनिर्देशः ...	,,
शास्त्रकर्मणोरन्योऽन्यापेक्षित्वनिर्देशः	,,
रसविद्याया गुरोर्लक्षणम्	१७१
रसविद्यासाधकशिष्यलक्षणम् .	,,
रसविद्यासाधकस्य सहायलक्षणम्	,,
रसविद्यासाधने नास्तिकादीनां वैफल्यनिर्देशः .	१७२
रसविद्याया गुरुसन्तोषस्य सिद्धिप्रदत्वनिर्देशः	,,
रससाधनोपयोगिदेशनिर्देशः	,,
रससाधनोपयोगिगृहनिर्माणप्रकारनिर्देशः	१७३
रसलिङ्गप्रस्तुतप्रकारनिर्देशः .	,,
रसलिङ्गार्चनादौ फलनिर्देशः .	,,
पूजाविधाननिर्देशः	१७४
ध्यानम् ..	,,
देवीपूजाया मन्त्रम् .	१७४
पूजने प्रकारनिर्देशः	,,
रसविद्यादाने दीक्षाविधिः	१७५
तत्र कालिनीलक्षणम् .	,,
,, कालिन्यभावे तदनुकल्पविधिः	,,
,, होमविधिः	१७६
,, रसाष्टकाः .	१७७
,, उपरसाः	,,
,, महारसाः .	,,
,, अष्टलोहपूजाक्रमः .	१७८
,, उपकरणानां पूजाविधिः ..	,,
,, रससिद्धानां नामानि	१७९
अदीक्षितस्य रसविद्यासाधनवैफल्यनिर्देशः	१८०
रससाधने सिद्धिलाभहेतुनिर्देशः	,,
कस्मै किमर्थं रसविद्या दातव्या तन्निर्देशः ..	१८१
गुरुसन्तोषस्य सर्वसिद्धिहेतुत्वनिर्देशः	,,
रसविद्याया अवश्यगोप्यत्वनिर्देशः	,,

सप्तमोऽध्यायः ।

रसशाला ...	१८२
रसशालानिर्माणस्य स्थाननिर्देशः	,,
रसशालायां कुत्र किं कर्म कर्त्तव्यं तन्निर्देशः .	,,
रसशालायां सङ्ग्राह्याणि उपकरणानि .	१८३
तत्र विविधचालनीनां स्थूलद्रव्यचालनार्थं चालनीस्वरूपम्	१८४
,, चूर्णचालनार्थं चालनीस्वरूपम्	,,
,, सूक्ष्मतरचूर्णचालनार्थं चालनीस्वरूपम् .	,,
,, शिखित्रस्वरूपम् .	१८५
,, कोकिलास्वरूपम् .	,,

विषयाः	पृष्ठाङ्का ।
नव उपलस्य पर्य्याया'	१८५
,, कूपिकाया ,,	,,
,, चषकस्य ,,	१८६
रससाधनाङ्गानामर्च्चनाया कर्त्तव्यता-निर्देश.	,,
रसकर्म्मणि यादृशा वैद्या नियोज्या' तत्कथनम्	,,
रसपाककाले मन्त्रजपस्य कर्त्तव्यता-निर्देश	१८७
परिचारकलक्षणम्	,,
रसकर्म्मयोग्यस्य वैद्यस्य लक्षणम्	,,
पश्चहस्तवैद्यलक्षणम्	,,
वर्जनीयवैद्यलक्षणम्	,,
निधिसाधने नियोज्यपुरुषलक्षणम्	१८८
बलिसाधने ,, ,,	,,
रसायने ,, ,,	,,
धातुवादे ,, ,,	,,
भेषजाहरणे ,, ,,	१८९
रसविद्याया लब्धव्यसाफल्यस्य लक्षणम्	,,
रससिद्धसाधकस्य कर्त्तव्यनिर्देश.	,,
रससिद्धे, फलम्	,,

अष्टमोऽध्यायः ।

परिभाषा ...	१९०
परिभाषाया प्रयोजनम्	,,
धन्वन्तरिभाग.	,,
रुद्रभाग	१९१
विश्वासघातकवैद्यलक्षणम्	,,
कज्जली	,,
रसपङ्क	,,
पिष्टी	१९२
मतान्तरे पिष्टी	,,
पातनपिष्टी ...	,,
स्वर्ण रौप्ययो कृष्टी ...	,,

विषया'	पृष्ठाङ्का' ।
कृष्ट्या कार्य्यम्	१९३
स्वर्णकृष्टीकृतवीजस्य कार्य्यम्	,,
वरलोहकम्	,,
हेमरक्ती ...	,,
हेमरक्त्या कार्य्यम् ..	,,
ताररक्ती	१९४
दलम्	,,
अन्यविधदलम् ...	,,
शुल्वनागम् ...	,,
शुल्वनागगुणा ...	१९५
पिञ्जरी ...	,,
चन्द्रार्कम् ...	,,
निर्वाहणम् ...	,,
निर्वापणस्य मात्रानिर्देश ..	१९६
वारितरलोहलक्षणम् ..	,,
रेखापूर्णाख्यमृतलोहलक्षणम् .	,,
अपुनर्भवलोहलक्षणम् ..	,,
ऊनमलक्षणम् ...	१९७
निरुत्थलोहलक्षणम् ..	,,
वीजलक्षणम् ...	,,
उत्तरणम् ..	,,
ताडनम् ...	१९८
धान्याभ्रलक्षणम् ...	,,
सत्त्वलक्षणम् ..	,,
एककोलीसकलक्षणम् ..	,,
द्रावणादिकर्म्मसाधने काष्ठनिर्देश	,,
हिङ्गुलाकृष्टरस ...	१९९
घोषाकृष्टलक्षणम् ...	,,
वरनागलक्षणम् ..	,,
उत्थापनालक्षणम् ...	,,
ढालनलक्षणम् ...	,,
नागसम्भूतचपल. ...	२००
वङ्गसम्भूतचपल: ..	,,
चपलस्य कार्य्यम् ..	,,
तादृशवङ्गरसस्य कार्य्यम् ...	,,

विषयाः		पृष्ठाङ्का ।
धौतम्	...	२०१
सन्धानम्	...	,,
भञ्जनी	..	,,
चुल्लिका	..	,,
पतङ्गीराग॰	..	२०२
आवाप	..	,,
अभिषेक	...	,,
निर्वाप	...	,,
प्रक्षेपकालनिर्देश	...	,,
शुद्धावर्त्त	..	२०३
बीजावर्त्त॰	...	,,
स्वाङ्गशीतलम्	...	,,
वहि शीतलम्	..	,,
स्वेदनलक्षणम्	..	,,
मर्दनलक्षणम्	...	२०४
मूर्च्छनलक्षणम्	.	,,
उत्थापनलक्षणम्	..	,,
बन्धनलक्षणम	...	,,
पातनलक्षणम्	.	२०५
रोधनलक्षणम्	...	,,
नियमनलक्षणम्	..	,,
दीपनलक्षणम्	..	,,
ग्रासमानम्	...	२०६
जारणायास्त्रैविध्यनिर्देश	...	,,
,, पुनस्त्रैविध्यनिर्देश	.	,,
,, पुनर्द्वैविध्यनिर्देश	.	,,
निर्मुखजारणालक्षणम्		,,
बीजनिर्देश	...	२०७
मुखलक्षणम्	..	,,
समुखजारणालक्षणम्	.	,,
वाचसवक्त्ररसलक्षणम्	...	,,
चारणालक्षणम्	...	,,
गर्भद्रुतिलक्षणम्	...	,,
बाह्यद्रुतिलक्षणम्	..	२०८
द्रुते. पञ्चविधत्वनिर्देश.	...	,,

विषयाः		पृष्ठाङ्का ।
द्रुतिस्वरूपम	..	२०८
जारणाभेद जारणालक्षणम्	..	,,
विडलक्षणम्	...	२०९
रञ्जनलक्षणम्	.	,,
सारणालक्षणम्	..	२१०
वेधलक्षणम्	.	,,
वेधस्य पञ्चविधत्वनिर्देश॰	...	,,
लेप वेधलक्षणम्	...	,,
क्षेप वेधलक्षणम्	...	२११
कुन्त-वेधलक्षणम्	..	,,
धूम वेधलक्षणम्	...	,,
शब्द वेधलक्षणम्	...	,,
उद्घाटनलक्षणम्	...	२१२
स्वेदनलक्षणम्	..	,,
सन्न्यासलक्षणम्	...	,,
रसस्य स्वेदसन्न्यासयो गुण	...	,,
परिभाषाज्ञानस्य फलम्	...	२१३

नवमोऽध्यायः ।

यन्त्राणि		२१३
प्रस्तुताध्यायस्य वक्तव्यनिर्देश	...	,,
यन्त्रशब्दस्य निरुक्ति	..	२१४
दोलायन्त्रम्	...	,,
स्वेदनीयन्त्रम	..	,,
पातनायन्त्रलक्षणम्	...	,,
अथ पातनप्रकार	.	२१५
दीपिकायन्त्रम्	...	,,
डेकीयन्त्रम्	...	२१६
जारणायन्त्रम्	...	,,
जारणायन्त्रस्य प्रकारान्तरम्	...	२१७
कच्छपयन्त्रम्	...	,,
विद्याधरयन्त्रम्	...	२१८
सोमानलयन्त्रम्	...	,,

विषयाः	पृष्ठाङ्काः ।
गर्भयन्त्रम्	२१९
हंसपाकयन्त्रम्	,,
बालुकायन्त्रम्	२२०
बालुकायन्त्रस्य प्रकारान्तरम्	,,
लवणयन्त्रम्	२२१
लवणयन्त्रस्य प्रकारान्तरम्	,,
नालिकायन्त्रम्	,,
भूधरयन्त्रम्	,,
पुटयन्त्रम्	२२२
कोष्ठीयन्त्रम्	,,
वलभीयन्त्रम्	,,
तिर्य्यक्पातनयन्त्रम्	२२३
पालिकायन्त्रम्	,,
घटयन्त्रम्	२२४
इष्टकायन्त्रम्	,,
हिङ्गुलाकृष्टिविद्याधरयन्त्रम्	,,
डमरुयन्त्रम्	२२५
नाभियन्त्रम्	,,
तत्र तोयमल्लक्षणम्	,,
,, वह्निमल्ला	,,
ग्रस्तयन्त्रम्	२२६
स्थालीयन्त्रम्	,,
धूपयन्त्रम्	,,
कन्दुकयन्त्रम्	२२७
कन्दुकयन्त्रस्य प्रकारान्तरम्	२२८
खल्लयन्त्रम्	,,
खल्लयन्त्रस्य त्रैविध्यनिर्देशः	,,
द्विविधखल्लयोः सामान्यलक्षणम्	,,
शोधनार्थमर्द्धचन्द्राकृतिखल्लनिर्देशः	२२९
मर्दनार्थं वर्त्तुलखल्लनिर्देशः	,,
तप्तखल्लार्थं खल्लनिर्देशः	२३०
तप्तखल्लविधिः	,,

दशमोऽध्यायः ।

विषयाः	पृष्ठाङ्काः ।
मूषादिकथनम्	२३१
मूषाया पर्य्यायाः	,,
,, निरुक्तिः	,,
,, उपादानम्	,,
मूषाप्रशंसा	,,
सन्धिलेपस्य पर्य्यायाः	२३२
मूषोपयोगिमृत्तिका	,,
मूषोपयोगिद्रव्याणि	,,
मूषाया उपकरणान्तराणि	,,
वज्रमूषा	२३३
योगमूषा	,,
वज्रद्रावणोपयोगिमूषा	,,
गारमूषा	२३४
वरमूषा	,,
वर्णमूषा	,,
रूप्यमूषा	,,
विडमूषा	२३५
वज्रद्रावणोपयोगिमूषान्तरम्	,,
मूषाऽऽप्यायनम्	,,
वृन्ताकमूषा	२३६
गोस्तनीमूषा	,,
मल्लमूषा	,,
पक्वमूषा	,,
गोलमूषा	,,
महामूषा	२३७
मण्डूकमूषा	,,
मुसलमूषा	,,
कोष्ठिकाप्रस्तावः	,,
अङ्गारकोष्ठी	,,
पातालकोष्ठी	२३८
गारकोष्ठी	२३९
बङ्कनालम्	,,

विषया	पृष्ठाङ्का ।
सिद्धरसादीना कोष्ठी ..	२४०
पुटानि .	,,
पुटस्य प्रयोजननिर्देश ..	,,
,, फलम् .	,,
महापुटम् ..	२४१
गजपुटम् ...	,,
वाराहपुटम्	२४२
कुक्कुटपुटम् ...	,,
कपोतपुटम् ...	,,
गोवरस्वरूपम् .	,,
गोवरपुटम् ...	,,
भाण्डपुटम् .	२४३
वालुकापुटम् ...	,,
भूधरपुटम् ..	,,
लावकपुटम् ..	,,
अनुक्तपुटमाने कर्त्तव्यनिर्देश ...	२४४
उपलपर्य्याया	,,
अक्तविमक्तविमलोहानि	,,
षड्लवणानि .	,,
क्षारत्रयम ...	,,
क्षारपञ्चकम् ...	२४५
मधुरत्रयम् ..	,,
रसकर्मणि तैलयोनिफलानि ..	,,
अम्लवर्ग ...	,,
मूत्रवर्ग ...	२४६
पञ्चमाहिषम् .	,,
छागलपञ्चकम् ..	,,
अम्लवर्ग ...	,,
अम्लपञ्चकम् ..	२४७
पञ्चमृत्तिका ...	,,
विषवर्ग ...	,,
उपविषवर्ग: ..	२४८
दुग्धवर्ग ...	,,
विड्वर्ग ...	२४९
रक्तवर्ग ...	,,
पीतवर्ग. ...	,,

विषयाः	पृष्ठाङ्का ।
श्वेतवर्ग ...	२५०
कृष्णवर्ग ..	,,
रक्तवर्गादीना प्रयोजननिर्देश. ...	,,
शोधनीयगण ...	,,
लोहाना मलनाशनगण ..	,,
लोहकाठिन्यनाशनो योग ...	२५१
द्रावणीयो गण ...	,,
क्षाराम्ल-विष स्नेहाना कार्य्यम् ..	,,

एकादशोऽध्यायः ।

रसशोधनादिकथनम् .	२५२
मानपरिभाषा ..	,,
मानपरिभाषाया मतान्तरम् ..	,,
पारदस्य सस्कारकथने प्रतिज्ञा	२५३
अष्टादशसस्काराणा नामानि ..	२५४
व्याधिविशेषे रसप्रयोगनिषेध ...	,,
शुद्ध-मूर्च्छितरसयोर्गुणा, ..	,,
मृतरसस्य ,, ...	,,
रसस्य नैसर्गिकदोषत्रय	
तेषा कार्य्याणि च ...	,,
,, यौगिकदोषद्वय तयो कार्य्यञ्च	२५५
,, औपाधिकदोषा ...	,,
रसदोषाणा द्वादशत्वकथनम् ...	,,
सप्तकञ्चुकाना नामानि ...	,,
भूमिजादीना कार्य्यम् ...	,,
उपसहार. ..	२५६
सस्कारार्थं सूतस्य परिमाणनिर्देश.	,,
संस्काराः ...	,,
स्वेदनविधिः ...	,,
मर्दनविधि ...	२५७
मूर्च्छनविधि ...	,,
उत्थापनविधि ...	,,
पातनविधि ...	२५८

विषया॰	पृष्ठाङ्का॰ ।
ऊर्द्धाध पातनयो सङ्ख्यानिर्देश	२५८
अथ पातनविधि ..	,,
पातने प्रकारान्तराणि .	,,
प्रकारान्तरम् ..	२५९
तिर्य्यक्पातनम् .	,,
मर्दनादीना गुणः ..	,,
रोधनम् ...	२६०
नियामनम् ...	,,
प्रकारान्तरम् ...	,,
दीपनम् .	२६१
प्रकारान्तरदीपनम ...	,,
रसभावनादौ मूलिन्य .	,,
रसबन्धन वक्तु प्रतिज्ञा ...	२६३
रसबन्धा ...	,,
मतान्तरीयबन्ध. ..	,,
हठबन्ध .	,,
आरोटबन्ध .	२६४
आभासबन्ध ..	,,
क्रियाहीनबन्ध॰ ..	,,
पिष्टिकाबन्ध. ...	,,
क्षारबन्ध ...	,,
खोटबन्ध ...	२६५
पोटबन्धलक्षणम् ...	,,
कल्कबन्धलक्षणम् ...	,,
कज्जलीबन्धलक्षणम् ...	,,
सजीवबन्धलक्षणम् ...	२६६
निर्जीवबन्धलक्षणम् ...	,,
निर्बीजबन्धलक्षणम् .	,,
सबीजबन्धलक्षणम्	२६७
शृङ्खलाबन्धलक्षणम् ..	,,
द्रुतिबन्धलक्षणम्	,,
बालकबन्धलक्षणम्	,,
कुमारबन्धलक्षणम्	२६८
तरुणबन्धलक्षणम्	,,
वृद्धबन्धलक्षणम्	,,
मूर्त्तिबन्धलक्षणम् ...	,,

विषया॰	पृष्ठाङ्का ।
जलबन्धलक्षणम् ..	२६९
अग्निबन्धलक्षणम्	,,
सुखाबन्धलक्षणम्	,,
सूतान्नं सङ्गिप्तमूर्च्छाकल्प॰ ..	२७०
जलूकाबन्धलक्षणम्	,,
क्रियाविशेषेण जलूकाया गुणविशेष	२७१
जलूकाया विविधप्रमाणनिर्देश.	,,
,, संस्कारविशेष	२७२
अन्यविधा जलूका वक्तु प्रतिज्ञा	,,
द्वितीयप्रकारजलूकाबन्ध	,,
जलूकाबन्धान्तरम्	२७३
प्रकारान्तरम्	,,
,,	२७४
,,	,,
योनिविद्रावणम्	,,
मदनवलयम्	२७५
प्रकारान्तरम्	,,
सूतमारणम्	,,
प्रकारान्तरम्	२७६
,,	,,
,,	,,
,,	,,
,, ...	२७७
,, ...	,,
अन्यविधम् .	,,
रसभस्मसेवनविधि ..	,,
रससेवने पथ्यविधि ..	,,
,, अपथ्यानि	२७८
देवीशास्त्रोक्त ककारादिगण. .	,,
श्रीकण्ठदेवोक्त ,, ,, .	२७९
ककारादिनिषेधस्यापवाद ..	,,
रसव्यापदि प्रतीकार .	,,
रससेवने उपचारविधि ...	२८०
रसत्यागे ,, ...	,,

विषयाः पृष्ठाङ्काः ।

द्वादशोऽध्यायः ।

ज्वरचिकित्सनम् ... २८१
चिकित्सनीयरोगाणां यथाक्रम नामानि ,,
वातज्वरलक्षणम् ... २८२
पित्तज्वरलक्षणम् ... २८३
कफज्वरलक्षणम् ... ,,
द्वन्द्वसन्निपातज्वराणामातिदैशिक-लक्षणम् ... २८४
रसायनानि ... ,,
त्रैलोक्यसुन्दररस ... ,,
त्रैलोक्यडम्बररस ... २८५
मेघनादरस ... ,,
ज्वरगजहरिरस. ... २८६
दीपिकारस ... ,,
शीतभञ्जीरस ... २८७
मृतजीवनरसः ... २८८
शीतभञ्जीरस. ... २८९
वृहज्ज्वराङ्कुश ... ,,
महाज्वराङ्कुश. ... ,,
मृत्युञ्जय ... २९०
सर्वज्वरारि' ... ,,
चन्द्रसूर्यौ नामरस ... ,,
विषप्रयोगायोग्यनिर्देश ... २९१
उमाप्रसादनो रस. ... ,,
ज्वराङ्कुशरस' ... २९२
सर्वाङ्गसुन्दरचिन्तामणिरस. ... ,,
लोकनाथगुटिका ... २९४
सूचिकाभरणो रस. ... ,,
शार्ङ्गष्टादिवर्ग ... २९७
सूचीमुखो रस ... ,,
सन्निपातगजाङ्कुश' ... २९८
चातुर्थिकहरी रस ... ,,
चातुर्थिकगजाङ्कुश. ... २९९
द्वितीयमृत्युञ्जयरसः ... ,,

विषयाः पृष्ठाङ्काः ।

पञ्चवक्त्ररस' ... ३००
उन्मत्तरस ... ,,
सन्निपाताञ्जनरस' ... ,,
नस्यम ... ३०१
प्रतापलङ्केश्वर: ... ,,
प्राणेश्वर ... ३०२
मृतसञ्जीवन ... ३०३
द्वितीयमृतसञ्जीवन' ... ,,
सन्निपातकुठार ... ३०४
नवज्वरारि ... ,,
जलमञ्जरीरस' ... ३०५
कान्तरस ... ,,
चन्द्रोदयः ... ३०६
जीर्णज्वरारि' ... ,,
नवज्वरमुरारि. ... ३०७

त्रयोदशोऽध्यायः ।

रक्तपित्तादिचिकित्सनम् ३०७
रक्तपित्तस्य निदानसम्प्राप्ती ... ,,
पटोलादियोग ... ३०८
रसेन्द्रयोग ... ,,
ऊर्द्ध्वपातितपारदादियोग. ... ,,
चन्द्रकलारस ... ३०९
पटोलकादियोग ... ३१०
नवनीतादियोग. ... ,,
शिरीलेप' ... ,,
द्राक्षादिक्काथ' ... ,,
योगद्वयम् ३११
सितामृता ... ,,
कासचिकित्सा ... ,,
कासस्य निदानादिकम् ... ,,
अर्कादियोग ... ,,
रजतयोगः ... ,,
रत्नकरण्डकरसः ... ३१२

विषया:		पृष्ठाङ्का ।
भूताङ्कुशरस:	...	३१३
शोलवङ्करस	.	,,
अग्निरस	...	,,
भृङ्गराजयोग:	.	३१४
अर्कादियोग	...	,,
कासघ्नधूमद्वयम्	.	,,
स्वयमग्निरस	.	,,
क्षयकासान्तको योग	...	,,
श्वासचिकित्सा		३१५
श्वासस्य सम्प्राप्ति.	...	,,
ऊर्द्ध्वश्वासारि	...	,,
सूर्य्यावर्त्तरस	.	,,
सौगन्धिकःयोग	...	३१६
शिलादिचूर्णम्	.	,,
सूतपञ्चकम्	..	,,
श्वासारिवटक:	...	,,
भागोत्तरगुडिका	...	३१७
नीलकण्ठ	...	,,
श्वासकासकरिकेशरीरस:	...	,,
सूर्य्यरस	...	३१८
हिक्काचिकित्सा	.	,,
भागोत्तररस	...	,,
कज्जलयोग	...	,,
शिलापूतरस	...	३१९
रास्नादिक्षीरम्	.	,,
हिक्काघ्नधूम	.	,,
कासश्वासहिक्कास्वरभेद-चिकित्सा		,,
पर्पटीरस	..	,,
कफरोगे क्रियासूत्रम्	...	३२१
मन्थानभैरव	...	,,
गन्धपाषाणयोग	...	३२२
कफे भेषजविशेषनिर्देश:	...	,,
बिम्बादिवटिका	...	,,

चतुर्दशोऽध्याय: ।

विषया:		पृष्ठाङ्का: ।
राजयक्ष्मादिचिकित्सनम्		३२३
राजयक्ष्मलक्षणम्	...	,,
कनकसुन्दर.	...	,,
राजमृगाङ्क:		३२५
शङ्करेश्वर	..	,,
मृगाङ्कपोटली	...	३२६
मातुलुङ्गादियोग:	...	,,
रजन्यादियोग	...	,,
सौभाग्ययोग	..	,,
सुगन्धायोग	...	,,
रक्तवान्तिहरो योग:	...	३२७
मृगाङ्कपोटलीरस	...	,,
यक्ष्मणि औषधविशेषसेवनोपदेश		,,
पञ्चामृतरस	...	,,
जयन्तीयोग	...	३२८
लोकनाथरस.	..	,,
लोकेश्वररस	. .	,,
वैद्यनाथरस	...	३३०
लोकनाथ.	...	३३१
प्राणनाथ	...	,,
वज्ररस	...	३३२
महावीर		३३३
पञ्चामृतपर्पटी		३३४
गन्धकपिप्पल्यादियोग	...	३३६
राजावर्त्तरस	...	३३७
द्वितीयराजावर्त्तरस	. .	,,

पञ्चदशोऽध्याय: ।

अर्शसा चिकित्सनम्		३३७
अर्शसा स्वरूपलक्षणम्	...	,,

विषयाः	पृष्ठाङ्का ।
पित्तार्शोलक्षणम् .	३३८
वातार्शोलक्षणम् ..	,,
श्लेष्मार्शोलक्षणम् ..	,,
त्रिदोषजार्शोलक्षणम् .	,,
अर्शःकुठार .	,,
त्र्यूषादिमोदक	३३९
तीक्ष्णमुखो रसः .	,,
लौहाष्टकम ...	,,
श्लेष्मार्शसि औषधविशेषनिर्देश .	,,
सर्वलोकाश्रयो रस ..	३४०
अर्शोघ्न वटक .	,,
अर्शोघ्नी वटिका .	३४१
मूलकुठार .	,,
मल्लोदयप्रत्ययसार ..	३४३
कनकसुन्दर	३४४
अर्केश .	३४५
तीक्ष्णमुखः ...	३४६
अर्शःकुठारः ...	,,
त्रैलोक्यतिलकः ...	३४७
अर्शोहरयोग ...	३४८
देवदाल्यादिलेपः ...	३४९
अर्शःकुठारलेप ..	,,
अर्शोघ्नशौचः ..	,,
दुर्नामहरलेपः ...	,,
अर्शोघ्नी वर्त्तिः ...	,,
अर्कक्षीरादिलेपः ...	,,
शिग्रुमूलादिलेप ..	३५०

षोड़शोऽध्यायः ।

उदावर्त्तादिचिकित्सनम्	३५०
उदावर्त्तनिदानम् ...	,,
उदावर्त्तहर घृतम् ...	,,
अतीसारचिकित्सा .	३५१
अतीसारनिदानम्	३५१
दर्दुररस .	,,
द्वितीयदर्दुररस ...	,,
आनन्दभैरव. ..	,,
सुधासाररस ..	३५२
रसोत्तम .	३५३
स्वेदनीयन्त्रलक्षणम् ...	,,
लोकेश्वर ...	३५४
लोकनाथ .	,,
षाड्विन्दुतैलम् .	,,
नागसुन्दर	३५५
ग्रहणीचिकित्सा	३५६
ग्रहणीलक्षणम् ...	,,
ग्रहणीवज्रकपाट ..	,,
अग्निकुमार. .	,,
जम्बूकादिचूर्णम् ..	३५७
कनकसुन्दर .	,,
ग्रहणीकपाटः ...	,,
खण्डसङ्कृष्णटंककपाट. ...	३५८
लघुसिद्धाभ्रक ...	,,
सर्वारोग्यवटी ...	३५९
ग्रहणीमल्लकेशरी ...	३६०
शीघ्रप्रभाव ...	३६२
पोटली ...	३६३
वह्निज्वाला वटी .	,,
वज्रधर ...	३६४
ग्रहणीकपाट ..	,,
मुस्तादिचूर्णम् ...	,,
अजीर्णचिकित्सा	३६५
अजीर्णलक्षणम् .	,,
अजीर्णकण्टक ...	,,
विध्वंसनामा रस ..	,,
वृहत् विध्वंसनामा रस ...	३६६
अग्निकुमारः ...	,,

विषयाः	पृष्ठाङ्का ।	विषयाः	पृष्ठाङ्काः ।
बडवाग्निरस ...	३६६	लघुलोकेश्वर .	३७८
वराटीलक्षणम .	३६७	विदार्य्यादिकषाय .	३७९
श्रेष्ठमध्यमाधमवराटिकाया लक्षणम् ...	,,	क्षारप्रयोग	,,
वैराटलक्षणम् ..	,,	हारिद्रप्रयोग	,,
वैश्वानरपोटली	३६८	शैवयोग	३८०
बडवामुखी गुटिका	३६९	प्रमेहनिदानम् ..	,,
क्रव्यादनामा रस .	,,	**प्रमेहचिकित्सा** ...	,,
राजशेखरवटी	३७१	वङ्गेश्वरो रस ...	,,
द्वितीयाग्निकुमार	,,	गुडमार्कण्डी	,,
अमृतवटी	३७२	तालयोग	३८१
राक्षसनामा रस	,,	रक्तमेहे वङ्गप्रयोगः .	,,
जीवननामा ,,	३७३	शुक्रमेहे ,, ...	,,
बडवानलः	,,	मधुमेहे ,, ..	,,
अग्निजननी वटी .	३७४	शाल्मलीप्रयोग ..	,,
सर्वरोगान्तका ,,	,,	रक्तमेहे बोलबद्धरसस्य प्रयोगोपदेश	,,
अग्निकरम्	,,	श्लेष्मातकक्वाथ ...	३८२
		कुष्माण्डस्वरसप्रयोग ..	,,
सप्तदशोऽध्यायः ।		स्त्रीणां रक्तस्रावे तीव्रयोग ..	,,
		चन्द्रप्रभा गुटिका ...	,,
मूत्रकृच्छ्राश्मर्य्यादि-		प्रमेहगजसिंह	३८३
चिकित्सनम् ..	३७५	महाविद्या गुटिका	,,
अश्मरीनिदानम् ...	,,	बहुभावितप्रमेहारिः	३८४
अश्मरीमूत्रकृच्छ्रचिकित्सा	,,	उमाशम्भु ..	३८५
		नागसूतयोग	३८६
पाषाणभेदी रस. ...	,,	कान्तादिगुडिका	३८७
गोक्षुरप्रयोग.	३७६	कासीसादिमोदकम् ...	,,
पाण्डुरादियोग ...	,,	भीमपराक्रम ..	३८८
शुक्लपिण्याकादियोग ...	,,	सञ्जीवन	३८९
मूत्रकृच्छ्रान्तको रस	,,	मेहमर्दन	,,
द्वितीयपाषाणभेदी ,, .	३७७	रामबाणरस ...	३९०
गोक्षुरादिचूर्णम् ..	,,	राजमृगाङ्क .	३९१
त्रिविक्रम ...	,,	मेहहर .	३९२
आनन्दभैरवी वटी ...	३७८	उदयभास्कर ...	३९३
अश्मरीहरयोग. ...	,,	मेहकुठार. ...	३९५
यवक्षारप्रयोग. ...	,,	हिमांशु. ...	,,

विषयाः	पृष्ठाङ्का ।
वसन्तकुसुमाकरः	३९६
मेहहर	,,
मेहारिः	३९७
मेहवज्ररसः	३९८
हरिशङ्कररसः	,,

अष्टादशोऽध्यायः ।

विद्रध्यादिचिकित्सनम्	३९९
विद्रधेर्निदान सम्प्राप्तिश्च	,,
विद्रधिचिकित्सा	,,
सर्वेश्वरपर्पटी	,,
वरुणकषाय	४०२
शोभाञ्जनादिक्वाथ	,,
सर्वामयहरी रस	,,
वृद्धिचिकित्सा	४०४
दार्वीप्रयोग	,,
वातारिरसस्य प्रयोगोपदेश	,,
वातारि	,,
लार्द्रकप्रयोग	४०५
अन्त्रवृद्धौ पानीयतैलम्	,,
,, पानीयतैलान्तर घृतञ्च	,,
,, मासरस	४०६
,, द्वितीयमासरस	,,
गुल्मपूर्वरूपम्	,,
गुल्मचिकित्सा	,,
गन्धकादिपोटलीरस	,,
गन्धकादिपोटल्या प्रयोगान्तरम्	४०७
वृद्धेश्वर	४०८
देवदालीपञ्चाङ्गचूर्णम्	,,
तक्रासव	,,
एरण्डक्षारम्	४०९
शरपुङ्खादियोग	,,
वज्रक्षारप्रयोगोपदेश.	,,
काञ्चनीप्रयोग	४०९
शौङ्गि रक्तमोक्षणोपदेश	,,
शिखिवाडवः	४१०
दीतामर.	,,
विद्याधरः	४११
व्योषादिचूर्णम्	,,
देवदार्वादिचूर्णम्	,,
रक्तोदरकुठार	,,
वैश्वानररस	४१२
अग्निकुमार	,,
सर्वाङ्गसुन्दर प्राणेश्वरी रस.	४१३
गुल्मनाशन.	४१४
शूलचिकित्सा	४१५
अग्निमुख	,,
क्षारप्रयोगः	४१६
विनेव	,,
सौभाग्ययोग	,,
चिन्तामणि	४१७
शूलकेशरी	,,
वन्ध्यादिक्षार	४१८
मृतोत्थापन.	,,
क्षारताम्रम्	४१९
शूलान्तक	४२०
द्वितीयोऽग्निमुख	,,
द्वितीयविनेत्र	४२१
उदयभास्कर	,,
शूलगजकेशरी	४२२
द्वितीयक्षारताम्रम्	४२३
ताम्राष्टकम्	,,
वडवानलगुटिका	,,
अग्निकुमार	४२४
शम्बूकादिलौहम्	४२५
इन्द्रवारुणिकादिचूर्णम्	,,
भूदार्वादियोग	,,
सद्य शूलहरी योग	,,

विषया'	पृष्ठाङ्का' ।
अथ शूलहरयोगद्वयम्	४२६
चारवटी	„
कार्श्यचिकित्सा	४२७
अमृतार्णव	„
पूर्णचन्द्र	„
स्थौल्यचिकित्सा	„
बडवाग्निमुख	„
स्थौल्ये पूर्वक्तमिदंम.	४२८
मध्वार्द्रकप्रयोग	„
अग्निकुमार	„
अम्लपित्तनिदानम	४२९
अम्लपित्तचिकित्सा	„
अम्लपित्तोपचारा.	„
वमनयोग'	„
विरेचनयोग'	„
लीलाविलास	„
कुष्माण्डखण्डम्	४३२
ताम्रद्रुति'	„
पित्तरोगचिकित्सा	४३३
पित्तान्तकरस	„
दशसारम्	४३४

एकोनविंशोऽध्याय: ।

उदरादिचिकित्सनम् ...	४३५
ज्ञलोदरलक्षणम्	„
वातोदरलक्षणम्	„
उदरपाण्डुशोफकामलाकुम्भकामला हलीमकचिकित्सा ..	„
जीमूतकादिगुडिका	„
विनोदविद्याधर	४३६
दन्तिबीजादिरस	„
मृत्युञ्जय	„
उदरे विरेचनविधि'	४३७

विषया'	पृष्ठाङ्का' ।
त्रैलोक्यसुन्दर	४३७
महावह्नि	४३८
गुडनागरप्रयोग:	४३९
वज्रचार'	„
खदिरादियोग	४४०
पिप्पलीप्रयोग.	„
वैश्वानर	„
सूर्य्यप्रभा गुटिका	४४१
उदयमार्त्तण्डरस	„
पाण्डुरोगस्य सङ्क्षिप्तलक्षणम्	४४२
पाण्डुरोगचिकित्सा	„
हंसमण्डूर	„
कालविध्वंसन.	„
पञ्चानन	४४४
आरोग्यसागर	४४५
पाण्डुघनानिलरस	४४६
पाण्डुहारिहरीतकी	४४७
पित्तपाण्डुरिगुटिका ..	४४८
त्रैलोक्यसुन्दर	„
पाण्डुशोथे त्रिनेत्ररसस्य प्रयोगविधि	„
विजयागुटिका	४४९
टङ्कणादियोग	„
जयपालरस	„
टेवटालीपञ्चाङ्गप्रयोग	„
कामलालक्षणम्	४५०
अपामार्गादियोग	„
पञ्चास्यरस	„
वियोनि.	४५१
मुस्तादिचूर्णम्	„
कामेश्वर.	„
पाण्डुघनानिलरस	४५२
कासादिपञ्चकम्	४५३
सिन्दूरभूषण.	„

विषया:	पृष्ठाङ्का: ।
विंशोऽध्यायः ।	
विसर्पादिचिकित्सनम्	४५४
विसर्पकुष्ठश्वित्रचिकित्सा	,,
कालाग्निरुद्ररस	,,
एरण्डवीजादितैलम्	,,
द्वितीयैरण्डवीजादितैलम्	४५५
गलत्कुष्ठलक्षणम्	,,
कुष्ठेषु क्रियासूत्रम्	,,
वातकुष्ठारि	४५६
पित्तकुष्ठारि	,,
श्लेष्मकुष्ठारि	४५७
त्रिदोषकुष्ठारि:	,,
विजयवटिका	,,
सर्वेश्वर	४५८
सुप्तिकुष्ठदलनो रस	,,
प्रतापलङ्केश्वरः	४५९
किटिमारितैलम्	,,
सिध्मे गन्धपाषाणलेप	,,
,, वराटिकालेप:	४६०
दद्रुकुष्ठे मयूरक्षारादिलेप	,,
चर्मकुष्ठे पर्पटीरसप्रयोगविधि	,,
,, मेघनादाद्युद्वर्त्तनम्	,,
शतारुषि रसादिषट्कम्	,,
कुष्ठविधूननो रस	४६१
मञ्जिष्ठादिगण	,,
सिध्मोद्भवरयो कटुणीतैलम्	,,
पामारितैलम्	,,
तालेश्वर	४६२
महातालेश्वर	४६३
सर्वकुष्ठान्तकृत्तैलम्	४६४
कुष्ठविध्वसनो लेप	,,
आनन्दसुन्दर	,,
हरिवलाङ्कुश	४६५
त्रिपुरान्तक	४६६

विषया	पृष्ठाङ्का ।
विश्वहित	४६६
निर्गुण्ड्यादिप्रलेप	४६७
कुष्ठराक्षस	,,
व्योषादिगुडिका	,,
कुष्ठकुठाररस	,,
गुञ्जाद्युद्वर्त्तनम्	४६८
वज्रशेखर	,,
कुष्ठविद्रावणतैलम्	४६९
दद्रुकुष्ठविद्रावणरस	४७०
माणिक्यतिलक	४७१
परहित	,,
तालकेश्वर	४७२
खगेश्वर	४७४
कुष्ठनाशन:	४७५
आरोग्यवर्द्धनी गुटिका	,,
नारायण	४७६
मेदिनीसाररस	,,
जन्तुघ्नी गुटिका	४७८
धन्वन्तरि	४७९
वज्रधार:	,,
सर्वकुष्ठाङ्कुश	,,
द्वितीयमहातालेश्वर	४८०
द्वितीयकुष्ठकुठार	,,
वज्रतैलम	४८१
स्वर्णक्षीर	४८२
महाभल्लाततैलम्	,,
त्रैलोक्यविजयतैलम्	४८३
महामार्त्तण्डतैलम	,,
काञ्चनीतैलप्रयोगोपदेश	४८४
गुञ्जाकाण्डहरकुमार्य्यादिलेप	,,
विपादिकायां सैन्धवादिलेप	,,
कण्डूव्रणादौ शिलादि	,,
कुष्ठान्तपर्पटी	,,
काशीशवड़ी रस	४८५
द्वितीयसर्वेश्वर	,,

विषयाः	पृष्ठाङ्का ।
योगराजगुग्गुलुप्रयोगोपदेश ..	४८६
श्वित्रलक्षणम्	,,
श्वित्रारि .	४८७
श्वित्रे निम्बादिचूर्णम्	,,
श्वित्रकुष्ठारि .	,,
चन्द्रप्रभा वटिका ..	४८८
ताम्रलिप्तकज्जली	,,
उदयादित्य	४८९
अल्पश्वित्रे शिलादिलेप	४९०
अङ्कोलतैलादिलेपद्वयम् .	,,
चतुर्गुणगन्धककज्जली	,,
श्वेतारियोग ..	४९१
कृष्णीकरणयोग	,,
गन्धकादिक्षार ..	४९२
उडम्बरादिचूर्णम् ..	,,
अङ्कोलादितैलम्	४९३
कुष्ठारितैलम्	,,
क्रिमिलक्षणम्	,,
क्रिमिचिकित्सा	४९४
क्रिमिशूलहरो रस	,,
अग्नितुण्डरस .	,,
क्रिमिज्वरे आखुपर्णीप्रयोग	,,
क्रिमौ पर्पटीप्रयोगोपदेश ..	४९५
क्रिमिशूलसंहार	,,
अजमोदादिवटिका .	,,
सूतभस्मप्रयोग	,,
क्रिमिहरो रस ..	४९६
कीटमर्दो ,,	,,

एकविंशोऽध्यायः ।

विषयाः	पृष्ठाङ्का ।
वातव्याध्यादिचिकित्सनम्	४९७
महारोगनामानि	,,
शीतवातलक्षणम्	,,
शीतारि	,,
विजयागुटिकाप्रयोगोपदेश ...	४९८
शीतारि .	,,
स्पर्शवातलक्षणम् ...	४९९
सर्वेश्वर. ..	,,
अर्केश्वर ...	,,
तारादिगुडिका	५००
स्पशवाते राजवृक्षप्रयोग: .	,,
,, चक्रमर्दादि ..	,,
स्पर्शवातान्तकवटिका	५०१
अस्पशवातारितैलम्	,,
अस्पर्शवाते विगन्धप्रयोग	५०२
,, ह्रियावलीप्रयोग	,,
,, अर्कदुग्धप्रयोग	,,
,, हल्यादिलेप	,,
,, रसेन्द्रलेप .	५०३
गन्धाश्मगर्भरस	,,
द्वितीयगन्धाश्मगर्भरस ..	,,
अस्पर्शारिरस	५०४
रक्तवातलक्षणम् .	,,
रक्तवातचिकित्सा	,,
हरीतक्यादिचूर्णम् ..	,,
कोकिलाक्षादिकषाय ..	५०५
संशोधनोपदेश .	,,
रक्तवाते अपथ्यम् ..	,,
आमवातलक्षणम् .	,,
आमवातचिकित्सा ...	,,
आमवाते वातारिरसप्रयोगोपदेश	,,
अनिलारियोग .	५०६
आमवाते एरण्डतैलप्रशंसा	,,
अपस्मारलक्षणम् .	,,
अपस्मारचिकित्सा ..	,,
अपस्मारे पर्पटीरसस्य प्रयोगविधि	,,
ब्राह्म्यादिनस्यम्	,,
गवाक्ष्यादिनस्यम् ...	५०७
श्वेतापराजितादिनस्यम्	,,

विषया: — पृष्ठाङ्का ।

अपस्मारहरनस्यम् ... ५०७
अपस्मारहरी योग .. ,,
उन्मादलक्षणम् . ,,

उन्मादचिकित्सा ५०८

उन्मादे पर्पटीरसस्य प्रयोगविधि ,,
,, उपचारविशेषा . ,,
माहेश्वरी धूप ,,
एकाङ्गवातलक्षणम् ५०९

एकाङ्गवातचिकित्सा ,,

एकाङ्गवाते पर्पटीरसस्य प्रयोगविधि ,,
सर्जतैलम् . ,,
सर्वाङ्गवायौ शतावर्य्यादिगुग्गुलु ५१०

विविधवातव्याधिचिकित्सा ,,

योगराजगुग्गुलु ,,
द्वितीययोगराजगुग्गुलु ... ५११
बडवानल ५१२
मार्त्तण्डेश्वर: .. ५१३
चतुर्मुखरस ,,
सर्ववातारि: . ५१५
वातविध्वंसन: ... ५१६
वृकोदरगुटिका ... ५१८
प्रभावती वटी ... ५१९
एकाङ्गवाते पर्पटीरसप्रयोगे
विध्यन्तरम् ... ५२०
विजयभैरवतैलम् . ,,
स्वच्छन्दभैरव .. ५२१
द्वितीयविजयभैरवतैलम् .. ,,
द्वितीयबडवानल . ५२२
द्वितीयस्वच्छन्दभैरव ,,
षडङ्गगुग्गुलु .. ५२३
षडङ्गयोग ... ,,
त्रिफलाद्य यमकम् . ,,
खञ्जवाते आनन्दभैरवप्रयोगोपदेश ,,
निर्गुण्डीप्रयोग. ... ५२४

विषया: — पृष्ठाङ्का: ।

रसोनखण्डप्रयोग: ... ५२४
इन्द्रवारुणीप्रयोग ,,
सर्वाङ्गवातारिरस ,,
त्र्यम्बकेश्वररस ५२५
गगनगर्भा वटी ,,
वातगजाङ्कुश ,,
वातरक्तलक्षणम् ५२६

वातरक्तचिकित्सा ,,

वातरक्ते अन्याधिकारोक्तौषध
प्रयोगोपदेश .. ,,

पित्तरोगचिकित्सा . ,,

चन्द्रावलेह. . ,,
ऐलेयसर्पि ... ५२७
ऐलेयकप्रयोग: ५२८
ऐलेयकतैलम् . ,,
ऐलेयकास्रवप्राश ... ५२९

द्वाविंशोऽध्यायः ।

बन्ध्यादिचिकित्सनम् .. ५३०

बन्ध्याया दोषभेदादिकम् ... ,,
बन्ध्यस्य ,, ,, .. ,,
बन्ध्यालक्षणम् ,,
जयसुन्दर ५३१
रत्नभागोत्तर ... ५३२
चक्रिकाबन्ध .. ५३३
वर्द्धमान . ५३४
द्रुतिसार ५३७

बन्ध्यागर्भसम्प्राप्ति: . ५३८

सर्पाक्षीप्रयोग .. ,,
देवदालीप्रयोग .. ५३९
शरपुङ्खाप्रयोग . ,,
रुद्राक्षादिप्रयोग. ... ,,

विषया	पृष्ठाङ्का ।
श्वेतकण्टकारीप्रयोग	५३९
विष्णुक्रान्ताप्रयोग	५४०
अश्वगन्धाप्रयोग	,,
मृतवत्सालक्षणम्	,,
शङ्करोक्तदैवव्यपाश्रयचिकित्सा	,,
युक्तिव्यपाश्रये वन्ध्याकर्कोटकीप्रयोग	५४२
प्रथममासे पद्मकादिकल्क	,,
द्वितीयमासे नीलोत्पलादिकल्क	,,
तृतीयमासे श्वेतखण्डादिकल्क	,,
,, नीलोत्पलादिकल्क	,,
गर्भिणीज्वरे पाठादिकषाय	५४३
,, छिन्नादिकषाय	,,
,, पयस्यादिकषाय	,,
गर्भिण्यतीसारे वृक्षकत्वगादिकषाय	,,
,, श्रीपर्ण्यादिबलादिक्वाथौ	,,
गर्भिण्या उदावर्त्तादौ पुनर्नवादिक्वाथ	५४४
,, शोथादौ अन्यादिक्वाथ निर्गुण्ड्यादिचूर्णञ्च	,,
गर्भिणीशोथे पुनर्नवादिलेप .	,,
गर्भिण्या उदावर्त्तादौ वर्षाभूक्वाथ	,,
,, पित्तार्त्तौ यष्टिकादियवागू	,,
,, श्वासकासे तिक्तादिकषाय	५४५
गर्भिणीकासे मरिचप्रयोग	,,
गर्भिण्या वान्तौ लाजादिकषाय	,,
,, हिक्कायां वालविल्वप्रयोग	,,
,, अग्निमान्द्ये अजमोदादिचूर्णम्	,,
,, वातरोगे वालादिक्षीर क्षीरयवागूश्च ..	,,
,, मूत्ररोगे श्वदंष्ट्रादिक्वाथ	५४६
,, मासानुमासिकयोगा ...	,,
गर्भिणीवाते उशीरादिक्षीरम्	५४७
,, द्राक्षादियवागू .	,,
गर्भिण्याः पित्ते बलादिक्वाथ .	,,
,, कामलादौ ,, ...	,,

विषयाः	पृष्ठाङ्का ।
गर्भिण्याः सर्वरोगे बलाप्रयोग.	५४७
मूढगर्भाया लक्षणम्	,,
अन्तर्मृतापत्याया लक्षणम् ..	५४८
मूढगर्भाया असाध्यलक्षणम्	,,
मूढगर्भचिकित्सा	,,
करञ्जबीजादिप्रलेप अहिनिर्मोक-सुहीक्षीरप्रयोगौ च	,,
हलिनीप्रयोग	५४९
यष्टिकादिकल्क	,,
लाङ्गल्यादिलेप	,,
मातुलुङ्गी रम्भाप्रयोगौ	,,
सिद्धार्थादिवर्त्ति ..	,,
सिद्धार्थकानुवासनम्	५५०
सूतिकाचिकित्सा	,,
कोरण्टकादिक्वाथ	,,
पञ्चमूलक्वाथः	,,
भूनिम्बादितैलम् ..	५५१
सौभाग्यशुण्ठी	,,
पर्पटीरस ..	५५२
स्वर्णादिप्रयोग ...	५५३
योनिव्यापच्चिकित्सा	,,
योनिशूले निर्गुण्डीप्रयोग	,,
प्रस्रंसिन्या कारलीकन्दप्रयोग	,,
शिथिलयोनौ इन्द्रगोपप्रयोग	,,
विवृताया माकन्दमूलादिलेप	५५४
श्रीपर्णीतैलम्	,,
वालचिकित्सा ..	,,
वालस्य गर्भक्लेशनिवारणोपाय ..	,,
सद्योजातबालस्य संज्ञाजननोपाय	५५५
,, ज्वरादिनिवारणोपाय	,,
पित्तज्वरे रोहिणीक्षीरम् .	,,
,, अश्वत्थक्षीरम् ..	५५६
गन्धोत्पलजटादिकल्क. ...	,,

विषया:	पृष्ठाङ्का ।
महटैन्यादिचूर्णम्	५५६
न्यग्रोधादिक्काथ	,,
रक्तातीसारहरचूर्णम्	,,
सचोरबोलप्रयोग	५५७
मधुकादिकल्क	,,
यष्ट्यादिघृतम	,,
अङ्कनाभ्यादिवर्त्ति	,,
अश्वगन्धाघृतम	,,
तालकण्टकलक्षणम	५५८
तालकण्टकचिकित्सा	,,
गुदकीटस्य निदानलक्षणे	५५९
गुदकीटचिकित्सा	,,
गुदपाकचिकित्सा	५६०
मुखपाकचिकित्सा	,,
नाभिपाकचिकित्सा	,,
कुण्डलचिकित्सा	५६१
बालपञ्चामृतम्	,,
तिक्ताद्य घृतम्	,,
राजीकुष्ठादिप्रलेप	५६२
ग्रहघ्नी गुटिका	,,
माहेश्वरी धूप.	,,
छिन्नादितैलम्	,,
स्फूर्जकादितैलम्	५६३
निम्बादिघृत चौरञ्च	,,
शैलेयादिधूप.	,,

त्रयोविंशोऽध्याय: ।

विषया:	पृष्ठाङ्का ।
उन्मादवातादिचिकित्सनम्	५६४
उन्मादस्य निदानसम्प्राप्ती	,,
उन्मादलक्षणम्	५६५
उन्मादचिकित्सा	,,
अकमूर्त्तिरसस्य प्रयोगविधि	,,
निर्गुण्ड्यादितैलम्	५६६
माहेश्वरो धूप	५६६
अपस्मारसम्प्राप्तिलक्षणे	,,
अपस्मारचिकित्सा	५६७
अपस्मारनाशनो रस	,,
धुस्तूरपञ्चाङ्गघृतम्	५६८
चूर्णाञ्जनम्	,,
मसीयोग	५६९
तिलनदीपाञ्जनम्	,,
चण्डभैरवरस	५७०
नवाङ्गवटिका	,,
सूतकप्रत्यय	,,
पर्पटीरसप्रयोगविधि	५७१
पर्पटीरसस्य अन्यविधप्रयोगविधि	,,
सर्वेश्वर	,,
नेत्ररोगाणा सङ्ख्या	५७२
नेत्ररोगचिकित्सा	५७३
नागादिवर्त्ति	,,
वाताभिष्यन्दे इन्द्रादिवर्त्ति	,,
श्लेष्माभिष्यन्दे शुल्वादिवर्त्ति	५७४
त्रिदोषाभिष्यन्दे रसेन्द्रादिवर्त्ति	,,
पित्ताभिष्यन्दे तीक्ष्णादिवर्त्ति	,,
,, नागादिवर्त्ति	५७५
ताम्रादिवर्त्ति	,,
पारदादिवर्त्ति	५७६
एकविंशाङ्गवर्त्ति.	,,
षडङ्गवर्त्ति	,,
गरुडाञ्जनम्	५७७
नयनामृताञ्जनम्	,,
तिमिरहराञ्जनम्	,,
द्वादशाङ्गवर्त्ति	५७८
पटलहरेन्द्ररस	,,
स्वर्णादिवर्त्ति	,,
विषाद्यञ्जनम्	,,
पुष्पहराञ्जनम्	,,

विषयाः	पृष्ठाङ्काः ।
शिग्रुमूलाद्याश्च्योतनम् ...	५७९
नेत्रशूलघ्नमाश्च्योतनम्	,,
पौनर्नवाञ्जनम्	,,
स्रावहराञ्जनम्	,,
वक्ररोगहराञ्जनम्	,,
नृकपालाञ्जनम्	,,
शिग्रुबीजतैलाश्च्योतनम्	५८०
पटलहराञ्जनम्	,,
तिमिरनाशनाञ्जनम्	,,
काचान्ध्यहराञ्जनम्	५८१
शम्बूकादिवर्त्ति	,,
अभिष्यन्दहरो योग	,,
रात्र्यन्धहराञ्जनम्	,,
रात्र्यन्ध्ये व्योषाञ्जनम्	५८२
मरिचाञ्जनम्	,,
पञ्चाङ्गगुडिका	,,
नवनेत्रदावी वटी	,,
हिङ्गुत्तरकणादिवर्त्ति ...	५८३
ताम्रवर्त्ति	,,
ताम्रद्रुति	५८४
द्वितीयताम्रद्रुति ...	,,
गन्धकद्रुति	५८५

चतुर्विंशोऽध्यायः ।

विषयाः	पृष्ठाङ्काः ।
कर्णरोगादिचिकित्सनम्	५८६
कर्णरोगाणां नामानि ...	,,
कर्णरोगचिकित्सा	५८८
कर्णशूले लवणार्द्रकप्रयोग	,,
गोमक्षिकायां क्रिमिकर्णारितैलम्	,,
कर्णशूले तिलपर्णीप्रयोग	,,
,, अर्कपत्रप्रयोग	,,
,, रसोनप्रयोगः ...	५८९
पूयस्रावे मेघनादप्रयोग. ...	,,
बाधिर्य्ये मुषल्यादिचूर्णम् ...	५८९
कर्णमूलस्फोटे कतकादिलेपः	,,
,, ,, पुत्रजीवलेप	,,
गोमक्षिकायां तगरादिपूरणम् ...	,,
पालीवर्द्धने मुषलीप्रयोग ...	५९०
,, चर्मचेटप्रयोग ...	,,
,, वराहवसाप्रयोग	,,
वज्रादिवटिका	,,
कुष्ठाद्य तैलम्	५९१
नासारोगाणां नामानि	,,
पूयास्रलक्षणम्	५९२
नासारोगचिकित्सा ...	,,
पूयास्रे जीरकादिनस्यम्	,,
पीनसहरनस्यम् ...	,,
कामलाहराञ्जनम्	,,
कामलाहरद्वितीयाञ्जनम्	५९३
मणिपर्पटी ...	,,
मुखरोगाणां सङ्ख्यानिर्देशः	,,
गलकीलके आमलकप्रयोग	५९४
,, विषतिन्दुकादिवटी ...	,,
,, सैन्धवप्रयोग ...	५९५
,, भल्लातकप्रयोग	,,
दन्तदार्ढ्ये जयाप्रयोग	,,
मुखपाके पर्पटीरसप्रयोगोपदेशः	,,
मुखशोषे महाराष्ट्री गुटिका	५९६
मुखवैवर्ण्ये पुनर्नवाद्युद्वर्त्तनम्	,,
नीलिकायां रजन्यादिप्रलेप	,,
मुखवैवर्ण्ये वङ्गभस्मप्रयोग	,,
मुखवैवर्ण्यादौ मातुलुङ्गादिप्रलेप	,,
मुखवैवर्ण्ये हरिद्रादिलेप ...	,,
मुखदौर्गन्ध्ये कुष्ठादिवटी	५९७
,, गृहधूमक्वाथः	,,
,, पथ्यादिवटिका	,,
मुखवैरस्ये लाजादिचूर्णम्	,,
उपजिह्वायां निर्गुण्ड्यादियोग.	५९८

विषयाः	पृष्ठाङ्काः ।
क्रिमिदन्ते अभयागुडिका	५९८
„ काशीशादिगुडिका	„
„ विशालाधूम ..	„
चलदन्ते जातीपत्रादिचर्वणम्	५९९
„ मूलकबीजप्रयोग	„
मुखवैरस्ये आरनालगण्डूष ..	„
चूर्णदग्धे तैल काञ्जिकगण्डूषौ	„
सहस्रशोकधारियोग	„
कण्ठशालूकादौ पारदादिप्रलेप	६००
गलकीले सैन्धवप्रलेप	„
मुखरोगे ताप्यादिवटी ..	„
गलरोगे मण्डूरलेप ..	„
अपचीगण्डमालयो काञ्चन्यादिलेप	„
गण्डमालाया ब्रह्मदण्डीप्रलेप .	६०१
„ पञ्चाङ्गप्रलेप मुण्डीप्रलेपश्च	„
„ जैपालप्रलेप .	„
चलदन्ते हिमतारादिगुटिका .	६०२
„ धातुबद्धरसगुटिका	„
शिरोरोगाणा नामानि	६०३
शिरोरोगचिकित्सा .	६०४
अर्द्धावभेदके गिरिकर्णीप्रयोग. ..	„
„ गुडादिनस्यम् ...	„
„ मरिचप्रलेप .	„
चन्द्रकान्तो रस .	„
शिर शूले कुङ्कुमादिनस्यम्	„
अर्द्धावभेदके मरिचप्रयोग	६०५
शिर शूले कुङ्कुमप्रयोग	„
यूकालिक्षाया पारदप्रयोग ...	„
दारुणहरतैलम्	„
केशपाते हरिद्रादिलेप ..	„
„ वाङ्गजातीप्रलेप	६०६
„ शृङ्गाटादितैलम्	„
इन्द्रलुप्ते भल्लातादिलेप	„
„ गुञ्जाप्रयोग .	६०७
सूर्य्यावर्त्तादौ अभ्रादिवटिका ..	„
पलितादौ कटुतैलनस्यम् ...	„

विषयाः	पृष्ठाङ्काः ।
खालित्ये गुञ्जादितैल विषतैलञ्च	६०८
व्रणस्य भेदनिर्देश	„
व्रणचिकित्सा ...	६०९
व्रणशोधने ताम्रप्रयोग ..	
व्रणरोपणे पटोलादिपूरणम्	„
„ निम्बपत्रादिपूरणम् .	„
जात्याद्यं घृतम्	६१०
व्रणरोपणे अपामार्गप्रयोग .	„
„ गुडटङ्कणवर्त्ति .	„
व्रणलिखने पारदादिलेप	„
भग्नस्य भेदनिर्देश .	६११
भग्नचिकित्सा	„
भग्ने पर्पटीरसप्रयोगविधि	„
„ वज्रीलेप कालपाषाणलेपश्च	„
भगन्दरलक्षणम् .	„
भगन्दरस्य निरुक्ति	६१२
भगन्दरचिकित्सा	„
भगन्दरे उपचारविशेष .	„
लाङ्गल्यादिप्रलेप	„
कालाग्निरस	६१३
चक्रिकाबद्धरसप्रयोगोपदेश	„
रविताण्डवरस	„
स्फोटके चतुरङ्गलेप .	६१४
„ हरिद्रादिप्रलेप	„
शोषणे नरास्थितैलप्रयोग ..	„
शोधनरोपणे ताम्रप्रयोग	„
रोपणे मार्जारास्थिप्रलेप	६१५
क्षालने त्रिफलाक्वाथ	„
भूलताप्रयोग .	
कुक्कुरास्थिलेप .	„
ग्रन्थेर्लक्षणं व्युत्पत्तिश्च ..	६१६
मेदोग्रन्थौ अरिमेदादिभस्मलेप	„
मेदोवृद्धौ गुडूच्यादि .	„
गण्डमालायामुदयभास्करप्रयोगोपदेश.	„

विषया॰	पृष्ठाङ्का ।
कालस्फोटादौ पुत्रजीवप्रयोग	६१६
सन्धिग्रन्थौ रक्तस्रावविधि ..	६१७
कच्छग्रन्थ्यादौ पुत्रजीवप्रयोग .	,,
कालस्फोटे गुञ्जापवादिचूर्णम ..	,,
,, विष्णुक्रान्तादिप्रलेप	६१८
ग्रन्थ्यादौ पुनर्नवादिप्रलेप	,,
अर्बुद शोणितार्बुदलक्षणम् ..	,,
अर्बुदादौ पुटपक्करम .	,,
अर्बुदे यवक्षारादिलेप	६१९
गण्डमालाऽपचीलक्षणम्	,,
गण्डमालाया सुरवाकुलादियोग	६२०
,, अर्कचीरादिलेप .	,,
अपच्या गिरिकर्णिकाप्रयोग ..	६२१
गण्डमालाया कुकुन्दरीतैलम	,,
,, सहदेवीप्रयोग .	,,
अपच्यादौ गुञ्जादिलेप ...	,,

पञ्चविंशोऽध्यायः ।

क्षुद्ररोगादिचिकित्सनम्	६२२
क्षुद्ररोगाणा नामानि ..	,,
क्षुद्ररोगचिकित्सा .	६२३
क्षुद्ररोगे पर्पटीप्रयोगविधि ..	,,
व्यङ्गे अश्वखुरप्रयोग जातीफलप्रयोगश्च	,,
,, इङ्गुदीमज्जप्रयोग ...	,,
कुनखे स्नुहीक्षीरादिप्रलेप .	६२४
,, अभयाप्रयोग ..	,,
,, कुष्ठादिप्रलेप ..	,,
,, पुत्रजीवप्रयोग .	,,
कक्षाग्रन्थौ शिग्रुप्रयोग	,,
,, विषादिलेप ..	,,
स्तनविद्रधौ क्रियाक्रम॰ .	६२५
स्तनविद्रधिस्फोटने एकवीरप्रयोग	,,
स्तनविद्रधिरोपणे यष्ट्यादिचूर्णम्	,,
स्तनविद्रधिरोपणे दारुवर्त्ति ...	६२५
लिङ्गरोगे बोलप्रयोग .	,,
लिङ्गपाके उडुम्बरादिक्षालनम्	६२६
,, जीरकप्रयोग .	,,
,, महाशङ्खप्रयोग .	,,
लिङ्गरोगे घोण्टादिलेप	,,
लिङ्गपाके गन्धकप्रयोग .	,,
,, निम्बादिचूर्णम ...	,,
लिङ्गव्रणरोपणे सैन्धवप्रयोग ..	६२७
लिङ्गव्रणादौ शिग्रुप्रयोग	,,
लिङ्गादिगतग्रन्थौ कुष्ठादिलेप	,,
गुह्यादिगतपिडकायाम अश्वत्थादिप्रलेप	,,
लिङ्गादिपिडकाया बाकुचीचित्रक प्रयोगौ ...	,,
लिङ्गादिपिडकाया सर्पाक्षीप्रयोग	६२८
लिङ्गरोगे लवङ्गादिधूम .	,,
कण्ड्वादौ काञ्चनीप्रयोग ...	६२९
पामाया आखोटकक्वाथ .	,,
पादकण्डूहरयोग ..	,,
पाददाहे तिलादिचूर्णम् ..	,,
पादकण्डूहरयोगान्तरम् ...	६३०
पादस्फुटने पथ्यामर्दनम् .	,,
कदरे यवचिञ्चादिकषाय .	,,
विपादिकाया गुडादिप्रलेप .	,,
,, मदनादिप्रलेप .	६३१
कण्ड्वादौ रसादिप्रलेप .	,,
स्वरभङ्गे रसादिवटिका ..	,,
,, देवदार्वादिचूर्णम् ..	,,
गलदाहे सैन्धवादिचूर्णम् ...	६३२
,, करञ्जमज्जा पथ्याप्रयोगौ	,,
स्तनवर्द्धने बलादिप्रलेप ..	,,
,, सेहुनस्यम्	,,
स्तनविद्रधौ कुरुवकतैलम् ..	६३३
,, गुल्मप्रयोग. .	,,
स्नायुके कुम्भीप्रयोग. ...	,,

विषया	पृष्ठाङ्का ।
भस्मकलक्षणम	६३४
श्लीपदस्य सम्प्राप्तिलक्षणे	,,
श्लीपदे चक्रेश्वरी रस .	,
. गुडूच्यादिलेप	६३५
वल्मीके बहुभावितपित्तलप्रयोग	,,
स्थौल्ये विडङ्गादिचूर्णम्	६३६
,, त्रिफलादि यवादिकषायौ	६३७
विपरीतरतिजव्याधिलक्षणम् .	,,
विपरीतरतिजव्याधिप्रतीकार	,,
उपदंशादिप्रतीकार	६३८
रक्तविकृतौ बोलबद्धरसप्रयोगोपदेश	,,
अस्थिभग्ने लाक्षादिप्रलेप .	,,
स्नायुके अस्पर्शादिप्रयोगोपदेश	,,
योनिव्यापन्निदानम् .	६३९
योनिव्यापत्सु पिष्टीयोग	,,
योनिशूले निम्बादिगोलकम् ..	,,
योनिरोगे सोमराज्यादिप्रलेप ..	६४०
योनिक्रिमिशूले रसोनादिप्रलेप	,,
फलघृतम ...	,,
रजोनाशे वियोनिरसप्रयोगविधि	६४१
पुष्परोधहरयोगत्रयम्	,,
पुष्परोध-रक्तगुल्महरयोगद्वयम्	,,
पुष्परोधे चणकप्रयोग	६४२
,, गुडव्योषादिचूर्णम्	,,
गर्भाजनने धुस्तूरप्रयोग	,,
,, सैन्धवप्रयोग	,,
गर्भस्रावणे चूर्णप्रयोग	६४३
,, एरण्डप्रयोग ..	,,
,, चित्रकप्रयोग	,,
अतिरक्तस्रावे शरपुङ्खाप्रयोग	,,
,, अर्कमूर्त्तिरसप्रयोगविधि	६४४
योनिशूलहरयोगद्वयम् ..	,,
रजोदोषे व्योषादितैलम्	,,
पुष्पानुगं चूर्णम .	,,
त्रिविधविषनिर्देश. .	६४५

विषया	पृष्ठाङ्का ।
विषचिकित्सा ..	६४६
सेवनादिप्रयोग	,,
मृत-शतावरीयोग	,,
मृत सोमराजीयोग	,,
अभ्रकादिप्रलेप .	६४७
लूताविषे सूतभस्मप्रयोग	,,
महासर्पविषे नागदमनीप्रयोग	,,
पञ्चाङ्गशिरीषप्रयोग	,,
अश्वगन्धा वन्ध्याप्रयोगौ ..	,,
वृश्चिकविषे व्योषादितैलम् .	,,
तार्क्ष्यसूत	६४८
विषहररस ...	,,
मृतसञ्जीवनम्	,,
आखुविषे शिरीषप्रयोग .	,,
सर्वविषे देवदार्वादियोग .	,,
,, टङ्कणप्रयोग	६४९
वृश्चिकविषे मनोह्वादिगुडिका .	,,
,, पलाशबीजगुडिका	,,
गरविषे कनकादिवटी .	,,
सविषान्ने हृद्याम्लादियोग ...	६५०

षड्विंशोऽध्यायः ।

जरारोगचिकित्सनम्	६५०
रसायनगुणा ...	,,
जराया निदानम्	६५१
वार्द्धक्यहर रसायनम्	,,
उदयादित्यरस ..	६५२
सर्वरोगहर रसायनम् .	,,
मासिक-रसायनम्	६५३
षाण्मासिक-रसायनम् ..	,,
पाक्षिक-रसायनम् .	,,
हेमादि रसायनम् ...	,,

विषयाः	पृष्ठाङ्काः ।

पिप्पल्यादि रसायनम्	६५४
अष्टमासिक रसायनम्	,,
त्रिवार्षिक रसायनम् ..	६५५
षष्ट्यधिकत्रिशतवर्षायुष्कर रसायनम्	,,
सहस्रवर्षायुष्कर रसायनम् ..	,,
त्रिफला-रसायनम्	६५६
द्वितीय त्रिफला-रसायनम् .	,,
तृतीय त्रिफला रसायनम्	,,
षडङ्ग रसायनम् ...	६५७
वार्षिक रसायनम्	,,
कुष्ठादिहर-रसायनम्	,,
ज्योतिष्मतीतैल-रसायनम्	६५८
सर्वरोगान्तक रसायनम्	,,
कान्त रसायनम्	,,
चतुर्थ त्रिफला-रसायनम् ..	६५९
द्वितीय-कान्त-रसायनम् .	,,
तृतीय-कान्त-रसायनम्	,,
कान्तात्मक-रसायनम्	६६०
पाठादिघृतम्	,,
ताप्यादिवटक .	६६१
कमलाविलासो रस ..	,,
लक्ष्मीविलास ...	६६२
नारिकेलपाक ...	,,

सप्तविंशोऽध्यायः ।

वाजीकरणम्	६६४
वाजीकरणस्य गुणा ...	,,
,, निरुक्ति	,,
शुक्रक्षयस्य निदानम् ...	६६५
वाजीकरणयोगोपदेशे प्रतिज्ञा ..	,,
वाजीकरणप्रयोगे पूर्वकृत्यम् ..	,,
मधुकप्रयोग. ...	,,

विषयाः	पृष्ठाङ्काः ।

शृङ्गीप्रयोग	६६६
स्वयङ्गुप्तादिचूर्णम् ..	,,
तिलप्रयोग	,,
सिन्दूररस	,,
कामकलाख्यरस .	६६७
कामदेव	,,
मदनसुन्दर	६६८
पूर्णचन्द्र ...	६६९
मदनसुन्दररस	,,
कुसुमायुध	६७०
सूतेन्द्र	६७२
कार्श्यहरयोग ...	६७३
कार्श्यहरयोगद्वयम्	,,
मदनकामदेव	६७४
कामधेनु	६७५
महाश्वसत्त्वम्	६७६
उमापति ..	६७७
महाकनकसुन्दर	६७८
अमृतार्णव	६७९
मदनसञ्जीवन	६८०
मदनमोदक	६८२
मदनाशने कर्पूरादिप्रलेप	६८३
द्रावणे सूतप्रयोग .	,,
पुष्पधन्वा रस	६८४
द्रावणे सिन्दूरप्रयोगः	,,
रसेन्द्रचूडामणि .	,,
कामेश्वरो मोदक	६८६
स्तम्भने कृकवाकुप्रयोग	६८७
,, कर्पूरादिप्रलेप ...	६८८
,, पुण्डरीकप्रयोग .	,,
पूर्णचन्द्र ...	,,
कामदीपन ...	६८९
मदनजीवन. ..	,,
महाकल्प. ...	,,

विषया:	पृष्ठाङ्का ।

अष्टाविंशतितमोऽध्यायः।

लोहकल्पः ..	६९२
रसस्य प्राधान्यकीर्त्तनम् ..	,,
रसभेदाः ...	६९३
पानीयकषायविधि ..	,,
स्वर्णशोधनम् ..	६९४
रौप्यशोधनम् .	,,
ताम्रशोधनम् ..	,,
वङ्गनागयोः शोधनम्	६९५
कान्तलौहस्य लक्षणम	,,
,, शोधनम्	,,
धातूना सामान्यमारणम् ..	६९६
स्वर्णमारणम्	,,
रौप्यमारणम् .	,,
ताम्रमारणम् ...	,,
वङ्गमारणम् ..	,,
सीसकमारणम्	६९७
वङ्गस्य मारणान्तरम् .	,,
सीसकस्य ,, ...	,,
लौहमारणम	६९८
असम्यङ्मारितलौहस्य लक्षणम्	,,
निरुत्थलौहस्य ,,	,,
,, परीक्षा	,,
अनिरुत्थलौहस्य पुनर्मारणम्	६९९
प्रथम द्वितीयलौहकल्पौ	,,
तृतीयलौहकल्प	,,
ताम्रद्रुतिमज्जक चतुर्थलौहकल्प	७००
पञ्चमलौहकल्प	७०१
षष्ठलौहकल्प ..	,,
सप्तमलौहकल्प,	७०२
शूले अष्टमलौहकल्प	,,
जीर्णज्वरादौ नवमलौहकल्प	७०३
क्षयादौ दशमलौहकल्प ..	,,
विविधरोगे एकादशलौहकल्प ..	७०४

विषया	पृष्ठाङ्काः ।

यक्ष्मादौ द्वादशलौहकल्प ..	७०४
जरादौ त्रयोदश चतुर्दशलौहकल्पौ	,,
अम्लपित्तादौ पञ्चदशलौहकल्प	७०५
ग्रहण्यादौ षोडशलौहकल्प .	,,
क्षयादौ खण्डखाद्याख्यसप्तदश लौहकल्प .	७०६
अष्टादशलौहकल्पार्थं लौहमारण-प्रकार	७०८
अष्टादशलौहकल्पे दन्त्यादिगण	७१३
अष्टादशलौहकल्प ..	,,
सर्वरोगे एकोनविंशलौहकल्प ..	७२०
कुष्ठे विंशलौहकल्प	,,
मेह प्रभृतिषु एकविंशलौहकल्प	,,
कुष्ठे द्वाविंशलौहकल्प ...	,,
सर्वरोगे त्रयोविंशलौहकल्प .	७२१
नेत्ररोगे कान्तनागाख्यचतुर्विंश-लौहकल्प ..	,,
रसायने पञ्चविंशलौहकल्प	७२२
मृत्युहारिरसाख्यषड्विंशलौहकल्प	,,
सप्तविंशादिलौहकल्पत्रयम् ...	७२३
अरिष्टलक्षणे विंशलौहकल्प	,,
जरादौ एकविंशलौहकल्प ..	,,
द्वाविंशादिलौहकल्पचतुष्टयम्	७२४
रसायने षट्विंशलौहकल्प	,,
मृतलौहाना रसत्वकथनम् ..	,,

एकोनत्रिंशत्तमोऽध्यायः।

विषकल्पः	७२५
विषोत्पत्तौ पौराणिकी कथा .	,,
स्थावरविषाणा जातिभेदा	७२६
कन्दविषाणा नामानि ...	,,
कर्कटादिकन्दविषाणा लक्षणम	,,
श्वेतादिवर्णभेदेन विषाणा जातिभेद	७२७

विषयाः	पृष्ठाङ्काः ।
वर्णभेदेन विषाणां क्रियाभेदः	७२७
विषामृतयोः तुल्ययोनित्वनिर्देशः	,,
विषस्य मात्रानिर्देशः	,,
प्रयोगकालभेदेन विषस्य क्रियाविशेषः	७२८
मात्राऽमात्राभेदेन विषामृतयोः गुणागुणौ	७२९
सात्म्यासात्म्ययोरमृतविषयोः सहसा प्रयोगे दोषः	,,
सहसा विषसेवने अष्टौ वेगाः	,,
विषसेवने संशोधनविधिः	,,
विषघ्नो गणः	७३०
गव्यघृतस्य विषघ्नत्वोक्तिः	,,
विषस्य प्रयोगविधिः	,,
विषसेविनः पथ्यापथ्यविधिः	७३१
प्रयोज्यविषाणि	,,
तीक्ष्णविषातियुक्तविषयोश्चिकित्सा	,,
रसायनार्थं विषप्रयोगे विधिः	७३२
विषप्रयोगार्हपुरुषकालयोर्निर्देशः	,,
विषप्रयोगानर्हकालादिनिर्देशः	७३३
विषे निषिद्धद्रव्याणि	,,
अवस्थाविशेषे विषस्यापकारकत्वनिर्देशः	,,
विषशोधनम्	,,
नवज्वरे प्रथमविषकल्पः	७३४
जीर्णज्वरे द्वितीयविषकल्पः	,,
जीर्णज्वरादौ तृतीयविषकल्पः	,,
विषमज्वरे चतुर्थविषकल्पः	,,
रक्तपित्ते पञ्चमविषकल्पः	,,
श्वासकासे षष्ठविषकल्पः	७३५
श्वासहिक्कयोः सप्तमविषकल्पः	,,
ऋर्शासि अष्टमविषकल्पः	,,
क्षये नवमविषकल्पः	,,
विषविद्रावणघृताख्यः दशमविषकल्पः	,,
ग्रहण्याम् एकादशविषकल्पः	७३६
मूत्रकृच्छ्रे द्वादशविषकल्पः	,,
उदावर्त्ताश्मर्य्योः त्रयोदशविषकल्पः	७३६
भ्रमर्यां चतुर्दशविषकल्पः	,,
गुल्मे पञ्चदशविषकल्पः	,,
शूले षोडशविषकल्पः	,,
गुल्मप्लीह्नोः सप्तदशाष्टादशविषकल्पौ	,,
प्लीह्नि एकोनविंशविषकल्पः	७३७
कुष्ठे विंशविषकल्पः	,,
,, एकविंशविषकल्पः	,,
,, द्वाविंशविषकल्पः	,,
विचर्चिकादौ त्रयोविंश चतुर्विंश विषकल्पौ	,,
विचर्चिकादौ पञ्चविंशविषकल्पः	७३८
कुष्ठे षड्विंशविषकल्पः	,,
,, विषतैलाख्य सप्तविंशविषकल्पः	,,
,, कुष्ठादितैलाख्य अष्टाविंश विषकल्पः	७३९
कुष्ठादौ चन्दनादितैलाख्य एकोनत्रिंश-विषकल्पः	,,
श्वित्रादौ त्रिंशविषकल्पः	,,
श्वित्रे एकत्रिंशविषकल्पः	७४०
,, क्रियान्तरम्	,,
,, द्वात्रिंशविषकल्पः	,,
आत्रिकोक्तश्वित्रारितैलाख्य त्रयस्त्रिंश विषकल्पः	,,
वाते चतुस्त्रिंशविषकल्पः	७४१
अग्निदाहे पञ्चत्रिंशविषकल्पः	,,
वन्ध्यायां षट्त्रिंशविषकल्पः	,,
मूढगर्भे सप्तत्रिंशविषकल्पः	७४२
वृद्धिवर्द्धने अष्टत्रिंशविषकल्पः	,,
तिमिरे एकोनचत्वारिंशविषकल्पः	,,
,, चत्वारिंशविषकल्पः	,,
,, एकचत्वारिंशविषकल्पः	,,
काचे द्वाचत्वारिंशविषकल्पः	७४३
,, त्रिचत्वारिंशविषकल्पः	,,
,, चतुश्चत्वारिंशविषकल्पः	,,

विषयाः	पृष्ठाङ्का ।
शुक्रामे पञ्चचत्वारिंशविषकल्प ...	७४३
शुक्रादौ षट्चत्वारिंशविषकल्प ...	,,
,, सूर्यप्रभावर्त्याख्य सप्तचत्वारिंश-विषकल्प ..	७४४
पिल्ले अष्टचत्वारिंशविषकल्प ...	,,
नक्तान्ध्ये एकोनपञ्चाशत्तमविषकल्प	,,
,, पञ्चाशत्तमविषकल्प ..	७४५
कर्णशूले एकपञ्चाशत्तमविषकल्प	,,
शिर शूले द्वापञ्चाशत्तमविषकल्पः	,,
,, त्रिपञ्चाशत्तमविषकल्प	,,
पूतिनस्ये चतु पञ्चाशत्तमविषकल्प	७४६
मुखरोगे प्रपौण्डरीकादितैलाख्य पञ्च-पञ्चाशत्तमविषकल्प ..	,,
,, षट्पञ्चाशत्तमविषकल्प	,,
पलितादौ सप्तपञ्चाशत्तमविषकल्प.	,,
खलतौ अष्टपञ्चाशत्तमविषकल्प	,,
दिग्धाहते एकोनषष्टितमविषकल्प	७४७
दुष्टव्रणे षष्टितमविषकल्प ...	,,
अपच्या शतमालादिष्टताख्य एकषष्टि-तमविषकल्प ...	,,
अपचीघ्नतैलाख्य द्विषष्टितमविषकल्प	,,
अपच्यादौ त्रिषष्टितमविषकल्प	७४८
विषे मन्त्रादिक्रियावैफल्ये प्रतीकारः	,,
सर्पदष्टे चतु षष्टितमविषकल्प. .	,,
सर्पविषे मूलविषस्य मात्रा ...	७४९
कीटविषे ,, ,, ...	,,
वृश्चिकविषे ,, ,, ..	,,
लूताविषे पञ्चषष्टितमविषकल्पः .	,,
जङ्गमविषे षट्षष्टितमविषकल्प	,,
,, सप्तषष्टितमविषकल्प.	,,
आखुविषे अष्टषष्टितमविषकल्प	,,
सर्वविषे एकोनसप्ततितमविषकल्पः	७५०
संज्ञाजनने सप्ततितमविषकल्प ...	,,
विषजदाहे एकसप्ततितमविषकल्प	,,
दु.साध्यरोगे द्वासप्ततितमविषकल्प	,,

विषया	पृष्ठाङ्का ।
रसायने त्रिसप्ततितमविषकल्प	७५१
,, चतु सप्ततितमविषकल्प ...	,,
जयागुडिकाख्य पञ्चसप्ततितमादि चतुर्दशाधिकशततमान्तविषकल्प.	,,
जयन्तीवटिकाख्य पञ्चदशाधिक-शततमविषकल्प .	७५४
जयावटिकाख्य. षोड़शाधिकशततम-विषकल्प ...	,,
रसायने सप्तदशाधिकशततमविषकल्प.	,,
वाजीकरणे अष्टादशाधिकशततम-विषकल्प ...	७५५
विषसेवनस्य फलम् ...	,,

त्रिंशत्तमोऽध्यायः ।

रसकल्पः .	७५५
सूतसूताध्यायः ..	,,
रसजारणम्	,,
रसजारणे निविडद्रव्याणि	७५६
वडवानलो विड ...	७५७
मतान्तरे रसजारणम् ...	,,
द्विविध रसमारणम	७५८
रसमारणे प्रकारान्तरम् ...	,,
प्रकारान्तरम् ..	,,
,, ..	७५९
,, ...	,,
,, ...	,,
,, ...	,,
,, ...	,,
,, .	७६०
ज्वरे प्रथमरसकल्प ...	,,
त्रिदोषज्वरे द्वितीयरसकल्प .	,,
रक्तपित्ते तृतीय चतुर्थरसकल्पौ	७६१

विषयाः	पृष्ठाङ्काः ।	विषयाः	पृष्ठाङ्काः ।
कासे पञ्चमरसकल्पः ...	७६१	नेत्ररोगे सप्तचत्वारिंशरसकल्पः	७६९
क्षये षष्ठ सप्तमरसकल्पौ ...	"	तिमिरे अष्टचत्वारिंशरसकल्पः	७७०
क्षयादौ अष्टमरसकल्पः ...	"	जाड्ये एकोनपञ्चाशत्तमरसकल्पः	"
हिक्कायां नवमरसकल्पः ..	७६२	केशकृष्णीकरणे महानीलतैलाख्य-पञ्चाशत्तमरसकल्पः	"
छर्दिदाहयोः दशमैकादशरसकल्पौ	"	व्रणे एकपञ्चाशत्तमरसकल्पः ..	७७१
अर्शःसु द्वादशरसकल्पः ...	"	ग्रन्थौ द्विपञ्चाशत्तमरसकल्पः ...	"
अतीसारे त्रयोदशादिरसकल्पत्रयम्	७६३	मसूरिकायां त्रिपञ्चाशत्तमरसकल्पः	"
विसूच्यां षोडशरसकल्पः ..	"	शिखादौ चतुःपञ्चाशत्तमरसकल्पः	७७२
अजीर्णे सप्तदशरसकल्पः	"	अस्थिस्रावे पञ्चपञ्चाशत्तमरसकल्पः	"
प्रवाहिकायाम् अष्टादशैकोनविंशरसकल्पौ ..	"	विषे षट्पञ्चाशत्तमादिरसकल्पषट्कम् .	७७३
मूत्रकृच्छ्रे विंशरसकल्पः ...	७६४	" द्विषष्टितमरसकल्पः	"
मेहेषु एकविंशरसकल्पः .	"	सर्पविषे त्रिषष्टितमरसकल्पः ...	"
प्लीहादौ द्वाविंश त्रयोविंशरसकल्पौ	"	" चतुःषष्टितमरसकल्पः ..	"
पक्तिशूले चतुर्विंशरसकल्पः ..	"	उन्दुरुविषे पञ्चषष्टितमरसकल्पः	७७४
आमशूले पञ्चविंशरसकल्पः ..	"	वृश्चिकविषे षट्षष्टितमादिरसकल्पचतुष्टयम् ...	"
उदरे षड्विंशरसकल्पः	७६५	विषदिग्धव्रणे सप्ततितमादिरसकल्पद्वयम् ...	"
कामलायां सप्तविंशरसकल्पः ...	"	रसायने द्विसप्ततितमरसकल्पः	७७५
पाण्ड्वादौ अष्टाविंशरसकल्पः ...	"	" त्रिसप्ततितमरसकल्पः	"
शोथे एकोनत्रिंशरसकल्पः ...	"	" चतुःसप्ततितमरसकल्पः	७७६
कुष्ठे त्रिंशैकत्रिंशरसकल्पौ	"	" पञ्चसप्ततितमरसकल्पः	"
" द्वात्रिंश-त्रयस्त्रिंशरसकल्पौ ..	७६६	" षट्सप्ततितमरसकल्पः	"
" चतुस्त्रिंशरसकल्पः	"	" सप्तसप्ततितमाद्यशीतितमान्त-रसकल्पः	"
किटिभे पञ्चत्रिंशरसकल्पः	"	" एकाशीतितमरसकल्पः	"
श्वित्रे षट्त्रिंशरसकल्पः .	७६७	" वज्रपञ्जररसाख्य द्व्यशीतितम रसकल्पः	७७७
क्रिमौ सप्तत्रिंशरसकल्पः ..	"	" पञ्चामृतरसाख्य त्र्यशीतितम रसकल्पः ..	७७८
वातरोगे अष्टत्रिंशरसकल्पः .	"	रसप्रयोगे उपचारविधिः ..	"
गृध्रस्याम् एकोनचत्वारिंशरसकल्पः	"	रससेवने अपथ्यानि	७७९
वातरक्ते चत्वारिंशरसकल्पः ..	"	निषिद्धद्रव्यव्यवहारे दोषाः ...	"
स्थौल्ये एकचत्वारिंशरसकल्पः .	७६८		
" द्वाचत्वारिंशरसकल्पः ..	"		
कार्श्ये त्रिचत्वारिंशरसकल्पः ..	"		
अपस्मारादौ चतुश्चत्वारिंशरसकल्पः	"		
" पञ्चचत्वारिंशरसकल्पः	"		
पक्षाघाते षट्चत्वारिंशरसकल्पः	७६९		

विषयाः	पृष्ठाङ्काः ।
निषिद्धद्रव्यव्यवहारजदोषे प्रतीकारः	७८०
नागवङ्गयुक्तरससेवने ,,	,,
रसायने मृतसञ्जीवन्याख्य चतुरशीतितमरसकल्पः .	,,
वाजीकरणे मदनवर्द्धनाख्यः पञ्चाशीतितमरसकल्पः .	७८१
वाजीकरणे षडशीतितमरसकल्पः	,,
रसायने सन्दिग्धान् प्रति उक्तिः	७८२
औषधानां गुणदोषवत्त्वे प्रयोक्तुर्ज्ञत्वाज्ञत्वयोर्हेतुता .	,,
आचाररसायनम् .	,,
आयुर्वेदोपदेशस्य यत्नपालनीयतोक्तिः ...	७८३
कुवैद्यानां वर्जनीयतोक्तिः ..	७८३
शास्त्रज्ञवैद्यस्य साफल्योक्तिः ..	७८४
चिकित्साया त्रिवर्गसाधकत्वोक्तिः	७८५
कुवैद्यस्य निरयभाक्त्वोक्तिः .	,,
यावच्छ्वास चिकित्साया कर्त्तव्यत्वोक्तिः.	,,
वैद्यातुरयोरन्योऽन्यकर्त्तव्यनिर्देशः	,,
वैद्यानां सुलभाजीवत्वनिर्देशः ..	,,
पुरावृत्तवर्णनद्वारा वैद्यस्य सर्वपूज्यत्वनिर्देशः ...	७८६
उपसंहारः ..	७८७

भ्रमनिरसनम् ।

"७०९" इति पत्राङ्कस्थाने "७१३" इति अङ्कसन्निवेशः प्रामादिकः ।

रसरत्नसमुच्चयः ।

रसोत्पत्तिर्नाम प्रथमोऽध्यायः ।

अथ मङ्गलाचरणम् ।—

यस्याऽऽनन्दभवेन मङ्गलकलासम्भावितेन स्फुर-
द्धाम्ना सिद्धरसामृतेन करुणावीक्षासुधासिन्धुना ।
भक्तानां प्रभवप्रसंहृतिजरारागादिरोगाः क्षणा-
च्छान्तिं यान्ति जगत्प्रधानभिषजे तस्मै परस्मै नमः ॥ १ ॥

नत्वा गुरुपदद्वन्द्व भारतीं ज्ञानदायिनीम् ।
ज्ञानद शङ्करञ्चैव पितरञ्च पितामहम् ॥ १ ॥
शर्मणा चाशुबोधेन नित्यबोधेन च श्रिया ।
क्रियते बोधिनी टीका रसरत्नसमुच्चये ॥ २ ॥

अथ सुप्रथितनामा निखिलायुस्तन्त्रपारदृश्वा भिषग्वर श्रीवाग्भटाचार्य्यः रसतन्त्रं किमपि चिकीर्षु तस्य निर्विघ्न परिसमाप्तये अनन्तान्तरायसन्ताननिकृन्तनहेतु विशिष्ट-शिष्टाचारपरम्परापरिप्राप्त स्वेष्टस्तुतिरूप मङ्गलमाचरति ग्रन्थादौ यस्येत्यादिना ।— यस्य परमात्मन, आनन्दभवेन आनन्द सुख भवति अस्मात तेन सुखोत्पाद-हेतुना, दर्शनेनैव विविधदुःखनाशात् चतुर्वर्गावाप्तेश्च इति भाव । मङ्गल-कलासम्भावितेन मङ्गले श्रेयोजनने, या कला सामर्थ्यं, तत्र सम्भावितेन सम्भवयुक्तेन, शुभहेतुकेन दृष्टिपातेनैव सर्वापच्छान्तिजननादिति भाव । स्फुरद्धाम्ना स्फुरत दीप्य-मानम्, उज्ज्वलमित्यर्थ, धाम तेज यस्य तेन भास्वता, दृष्टिमात्रेणैव सर्वरोगवीज-पापाटे भस्मीकरणात् इति । सिद्धरसामृतेन सिद्धरस पारद, तद्वत् अमृतेन मरणादिनाशनेन, पारदवदमृतायमानेन, अमृतनिष्यन्दिस्निग्धदर्शनेनैव रसेन्द्रवत् सर्वामयशान्तिकरणात् । रसचिकित्साग्रन्थेऽस्मिन् रसस्य उत्कर्षख्यापनाय तद्दर्शनस्य रसेन्द्रवत गुणकारकत्व ख्यापितम् । करुणावीक्षासुधासिन्धुना करुणावीक्षा कृपादृष्टि, सुधासिन्धुरिव अमृतसागर इव तेन, सागरस्य यथा पार न विद्यते, तथा भक्तजने

अथ ग्रन्थकर्तृणां नामानि ग्रन्थस्याभिधेयञ्चाह ।—

आदिमश्चन्द्रसेनश्च लङ्केशश्च विशारदः ।
कपाली मत्त-माण्डव्यौ भास्करः शूरसेनकः ॥ २ ॥
रत्नकोशश्च शम्भुश्च सात्त्विको नरवाहनः ।
इन्द्रदो गोमुखश्चैव कम्बलिर्व्याडिरेव च ॥ ३ ॥
नागार्जुनः सुरानन्दो नागबोधिर्यशोधनः ।
खण्डः कापालिको ब्रह्मा गोविन्दो लम्पको हरिः ॥४॥
सप्तविंशतिसङ्ख्याका रससिद्धिप्रदायकाः ।
रसाङ्कुशो भैरवश्च नन्दी स्वच्छन्दभैरवः ॥ ५ ॥
मन्थानभैरवश्चैव काकचण्डीश्वरस्तथा ।
वासुदेव ऋषिः शृङ्गः क्रियातन्त्रसमुच्चयी ॥ ६ ॥
रसेन्द्रतिलको योगी भालुकिर्मैथिलाह्वयः ।
महादेवो नरेन्द्रश्च रत्नाकर-हरीश्वरौ ॥ ७ ॥

तत्कृपाऽपि अपारा इति भाव । अत्र "आनन्दभवेन" इत्यादिविशेषणानि सुधासिन्धावपि योज्यानि, तथा च सुधापानेनापि सर्वे नन्दन्ति, अतस्तस्या आनन्दजनकत्व युज्यते। अमृतस्य मृतिनाशनत्वात "जीवन्नरो भद्रशतानि पश्येत" इत्यनुसारेण मङ्गलसञ्जननमपि तत्र न विरोधमावहति। प्रभावेणैव सर्वपापदाहकत्वमपि तस्याः सङ्गच्छते। सिद्धरसवत अस्या अपि जरादिव्याधिनाशनत्वं प्रसिद्धमेव। भक्तानां सेवकाना, प्रभवादिरोगा जन्ममृत्युवार्द्धक्यासक्त्यादिदुःखजनकरोगा, क्षणात् क्षणमात्रेणैव शान्ति प्रशम, यान्ति प्राप्नुवन्ति, जगत्प्रधानभिषजे जगता जगत्सु वा त्रिभुवनेषु, प्रधानभिषजे प्रकृष्टवैद्याय, लौकिकभिषजस्तु ज्वरादिसाधारणव्याधिचिकित्सने समर्था, न तु प्रभवाद्यसाधारणरुजाहरणे, अत एव परमात्मनो भिषक्प्रधानत्वम्। तस्मै अव्यक्तस्वरूपाय, परस्मै परमपुरुषाय परमात्मने, नमः नमोऽस्तु ॥ १ ॥

इदानीं रसशास्त्रप्रवर्त्तकानां सप्तविंशतिसङ्ख्याकानामादिमादीनां भिषजां तथाऽन्येषामपि रसाङ्कुशादीनां नामान्युत्कीर्त्तयति आदिम इत्यादि ।—एते सप्तविंशतिसङ्ख्याकाः तथा रसाङ्कुशादयश्च अष्टादशसङ्ख्याकाः अपरे महान्तः भिषजः रससिद्धि-

एतेषां क्रियतेऽन्येषां तन्त्राण्यालोक्य सङ्ग्रहः ।
रसानामथ सिद्धानां चिकित्सार्थोपयोगिनाम् ।
सूनुना सिंहगुप्तस्य रसरत्नसमुच्चयः ॥ ८ ॥
रसोपरसलोहानि यन्त्रादिकरणानि च ।
शुद्ध्यर्थमपि लोहानां तन्त्रादिकरणानि च ।
शुद्धिः सत्त्वं द्रुतिर्भस्मकरणञ्च प्रवक्ष्यते ॥ ९ ॥

प्रदायकाः रसेन रसप्रयोगेण या सिद्धिः आरोग्यादिः तत्प्रदायकाः, आसन् इति शेषः ॥ २—७ ॥

ननु सर्वदा भ्रमप्रमादबहुलैरसर्वविदुरैर्मर्त्यैः प्रणीतेऽस्मिन् प्रेक्षावतां कथं प्रवृत्तिर्जायते इत्याशङ्कां तेषां प्रवृत्त्यन्मुखीकरणाय ग्रन्थस्यास्य प्रामाणिकत्वं प्रतिपादयितुमाह, एतेषामिति ।—नाहं स्वयं किमपि लिखामि किन्तु एतेषां पूर्वोक्तानां तथा अन्येषामपि आप्तानां रसचिकित्सामार्गप्रवर्त्तयितॄणां कृतानि तन्त्राणि शास्त्राणि आलोक्य दृष्ट्वा, अथ अनन्तरं, चिकित्सार्थोपयोगिनां चिकित्सोपयुक्तानां सिद्धानां दृष्टफलानां रसानां रसघटितौषधानां सङ्ग्रहः एकत्र ग्रथनरूपः रसरत्नसमुच्चयः तदाख्यग्रन्थः, सिंहगुप्तस्य तदाख्यवैद्यस्य सूनुना पुत्रेण वाग्भटेन मया क्रियते ॥८॥

अभिधेयसम्बन्धप्रयोजनोपदेशमन्तरेण कृतेऽपि ग्रन्थे न प्रेक्षावतां प्रवृत्तिः स्यात्, यदुक्तम्—'अभिधेयफलज्ञानविरहास्तिमितोद्यमाः । श्रोतुमल्पमपि ग्रन्थं नाद्रियन्ते हि साधवः' ॥ सिद्धार्थं सिद्धसम्बन्धं श्रोतुं श्रोता प्रवर्त्तते । ग्रन्थादौ तेन वक्तव्यः सम्बन्धः सप्रयोजनः ॥" इत्यतः ग्रन्थस्याभिधेयादिकं वक्तुमाह, रसेति ।—रसः पारदः, उपरसाः गन्धकादयः, तद्यथा,—"गन्धको वज्रवैक्रान्तं वज्राभ्रं तालकं शिला । खर्परं शिखितुत्थञ्च विमलं हेममाक्षिकम् ॥ काशीशं कान्तपाषाणं वराटाञ्जनहिङ्गुलम् । गैरिकं शङ्खभूनागं टङ्कणञ्च शिलाजतु । एते चोपरसाः प्रोक्ताः'—" ॥ लोहानि स्वर्णादयोऽष्टौ धातवः, तद्यथा,—"सुवर्णं रजतं ताम्रं कांस्यं पित्तलमेव च । नागं वङ्गं तथा लौहं धातवोऽष्टौ प्रकीर्त्तिताः ॥" तानि । यन्त्रादि इत्यत्र आदिपदेन पुटादयो गृह्यन्ते । लोहानां स्वर्णादीनाम् । शुद्धिः शोधनम् । सत्त्वं सत्त्वपातनं, सारग्रहणम् । द्रुतिः द्रावणम् । रसोपरसादीनां शोधनमारणादिकं तथा प्रयोगश्च ग्रन्थस्यास्याभिधेयः । शोधनमारणौषधप्रयोगादिभिः सहास्य वाच्यवाचकभावसम्बन्धः । प्रयोजनन्तु तत्तज्ज्ञानद्वारा रोगप्रशमनम् ॥ ९ ॥

अथ हिमालयवर्णनम्।—

अस्ति नीहारनिलयो महानुत्तरदिङ्मुखे।
उत्तुङ्गशृङ्गसङ्घात-लङ्घिताभ्रो महीधरः॥ १०॥
विश्रामाय वियन्मार्ग-विलङ्घनघनश्रमः।
अवतीर्ण इव क्षौणीं शरदम्बुमुचां गणः॥ ११॥
राशिराशीविषाधीश-फणाफलकरोचिषाम्।
भित्त्वा भुवमिवोत्तीर्णो यो विभाति भृशोन्नतः॥ १२॥
ज्वलदोषधयो यस्य नितम्बमणिभूमयः।
नक्तमुद्दामतडितामनुकुर्वन्ति वार्मुचाम्॥ १३॥

इदानीं रसस्य गुणादिकं वक्तुं तदुत्पत्तिस्थानं हिमवन्तं वर्णयति, अस्तीति।—नीहारनिलयः तुषारावासः। उत्तुङ्गेति।—उत्तुङ्गानामुन्नतानां शृङ्गाणां शिखराणां सङ्घातेन समूहेन लङ्घितम् अतिक्रान्तम् अभ्रं मेघः येन सः। वियन्मार्गस्य आकाशपथस्य विलङ्घनेन अतिक्रमणेन घनः प्रगाढः श्रमः क्लान्तिः यस्य स तथाभूतः, अत एव विश्रामाय मार्गश्रमापनोदनाय, क्षौणीं भुवं पार्वत्यभूभागम्, अवतीर्णः अवरूढः शरदम्बुमुचां शरन्मेघानां गणः समूहः इव, परिदृश्यमानः इति शेषः, तुषाराच्छन्नशृङ्गत्वेनातिशुभ्रे तस्मिन् भुवमवतीर्णातिशुभ्रशरन्मेघत्वोत्प्रेक्षा। राशिरित्यादि।—भुवं भूपृष्ठं भित्त्वा विदार्य्य उत्तीर्णः उद्गतः, आशीविषाधीशस्य नागराजस्य शेषस्य फणाः सहस्रसङ्ख्यकाः भोगसमूहाः फलकाः विस्तृतत्वात् काष्ठादिपट्टकाः इव तेषां यानि रोचींषि प्रभापटलानि, सहस्रमस्तके सहस्रसङ्ख्यकमणिभूषितत्वात्, तेषां राशिरिव अवस्थितः तुषारशुभ्रस्यानेकशिखरिणः बहुरत्नाधिष्ठानस्यास्य रजतगौरसहस्रमणिभूषितसहस्रशीर्षशेषवत् प्रभावत्त्वोत्प्रेक्षा। भृशोन्नतः भृशम् अत्यर्थम् उन्नतः यः महान् महीधरः पर्वतः हिमाचलः, विभाति चकास्ति। यस्य पर्वतस्य, ज्वलन्त्यः देदीप्यमानाः ओषधयः ओषधहेतुभूतानि द्रव्याणि यत्र तादृश्यः, द्रव्यमात्रे ओषधिशब्दप्रयोगे प्रमाणं यथा सुश्रुते—"तानि पुनरोषधयः। ताश्च द्विविधाः, स्थावरा जङ्गमाश्च। तासां स्थावराश्चतुर्द्धा यथा—वनस्पतिः, वृक्षः, वीरुत्, ओषधिश्चेति। तासु अपुष्पफलवान् वनस्पतिः, पुष्पफलवान् वृक्षः, प्रतानवती लता वीरुत्, फलपाकनिष्ठा च ओषधिः। जङ्गमा अपि जरायुजाण्डजस्वेदजोद्भिज्जभेदेन चतुर्द्धा" इत्यादि। नितम्बमणिभूमयः नितम्बे कटके पर्वतमध्यभागे याः

कटके सञ्चरन्तीनां यस्य किन्नरयोषिताम् ।
पादेषु धातुरागेण लाक्षाकृत्यमनुष्ठितम् ॥ १४ ॥
अवतंसितशीतांशुराच्छादितदिगम्बरः ।
यो गुहाधिगतो लोके गिरीश इति गीयते ॥ १५ ॥
निमीलितदृशो नित्यं मुनयो यस्य सानुषु ।
प्रत्यक्षयन्ति गिरिशमवाङ्मनसगोचरम् ॥ १६ ॥

मणिभूमय. रत्नानामाकरा ता नक्तं रात्रौ उद्दामा अत्युत्कटा भास्वतीत्यर्थ, तडित् विद्युत इव तादृशाना, वार्मुचा वार् जल मुञ्चन्ति ये तेषा मेघानामनुकुर्वन्ति विडम्बयन्ति सादृश्यं वहन्तीत्यर्थ । नक्त वारिपूर्णप्रगाढकृष्णे मेघे पिङ्गलवर्णा विद्युत् यथा भाति, तथा तामस्या निशि कृष्णवर्णकटकदेशे खनिनि.सृतपिङ्गलवर्णरत्नज्योतीषि तथा ओषधीनामपि प्रभा विद्योतन्ते, किञ्च, यदा वायुताडितवृक्षादिभिराच्छाद्यन्ते तदा ज्योतीषि अन्तर्दधते, यदा च छायाऽपसरति तदा पुन द्योतन्ते, एवं तडिदनुकरण युज्यते इति भाव ॥ १०—१३ ॥

कटके इति ।—कटके अद्रिनितम्बदेशे पर्वतमध्यभूभागे, सञ्चरन्तीनाम् इतस्ततः परिभ्रमन्तीना किन्नरयोषिता किम्पुरुषवधूना, पादेषु यस्य अचलस्य धातुरागेण धातूना पद्मरागादिमणीना मन शिलागैरिकादीना वा रागेण लौहित्येन, लाक्षाकृत्यम् अलक्तकप्रयोजनम् अलक्तकेन पादप्रसाधनकार्य्यम्, अनुष्ठित सम्पादितम्; तत्र गैरिकमन शिलादय ओषधोपयोगिन. सर्वे धातव सन्तीत्यभिप्राय. ॥ १४ ॥

अवतंसितेति ।—अवतंसित: भूषणीकृत, शीतांशु चन्द्र येन स तथाभूत', तस्य हराधिष्ठानत्वात् हरस्य च चन्द्रभूषणत्वात आश्रयाश्रयिणोरभेदोपचारेण शीतांशुभूषणत्वम् । आच्छादितानि पिधानीकृतानि परिहितानीत्यर्थ, दिश एव अम्बराणि येन स तथाभूत दिग्वेष्टित. दिगन्तव्यापीत्यर्थ । गुहाभि कन्दरै: अधिगत प्राप्त बहुगुहासमन्वित, अथवा—पर्वताधिष्ठातृदेवतात्वेन गुहागृहाश्रित, यद्वा—गुहेन कार्त्तिकेयेन अधिगत अधिष्ठित. मातामहनिलयत्वात, य. महीधरः लोके गिरीश गिरीणा पर्वतानाम् ईश अधिपति., इति एवम्प्रकार', गीयते स्तूयते, कथ्यते इत्यर्थ ॥ १५ ॥

निमीलितेति ।—यस्य अचलस्य सानुषु प्रस्थेषु समतलदेशेषु, मुनय: वीतरागाः मननशीला. योगिन., निमीलितदृश: ध्यानमुद्रितनेत्रा. सन्त., नित्यं सदैव,

शिलातलप्रतिहतैर्यस्य निर्झरशीकरैः।
अह्न्यपि निरीक्षन्ते यक्षास्ताराङ्कितं नभः॥ १७॥
नीहारपवनोद्रेक-निःसहा यत्र पूरुषाः।
निजस्त्रीणां निषेवन्ते कुचोष्माणं निरन्तरम्॥ १८॥
सञ्चरन् कटके यस्य निदाघेऽपि दिवाकरः।
उद्दामहिमरुद्धोष्मा न शीतांशोर्विभिद्यते॥ १९॥
गुहागृहेषु कस्तूरी-मृगनाभिसुगन्धिषु।
गायन्ति यत्र किन्नर्यो गौरीपरिणयोत्सवम्॥ २०॥

कदाऽप्यविनश्वरं वा, अवाङ्मनसगोचरं वाङ्मनसयोरगोचरम् अविषयीभूतं, गिरिशं गिरौ शेते अधितिष्ठति यः तं शङ्करं, प्रत्यक्षयन्ति ध्यानदृशा हृदये प्रत्यक्षवत् पश्यन्ति॥ १६॥

शिलेति।—यस्य शिलातले शिलापृष्ठे प्रतिहतैः प्रतिस्खलितैः चूर्णीभूतैरिति यावत्, निर्झरशीकरैः प्रस्रवणोदककणैः करणैः, यक्षाः देवयोनिविशेषाः, अह्न्यपि दिवा अपि, नभः खं, ताराङ्कितं नक्षत्रमुद्रितं, निरीक्षन्ते अवलोकयन्ति, अभ्रलिह-शृङ्गावस्थितनिर्झरात् चरन्त्युदकानि पार्वत्यधातुरागानुरञ्जितानि शिलापृष्ठे प्रतिहत्य कणशो भूत्वा ऊर्द्ध्वमुत्पतन्ति नभसि नक्षत्राणीव प्रतिभान्तीति भावः॥ १७॥

नीहारेति।—यत्र यद्देशे पूरुषाः नीहारपवनस्य तुषारकणमिश्रवायोः शीतवायोर्वा उद्रेकम् आतिशय्यं निःसहाः सोढुमशक्ताः सन्तः निरन्तरं सदैव दिवाऽपीत्यर्थः, निजस्त्रीणां स्ववधूनां कुचोष्माणं स्तनतापं, निषेवन्ते भजन्ते, अनुभवन्तीत्यर्थः। शैत्याधिक्याद्बहिर्गन्तुमशक्ताः निरन्तरं गुहागृहे स्वस्त्रियं गाढमालिङ्ग्य अवतिष्ठन्ते इति भावः॥ १८॥

सञ्चरन्निति।—दिवाकरः सूर्यः, यस्य कटके नितम्बदेशे सञ्चरन् भ्राम्यन्, एतेनास्य महोन्नतत्वं सूचितं, यतः नभसि सूर्यपथः अस्य मध्यप्रदेशे वर्त्तते। निदाघेऽपि ग्रीष्मर्त्तावपि उद्दामेन उत्कटेन दुःसहेन हिमेन तुषारेण रुद्धः प्रतिहतः मन्दीभूतः उष्मा सन्तापः यस्य सः तथाभूतः सन् शीतांशोः चन्द्रात् न विभिद्यते न विशिष्यते न पृथक्त्वेनानुमीयते, जनैरिति शेषः। हिमाभिहतोष्मत्वात् उष्णकरोऽपि हिमकरवत् प्रतीयते इति भावः॥ १९॥

गुहेति।—यत्र कस्तूरीमृगाणां कस्तूरिकाकरमृगविशेषाणां नाभिना नाभि-

चकास्ति तत्र जगतामादिदेवो महेश्वरः ।
रसात्मना जगत्त्रातुं जातो यस्मात् महारसः ॥ २१ ॥

अथ रसोत्कर्षवर्णनम् ।—

शताश्वमेधेन कृतेन पुण्यं गोकोटिभिः स्वर्णसहस्रदानात् ।
नृणां भवेत् सूतकदर्शनेन यत् सर्वतीर्थेषु कृताभिषेकात्
॥ २२ ॥

विधाय रसलिङ्गं यो भक्तियुक्तः समर्चयेत् ।
जगत्त्रितयलिङ्गानां पूजाफलमवाप्नुयात् ॥ २३ ॥

भक्षणं स्पर्शनं दानं ध्यानञ्च परिपूजनम् ।
पञ्चधा रसपूजोक्ता महापातकनाशिनी ॥ २४ ॥

प्रदेशेन, सन्तु गन्धः विद्यते यत्र तेषु कस्तूरिकामोदवत्सु, गुहागृहेषु कन्दरनिलयेषु अवस्थिता किन्नर्यः गौर्याः पार्वत्याः परिणये विवाहसमये यः उत्सवः आनन्द-जनकव्यापारविशेषः तं गायन्ति पार्वतीविवाहवृत्तान्तं स्वरसंयोगेन कथयन्ति इत्यर्थः । कस्तूरीमृगनाभिसुगन्धिषु इत्युक्त्या अत्र उत्कृष्टसुगन्धिद्रव्याण्यपि सन्ति न केवलं रसादीनि इत्यायाति ॥ २० ॥

चकास्तीति ।—तत्र तस्मिन् हिमभूधरे, जगताम् आदिदेवः आदौ प्रथमं दीव्यति स्वयं राजते इति आदिदेवः महेश्वरः शिवः, रसात्मना रसस्वरूपेण तस्मात् रसोत्पत्तेः, जगत् जगद्वासिजनसमूहः, त्रातुं रसस्य सर्वरोगहरत्वात् व्याधिभ्यः रक्षितुं चकास्ति विराजते, यस्मात् महेश्वरात् महारसः पारदः, जातः उत्पन्नः । महेश्वरस्य मृत्युञ्जयत्वात् तदुत्पन्नस्य रसस्यापि मृत्युहरत्वमित्यभिप्रायः ॥ २१ ॥

अनुरागदार्ढ्याय रसप्रशंसामाह, शतेति ।—कृतेन अनुष्ठितेन, शताश्वमेधेन शतसङ्ख्याकाश्वमेधयज्ञेन करणेन, गोकोटिभिः कोटिसङ्ख्याकगोदानेन, स्वर्णसहस्रदानात् सहस्रसङ्ख्याकसुवर्णमुद्रादानात्, तथा सर्वतीर्थेषु काशीप्रयागादिपुण्यस्थानेषु, कृतः आचरितः यः अभिषेकः स्नानं तस्मात् तीर्थस्नानात् यत् पुण्यं सुकृतिः भवेत्, सूतकदर्शनेन पारददर्शनेनैव नृणां तत् पुण्यं भवेत् । अश्वमेधादिभ्योऽपि पारददर्शनं बहुफलम् इति भावः ॥ २२ ॥

विधायेति ।—जगत्त्रितये त्रिभुवने यानि लिङ्गानि शिवलिङ्गानि तेषाम् ॥ २३ ॥

भक्षणमिति ।—भक्षणादिभेदेन पञ्चधा पञ्चप्रकारा रसपूजा रसार्चना रससेवा ॥ २४ ॥

हन्ति भक्षणमात्रेण पूर्वजन्माघसम्भवम् ।
रोगसङ्घमशेषाणां नराणां नात्र संशयः ॥ २५ ॥
पूर्वजन्मकृतं पापं सद्यो नश्यति देहिनाम् ।
सुगन्धपिष्टसूतेन यदि शम्भुर्विलेपितः ॥ २६ ॥
अभ्रकं त्रुटिमात्रं यो रसस्य परिजारयेत् ।
शतक्रतुफलं तस्य भवेदित्यब्रवीच्छिवः ॥ २७ ॥
यश्च निन्दति सूतेन्द्रं शम्भोस्तेजः परात्परम् ।
स पतेन्नरके घोरे यावत्कल्पविकल्पनम् ॥ २८ ॥
रोगिभ्यो यो रसं दत्ते शुद्धिपाकसमन्वितम् ।
तुलादानाश्वमेधानां फलं प्राप्नोति शाश्वतम् ॥ २९ ॥
सिद्धे रसे करिष्यामि निर्दारिद्र्यगदं जगत् ।
रसध्यानमिदं प्रोक्तं ब्रह्महत्यादिपापनुत् ॥ ३० ॥

रसभक्षणगुणमाह, हन्तीति।—पूर्वस्मिन् जन्मनि यानि अघानि पापानि, तेभ्य सम्भव उत्पत्तिर्यस्य त तथाविध रोगसङ्घ व्याधिसमूहम् ॥ २५ ॥

रसस्पर्शनगुणमाह, पूर्वेत्यादिद्वाभ्याम्।—सुगन्धेन सद्गन्धयुक्तद्रव्येण सह पिष्टः पेषित य सूत पारद तेन यदि शम्भु शिव, विलेपित अनुलेपित ॥ २६ ॥

अभ्रकमिति।—य अभ्रक तथा रसस्य पारदस्य त्रुटिमात्र लेशमात्र बिन्दुमात्र-रसमित्यर्थ, परिजारयेत् परि सर्वतोभावेन जारयेत् भस्मीकुर्यात्। शतक्रतुफलं शताश्वमेधयागफलम् ॥ २७ ॥

रसनिन्दाया दोषमाह, यश्चेति।—सूतेन्द्रं पारदम्। शम्भोस्तेज. शिववीर्य्यम्। परात् पर श्रेष्ठतमम्। कल्पविकल्पन कल्पस्य प्रलयस्य विकल्पन विरचनं प्रलयागमनं कल्पान्तमिति यावत् ॥ २८ ॥

रसदानगुणमाह, रोगिभ्य इति।—शुद्धिपाकसमन्वित शोधितमारितम्। शाश्वतं नित्यम् ॥ २९ ॥

रसध्यानगुणमाह, सिद्धे इति।—सिद्धे शोधनादिना सम्यक् निष्पन्ने। निर्दारिद्र्यगद नि. निर्मुक्त दारिद्र्यगदाभ्या यत् तथाभूत दारिद्र्यव्याधिमुक्तम्, इदम् एवम्भूतचिन्तन, रसध्यान समाहितचेतसा ऐकाग्र्येण रसचिन्तन प्रोक्तम् ॥ ३० ॥

अभ्रग्रासो हि सूतस्य नैवेद्यं परिकीर्त्तितम्।
रसस्येत्यर्चनं कृत्वा प्राप्नुयात् क्रतुजं फलम्॥ ३१॥
उदरे संस्थिते सूते यस्योत्क्रामति जीवितम्।
स मुक्तो दुष्कृताद्घोरात् प्रयाति परमं पदम्॥ ३२॥
मूर्च्छित्वा हरति रुजं बन्धनमनुभूय मुक्तिदो भवति।
अमरीकरोति हि मृतः कोऽन्यः करुणाकरः सूतात्? ॥३३॥

रसपूजागुणमाह, अभ्रेति।—अभ्रस्य ग्रासः कवलीकरणं सूतसाधकाष्टादशविंशतिकर्मसु मध्ये रसजारणार्थं प्रकारविशेषः। तद्यथा रसेन्द्रचिन्तामणौ—"जारणा हि पातनगालनव्यतिरेकेण घनहेमादिग्रासपूर्वकं पूर्वावस्थापन्नत्वम्।" ग्रसिताभ्ररसगुणं यथा तत्रैव—"शुद्धगन्धेषु जीर्णस्तु शुद्धाच्छतगुणाधिकः। षड्गुणे गन्धके जीर्णे रसो भवति रोगहा॥ ... तस्माच्छतगुणो व्योमसत्त्वे जीर्णस्तु—"॥ रसस्य अभ्रग्रसने सामर्थ्यमाह यथा तत्रैव—"देव्या रजो भवेद्गन्धो धातु शुक्लं तथाऽभ्रकम्। आलिङ्गने समर्थौ द्वौ प्रियत्वाच्छिवरेतसः॥" ग्रसनप्रकारं यथा तत्रैव—"वज्रकण्टकवचाग्रं द्व्यङ्गमष्टाङ्गुलं मृदा। विलिप्य गोकरीषाग्नौ पुटितं तच्च शोषितम्॥ क्षारं वज्रे विनिक्षिप्तो ग्रासार्थी जायते रसः। ग्रसते गन्धहेमादिवज्रसत्त्वादिकं क्षणात्॥" अथ ग्रासयोग्यरसो यथा तत्रैव—"सतुत्थटङ्कनक्षज्जि-पटुतासे त्र्यहोषितम्। काञ्जिकं भावितं तेन गन्धाढ्यं चरति क्षणात्॥ विडेषु काञ्जिके क्षिप्तो रसः स्यात् ग्रासलालसः। ग्रसते सर्वलोहानि सर्वसत्त्वानि वज्रकम्॥" अभ्ररहितजारितरसस्य नैष्फल्यमाह यथा तत्रैव—"घनरहितबीजजारणसम्प्राप्तिसिद्धिकृतकृत्याः। कृपणाः प्राप्य समुद्रं वराटिकालाभसन्तुष्टाः॥ विनैकमभ्रसत्त्वं नान्यो रसपक्षकर्त्तनसमर्थः॥" इति। सूतस्य पारदस्य, नैवेद्यं देवोद्देशेन निवेदनीयं द्रव्यं, पूजार्थमुपहारमित्यर्थः, परिकीर्त्तितम्, अभ्रग्रसनशक्तिसञ्जननमेव रसस्य पूजनमित्यर्थः। यदुक्तं रसेन्द्रचिन्तामणौ—"मोक्षाभिव्यञ्जकं देवि। जारणा साधकस्य तु। खल्वन्तु पिण्डिका देवि। रसेन्द्रो लिङ्गमुच्यते॥ मर्द्दनं बन्धनञ्चैव ग्रासं पूजा विधीयते॥" इति एवम्प्रकारम् अर्चनं पूजनम्। क्रतुजम् अश्वमेधयज्ञजन्यम्॥ ३१—३२॥

मूर्च्छित्वेति।—मूर्च्छित्वा अव्यभिचरितव्याधिघातकत्वं मूर्च्छनां तां प्राप्य इत्यर्थः। तत्प्रकारो यथा रसेन्द्रसारसङ्ग्रहे—"गन्धकेन रसं प्राज्ञः सुदृढं मर्द्दयेत् भिषक्। कज्जलाभो यदा सूतो विहाय घनचापलम्॥ दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः।

सुरगुरुगोद्विजहिंसापापकलापोद्भवं किलासाध्यम्।
श्वित्रं तदपि च शमयति यस्तस्मात् कः पवित्रतरः सूतात्? ॥ ३४ ॥
रसबन्ध एव धन्यः प्रारम्भे यस्य सततमिति करुणा।
सेत्स्यति रसे करिष्ये महीमहं निर्जरामरणाम् ॥ ३५ ॥

असौ रोगचयं हन्यादनुपानस्य योगतः ॥" मूर्च्छनाप्रकारस्तु बहुविधः, तत्र षड्गुणगन्धकजारणप्रक्रिया साधीयसी। यदुक्तं रसेन्द्रचिन्तामणौ—'रसगुणबलिजारणं विनाऽयं न खलु रुजाहरणक्षमो रसेन्द्रः। न जलदकलधौतपाकहीनः स्पृशति रसायनतामिति प्रसिद्धा ॥" बन्धनं स्वाभाविकद्रवत्वे सति वह्निनाऽनुच्छिद्यमानत्वं मूर्त्तिबद्धत्वं स्वेदनमर्द्दनाद्यूनविंशतिकर्मसाध्यः अवस्थाविशेष इत्यर्थः, तम् अनुभूय प्राप्येत्यर्थः। बन्धनसाधनान्यूनविंशतिकर्माणि यथा रसेन्द्रचिन्तामणौ—"स्वेदनमर्द्दनमूर्च्छनोत्थापनपातनबोधननियमनदीपनानुवासन-गगनादिग्रासप्रमाणचारण-गर्भद्रुतिबाह्यद्रुतियोगजारणरञ्जनसारणक्रामणवेधभक्षणानि" इति। बन्धनप्रकारो यथा रसरत्नाकरे—"कटुतुम्ब्युद्भवे कन्दे वन्ध्यायाः क्षीरकन्दके। अपक्वैकं समादाय तद्गर्भे पिण्डिकां ततः ॥ दशनिष्कं शुद्धसूतं निष्कैकं शुद्धगन्धकम्। स्तोकं स्तोकं क्षिपेद्गन्धं पाषाणे तु च कुट्टयेत् ॥ याममात्रे भवेत् पिण्डी रक्तकन्दे विनिक्षिपेत्। अधोर्द्ध्वं भस्म-वैक्रान्तं दत्त्वा निष्कार्द्धमात्रकम् ॥ ततः कन्दस्य मज्जाभिर्मुखं बद्ध्वा मृदा दृढम्। लिप्तमङ्गुलमानेन सर्वतः शोष्य गोलकम् ॥ पाचयेत् भूधरे यन्त्रे ततोद्धृत्य पुनः पचेत्। ऊर्द्ध्वभागमधः कुर्य्यादित्येव परिवर्जयेत् ॥ क्रमेण चालयेदूर्द्ध्वं वह्निर्युग्मोपलैः पचेत्। ततो भित्त्वा तु सङ्ग्राह्य बद्धः स्याद्दाडिमोपमम् ॥ नाम्ना वैक्रान्तबद्धोऽयं सर्वरोगेषु योजयेत् ॥" इति। अन्ये च प्रकारा बन्धनस्य तत्रैव द्रष्टव्याः। मृतः भस्मीभूतः, तत्प्रकारो यथा रसेन्द्रसारसङ्ग्रहे—"द्विपलं शुद्धसूतस्य सूतार्द्धं गन्धकं तथा। कन्यानीरेण सम्मर्द्द्य दिनमेकं निरन्तरम् ॥ रुद्ध्वा तत् भूधरे यन्त्रे दिनैकं मारयेत् पुटे ॥" इति। अमरीकरोति अनमरम् अमरं करोति मरणधर्मिणं मृत्युरहितं करोति ॥ ३३ ॥

सूतस्य पवित्रता पापनाशकत्वमाह सुरेति।—देवतागुरुजनगोब्राह्मणानां हिंसया ये पापकलापाः पापसमूहाः तेभ्यः उद्भवः जन्म यस्य तथाविधं, श्वित्रं श्वेतकुष्ठम्। असाध्यम् अचिकित्स्यम्। किल निश्चये ॥ ३४ ॥

बद्धरसस्य गुणोत्कर्षमाह, रसेति।—यस्य रसबन्धस्य प्रारम्भे उपक्रमे एव

सुकृतफलं तावदिदं सुकुले यज्जन्म धीश्च तत्रापि ।
साऽपि च सकलमहीतलतुलनफला भूतलञ्च सुविधेयम्
॥ ३६ ॥

भूतलविधेयतायाः फलमर्थास्ते च विविधभोगफलाः ।
भोगाश्च सन्ति शरीरे तदनित्यमतो वृथा सकलम् ॥ ३७ ॥

सततं निरन्तरम्, इति एव वक्ष्यमाणरूपा, करुणा अनुकम्पा, बन्धयितुश्चेतसि उदेति इति शेष, यत् रसे रसबन्धे, सेत्स्यति सम्यक् निष्पत्स्यमाने सति, अह मही पृथिवी निर्जरामरणा वार्द्धक्यमृत्युरहिता, मर्त्त्यमह जरामृत्युविवर्ज्जितमित्यर्थ., करिष्ये। स रसबन्ध बन्धनप्राप्तो रस, धन्य प्रशस्य एव ॥ ३५ ॥

रससेवनस्य जरामृत्युनाशनतया दीर्घकालव्यापिसाधनसामर्थ्यप्रदत्वात् मुक्ति-प्रदत्व वर्णयितुम अजरामरस्य च तत्साधन सम्भवतीत्यभिप्रायेण शरीरादीनामनित्यत्व प्रतिपादयति, सुकृतेत्यादिभिस्त्रिभि ।—सुकुले प्रशस्तवंशे, यत् जन्म उत्पत्ति, इद कुले जन्म तावत् सुकृतफल शुभादृष्टफल जन्मान्तरीणसुकृतिवशादेव सदृशे उत्पद्यते इत्यर्थ । तत्रापि सत्कुले जन्मलाभेऽपि, धीश्च प्रशस्तबुद्धिरपि, सुकृतफलेति शेष । सा बुद्धि अपि, सकलेन समग्रेण, महीतलेन भूतलेन सह, तुलनम् उपमाप्रदर्शन, फल यस्या सा तथाविधा प्रशस्तबुद्धिमान् एव भूतलस्थाना सर्वेषा दृष्टान्तस्थलमित्यर्थ । भूतल भूतलस्था सर्व एव प्राणिन इत्यर्थः, सुविधेय वचने स्थितम् आज्ञासम्पादकमिति यावत्, भवेदिति शेष । बुद्धिमन्त. सर्वानेव स्वायत्तान कुर्वन्तीति भाव ॥ ३६ ॥

भूतलेति ।—भूतलविधेयतायाः पृथिवीस्थसर्वजनवशीकरणस्य फलम् अर्था. धनानि, अव्याहताज्ञप्रभुशक्तिसम्पन्नस्याज्ञा सर्व एव शिरसा वहन् धनानि प्रयच्छति । ते च अर्था', विविधभोगफला विविधा बहुप्रकाराः भोगा. स्रक्चन्दनवनिताद्युप-भोगजनितसुखानि फलानि कार्य्याणि येषा ते तथाभूता, धन विविधभोगसाधन-मित्यर्थ । भोगाश्च धनसाध्यास्ते भोगा. पुन, शरीरे अस्मिन् नरदेहे, सन्ति विद्यन्त, शरीरमेव भोगाधिष्ठानमित्यर्थ । तत भोगाधिष्ठानशरीरम्, अनित्य नश्वरम्, अत' शरीरस्य नश्वरत्वात्, सकल सुकुले जन्मादि भोगान्त सर्वमेव, वृथा निरर्थक यदा अवश्यमेव शरीर नश्यति तदा सुकुले जन्मलाभादिना किं फलम् ? इति भाव' ॥ ३७ ॥

इति धनशरीरभोगान्मत्वाऽनित्यान् सदैव यतनीयम्।
मुक्तौ सा च ज्ञानात्तच्चाभ्यासात् स च स्थिरे देहे ॥ ३८ ॥
तत्स्थैर्य्ये न समर्थं रसायनं किमपि मूललोहादि।
स्वयमस्थिरस्वभाव दाह्य क्लेद्यञ्च शोष्यम् ॥ ३९ ॥
काष्ठौषध्यो नागे नागो वङ्गेऽथ वङ्गमपि शुल्वे।
शुल्व तारे तार कनके कनकञ्च लीयते सूते ॥ ४० ॥
अमृतत्व हि भजन्ते हरमूर्त्तौ योगिनो यथा लीनाः।
तद्वत् कवलितगगने रसराजे हेमलोहाद्याः ॥ ४१ ॥

इतीति।—इति उक्तप्रकारेण, धनशरीरभोगान् अनित्यान् अशाश्वतान्, मत्वा विविच्य, सदैव मुक्तौ मुक्तिसाधने, यतनीय यत्न कर्त्तव्य इत्यर्थ। सा च सा शाश्वती मुक्ति पुन, ज्ञानात जीवब्रह्मणोरैक्यबोधात, भवतीति शेष। तच्च मुक्तिहेतुकज्ञान पुन, अभ्यासात् सततानुशीलनात्, जायते इति शेष। स च अभ्यास., स्थिरे स्थायिनि अविनश्वरे देहे, सम्भवतीति शेष.। सुदीर्घजीवनमन्तरेण मुक्तिहेतुभूतज्ञानानुशीलन न सम्भवतीति भाव ॥ ३८ ॥

पुनरपि रसस्य मुक्तिप्रदत्व वर्णयति, तदिति।—तत् तस्य देहस्य स्थैर्य्ये स्थिरत्व-सम्पादने, मूललोहादि मूलभूत वनौषधादिक तथा लोहादि स्वर्णरौप्यादिकञ्च, किमपि रसायन किञ्चिदपि रसायनौषध, रसायनलक्षण यथा चरके—“यज्जरा-व्याधिविध्वसि भेषज तद्रसायनम्” इति। न समर्थं न शक्त भवेत्। यत तत् मूललोहादिक स्वयम् अस्थिरस्वभाव चञ्चलप्रकृतिकम् अन्यस्मिन् धातौ विलयन-स्वभावविशिष्ट, दाह्य दाहयोग्य, मारण विना तत न साधक भवति, क्लेद्य क्लेदन-योग्य, तैलतक्रादिषु सिञ्चनाद्दं तद्व्यतिरेकेण शुद्धिक्रियाभावात्, शोष्यञ्च आतपे शोषणयोग्य, शोधनार्थं शोधनीयद्रवेण यन्मर्द्दन क्रियते तच्छोषणार्थम् आतपे शोषणमर्हति, रसस्तु तथा न दाहक्लेदादिकमनुभवति इत्यर्थ ॥ ३९ ॥

सूतेतररसायनानाम् अस्थिरस्वभावत्व प्रदर्शयति, काष्ठौषध्य इति।—काष्ठौषध्य॰ काष्ठबहुला ओषध्य मूलिन्य। नागे सीसके। शुल्वे ताम्रे। तारे रजते। लीयते लीनो भवति तत्रादृश्यो भवतीत्यर्थ ॥ ४० ॥

रसस्य अमृतवद्गुणसम्पादकत्वमाह, अमृतत्वमिति।—योगिन सर्वभूतेषु सुख-दुःखादिषु द्वन्द्वेषु च समदर्शिन., हरमूर्त्तौ लोपाख्यशङ्करदेहे, लीना. लय गताः

अथ रसस्य जीवन्मुक्तिकारणतामाह।—

परमात्मनीव सततं भवति लयो यत्र सर्वसत्त्वानाम्।
एकोऽसौ रसराजः शरीरमजरामरं कुरुते ॥ ४२ ॥
स्थिरदेहेऽभ्यासवशात् प्राप्य ज्ञानं गुणाष्टकोपेतम्।
प्राप्नोति ब्रह्मपदं न पुनर्भववासजन्मदुःखानि ॥ ४३ ॥
एकांशेन जगद्युगपदवष्टभ्यावस्थितं परं ज्योतिः।
यादृशैस्त्रिभिस्तदमृतं सुलभं न विरक्तिमात्रेण ॥ ४४ ॥

सायुज्यं प्राप्ताः सन्तः, यथा यद्वत् अमृतत्वं जन्ममृत्युजराद्युःखराहित्यं मोक्षस्वरूपमित्यर्थः, भजन्ते आश्रयन्ति, तद्वत् तथा कवलितगगने ग्रासीकृताभ्रे रसराजे पारदे हेमलौहाद्याः स्वर्णाद्यष्टलौहा लीनाः एकीभूताः संयुक्ताः सन्तः, अमृतत्वम् अमृतमिव गुणशालित्वं जरामरणादिविनाशकगुणवत्ता, भजन्ते प्राप्नुवन्ति, रसराजस्य स्थिरदेहप्रदत्वात् तत्र लीनाः हेमादयोऽपि देहस्थैर्यप्रदानेन तत्साधकानां जरामरणादिनिवारणं कुर्वन्ति, अथवा पुनः पुनः जन्ममृत्युधर्मिणोऽपि मानवाः यथा साधनबलेन हरसायुज्यं प्राप्य अपुनरावर्त्तिनो भवन्ति, तथा उत्थानविलयनधर्मिणः हेमादयोऽपि रससायुज्यं प्राप्य नित्यत्वं भजन्ते इति भावः ॥ ४१ ॥

रसस्य परब्रह्मसादृश्यं प्रदर्शयति, परमात्मनीति।—परमात्मनि परमब्रह्मणि सर्वसत्त्वानां सर्वप्राणिनां लयः संश्लेषः इव यत्र रसराजे सर्वसत्त्वानां सर्वेषां रसोपरसलौहादिद्रव्याणां सततं निरन्तरं लयः भवति, असौ रसराजः, एकः केवलः अद्वितीय एव, शरीरम् अजरामरं जरामरणविमुक्तं कुरुते, परब्रह्मोपासनेन यथा अजरामरो भवति तथा रसोपासनेनापीति भावः ॥ ४२ ॥

रससेवनस्य मोक्षप्रदत्वमाह स्थिरदेहे इति।—स्थिरदेहे रससेवनेन अविनश्वरशरीरे सति अभ्यासवशात् निरन्तरानुशीलनात् गुणाष्टकोपेतं गौतमोक्तेन सर्वभूतेषु दया-क्षान्तिरनसूया-शौचमनायासो मङ्गलमकार्पण्यमस्पृहाऽष्टावष्टात्मगुणेन समन्वितं ज्ञानं "सर्वं खल्विदं ब्रह्म" इत्याकारं तत्त्वावबोधं प्राप्य ब्रह्मपदं मोक्षस्वरूपं प्राप्नोति विन्दति, भववासेन संसारे अवस्थानेन जन्म उत्पत्तिर्येषां तानि तथाभूतानि दुःखानि पुनः न प्राप्नोति, रससेवनेन स्थिरदेहं प्राप्य निरन्तरानुशीलनजनितज्ञानोन्नत्या मोक्षस्वरूपं लभते। अनेन रसस्यैव मोक्षदायित्वं सूचितम् ॥ ४३ ॥

ज्ञानं विना विरक्तिमात्रं न मोक्षकारणमिति वक्तुमाह, एकांशेनेति।—यत् त्रिभि

न हि देहेन कथञ्चित् व्याधिजरामरणदुःखविधुरेण ।
क्षणभङ्गुरेण सूक्ष्मं तत् ब्रह्मोपासितुं शक्यम् ॥ ४५ ॥
नामापि देहसिद्धे को गृह्णीयादिना शरीरेण ।
यद्योगगम्यममलं मनसोऽपि न गोचरं तत्त्वम् ॥ ४६ ॥

पादे उपलक्षित त्रिविक्रमस्वरूपमित्यर्थ, परम् उत्कृष्ट ज्योति. धाम ज्योति पदार्थ एकांशेन एकावयवेन सर्वभूतस्वरूपेण एकेन पादेनेत्यर्थ, तथा च श्रुतौ—"पादोऽस्य सर्वभूतानि त्रिपादस्यामृत दिवि' इति । जगत त्रिभुवन युगपत एकदैव अवष्टभ्य आक्रम्य विधृत्येत्यर्थ अवस्थित, यदुक्त गीतायाम्—"विष्टभ्याहमिद कृत्स्नमेकांशेन स्थितो जगत" इति, तत ज्योतिस्वरूपम् अमृत ब्रह्म विरक्तिमात्रेण देहस्थैर्यादिसाधनजनितज्ञानादिक विना केवलया अनासक्त्या एव न सुलभ न सुप्रापम्, तथा च श्रीमद्भगवद्गीतायाम्—"ज्ञानेन तु तदज्ञानम" इत्यादि । ज्ञानादिसाधन विना केवलवैराग्येण ब्रह्मज्ञान दुर्लभमेव, ज्ञानादिसाधनन्तु देहस्थैर्यापेक्ष, तच्च रससेवनापेक्षि, अतो रस एव मुक्तिकारणमिति भाव ॥ ४४ ॥

क्षणस्थायिनि अस्मिन् देहे ब्रह्मज्ञानलाभो न सुलभ इति वक्तुमाह, नेति ।—व्याधिना पीडया जरया देहशैथिल्यापादकावस्थाभेदेन वार्द्धक्येनेत्यर्थ, मरणेन च यत दुःख तेन विधुरेण क्लिष्टेन क्षणभङ्गुरेण क्षणविध्वंसिना देहेन करणेन, सूक्ष्म ज्ञानमात्रगम्यम् अध्यात्मस्वरूप तत ज्योतीरूप ब्रह्म अमृतम उपासितुम् आराधयितु कथञ्चित केनापि प्रकारेण न हि नैव शक्य समर्थम्, सुदीर्घजीवनव्यापिसाधनाजनितज्ञानगम्यस्य ब्रह्मणो पद्मपत्रस्थवारिबिन्दुवत् चलेनानेन देहेन लाभोऽसम्भव एवेति भाव ॥ ४५ ॥

एतदेव प्रकारान्तरेणाह, नामापीति ।—यत् अमल निर्मल ज्योतीरूपमित्यर्थ, तत्त्व ब्रह्म मनसोऽपि न गोचरम् अन्तःकरणस्यापि अविषयीभूत सङ्कल्पविकल्पात्मकवृत्तिमदन्तःकरणस्यापि अग्राह्य, केवल योगगम्य योगेन सर्वविषयेभ्य. चित्तवृत्तिनिरोधरूपेण "संयोग योगमित्याहुर्जीवात्मपरमात्मनो" इत्युक्तेन जीवपरमात्मनोरैक्यरूपेण गम्य ज्ञेय तत दुर्ज्ञेयं वस्तु, अपि प्रश्ने, क जन नाम सम्भावनायां, देहसिद्धे देहस्य स्थैर्यादिसिद्धि विना शरीरेण प्रतिक्षण क्षीयमाणेन देहेन गृह्णीयात? ज्ञात शक्नुयात्? न कोऽपीत्यर्थ । तथा च श्रुति,—"अगोत्रमवर्णममल केवलो निर्गुणश्च" "निष्कल निष्क्रिय शान्तम्" "यतो वाचो निवर्त्तन्ते अप्राप्य मनसा सह" इत्यादि ॥ ४६ ॥

यज्ञाद्दानात्तपसो वेदाध्ययनाद्दमात् सदाचारात् ।
अत्यन्तभूयसी किल योगवशादात्मसंवित्ति ॥ ४७ ॥
भ्रूयुगमध्यगतं यच्छिखि-विद्युत्सूर्य्यवज्जगद्भाति ।
केषाञ्चित् पुण्यदृशामुन्मीलति चिन्मयं परं ज्योतिः ॥ ४८ ॥

ब्रह्मज्ञानोपायमाह, यज्ञादिति ।—यज्ञात् यागानुष्ठानात् दानात् अन्न-वस्त्रादीनां त्यागात् तपसः तपश्चरणात् वेदाध्ययनात् वेदपाठात् दमात् बाह्येन्द्रियव्यापाररोधात् यदुक्तं—"निग्रहो बाह्यवृत्तीनां दम इत्यभिधीयते" इति । सदाचारात् "सरस्वतीदृषद्वत्योर्देवनद्योर्यदन्तरम् । तं देवनिर्मितं देशं ब्रह्मावर्त्तं प्रचक्षते ॥ तस्मिन् देशे य आचारः पारम्पर्य्यक्रमागतः । वर्णानां सान्तरालानां स सदाचार उच्यते ॥" इति मनूक्तदेशप्रचलिताचारात्, "साधवः क्षीणदोषाश्च सच्छब्दः साधुवाचकः । तेषामाचरणं यत्तु सदाचारः स उच्यते ॥" इत्युक्तलक्षणकसाधुविहिताचारानुष्ठानाद्वा, तथा योगवशात् सर्वविषयेभ्यः जीवब्रह्मणोरैक्यज्ञानहेतुभूतचित्तवृत्तिनिरोधरूपात् अत्यन्तभूयसी अतिबहुला श्रेष्ठतमा इत्यर्थः, आत्मसंवित्ति आत्मतत्त्वोपलब्धिः ब्रह्मज्ञानं किल जायते इति शेषः । निरन्तरयागाद्यनुष्ठानजनितचित्तशुद्ध्या अनुत्तमब्रह्मोपलब्धिरिति भावः ॥ ४७ ॥

ब्रह्म न सर्वेषां सुज्ञेयमिति वक्तुमाह, भ्रूयुगेति ।—भ्रूयुगयोः भ्रुवोः मध्यगतं सन्धिस्थलावस्थितं शिखिविद्युत्सूर्य्यवत् अग्निविद्युद्भास्कर इव जगतां भाति प्रकाशते यस्मात् तत् जगद्भाति जगत्प्रकाशकं, "जगद्भासि" इति पाठेऽपि—जगत् भासयते यत् तदिति व्युत्पत्त्या जगत्प्रकाशकमित्येवार्थः यत् ज्योतिःस्वरूपं वस्तु, तथा च श्रुतिः,—"येन सूर्य्यस्तपति तेजसेद्धः, न तत्र सूर्य्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निस्तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति" इत्यादि । तत् चिन्मयं ज्ञानस्वरूपं ज्ञानगम्यमित्यर्थः, अखण्डज्ञानमयमित्यर्थो वा, यदुक्तं गीतायां—"ज्ञानं ज्ञेयं ज्ञानगम्यम्" इति । परम् उत्कृष्टं ज्योतिः तेजःपदार्थं ब्रह्मेति यावत् केषाञ्चित् पुण्यदृशां स्वल्पसंख्यकानां ज्ञानचक्षुषां सम्बन्धे, पुनाति शोधयति पवित्रीकरोति इति व्युत्पत्त्या पुण्यशब्दः ज्ञानेऽपि वर्त्तते, यतो ज्ञानमपि पवित्रताऽऽपादकं स्वयञ्च पवित्रं, यदुक्तं गीतायां—"न हि ज्ञानेन सदृशं पवित्रमिह विद्यते" "ज्ञाननिर्धूतकल्मषाः" इति । उन्मीलति प्रकाशं यातीत्यर्थः ॥ ४८ ॥

परमानन्दैकरसं परमं ज्योतिः स्वभावमविकल्पम् ।
विगलित-सकलक्लेशं ज्ञेयं शान्तं स्व-संवेद्यम् ॥ ४९ ॥
तस्मिन्नाधाय मनः स्फुरदखिलं चिन्मयं जगत् पश्यन् ।
उत्पन्न-कर्मबन्धो ब्रह्मत्वमिहैव चाप्नोति ॥ ५० ॥
रागद्वेषविमुक्ताः सत्याचारा मृषारहिताः ।
सर्वत्र निर्विशेषा भवन्ति चिद्ब्रह्मसंस्पर्शात् ॥ ५१ ॥

तदेव विशिनष्टि, परमेति ।—परमानन्दे एव एकः केवलः रसः अनुरागो यस्य तत् आनन्दघनं नित्यानन्दमयमित्यर्थः, परमम् अनादि ज्योतिः स्वभावं स्वप्रकाशस्वरूपम् अविकल्पं नास्ति विकल्पः इदं वा इदं वा इत्यादिरूपः वितर्कः यस्मिन् तत् ज्ञातृज्ञेयादिविभागशून्यं विशेष्यविशेषणसम्बन्धरहितञ्च ब्रह्मात्मैकात्मविषयकमखण्डा-कारकमेकविषयकज्ञानस्वरूपं, विगलितः खण्डितः सकलः क्लेशः यस्मिन् तत्, यस्मिन् प्राप्ते सर्वदुःखविनिवृत्तिः इत्यर्थः, ज्ञेयं ज्ञानगम्यं शान्तं शमगुणयुक्तं स्वसंवेद्यं स्वस्मिन् आत्मनि एव संवेद्यम् अनुभवनीयम् । एवम्भूतं परं ज्योतिरिति पूर्वेण सम्बन्धः ॥ ४९ ॥

इहैव मुक्तिमार्गं प्रदर्शयति, तस्मिन्निति ।—तस्मिन् तथाभूते ज्योतिर्मये ब्रह्मणि मनः चित्तम् आधाय निविश्य जगत् इदं विश्वं स्फुरत् प्रकाशमानम् अखिलं समग्रं वस्तु यत्र तत् तथाभूतं, चिन्मयं ज्ञानस्वरूपं ब्रह्ममयं पश्यन् "सत्यं ज्ञानमानन्दं ब्रह्म" "सर्वं खल्विदं ब्रह्म" इत्यादि श्रुतेः, उत्पन्नः विच्छिन्नः कर्मबन्धः शुभाशुभकर्मजनितबन्धनं यस्य तथाभूतः विमुक्तकर्मपाशः सन् इहैव अस्मिन्नेव संसारे, स्थितः इति शेषः, ब्रह्मत्वं ब्रह्मस्वरूपं जीवन्मुक्तत्वम् आप्नोति लभते ॥ ५० ॥

ब्रह्मज्ञभावस्य समदर्शित्वमाह, रागेति ।—चिद्ब्रह्मसंस्पर्शात् ज्ञान-स्वरूपब्रह्मसायुज्यलाभात् रागद्वेषाभ्याम् आसक्त्यनासक्तिभ्यां विमुक्ताः सत्याचाराः सदा स्थितमिति सत्यं तदाचाराः साधुविहितानुष्ठानतत्पराः मृषारहिताः मिथ्याविवर्जिताः सन्तः सर्वत्र सर्वेष्वेव वस्तुषु निर्विशेषाः भेदज्ञानविरहिताः भवन्ति । यदुक्तं गीतायां—"विद्याविनयसम्पन्ने ब्राह्मणे गवि हस्तिनि । शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ॥ इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः । निर्दोषं हि समं ब्रह्म तस्माद्ब्रह्मणि ते स्थिताः ॥" इति । सर्वभूतानि आत्मवत् पश्यतीत्यर्थः ॥ ५१ ॥

तिष्ठन्त्यणिमादियुता विलसद्देहाः सदोदितानन्दाः।
ब्रह्मस्वभावममृतं सम्प्राप्तास्चैव कृतकृत्याः॥ ५२॥
आयतनं विद्यानां मूलं धर्मार्थकाममोक्षाणाम्।
श्रेयः परं किमन्यच्छरीरमजरामरं विहायैकम्?॥ ५३॥
प्रत्यक्षेण प्रमाणेन यो न जानाति सूतकम्।
अदृष्टविग्रहं देवं कथं ज्ञास्यति चिन्मयम्?॥ ५४॥

ब्रह्मज्ञानिन औत्कर्ष्यमाह तिष्ठन्तीति।—अमृत सुधास्वरूप परब्रह्मरूपं वा जन्ममरणादेरविषय वा ब्रह्मस्वभाव ब्रह्मत्व जीवन्मुक्तत्वमिति यावत, सम्प्राप्ता आश्रिता जीवा इति शेष अणिमादिभि "अणिमा लघिमा प्राप्ति प्राकाम्यं महिमा तथा। ईशित्वञ्च वशित्वञ्च तथा कामावसायिता॥" इत्यष्टैश्वर्य्यै युता उपेता विलसद्देहा दीप्तशरीरा ज्योतिर्मयदेहा इत्यर्थ, सदा नित्यम् उदित प्रकाशित आनन्द ब्रह्मोपलब्धिजनितसुख येषां ते तथाभूता नित्यानन्दमया, अत एव कृत सम्पन्न कृत्यम् अनुष्ठेयकार्य्यं येषा ते तथाभूताश्च मोक्षलाभात् अवसितसर्वप्रयोजनाश्च सन्त तिष्ठन्ति। जीवन्मुक्तैर्न किमपि अनासादितमिति भाव॥ ५२॥

स्थिरशरीरस्य सर्वसम्पन्मूलकत्वमाह, आयतनमिति।—अत्र यदिति पदमध्याहार्य्यम्। यत वस्तु विद्याना श्रुतिस्मृत्यादिषु ज्ञानाना तत्त्वसाक्षात्कारहेतुभूताना, यदुक्त श्रुतौ—"विद्ययाऽमृतमश्नुते" इति। आयतनम अधिष्ठान तथा धर्मार्थकाममोक्षाणा मूलं चतुर्वर्गलाभस्य हेतुभूतं तत ताद‍ृशम् एक मुख्यम् अजरामर जरामृत्युविवर्ज्जित शरीर विहाय त्यक्त्वा अन्यत् अपर परम् उत्कृष्ट श्रेय शिव मङ्गलायतनमित्यर्थ, किम्? अस्तीति शेष, न किमपीत्यर्थ। अजरामरशरीरेण सुबहुकाल ज्ञानादिसाधनद्वारा सर्वश्रेयोनिदानभूत तत्त्वसाक्षात्कारं चतुर्वर्गफलञ्च यथा लभते, क्षणस्थायिशरीरेण तु न तथा इति भाव॥ ५३॥

रसमाहात्म्याद्यज्ञाने दोषमाह प्रत्यक्षेणेति।—य प्रत्यक्षेण प्रमाणेन देहस्थैर्य्यादिकरणरूपाक्षिगोचरीभूतप्रमाणेन, सूतक पारद न जानाति, स न दृष्ट प्रत्यक्षीकृत विग्रह शरीर यस्य तथाविध स्थूलदृष्टेरविषयीभूत निराकार वा चिन्मय ज्ञानस्वरूप देव ब्रह्म कथ ज्ञास्यति? प्रत्यक्षप्रमाणसिद्धवस्तुज्ञानासमर्थस्य अप्रत्यक्षानुमेयब्रह्मज्ञानमसम्भवमेवेति भाव॥ ५४॥

यज्जरया जर्जरितं कास-श्वासादिदुःखविवशञ्च ।
योग्यं तन्न समाधौ प्रतिहत-बुद्धीन्द्रियप्रसरम् ॥ ५५ ॥
बालः षोडशवर्षो विषयरसास्वाद-लम्पटः परतः ।
यातविवेको वृद्धो मर्त्यः कथमाप्नुयान्मुक्तिम् ? ॥ ५६ ॥

ब्रह्मज्ञानलाभानुपयोगिदेह विवृणोति, यदिति ।—यत, शरीरमिति शेष, जरया जर्जरित जीर्णं कासश्वासादिदुःखेन तत्तद्व्याधिजनितसुखाभावेन, अथवा—दुःखयतीति दुःख व्याधि, कासश्वासादिव्याधिना विवशम् अस्वाधीनञ्च विकलमिति यावत, अत एव प्रतिहत निरुद्ध बुद्धीन्द्रियाणा चक्षुरादीना ज्ञानेन्द्रियाणा प्रसर, वेग स्वस्वविषयाभिगमनशक्ति यस्मिन् तादृश तत शरीर समाधौ परमात्मनि एकाग्रतया चित्तसन्निवेशरूपध्याने योग्यम् उपयुक्त न, भवतीति शेष, जराव्याधिक्लिष्टे देहे परमात्मनि एकाग्रतया मन समाधानासमर्थत्वादिति तात्पर्य्यम् ॥ ५५ ॥

दीर्घजीवन विना मुक्तिलाभस्य असम्भावनामाह बाल इति ।—षोडशवर्ष, षोडशवर्षीय षोडशवर्ष यावत इत्यर्थ, मर्त्य मानव बाल शिशु, बालावस्था मोक्षोपयोगिसाधनानर्हा इति भाव । परत षोडशादूर्द्ध सप्तति यावत मध्यवयाः इत्यथ, विषया स्रक्चन्दनवनितादय एव रसा आस्वाद्या उपभोग्य-वस्तूनीत्यर्थ, तेषाम् आस्वादे उपभोगे रसानुभवे इत्यर्थ, लम्पट आसक्त, विषयासक्तचित्ते तत्त्वज्ञानोदयानवकाशत्वात् मध्यावस्थाऽपि न मोक्षार्हा, यदुक्त श्रीमद्भागवते—'विषयासक्तचित्ताना कृष्णावेश सुदुस्तर । वारुणीदिग्गत वस्तु व्रजन्नैन्द्री किमाप्नुयात ?" ॥ इति । अत्र परत शब्द उभयत्रापि उन्नेय, परत सप्ततिवर्षादूर्द्ध वृद्ध स्थविर यात अपगत विवेक याथार्थ्येन वस्तुस्वरूपावधारण-सामर्थ्य यस्य तथाभूत, वृद्धस्य जराव्याधिजीर्णदेहत्वात् ज्ञानेन्द्रियाणा शक्ति-वैकल्याच्च साऽवस्थाऽपि न मुक्तिसाधनार्हा इति भाव, यद्वा—यात प्राप्त विवेक यस्य स तथाभूत, यदा विवेकवान् तदा वृद्ध, वृद्धस्य आयुषोऽल्पावशेषत्वात् जरादिजीर्णत्वात इन्द्रियापाटवाच्च साऽप्यवस्था तदनर्हा इति भाव, "जातविवेक" इति पाठे तु—जात उत्पन्न सञ्जातविवेक । कथ केन प्रकारेण मुक्तिम् आप्नुयात प्राप्नुयात ? न केनापीत्यर्थ । षोडशवर्षादीना बालादित्वे प्रमाणमाह स्मृति,—"आ षोडशाद्भवेद्बाल पञ्चविंशो युवा नरः । मध्यम, सप्ततिर्यावत् परतो वृद्ध उच्यते ॥" इति । बाल्ययौवनयोश्चित्तविक्षेपकरत्वात् न मुक्तिसाधनयोग्यता, वार्द्धक्यस्य

अस्मिन्नेव शरीरे येषां परमात्मनो न संवेदः ।
देहत्यागादूर्द्धं तेषां तद्ब्रह्म दूरतरम् ॥ ५७ ॥
ब्रह्मादयो यतन्ते तस्मिन् दिव्यां तनुं समाश्रित्य ।
जीवन्मुक्तास्तान्ये कल्पान्तस्थायिनो मुनयः ॥ ५८ ॥
तस्माज्जीवन्मुक्तिं समीहमानेन योगिना प्रथमम् ।
दिव्या तनुर्विधेया हरगौरीसृष्टिसंयोगात् ॥ ५९ ॥

तु चित्तस्थैर्य्यकरत्वेन मुक्तिसाधनार्हत्वेऽपि जराद्याक्रमणेन मनःक्षोभात न मोक्ष-साधनोपयोगित्वम् अतो यथा जरा नाक्रामेत् वार्द्धक्यागमनात् प्रागेव तथा यतितव्यमित्याशय ॥ ५६ ॥

तत्त्वज्ञानमेव मुक्तिद्वारमित्याशयेनाह, अस्मिन्निति ।—अस्मिन्नेव शरीरे परिदृश्य-मानस्थूलशरीरे एव येषां परमात्मन "आत्माऽस्य जगतो यस्मात् सर्वोत्कर्षा-श्रयो मत । परमात्मा परं ब्रह्म तेन वेदे प्रकीर्त्तित ॥" इत्युक्तस्वरूपस्य परब्रह्मण संवेद सम्यक् ज्ञानं न, भवेदिति शेष, तेषाम् अनात्मज्ञाना देह-त्यागादूर्द्धं मरणानन्तरं तत ब्रह्म दूरतरम् अतिशयेन दूरे वर्त्तते, वर्त्तमानदेहे साधनादिना ब्रह्मज्ञानानुदये मरणान्तरं साधनानुपयोगिदेहे तत्प्राप्तिसम्भावना सुदूरपराहता एव इत्यर्थ ॥ ५७ ॥

अस्तु, ब्रह्माप्राप्तौ का क्षति ? इत्याशङ्क्याह, ब्रह्मादय' इति ।—ब्रह्मादय तथा अन्ये च कल्पान्तस्थायिन आ प्रलयवर्त्तिन जीवन्मुक्ता कृतात्मसाक्षात्कारा प्रारब्ध-कर्मक्षयपर्य्यन्तं सुषुप्तिवत व्यवहर्त्तार आत्मज्ञा इति यावत्, मुनय दिव्या ज्योतिष्मतीं तनुं देहं समाश्रित्य अवलम्ब्य धृत्वा इत्यर्थ, रससेवनेन इति भाव, तस्मिन् ब्रह्मणि यतन्ते तद्ब्रह्मलाभार्थम आयस्यन्ते इत्यर्थ । आत्मज्ञा ब्रह्मादयो-ऽपि यस्य महिमानं ज्ञातुमशक्नुवन्त रससेवनेन सुचिरमायुर्लब्ध्वा यल्लाभार्थं यतन्ते तज्ज्ञानलाभार्थं मानवैरवश्यमेव प्रयत्नो विधेय इति तात्पर्य्यम् ॥ ५८ ॥

फलितमाह, तस्मादिति ।—तस्मात ब्रह्मादीनामपि आयासलभ्यत्वात् जीवन्मुक्तिं कर्त्तृत्वभोक्तृत्वादिबन्धात जीवत एव बन्धनिवृत्तिं समीहमानेन अभि-लषता तल्लाभार्थं चेष्टमानेनेत्यर्थ, जीवेनेति शेष, योगिना सुखदु खादिषु सर्वभूतेषु च समदर्शिना सता प्रथमम् आदावेव हरगौर्य्यो शिवयो ये सृष्टी सृज्येते त्यज्येते इति सृष्टी शुक्रशोणिते इत्यर्थ,, यद्वा—सृज्यते निर्मीयते उत्पद्यते

अथ रसोत्पत्तिवर्णनम् ।—

शैलेऽस्मिन् शिवयोः प्रीत्या परस्परजिगीषया ।
सम्प्रवृत्ते च सम्भोगे त्रिलोकीक्षोभकारिणि ॥ ६० ॥
विनिवारयितुं वह्निः सम्भोगं प्रेषितः सुरैः ।
काङ्क्षमाणैस्तयोः पुत्रं तारकासुरमारकम् ॥ ६१ ॥
कपोतरूपिणं प्राप्तं हिमवत्कन्दरेऽनलम् ।
अपक्षिभावसङ्क्षुब्धं स्मरलीलाविलोकिनम् ॥ ६२ ॥

इत्यर्थः. स्राभ्यामिति व्युत्पत्त्या सृष्टिशब्देन जीवसृष्टिकारणं शुक्रशोणितमुच्यते, तच्च रसगन्धकरूपम, यदुक्तम्—"पारदं शिववीर्य्यञ्च दुर्गाबीजञ्च गन्धकम्" इति । तयोः संयोगात् मूर्च्छनात् सम्मेलनादित्यर्थः, रसगन्धकयोर्मेलनजनितौषधविशेषभक्षणादिति भावः, दिव्या ज्योतिर्मयी अजरामररूपा तनुः देहः विधेया करणीया । आदौ रसादिसेवनेन देहस्थैर्य्यं विधाय पश्चात् मुक्तिलाभार्थं यतितव्यमिति भावः. ॥ ५९ ॥

रसोत्पत्तिं वर्णयितुं हरगौरीसम्भोगं प्रदर्शयति पञ्चभिः श्लोकैः, शैले इत्यादिभिः ।—अस्मिन् शैले हिमाचले शिवयोः हरपार्वत्योः प्रीत्या प्रीतिवशेन, न तु विद्वेषेण इति भावः, परस्परजिगीषया अन्योऽन्यं जेतुमिच्छया त्रिलोकी-क्षोभकारिणि त्रिलोक्याः त्रिभुवनस्य क्षोभकारिणि चाञ्चल्यविधायिनि सम्भोगे निधुवनव्यापारे सम्प्रवृत्ते प्रारब्धे सति, तारकासुरमारकं तदाख्यदैत्यविनाशनं तयोः उमामहेश्वरयोः पुत्रं काङ्क्षमाणैः अभिलषद्भिः सुरैः देवैः सम्भोगं विनिवारयितुं प्रतिषेधयितुं, वह्निः प्रेषितः प्रेरितः । पुरा तारकासुरपीड्यमाना देवाः तद्विनाशकं शिवयोः पुत्रमेकं काङ्क्षन्तः अतिष्ठन्, ततश्च परस्परजिगीषाप्रवृत्तयोस्तयोः सम्भोग-समाप्तिविलम्बहेतुकपुत्रोत्पत्तिविलम्बमाशङ्कमानाः सन्तः, सत्वरं सम्भोगसमापनमभि-सन्धाय हुताशनं प्रेषितवन्तः इत्यर्थः. ॥ ६०।६१ ॥

कपोतेति ।—कपोतरूपिणं पारावतरूपधारिणं हिमवत्कन्दरे हिमाचल-गुहायां प्राप्तं समागतम् अपक्षिभावसङ्क्षुब्धं न पक्षिभावेन तिर्य्यग्योनिज-स्वभावत्वेन सङ्क्षुब्धः. सङ्क्षोभः सङ्कोचः यस्य तम्, सम्पूर्वं क्षुभधातोर्भावविहित-"त"-प्रत्ययेन निपातने सिद्धत्वात् सङ्क्षुब्धशब्देन सङ्क्षोभः गम्यते, यद्वा—अपक्षिभावेन पक्षिभावादन्यत्वेन देवभावत्वेन सङ्क्षुब्धं स्मरव्यापारं दृष्ट्वा सङ्कुचितं सञ्जातचाञ्चल्यं वा

तं दृष्ट्वा लज्जितः शम्भुर्विरतः सुरतात्तदा ।
प्रच्युतश्चरमो धातुर्गृहीतः शूलपाणिना ॥ ६३ ॥
प्रक्षिप्तो वदने वह्नेर्गङ्गायामपि सोऽपतत् ।
वहिः क्षिप्तस्तया सोऽपि परिदन्दह्यमानया ॥ ६४ ॥
सञ्जातास्तन्मलान्नानाधातवः सिद्धिहेतवः ।
यावदग्निमुखाद्रेतो न्यपतद्भूरिसारतः ॥ ६५ ॥
शतयोजनगम्भीरान् कृत्वा कूपांस्तु पञ्च च ।
तदाप्रभृति कूपस्थं तद्रेतः पञ्चधाऽभवत् ॥ ६६ ॥

अथ रसस्य पञ्चविधत्वकथनम् ।—

रसो रसेन्द्रः सूतश्च पारदो मिश्रकस्तथा ।
इति पञ्चविधो जातः क्षेत्रभेदेन शम्भुजः ॥ ६७ ॥

रतलीलाविलोकिनं कामक्रीडादर्शिनं तम् अनलं दृष्ट्वा, शम्भुः लज्जितः सन् सुरतात् विरतः प्रतिनिवृत्तः अभूत । तदा सुरतविरतिसमये प्रच्युतः क्षरितः चरमो धातुः रसादिसप्तधातुमध्ये अन्त्यधातुः शुक्रम् इति यावत्, शूलपाणिना शङ्करेण गृहीतः धृतः, ततः वह्नेः वदने प्रक्षिप्तः निक्षिप्तः अपि, शूलपाणिना इति शेषः, सः धातुः, गङ्गायां गङ्गानीरे अपतत्, वह्निमुखाद्भ्रष्टः सन् इति भावः । तया गङ्गया अपि परि सर्वतोभावेन दन्दह्यमानया दाहेन पीड्यमानया सत्या, तस्य शिवतेजस्त्वात्, सः वहिः तटदेशे इत्यर्थः, क्षिप्तः त्यक्तः ॥ ६२—६४ ॥

रसोत्पत्तिं तथा तस्य पञ्चधाभवने हेतुमाह, सञ्जाता इति ।—तस्य रेतसः मलात् मलभागात् सिद्धिहेतवः देहस्थैर्य्यरूपसिद्धिप्रदाः नानाधातवः रसादयः सञ्जाताः उत्पन्नाः । रेतः शिववीर्य्यम् अग्निमुखात् यावत् यदैव न्यपतत् अभ्रश्यत् तदाप्रभृति तदारभ्य भूरिसारतः प्रभूतस्थिरांशत्वात् गुरुभारत्वादित्यर्थः, शतयोजनगम्भीरान् चतुःशतक्रोशगभीरान् पञ्च कूपान् कृत्वा तत् रेतः कूपस्थं पूर्वोक्तपञ्चकूपमध्ये अवस्थितं सत् पञ्चधा कूपपञ्चकेषु अवस्थानवशात् पञ्चप्रकारम् अभवत् । यथा किञ्चित् गुरुभारं वस्तु उच्चस्थलात् वेगेन पतत् भूमौ गाढलीनं सत् तिष्ठति, तथा अग्निमुखभ्रष्टं पञ्चधा विभक्तं रेतः गुरुत्वात् भूमौ पञ्च गभीरकूपान् कृत्वा तत्रान्तर्लीनमतिष्ठत इत्यर्थः ॥ ६५।६६ ॥

रसभेदं विवृणोति, रसः इति ।—शम्भुजः शिवाङ्गभवः शिववीर्य्यमिति तात्पर्य्यं,

अथ रसादीनां लक्षणानि ।—

रसो रक्तो विनिर्मुक्तः सर्वदोषै रसायनः ।
सञ्जातास्त्रिदशास्तेन नीरुजा निर्जरामराः ॥ ६८ ॥
रसेन्द्रो दोषनिर्मुक्तः श्यावो रूक्षोऽतिनिर्मलः ।
रसायनोऽभवस्तेन नागा मृत्युजरोज्झिताः ॥ ६९ ॥

भेदभेदेन अधिष्ठानभूमिगुणप्रभेदेन रसः रसेन्द्रः सूतः पारदः तथा मिश्रकः इति पञ्चविधः पञ्चप्रकारः जातः ॥ ६७ ॥

तत्र आदौ रसस्य लक्षणं गुणाश्चाह, रस इति ।—रसः पञ्चधा विभक्तस्य रेतसः रसनामको भेदः रक्तः रक्तवर्णः सर्वदोषैः नागवङ्गादिभिः नैसर्गिकदोषैः विनिर्मुक्तः विवर्ज्जितः तथा रसायनः रसानां प्रशस्तरसादिधातूनाम् अयनं प्राप्तिः यस्मात् स तथाभूतः, आद्यधातुत्वात् रसस्य प्राधान्येन तद्ग्रहणादेव रसायनशब्देन रक्तादीनामपि अयनं बोध्यम् । रसायनलक्षणं यथा चरकचिकित्सिते—"यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम् ।" अन्यच्च—"स्वस्थस्यौजस्करं यत्तु तद्वृष्यं तद्रसायनम्" इति । तेन च दीर्घायुष्ट्वादिलाभः । अन्यदपि लक्षणं यथा वैद्यकसङ्ग्रहे द्वितीयाध्याये—"देहस्येन्द्रियदन्तानां दृढीकरणमेव च । वलीपलितखालित्यवर्जनेऽपि च या क्रिया । पूर्ववैद्यप्रणीतं हि तद्रसायनमुच्यते ॥" इति । तत्फलं यथा सौश्रुतसूत्रे—"वयःस्थापनमायुर्मेधाबलकरं रोगापहरणसमर्थञ्च" इति । तेन तद्रससेवनेन त्रिदशाः तिस्रः दशाः अवस्थाः बाल्यकैशोरयौवनरूपाः येषां ते तथाभूताः देवाः नीरुजाः व्याधिरहिताः तथा निर्जरामराः जरामृत्युविवर्ज्जिताः सञ्जाताः अभवन्नित्यर्थः । रससेवनेनैव देवाः त्रिदशनिर्जरामरादिसंज्ञां लेभिरे इति तात्पर्यम् ॥ ६८ ॥

क्रमप्राप्तस्य रसेन्द्रस्य लक्षणादिकमाह, रसेन्द्र इति ।—रसेन्द्रः पूर्ववत् रसेन्द्रनामको भेदः दोषनिर्मुक्तः नागवङ्गादिदोषविवर्ज्जितः श्यावः मुक्तानुविद्धकृष्णवर्णः श्यामवर्ण इति लोके, रूक्षः स्नेहविवर्ज्जितः अति अतिशयेन निर्मलः शुद्धः मालिन्यविवर्ज्जितः रसायनश्च । तेन रसेन्द्रसेवनेन नागाः मानवाकृतिफणालाङ्गूलविशिष्टवासुकीप्रभृतयः सर्पाः मृत्युजराभ्याम् उज्झिताः त्यक्ताः जरामृत्युपरिशून्या इत्यर्थः, अभवन् । रससेवनेन इन्द्रादयो देवाः तथा रसेन्द्रसेवनेन वासुक्यादयो नागाः निर्जरामरा अभवन् इति फलितम् ॥ ६९ ॥

देवैर्नागैश्च तौ कूपौ पूरितौ मृद्भिरश्मभिः।
तदाप्रभृति लोकाना तौ जातावतिदुर्लभौ ॥ ७० ॥
ईषत्पीतश्च रूक्षाङ्गो दोषयुक्तश्च सूतकः।
दशाष्टसंस्कृतैः सिद्धो देह लोहं करोति सः ॥ ७१ ॥
अथान्यकूपजः सोऽपि चञ्चलः श्वेतवर्णवान्।
पारदो विविधैर्योगै. सर्वरोगहरः स हि ॥ ७२ ॥

रसरसेन्द्रयोर्दुष्प्राप्यतामाह, देवैरिति।—देवै इन्द्रादिभि नागै वासुकी-प्रभृतिभिश्च तौ कूपौ रसरसेन्द्रपूर्णकूपौ मृद्भि मृत्तिकाभि तथा अश्मभि प्रस्तरखण्डैः पूरितौ परिपूर्णौ कृतौ भस्मीकृतौ इत्यर्थ, मनुष्यकर्तृकग्रहणाशङ्कया इति भाव। तदाप्रभृति तौ रसरसेन्द्रौ लोकाना मर्त्यवासिनामित्यर्थ, अतिदुर्लभौ एकान्तदुष्प्रापौ जातौ। रसर[illegible]न्द्रौ सुप्राप्यौ चेत मानवास्तत्सेवनेन देवनागसदृशा भविष्यन्तीत्याशङ्क्य देवनागै तत्कूपौ रुद्धौ इति भाव ॥ ७० ॥

पूर्वरीत्या सूतकस्य लक्षण गुणाश्चाह, ईषदिति।—सूतक पञ्चप्रकारस्य तस्य सूतनामकभेदविशेष ईषत पीत अल्पहरिद्राभ रूक्षाङ्ग निःस्नेहावयव तथा दोष-युक्तश्च नागवङ्गादिदोषस्न, रसदोषा यथा रसेन्द्रसारसङ्ग्रहे—“नागो वङ्गो मलो वह्नि-श्चाञ्चल्यञ्च विष गिरि। असह्याग्निर्महादोषा निसर्गा पारदे स्थिता ॥” इति। स, इत्थम्भूत सूतक दशाष्टसस्कृतै स्वेदनाद्यष्टादशसस्कारै सिद्ध निष्पन्न कर्मोपयोगि-गुणसम्पन्न सन् इत्यर्थ, अष्टादशसस्कारा यथा रसेन्द्रचिन्तामणौ—“स्वेदनमर्दन-मूर्च्छनोत्थापन-पातनबोधननियमन-दीपनानुवासनगगनादिग्रासप्रमाणचारणगर्भद्रुति-बाह्यद्रुतियोगजारणरञ्जनसारणक्रामणवेधभक्षणानीति।” यद्यपि स्वेदनादिभक्षणान्तै-रेतैरूनविंशतिसस्कारा भवन्ति, तथाऽपि गर्भद्रुतिबाह्यद्रुत्यो द्रुतित्वसामान्यात एकत्वं परिगणय्यात्र सस्काराणाम् अष्टादशविधत्व निर्दिष्टम्। देह लोह लोहवत स्थिर-मित्यर्थ, करोति स्वेदनादिकमशुद्धसूतसेवया देह लोहवदक्षय्यो भवतीत्यर्थ ॥७१॥

क्रमप्राप्तपारदस्य लक्षणादिकमाह, अथेति।—अथशब्दोऽत्र सूचनार्थक वाक्य-प्रारम्भे इत्यर्थ, अन्यकूपज चेत्रभेदेन पञ्चधा विभक्तत्वात कूपान्तरावस्थित स प्रसिद्ध पारदोऽपि पारद पुन चञ्चल द्रवत्वादस्थिर श्वेतवर्णवान् शुभ्रवर्णविशिष्ट। स हि पारद विविधै योगै नानाविधौषधसयोगै अष्टादशसस्काररूपोपायैर्वा सर्वरोगहरः निखिलव्याधिनाशन, भवतीति शेष ॥ ७२ ॥

मयूरचन्द्रिकाच्छायः स रसो मिश्रको मतः।
सोऽप्यष्टादशसंस्कार-युक्तश्चातीव सिद्धिदः ॥ ७३ ॥
त्रय सूतादयः सूताः सर्वसिद्धिकरा अपि।
निजकर्म विनिर्माणैः शक्तिमन्तोऽतिमात्रया ॥ ७४ ॥
एतां रससमुत्पत्तिं यो जानाति स धार्मिकः।
आयुरारोग्य-सन्तानं रससिद्धिञ्च विन्दति ॥ ७५ ॥

अथ रसादीनां निरुक्तिः।—

रसनात् सर्वधातूनां रस इत्यभिधीयते।
जरारुङ्मृत्युनाशाय रस्यते वा रसो मतः ॥ ७६ ॥

अन्यस्य मिश्रकस्य लक्षणं शुणाश्चाह, मयूरेति।—मयूरस्य चन्द्रिका मेचकः पुच्छस्थनानावर्णविशिष्टचन्द्राकृतिपदार्थविशेषः सा इव छाया कान्तिः यस्य सः तथाभूतः सः पूर्वोक्तः रसः शिववीर्य्यं मिश्रकः मिश्रकनामा भेदः मतः कथितः इत्यर्थः, सोऽपि अष्टादशसंस्कारयुक्तः पूर्वोक्ताष्टादशसंस्कारसंस्कृतः सन् अतीव सिद्धिदः देहलोहस्थैर्य्यादिसिद्धिप्रदः, भवतीति शेषः ॥ ७३ ॥

सूतादीनां सिद्धिप्रदत्वमाह, त्रय इति।—सूतादयः त्रयः सूतपारदमिश्रकाख्याः त्रिविधाः सूताः रसाः अपि, (यद्यपि सूतशब्दः चैवभेदेन पञ्चधा विभक्तस्य शिवरेतसः अन्यतमभेदविशेषार्थकः, तथाऽपि सर्वेषामेव तज्जातीयानां सामान्यतः देहलौहस्थैर्य्यरूपसिद्धिप्रसूत्वेन सूतसंज्ञा न विरुध्यते यथा तृणशब्दः तृणविशेषे तृणजातौ च वर्त्तते तद्वदिहापि बोध्यम्) निजकर्मविनिर्माणैः निजस्य स्वस्य यत् कर्म स्वेदनाद्यष्टादशसंस्काररूपं तस्य विनिर्माणैः करणसौष्ठवैरित्यर्थः, अतिमात्रया शक्तिमन्तः प्रभूतवीर्य्यशालिनः सन्तः सर्वसिद्धिकराः सर्वविधसिद्धिप्रदाः, भवन्तीति शेषः। ते स्वेदनादिकर्मणा एव अधिककार्मुकाः सिद्धिप्रदाश्च स्युरित्यर्थः ॥ ७४ ॥

रसोत्पत्तिज्ञाने फलमाह, एतामिति।—यः जनः एताम् उक्तरूपां रससमुत्पत्तिं रसप्रादुर्भावं जानाति, सः जनः धार्मिकः आयुषः आरोग्यस्य च सन्तानं विस्तारं दीर्घायुः दीर्घारोग्यञ्च तथा रससिद्धिं रसशोधनादिविषये साफल्यञ्च विन्दति लभते ॥ ७५ ॥

रसस्य निरुक्तिमाह, रसनादिति।—सर्वेषां धातूनां स्वर्णादीनां रसनात् द्रवीकरणात् वीर्य्याधानात् वा, "शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः,"

रसोपरसराजत्वाद्रसेन्द्र इति कीर्त्तित: ।
देहलोहमयीं सिद्धिं सूते सूतस्तत: स्मृत: ॥ ७७ ॥
रोग-पङ्काब्धिमग्नानां पारदानाच्च पारद: ।
सर्वधातुगतं तेजो मिश्रितं यत्र तिष्ठति ।
तस्मात् स मिश्रक: प्रोक्तो नानारूपफलप्रद: ॥ ७८ ॥

इत्यमरोक्ते रसयति द्रवीकरोति वीर्य्यमापादयति वा इति व्युत्पत्त्या रस इति अभिधीयते, अथवा—जरारुङ्मृत्युनाशाय जरारोगमरणनिवारणाय रस्यते समर्थेन भज्यते इति हेतो रस मत कथित । रसशब्दस्य निरुक्तिरन्यत्रापि उक्ता, यथा रसेश्वरदर्शने—"मम देहरसो यस्माद्रसस्तेनायमुच्यते" इति ॥ ७६ ॥

रसेन्द्रसूतयो निरुक्तिमाह, रसेति ।—रसेषु अभ्रादिषु अष्टमहारसेषु तथा उपरसेषु गन्धादिषु अष्टसु च राजते इति तथाभूतत्वात् श्रेष्ठत्वात रसेन्द्र रसश्रेष्ठ इति कीर्त्तित कथित । रसेन्द्रस्य कर्म यथा रसेश्वरदर्शने—"अजरामरीकरणसमर्थश्च रसेन्द्र एव तदाह—एकोऽसौ रसराज शरीरमजरामरं कुरुते" इति । अभ्रादीना महारसत्व गन्धादीनामुपरसत्वञ्च इहैवाग्रे वक्ष्यति । देहस्य लोहमयी लोहवत दृढीकरणरूपा सिद्धि साफल्य सूते जनयति यत तत सूत स्मृत कथित । तथा च रसेश्वरदर्शने—"लोहवेधस्त्वया देव । यद्वत्त परमेशित ।। तद्देहवेधमाचक्ष्व येन स्यात खेचरी गति ॥ यथा लोहे तथा देहे कर्त्तव्य सूतक सता । समान कुरुते देवि । प्रत्ययं देहलोहयो । पूर्वं लोहे परीक्ष्येत पश्चाद्देहे प्रयोजयेत ॥" इति ॥ ७७ ॥

पारदमिश्रकयोर्निरुक्तिमाह, रोगेति ।—रोगा एव पङ्काब्धय कर्दमसागरा: दुरुत्तरणीयत्वात्, तत्र मग्नाना दुस्तरव्याधिसागरे निमज्जिताना लोकाना पारदानात् व्याध्युत्तरणरूपकूलाश्रयप्रदायकत्वात् पारद, कीर्त्तित इति शेष । रसेश्वरदर्शनेऽपि उक्त यथा—"रसस्य पारदत्व ससारपरपारप्रापणहेतुत्वेन तदुक्त—'ससारस्य पर पारं दत्तेऽसौ पारद स्मृत । पारदो गदितो यस्मात पारार्थं साधकोत्तमै' । गुप्तोऽय मत्समो देवि । मम प्रत्यङ्गसम्भव ॥' इति ।" यत्र यस्मिन् रसे सर्वधातुगत सवधातुस्थित तेज वीर्य्यं मिश्रित मिलितम् एकीभूत सदिति यावत्, तिष्ठति, नानारूपफलप्रद: बहुविधरोगनाशन स तस्मात् सवधातवतेज सम्मेलनात् मिश्रक मिश्रीभूत प्रोक्त. सर्वेषा धातूना सार मिश्रके तिष्ठतीत्यर्थ ॥ ७८ ॥

एवम्भूतस्य सूतस्य मर्त्त्यमृत्युगदच्छिदः ।
प्रभावान्मानुषा जाता देवतुल्यबलायुषः ॥ ७९ ॥

अथ रससंस्कारकारणम् ।—

तान् दृष्ट्वाऽभ्यर्थितैः रुद्रैः शक्रेण तदनन्तरम् ।
दोषैश्च कञ्चुकाभिश्च रसराजो नियोजितः ॥
तदाप्रभृति सूतोऽसौ नैव सिध्यत्यसंस्कृतः ॥ ८० ॥
जलगो जलरूपेण त्वरितो हंसगो भवेत् ।
मलगो मलरूपेण सधूमो धूमगो भवेत् ॥ ८१ ॥
अन्या जीवगतिर्दैवी जीवोऽण्डादिव निष्क्रमेत् ।
स तांश्च जीवयेज्जीवांस्तेन जीवो रसः स्मृतः ॥ ८२ ॥

इदानीं सर्वेषां सूतजातीयानां सामान्यतो गुणमाह, एवमिति ।—मर्त्त्यानां मानुषाणां मृत्युरेव गदः तं मरणरूपव्याधिं, यद्वा—मृत्युगदौ मृत्युज्वरादिरोगौ छिनत्तीति मृत्युगदच्छित् तस्य मर्त्त्यमृत्युगदच्छिदः एवम्भूतस्य उक्तलक्षणस्य सूतस्य पारदसामान्यस्य प्रभावात् सामर्थ्यात् मानुषाः देवानां तुल्ये सदृशे बलायुषी शक्तिजीवनकालौ येषां तादृशाः जरामृत्युविवर्जिता इत्यर्थः, जाताः ॥ ७९ ॥

पारदस्य दोषयोगकारणमाह, तानिति ।—तदनन्तरं सम्भोगविरतिकाले शुक्र-प्रच्यवनानन्तरं रसरसेन्द्रपूर्णकूपयोः निरोधानन्तरं वा तान् सूतादीन् तीन् सूतस्य तथाभूतगुणान् वा दृष्ट्वा शक्रेण इन्द्रेण अभ्यर्थितेन अभि सर्वतोभावेन अर्थितेन प्रार्थितेन अनायाससेव्यश्चेदसौ सर्व एव मर्त्त्या एतत्सेवनेन जरामरणविवर्जिता देवोपमा भविष्यन्ति देवनरयोर्न कोऽपि भेदो वर्त्तिष्यते अतोऽमुं तथा कुरु यथा आयाससेव्यो भवेदित्येवरूपेण शक्रकर्त्तृकयाचितेन रुद्रेण शङ्करेण रसराजः पारदः दोषैः नागवङ्गादिभिरष्टभिर्दोषैः कञ्चुकाभिः पर्पट्यादिभिः सप्तभिः दोषविशेषैः करणैः नियोजितः संयोजितः सङ्क्रामित इत्यर्थः । कञ्चुका यथा—"पर्पटी पाटली भेदी द्रावी मलकरी तथा । अन्धकारी तथा ध्वाङ्क्षी विज्ञेया सप्त कञ्चुकाः ॥" इति । तदेति ।—तदाप्रभृति तदारभ्य असौ सूतः असंस्कृतः मूर्च्छनादिभिः संस्कारैः अशोधितश्चेत् नैव सिध्यति कार्यसिद्धिं प्रददाति ॥ ८० ॥

रसस्य पञ्चविधगतिमाह, जलग इति ।—जलरूपेण द्रवत्वेन, जलगः जलेन

चतस्रो गतयो दृश्या अदृश्या पञ्चमी गति ।
मन्त्रध्यानादिना तस्य रुध्यते पञ्चमी गतिः ॥ ८३ ॥
इति भिन्नगतित्वाच्च सूतराजस्य दुर्लभ ।
संस्कारस्तस्य भिषजा निपुणेन तु रक्षयेत् ॥ ८४ ॥

सह गमनशील भवेत रसस्य चूर्णप्रायोऽतिसूक्ष्माश्च इति भाव, त्वरित चञ्चल चाञ्चल्यादित्यथ, हंसग हंसवद्गमनशील भवेत, मलरूपेण मलवत्त्वात मलग मलेन सह मिश्रित दोषसंश्लिष्ट भवेत सधूम वह्निदुष्टत्वात धूमग धूमेन सह गमनशील उड्डयनस्वभाव भवेत, अन्या अपरा पञ्चमीत्यर्थ, दैवी अदृश्यरूपा जीवस्य रसस्य गति गमनम्, अस्तीति शेष., तया गत्या अज्ञात देहरूपकोषात जीव आत्मा इव निष्क्रमेत्, रस इति भाव, केन पथा देहात् जीवो निर्गच्छति तत यथा न दृश्यते तथा पारदस्य पञ्चमी गतिरपि न ज्ञातु शक्यते इत्यर्थ । पूर्वश्लोके जीवगतिशब्देन रसगतिरिति प्रदर्शित, जीवशब्दस्य रसार्थत्वे हेतुमाह, स इति।—स रस तान् जीवान् जीवयेत जरामरणादिविनाशनद्वारा दीर्घजीवन प्रदापयेत् तेन हेतुना रस जीव जीवयतीति व्युत्पत्त्या जीवनदायक स्मृत, कथित ॥ ८१।८२ ॥

पञ्चमगतिरोधनप्रकारमाह, चतस्र इति।—चतस्र जलग हंसग मलग धूमग-रूपा गतय दृश्या द्रष्टु शक्या, पञ्चमी अज्ञात्जीवगतिरिव गति अदृश्या द्रष्टुमनर्हा चतुर्विधगमन नेत्रविषयीभूत पञ्चमगतिस्तु न शक्या चक्षुषा द्रष्टुमित्यर्थ । तस्य सूतस्य पञ्चमी गति मन्त्रध्यानादिना रसरक्षामन्त्र रसध्यानादिना कर्मणा रुध्यते संयम्यते निवार्य्यते इत्यथ । रसरक्षामन्त्रो यथा रसेन्द्रसारसङ्ग्रहे—"ओम् अघोरेभ्योऽथ घोरेभ्य घोराघोरतरेभ्यश्च । सर्वत सर्वसर्वेभ्यो नमस्ते रुद्ररूपिभ्य ॥" इति । ध्यानप्रकारो यथा रसेन्द्रचिन्तामणौ—"हृत्पद्मकर्णिकाऽन्तःस्थ रसेन्द्रं परमेश्वरि ।। स्मरन् विमुच्यते पापे सद्यो जन्मान्तरार्जिते ॥" इति ॥ ८३ ॥

इतीति।—इति उक्तप्रकारेण, भिन्नगतित्वात् पृथक् पृथक् गतिविशिष्टत्वात तस्य सूतराजस्य संस्कार मूर्च्छनादिना गुणाधानविशेष निपुणेन कुशलिना अभिज्ञेनेति यावत्, भिषजा तु भिषजा अपि दुर्लभ दुःखेन लब्धु साधयितुमित्यर्थ, शक्य दुःसाध्य इत्यर्थ, अत रक्षयेत् पालयेत, भिषक् तमिति शेष, बहुविधगतिमत्त्व-स्वभावत्वात् तत्संस्कारस्य दुःसाध्यतया अभिज्ञेन भिषजा यत्नत. स संस्कार. परिपालनीय इत्यर्थ ॥ ८४ ॥

अथ रसस्य स्थानान्तरगतिवर्णनम् ।—

प्रथमे रजसि स्नातां हयारूढां स्वलङ्कृताम् ।
वीक्षमाणा वधूं दृष्ट्वा जिघृक्षु कूपगो रस. ॥ ८५ ॥
उद्गच्छति जवात् साऽपि तं दृष्ट्वा याति वेगत: ।
अनुगच्छति तां सूत: सीमानं योजनोन्मितम् ॥ ८६ ॥
प्रत्यायाति तत. कूपं वेगत: शिवसम्भव: ।
मार्गनिर्मितगर्त्तेषु स्थितं गृह्णन्ति पारदम् ॥ ८७ ॥

अथ हिङ्गुलोत्पत्ति ।—

पतितो दरदे देशे गौरवाद्वह्निवक्त्रत: ।
स रसो भूतले लीनस्तत्तद्देशनिवासिन: ॥
ता मृदं पातनायन्त्रे क्षिप्त्वा सूत हरन्ति च ॥ ८८ ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये रसोत्पत्तिर्नाम

प्रथमोऽध्याय ॥ १ ॥

पारदस्य स्थानान्तरगमनमाह, प्रथमे इति ।—कूपग कूपस्थ' रस प्रथमे रजसि स्नाताम् आद्यऋतुस्नाता हयारूढाम् अश्वारूढा स्वलङ्कृता वस्त्रालङ्कारादिविभूषणा वीक्षमाणा कौतुकवशेन सुग्रभं पारद पश्यन्तीं वधू काञ्चन पर्वतवासिनी स्त्रिय दृष्ट्वा जिघृक्षु ता गृहीतुमिच्छु सन् जवात वेगात् उद्गच्छति ऊर्द्धम उत्तिष्ठति, सा वधूरपि त रसं दृष्ट्वा वेगत वेगेन याति पलायते इत्यर्थ । सूत योजनोन्मितं सीमान क्रोशचतुष्टयपरिमितभूमि ता वधूम् अनुगच्छति अनुयाति तत्पश्चात् धावतीत्यर्थ । तत' तस्या पलायनानन्तर शिवसम्भव शिवाङ्गज सूत इत्यर्थ, वेगत कूप प्रत्यायाति स्वाधिष्ठानकूप प्रति आगच्छति, यावदिति शेष, तावत मार्गे पथि निर्मितगर्त्तेषु तद्देशवासिभि कृतगर्त्तेषु स्थित पतितमित्यर्थ, पारद गृह्णन्ति, जना इति शेष' ॥ ८५—८७ ॥

हिङ्गुलोत्पत्तिप्रकारमाह, पतित इति ।—गौरवात भूरिसारात् वह्निवक्त्रत अग्निमुखात, अग्निमुखे गमनप्रकारश्च प्राक् प्रदर्शित' , दरदे तन्नामके देशे पतित स रस भूतले लीन. अन्तर्निहित सन्, तिष्ठतीति शेष । तत्तद्देशनिवासिन: दरदवासिन:

तस्मिन्निहितदेशवासिनश्च जना ता मृदं मृत्तिका पातनायन्त्रे विद्याधराख्योर्द्ध्व-पातनायन्त्रे क्षिप्त्वा निक्षिप्य सूतं पारदं हरन्ति आहरन्ति दरदाद्रसमाकृष्य गृह्णन्ति इत्यर्थः ॥ ८८ ॥

इति रसरत्नसमुच्चयबोधिन्यां प्रथमाध्यायः समाप्तः ॥१॥

अथ द्वितीयोऽध्यायः।

अथ महारसाः ।—

अभ्रवैक्रान्तमाक्षीकविमलाद्रिजसस्यकम् ।
चपलो रसकश्चेति ज्ञात्वाऽष्टौ सङ्ग्रहेद्रसान् ॥ १ ॥

अथ रसोत्पत्तिविवरणानन्तरं महारसान् विवरीतुमाह, अभ्रेति ।—वैक्रान्तं स्वनामख्यातमणिविशेषः, चुनीति लोके, तच्च श्वेतरक्तनीलभेदेन त्रिधा। तस्य निरुक्ति-र्यथा—“वज्राकारतयैव प्रसह्य हरणाग सर्वरोगाणाम्। यद्विक्रान्तिं धत्ते तद्वैक्रान्तं बुधैरिदं कथितम् ॥” इति। गुणा यथा—“रसवीर्य्यविपाकेषु वज्रसमं जयकुष्ठविषघ्नं पुष्टिकरं रसायनञ्च” इति। माक्षिकं स्वर्णरौप्यभेदेन द्विविधं, तदुक्तं रसेन्द्रसार-सङ्ग्रहे—“माक्षिकं द्विविधं प्रोक्तं हेमाद्यं तारमाक्षिकम्। भिन्नवर्णविशेषत्वाद्रस-वीर्य्यादिकं पृथक् ॥” इति। विमला माक्षिकविशेषः। अद्रिजं शिलाजतु। तल्लक्षणादिकं यथा भावप्रकाशपूर्वखण्डे—“निदाघे घर्मसन्तप्ता धातुसारं धराधराः। निर्य्यासवत् प्रमुञ्चन्ति तच्छिलाजतु कीर्त्तितम् ॥ सौवर्णं राजतं ताम्रमायसं तच्चतुर्विधम्। शिलाजं कटुतिक्तोष्णं कटुपाकं रसायनम् ॥ छेदि योगवहं हन्ति कफमेदोऽश्मशर्कराः। मूत्रकृच्छ्रं क्षयं श्वासं वातार्शांसि च पाण्डुताम् ॥ अपस्मारं तथोन्मादं शोथकुष्ठोदरक्रिमीन्। सौवर्णं तु जपापुष्प-वर्णं भवति तद्रसात् ॥ मधुरं कटु तिक्तञ्च शीतलं कटुपाकि च। राजतं पाण्डुरं शीतं कटुकं स्वादुपाकि च ॥ ताम्रं मयूरकण्ठाभं तीक्ष्णमुष्णं च जायते। लौहं जटायुपक्षाभं तत्तिक्तं लवणं भवेत् ॥ विपाके कटुकं शीतं स्वल्पश्रेष्ठमुदाहृतम् ॥” इति। सस्यकं तुत्थकम्, तच्च

अथ गन्धाभ्रयोः स्वरूपम् ।—

देव्या रजो भवेद्गन्धो धातुः शुक्रं तथाऽभ्रकम् । *

अथ अभ्रकगुणाः ।—

गौरीतेजः परममसृतं वातपित्तक्षयघ्नं
प्रज्ञाबोधि प्रशमितरुजं वृष्यमायुष्यमग्र्यम् ।
बल्यं स्निग्धं रुचिदमकफं दीपनं शीतवीर्यं
तत्तद्योगैः सकलगदहृद्व्योम सूतेन्द्रबन्धि ॥ २ ॥
राजहस्तादधस्ताद्यत् समानीतं घनं खनेः ।
भवेत्तदुक्तफलदं निःसत्त्वं निष्फलं परम् ॥ ३ ॥

ताम्रोपधातुः, उक्तञ्च—"तुत्थं ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत् । किञ्चित्-ताम्रगुणं तस्मात् वक्ष्यमाणगुणञ्च तत् ॥ तुत्थं कटु कषायोष्णं श्वित्रनेत्रामयापहम् ॥ विषदोषेषु सर्वेषु प्रशस्तं वान्तिकारकम् ॥" इति । चपलं यशदविशेषः "दस्ता" इति लोके । "यशदं वङ्गसदृशं रीतिहेतुश्च तन्मतम् । यशदं तुवरं तिक्तं शीतलं कफपित्तहृत् ॥ चक्षुष्यं परमं मेहान् पाण्डुं श्वासञ्च नाशयेत ॥" रसकः खर्परः, तद्यथा भावप्रकाशपूर्वखण्डे—"खपरीतुत्थकं तुत्थाद्न्यत्तद्रसकं स्मृतम् । ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः ॥" अन्यच्च—"खर्परं कटु क्षारं कषायं वामकं लघु लेखनं भेदनं शीतलं चक्षुष्यं रक्तपित्तहरं विषाश्मरी-कुष्ठकण्डूघ्नञ्च" इति ॥ १ ॥

अभ्रकगुणमाह, गौरीति ।—गौरीतेजः देव्याः शुक्रम् अभ्रकमित्यर्थः । प्रज्ञाबोधि प्रज्ञां बुद्धिं बोधयति जागरयति उद्दीपयतीति यावत्, बुद्धेरुन्मेषकम् इत्यर्थः । अकफं न कफो यस्मात् तत् कफक्षयकरमित्यर्थः । तत्तद्योगैः यस्मिन् गदे तत् प्रयोज्यं तत्तद्रोगनाशकद्रव्यसंयोगैः । व्योम अभ्रम् । सूतेन्द्रबन्धि सूतेन्द्रं रसराजं पारदमिति यावत्, बध्नाति नियच्छतीति तत् पारदनियामकमित्यर्थः । किंविधमभ्रकं गुणकारकमित्याह, राजहस्तादिति ।—घनम् अभ्रम् । खनेः आकरात् । निःसत्त्वं साररहितम् । परं राजहस्तादुपरिस्थम् ॥ २।३ ॥

* गन्धाभ्रयोः स्वरूपमाह, देव्या इति ।—रजः आर्त्तवशोणितम् । अभ्रकं शुक्रं धातुः देव्याः शुक्रमभ्रकमित्यर्थः । श्लोकार्द्धोऽयं प्रक्षिप्तः इति केचित् ।

अथ अभ्रभेदाः।—

पिनाकं नागमण्डूकं वज्रमित्यभ्रकं मतम्।
श्वेतादिवर्णभेदेन प्रत्येकं तच्चतुर्विधम्॥ ४॥

अथ पिनाकादीनां लक्षणानि।—

पिनाकं पावकोत्तप्तं विमुञ्चति दलोच्चयम्।
तत् सेवितं मलं बद्ध्वा मारयत्येव मानवम्॥ ५॥
नागाभ्रं नागवत् कुर्य्यात् ध्वनिं पावकसंस्थितम्।
तद्भुक्तं कुरुते कुष्ठं मण्डलाख्यं न संशयः॥ ६॥
उत्प्लुत्योत्प्लुत्य मण्डूकं ध्मातं पतति चाभ्रकम्।
तत् कुर्य्यादश्मरीरोगमसाध्यं शस्त्रतोऽन्यथा॥ ७॥
वज्राभ्रं वह्निसन्तप्तं निर्मुक्ताशेषवैकृतम्।
देहलोहकरं तच्च सर्वरोगहरं परम्॥ ८॥

अभ्रकस्य भेदानाह, पिनाकमिति।—प्रत्येकं पिनाक-नाग-मण्डूक वज्रभेदेन चतुर्द्धा भिन्नं ततः अभ्रं पिनाकादिचतुर्विधमभ्रं प्रत्येकं श्वेतरक्तपीतकृष्णभेदेन चतुःप्रकारमित्यर्थः। रसरत्नाकरेऽप्युक्तं—"कृष्णं पीतं सितं रक्तं योज्यं योगे रसायने। पिनाकं दर्दूरं नागं वज्रञ्चेति चतुर्विधम्॥ पिनाकाद्यास्त्रयो वर्ज्या वज्रं यत्नात् समाहरेत॥" इति॥ ४॥

तत्र पिनाकादीनां लक्षणमाह, पिनाकमिति।—पावकोत्तप्तम् अग्निसन्तप्तम्। दलोच्चयम् उपर्य्यधोविन्यस्तपत्रवत् अंशसमूहम। मलं बद्ध्वा विट्सङ्गं कृत्वा। नागवत् सर्पवत् ध्वनिं फुत्कारशब्दम्। उत्प्लुत्य उत्प्लुत्य उल्लम्फ्य उल्लम्फ्य। ध्मातं वह्निसंयुक्तं, मण्डूकाभ्रं वह्निसम्बन्धात् मण्डूकवत् पुनः पुनरूर्द्धमुल्लम्फ्योल्लम्फ्य पततीत्यर्थः। असाध्य मित्यादि।—शस्त्रचिकित्सां विहाय असाध्यं स्यात् शस्त्रेणैव सा साध्या, न त्वन्येनेत्यर्थः। निर्मुक्तम् अपगतम् अशेषं कृत्स्नं वैकृतं विकृतिः यस्य तत् सर्वदोषरहितं वह्निक्षिप्तं न कामपि विकृतिं व्रजेदित्यर्थः। देहं लोहवत् लौहमिव करोतीति तत् देहलोहकरं लौहवत् स्थिरमारदेहप्रदम्। रसरत्नाकरेऽपि पिनाकादीनां लक्षणान्युक्तानि, तत् यथा—"मुञ्चत्यग्नौ विनिक्षिप्ते पिनाकं दलसञ्चयम्। अज्ञानाद्भक्षणात्तस्य महाकुष्ठप्रदायकम्॥ दर्दूरं निहितं ह्यग्नौ कुरुते दार्दूरध्वनिम्। नागश्चाग्निगत

अथ श्वेतादिवर्णस्याभ्रस्य क्रियाविषय ।—

श्वेत रक्तञ्च पीतञ्च कृष्णमेव चतुर्विधम् ।
श्वेत श्वेतक्रियासूक्तं रक्ताभं रक्तकर्मणि ॥
पीताभमभ्रक यत्तु श्रेष्ठ तत् पीतकर्मणि ॥ ९ ॥
चतुर्विध वर व्योम यद्यप्युक्त रसायने ।
तथाऽपि कृष्णवर्णाभ्र कोटिकोटिगुणाधिकम् ॥ १० ॥

अथ प्रशस्ताभ्रलक्षणम् ।—

स्निग्धं पृथुदलं वर्ण-संयुक्तं भारतोऽधिकम् ।
सुखनिर्मोच्यपत्रञ्च तदभ्र शस्तमीरितम् ॥ ११ ॥

शब्दं फुत्कारञ्च विमुञ्चति ॥ तच्च देहगत नित्य व्याधि कुर्य्यात भगन्दरम् । वज्राभ्रक वह्निसस्थ न किञ्चित विकृति व्रजेत् । तस्मात वज्राभ्रक योज्य व्याधिवार्द्धक्य-मृत्युजित ॥" इति । रसेन्द्रसारसङ्ग्रहे वज्राभ्रलक्षणमुक्तं यथा—"सुप्रशस्त कठोराङ्ग गुरु कज्जलसन्निभम । यन्न शब्दायते वह्नौ नैवोच्छून भवेदपि । सदाकरसमुद्भूत वज्रेति प्रथित घनम् ॥" इति । रसेन्द्रचिन्तामणावपि—"यदञ्जननिभ चिन्न न वह्नौ विकृति व्रजेत । वज्रसञ्ज्ञ हि तत योज्यमभ्र सर्वत्र नेतरत ॥" इति ॥ ५—८ ॥

श्वेतादिवर्णभेदेन तस्य क्रियाविशेषे अधिकारमाह, श्वेतमिति ।—श्वेतक्रियासु रजतादिशुभ्रवस्तुमारणक्रियासु श्वित्रनाशनक्रियासु वा अथवा दाहादिना कृष्णीभूत-प्रदेशस्य श्वेतीकरणक्रियासु । रक्तकर्मणि हिङ्गुलादिरक्तवस्तुशोधनक्रियाया रक्त-प्रसादनक्रियाया वा । पीतकर्मणि स्वर्णादिपीतवस्तुमारणादिकर्मणि अथवा देहस्य पीतत्वापादकपाण्डुरोगादिकर्मणि । इदानी कृष्णाभ्रस्य गुणाधिक्यमाह, चतुर्विधमिति । —चतुर्विध पिनाकादिचतुष्टयम् । वर श्रेष्ठम् । तन्त्रान्तरेऽपि उक्त यथा—"प्रशस्यते सित तारे रक्तं तत्तु रसायने । पीत हेमनि कृष्णन्तु गदेषु भूतयेऽपि च ॥" इति । किञ्च अन्यस्मिन् तन्त्रे कृष्णाभ्रस्यैव चतुर्विध भेदो दृश्यते, तद्यथा—"अभ्रकं चतुर्विधं —श्वेतरक्तपीतनीलभेदात भिन्नभिन्नक्रियाया युज्यते । यथा—श्वेतं तारे पीतरक्तं काञ्चने नीलञ्च व्याधौ प्रयोज्यं यथोत्तरं गुणाढ्यञ्च । तेषु नीलाभं दर्दुरनागपिनाक-वज्रभेदेन चतुर्विधम्" इति ॥ ९।१० ॥

प्रशस्ताभ्रलक्षणमाह, स्निग्धमिति ।—पृथुदलं स्थूलपत्रविशिष्टम् । वर्णसंयुक्तं

अथ ग्रासायोग्याभ्रम्।—

सचन्द्रिकञ्च किट्टाभं व्योम न ग्रासयेद्रसः।
ग्रसितञ्च नियोज्यं तत् लोहे चैव रसायने॥ १२॥

अथ निश्चन्द्रसचन्द्राभ्रयोर्गुणदोषौ।—

निश्चन्द्रिकं मृतं व्योम सेव्यं सर्वगदेषु च।
सेवितं चन्द्रिकायुक्तं मेहं मन्दानलं चरेत्॥ १३॥

अशुद्धाभ्रस्य दोषः।—

यैरुक्तं युक्तिनिर्मुक्तैः पत्राभ्रकरसायनम्।
तैर्दृष्टं कालकूटाख्यं विषं जीवनहेतवे॥ १४॥
सत्त्वार्थं सेवनार्थञ्च योजयेच्छोधिताभ्रकम्।
अन्यथा त्वगुणं कृत्वा विकरोत्येव निश्चितम्॥ १५॥

प्रशस्तवर्णविशिष्टम्। भारतोऽधिकं गुरुभारवत्। सुखनिर्मोच्यपत्रं सुखेन अनायासेन निर्मोच्यम् उन्मोचनीयं पृथक्करणीयमिति यावत्, पत्रं दलं यस्य तथाभूतम्। शस्तं प्रशस्तम॥ ११॥

ग्रासायोग्याभ्रकमाह, सचन्द्रिकमिति।—सचन्द्रिकं चन्द्रिकाविशिष्टम्। किट्टाभं किट्टं लौहमलं तद्वदाभाविशिष्टं मण्डूरवत् परिदृश्यमानम्। ग्रासयेदिति स्वार्थे णिच् ग्रसेतेत्यर्थः। ग्रसितं प्राप्तग्रासं, रसेनेति शेषः॥ १२॥

निश्चन्द्रसचन्द्राभ्रयोर्गुणदोषावाह, निश्चन्द्रिकमिति।—मृतं भस्मीभूतम्। रसेन्द्र-सारेऽप्युक्तं—"निश्चन्द्रमारितं व्योम रूपं वीर्य्यं दृढं तनुम्। कुरुते नाशयेन्मृत्युं जरारोग-कदम्बकम्॥" इति॥ १३॥

अशोधिताभ्रस्य दोषमाह, यैरिति।—युक्तिनिर्मुक्तैः युक्तिवहिष्कृतैः अज्ञैः युक्ति-मनादृत्येत्यर्थः। पत्राभ्रकरसायनं पत्राभ्रकेण अपृथक्कृतदलाभ्रेण अशोधितामारिताभ्रे-णेत्यर्थः, रसायनं रसायनगुणलाभः, भवेदिति इति शेषः। विषमित्यत्र अपीति शेषः, सपत्राभ्रकं प्रयुज्यमानं कालकूटवत् जीवनं हन्तीत्यर्थः। सत्त्वार्थं सारग्रहणार्थं, यदुक्तं—"ध्मातस्य निर्गतं सारं सत्त्वमित्यभिधीयते" इति। अन्यथा अशुद्धाभ्रम्। अगुणं विरुद्धगुणं दोषमित्यर्थः। विकरोति विकारं करोतीत्यर्थः। तथा च रसेन्द्र-सारसङ्ग्रहे—"अशुद्धाभ्रं निहन्त्यायुः वर्द्धयेन्मारुतं कफम्। अहृतं छेदयेद्गात्रं मन्दाग्निक्रिमिवर्द्धनम्॥" इति॥ १४।१५॥

अथाभ्रशोधनमारणे ।—

प्रतप्तं सप्तवाराणि निक्षिप्तं काञ्जिकेऽभ्रकम् ।
निर्दोषं जायते नूनं प्रक्षिप्तं वाऽपि गोजले ॥ १६ ॥
त्रिफलाक्वथिते चापि गवां दुग्धे विशेषतः ।
ततो धान्याभ्रकं कृत्वा पिष्ट्वा मत्स्याक्षिकारसैः ॥ १७ ॥
चक्रीं कृत्वा विशोष्याथ पुटेदर्द्धेभके पुटे ।
पुटेदेवं हि षड्वारं पौनर्नवरसैः सह ॥ १८ ॥
कलांशटङ्कणेनापि सम्मर्द्य कृतचक्रिकम् ।
अर्द्धेभाख्यपुटैस्तद्वत् सप्तवारं पुटेत् खलु ॥ १९ ॥
एवं वासारसेनापि तण्डुलीयरसेन च ।
प्रपुटेत् सप्तवाराणि पूर्वप्रोक्तविधानतः ॥
एवं सिद्धं हृतं सर्वयोगेषु विनियोजयेत् ॥ २० ॥

अथ धान्याभ्रलक्षणम् ।—

चूर्णाभ्रं शालिसंयुक्तं वस्त्रबद्धं हि काञ्जिके ।
निर्यातं मर्दनाद्वस्त्राद्धान्याभ्रमिति कथ्यते ॥ २१ ॥

अभ्रशोधनमारणमाह, प्रतप्तमिति ।—प्रतप्तं, वह्नौ इति शेषः । गोजले गोमूत्रे । धान्याभ्रकम् अभ्रमारणार्थं प्रक्रियाविशेषः, तच्चाग्रे वक्ष्यमाणम् । मत्स्याक्षिका हिलमोचिका गण्डदूर्वा वा । अर्द्धेभके पुटे अर्द्धगजपुटे गजपुटापेक्षया अर्द्धपुटे इत्यर्थः । पौनर्नवरसैः पुनर्नवारसैः । कलांशटङ्कणेन अभ्रापेक्षया षोडशभागैक-भागटङ्कणचूर्णेन । तण्डुलीयं अल्पमारिष "काँटानटे" इति भाषा । पूर्वप्रोक्त-विधानतः अर्द्धेभाख्यपुटे इत्यर्थः । हृतं मृतं भस्मीभूतमित्यर्थः । अभ्रकं वह्नौ प्रतप्य काञ्जिकादिषु निषिञ्चेत् एवं सप्तशः कृत्वा वक्ष्यमाणविधिना धान्याभ्रकं विधाय मत्स्याक्ष्यादीनां रसैः पिष्ट्वा चक्रिकां विधाय अर्द्धगजपुटे यथानिर्दिष्टं पुटेदित्यर्थः ॥ १६—२० ॥

धान्याभ्रविधिमाह, चूर्णाभ्रमिति ।—चूर्णाभ्रम् अभ्रचूर्णं शालिसंयुक्तम्, यद्यप्यत्र शालिपरिमाणं नोक्तं तथाऽपि तन्त्रान्तरानुसरणात् पादमितशालि-धान्यसहितं बोद्धव्यम्, तथा च रसेन्द्रसारसङ्ग्रहे—"पादांशं शालिसंयुक्तमभ्रकं

अथ धान्याभ्रमारणम्।—

धान्याभ्रं कासमर्दस्य रसेन परिमर्दितम्।
पुटितं दशवारेण म्रियते नात्र संशयः॥
तद्वन्मुस्तारसेनापि तण्डुलीयरसेन च॥ २२॥

अथ अभ्रमारणम्।—

पीतामलकसौभाग्य-पिष्टं चक्रीकृताभ्रकम्।
पुटितं षष्टिवाराणि सिन्दूराभं प्रजायते।
क्षयाद्यखिलरोगघ्नं भवेद्रोगानुपानतः॥ २३॥

मतान्तरम्।—

वटमूलत्वचः क्वाथैस्ताम्बूलीपत्रसारतः।
वासामत्स्याक्षिकाभ्यां वा मीनाक्ष्या सकठिल्लया॥ २४॥
पयसा वटवृक्षस्य मर्दितं पुटितं घनम्।
भवेद्विंशतिवारेण सिन्दूरसदृशप्रभम्॥ २५॥

कम्बलोदरे। त्रिरात्रं स्थापयेन्नीरे ततः क्लिन्नं मर्दयेद्दृढम्॥ कम्बलाद्गलितं श्लक्ष्णं बालुकारहितञ्च यत्। तद्धान्याभ्रमिति प्रोक्तमभ्रमारणसिद्धये॥" इति। निर्यातं निर्गतम्। अभ्रं चूर्णितं कृत्वा पादांशशालिधान्येन सह स्थूलवस्त्रे बद्धा काञ्जिके तावन्मर्द्दनीयं यावत् वस्त्रच्छिद्रात् श्लक्ष्णं बालुकारहितं सत् निर्याति तद्धान्याभ्रं स्मृतम्॥ २१॥

धान्याभ्रमारणमाह, धान्याभ्रमिति।—कासमर्दं "कालकासन्दा" इति लोके॥ २२॥

अभ्रमारणमाह पीतेति।—पीतामलकसौभाग्यैः हरिद्राऽऽमलकटङ्कणैः सह मर्दितम्। यद्यप्यत्र सौभाग्यस्य भागो नोक्तः तथाऽपि तन्त्रान्तरसंवादात् द्विगुणो बोध्यः, यथा रसेन्द्रसारसङ्ग्रहे—"धान्याभ्रकस्य भागैकं भागौ द्वौ टङ्कणस्य च" इति। एवञ्च हरिद्राऽऽमलकरसाभ्यां द्विगुणेन टङ्कणचूर्णेन च सह धान्याभ्रं पिष्ट्वा चक्रीकृत्य षष्टिपुटं दद्यात्। रोगानुपानतः यस्मिन् व्याधौ प्रयुञ्जीत तत्तद्व्याधिविनाशकानुपानयोगादित्यर्थः॥ २३॥

प्रकारान्तरमाह, वटमूलेति।—वटमूलत्वक्क्वाथैरेकमर्द्दनम्, अथवा ताम्बूलीपत्रसारतः पर्णपत्ररसेन, अथवा वासामत्स्याक्षिकाभ्यां वासारस-हिलमोचिकारसाभ्याम्,

अथ सत्त्वपातनम् ।—

पादांशटङ्कणोपेतं मुसलीरसमर्दितम् ।
रुन्ध्यात् कोष्ठ्यां दृढ़ ध्मातं सत्त्वरूपं भवेद्घनम् ॥ २६ ॥

प्रकारान्तरम् ।—

कासमर्दघनाधान्यवासानाञ्च पुनर्भुवः ।
मत्स्याक्ष्याः काण्डवल्ल्याश्च हंसपाद्या रसैः पृथक् ॥ २७ ॥
पिष्ट्वा पिष्ट्वा प्रयत्नेन शोषयेद्धर्मयोगतः ।
पलं गोधूमचूर्णस्य क्षुद्रमत्स्याश्च टङ्कणम् ॥ २८ ॥
प्रत्येकमष्टमांशेन दत्त्वा दत्त्वा विमर्दयेत् ।
मर्दने मर्दने सम्यक् शोषयेद्रविरश्मिभिः ॥ २९ ॥
पञ्चाजं पञ्चगव्यं वा पञ्चमाहिषमेव वा ।
क्षिप्त्वा गोलान् प्रकुर्वीत किञ्चित्तिन्दुकतोऽधिकान् ॥३०॥
पयो दधि घृतं मूत्रं सविट्कञ्चाजमुच्यते ।
अधःपातनकोष्ठ्यां हि ध्मात्वा सत्त्वं निपातयेत् ॥ ३१ ॥

अथवा सकठिल्लया मीनाक्ष्या कठिल्लं कर्कटं "वनकॉक्रोल" इति भाषा, मीनाक्षी गण्डदूर्वा ब्राह्मी वा, अथवा वटवृक्षस्य पयसा वटक्षीरेण, एषां पञ्चानामेकतमरसेन मर्दयित्वा विंशतिपुटं देयं ॥ २४।२५ ॥

सत्त्वपातनमाह, पादांशेति ।—पादांशटङ्कणोपेतं चतुर्थांशटङ्कणसंयुक्तम् । मुषली तालमूली । कोष्ठ्यां कोष्ठिकायन्त्रे, तल्लक्षणमतिसंहितायां यथा—"षोडशाङ्गुलविस्तीर्णं हस्तमात्रायतं समम् । धातुसत्त्वनिपातार्थं कोष्ठिकं परिकीर्त्तितम् ॥ परिपूर्णं दृढाङ्गारैर्धमेद्वातेन कोष्ठके । मात्रया ज्वालमार्गेण ज्वालयेच्च हुताशनम् ॥" इति । ध्मातं वह्निसंयोगात्तप्तम् । सत्त्वरूपं "ध्मातश्च निर्गतं सारं सत्त्वमित्यभिधीयते" इत्युक्तलक्षणं निर्गतसारम् ॥ २६ ॥

सत्त्वपातने प्रकारान्तरमाह, कासमर्देति ।—घना गुडूची । पुनर्भूः पुनर्नवा । काण्डवल्ली कारवेल्लकं । हंसपादी गोधापदी "गोयाल्लिलता" इति भाषा । धर्मयोगतः आतपसंयोगात् । पञ्चाजं छाग्याः पयोदधिघृतमूत्रपुरीषपञ्चकम् । पञ्चगव्यं पूर्ववत् गोश्चापि क्षीरादिपञ्चकम् । पञ्चमाहिषं महिष्या अपि पूर्ववत् पञ्चकम् ।

अथ किट्टात् सत्त्वग्रहणम्।—

कोष्ठ्यां किट्टं समाहृत्य विचूर्ण्यावकरान् हरेत्।
तत् किट्टं खल्पटङ्केन गोमयेन विमर्द्य च ॥ ३२ ॥
गोलान् विधाय संशोष्य धमेत् भूयोऽपि पूर्ववत्।
भूयः किट्टं समाहृत्य मृदित्वा सत्त्वमाहरेत् ॥ ३३ ॥

अथ सत्त्वशोधनम्।—

अथ सत्त्वकणास्तास्तु क्वाथयित्वाऽम्लकाञ्जिकैः।
शोधनीयगणोपेतं मूषामध्ये निरुध्य च ॥ ३४ ॥
सम्यक् द्रुत समाहृत्य द्विवार प्रधमेद्घनम्।
इति शुद्ध भवेत् सत्त्वं योज्य रसरसायने ॥ ३५ ॥

अथ सत्त्वाना मृदूकरणम्।—

मधुतैलवसाऽऽज्येषु द्रावित परिवापितम्।
मृदु स्यादश्मवारेण सत्त्वं लोहादिक खरम् ॥ ३६ ॥

तिन्दुकत कर्षमानात किञ्चिदधिकान् पादपरिमिताधिकान् सपादकर्षमानानित्यथ। अध पातनकोष्ठ्याम् अध पातनार्थकोष्ठिकायन्त्रे। अयमर्थ,—कासमर्दादीनामष्टानां रसेन पृथक् पृथक् सम्मर्द्य आतपे संशोष्य च गोधूमचूर्णादीन् पृथक् पृथक् दत्त्वा दत्त्वा पुन मर्दयेत शोषयेच्च. तत अजाया गो महिष्या वा क्षीरादिपञ्चकेन गोलककरण-योग्येन सम्मिश्य सपादकर्षमितान् गोलान् विधाय अध पातनार्थकोष्ठिकायन्त्रे ध्मात्वा सत्त्व गृह्णीयादिति ॥ २७—३१ ॥

किट्टात् सत्त्वग्रहणमाह, कोष्ठ्यामिति।—कोष्ठ्या किट्ट धमनवशेन कोष्ठिकालग्नम् अश्ममलम्। अवकरान् रजांसि चूर्णानीति यावत्। "रवकान्" इति पाठान्तरम्। भूय पुनरपि। किट्ट धमनवशात यत् किट्ट निर्गतं तदित्यर्थ ॥ ३२।३३ ॥

सत्त्वशोधनमाह, अथेति।—सत्त्वकणान् धमनानि सृतसाररूपचूर्णानि। शोधनीयगणोपेत शोधनार्थत्रिफलादिगणसंयुतम्। द्रुत गलितम्। रसरसायने रसे रसायने च ॥ ३४।३५ ॥

सत्त्वानां मृदूकरणमाह, मध्विति।—द्रावित पूर्वप्रक्रियया प्रापितद्रवीभाव-

अथाभ्रमारणम् ।—

पट्टचूर्णं विधायाथ गोघृतेन परिप्लुतम् ।
भर्जयेत् सप्तवाराणि चुल्लीसंस्थितखर्परे ॥ ३७ ॥
अग्निवर्णं भवेद्यावद्वार वार विचूर्णयेत् ।
तृणं क्षिप्ता दहेद्यावत्तावद्वा भर्जनं चरेत् ॥ ३८ ॥
ततः सगन्धकं पिष्ट्वा वटमूलकषायतः ।
पुटेद्विंशतिवारेण वाराहेण पुटेन हि ॥ ३९ ॥
पुनर्विंशतिवाराणि त्रिफलोत्थकषायतः ।
त्रिफलामुण्डिकाभृङ्ग-पत्रपथ्याऽक्षमूलकैः ॥ ४० ॥
भावयित्वा प्रयोक्तव्यं सर्वरोगेषु मात्रया ।
सत्त्वाभ्रात् किञ्चिदपर निर्विकारं गुणाधिकम् ॥ ४१ ॥
एवं चेच्छतवाराणि पुटपाकेन साधितम् ।
गुणवज्जायतेऽत्यर्थं पर पाचनदीपनम् ॥ ४२ ॥

मारणे प्रकारान्तरम् ।—

गन्धर्वपत्रतोयेन गुडेन सह भावितम् ।
अधोर्ध्वं वटपत्राणि निरुध्य त्रिपुटैः खगम् ॥ ४३ ॥
क्षुधं करोति चात्यर्थं गुञ्जार्द्धमितिसेवया ।
तत्तद्रोगहरैर्योगैः सर्वरोगहर परम् ॥ ४४ ॥

मित्यर्थः । परिवापित प्रक्षिप्तम् । खर कठिनम् , मध्वादिषु दशवारप्रक्षेपेण द्रवीभूतं खरलोहादिसत्त्व मृदु भवेदित्यर्थः ॥ ३६ ॥

अभ्रमारणमाह, पट्टचूर्णमिति ।—पट्टचूर्णं पट्टे शिलापट्टे चूर्णं वस्त्रक्षालित-चूर्णमित्यर्थो वा । विधाय कृत्वा । परिप्लुतमित्यत्र अभ्रमिति शेष । सगन्धकमित्यत्र पूर्वोक्तभृष्टाभ्रमिति शेष । वाराहेण पुटेन "अरत्निमात्रके कुण्डे पुट वाराहमुच्यते" इति भावप्रकाशोक्तलक्षणकपुटविशेषेण । मुण्डिका मुण्डिरी । भृङ्गपत्र भृङ्गराजपत्रम् । अक्ष विभीतक. । एव पट्टचूर्णं विधायाथ इत्याद्युक्तविधानेनेत्यर्थः ॥ ३७—४२ ॥

अभ्रमारणे प्रकारान्तरमाह, गन्धर्वेति ।—गन्धर्वपत्रतोयेन एरण्डपत्ररसेन । वटपत्राणीत्यत्र दत्त्वा इति शेष. । खगम् अभ्रम् ॥ ४३।४४ ॥

अथ सत्त्वस्य शोधनमारणे।—

सत्त्वस्य गोलक ध्मातं शम्यसंयुक्तकाञ्जिके।
निर्वाप्य तत्क्षणेनैव कुट्टयेल्लोहपारया ॥ ४५ ॥
सम्प्रताप्य घनस्थूलकणान् क्षिप्त्वाऽथ काञ्जिके।
तत्क्षणेन समाहृत्य कुट्टयित्वा रजश्चरेत् ॥ ४६ ॥
गोघृतेन च तच्चूर्णं भर्जयेत् पूर्ववत् त्रिधा।
धात्रीफलरसैस्तद्वद्वात्रीपत्ररसेन वा ॥ ४७ ॥
भर्जने भर्जने कार्य्यं शिलापट्टेन पेषणम्।
ततः पुनर्नवावासा-रसैः काञ्जिकमिश्रितैः ॥ ४८ ॥
प्रपुटेद्दशवाराणि दशवाराणि गन्धकैः।
एव सशोधितं व्योमसत्त्वं सर्वगुणोत्तरम् ॥
यथेष्टं विनियोक्तव्यं जारणे च रसायने ॥ ४९ ॥

अथ अभ्रद्रावणानुल्लेखे कारणम।—

द्रुतयो नैव निर्दिष्टाः शास्त्रे दृष्टा अपि दृढम्।
विना शम्भोः प्रसादेन न सिध्यन्ति कदाचन ॥ ५० ॥

अथ अभ्रप्रयोग।—

वेल्लव्योषसमन्वित घृतयुत वल्लोन्मितं सेवितं
दिव्याभ्र क्षयपाण्डुरुग्ग्रहणिकाशूलामकुष्ठामयम्।
जूर्त्तिं श्वासगदं प्रमेहमरुचिं कामामय दुर्द्धर
मन्दाग्नि जठरव्यथा विजयते योगैरशेषामयान् ॥ ५१ ॥

[इत्यभ्राधिकार.]।

मतान्तरे अभ्रसत्त्वस्य शोधनमारणमाह, सत्त्वस्येति।—शम्यसयुक्तकाञ्जिके सधान्यकाञ्जिके अकानितकाञ्जिके इत्यर्थ। लोहपारया लौहमुषलेन। रज. चूर्णम्। पूर्ववत चुल्लीसंस्थितखर्परे पट्टचूर्णावचूर्णन विधायेत्यर्थ ॥ ४५—४९ ॥

अभ्रद्रावणानुक्तौ कारणमाह, द्रुतय इति।—सुगमम् ॥ ५० ॥

एव मारिताभ्रस्य गुणमाह, वेल्लेति।—वेल्लव्योषसमन्वित विडङ्गकटुत्रयसंयुक्तम्,

अथ वैक्रान्तः।—

अथ वैक्रान्तस्वरूपम्।—

अष्टास्रश्चाष्टफलकः षट्कोणो मसृणो गुरुः।
शुद्धमिश्रितवर्णैश्च युक्तो वैक्रान्त उच्यते॥ ५२॥

अथ वैक्रान्तस्य वर्णभेदाः।—

श्वेतो रक्तश्च पीतश्च नीलः पारावतच्छविः।
श्यामलः कृष्णवर्णश्च कर्बुरश्चाष्टधा हि सः॥ ५३॥

अथ वैक्रान्तस्य गुणाः।—

आयुष्प्रदश्च बलवर्णकरोऽतिवृष्यः
प्रज्ञाप्रदः सकलदोषगदापहारी।
दीप्ताग्निकृत् पविसमानगुणस्तरस्वी
वैक्रान्तकः खलु वपुर्बललोहकारी॥ ५४॥
रसायनेषु सर्वेषु पूर्वगण्यः प्रतापवान्।
वज्रस्थाने नियोक्तव्यो वैक्रान्तः सर्वदोषहा॥ ५५॥

अत्र वैल्लादीनां मानानुक्तत्वेऽपि अभ्रमानसाहचर्यात् वैल्लव्योषयोः प्रत्येकं वल्लमानं बोध्यम्। वल्लः द्विगुञ्जा, गुञ्जात्रयमिति लीलावती सार्द्धगुञ्जेति राजनिघण्टः। जूर्त्तिः ज्वरा ज्वरः वा॥ ५१॥

वैक्रान्तस्वरूपमाह, अष्टास्र इति।—अष्टास्रः अष्टकोणः। अष्टफलकः अष्टास्रत्वादेव फलकाकाराष्टरेखाविशिष्टः। षट्कोण इत्यत्र वा-शब्दः ऊहनीयः तेन अष्टकोणः षट्कोणो वा बोध्यः॥ ५२॥

वर्णभेदेन तस्याष्टधात्वमाह, श्वेत इति।—पारावतच्छविः धूम्रवर्णः इत्यर्थः। कर्बुरः स्वर्णवर्णः इत्यर्थः, विचित्रवर्णः इत्यर्थो वा॥ ५३॥

वैक्रान्तस्य गुणमाह, आयुष्प्रद इति।—पविसमानगुणः हीरकसदृशगुणविशिष्टः। तरस्वी वीर्य्यवान्, यद्वा—तरः भासः भासवद्गुणः इत्यर्थः. विद्यतेऽस्मिन्निति व्युत्पत्त्या भासवान्, भासवत् गुणसम्पन्नः भासवर्द्धकः इत्यर्थः। वपुरिति।—वपुः देहः बलं मनोबलं, बलवर्णकर इति प्रागुक्तत्वात्, लोहं रक्तं तानि करोतीति देहवर्द्धनः मनोबलवर्द्धनः रक्तवर्द्धनश्च इत्यर्थः। पूर्वगण्यः प्राधान्येन गणनीयः। प्रतापवान् प्रभाव-

अथ वैक्रान्तोत्पत्तिः ।—

दैत्येन्द्रो माहिषः सिद्धः सहदेवसमुद्भवः ।
दुर्गा भगवती देवी तं शूलेन व्यमर्दयत् ॥ ५६ ॥
तस्य रक्तं तु पतितं यत्र यत्र स्थितं भुवि ।
तत्र तत्र तु वैक्रान्तं वज्राकारं महारसम् ॥ ५७ ॥

अथ वैक्रान्तस्य अवस्थितिस्थानं निरुक्तिश्च ।—

विन्ध्यस्य दक्षिणे भागे ह्युत्तरे चास्ति सर्वतः ।
विक्रान्तयति लोहानि तेन वैक्रान्तकः स्मृतः ॥ ५८ ॥

मतान्तरे वर्णभेदकथनम् ।—

श्वेतः पीतस्तथा रक्तो नीलः पारावतप्रभः ।
मयूरकण्ठसदृशश्चान्यो मरकतप्रभः ॥ ५९ ॥

सम्पन्नः । वज्रस्थाने हीरकप्रयोगयोग्यस्थाने । तन्त्रान्तरेऽपि वज्रवैक्रान्तयोः समानगुणत्वमुक्तं तद्यथा—"रसवीर्य्यविपाकेषु वज्रसमं ज्वरकुष्ठविषघ्नं पुष्टिकरं रसायनञ्च । अपि च—वैक्रान्तं वज्रसदृशं वज्रवद्रसवीर्य्यकम् । तथाऽप्यभावे वज्रस्य ग्राह्यं वैक्रान्तमुत्तमम् ॥" इति ॥ ५४।५५ ॥

वैक्रान्तस्य उत्पत्तिमाह, दैत्येन्द्र इति ।—सिद्धः शङ्करवरेण सिद्धिप्राप्तः । सहदेवसमुद्भवः सह देवैः समुद्भवः उत्पत्तिः यस्य तथाभूतः देवताभिः सह समकालोत्पन्नः । "सर्वदेवसमुद्भवा" इति पाठे तु—सर्वेभ्यः देवेभ्यः समुद्भवः उत्पत्तिः आविर्भावः यस्याः सा इति दुर्गाया विशेषणं, तस्याः सर्व-देव तेजः-समुत्पन्नत्वात् । तत्प्रमाणञ्च मार्कण्डेयचण्ड्यां द्रष्टव्यम् । श्लोकाविमौ ग्रन्थान्तरादद्धृतौ इति कश्चित् ॥ ५६।५७ ॥

वैक्रान्तस्य स्थानं निरुक्तिञ्चाह,—विन्ध्यस्येति । विक्रान्तयतीति ।—विक्रान्तयति विशेषेण छेदयति गुणैः पराजयते इत्यर्थः, स्वर्णादिसर्वलौहेभ्यो गुणाधिक इति भावः । "विक्रामयति" इति पाठे तु—विक्रमं कारयतीत्यर्थः, वैक्रान्तयोगेन सर्वलौहानां वीर्य्याधिक्यं भवतीति भावः । अयमेव पाठः साधीयान् इति मन्यते विपूर्व-क्रन्तेः वैक्रान्तपदासिद्धेः । "विक्रन्तयति" "विक्रान्तयति" इति पाठान्तरावापि कुत्रचित् दृश्येते । तन्त्रान्तरे तु वैक्रान्तशब्दस्यान्यथा निरुक्तिरुक्ता, सा तु एतदध्यायस्य प्रथमश्लोकव्याख्यावसरे एवास्माभिः प्रदर्शिता ॥ ५८ ॥

मतान्तरे वर्णभेदमाह, श्वेत इति ।—सुगमम् ॥ ५९ ॥

वर्णभेदेन कार्य्यभेदकथनम् ।—

देहसिद्धिकरं कृष्णं पीते पीतं सिते सितम् ।
सर्वार्थसिद्धिदं रक्तं तथा मरकतप्रभम् ॥
शेषे द्वे निष्फले वर्ज्ये वैक्रान्तमिति सप्तधा ॥ ६० ॥

अथाऽऽहरणविधि ।—

यत्र चेत्रे स्थितश्चैव वैक्रान्तं तत्र भैरवम् ।
विनायकञ्च सम्पूज्य ग्रहीयाच्छुद्धमानसः ॥ ६१ ॥

गुणान्तरम् ।—

वैक्रान्तो वज्रसदृशो देहलोहकरो मतः ।
विषघ्नो रसराजस्य ज्वरकुष्ठक्षयप्रणुत् ॥ ६२ ॥

अथ शोधनम ।—

वैक्रान्तकाः स्युस्त्रिदिनं विशुद्धाः संस्वेदिताः क्षारपटूनि दत्त्वा ।
अम्लेषु मूत्रेषु कुलत्थरम्भा-नीरेऽथवा कोद्रववारिपक्काः ॥ ६३ ॥

मतान्तरे शोधनमारणम् ।—

कुलत्थक्काथसंस्विन्नो वैक्रान्तः परिशुध्यति ।
म्रियतेऽष्टपुटैर्गन्ध-निम्बुकद्रवसंयुतः ॥ ६४ ॥

वर्णभेदेन कार्य्यभेदमाह, देहेति ।—देहसिद्धिकरं देहस्य स्थैर्य्यरूपसिद्धिप्रदम् । शेषे द्वे पारावताभ-मयूरकण्ठाभे ॥ ६० ॥

वैक्रान्तग्रहणविधिमाह, यत्रेति ।—सुगमम् ॥ ६१ ॥

गुणान्तरमाह, वैक्रान्त इति ।—सुगमम् ॥ ६२ ॥

शोधनमाह, वैक्रान्तका इति ।—क्षारपटूनि यवक्षारपञ्चलवणानि । अम्लेषु अम्लवर्गरसे । कुलत्थरम्भानीरे कुलत्थक्काथे कदलीकन्दरसे च । कोद्रवेति ।—कोद्रव "कोदो" इति प्रसिद्धस्तृणधान्यविशेष तस्य वारिणि क्काथे पक्काः ॥ ६३ ॥

मतान्तरे शोधन मारणञ्चाह, कुलत्थेति ।—कुलत्थक्काथेन सह दोलायन्त्रे स्वेद्य पश्चात् समपरिमितगन्धकं जम्बीररसञ्च दत्त्वा अष्टपुटं देयम्, एवं वैक्रान्तो म्रियते इत्यर्थः ॥ ६४ ॥

मतान्तरम् ।—

वैक्रान्तेषु च तप्तेषु हयमूत्रं विनिक्षिपेत् ।
पौनःपुन्येन वा कुर्याद्द्रवं दत्त्वा पुटं त्वनु ॥
भस्मीभूतन्तु वैक्रान्तं वज्रस्थाने नियोजयेत् ॥ ६५ ॥

अथ सत्त्वपातनम् ।—

मोच-मोरट-पालाशक्षार गोमूत्रभावितम् ।
वज्रकन्द-निशाकल्क-फलचूर्णसमन्वितम् ॥ ६६ ॥
तत्कल्कं टङ्कणं लाक्षा-चूर्णं वैक्रान्तसम्भवम् ।
नरसारसमायुक्तं मेषशृङ्गीद्रवान्वितम् ॥ ६७ ॥
पिण्डितं मूकमूषस्थं ध्मापितञ्च हठाग्निना ।
तत्रैव पतते सत्त्वं वैक्रान्तस्य न संशयः ॥ ६८ ॥

मतान्तरम् ।—

सत्त्वपातनयोगेन मर्दितश्च वटीकृतः ।
मूषास्थो घटिकाध्मातो वैक्रान्तः सत्त्वमुत्सृजेत् ॥ ६९ ॥

मतान्तरमाह, वैक्रान्तेष्विति ।—पौनःपुन्येन एकविंशतिवारमित्यर्थः, तथा च रसेन्द्रसारसङ्ग्रहे—"हयमूत्रेण तत् सेच्यं तप्तं तप्तं त्रिसप्तधा" इति । द्रवं हयमूत्रमित्यर्थः । अनु पश्चात् पुटं कुर्यात् यावत् भस्मतां व्रजेत् ॥ ६५ ॥

सत्त्वपातनमाह, मोचेति ।—मोचः रम्भातरुः तस्य कन्दोऽत्र ग्राह्यः । मोरटम् इक्षुमूलम् अनयोः रसो ग्राह्यः । पालाशक्षारं पलाशक्षारोदकम् । वज्रकन्दं वन्यसूरणकन्दः । निशाकल्कं हरिद्राचूर्णम् । फलचूर्णं त्रिफलाचूर्णम् । नरसारः "निशादल" इति ख्यातः । मेषशृङ्गी "मेडाशिङे" इति भाषा, तदभावे कर्कटशृङ्गी ग्राह्या । मूकमूषा अन्धमूषेत्यर्थः, महामूषा वा सत्त्वपातनकर्मणि तस्या एवोपयोगित्वात्, तल्लक्षणञ्चाग्रे वक्ष्यमाणम् । हठाग्निना भस्त्राग्निना । अयमर्थः,—मोचादीनां रसेन वैक्रान्तं सम्भाव्य वज्रकन्दादीनां चूर्णेन नरसारचूर्णेन च संसृज्य मेषशृङ्गीद्रवेण सह मर्दयित्वा मूकमूषायां संस्थाप्य भस्त्राग्निना ध्मापितं कृत्वा सत्त्वमाहरेदिति ॥ ६६—६८ ॥

मतान्तरमाह, सत्त्वेति ।—सत्त्वपातनयोगेन सत्त्वपातनार्थद्रव्यसंयोगेन, तानि चोक्तानि रसेन्द्रचिन्तामणौ यथा—"गुड़-पुरस्तथा लाक्षा पिण्याकं टङ्कणं तथा ।

मृतवैक्रान्तस्य प्रयोगविधिगुणाश्च ।—

भस्मत्वं समुपागतो विक्रतको हेम्ना मृतेनान्वितः
पादांशेन कणाऽऽज्यवेल्लसहितो गुञ्जामित सेवितः ।
यक्ष्माणं जरणञ्च पाण्डुगुदजं श्वासञ्च कासामयं
दुष्टाञ्च ग्रहणीमुरःक्षतमुखान् रोगान् जयेद्देहकृत् ॥ ७० ॥

प्रयोगान्तरम् ।—

सूतभस्मार्द्धसंयुक्तं नीलवैक्रान्तभस्मकम् ।
मृताभ्रसत्त्वमुभयोस्तुलित परिमर्दितम् ॥ ७१ ॥
क्षौद्राज्यसयुतं प्रातर्गुञ्जामात्रं निषेवितम् ।
निहन्ति सकलान् रोगान् दुर्जयानन्यभेषजैः ॥
त्रिःसप्तदिवसैर्नृणां गङ्गाम्भ इव पातकम् ॥ ७२ ॥

[इति वैक्रान्ताधिकारः] ।

अथ माक्षिकम् ।—

अथ माक्षिकोत्पत्तिस्थाननिर्देशः ।—

सुवर्णशैलप्रभवो विष्णुना काञ्चनो रस ।
ताप्या किरातचीनेषु यवनेषु च निर्मितः ।
ताप्यः सूर्यांशुसन्तप्तो माधवे मासि दृश्यते ॥ ७३ ॥

कणा सर्ज्जरसश्चैव क्षुद्रनीलसमन्वितम ॥ एतत सर्वन्तु सञ्चूर्ण्य छागीदुग्धेन पिण्डिका । कृता ध्माता खराङ्गारे सत्त्व मुञ्चति नान्यथा ॥" इति । घटिका षष्टिपलात्मक-दण्डरूप काल ॥ ६९ ॥

वैक्रान्तस्य प्रयोगविधि गुणांश्चाह, भस्मत्वमिति ।—विक्रतक वैक्रान्त' । पादांशेन वैक्रान्तापेक्षया चतुर्थांशेन भस्मसुवर्णेन । कणाऽऽज्यवेल्लसहित पिप्पलीविडङ्ग-घृतसयुक्त, कणादीनाञ्च मात्रा यथायोग्य बोध्या । गुञ्जामित इत्यस्य मृतहेमान्वित-विक्रतक इत्यनेन सम्बन्ध । जरण जराम् । "जरणम्" इत्यत्र "जठरम्" इति पाठ. समीचीन' ॥ ७० ॥

प्रयोगान्तरमाह, सूतेति ।—सूतभस्म रससिन्दूर ॥ ७१।७२ ॥

माक्षिकस्योत्पत्तिस्थानमाह, सुवर्णेति ।—काञ्चन. स्वर्णाभ इत्यर्थ. । ताप्या

अथ माक्षिकस्य गुणाः।—

मधुरः काञ्चनाभासः साम्लो रजतसन्निभः।
किञ्चित् कषायमधुरः शीतः पाके कटुर्लघुः॥
तत्सेवनाज्जराव्याधि-विषैर्न परिभूयते॥ ७४॥

अथ माक्षिकस्य द्वैविध्य परिचयश्च।—

माक्षिको द्विविधो हेम-माक्षिकस्तारमाक्षिकः।
तत्राऽऽद्यं माक्षिकं कान्य-कुब्जोत्थं स्वर्णसन्निभम्॥७५॥
तपतीतीरसम्भूतं पञ्चवर्णसुवर्णवत्।
पाषाणबहलः प्रोक्तस्ताराख्योऽल्पगुणात्मकः॥ ७६॥

गुणान्तरम्।—

माक्षीकधातुः सकलामयघ्नः प्राणो रसेन्द्रस्य परं हि वृष्यः।
दुर्मेललोहद्वयमेलनश्च गुणोत्तरः सर्वरसायनाग्र्यः॥ ७७॥

तापीनदीतीरे। ताप्यं तापीनदीसमुद्भवं माक्षिकं इति यावत्। माधवे वैशाखे॥ ७३॥

माक्षिकस्य गुणमाह, मधुर इति।—काञ्चनाभासः स्वर्णप्रभः माक्षिक इति शेषः, स्वर्णमाक्षिक इत्यर्थः, साम्लमधुरः। रजतसन्निभः रौप्यमाक्षिकः किञ्चित् कषायमधुरः॥ ७४॥

माक्षिकस्य भेदादिकमाह, माक्षिक इति।—तारमाक्षिकः रौप्यमाक्षिकः। आद्यं माक्षिकं स्वर्णमाक्षिकम्। पाषाणबहलः इत्यस्य ताराख्येन सम्बन्धः। योगरत्नाकरे स्वर्णमाक्षिकस्य लक्षणमुक्तं यथा—"भङ्गे सुवर्णसङ्काशो मनाक् कृष्णच्छविर्बहिः। बहुवर्णं इति ख्यातो माक्षिकोऽत्र प्रशस्यते॥" इति। किञ्च स्वर्णसाहित्यात् अस्य स्वर्ण-माक्षिक इत्यभिधानं, तथा च—"किञ्चित्सुवर्णसाहित्यात् स्वर्णमाक्षिकमुच्यते" इति। अन्यच्च—"उपधातुः सुवर्णस्य किञ्चित्स्वर्णगुणान्वितम्। तथा च काञ्चनाभावे दीयते स्वर्णमाक्षिकम्॥" इति॥ ७५।७६॥

अस्य गुणान्तरमाह, माक्षीकधातुरिति।—प्राणो रसेन्द्रस्य पारदस्य वीर्योत्कर्ष-जनक इत्यर्थः। दुर्मेलेति।—दुःखेन मिश्रणीयलोहद्वयस्य ऐक्यसम्पादकः। गुणोत्तरः महागुणः॥ ७७॥

अथ शोधनानि ।—

एरण्डतैललुङ्गाम्बु-सिद्धं शुध्यति माक्षिकम् ।
सिद्धं वा कदलीकन्द-तोयेन घटिकाद्वयम् ।
तप्तं क्षिप्तं वराक्काथे शुद्धिमायाति माक्षिकम् ॥ ७८॥

अथ मारणम् ।—

मातुलुङ्गाम्बुगन्धाभ्यां पिष्टं मूषोदरे स्थितम् ।
पञ्चक्रोडपुटैर्दग्धं म्रियते माक्षिकं खलु ॥ ७९ ॥

मतान्तरम् ।—

एरण्डस्नेहगव्याज्यैर्मातुलुङ्गरसेन वा ।
खर्परस्थं दृढं पक्कं जायते धातुसन्निभम् ॥
एवं मृतं रसे योज्यं रसायनविधावपि ॥ ८० ॥

अथ सत्त्वपातनम् ।—

त्रिशांशनागसंयुक्तं क्षारैरम्लैश्च मर्दितम् ।
ध्मातं प्रकटमूषायां सत्त्वं मुञ्चति माक्षिकम् ॥ ८१ ॥

अथ माक्षिकस्य सीसकग्रासम् ।—

सप्तवारं परिद्राव्य क्षिप्तं निर्गुण्डिकारसे ।
माक्षीकसत्त्वसम्मिश्रं नागं नश्यति निश्चितम् ॥ ८२ ॥

शोधनान्याह, एरण्डतैलेत्यादि ।—एरण्डतैललुङ्गाम्बुसिद्धं, दोलायन्त्रे इति शेषः । लुङ्गाम्बु मातुलुङ्गरसः । पक्षान्तरमाह,—सिद्धमिति । प्रकारान्तरमाह, तप्तमिति ।—वराक्काथे त्रिफलाक्काथे ॥ ७८ ॥

मारणमाह, मातुलुङ्गेति ।—पञ्चक्रोडपुटैः वाराहपुटैः पञ्च वारान् ॥ ७९ ॥

मतान्तरमाह, एरण्डस्नेहेति ।—एरण्डतैलगव्यच्छागपयोभिः सह पिष्ट्वा इत्यर्थः । दृढं निश्चितं सम्यगित्यर्थो वा । धातुसन्निभं स्वर्णगैरिकतुल्यरक्ताभम् ॥ ८० ॥

सत्त्वपातनमाह, त्रिशांशेति ।—माक्षिकापेक्षया त्रिंशद्भागैकभागसीसकभस्म-संयुक्तम् । क्षारैः सर्जिकायावशूकटङ्गणाख्यक्षारत्रयैः । अम्लैः मातुलुङ्गाद्यम्ल-वर्गरसैः ॥ ८१ ॥

माक्षिकस्य सीसकग्रसनप्रक्रियामाह, सप्तवारमिति ।—सीसकमग्नौ द्रवीकृत्य

प्रकारान्तरेण सत्त्वपातनम् ।—

क्षौद्रगन्धर्वतैलाभ्यां गोमूत्रेण घृतेन च ।
कदलीकन्दसारेण भावित माक्षिकं मुहुः ॥
मूषायां मुञ्चति ध्मात सत्त्व शुल्वनिभं मृदु ॥ ८३ ॥

विशुद्धमाक्षिकसत्त्वस्य लक्षणम् ।—

गुञ्जावीजसमच्छाय द्रुतद्रावञ्च शीतलम् ।
ताप्यसत्त्वं विशुद्ध तद्देहलोहकरं परम् ॥ ८४ ॥

माक्षिकसत्त्वस्य प्रयोगविशेष ।—

माक्षीकसत्त्वञ्च रसेन पिष्ट कृत्वा विलीने च बलिं निधाय ।
सम्मिश्र्य सम्मर्द्य च खल्वमध्ये निक्षिप्य सत्त्वं द्रुतिमभ्रकस्य ॥
॥ ८५ ॥
विधाय गोलं लवणाख्ययन्त्रे पचेद्दिनार्द्धं मृदुवह्निना च ।
स्वतः सुशीतं परिचूर्ण्य सम्यग्वल्लोन्मितं व्योषविडङ्गयुक्तम् ॥
॥ ८६ ॥
ससेवितं क्षौद्रयुत निहन्ति जरां सरोगान्वपमृत्युमेव ।
दुःसाध्यरोगानपि सप्तवासरैर्नैतेन तुल्योऽस्ति सुधारसोऽपि ॥
॥ ८७ ॥

सप्तवार निर्गुण्डीरसे निवाप्य माक्षिकसत्त्वेन संयोजयेत्, एवञ्च तत् अवश्यमेव तत्र विलीयेत इत्यर्थ ॥ ८२ ॥

मतान्तरे सत्त्वपातनमाह, क्षौद्रेति ।—गन्धर्वतैलम् एरण्डतैलम् । मुहु सप्तवार्-मित्यर्थ. । शुल्वनिभ ताम्रसदृशपाटलवर्णमित्यथ ॥ ८३ ॥

विशुद्धस्य गुणमाह, गुञ्जावीजेति ।—गुञ्जावीजसमच्छाय गुञ्जासदृशरक्तवर्ण-मित्यथ । द्रुतद्राव द्रूयते विलीयते द्रवीभूयते अनेनेति व्युत्पत्त्या द्रुतशब्देनात्र अग्नि. गृह्यते, द्रुतेन अग्निना द्राव सन्तप्त तरलीभूतमित्यर्थ ॥ ८४ ॥

प्रयोगविधिमाह, माक्षीकेति ।—विलीने मिश्रिते इत्यथ. । बलिं गन्धकम् । सत्त्वमित्यादि ।—अभ्रस्य तरलसारमित्यर्थ. । लवणाख्ययन्त्रे लवणयन्त्रे तल्लक्षणञ्चाग्रे वक्ष्यति ॥ ८५—८७ ॥

अथ माक्षिकसत्त्वद्रावणम् ।—

एरण्डोत्थेन तैलेन गुञ्जा क्षौद्रञ्च टङ्कणम् ।
मर्दितं तस्य वापेन सत्त्वं माक्षीकजं द्रवेत् ॥ ८८ ॥

[इति माक्षिकाधिकारः]।

अथ विमलः ।—

अथ विमलभेदाः ।—

विमलस्त्रिविधः प्रोक्तो हेमाद्यस्तारपूर्वकः ।
तृतीयः कांस्यविमलस्तत्तत्कान्त्या स लक्ष्यते ॥८९॥

अथ विमलस्य लक्षणं गुणाश्च ।—

वर्त्तुलः कोणसयुक्तः स्निग्धश्च फलकान्वितः ।
मरुत्पित्तहरो वृष्यो विमलोऽतिरसायनः ॥ ९० ॥

अथ त्रिविधस्य तस्य क्रियाविशेषः ।—

पूर्वो हेमक्रियासूक्तो द्वितीयो रूप्यकृन्मतः ।
तृतीयो भेषजे तेषु पूर्वपूर्वो गुणोत्तरः ॥ ९१ ॥

अथ विमलशोधनम् ।—

आटरूषजले स्विन्नो विमलो विमलो भवेत् ।
जम्बीरस्वरसे स्विन्नो मेषशृङ्गीरसेऽथवा ।
आयाति शुद्धिं विमलो धातवश्च यथा परे ॥ ९२ ॥

माक्षिकसत्त्वद्रावणमाह, एरण्डोत्थेनेति ।—गुञ्जा गुञ्जावीजम् । तस्य वापेन कष्ट-मूषादौ तत्र प्रक्षेपेण तत्कल्कमध्ये स्थापनेनेत्यर्थः ॥ ८८ ॥

विमलस्य भेदमाह, विमल इति ।—विमलः माक्षिकविशेषः । तत्तत्कान्त्या हेमादीनां प्रभया । पर्य्यायमुक्तावलीकृता विमलशब्देन रौप्यमाक्षिकं गृहीतम् ॥८९॥

विमलस्याकृतिं गुणांश्चाह, वर्त्तुल इति ।—सुगमम् ॥ ९० ॥

त्रिविधस्य तस्य क्रियाविशेषमाह, पूर्व इति ।—हेमक्रियासु स्वर्णाभावे तत्कार्य्य-करणायेत्यर्थः । रूप्यकृत् रौप्यकार्य्यकृदित्यर्थः ॥ ९१ ॥

तेषां शोधनमाह, आटरूषेति ।—आटरूषजले वासकस्य स्वरसे क्वाथे वा । स्विन्नः, दोलायन्त्रे इति शेषः । परे अन्ये ॥ ९२ ॥

अथ विमलमारणम्।—

गन्धाश्मलकुचाम्लैश्च म्रियते दशभिः पुटैः ॥ ९३ ॥

अथ सत्त्वपातनम्।—

सटङ्कलकुचद्रावैर्मेषशृङ्ग्याश्च भस्मना।

पिष्टो मूषोदरे लिप्तः सशोष्य च निरुध्य च ॥ ९४ ॥

षट्प्रस्थकोकिलैर्ध्मातो विमलः सीससन्निभः।

सत्त्वं मुञ्चति तद्युक्तो रसः स्यात् स रसायनः ॥ ९५ ॥

मतान्तरम्।—

विमलं शिग्रुतोयेन काङ्क्षी कासीसटङ्कणम्।

वज्रकन्दसमायुक्तं भावितं कदलीरसैः ॥ ९६ ॥

मोचक-क्षारसंयुक्तं ध्मापितं मूकमूषगम्।

सत्त्वं चन्द्रार्कसङ्काशं पतते नात्र संशयः ॥ ९७ ॥

अथ प्रयोगविधिः।—

तत् सत्त्वं सूतसंयुक्तं पिष्टं कृत्वा सुमर्दितम्।

विलीने गन्धके क्षिप्त्वा जारयेत्त्रिगुणालकम् ॥ ९८ ॥

शिला पञ्चगुणाञ्चापि वालुकायन्त्रके खलु।

तारभस्म दशांशेन तावद्वैक्रान्तकं मृतम् ॥ ९९ ॥

विमलस्य मारणमाह, गन्धाश्मेति।—गन्धाश्मा गन्धकः, लकुच लकुचस्वरस, लकुच 'डहुया" "मन्दार" इति वा ख्यात अम्ल अम्लवर्गे ते तैः ॥ ९३ ॥

सत्त्वसङ्ग्रहणमाह, सटङ्केति।—षट्प्रस्थकोकिलैः द्वादशशरावमितवदर-काष्ठाङ्गारैः, विमलः टङ्कणमेषशृङ्गीभस्मभ्यां सम्मिश्र्य लकुचद्रावैः पिष्ट्वा मूषागर्भे संलिप्यातपे संशोष्य पश्चात् मूषां तां निरुध्य द्वादशशरावमितवदरकाष्ठाङ्गारेण भस्त्रया ध्मापयेत्, तेन विमलः सीसकसदृशः सन् सत्त्वं मुञ्चतीति निष्कर्षः ॥ ९४।९५ ॥

प्रकारान्तरमाह, विमलमिति।—काङ्क्षी सौराष्ट्रमृत्तिका। मोचकः मुष्ककः घण्टापाटला इति यावत्, काङ्क्ष्यादिवज्रकन्दान्तैः विमलं संयोज्य शिग्रुमूलरसेन तथा कदलीमूलरसेन च भावयित्वा घण्टापाटलिकाक्षारेण सम्मिश्र्य मूषामध्ये ध्मापयित्वा धमेदित्यर्थः ॥ ९६।९७ ॥

विमलसत्त्वस्य प्रयोगं गुणांश्चाह, तत्सत्त्वमिति।—जारयेत् त्रिगुणालकं विमलं

सर्वमेकत्र सञ्चूर्ण्य पटेन परिगाल्य च ।
निक्षिप्य कूपिकामध्ये परिपूर्य्य प्रयत्नतः ॥ १०० ॥
लीढो व्योषवरान्वितो विमलको युक्तो घृतैः सेवितो
हन्याद्दुर्भगकृज्ज्वरान् श्वयथुकं पाण्डुप्रमेहारुचीः ।
मूलार्त्तिं ग्रहणीञ्च शूलमतुलं यक्ष्मामयं कामलां
सर्वान् पित्तमरुद्गदान् किमपरैर्योगैरशेषामयान् ॥१०१॥
[इति विमलाधिकारः] ।

अथ शिलाजतु ।—

अथ शिलाजतुनो भेद ।—

शिलाधातुर्द्विधा प्रोक्तो गोमूत्राद्यो रसायनः ।
कर्पूरपूर्वकश्चान्यस्तत्राऽऽद्यो द्विविधः पुनः ॥
ससत्त्वश्चैव निःसत्त्वस्तयोः पूर्वो गुणाधिकः ॥ १०२ ॥

अथ शिलाजतुन उत्पत्तिकथनम् ।—

ग्रीष्मे तीव्रार्कतप्तेभ्यः पादेभ्यो हिमभूभृतः ।
स्वर्णरूप्यार्कगर्भेभ्यः शिलाधातुर्विनिःसरेत् ॥ १०३ ॥

सत्त्वापेक्षया त्रिगुणहरितालं दत्त्वा जारणां कुर्यादित्यर्थः । "जायते त्रिगुणात्मकम्" इति पाठे—वातपित्तकफनाशनरूपगुणत्रयविशिष्टम् इत्यर्थः । दुर्भगकृज्ज्वरान् श्रीहीनताकरज्वरान्, वैरूप्यजनकज्वरानित्यर्थः, यद्वा,—दुर्भगकृत् भगन्दरः । मूलार्त्तिं शिरोरोगम् । अयमर्थः,—विमलसत्त्वं तुल्यरसेन सम्मर्द्य एकीभूते सति द्वयास्तुल्यं गन्धकं त्रिगुणहरितालं तथा पञ्चगुणमनःशिलाञ्च दत्त्वा साम्लभाण्डे बालुकायन्त्रे दिनमेकं पचेत्, स्वाङ्गशीते च समुद्धृत्य दशमांशरौप्यभस्म तावच्च मृतवैक्रान्तं दत्त्वा सञ्चूर्ण्य वस्त्रपूतं काचकूप्यां स्थापयेत् । तच्चूर्णमनुरूपं गृहीत्वा व्योषादिभिः सह सेवितं वक्ष्यमाणगुणं कुर्यात् इति वृद्धाः ॥ ९८—१०१ ॥

अथ शिलाजतुनो द्वैविध्यमाह, शिलेति ।—गोमूत्राद्यः गोमूत्रशिलाजतु गोमूत्र-गन्धिशिलाजतु इत्यर्थः । अन्यः कर्पूरपूर्वकः कर्पूरशिलाजतु कर्पूरगन्धिशिलाजतु इत्यर्थः । पूर्वः गोमूत्रशिलाजतु ॥ १०२ ॥

शिलाजतुन उत्पत्तिमाह, ग्रीष्मे इति ।—पादेभ्यः प्रत्यन्तपर्वतेभ्यः । स्वर्णेति ।—स्वर्णरूप्यार्काः गर्भे येषां तेभ्यः । अर्कः, ताम्रम् ॥ १०३ ॥

अथ त्रिविधस्य तस्य गुणाः ।—

स्वर्णगर्भगिरेर्जातो जपापुष्पनिभो गुरुः ।
स स्वल्पतिक्तः सुस्वादुः परमं तद्रसायनम् ॥ १०४ ॥
रूप्यगर्भगिरेर्जातं मधुरं पाण्डुरं गुरु ।
शिलाजं पित्तरोगघ्नं विशेषात् पाण्डुरोगहृत् ॥ १०५ ॥
ताम्रगर्भगिरेर्जातं नीलवर्णं घनं गुरु ।
शिलाजं कफवातघ्नं तिक्तोष्णं क्षयरोगहृत् ॥ १०६ ॥

अथ विशुद्धशिलाजतुलक्षणम् ।—

वह्नौ क्षिप्तं भवेद्यत्तु लिङ्गाकारमधूमकम् ।
सलिलेऽप्यविलीनञ्च तच्छुद्धं हि शिलाजतु ॥ १०७ ॥

अथ गुणाः ।—

नूनं सज्वरपाण्डुशोफशमनं मेहाग्निमान्द्यापहं
मेदश्छेदकरञ्च यक्ष्मशमनं शूलामयोन्मूलनम् ।
गुल्मप्लीहविनाशनं जठर-हृच्छूलघ्नमामापहं
सर्वत्वग्गदनाशनं किमपरं देहे च लोहे हितम् ॥ १०८ ॥
रसोपरस-सूतेन्द्र-रत्न-लोहेषु ये गुणाः ।
वसन्ति ते शिलाधातौ जरामृत्युजिगीषया ॥ १०९ ॥

तत्रादौ स्वर्णादिभ्य उत्पत्तिभेदेन त्रिविधस्य गोमूत्रगन्धिनः तस्य लक्षणादिकमाह, स्वर्णेति ।—तन्त्रान्तरे तु उत्पत्तिभेदेन भिन्नस्य तस्य चातुर्विध्यमुक्तं, यथा चरके—"नात्युष्णशीता धातुभ्यश्चतुर्भ्यस्तस्य सम्भवः । हेम्नोऽथ रजतात्ताम्राद् वरात् कालायसादपि ॥" इति । अत्र तु आयसं नोक्तं, तल्लक्षणमपि तत्रैव द्रष्टव्यं यथा—"यत्तु गुग्गुलुसङ्काशं तिक्तकं लवणान्वितम् । विपाके कटु शीतञ्च सर्वश्रेष्ठं तदायसम् ॥ गोमूत्रगन्धि सर्वेषां सर्वकर्मसु यौगिकम् । रसायनप्रयोगेषु पश्चिमन्तु विशिष्यते ॥" इति । अत्र हैमशिलाजतुनो परमरसायनत्वेनोक्तत्वात् आयसस्यापि मुख्यतः रसायनगुणत्वेन एककार्य्यकत्वात् आयसं पृथङ्नोक्तमिति मन्तव्यम् ॥ १०४—१०६ ॥

विशुद्धस्य तस्य लिङ्गमाह, वह्नाविति ।—सुगमम् ॥ १०७ ॥

तस्य गुणमाह, नूनमिति ।—देहे च लोहे हितं—देहस्य स्थिरीकरणे रक्तवर्द्धनक्रियायाञ्च हितम् ॥ १०८।१०९ ॥

अथ शोधनम् ।—

क्षाराम्लगोजलैर्धौतं शुध्यत्येव शिलाजतु ॥ ११० ॥

मतान्तरम् ।—

शिलाधातुश्च दुग्धेन त्रिफला मार्कवद्रवैः ।
लोहपात्रे विनिक्षिप्य शोधयेदतियत्नतः ॥ १११ ॥

मतान्तरम् ।—

क्षाराम्लगुग्गुलोपेतैः स्वेदनीयन्त्रमध्यगैः ।
स्वेदितो घटिकामानाच्छिलाधातुर्विशुध्यति ॥ ११२ ॥

अथ मारणम् ।—

शिलया गन्धतालाभ्यां मातुलुङ्गरसेन च ।
पुटितो हि शिलाधातुर्म्रियतेऽष्टगिरिण्डकैः ॥ ११३ ॥

अथ प्रयोगविधिः ।—

भस्मीभूतशिलोद्भवं समतुलं कान्तञ्च वैक्रान्तकं
युक्तञ्च त्रिफलाकटुत्रिकघृतैर्वल्लेन तुल्यं भजेत् ।

शिलाजतुशोधनमाह, क्षारेति ।—अत्र जलशब्दः क्षारादिभिः प्रत्येकं सम्बध्यते, ततश्च यवक्षारोदकेन काञ्जिकेन गोमूत्रेण च लौहपात्रे एकैकदिनं धौतं कृत्वा आतपे संशोष्य गृह्णीयात। अत्र यद्यपि आतपशोषणं नोक्तं तथाऽपि तन्त्रान्तरदर्शनात् वृद्ध-वैद्यव्यवहारसिद्धत्वाच्च तत् कार्य्यम् ॥ ११० ॥

मतान्तरमाह, शिलेति ।—अत्रापि पूर्ववत् प्रत्येकद्रवेण एकैकदिनं मर्दयित्वा आतपे संशोष्य शोधयेदित्यर्थः ॥ १११ ॥

मतान्तरमाह, क्षारेति ।—क्षाराम्लगुग्गुलोपेतैरित्यस्य "दुग्धेन त्रिफलामार्कवद्रवैः" इति पूर्ववाक्येन सम्बन्धः कल्पनीयः । स्वेदनीयन्त्रमग्रे वक्ष्यति। स्वेदनप्रकारश्चाय— स्थालीमध्ये दुग्धादिगुग्गुलान्तं सर्वमेकीकृत्य निधाय स्थालीमुखं वस्त्रेण बद्ध्वा तदुपरि शिलाजतु संस्थाप्य शरावेणाच्छाद्य सन्धिं लिप्त्वा घटिकां यावत् स्वेदयेत् इति ॥ ११२ ॥

मारणमाह, शिलयेति ।—शिलया मनःशिलया। शिलादीनां प्रत्येकं शिलाजतु-तुल्यत्वं मातुलुङ्गरसस्य पेषणयोग्यो देयः। गिरिण्डकः वनोपलः ॥ ११३ ॥

पाण्डौ यक्ष्मगदे तथाऽग्निसदने मेहेषु मूत्रामये
गुल्मप्लीह-महोदरे बहुविधे शूले च योन्यामये ॥ ११४ ॥
सेवेत यदि षण्मासं रसायनविधानतः ।
वलीपलितनिर्मुक्तो जीवेद्वर्षशतं सुखी ॥ ११५ ॥

अथ सत्त्वपातनम् ।—

पिष्टं द्रावणवर्गेण साम्लेन गिरिसम्भवम् ।
क्षिप्त्वा मूषोदरे रुद्ध्वा गाढं ध्मातं हि कोकिलैः ॥
सत्त्वं मुञ्चेच्छिलाधातुस्तत्क्षणात् लोहसन्निभम् ॥ ११६ ॥

कर्पूरशिलाजतुनो लक्षणादिकम् ।—

पाण्डुरं सिकताकारं कर्पूराद्यं शिलाजतु ।
मूत्रकृच्छ्राश्मरीमेह कामलापाण्डुनाशनम् ॥ ११७ ॥

अथ तस्य शोधनम् ।—

एलातोयेन सम्भिन्नं सिद्धं शुद्धिमुपैति तत् ।
नैतस्य मारणं सत्त्व-पातनं विहितं बुधैः ॥ ११८ ॥

[इति शिलाजत्वधिकारः] ।

मृतशिलाजतुनः प्रयोगं गुणांश्चाह, भस्मीभूतेति ।—समतुलं समपरिमितम् । कान्तं कान्तलौहम् । वल्लेन तुल्यमिति भस्मीभूतशिलोद्भवासत्त्वेन सह योजनीयम् । कान्तवैक्रान्तयोः प्रत्येकं तत्समत्वम् । त्रिफलादिकमनुरूपं दत्त्वा सेव्यम् । मूत्रामये शिरोरोगे । रसायनविधानतः कुटीप्रवेशादिरसायनविधिमनुसृत्येत्यर्थः ॥ ११४।११५ ॥

सत्त्वपातनमाह, पिष्टमिति ।—द्रावणवर्गेण "गुडगुग्गुलुगुञ्जाज्य सारघटङ्कणान्वितैः । दुद्रावाखिललौहादद्रावणाय गणो मतः ॥" इति वक्ष्यमाणगणेन । साम्लेन सकाञ्जिकेन । कोकिलैः वादराङ्गारैः ॥ ११६ ॥

इदानीं कर्पूरगन्धिशिलाजतुनो लक्षणादिकमाह, पाण्डुरमिति ।—सुगमम् ॥११७॥

तस्य शोधनमाह, एलेति ।—सम्भिन्नं मिश्रितं मर्दितं वा । सिद्धम् एलातोयेनैव स्विन्नम् । नैतस्येति ।—एतस्य कर्पूरशिलाजतुनः ॥ ११८ ॥

अथ सस्यकः ।—

अथ सस्यकोत्पत्तिः ।—

पीत्वा हालाहलं वान्तं पीतामृतगरुत्मता ।
विषेणामृतयुक्तेन गिरौ मरकताह्वये ॥
तद्वान्तं हि घनीभूतं सञ्जातं सस्यकं खलु ॥ ११९ ॥

अथ प्रशस्तसस्यकलक्षणम् ।—

मयूरकण्ठसच्छायं भाराढ्यमतिशस्यते ॥ १२० ॥

अथ सस्यकस्यौत्कर्ष्यकथनम् ।—

द्रव्यं विषयुतं यत्तद्द्रव्याधिकगुणं भवेत् ।
सुधा हालाहलैर्युक्ता सुधाधिकगुणा तथा ॥ १२१ ॥

अथ गुणाः ।—

निःशेषदोष-विष-हृद्गद-शूल-मूल-
कुष्ठाम्लपैत्तिक-विबन्धहरं परञ्च ।
रसायनं वमनरेककरं गरघ्नं
श्वित्रापहं गदितमत्र मयूरतुल्यम् ॥ १२२ ॥

सस्यकोत्पत्तिमाह, पीत्वेति ।—वान्तं वमनं कृतम् । पीतामृतगरुत्मता अमृतं पीतवता गरुडेन । सस्यकं तुत्थकम् । गरुडोद्गीर्णसविषमृतं कालेन घनीभूतं सस्यकं जातमित्यर्थः । यद्यप्यस्य भेदादिकं ग्रन्थकर्त्रा नोक्तं, तथापि तन्त्रान्तरदर्शनात् द्वैविध्यं ज्ञेयम्, यथा—"तुत्थं द्विविधं—मयूरं खर्परीतुत्थञ्च । तुत्थं कटुकषायोष्णं श्वित्रनेत्रामयापहम् । विषदोषेषु सर्वेषु प्रशस्तं वान्तिकारकम् ॥ खर्परी कटुका तिक्ता चक्षुष्या च रसायनी । लग्दोषशमनी रुच्या दीप्या पुष्टिविवर्द्धिनी ॥" इति रत्नमालायाम् ॥ ११९ ॥

प्रशस्तसस्यकस्य लक्षणमाह, मयूरेति ।—सुगमम् ॥ १२० ॥

तस्य औत्कर्ष्यमाह, द्रव्यमिति ।—यत् द्रव्यं विषयुतं तत् द्रव्यं द्रव्यात् विषरहिततत्सजातीयादिति भावः, अधिकगुणं भवेत् ॥ १२१ ॥

तस्य गुणमाह, निःशेषेति ।—रेककरं विरेचकम् । मयूरतुल्यं मयूरकण्ठाभतुत्थकम् । गरघ्नं संयोगजविषनाशनम् ॥ १२२ ॥

अथ शोधनम्।—

सस्यकं शुद्धिमाप्नोति रक्तवर्गेण भावितम्॥ १२३॥

मतान्तरम्।—

स्नेहवर्गेण संसिक्तं सप्तवारमदूषितम्।
दोलायन्त्रेण सुस्विन्नं सस्यकं प्रहरत्रयम्॥
गोमहिष्याजमूत्रेषु शुध्यते—"॥ १२४॥

अथ तुत्थखर्परमारणम्।—

—तुत्थखर्परम्।
लकुचद्राव-गन्धाश्म-टङ्कणेन समन्वितम्॥
निरुध्य मूषिकामध्ये म्रियते कौक्कुटैः पुटैः॥ १२५॥

अथ सत्त्वपातनम्।—

सस्यकस्य तु चूर्णन्तु पादसौभाग्यसंयुतम्।
करञ्जतैलमध्यस्थं दिनमेकं निधापयेत्॥ १२६॥
अन्धमूषाऽऽस्यमध्यस्थं ध्मापयेत् कोकिलत्रयम्।
इन्द्रगोपाकृति चैव सत्त्वं भवति शोभनम्॥ १२७॥

शोधनमाह, सस्यकमिति।—रक्तवर्गेण वक्ष्यमाणकुसुम्भादिक्वाथेनेत्यर्थः। भावितमित्यत्र सप्तवारमिति शेषः॥ १२३॥

मतान्तरे शोधनमाह, स्नेहेति।—स्नेहवर्गेण घृततैलवसामज्जरूपेण सप्तवारं संसिक्तं भावितमित्यर्थः। अदूषितं विशुद्धम्। गोमाहिष्याजमूत्रेषु दोलायन्त्रेण प्रहरत्रयं सुस्विन्नमित्यन्वयः॥ १२४॥

खर्परीतुत्थमारणमाह, तुत्थखर्परमिति।—कौक्कुटैः पुटैः,—"अध षडङ्गुलं खातं चतुर्दिक्षु च तादृशम्। एतत् कुक्कुटनामानं पुटं विद्याद्भिषग्वर॥" इत्युक्तलक्षणकैः दशवनोपलसाध्यपुटविशेषैः॥ १२५॥

सत्त्वपातनमाह, सस्यकस्येति।—पादसौभाग्यसंयुतं सस्यकापेक्षया चतुर्थांशटङ्कणसंयुक्तम्। कोकिलत्रयं कोकिलेन वदरकाष्ठाङ्गारेण दत्तं वारत्रयम् इत्यर्थः। इन्द्रगोपाकृति तदाख्यरक्तवर्णकीटविशेषसदृशम्, आरक्तवर्णमित्यर्थः॥ १२६। १२७॥

मतान्तरम् ।—

निम्बुद्रवाल्पटङ्काभ्यां मूषामध्ये निरुध्य च ।
ताम्ररूपं परिध्मात सत्त्व मुञ्चति सस्यकम् ॥ १२८ ॥

मतान्तरम ।—

शुद्ध सस्यं शिखिक्रान्तं पूर्वभेषजसयुतम ।
नानाविधानयोगेन सत्त्व मुञ्चति निश्चितम् ॥ १२९ ॥

अथ प्रयोगविधि ।—

सत्त्वमेतत् समादाय खर-भूनागसत्त्वयुक् ।
तन्मुद्रिका कृतस्पर्शा शूलघ्नी तत्क्षणाद्भवेत् ॥ १३० ॥
चराचर विष भूत-डाकिनी दृग्गतं जयेत् ।
मुद्रिकेयं विधातव्या दृष्टप्रत्ययकारिका ॥ १३१ ॥

अथ भालुकितन्त्रोक्तप्रयोगविधि ।—

"रामवत्सोमसेनानीर्मुद्रितेऽपि तथाऽत्तरम् ।
हिमालयोत्तरे पार्श्वे अश्वकर्णो महाद्रुम ॥

मतान्तरमाह, निम्बुद्रवेति ।—अल्पटङ्क पादसौभाग्यमित्यथ । ताम्ररूप ताम्रवर्णं सत्त्वमिति योजनीयम ॥ १२८ ॥

मतान्तरमाह, शुद्धमिति ।—शिखिक्रान्त वह्निना दग्धम् । पूर्वभेषजसयुतं पूर्वोक्तनिम्बुद्रवादिसमन्वितमित्यर्थ ॥ १२९ ॥

प्रयोगविधिमाह, सत्त्वमिति ।—खरभूनागसत्त्वयुक् खर दुरालभा भूनाग-सत्त्व सीसकसार ताभ्या युनक्ति इति खरभूनागसत्त्वयुक् । "खर" इत्यत्र "कर्ष" इति पाठ समीचीन , तत्पक्षे—कर्षं भूनागसत्त्वमिति । मुद्रिका चक्रिका इत्यर्थ । तन्मुद्रिकेत्यादि ।—पूर्वोक्तविधानेन सङ्गृहीततुल्यकसत्त्व सीसकसत्त्वेन तुल्येन सयोज्य दुरालभारसेन चक्रिका विधाय शूलिनो जठरोपरि भ्रामयेत् तत्क्षणादेव शूलादिक नश्यतीत्यर्थ । चराचरमित्यादि ।—चराचर स्थावरजङ्गम तथा भूतडाकिन्यो, दृग्गत दर्शनजनित विषमिति योजनीयम् ॥ १३०।१३१ ॥

तत्र शूलं समुत्पन्नं तत्रैव विलयं गतम्" ॥ १३२ ॥
मन्त्रेणानेन मुद्राऽम्भो निपीतं सप्तमन्त्रितम्।
सद्यः शूलहरं प्रोक्तमिति भालुकिभाषितम् ॥ १३३ ॥

अथ प्रयोगान्तरम्।—

अनया मुद्रया तप्तं तैलमग्नौ सुनिश्चितम्।
लेपितं हन्ति वेगेन शूलं यत्र क्वचिद्भवेत् ॥
सद्यः सूतिकरं नार्य्याः सद्यो नेत्ररुजापहम् ॥ १३४ ॥

[इति सस्यकाधिकारः]।

अथ चपलः।—

अथ चपलस्य भेदादिकथनं निरुक्तिश्च।—

गौरः श्वेतोऽरुणः कृष्णश्चपलस्तु चतुर्विधः।
हेमाभश्चैव ताराभो विशेषाद्रसबन्धनः ॥ १३५ ॥
शेषौ तु मध्यौ लाक्षावच्छीघ्रद्रावौ तु निष्फलौ।
वङ्गवद्द्रवते वह्नौ चपलस्तेन कीर्त्तितः ॥ १३६ ॥

अथ गुणाः।—

चपलो लेखनः स्निग्धो देहलोहकरो मतः।
रसराजसहायः स्यात्तिक्तोष्णमधुरो मतः ॥ १३७ ॥

भालुकितन्त्रोक्तप्रयोगभेदमाह रामवदिति।—रामवदित्यादि गतमित्यन्तेन मन्त्रेण सप्तवारमभिमन्त्रितं मुद्रानिषिक्तं जलं पीतमेव शूलहरं भवेदित्यर्थः ॥१३२।१३३॥

प्रयोगान्तरमाह, अनयेति।—सूतिकरं प्रसवकारकम् ॥ १३४ ॥

चपलस्य भेदं निरुक्तिञ्चाह, गौर इति।—चपलः यशदं, दस्तेति लोके। हेमाभः गौर इत्यर्थः। ताराभः श्वेतः। शेषौ कृष्णारुणौ। मध्यौ मध्यमगुणसम्पन्नौ। लाक्षेति। —कृष्णारुणौ लाक्षावत् शीघ्रद्रावौ चेत् निष्फलौ इत्यर्थः। निरुक्तिर्यथा वङ्गवदिति। —सुगमम् ॥ १३५।१३६ ॥

गुणमाह, चपल इति।—लेखनः ईषच्चर्मविदारणः कान्तिकरो वा, चर्मविदारण-क्रियासु वमनकार्य्येषु वा प्रयोज्य इत्यर्थः। रसराजस्य पारदस्य सहायः संयोगेन गुणाधिक्यजनक इत्यर्थः ॥ १३७ ॥

अथ वर्णाकृतिभेदेन गुणभेदः ।—

चपलः स्फटिकच्छायः षडस्रः स्निग्धको गुरुः ।
त्रिदोषघ्नोऽतिवृष्यश्च रसबन्धविधायकः ॥ १३८ ॥

चपलस्य महारसत्वकथनम् ।—

महारसेषु कैश्चिद्धि चपलः परिकीर्त्तितः ॥ १३९ ॥

अथ शोधनम् ।—

जम्बीरकर्कोटकशृङ्गवेरैर्विभावनाभिश्चपलस्य शुद्धिः ॥१४०॥

अथ सत्त्वपातनम् ।—

शैलन्तु चूर्णयित्वा तु धान्याम्लोपविषैर्विषैः ।
पिण्डं बद्ध्वा तु विधिवत् पातयेच्चपलं तथा ॥ १४१ ॥

[इति चपलाधिकारः] ।

वर्णाकृतिभेदेन तस्य गुणभेदमाह, चपल इति ।—षडस्रः षट्कोणविशिष्टः, स्फटिकच्छायः षडस्रः चपलः स्निग्ध इत्यादिगुणविशिष्टः ॥ १३८ ॥

तन्त्रान्तरे उपरसमध्ये पठिता एते अभ्रादयः निबन्धकृता महारसोपरसभेदेन द्विधा विभज्य उल्लिखिताः, अभ्रादीनां महावीर्य्यत्वात् बहुलप्रयोगदर्शनाच्च महारसत्वन्तु कदाचित् युज्यते, चपलस्य तु न तथात्वं दृश्यते, अतस्तस्योपरसत्वमाशङ्कमानानां मतं निरसितुं स्वोक्तिदार्ढ्यार्थञ्चाह, महेति ।—सुगमम् ॥ १३९ ॥

शोधनमाह, जम्बीरेति ।—कर्कोटकः "काँक्रोल" इति ख्यातः, जम्बीरादीनां रसैः सप्तभिर्भावनाभिः विशुद्धिमायातीत्यर्थः ॥ १४० ॥

सत्त्वपातनमाह, शैलमिति ।—शैलं शिलाजतु । उपविषाणि लाङ्गल्यादीन्यग्रे वक्ष्यमाणानि । विषाणि शृङ्ग्यादीनि तान्यप्यग्रे वाच्यानि, शैलादि चपलान्तं द्रव्यजातं काञ्जिकेन सम्मर्द्य पिण्डं कृत्वा पूर्ववत् मूषामध्ये निरुध्य कोकिलैर्ध्मापयेत्, तेन सत्त्वं मुञ्चेदित्यर्थः ॥ १४१ ॥

अथ रसकः।—

अथ रसकस्य भेदलक्षणे।—

रसको द्विविधः प्रोक्तो दुर्दुरः कारवेल्लकः।
सदलो दुर्दुरः प्रोक्तो निर्दलः कारवेल्लकः॥ १४२॥

तयोः प्रयोगविषय गुणाश्च।—

सत्त्वपाते शुभः पूर्वो द्वितीयश्चौषधादिषु।
रसकः सर्वमेहघ्नः कफपित्तविनाशनः॥
नेत्ररोगक्षयघ्नश्च लोहपारदरञ्जनः॥ १४३॥
नागार्जुनेन सन्दिष्टौ रसश्च रसकावुभौ।
श्रेष्ठौ सिद्धरसौ ख्यातौ देहलोहकरौ परम्॥ १४४॥
रसश्च रसकश्चोभौ येनाग्निसहनौ कृतौ।
देहलोहमयी सिद्धिर्दासी तस्य न संशयः॥ १४५॥

अथ शोधनम्।—

कटुकालाबुनिर्यासे आलोड्य रसकं पचेत्।
शुद्धं दोषविनिर्मुक्तं पीतवर्णञ्च जायते॥ १४६॥

मतान्तरम्।—

खर्परः परिसन्तप्तः सप्तवारं निमज्जितः।
वीजपूर-रसस्यान्तर्निर्मलत्वं समश्नुते॥ १४७॥

रसकस्य द्वैविध्यं लक्षणञ्चाह रसक इति।—रसकः खर्परीतुल्यकविशेषः, यदुक्तं भावप्रकाशे—"खर्परीतुल्यकं तुत्थादन्यत्तत् रसकं स्मृतम्। ये गुणास्तुत्थके प्रोक्तास्ते गुणा रसके स्मृताः॥" इति। सदलः सपत्रः, वंशपत्रहरितालवदिति भावः॥१४२॥

कार्य्येषु प्रयोगं गुणांश्चाह, सत्त्वपाते इति।—पूर्वः दर्दुरः। द्वितीयः कारवेल्लकः॥ १४३—१४५॥

शोधनमाह, कटुकेति।—पचेत् इत्यत्र दोलायन्त्रे इति शेषः॥ १४६॥

मतान्तरमाह, खर्पर इति।—खर्परमग्नौ सन्ताप्य मातुलुङ्गरसाभ्यन्तरे निमज्जेत्, एवं सप्तवारकरणेन शुद्धिमायातीत्यर्थः॥ १४७॥

मतान्तरम् ।—

नृमूत्रे वाऽश्वमूत्रे वा तक्रे वा काञ्जिकेऽथवा ।
प्रताप्य मज्जितं सम्यक् खर्परं परिशुध्यति ॥ १४८ ॥

अथ रसकस्य ताम्रादिरञ्जनविधि ।—

नरमूत्रे स्थितो मास रसको रञ्जयेद्ध्रुवम् ।
शुद्धताम्र रस तारं शुद्धस्वर्णप्रभ यथा ॥ १४९ ॥

अथ सत्त्वसङ्ग्रह ।—

हरिद्रा-त्रिफला-राल-सिन्धु-धूमै सटङ्कणै: ।
सारुष्करैश्च पादांशै: साम्लै सम्मर्द्य खर्परम् ॥ १५० ॥
लिप्त वृन्ताकमूषाया शोषयित्वा निरुध्य च ।
मूषा मूषोपरि न्यस्य खर्पर प्रधमेत्तत ॥ १५१ ॥
खर्परे प्रद्रुते ज्वाला भवेन्नीला सिता यदि ।
तदा सन्दंशतो मूषां धृत्वा कृत्वा त्वधोमुखीम् ॥ १५२ ॥
शनैरास्फालयेद्भूमौ यथा नाल न भज्यते ।
वङ्गाभ पतित सत्त्वं समादाय नियोजयेत् ॥
एव त्रिचतुरैर्वारै. सर्वं सत्त्व विनि:सरेत् ॥ १५३ ॥

मतान्तरमाह, नृमूत्रे इति ।—अत्रानुक्तत्वेऽपि पूर्ववत् सप्तवार निमज्जन ज्ञेयम् ॥ १४८ ॥

तस्य ताम्रादिरञ्जनविधिमाह, नरमूत्रे इति ।—सुगमम् ॥ १४९ ॥

सत्त्वसङ्ग्रहणमाह, हरिद्रेति ।—राल सर्ज्जरस । धूम गृहधूम । अरुष्कर, भल्लातक । वृन्ताकमूषालक्षणमग्रे वाच्यम् । शोधितखर्पर प्रत्येक पादांशै हरिद्रादिभि सह काञ्जिकाम्लेन सम्मर्द्य वृन्ताकमूषोदरे लिप्त्वा आतपे संशोष्य निरुध्य मूषान्तरोपरि संस्थाप्य च भस्त्राग्निना प्रधमेत् । खर्परे द्रवीभूते सति नील-वर्णानलशिखा यद्वा शुभ्रा भवेत, तदा सन्दंशेन मूषा गृहीत्वा अधोमुखी कृत्वा च नालदण्ड यथा न भज्यते तथा भूमौ मन्द मन्द ताडयेत् एव त्रिचतुर्वारान् कुर्यात् इत्युपदेश. ॥ १५०—१५३ ॥

मतान्तरम्।—

साभया-जतु-भूनाग-निशा-धूमज-टङ्कणम्।
मूकमूषागत ध्मातं शुद्ध सत्त्व विमुञ्चति ॥ १५४ ॥

मतान्तरम्।—

लाक्षा-गुडासुरी-पथ्या हरिद्रा सर्ज-टङ्कणैः।
सम्यक् सञ्चूर्ण्य तत् पक्व गोदुग्धेन घृतेन च ॥ १५५ ॥
वृन्ताकमूषिकामध्ये निरुध्य गुटिकाकृतिम्।
ध्मात्वा ध्मात्वा समाकृष्य ढालयित्वा शिलातले ॥
सत्त्व वङ्गाकृति ग्राह्यं रसकस्य मनोहरम् ॥ १५६ ॥

मतान्तरम्।—

यद्वा जलयुता स्थालीं निखनेत् कोष्ठिकोदरे।
सच्छिद्रं तन्मुखे मल्ल तन्मुखेऽधोमुखीं क्षिपेत् ॥ १५७ ॥
मूषोपरि शिखित्राश्च प्रक्षिप्य प्रधमेद्दृढम्।
पतित स्थालिकानीरे सत्त्वमादाय योजयेत् ॥ १५८ ॥

मतान्तरमाह, साभयेति।—जतु शिलाजतु लाक्षा वा, सत्त्वपातने उभयस्यापि प्रयोगदर्शनात्। धूमज गृहधूम इत्यर्थ, खर्परम् अभयादिभि सह मर्दयित्वा मूकमूषाया सस्थाप्य ध्मापयेत ॥ १५४ ॥

मतान्तरमाह, लाक्षेति।—आसुरी राजिका, लाक्षादिभि समग्रै सह खर्पर चूर्णयित्वा गोदुग्धेन गोघृतेन च सह पक्वा गुटिकाकृति विधाय वृन्ताक-मूषामध्ये निरुध्य पुन पुनर्ध्मापयित्वा समाकृष्य शिलाखण्डोपरि ढालयेत् इत्यर्थ ॥ १५५। १५६ ॥

मतान्तरमाह, यद्वेति।—निखनेत् स्थापयेदित्यर्थ। कोष्ठिका सत्त्वपातनार्थं चुल्लीप्रायो यन्त्रविशेष। मल्ल पात्रविशेष, शरावमिति यावत। अधोमुखीमित्यत्र मूषा-मित्यध्याहार्य्यम्। शिखित्रान् शिखिनम् अनल त्रायन्ति पालयन्ति रक्षन्तीति यावत ये तान् अग्निस्थापकान् अङ्गारानित्यर्थ। अयमर्थ,—सजला स्थालीमेका कोष्ठिकामध्ये निवेश्य सच्छिद्रशरावेण तन्मुख पिधाय शरावोपरि खर्परगर्भा मूषामधो-

अथ सत्त्वमारणम् ।—

तत् सत्त्वं तालकोपेत प्रक्षिप्य खलु खर्परे ।
मर्दयेल्लोहदण्डेन भस्मीभवति निश्चितम् ॥ १५९ ॥

अथ प्रयोगविधि ।—

तत् भस्म मृतकान्तेन समेन सह योजयेत् ।
अष्टगुञ्जामितं चूर्णं त्रिफलाक्वाथसयुतम् ॥ १६० ॥
कान्तपात्रस्थित रात्रौ तिलजप्रतिवापकम् ।
निषेवित निहन्त्याशु मधुमेहमपि ध्रुवम् ॥ १६१ ॥
पित्त क्षयञ्च पाण्डुञ्च श्वयथुं गुल्ममेव च ।
रक्तगुल्मञ्च नारीणा प्रदर सोमरोगकम् ॥ १६२ ॥
योनिरोगानशेषाश्च विषमाश्च ज्वरानपि ।
रज शूलञ्च नारीणा कासं श्वासञ्च हिध्मिकाम् ॥ १६३ ॥

[इति रसकाधिकार] ।

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
महारसाष्टकशुद्ध्यादिनिरूपण नाम द्वितीयोऽध्याय ॥ २ ॥

मुखो कृत्वा सस्थाप्य तदुपरि बदरकाष्ठाङ्गार दत्त्वा भस्त्रया धमेत, एव कृते द्रवीभूत खर्परसत्त्व शरावच्छिद्रेण स्थालीस्थनीरे पतिष्यतीति ॥ १५७ । १५८ ॥

सत्त्वमारणमाह, तत सत्त्वमिति ।—तत सत्त्व रसकसत्त्वम् । तालकोपेत हरितालसयुक्तं, तच्च वंशपत्राख्य ग्राह्यम् । खर्परे मृत्कटाहे इत्यर्थ ॥ १५९ ॥

प्रयोगविधिमाह, तद्भस्मेति ।—मृतकान्तेन भस्मीकृतकान्तलौहेन । तिलज-प्रतिवापक तिलतैलप्रक्षेपयुक्तम् ॥ १६०—१६३ ॥

इति रसरत्नसमुच्चयबोधिन्या द्वितीयोऽध्याय
समाप्त. ॥ २ ॥

अथ तृतीयोऽध्यायः ।

अथोपरसाः साधारणरसाश्च ।—

अथोपरसानां नामानि ।—

गन्धाश्म-गैरि-कासीस-काङ्क्षी-ताल-शिलाञ्जनम् ।
कङ्कुष्ठञ्चेत्युपरसाश्चाष्टौ पारदकर्मणि ॥ १ ॥

अथ गन्धकः ।—

अथ गन्धकोत्पत्तिः ।—

पार्वत्युवाच ।—

गन्धकस्य तु माहात्म्यं तदुद्भवं वद मे प्रभो ! ॥ २ ॥

ईश्वर उवाच ।—

श्वेतद्वीपे पुरा देवि ! सर्वरत्नविभूषिते ।
सर्वकाममये रम्ये तीरे क्षीरपयोनिधेः ॥ ३ ॥
विद्याधरीभिर्मुख्याभिरङ्गनाभिश्च योगिनाम् ।
सिद्धाङ्गनाभिः श्रेष्ठाभिस्तथैवाप्सरसां गणैः ॥ ४ ॥

द्वितीयाध्याये महारसाष्टकानां नामादिकं निरूप्य इदानीमुपरसान् साधारणरसांश्च निरूपयितुं तृतीयाध्यायमारभते, तत्रादौ उपरसानां नामान्याह, गन्धाश्मेति ।—गन्धाश्मा गन्धकः । काङ्क्षी सौराष्ट्रमृत्तिका । शिला मनःशिला । कङ्कुष्ठं हिमवत्पादशिखरजं हरितालवत्पाषाणविशेषः, 'मुर्दाशङ्ख' इति प्रसिद्धं, तथा च—"हिमवत्पादशिखरे कङ्कुष्ठमुपजायते । तत्रैकं रक्तकालं स्यात्तदन्यदण्डकं स्मृतम् ॥ पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिशेत् । श्यामं पीतं लघु त्यक्तसत्त्वं नेष्टं तथाऽण्डकम् ॥" इति । पार्वतीयमृत्तिकाविशेषो वा ॥ १ ॥

अथ गन्धकस्योत्पत्तिं निरुक्तिञ्च वर्णयितुं हरपार्वतीसंवादमाह, गन्धकस्येति ।—

देवाङ्गनाभो-रम्याभिः क्रीडन्तीभिर्मनोहरे ।
गीतैर्नृत्यैर्विचित्रैश्च वाद्यैर्नानाविधैस्तथा ॥ ५ ॥

एवं सङ्क्रीडमानायाः प्राभवत् प्रसृत रजः ।
तद्रजोऽतीव सुश्रोणि ! सुगन्धि सुमनोहरम् ॥ ६ ॥

रजसश्चातिबाहुल्याद्वासस्ते रक्तता ययौ ।
तत्र त्यक्त्वा तु तद्वस्त्र सुस्नाता क्षीरसागरे ॥ ७ ॥

वृता देवाङ्गनाभिस्त्व कैलास पुनरागता ।
ऊर्मिभिस्तद्रजोवस्त्र नीतं मध्ये पयोनिधेः ॥ ८ ॥

एव ते शोणित भद्रे ! प्रविष्टं क्षीरसागरे ।
क्षीराब्धिमथने चैतदमृतेन सहोत्थितम् ॥ ९ ॥

निजगन्धेन तान् सर्वान् हर्षयन् सर्वदानवान् ।
ततो देवगणैरुक्त गन्धकाख्यो भवत्वयम् ॥ १० ॥

रसस्य बन्धनार्थाय जारणाय भवत्वलम् ।
ये गुणाः पारदे प्रोक्तास्ते चैवात्र भवन्त्विति ॥ ११ ॥
इति देवगणैः प्रीतैः पुरा प्रोक्त सुरेश्वरि ! ।
तेनाय गन्धको नाम विख्यातः क्षितिमण्डले ॥ १२ ॥

अथ गन्धकस्य भेदनिर्देश ।—

स चापि त्रिविधो देवि ! शुकचञ्चुनिभो वरः ।
मध्यमः पीतवर्णः स्याच्छुक्लवर्णोऽधमः प्रिये ! ॥ १३ ॥

प्रसृतम आर्तवाशयान्निर्गत पलद्वयपरिमाण वा । "प्रसृतम्" इत्यत्र "प्राकृतम" इति पाठे—प्राकृत स्वभावसिद्ध प्राप्तकालमित्यर्थ । गन्धक इति सज्ञाया हेतुमाह, निजेति ।—तान् सर्वान् इत्यत्र देवानिति शेष । यतोऽय निजप्रशस्तगन्धेन देवादीन् अहर्षयत् अत गन्धक इत्याख्या प्राप्तवान् ॥ २—१२ ॥

गन्धकस्य वैविध्यमाह, स इति ।—शुकचञ्चुनिभ. रक्तवर्ण इत्यर्थ. ॥ १३ ॥

मतान्तरम्।—

चतुर्द्धा गन्धको ज्ञेयो वर्णैः श्वेतादिभि' खलु।
श्वेतोऽत्र खटिका प्रोक्तो लेपने लोहमारणे॥ १४॥
तथा चामलसारः स्याद् यो भवेत् पीतवर्णवान्।
शुकपिच्छ स एव स्याच्छ्रेष्ठो रसरसायने॥ १५॥
रक्तश्च शुकतुण्डाख्यो धातुवादविधौ वरः।
दुर्लभः कृष्णवर्णश्च स जरामृत्युनाशनः॥ १६॥

अथ गुणा।—

गन्धाश्माऽतिरसायन सुमधुर पाके कटूष्णो मतः
कण्डूकुष्ठविसर्पदद्रुदलनो दीप्तानलः पाचनः।
आमोन्मोचनशोषणो विषहरः सूतेन्द्रवीर्य्यप्रदो
गौरीपुष्पभवस्तथा क्रमिहरः सत्यात्मकः सूतजित्॥१७॥
बलिना सेवितः पूर्वं प्रभूतबलहेतवे॥ १८॥

अथ बलिवसाख्यगन्धकोत्पत्ति।—

वासुकि कर्षतस्तस्य तन्मुखज्वालया द्रुता।
वसा गन्धकगन्धाढ्या सर्वतो नि सृता तनोः॥ १९॥

ग्रन्थान्तरोक्त चातुर्विध्यमाह, चतुर्द्धेति।—अन्यत्राप्युक्त—"स च रक्तपीतश्वेत-कृष्णत्वात् चतुर्विध। तत्र पोत औषधेषु श्वेत. चर्मरोगेषु बाह्यप्रयोगेषु च व्यवहार्य्य। चतुर्द्धा गन्धक प्रोक्त रक्त पीत सितोऽसित। रक्तो हेमक्रियासूक्तः पीतश्वेतौ रसायने॥ व्रणादिलेपने श्वेत कृष्ण श्रेष्ठ सुदुर्लभ॥" इति॥ १४—१६॥

गन्धकस्य गुणमाह, गन्धाश्मेति।—गौरीपुष्पभव पार्वतीरज सम्भव। सत्यात्मक. सती पार्वती आत्मा यस्य तादृश, पार्वतीसमुद्भूत, तद्रज समुत्पन्नत्वात। "सत्त्वात्मक" इति पाठस्तु साधीयान्, सत्त्वात्मक सत्त्वगुणस्वरूप सत्त्वगुणवर्द्धक इति तात्पर्य्यम। सूतजित रसस्य बन्धने मारणे च समर्थत्वात् तस्य तथात्वम्। बलिना विरोचन-सुतेन दैत्यराजेन॥ १७।१८॥

बलिवसाख्यसविषगन्धकोत्पत्तिमाह, वासुकिमिति।—श्लोकेऽस्मिन् पूर्वश्लोकोक्त' बलिशब्द. आकर्षणीय.। तस्य बलिराजस्य। तन्मुखज्वालया आकर्षणजनितेन

गन्धकत्वञ्च सम्प्राप्ता गन्धोऽभूत् सविष स्मृत: ।
तस्मात बलिवसेत्युक्तो गन्धकोऽतिमनोहर. ॥ २० ॥

अथ शोधनम् ।—

पय:स्विन्नो घटीमात्रं वारिधौतो हि गन्धक: ।
गव्याज्यविद्रुतो वस्त्राद्गालित: शुद्धिमृच्छति ॥ २१ ॥
एवं संशोधित: सोऽय पाषाणानम्बरे त्यजेत् ।
घृते विषं तुषाकारं स्वयं पिण्डत्वमेव च ॥ २२ ॥
इति शुद्धो हि गन्धाश्मा नापथ्यैर्विकृतिं व्रजेत् ।
अपथ्यादन्यथा हन्यात् पीतं हालाहलं यथा ॥ २३ ॥

मतान्तरद्वयम् ।—

गन्धको द्रावितो भृङ्गरसे क्षिप्तो विशुध्यति ।
तद्रसै: सप्तधा भिन्नो गन्धक: परिशुध्यति ॥ २४ ॥

वासुकिमुखोद्गीर्णसन्तापेन । वसा मांसस्नेह । गन्धकेति ।—बलिना प्राक् सेवनात् तस्य वसाया गन्धकगन्धभूयस्त्वमिति बोद्धव्यम् । गन्धकत्वमिति ।—गन्धकगन्ध-बाहुल्यात वसया एव गन्धक इति आख्या लब्धा । सविष वासुकिमुखज्वालासम्बन्धात् सविषत्वम ॥ १९।२० ॥

शोधनमाह, पय स्विन्न इति ।—पय स्विन्न पयसा दुग्धेन स्विन्न । घटीमात्रं दण्डमात्रम् । पाषाणान् गन्धाश्मनि ये पाषाणभागा विद्यन्ते तान् । अम्बरे गालनार्थं गृहीतवस्त्रे । घृते द्रावणार्थं गृहीताज्ये ॥ २१—२३ ॥

मतान्तरमाह, गन्धक इति ।—भृङ्गरसे भृङ्गराजरसे । क्षिप्त इत्यत्र सकृदिति शेष । सन्तप्तघृतसम्पर्कात् द्रवीकृत गन्धक सकृत भृङ्गरसे निक्षिप्त विशुद्धिमाप्ना-तीत्यर्थ: । विकल्पमाह, तद्रसैरिति ।—तद्रसे भृङ्गस्वरसे । भिन्न क्षुदित चूर्णीकृत इति यावत् । गन्धक चूर्णीकृत्य सप्तवार भृङ्गराजरसैराप्लुत्य सशोष्य च वह्नौ द्रावयित्वा वस्त्रान्तरेण पुनर्भृङ्गरसे निक्षिप्य शोधयेदिति । अथवा—गन्धकचूर्णं वह्नौ द्रवीकृत्य भृङ्गरसे निक्षिपेत, ततश्च तमुद्धृत्य शोषयित्वा पुन सञ्चूर्ण्य च द्रावयित्वा पुनर्भृङ्गरसे क्षिपेत्, एवं सप्तवार कुर्य्यादिति वृद्धव्यवहार. ॥ २४ ॥

मतान्तरम् ।—

स्थाल्यां दुग्धं विनिक्षिप्य मुखे वस्त्रं निबध्य च ।
गन्धकं तत्र निक्षिप्य चूर्णितं सिकताकृतिम् ॥ २५ ॥
छादयेत् पृथुदीर्घेण खर्परेणैव गन्धकम् ।
ज्वालयेत् खर्परस्योर्द्ध्वं वनच्छाणैस्तथोपलैः ॥ २६ ॥
दुग्धे निपतितो गन्धो गलितः परिशुध्यति ।
शतवारं कृतश्चैव निर्गन्धो जायते ध्रुवम् ॥ २७ ॥

अथ प्रयोगविधि ।—

इत्थं विशुद्धस्त्रिफलाऽऽज्यभृङ्ग-
मध्वन्वितः शाणमितो हि लीढः ।
गृध्राक्षितुल्यं कुरुतेऽक्षियुग्मं
करोति रोगोज्झितदीर्घमायुः ॥ २८ ॥

अथ गन्धकतैलविधि ।—

कलांशव्योषसंयुक्तं गन्धकं श्लक्ष्णचूर्णितम् ।
अरत्निमात्रे वस्त्रे तद्विप्रकीर्य्य विवेष्ट्य तत् ॥ २९ ॥
सूत्रेण वेष्टयित्वाऽथ यामं तैले निमज्जयेत् ।
धृत्वा सन्दंशतो वर्त्ति-मध्यं प्रज्वालयेच्च तम् ॥
द्रुतो निपतितो गन्धो विन्दुशः काचभाजने ॥ ३० ॥

मतान्तरमाह, स्थाल्यामिति ।—ज्वालयेदित्यत्र वह्निमिति शेष । वनच्छाणैः वनोपलैः । उपलैः गृहजातशुष्कगोमयपिण्डैः ॥ २५—२७ ॥

प्रयोगविधिमाह, इत्थमिति ।—घृतमधुभृङ्गस्वरसैः त्रिफलाचूर्णेन च सह शाणमितं गन्धकं लिह्यादित्यर्थः ॥ २८ ॥

गन्धकतैलमाह, कलांशेति ।—कलांशव्योषसंयुक्तं गन्धकापेक्षया षोडशभागैक-भागमिलितत्रिकटुचूर्णमिश्रितम् । अरत्निमात्रे प्रसारितकनिष्ठाङ्गुलिबद्धमुष्टिहस्त-प्रमाणे । निपतित इत्यत्र भवेदिति शेष. ॥ २९।३० ॥

अथ प्रयोगविधि ।—

ता द्रुतिं प्रक्षिपेत् पत्रे नागवल्ल्यास्त्रिविन्दुकाम् ।
वल्लेन प्रमितं स्वच्छं सूतेन्द्रञ्च विमर्दयेत् ॥ ३१ ॥
अङ्गुल्याऽथ सपत्रां ता द्रुतिं सूतञ्च भक्षयेत् ।
करोति दीपनं तीव्रं क्षयं पाण्डुञ्च नाशयेत् ॥ ३२ ॥
कासं श्वासञ्च शूलार्त्तिं ग्रहणीमतिदुर्द्धराम् ।
आमं विनाशयत्याशु लघुत्वं प्रकरोति च ॥ ३३ ॥

अथान्यविधप्रयोगविधि ।—

घृताक्ते लोहपात्रे तु विद्रुतं शुद्धगन्धकम् ।
घृताक्तदर्विकाक्षिप्तं द्विनिष्कप्रमितं भजेत् ॥
हन्ति क्षयमुखान् रोगान् कुष्ठरोगं विशेषतः ॥ ३४ ॥

अथ गन्धकसेवने अपथ्यम् ।—

क्षाराम्लतैलसौवीर-विदाहि द्विदलं तथा ।
शुद्धगन्धकसेवाया त्याज्यं योगयुतेन हि ॥ ३५ ॥

गन्धकतैलस्य प्रयोगविधिमाह तामिति ।—ता द्रुतिम उक्तप्रक्रियया द्रुतगन्धकतैलम् । वल्लेन गुञ्जाया द्वयेन त्रयेण वा । सूतेन्द्र मृतपारद, रससिन्दूरमिति यावत । वल्लमित विशुद्धरससिन्दूरमङ्गुल्या विमर्द्य पर्णपत्रस्थितविन्दुत्रयपरिमितगन्धकतैलेन सह भक्षयेत ॥ ३१—३३ ॥

गन्धकस्य प्रयोगान्तरमाह, घृताक्ते इति ।—शुद्धगन्धकरज घृताक्ते लौहकटाहे द्रवीकृत्य घृतम्रक्षितलौहदर्व्या निक्षिपेत, तत तोलकमित तच्चूर्णम् उचितानुपानेन भक्षित यथोक्तरोगान् नाशयदिति ॥ ३४ ॥

गन्धकोपयोगी वर्ज्यान्याह, क्षारेति ।—सौवीरं निस्तुषयवकृत गोधूमकृतं वा काञ्जिक, तथा च भावप्रकाशे—"सौवीरन्तु यवैरामै पक्वैर्वा निस्तुषै कृत । गोधूमैरपि सौवीरमाचार्य्या केचिदुचिरे ॥" इति । विदाहि अम्लपाकि वस्तु यथा वंशकरीरादि, तल्लक्षण भावप्रकाशे—"विदाहि द्रव्यमुद्गारमम्ल कुर्य्यात्तथा तृषाम् । हृदि दाहञ्च जनयेत् पाक गच्छति तच्चिरात् ॥" इति । द्विदल मुद्गादिशमीधान्यम् ॥ ३५ ॥

अथ कुष्ठरोगे गन्धकप्रयोगविधिः।—

गन्धकस्तुल्यमरिचः षड्गुणत्रिफलान्वितः।
घृष्टः शम्पाकमूलेन पीतश्चाखिलकुष्ठहा॥ ३६॥

अथ प्रलेपप्रयोगः।—

तन्मूलसलिले पिष्टं लेपयेत् प्रत्यहं तनौ।
दृष्टप्रत्यययोगोऽयं सर्वत्राप्रतिवीर्य्यवान्॥
श्रीमता सोमदेवेन सम्यगत्र प्रकीर्त्तितः॥ ३७॥

अथ लेपप्रयोगान्तरम्।—

द्विनिष्कप्रमितं गन्धं पिष्ट्वा तैलेन संयुतम्।
अथापामार्गतोयेन सतैलमरिचेन हि॥ ३८॥
विलिप्य सकलं देहं तिष्ठेद्‌घर्मे ततः परम्।
तक्रभक्तञ्च भुञ्जीत तृतीये प्रहरे खलु॥ ३९॥
भजेद्रात्रौ तथा वह्निं समुत्थाय तथा प्रगे।
महिषीच्छगणं लिप्त्वा स्नायाच्छीतेन वारिणा॥ ४०॥
ततोऽभ्यज्य घृतैर्देहं स्नायादिष्टोष्णवारिणा।
अमुना क्रमयोगेन विनश्यत्यतिवेगतः॥
दुर्जया बहुकालीना पामा कण्डूः सुनिश्चितम्॥ ४१॥

कुष्ठरोगे गन्धकप्रयोगविधिमाह, गन्धक इति।—षड्गुणत्रिफलान्वित इति मिलितत्रिफलाया एव षड्भागो ग्राह्यः। शम्पाकमूलेन आरग्वधमूलरसेन॥ ३६॥

लेपप्रयोगमाह, तन्मूलेति।—तन्मूलसलिले शम्पाकमूलरसे। पिष्टमित्यत्र गन्धकमिति शेषः। अप्रतिवीर्य्यवान् प्रभूतशक्तिसम्पन्न इत्यर्थः॥ ३७॥

लेपप्रयोगान्तरमाह, द्विनिष्केति।—तैलेन कटुतैलेन, कुष्ठादिघ्नत्वात्। घर्मे आतपे। प्रगे प्रभाते। महिषीच्छगणं महिषीमलम्। क्रमयोगेन पौर्वापर्य्यानुसारतः पुनः पुनः करणेन। अयमर्थः,—निष्कद्वयं गन्धकचूर्णं कटुतैलेन अपामार्गमूलरसेन तथा कटुतैलमरिचाभ्यां सह पिष्ट्वा तेन सर्वगात्रमभ्यज्य द्वियामं त्रियामं वा आतपे तिष्ठेत्, ततः तृतीयप्रहरे तक्रान्नं भुक्त्वा रात्रौ वह्निसेवनं कुर्य्यात्, ततः प्रभाते माहिषमलं गात्रे

गन्धकस्य प्रयोगाणां शत तत्र प्रकीर्त्तितम् ।
ग्रन्थविस्तरभीतेन सोमदेवेन भूभुजा ॥ ४२ ॥

अथ गन्धकतैलान्तरम ।—

अथवाऽर्क-स्नुहीक्षीरैर्वस्त्रं लेप्यन्तु सप्तधा ।
गन्धकं नवनीतेन पिष्ट्वा वस्त्रं लिपेद्घनम् ॥ ४३ ॥
तद्वर्त्तिं ज्वलितां दंशे धृता कुर्य्यादधोमुखीम् ।
तैल पतेदधोभाण्डे ग्राह्यं योगेषु योजयेत् ॥ ४४ ॥

अथ शुद्धगन्धकगुणा ।—

शुद्धगन्धो हरेद्रोगान् कुष्ठमृत्युजरादिकान् ।
अग्निकारो महानुष्णो वीर्य्यवृद्धिं करोति च ॥ ४५ ॥

[इति गन्धकाधिकारः] ।

अथ गैरिकम् ।—

अथ गैरिकस्य भेद ।—

पाषाणगैरिकञ्चैक द्वितीयं स्वर्णगैरिकम् ॥ ४६ ॥

अथ द्विविधयोस्तयोर्लक्षणम ।—

पाषाणगैरिकं प्रोक्तं कठिनं ताम्रवर्णकम ।
अत्यन्तशोणितं स्निग्ध मसृणं स्वर्णगैरिकम ॥ ४७ ॥

लिप्त्वा शीततोयेन स्नायात, स्नानानन्तर गात्रं प्रमृज्य घृताभ्यक्तः सन् सुखोदकेन पुन स्नान कुर्य्यात. एवं द्विविवारकरणेन दीर्घकालीनपामादयोऽपि अवश्यमेव नश्यन्तीति ॥ ३८—४२ ॥

भिन्नविध गन्धकतैलविधानमाह, अथवेति ।—दशे सन्दंशे । अरत्निमित वस्त्रखण्डं प्राक् अर्कक्षीरं आप्लुत्य आतपे शोषयेत् एव सप्तवार प्रकुर्वीत, तत स्नुहीक्षीरेऽपि तथा कुर्य्यात, अनन्तर शुद्धगन्धकं नवनीतेन पिष्ट्वा तद्वस्त्र तेन गन्धकेन प्रगाढ लिप्त्वा वर्त्तिं विधाय तां सन्दंशेन धृत्वा अधोऽग्नि प्रज्वालयेत्, एवञ्च अध स्थिते भाण्डे निपतितं तैल गृह्णीयादिति ॥ ४३।४४ ॥

शुद्धगन्धकस्य गुणमाह, शुद्धेति ।—सुगमम ॥ ४५ ॥

गैरिकस्य द्वैविध्यमाह, पाषाणेति ।—सुगमम् ॥ ४६ ॥

द्विविधयोस्तयोर्लक्षणमाह, पाषाणगैरिकमिति ।—सुगमम् ॥ ४७ ॥

अथ द्विविधयोस्तयोर्गुणाः।—

स्वादु स्निग्धं हिमं नेत्र्यं कषायं रक्तपित्तनुत्।
हिध्मा-वमि-विषघ्नञ्च रक्तघ्नं स्वर्णगैरिकम्॥
पाषाणगैरिकञ्चान्यत् पूर्वस्मादल्पकं गुणैः॥ ४८॥

अथ शोधनम्।—

गैरिकन्तु गवां दुग्धैर्भावितं शुद्धिमृच्छति॥ ४९॥

अथ गैरिकस्य सत्त्वरूपताकथनम्।—

गैरिकं सत्त्वरूपं हि नन्दिना परिकीर्त्तितम्॥ ५०॥

अथ गैरिकस्य सत्त्वरूपताया मतान्तरम्।—

कैरप्युक्तं पतेत् सत्त्वं चाराम्ल-खिन्नगैरिकात्।
उपतिष्ठति सूतेन्द्रमेकत्वं गुणवत्तरम्॥ ५१॥

[इति गैरिकाधिकारः]।

अथ कासीसम्।—

अथ कासीसस्य भेदः।—

कासीसं वालुकाद्येकं पुष्पपूर्वमथापरम्॥ ५२॥

द्विविधयोस्तयोर्गुणमाह, स्वाद्विति।—नेत्र्यं चक्षुषोर्हितकरम्। रक्तघ्नं रक्तस्तम्भनमित्यर्थः॥ ४८॥

गैरिकस्य शोधनमाह, गैरिकन्त्विति।—भावितमित्यत्र सप्तवारमिति शेषः॥४९॥

गैरिकस्य सत्त्वरूपतामाह, गैरिकमिति।—सत्त्वरूपं स्वभावत एव सारात्मकम्, अस्य कृत्रिमोपायेन सत्त्वसङ्ग्रहणमनावश्यकमिति तात्पर्य्यम्॥ ५०॥

तस्य सत्त्वरूपताया मतान्तरमाह,—कैरिति। चारेति।—चारोदककाञ्जिकाभ्यां दोलायन्त्रे पक्वगैरिकादित्यर्थः। उपतिष्ठतीति।—गैरिकसत्त्वं पारदेन सह ऐक्यं भजते गुणाधिक्यञ्च प्राप्नोति इति॥ ५१॥

कासीसस्य भेदावाह, कासीसमिति।—कासीसं "हिराकस्" इति लोके। वालुकाद्येकं वालुकाकासीसम्। तन्त्रान्तरे तु अस्य धातुकासीसं पांशुकासीसमिति वा संज्ञा, तद्यथा भावप्रकाशे—"कासीसं धातुकासीसं पांशुकासीसमित्यपि" इति। पुष्पपूर्वमिति पुष्पकासीसमित्यर्थः। यद्यप्येतस्य लिङ्गं न स्फुटमुक्तं, तथाऽपि निबन्धान्तरदर्शनात् तत् ज्ञातव्यं, तद्यथा रत्नमालायाम्—"कासीसं द्विविधं धातुपुष्पभेदात्, धातुकासीसं हरितं लोहितञ्च, अन्यत् शुक्लं कृष्णञ्च" इति। अन्यत्राप्युक्तं—"पुष्प-

अथ बालुकाकासीसगुणाः ।—

क्षाराम्लागुरुधूमाभं सोष्णवीर्य्यं विषापहम् ।
बालुकापूर्व-कासीसं श्वित्रघ्नं केशरञ्जनम् ॥ ५३ ॥

अथ पुष्पकासीसगुणाः ।—

पुष्पादिकासीसमतिप्रशस्तं सोष्णं कषायाम्लमतीव नेत्र्यम् ।
विषानिलश्लेष्मगदव्रणघ्नं श्वित्रक्षयघ्नं कचरञ्जनञ्च ॥ ५४ ॥

अथ शोधनम् ।—

सकृद्भृङ्गाम्बुना क्लिन्नं कासीसं निर्मलं भवेत् ॥ ५५ ॥

अथ सत्त्वपातनविधिः ।—

तुवरीसत्त्ववत् सत्त्वमेतस्यापि समाहरेत् ॥ ५६ ॥

अथ शोधनान्तरम् ।—

कासीसं शुद्धिमाप्नोति पित्तैश्च रजसा स्त्रियाः ॥ ५७ ॥

अथ प्रयोगविधिः ।—

बलिना हतकासीसं क्रान्तं कासीसमारितम् ।
उभयं समभागं हि त्रिफलावेल्लसंयुतम् ॥ ५८ ॥

कासीसं किञ्चित् पीतं, भस्मवत् मृत्तिकाभं धातुकासीसम्” इति । भैषज्यरत्नावल्यां शोथाधिकारोक्तमहाद्रावकाख्यौषधे तु कासीसं बालुकासीसं पुष्पकासीसभेदेनास्य त्रैविध्यमुक्तम् ॥ ५२ ॥

बालुकाकासीसस्य गुणमाह, क्षारेति ।—केशरञ्जनं केशस्य कृष्णीकरणम् ॥ ५३ ॥

पुष्पकासीसस्य गुणमाह, पुष्पादीति ।—कचरञ्जनं केशरञ्जनम् ॥ ५४ ॥

शोधनमाह, सकृदिति ।—सकृत् एकवारम् । क्लिन्नम् आर्द्रं, भृङ्गराजरसे दिनमेकं निमग्नमिति यावत् । ‘क्लिन्नम्” इत्यत्र “स्विन्नम्” इति पाठे—स्विन्नं दोलायन्त्रे पक्वम् , अयमेव पाठः प्रचारी ॥ ५५ ॥

सत्त्वपातनमाह, तुवरीति ।—वक्ष्यमाणसौराष्ट्रमृत्तिकासत्त्वपातविधिनेत्यर्थः ॥ ५६ ॥

शोधनान्तरमाह, कासीसमिति ।—पित्तैः पञ्चपित्तैः, तानि च वराहच्छागमहिषमत्स्यमयूरजानि इति । रजसा आर्त्तवशोणितेन, पञ्चपित्तैः आर्त्तवेन च पृथक् पृथक् मर्दनेन शुद्धिमाप्नोति इत्यर्थः ॥ ५७ ॥

कासीसस्य प्रयोगविधिमाह, बलिनेति ।—बलिना गन्धकेन हतकासीसं भस्मीकृतकासीसम् । क्रान्तं वैक्रान्तम् । वेल्लं विडङ्गम् ।

विषमांश-घृतक्षौद्रप्लुत शाणमित प्रगे।
सेवितं हन्ति वेगेन श्वित्रं पाण्डुक्षयामयम्॥ ५९॥
गुल्मप्लीहगदं शूल मूलरोगं विशेषतः।
रसायनविधानेन सेवित वत्सरावधि॥ ६०॥
आमसंशोषणं श्रेष्ठ मन्दाग्निपरिदीपनम्।
पलित वलिभिः सार्द्ध विनाशयति निश्चितम्॥ ६१॥

[इति कासीसाधिकारः]।

अथ तुवरी।—

अथ तुवर्य्याः परिचय।—

सौराष्ट्राश्मनि सम्भूता मृत्स्ना सा तुवरी मता।
वस्त्रेषु लिप्यते याऽसौ मञ्जिष्ठारागबन्धिनी॥ ६२॥

अथ तुवर्य्याः भेदकथनम्।—

फटकी फुल्लिका चेति द्वितीया परिकीर्त्तिता॥ ६३॥

विषमेति।—अतुल्यघृतमधुमर्द्दितमित्यर्थ। प्रगे प्रभाते। रसायनविधानेन संशोधनानन्तर कुटीप्रवेशादिविधिना इत्यर्थ। पलित केशशौक्ल्यम्। वलि जरागमनजनितचर्म्मलोलता। शुद्धकासीस समानगन्धकेन यावता पुटेन म्रियेत तावत् पुटन कुर्य्यात, शुद्धवैक्रान्तमपि शुद्धसमपरिमितकासीसेन सह तथा पुटेत, तत त्रिफलाविडङ्गचूर्णसमन्वित तदुभय मिलित्वा शाणमानम असमपरिमितघृतमधुभ्या सम्मर्द्य लिह्यात, तेन च श्वित्रादिक नश्यति। रसायनविधिना संवत्सर यावत् सेवेत चेत् बालपलितादिका नश्यति इति। अस्य पर्वी यथा—काशीश र ४ वैक्रान्त र ४ त्रिफला प्र र ११ घृत मा ६ मधु मा १० सर्वमालोड्य लेह्यम्॥ ५८—६१॥

तुवर्य्याः परिचयमाह, सौराष्ट्रेति।—सौराष्ट्राश्मनि सौराष्ट्रदेशीयपर्वते। मृत्स्ना मृत्तिका। तुवरी सौराष्ट्रमृत्तिका गोपीचन्दनमिति यावत, तदभावे पङ्कपर्प्पटी स्फटिकारी वा ग्राह्या। मञ्जिष्ठेति।—मञ्जिष्ठाया राग रक्तमान बध्नाति संयोगेन दृढीकरोतीत्यर्थ या सा मञ्जिष्ठारागबन्धिनी॥ ६२॥

तस्या द्वैविध्यमाह, फटकीति।—फटकीत्यत्र आद्या इत्यध्याहार्य्यम्॥ ६३॥

अथ फटक्या गुणलक्षणे ।—

ईषत्पीता गुरुः स्निग्धा पीतिका विषनाशिनी ।
व्रणकुष्ठहरा सर्वकुष्ठघ्नी च विशेषतः ॥ ६४ ॥

अथ फुल्लिकाया गुणलक्षणे ।—

निर्भारा शुभ्रवर्णा च स्निग्धा साम्लाऽपरा मता ।
सा फुल्लतुवरी प्रोक्ता लेपात्ताम्रं चरेदयः ॥ ६५ ॥

अथ द्विविधस्य तस्य सामान्यगुणाः ।—

काङ्क्षी कषाया कटुकाम्लकण्ठ्या
केश्या व्रणघ्नी विषनाशिनी च ।
श्वित्रापहा नेत्रहिता त्रिदोष-
शान्तिप्रदा पारदजारणी च ॥ ६६ ॥

अथ शोधनम् ।—

तुवरी काञ्जिके क्षिप्ता त्रिदिनाच्छुद्धिमृच्छति ॥ ६७ ॥

अथ सत्त्वपातनम् ।—

क्षाराम्लैर्मर्दिता ध्माता सत्त्वं मुञ्चति निश्चितम् ॥ ६८ ॥

तत्र आद्यायाः लक्षणं गुणांश्चाह, ईषदिति ।—पीतिका इति फटक्या नामान्तरम् ॥ ६४ ॥

द्वितीयायाः फुल्लिकायाः लक्षणं गुणांश्चाह, निर्भारेति ।—निर्भारा लघ्वीत्यर्थः । अपरा फुल्लिका, स्फटिकारिकेत्यर्थः, फुल्लतुवरीति तस्या नामान्तरम् । लेपादिति ।—फुल्लतुवरीलेपेन ताम्रं लौहाग्रमुत्सृजति ताम्रे यत् लौहाग्रं विद्यते स निर्गच्छतीत्यर्थः, ताम्रं लौहवत् काठिन्यं गच्छतीत्यर्थो वा ॥ ६५ ॥

तुवर्य्या गुणानाह, काङ्क्षीति ।—काङ्क्षी सौराष्ट्रमृत्तिका ॥ ६६ ॥

शोधनमाह, तुवरीति ।—दिनत्रयं यावत् काञ्जिकेनाप्लुता सौराष्ट्री शुद्धिमायातीति ॥ ६७ ॥

सत्त्वपातनमाह, क्षारेति ।—क्षाराम्लैः यवक्षारकाञ्जिकाद्यम्लैः । ध्माता सन्तप्ता, भस्त्राग्निनेति शेषः ॥ ६८ ॥

मतान्तरम् ।—

गोपित्तेन शत वारान् सौराष्ट्रीं भावयेत्तत ।
घर्षित्वा पातयेत् सत्त्व क्रामणञ्चातिगुह्यकम् ॥ ६९ ॥

[इति तुवर्य्यधिकार.] ।

अथ तालक ।—

अथ तालकस्य भेदनिर्देश ।—

हरितालं द्विधा प्रोक्त पत्राद्य पिण्डसंज्ञकम् ॥ ७० ॥

अथ पत्रतालकलक्षणम ।—

स्वर्णवर्णं गुरु स्निग्धं तनुपत्रञ्च भासुरम् ।
तत् पत्रतालकं प्रोक्त बहुपत्रं रसायनम् ॥ ७१ ॥

अथ पिण्डतालकलक्षणम् ।—

निष्पत्र पिण्डसदृश स्वल्पसत्त्व तथा गुरु ।
स्त्रीपुष्पहरणं तत्तु गुणाल्प पिण्डतालकम् ॥ ७२ ॥

अथ गुणा ।—

श्लेष्मरक्तविषवातभूतनुत् केवलञ्च खलु पुष्पहृत् स्त्रियाः ।
स्निग्धमुष्णकटुकञ्च दीपन कुष्ठहारि हरितालमुच्यते ॥ ७३॥

मतान्तरमाह, गोपित्तेनेति ।—तत भावनानन्तरम् । क्रामणस्य अतिगोप्यत्व-माह, क्रामणमिति ।—क्रामण रसोपरसाना बन्धनार्थं स्वेदनमर्दनाद्यैकोनविंशति-कर्मणा सप्तदशकर्मविशेष, अतीव गोपनीयत्वात् तदस्मिन् सङ्ग्रहे नोक्तमिति तात्पर्य्यम् ॥ ६९ ॥

हरितालस्य द्वैविध्यमाह, हरितालमिति ।—पत्राद्य पत्रपूर्वक हरिताल वशपत्र-हरितालमिति यावत । पिण्डसञ्ज्ञकमित्यत्र द्वितीयमिति शेष, पिण्डहरिताल-मित्यर्थ ॥ ७० ॥

पत्रहरितालस्य लक्षणमाह, स्वर्णवर्णमिति ।—तनुपत्र सूक्ष्मपत्रम् । भासुर दीप्तिमत् । बहुपत्र बहुपटलसमन्वितम् ॥ ७१ ॥

पिण्डहरितालस्य लक्षणमाह, निष्पत्रमिति ।—निष्पत्र पटलरहितम् । स्वल्पसत्त्वं स्वल्पसारम् । स्त्रीपुष्पहरण रजोनाशकम् । गुणाल्पमिति पत्रतालापेक्षयेत्यर्थ. ॥ ७२ ॥

गुणमाह, श्लेष्मरक्तेति ।—सुगमम् ॥ ७३ ॥

अथ शोधनम् ।—

स्विन्नं कुष्माण्डतोये वा तिलक्षारजलेऽपि वा ।
तोये वा चूर्णसंयुक्ते दोलायन्त्रेण शुध्यति ॥ ७४ ॥

अथाशुद्धस्य दोषनिर्देशः ।—

अशुद्धं तालमायुर्घ्नं कफमारुतमेहकृत् ।
तापस्फोटाङ्गसङ्कोचं कुरुते तेन शोधयेत् ॥ ७५ ॥

मतान्तरे शोधनम् ।—

तालकं कणशः कृत्वा दशांशेन च टङ्कणम् ।
जम्बीरोत्थद्रवैः क्षाल्य काञ्जिकैः क्षालयेत्ततः ॥ ७६ ॥
वस्त्रे चतुर्गुणे बद्ध्वा दोलायन्त्रे दिनं पचेत् ।
सचूर्णनाऽऽरनालेन दिनं कुष्माण्डजे रसे ॥
स्वेद्यं वा शाल्मलीतोयैस्तालकं शुद्धिमाप्नुयात् ॥ ७७ ॥

मतान्तरे शोधनं मारणञ्च ।—

मधुतुल्ये घनीभूते कषाये ब्रह्म-मूलजे ।
त्रिवारं तालकं भाव्यं पिष्ट्वा मूत्रेऽथ माहिषे ॥ ७८ ॥
उपलैर्दशभिर्देयं पुटं रुद्ध्वाऽथ पेषयेत् ।
एवं द्वादशधा पाच्यं शुद्धं योगेषु योजयेत् ॥ ७९ ॥

शोधनमाह, स्विन्नमिति ।—तिलक्षारजलं तिलनालं दग्ध्वा तत् क्षारं षड्गुणतोये एकविंशतिवारं विस्राव्य ग्राह्यमिति ॥ ७४ ॥

अशुद्धस्य दोषमाह, अशुद्धमिति ।—सुगमम् ॥ ७५ ॥

मतान्तरे शोधनमाह, तालकमिति ।—हरितालं खण्डशः कृत्वा तदपेक्ष्य दशमांशटङ्कणेन सह मेलयित्वा जम्बीरद्रवे सप्तधा काञ्जिकेऽपि सप्तधा प्रक्षाल्य चतुष्पटलवस्त्रखण्डे बद्ध्वा दिनमेकं चूर्णोदकसहितकाञ्जिकेन दोलायन्त्रे पचेत्, ततः कुष्माण्डसलिलेऽपि दिनं पचेत्, अथवा उक्तरीत्या प्रक्षाल्य वस्त्रान्तरितं कृत्वा शाल्मलीमूलरसेन दिनं यावत् दोलायन्त्रे स्वेदयेत् इति । ॥ ७६।७७ ॥

मतान्तरे शोधनं मारणमाह, मधुतुल्ये इति ।—ब्रह्ममूलजे भार्गीमूलकृते

अथ सत्त्वपातनम्।—

कुलित्थक्वाथसौभाग्य-महिष्याज्यमधुप्लुतम्।
स्थाल्यां क्षिप्त्वा पिदध्याच्च मल्लेन छिद्रयोगिना ॥ ८० ॥
सम्यङ्निरुध्य शिखिनं ज्वालयेत् क्रमवर्द्धितम्।
एकप्रहरमात्रं हि रन्ध्रमाच्छाद्य गोमयैः ॥ ८१ ॥
यामान्ते छिद्रमुद्घाट्य दृष्टे धूमे च पाण्डुरे।
शीता स्थालीं समुत्तार्य्य सत्त्वमुत्कृष्य चाऽऽहरेत् ॥ ८२ ॥
सर्वपाषाणसत्त्वानां प्रकाराः सन्ति कोटिशः।
ग्रन्थविस्तरभीत्याऽत्र लिखिता न मया खलु ॥ ८३ ॥

मतान्तरम्।—

पलालकं रवेर्दुग्धैर्दिनमेकं विमर्दयेत्।
क्षिप्त्वा षोडशिकातैले मिश्रयित्वा ततः पचेत् ॥ ८४ ॥

पलाशमूलक्वाथे वा। मधुरसेन भार्गीक्वाथेन पलाशक्वाथेन वा हरितालं वारत्रय भावयित्वा माहिषमूत्रे सम्पिष्य मूषायां रुद्ध्वा दशवनोपलै पुटेत, स्वाङ्गशीतञ्च तत आकृष्य पुन माहिषमूत्रेण पेषयेत पुटेच्च, एव द्वादशधा कार्य्यं, तेन शुद्ध मृतञ्च तालम् औषधेषु प्रयुञ्जीत इति ॥ ७८।७९ ॥

सत्त्वग्रहणमाह, कुलित्थेति।—सौभाग्य टङ्कणम्। महिष्याज्य महिषीघृतम्। पिदध्यात् आच्छादयेत। मल्लेन शरावपुटेन। अयमर्थ,— ताल कुलत्थक्वाथादिभिराप्लुत्य हण्डिकाभ्यन्तरे निधाय मध्यच्छिद्रेण शरावेण आच्छाद्य सन्धिनिरोधं कृत्वा आर्द्र गोमये शरावमध्यच्छिद्र पिधाय आ-याम क्रमवृद्धाग्निना पचेत, प्रहरेऽतीते शराव-च्छिद्रमुद्घाट्य यदि तस्मात पाण्डुवर्णं धूम निर्गच्छति इति पश्येत तदा वह्निमयमन कुर्य्यात्, तत स्वाङ्गशीत यन्त्रमवतार्य्य शरावमुन्मुच्य स्थालीमध्यस्थ सत्त्वमाकृष्य गृह्णीयादिति ॥ ८०—८३ ॥

मतान्तरमाह, पलालकमिति।—पलालकं पलञ्च तत् आलकञ्चेति विग्रहे पलमान हरितालम्। रवेर्दुग्धै अर्कक्षीरै। षोडशिकातैले पलपरिमित-तिलतैले। यद्यपि कर्षपर्य्यायस्य षोडशिकाशब्दस्य पलार्थे प्रयोगो न सङ्गच्छते, तथाऽपि पलमिते हरिताले कर्षमिततैलस्य अत्यल्पत्वेन मिश्रणानुपयोगित्वात

अनावृतप्रदेशे च सप्त-यामावधि ध्रुवम् ।
स्वाङ्गशीतमधःस्थञ्च सत्त्व श्वेत समाहरेत् ॥ ८५ ॥

मतान्तरम् ।—

छागलस्याथ बालेन बलिना च समन्वितम् ।
तालक दिवसद्वन्द्व मर्दयित्वाऽतियत्नतः ॥ ८६ ॥
युक्तं द्रावणवर्गेण काचकूप्यां विनिक्षिपेत् ।
त्रिधा ताञ्च मृदा लिप्त्वा परिशोष्य खरातपे ॥ ८७ ॥
तत खर्परकच्छिद्रे तामर्द्धाञ्चैव कूपिकाम् ।
प्रवेश्य ज्वालयेदग्नि द्वादशप्रहरावधि ॥
कूपि-कण्ठस्थितं शीत शुद्धं सत्त्वं समाहरेत् ॥ ८८ ॥

मतान्तरम ।—

पलार्द्धप्रमित ताल बद्ध्वा वस्त्रे सिते दृढे ।
बलिनाऽऽलिप्य यत्नेन त्रिवार परिशोष्य च ॥ ८९ ॥
द्राविते त्रिपले ताम्रे क्षिपेत्तालकपोटलीम् ।

पाकानुपपत्त्या च षोडशी पलेति षोडशिका इति व्युत्पत्त्या पलपर्य्यायकस्य षोडशी-शब्दस्यैवात्र ग्रहणमाचार्य्याभिमततया प्रतिभाति । केचित्तु कर्षार्थक एवात्र षोडशिकाशब्द इति वदन्ति ॥ ८४।८५ ॥

मतान्तरमाह, छागलस्येति ।—छागलस्य बालेन छागपुच्छरोम्णा । बलिना गन्धकेन । दिवसद्वन्द्व दिनद्वयम । द्रावणवर्गेण—"गुडगुग्गुलुगुञ्जाज्य सारघे-टङ्कणान्विते" इति वक्ष्यमाणगणेन । ता कूपिकामित्यर्थ । अयमथ,—शुद्धताल छाग-पुच्छलोमगन्धकाभ्या दिवसद्वयमवहित सम्मर्द्य गुडादिद्रावणवर्गेण अनुरूपेण सह काचकूप्यन्तर्निवेशयेत तत मृद्वस्त्रेण वारत्रय कूपिका ता लिप्त्वा चण्डातपे सशोष्य अधश्छिद्रहण्डिकामध्ये कूपिकाया अर्द्धांशम् अर्द्धांशञ्च बहि यथा तिष्ठेत तथा सस्थाप्य द्वादशप्रहर यावत् वह्निज्वाला दद्यात्, शीते कूपिकाया कण्ठलग्न शुद्ध सत्त्व गृह्णीयादिति ॥ ८६—८८ ॥

मतान्तरमाह, पलेति ।—कर्षद्वय ताल दृढनिर्मलाम्बरे बद्ध्वा वस्त्रोपरि वारत्रय पिष्टगन्धकं सलिप्य शोषयित्वा च गलितताम्रे पलत्रयमिते पोट्टली ता क्षिपेत्

भस्मना छादयेच्छीघ्रं ताम्रेणाऽऽवेष्टितं सितम् ॥
मृदुलं सत्त्वमादद्यात् प्रोक्तं रसरसायने ॥ ९० ॥

[इति तालकाधिकारः]।

अथ मनःशिला।—

अथ मनःशिलाया भेदाः।—

मनःशिला त्रिधा प्रोक्ता श्यामाङ्गी कणवीरका।
खण्डाख्या चेति तद्रूपं विविच्य परिकथ्यते ॥ ९१ ॥

अथ त्रिविधानां लक्षणानि।—

श्यामा रक्ता सगौरा च भाराऽऽढ्या श्यामिका मता।
तेजस्विनी च निर्गौरा ताम्राभा कणवीरका ॥ ९२ ॥
चूर्णीभूताऽतिरक्ताङ्गी सभारा खण्डपूर्विका।
उत्तरोत्तरतः श्रेष्ठा भूरिसत्त्वा प्रकीर्त्तिता ॥ ९३ ॥

अथ गुणाः।—

मनःशिला सर्वरसायनाग्र्या तिक्ता कटूष्णा कफवातहन्त्री।
सत्त्वात्मिका भूतविषाग्निमान्द्य-कण्डूतिकासक्षयहारिणी च
॥ ९४ ॥

शीघ्रं भस्मना छादयेच्च, किञ्चित्कालातीते ताम्रगर्भस्थं मृदु शुभ्रं सत्त्वं गृहीत्वा कार्य्येषु योजयेदिति ॥ ८९।९०॥

त्रिधा भिन्नाया मनःशिलाया नामान्याह, मनःशिलेति।—सुगमम् ॥ ९१ ॥

त्रिविधानां तासां लक्षणान्याह, श्यामेति।—सगौरा सपीता, तेन ईषत्पीत-मिश्रितश्यामरक्तवर्णा इत्यर्थः। तेजस्विनी तेजोभूयिष्ठा पित्तवर्द्धिनीत्यर्थः। सभारा अलघ्वीत्यर्थः। उत्तरोत्तरतः परपरतः, प्रथमात् द्वितीया, द्वितीयात् तृतीया इत्यर्थः। भूरिसत्त्वा प्रभूतसारविशिष्टा ॥ ९२।९३ ॥

मनःशिलाया गुणमाह, मनःशिलेति।—सत्त्वात्मिका सत्त्वगुणमयी, पित्तस्य सत्त्वगुणसदृशकार्य्यत्वात् सत्त्वात्मिका शब्देन पित्तस्वरूपा पित्तगुणा इत्यर्थः, इति व्यज्यते। सत्त्वात्मिका साररूपिणीत्यर्थो वा ॥ ९४ ॥

अथ अशुद्धशुद्धशिलयोर्दोषगुणौ ।—

अश्मरीं मूत्रकृच्छ्रञ्च अशुद्धा कुरुते शिला ।
मन्दाग्निं मलबन्धञ्च शुद्धा सर्वरुजापहा ॥ ९५ ॥

अथ शोधनम् ।—

अगस्त्यपत्रतोयेन भाविता सप्तवारकम् ।
शृङ्गवेररसैर्वाऽपि विशुध्यति मनःशिला ॥ ९६ ॥

अथ प्रकारान्तरशोधनम् ।—

जयन्तीभृङ्गराजोत्थ-रक्तागस्त्यरसे शिलाम् ।
दोलायन्त्रे पचेत् याम याम छागोत्थमूत्रकैः ॥
क्षालयेदारनालेन सर्वरोगेषु योजयेत् ॥ ९७ ॥

अथ सत्त्वपातनम् ।—

अष्टमांशेन किट्टेन गुडगुग्गुलुसर्पिषा ।
कोष्ठ्यां रुद्ध्वा दृढं ध्माता सत्त्वं मुञ्चेन्मनःशिला ॥ ९८ ॥

अशुद्धशुद्धयोर्दोषगुणावाह, अश्मरीमिति ।—शिला मनःशिला ॥ ९५ ॥

द्विविधशोधनमाह, अगस्त्येति ।—अगस्त्यपत्रतोयेन वकपुष्पपत्रस्वरसेन, यद्यप्यत्र अगस्त्यस्य विशेषो नोक्तः, तथाऽपि अग्रे रक्तपुष्पवकग्रहणदर्शनादिहापि रक्तवकस्यैव ग्रहणं युक्तम् । भाविता सम्यक् मर्दनयोग्येन द्रवेण सस्कृता । भावनाया द्रवदान-विधिर्यथा तोडनानन्दे— "द्रवेण यावता सम्यगेकीभूयार्द्रता व्रजेत् । द्रवप्रमाणं निर्दिष्टं भिषग्भिर्भावनाविधौ ॥" इति । भावनाविधिर्यथा शार्ङ्गधरे—"दिवा दिवातपे शुष्कं रात्रौ रात्रौ निवासयेत् । शुष्कं चूर्णीकृतं द्रव्यं सप्ताहं भावनाविधिः ॥" इति । शृङ्गवेररसैः आर्द्रकस्वरसैः, अत्रापि सप्तवारं भाविता इति योज्यम् ॥ ९६ ॥

मतान्तरमाह, जयन्तीति ।—जयन्ती स्वनामप्रसिद्धा । रक्तागस्त्यरसे रक्तपुष्पवक-पत्रस्वरसे, जयन्त्यादिद्रव्यत्रयाणां मिलितरसे यामं, यामञ्च छागमूत्रके दोलायन्त्रे पक्त्वा पश्चात् काञ्जिकेन प्रक्षाल्य गृह्णीयादिति ॥ ९७ ॥

सत्त्वाहरणमाह, अष्टमांशेनेति ।—अष्टमांशेन किट्टादिसर्पिरन्तानां प्रत्येकं मनः-शिलापेक्षया अष्टमभागेन, अथवा किट्टस्यैव अष्टमो भागः गुडादिकञ्च यथायोग्यं देयम् । किट्टेन मण्डूरेण । कोष्ठ्यां कोष्ठिकायन्त्रे । ध्माता सन्तप्ता ॥ ९८ ॥

मतान्तरम् ।—

भूनाग-धौत सौभाग्य-मदनैश्च विमर्दितैः ।
कारवल्लीदलाम्भोभिर्मूषा कृत्वाऽत्र निक्षिपेत् ॥ ९९ ॥
शिलां चाराम्लनिष्पिष्टां प्रधमेत्तदनन्तरम् ।
कोकिलाद्वयमात्रं हि ध्मानात् मत्त्वं त्यजत्यसौ ॥ १०० ॥
[इति मनःशिलाधिकारः] ।

अथाञ्जनानि ।—

अथाञ्जनानां भेदनिर्देशः ।—

सौवीरमञ्जनं प्रोक्तं रसाञ्जनमतः परम् ।
स्रोतोऽञ्जनं तदन्यच्च पुष्पाञ्जनकमेव च ॥
नीलाञ्जनञ्च तेषां हि स्वरूपमिह वर्ण्यते ॥ १०१ ॥

अथ सौवीराञ्जनगुणाः ।—

सौवीरमञ्जनं धूम्रं रक्तपित्तहरं हिमम् ।
विषहिध्माक्षिरोगघ्नं व्रणशोधनरोपणम् ॥ १०२ ॥

मतान्तरमाह, भूनागेति ।—भूनागः सीसकम् । धौतं नीलकासीसम् । "धौतम्" इत्यत्र "सत्त्वम्" इति पाठे—भूनागसत्त्वं सीसकसारम् । मदनः स्वनामख्यातवृक्षविशेषः तस्य फलं ग्राह्यम् । कारवल्ली "क्षुद्रकरेला" इति प्रसिद्धा, तस्याः दलाम्भोभिः पत्रस्वरसैः । कोकिलेति ।—कोकिलया वादराङ्गाराग्निना द्वयमात्रं वारद्वयम् । भूनागादिकं कारवल्लीपत्ररसेन मर्दयित्वा तेनैव मूषां विधाय चाराम्लाभ्यां मनःशिलां पिष्ट्वा तत्र सरुध्य वादराङ्गाराग्निना वारद्वयं प्रधमेदिति ॥ ९९।१०० ॥

अञ्जनस्य भेदानाह, सौवीरमिति ।—सौवीरः सुवीरानाम्नी काचिन्नदी तत्र भवमिति अञ्जनविशेषणम् । तल्लक्षणं यथा चक्रसङ्ग्रहे—"वल्मीकशिखराकारं भङ्गे नीलोत्पलद्युति । सौवीराञ्जनमित्याहुरायुर्वेदविदो जनाः ॥" इति । स्रोतोऽञ्जनम् अञ्जनविशेषः, "कृष्णसुर्मा" इति प्रसिद्धम्, एतदेव श्रेष्ठम्, यदुक्तं भावप्रकाशे —"स्रोतोऽञ्जनगुणाः सर्वे सौवीरेऽपि मता बुधैः । किन्तु द्वयोरञ्जनयोः श्रेष्ठं स्रोतोऽञ्जनं स्मृतम् ॥" इति । तल्लक्षणं यथा राजनिघण्टौ,—वल्मीकशिखराकारं भिन्ननीलाञ्जनप्रभम् । घृष्टे च गैरिकावर्णं श्रेष्ठं स्रोतोऽञ्जनञ्च तत् ॥" इति । पुष्पाञ्जनकं कृत्रिमाञ्जनविशेषः । नीलाञ्जनं स्रोतोऽञ्जनभेदः ॥ १०१ ॥

अथ रसाञ्जनगुणाः ।—

रसाञ्जनञ्च पीताभं विषवक्त्रगदापहम् ।
श्वासहिध्मापहं वर्ण्यं वातपित्तास्रनाशनम् ॥ १०३ ॥

अथ स्रोतोऽञ्जनगुणाः ।—

स्रोतोऽञ्जनं हिमं स्निग्धं कषायं स्वादु लेखनम् ।
नेत्र्यं हिध्माविषच्छर्दि-कफपित्तास्ररोगनुत् ॥ १०४ ॥

अथ पुष्पाञ्जनगुणाः ।—

पुष्पाञ्जनं सितं स्निग्धं हिमं सर्वाक्षिरोगनुत् ।
अतिदुर्धरहिध्माघ्नं विषज्वरगदापहम् ॥ १०५ ॥

अथ नीलाञ्जनगुणाः ।—

नीलाञ्जनं गुरु स्निग्धं नेत्र्यं दोषत्रयापहम् ।
रसायनं सुवर्णघ्नं लोहमार्दवकारकम् ॥ १०६ ॥

अथ शोधनम् ।—

अञ्जनानि विशुध्यन्ति भृङ्गराज-निजद्रवैः ॥ १०७ ॥

अथ सत्त्वग्रहणम् ।—

मनोह्वा-सत्त्ववत् सत्त्वमञ्जनानां समाहरेत् ॥ १०८ ॥

तत्र सौवीराञ्जनस्य गुणानाह, सौवीरमिति ।—धूम्रं धूम्रवर्णमित्यर्थः । हिध्मा हिक्का । व्रणेति ।—व्रणानां शोधनं दोषनाशनं, रोपणं क्षतपूरणम् ॥ १०२ ॥

रसाञ्जनगुणमाह, रसाञ्जनमिति ।—वातपित्तास्रनाशनं वातरक्तनाशनं रक्तपित्त-नाशनञ्च ॥ १०३ ॥

स्रोतोऽञ्जनगुणमाह, स्रोतोऽञ्जनमिति ।—लेखनं—"धातून् मलान् वा देहस्य विशोष्योल्लेखयेच्च यत् । लेखनं तत् यथा क्षौद्रं नीरमुष्णं वचा यवाः ॥" इत्युक्तलक्षणकम् ॥ १०४ ॥

पुष्पाञ्जनगुणमाह, पुष्पाञ्जनमिति ।—सितं शुभ्रवर्णम् ॥ १०५ ॥

नीलाञ्जनगुणमाह, नीलाञ्जनमिति ।—सुवर्णघ्नं स्वर्णमारकम् । लोहमार्दव-कारकम् एकत्र मर्दनेन पुटनेन वा लौहानां मृदुत्वसम्पादकम् ॥ १०६ ॥

शोधनमाह, अञ्जनानीति ।—भृङ्गराजनिजद्रवैः भृङ्गराजस्वरसैः ॥ १०७ ॥

सत्त्वपातनमाह, मनोह्वेति ।—मनःशिलातः सत्त्वग्रहणविधिना अञ्जनेभ्योऽपि सत्त्वं गृह्णीयादिति ॥ १०८ ॥

अथ स्रोतोऽञ्जनलक्षणम्।—

वल्मीकशिखराकारं भङ्गे नीलोत्पलद्युति।
घृष्टन्तु गैरिकच्छायं स्रोतोजं लक्षयेत् बुधः॥ १०९॥

अथाञ्जनेन रसबन्धनोपाय।—

गोशकृद्रस-मूत्रेषु घृत-क्षौद्र-वसासु च।
भावितं बहुशस्तच्च शीघ्रं बध्नाति सूतकम्॥ ११०॥

अथ रसाञ्जनस्य विशेषशोधनम्।—

सूर्य्यावर्त्तादियोगेन शुद्धिमेति रसाञ्जनम्॥ १११॥

अथ स्रोतोऽञ्जनात् सत्त्वग्रहणम्।—

राजावर्त्तकवत् सत्त्वं ग्राह्यं स्रोतोऽञ्जनादपि॥ ११२॥

[इत्यञ्जनाधिकारः]।

अथ कङ्कुष्ठम्।—

अथ कङ्कुष्ठस्योत्पत्तिस्थानं भेदश्च।—

हिमवत्पादशिखरे कङ्कुष्ठमुपजायते।
तत्रैकं नालिकाख्यं हि तदन्यद्रेणुकं मतम्॥ ११३॥

स्रोतोऽञ्जनस्य लक्षणमाह, वल्मीकेति।—वल्मीकशिखराकारं वल्मीकवत् उन्नतावनतबहुशिखरविशिष्टम्। घृष्टमिति।—शिलाखण्डे घृष्टे सति गैरिकवत् लोहिताभं परिदृश्यते। अत्र चतुर्णामपरेषां लक्षणं नोक्तं यत् केवलस्रोतोऽञ्जनस्यैव लक्षणमुक्तं तत् स्रोतोऽञ्जनस्य प्रशस्तताप्रतिपादनार्थम्॥ १०९॥

तस्य रसबन्धकत्वमाह, गोशकृदिति।—तत् स्रोतोऽञ्जनम्। गोमयरसेन गोमूत्रेण घृतेन क्षौद्रेण वसया च प्रत्येकश्च सप्तवारान् भावितं स्रोतोऽञ्जनं रसबन्धनाय अलं भवतीति॥ ११०॥

रसाञ्जनस्य विशेषशोधनमाह, सूर्य्यावर्त्तादीति।—सूर्य्यावर्त्तं सुवर्चला "हुडहुडिया" इति प्रसिद्धं। अत्र आदिपदेन "सूर्य्यावर्त्तकस्कदली वन्ध्या कोषातकी च सुरदाली। शिग्रुश्च वज्रकन्दो नीरकणा काकमाची च॥" इत्यनेन वक्ष्यमाणः सूर्य्यावर्त्तादिगणः बोध्यः॥१११॥

स्रोतोऽञ्जनात् सत्त्वग्रहणप्रकारमतिदेशेनाह, राजावर्त्तकवदिति।—राजावर्त्तकम् उपरत्नविशेषः "रेवटी" इति नाम्ना पश्चिमदेशे प्रसिद्धम्। वक्ष्यमाणराजावर्त्तकसत्त्वपातनविधिना अस्यापि सत्त्वं ग्राह्यम् इति॥ ११२॥

अथ कङ्कुष्ठद्वयलक्षणम्।—

पीतप्रभं गुरु स्निग्धं श्रेष्ठं कङ्कुष्ठमादिमम्।
श्यामपीतं लघु त्यक्त-सत्त्वं नेष्टं हि रेणुकम्॥ ११४॥

अथ कङ्कुष्ठस्योत्पत्तौ मतान्तरद्वय लक्षणञ्च।—

केचिद्वदन्ति कङ्कुष्ठं सद्योजातस्य दन्तिनः।
वर्चश्च श्यामपीताभं रेचनं परिकथ्यते॥ ११५॥
कतिचित्तेजिवाहानां बालं कङ्कुष्ठसंज्ञकम्।
वदन्ति श्वेतपीताभं तदतीव विरेचनम्॥ ११६॥

अथ नालिकाकङ्कुष्ठस्य प्रयोगविषय
रेणुकाकङ्कुष्ठस्य अप्रशस्तता च।—

रसे रसायने श्रेष्ठं निःसत्त्वं बहुवैकृतम्॥ ११७॥

अथ गुणाः।—

कङ्कुष्ठं तिक्तकटुकं वीर्य्योष्णञ्चातिरेचनम्।
व्रणोदावर्त्तशूलार्त्ति-गुल्मप्लीहगुदार्त्तिनुत्॥ ११८॥

कङ्कुष्ठस्योत्पत्तिस्थान भेदञ्चाह, हिमवदिति।—कङ्कुष्ठं "घुषिम्" इति प्रसिद्धम्। ग्रन्थान्तरे तु रक्तकालम अण्डकञ्चेति भेदद्वयमस्य निर्दिष्टं, तत्तु प्रागेव प्रदर्शितम्॥११३॥

तयोर्लक्षणमाह, पीतेति।—आदिमं नालिकाह्वम्। त्यक्तसत्त्वं निःसारम्। नेष्टं नाभिमतं, न ग्राह्यमित्यर्थः॥ ११४॥

केषाञ्चिन्मते कङ्कुष्ठस्य स्वरूपलक्षणमाह, केचिदिति।—वर्चः पुरीषम्। तेजिवाहानां तेजस्विनामश्वानां, "सर्वे सान्तास्त्वदन्ताः" इति नियमात् अदन्त-तेज-शब्दादिन्-प्रत्ययेन तेजीति पदं सिद्धम्, बालं पुच्छलोम इत्यर्थः। "बालम्" इत्यत्र "नालम्" इति पाठे—नालं मेढ्रम्॥ ११५।११६॥

नालिकाया प्रयोगविषयं रेणुकाया अप्रयोज्यताञ्चाह, रसे इति।—श्रेष्ठं नालिकाख्यकङ्कुष्ठमित्यर्थः, प्राक् तस्यैव श्रेष्ठत्वेनोक्तत्वात, रसे रसायने, योज्यमिति शेषः। निःसत्त्वं रेणुकाख्यकङ्कुष्ठं, तस्य त्यक्तसत्त्वत्वेनोक्तत्वात, बहुवैकृतं बहुविकारजनकम्। "श्रेष्ठम्" इत्यत्र "नेष्टम्" इति पाठे—कङ्कुष्ठसंज्ञकं तेजिवाहानां बालं निःसत्त्वं बहुवैकृतम् अत एव रसे रसायने नेष्टमिति पूर्वश्लोकेन अन्वयो बोध्यः॥ ११७॥

कङ्कुष्ठस्य गुणमाह, कङ्कुष्ठमिति।—गुदार्त्तिः अर्शः॥ ११८॥

अथ रसोपरसाना सामान्यत शोधन सत्त्वपातनञ्च ।—

सूर्य्यावर्त्तक-कदली वन्ध्या कोशातकी च सुरदाली ।
शिग्रुश्च वज्रकन्दो नीर कणा काकमाची च ॥११९ ॥
आसामेकरसेन तु लवणक्षाराम्लभाविता बहुशः ।
शुध्यन्ति रसोपरसा ध्माता मुञ्चन्ति सत्त्वानि ॥ १२० ॥

अथ कङ्कुष्ठशोधनम् ।—

कङ्कुष्ठ शुद्धिमायाति त्रिधा शुण्ठ्यम्बुभावितम् ॥ १२१ ॥

अथ कङ्कुष्ठस्य सत्त्वरूपताया कथनम् ।—

सत्त्वाकर्षोऽस्य न प्रोक्तो यस्मात् सत्त्वमयं हि तत् ॥ १२२ ॥

अथास्य विरेचनार्थप्रयोगे मात्रादिनिर्देश । —

भजेदेनं विरेकार्थं ग्राहिभिर्यवमात्रया ।
नाशयेदामपूर्त्तिञ्च विरेच्य क्षणमात्रतः ॥ १२३ ॥

रसोपरसाना सामान्यत शोधन सत्त्वपातनञ्चाह सूर्य्यावर्त्तकेति ।—सूर्य्यावर्त्तक सुवर्चला "हुडहुडिया" इति प्रसिद्ध । वन्ध्या वन्ध्याकर्कोटकी "तित्काँक्रोल" इति ख्याता । कोशातकी घोषक "घोषालता" इति भाषा । सुरदाली हस्तिघोषक "पीतघोषा" इति भाषा । वज्रकन्द वन्यशूरण । नीरं बालकम् । "नीरकणा" इति समस्तपाठे तु—जलपिप्पली "काँच्डा" इति ख्याता । रसोपरसादिक सूर्य्यावर्त्तादीनामेकतमरसेन सैन्धवयवक्षारकाञ्जिकैश्च सह सप्तवार भावयित्वा शोधयेत, ततो भस्त्रया ध्मात्वा सत्त्व गृह्णीयात् इति ॥ ११९।१२० ॥

कङ्कुष्ठस्य शोधनमाह, कङ्कुष्ठमिति ।—त्रिधा शुण्ठ्यम्बुभावित शुण्ठीक्वाथेन वारत्रय भावितम् ॥ १२१ ॥

अस्य सत्त्वस्वरूपतामाह, सत्त्वेति ।—सुगमम् ॥ १२२ ॥

विरेकार्थम् अस्य प्रयोगविधिमाह, भजेदिति ।—ग्राहिभि मलरोधकै, शुण्ठी-जीरकादिभिरिति यावत् , ग्राहिलक्षण यथा भावप्रकाशे —"दीपन पाचन यत स्यादुष्णत्वात द्रवशोषकम् । ग्राहि तच्च यथा शुण्ठी जीरक गजपिप्पली ॥" इति । आमपूर्त्तिम् आमेन पूरण, देहस्येति शेष । "आमजार्त्तिम्" इति पाठे—आमजन्य-विकारमित्यर्थ । विरेचनार्थं शुण्ठीजीरकादिभि, ग्राहिभेषजै सह यवमात कङ्कुष्ठ

अथास्य अविधिप्रयोगे दोष ।—

भक्षितं सह ताम्बूलैर्विरेच्यासून् विनाशयेत् ॥ १२४ ॥

अथ विषनाशार्थं कङ्कुष्ठप्रयोगविधिः ।—

वर्बुरीमूलिकाक्वाथै-र्जीरसौभाग्यकं समम् ।
कङ्कुष्ठं विषनाशाय भूयो भूयः पिबेन्नरः ॥ १२५ ॥

[इति कङ्कुष्ठाधिकारः] ।

इत्युपरसाः ।

अथ साधारणरसाः ।—

अथ साधारणरसानां नामानि ।—

कम्पिल्लश्चपलो गौरी-पाषाणो नवसारकः ।
कपर्दो वह्निजारश्च गिरिसिन्दूर-हिङ्गुलौ ॥ १२६ ॥
मृद्दारशृङ्गमित्यष्टौ साधारणरसाः स्मृता ।
रससिद्धिकरा प्रोक्ता नागार्जुनपुरःसरैः ॥ १२७

प्रयुञ्जीत, तेन अचिरमेव विरेको भवेत आमपूर्त्तिश्च नश्येत। ग्राहिभेषजे सह प्रयोगविधिश्च अतिविरेचननिवारणार्थं ज्ञेयम् ॥ १२३ ॥

अविधिप्रयोगे दोषमाह, भक्षितमिति ।—ताम्बूलै पर्णपत्रै, तस्य सरगुणविशिष्टत्वात । विरेच्य इत्यत्र अति इति पदमूहनीयम, अतिशयेन रेचयित्वा इत्यर्थ ॥१२४॥

विषनाशनार्थं कङ्कुष्ठप्रयोगमाह, वर्बुरीति ।—वर्बुरी वब्बोल "वाव्ला" इति भाषा, "वावुइतुलसी" इति ख्याता वनतुलसी वा । मूलिका चोरिका "चोरइ" इति प्रसिद्धा । सम समपरिमितम । वर्बुरीमूलिकाक्वाथै सह तुल्यमान जीरकटङ्गणकङ्कुष्ठ विषनाशाय पुन पुन प्रत्यह वा पिबेत इति । "कङ्कुष्ठ विषनाशाय" इत्यत्र "कङ्कुष्ठ-विषनाशाय" इति पाठे—अशुद्धकङ्कुष्ठभक्षणजनितविषदोषनाशाय अविधिना कङ्कुष्ठभक्षणजनितविषक्रियानिवारणार्थं वा समपरिमितजीरकटङ्कण युक्त्या वर्बुरी-मूलिकाक्वाथेन पिबेत इति ॥ १२५ ॥

उपरसानां शोधनादिनिर्देशानन्तर साधारणरसानामपि तेषु वक्तव्येषु आदौ तेषां नामान्याह, कम्पिल्ल इति ।—कम्पिल्ल' गुण्डारोचनी "कमलागुंडी इति लोके । चपलः यशद "दस्ता" इति भाषा। "कम्पिल्लश्चपल" इत्यत्र "कम्पिल्लश्च

अथ कम्पिल्लः।—

अथ कम्पिल्लस्य स्वरूपलक्षणमुत्पत्तिस्थानञ्च।—

इष्टिकाचूर्णसङ्काशश्चन्द्रिकाऽऽढ्योऽतिरेचनः।
सौराष्ट्रदेशे चोत्पन्नः स हि कम्पिल्लकः स्मृतः॥ १२८॥

अथ गुणाः।—

पित्तव्रणाध्मानविबन्धनिघ्नः श्लेष्मोदरार्त्तिक्रिमिगुल्मवैरी।
मूलामशोफज्वरशूलहारी कम्पिल्लको रेच्यगदापहारी
॥ १२९॥

[इति कम्पिल्लाधिकारः]।

घर" इति पाठः साधीयान्। गौरीपाषाणः शुक्लपाषाणः, "फुलखडि" इति लोके। नवसारकः "निशादल" इति भाषा, "नरसार" इत्येव नाम सर्वत्र दृश्यते। कपर्दः वराटिका। वह्निजारः स्वनामख्यातः पश्चिमसागरसम्भूत औषधविशेषः। गिरिसिन्दूरः रक्तवर्णः पार्वतीयरसविशेषः। हिङ्गुलः प्रसिद्धः। मृद्दारशृङ्गः सीसकसमुत्पन्नः पार्वतीयधातुविशेषः। अत्र कम्पिल्लादि मृद्दारशृङ्गमित्यन्तानां साधारणरसानां नवसङ्ख्यावत्त्वं सम्पद्यते, परन्तु सङ्ख्याकथनावसरे "इत्यष्टौ" इति विरुद्धोक्तिः कथं सङ्गच्छते? इति चेत् उच्यते—सङ्ग्रहकारः प्राक् महारसमध्ये चपलं पठित्वाऽपि पुनः साधारणरसे यदस्य ग्रहणं कृतवान्, तत्र प्राचां मतद्वैधप्रदर्शनमेव हेतुः, निबन्धकारस्य स्वमतन्तु महारसत्वेन तत्त तत्रैव समर्थितम्। सत्यपि मतभेदे श्रुतिद्वैधवत् उभयमपि प्रमाणं, यथा चरकमते महाकुष्ठे पठितस्य सिध्मस्य सुश्रुते क्षुद्रकुष्ठेषु, किञ्च महाकुष्ठे पठितस्य सौश्रुतदद्रुणः चरके क्षुद्रकुष्ठेष्वन्तर्भावः। अत एव शोधनादिकथनावसरे आचार्य्येणास्य पुनः ग्रहणं न कृतम्, एवञ्च चपलपरित्यागादष्टत्वमबाध्याहृतमेव इति॥ १२६।१२७॥

कम्पिल्लस्य लक्षणमुत्पत्तिस्थानञ्च ह, इष्टिकेति।—चन्द्रिकाढ्यः चाकचक्यविशिष्टः, सचन्द्राभवत् उज्ज्वलकणाबहुल इत्यर्थः॥ १२८॥

तस्य गुणमाह, पित्तेति।—मूलामेत्यत्र मूलशब्देन मूलगतरोगः ग्राह्यः, तेन शिरोरोगनाशन इत्यर्थः। रेच्येति।—रेच्यः विरेचनार्हः यः गदः रोगः तम् अपहरति नाशयतीति तादृशः विरेचनोपक्रमणीयरोगनाशनः इत्यर्थः॥ १२९॥

अथ गौरीपाषाण: ।—

अथ गौरीपाषाणस्य पर्य्यायौ भेदश्च ।—

गौरीपाषाणक' पीतो विकटो हतचूर्णक: ।
स्फटिकाभश्च शङ्खाभो हरिद्राभस्त्रय: स्मृता: ॥
पूर्वं. पूर्वो गुणै: श्रेष्ठ:—" ॥ १३० ॥

अथ शोधनम् ।—

"—कारवल्लीफले क्षिपेत् ।
स्वेदयेद्दण्डिकामध्ये शुद्धो भवति मूषक: ॥ १३१ ॥

अथ सत्त्वग्रहणम् ।—

तालवद्ग्राहयेत् सत्त्वं शुद्धं शुभ्र प्रयोजयेत् ॥ १३२ ॥

अथ गुणा ।—

रसबन्धकर' स्निग्धो दोषघ्नो रसवीर्य्यकृत् ॥ १३३ ॥

[इति गौरीपाषाणाधिकार:]

अथ नवसार. ।—

अथ नवसारस्योत्पत्ति पर्य्यायश्च ।—

करीर-पीलुकाष्ठेषु पच्यमानेषु चोद्भव: ।
क्षारोऽसौ नवसार. स्याच्चूलिकालवणाभिध: ॥ १३४ ॥

गौरीपाषाणस्य पर्य्यायान् वर्णभेदेन त्रैविध्यञ्चाह, गौरीति ।—पीत विकट-हतचूर्णका इति इमे त्रय पर्य्याया । पूर्वं इति ।—पूर्वं पूर्वं हरिद्राभगौरी-पाषाणात शङ्खाभ शङ्खाभपाषाणात स्फटिकाभ श्रेष्ठ. ॥ १३० ॥

तस्य शोधनमाह, कारवल्लीति ।—कारवल्लीफले कारवल्लीफलरसे. कारवल्ली "छुद्र-करैला" इति भाषा। स्विदयेत्, दोलायन्त्रे इति शेष । मूषक गौरीपाषाण ॥१३१॥

सत्त्वग्रहणमाह, तालवदिति ।—हरितालात् सत्त्वग्रहणविधिना इत्यर्थ ॥१३२॥

गुणमाह, रसेति ।—रसवीर्य्यकृत्, संयोगेन इति शेष ॥ १३३ ॥

नवसारस्य उत्पत्ति पर्य्यायञ्चाह, करीरेति ।—करीर' वंशाङ्कुर मरुजद्रुम-विशेषो वा । पीलु औत्तरापथिकफलविशेष. "आखरोट्" इति लोके । चूलिका-लवणमिति पर्य्याय' ॥ १३४ ॥

उत्पत्तौ मतान्तरम्।—

इष्टिकादहने जातं पाण्डुरं लवणं लघु।
तदुक्तं नवसाराख्यं चूलिकालवणञ्च तत्॥ १३५॥

अथ गुणाः।—

रसेन्द्रजारणं लोहद्रावणं जठराग्निकृत्।
गुल्मप्लीहास्यशोषघ्नं भुक्तमांसादिजारणम्॥
विडाख्यञ्च त्रिदोषघ्नं चूलिकालवणं मतम्॥ १३६॥

[इति नवसाराधिकारः]।

अथ वराटिका।—

अथ वराटिकालक्षणम्।—

पीताभा ग्रन्थिका पृष्ठे दीर्घवृत्ता वराटिका।
रसवैद्यैर्विनिर्दिष्टा सा चराचरसंज्ञिका॥ १३७॥

अथ उत्तमादिभेदेन तस्या त्रैविध्यनिर्देशः।—

सार्द्धनिष्कभरा श्रेष्ठा निष्कभारा च मध्यमा।
पादोन-निष्कभारा च कनिष्ठा परिकीर्त्तिता॥ १३८॥

उत्पत्तौ मतान्तरमाह इष्टिकेति।—इष्टिकादहने इष्टकदहनकाले इष्टकदहन स्थाने वा। ग्रन्थान्तरे अस्य उत्पत्तिरन्यविधा दर्शिता, यथा—"औष्ट्रं वा माहिषं गव्यं पुरीषं भस्मतां गतम्। क्षारपाकविधानेन नृसारसिद्धिरुच्यते॥" इति। यतोऽत्रास्य शुद्धिर्नोक्ता अत ग्रन्थान्तरदर्शनात् सा ज्ञातव्या, तद्यथा—"नरसारो भवेत् शुद्ध चूर्णतोये विपाचित। दोलायन्त्रेण यत्नेन भिषग्भिर्योगसिद्धये॥" इति अपि च॥१३५॥

अथास्य गुणमाह, रसेन्द्रेति।—विडाख्यं रसादीनां स्वर्णादिग्रसनार्थम् औषध-विशेष, विड तदाख्यं, विड्साध्यकर्मणि प्रयोज्यमिति॥ १३६॥

वराटिकायाः लक्षणमाह, पीताभेति।—पृष्ठे ग्रन्थिका ग्रन्थिविशिष्टा। दीर्घवृत्ता किञ्चित गोलाकृतिर्दीर्घाकारा, "दीर्घवृत्ता" इत्यत्र "दीर्घवृन्ता" इति पाठान्तरे—अग्रभागे वृन्तवत् दीर्घा इत्यर्थो ज्ञेय। सेति।—सा तथाभूता वराटिका चराचरेति नाम्ना ख्याता॥ १३७॥

उत्तममध्यमाधमभेदेन तस्याः त्रैविध्य विवृणोति, सार्द्धेति।—सार्द्धनिष्कभरा

अथ गुणाः ।—

परिणामादिशूलघ्नी ग्रहणी क्षयनाशिनी ।
कटूष्णा दीपनी वृष्या नेत्र्या वातकफापहा ॥
रसेन्द्रजारणे प्रोक्ता विडद्रव्येषु शस्यते ॥ १३९ ॥

अथ वराटस्य लक्षणगुणौ ।—

तदन्ये तु वराटाः स्युर्गुरवः श्लेष्मपित्तलाः ॥ १४० ॥

अथ शोधनम् ।—

वराटाः काञ्जिके स्विन्ना यामाच्छुद्धिमवाप्नुयुः ॥ १४१ ॥

[इति वराटिकाधिकारः] ।

अथ अग्निजारः ।—

अथाग्निजारस्य स्वरूपलक्षणम् ।—

समुद्रेणाग्निनक्रस्य जरायुर्बहिरुज्झितः ।
संशुष्को भानुतापेन सोऽग्निजार इति स्मृतः ॥ १४२ ॥

अर्धमाषकपरिमिता । पादोननिष्कभारा निष्कचतुर्थांशहीना, माषत्रयपरिमाणा इत्यर्थः ॥ १३८ ॥

तस्या गुणानाह, परिणामादीति ।—परिणामादि इत्यत्र आदिपदेन अन्नद्रवयकृत्प्लीहादीनां ग्रहणम् । विडद्रव्येषु रसादीनां स्वर्णादिग्रासशक्तिसञ्जननार्थम् औषधद्रव्येषु ॥ १३९ ॥

वराटस्य आतिदेशिकलक्षणं गुणञ्चाह, तदिति ।—प्रोक्तवराटिकालक्षणविपरीता वराटा ज्ञेया इति ॥ १४० ॥

शोधनमाह, वराटा इति ।—स्विन्ना इत्यत्र दोलायामिति बोध्यम् ॥ १४१ ॥

अग्निजारस्य स्वरूपपरिचयमाह, समुद्रेणेति ।—अग्निनक्रस्य न क्रामति दूरस्थलम् इति नक्रः जलजन्तुभेदः, तथा च वाचस्पत्ये—“नक्रः जलजन्तुभेदे मकरादौ च” इति । अत्र आदिपदेन शिशुमारवडवादयो बोध्या, तेषामपि दूरस्थानभूमिगमनादिशक्तिराहित्यात् । अग्निविशिष्टः नक्रः तस्य समुद्रस्थाग्निवक्त्रजलजन्तुभेदस्य, वडवाया इत्यर्थः, यद्वा—नक्रः नासिका, नक्रशब्दस्य नासिकार्थकत्वेऽपि सामीप्यादत्र मुखे उपचारः, तेनापि अग्निनक्रशब्देन अग्निमुखी वडवा एव बोध्या । जरायु गर्भाशयः, गर्भावरकचर्म इति यावत् । बहिः समुद्रात् बहिः तटे इत्यर्थः । अन्यत्रापि

अथ गुणाः।—

अग्निजारस्त्रिदोषघ्नो धनुर्वातादिवातनुत्।
वर्द्धनो रसवीर्य्यस्य दीपनो जारणस्तथा ॥ १४३ ॥

तस्य स्वभावतः शुद्धत्वनिर्देशः।—

यदब्धिक्षारसंशुद्धः तस्मात् शुद्धिर्न हीष्यते ॥१४४॥

[इत्यग्निजाराधिकारः]।

अथ गिरिसिन्दूरम्।—

अथ गिरिसिन्दूरस्य स्वरूपलक्षणम्।—

महागिरिषु चाल्पीयः-पाषाणान्तःस्थितो रसः।
शुष्कः शोणः स निर्दिष्टो गिरिसिन्दूरसंज्ञया ॥ १४५ ॥

अथ गुणाः।—

त्रिदोषशमनं भेदि रसबन्धनमग्रिमम्।
देहलोहकरं नेत्र्यं गिरिसिन्दूरमीरितम् ॥ १४६ ॥

[इति गिरिसिन्दूराधिकारः]।

अथ हिङ्गुलः।—

अथ हिङ्गुलस्य द्वैविध्यम्।—

हिङ्गुलः शुकतुण्डाख्यो हंसपाकस्तथाऽपरः ॥ १४७ ॥

एतस्य लक्षणमुक्तं, तद्यथा—"जाराभो दहनस्पर्शी पिच्छिलः सागरे भवः। जरायुः स चतुर्वर्णः तेषु श्रेष्ठः सलोहितः ॥" इति। (जाराभः जारयति असौ जीर्य्यते अनेन वा इति निरुक्त्या जारः अग्निः तदाभः अग्निवत् प्रभावविशिष्ट इत्यर्थः) ॥ १४२ ॥

गुणमाह, अग्निजार इति।—धनुर्वातः धनुस्तम्भः ॥ १४३ ॥

शोधनस्य अप्रयोजनीयतामाह, यदिति।—अब्धेः समुद्रस्य क्षारेण क्षारोदकेन संशुद्धः, समुद्रवारां लवणमयत्वात् ॥ १४४ ॥

गिरिसिन्दूरस्य स्वरूपलक्षणमाह, महेति।—हिमालयादिवृहत्पर्वतान्तर्वर्त्तिक्षुद्रपाषाणद्वयमध्यनिस्तः रक्तवर्णरसविशेषः शुष्कीभूतः गिरिसिन्दूर इति ख्यातः ॥१४५॥

तस्य गुणमाह, त्रिदोषेति।—रसबन्धनमग्रिमं रसबन्धनार्हनिखिलद्रव्येषु श्रेष्ठम् ॥ १४६ ॥

अथ शुकतुण्डाख्यस्य परिचय ।—

प्रथमोऽल्पगुणस्तत्र चर्मारः स निगद्यते ॥ १४८ ॥

अथ हंसपाकस्य लक्षणम् ।—

श्वेतरेखः प्रवालाभो हंसपाकः स ईरितः ॥ १४९ ॥

अथ गुणा ।—

हिङ्गुलः सर्वदोषघ्नो दीपनोऽतिरसायनः ।
सर्वरोगहरो वृष्यो जारणायातिशस्यते ॥ १५० ॥

अथ हिङ्गुलाकृष्टसूतस्य गुणा ।—

एतस्मादाहृतः सूतो जीर्णगन्धसमो गुणैः ॥ १५१ ॥

अथ शोधनम् ।—

सप्तकृत्वाऽऽर्द्रकद्रावै-र्लकुचस्याम्बुनाऽपि वा ।
शोषितो भावयित्वा च निर्दोषो जायते खलु ॥ १५२ ॥

नामभेदेन हिङ्गुलस्य द्वैविध्यमाह, हिङ्गुल इति ।—शुकतुण्डाख्य इत्यत्र आद्य इति शेष ॥ १४७ ॥

शुकतुण्डहिङ्गुलस्य परिचयमाह, प्रथम इति ।—तत्र तयोर्मध्ये प्रथम शुकतुण्डाख्य अल्पगुण हंसपाकाख्यहिङ्गुलापेक्षयेति बोध्यम् । चर्मार इति तस्य नामान्तरम् । यद्वा—तत्र वक्ष्यमाणेषु विविधेषु हिङ्गुलेषु मध्ये प्रथम चर्मार, स अल्पगुण, द्वितीय शुकतुण्डाख्य, अपर हंसपाक इति त्रिविध । तथा च भावप्रकाशे—"दरदस्त्रिविध प्रोक्तश्चमार शुकतुण्डक । हंसपादस्तृतीय स्यात गुणवान् उत्तरोत्तरम ॥ चमार शुक्लवर्ण. स्यात सपीत शुकतुण्डक । जवाकुसुमसङ्काशो हंसपादो महोत्तम ॥" इति । अत्र च प्रतिलोमतन्त्रयुक्तिन्यायेन आदौ द्वितीयतृतीयावुक्त्वा पश्चात प्रथममुक्तवान् ॥ १४८ ॥

हंसपाकस्य प्रवरत्वात् तस्यैव लक्षणमाह, श्वेतरेख इति ।—श्वेतरेख शुभ्रोज्ज्वलरेखाविशिष्ट ॥ १४९ ॥

हंसपाकहिङ्गुलस्य गुणमाह, हिङ्गुल इति ।—जारणायातिशस्यते भस्मीकरणार्थं हंसपाक प्रशस्त ॥ १५० ॥

हिङ्गुलाकृष्टरसस्य गुणमाह, एतस्मादिति ।—जीर्णगन्धसम शोधितगन्धकसदृश , जीर्णशब्देनात्र शोधितो बोध्यः । अथवा—जीर्णगन्धसम गन्धकद्रावसम. , गन्धकद्रुतिरेव गन्धकजारणोच्यते ॥ १५१ ॥

अथ शोधनविशेषेण गुणविशेष।—

किमत्र चित्रं दरदः सुभावितः क्षीरेण मेष्या बहुशोऽम्लवर्गैः।
एवं सुवर्णं बहुघर्मतापितं करोति साक्षाद्वरकुङ्कुमप्रभम्
॥ १५३॥

अथ हिङ्गुलात् सत्त्वाकर्षणविधि।—

दरदः पातनायन्त्रे पातितश्च जलाश्रये।
तत् सत्त्वं सूतसङ्काशं जायते नात्र संशय ॥ १५४ ॥

[इति हिङ्गुलाधिकारः]।

अथ मृद्दारशृङ्गकम्।—

अथ मृद्दारशृङ्गस्य परिचय।—

सदलं पीतवर्णञ्च भवेद्गुर्जरमण्डले।
अर्बुदस्य गिरेः पार्श्वे जातं मृद्दारशृङ्गकम् ॥ १५५ ॥

शोधनमाह सप्तकृत्वेति।—सप्तकृत्व सप्तवारान्, सप्तशब्दात् चकृत्वस् प्रत्ययेन निष्पन्नम, "सर्वे सान्तास्त्वदन्ता" इति नियमात अत्र सप्तकृत्व इति अदन्त सिद्ध। लकुचाम्बुना डहुरसेन ॥ १५२ ॥

शोधनविशेषेण हिङ्गुलस्य गुणविशेषमाह, किमिति।—मेषीदुग्धेन तथा अम्लवर्गेण च सप्तसप्तवारान् भावित हिङ्गुल सेवित प्रखरातपतप्त नर प्रवरकुङ्कुमसदृश शोभनवर्णं करोति, अथवा—उक्तप्रकारशोधितहिङ्गुल स्वयोगेन वह्निना बहुवारमारित सुवर्णं प्रवरकुङ्कुमसदृशं सुवर्णं करोति इति ॥ १५३ ॥

सत्त्वाकर्षणमाह, दरद इति।—पातनायन्त्रे अध पातनायन्त्रे, अध पातनविधिना ऊर्द्ध्वभाण्डोदरे जम्बीरशोधितदरदं लिप्त्वा अधोभाण्डे जल संस्थाप्य ऊर्द्ध्वभाण्डोपरि पुट देय, तेन अध स्थजले पारदसदृश सत्त्वं पतेत् इति। अध पातनयन्त्रलक्षणञ्चाग्रे वक्ष्यति ॥ १५४ ॥

मृद्दारशृङ्गस्य लक्षणमुत्पत्तिस्थानञ्चाह, सदलमिति।—वंशपत्रहरितालवत् पटलविशिष्टम्। मृद्दारशृङ्गस्य पर्य्यायादिक निघण्ट्वादौ अन्यत्र वा कुत्रापि ग्रन्थे न परिदृश्यते, परन्तु अस्मद्देशे यत् "मुद्राशङ्ख" इति नाम्ना प्रसिद्ध, पश्चिमदेशे तत्

अथ गुणा ।—

सीससत्त्वं गुरु श्लेष्म-शमनं पु-गदापहम् ।
रसबन्धनमुत्कृष्टं केशरञ्जनमुत्तमम् ॥ १५६ ॥

[इति मृद्दारशृङ्गाधिकार] ।

अथ साधारणरसाना सामान्यशोधनम ।—

साधारणरसा. सर्वे मातुलुङ्गार्द्रकाम्बुना ।
त्रिरात्रं भाविता शुष्काः भवेयुर्दोषवर्जिताः ॥ १५७ ॥

अथ सत्त्वाना सामान्यशोधनम ।—

यानि कानि च सत्त्वानि तानि शुध्यन्त्यशेषत: ।
ध्मातानि शुद्धिवर्गेण मिलन्ति च परस्परम् ॥ १५८ ॥

इति करवालभैरव ।

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये उपरस-साधारणरसाना शुद्ध्यादिनिरूपणं नाम तृतीयोऽध्याय ॥ ३ ॥

"मुरदारशिङ्" इति नाम्ना तद्वैद्यैरभिधीयते, अतो मन्ये मृद्दारशृङ्गकं मुद्राशङ्ख एव इति ॥ १५५ ॥

तस्य गुणमाह, शीसेति ।—सीससत्त्वमिति मृद्दारशृङ्गस्य नामान्तर, तस्य सीसकसारविशेषत्वात् । पु-गदापहं पुंप्रतिनियतोपदंशादिरोगनाशनम् ॥ १५६ ॥

साधारणरसाना सामान्यशोधनमाह, साधारणेति ।—साधारणरसा कम्पिल्लादय ॥ १५७ ॥

सत्त्वाना सामान्यशोधनमाह, यानीति ।—ध्मातानि शुद्धिवर्गेण "काचटङ्कणशिग्राभि शोधनीयगणो मत." इत्यग्रे वक्ष्यमाणशोधनीयगणेन सह मर्दयित्वा भस्त्राग्निना सन्धुचितानि । मिलन्ति एकीभवन्ति यसन्तीत्यर्थ ॥ १५८ ॥

* करवालभैरव इति कस्यचित् रसतन्त्रकर्त्तु अभिधा ।

इति रसरत्नसमुच्चयबोधिन्या तृतीयोऽध्याय. ॥ ३ ॥

अथ चतुर्थोऽध्यायः ।

अथ रत्नानि ।—

अथ मणयः ।—

अथ मणीनां सामान्यकार्य्यम् ।—

मणयोऽपि च विज्ञेयाः सूतबन्धनकारकाः ॥ १ ॥

अथ मणीनां नामानि ।—

वैक्रान्तः सूर्य्यकान्तश्च हीरकं मौक्तिकं मणिः ।
चन्द्रकान्तस्तथा चैव राजावर्त्तश्च सप्तमः ॥ २ ॥
गरुडोद्गारकश्चैव ज्ञातव्या मणयस्त्वमी ।
पुष्परागो गोमेदश्च पद्मरागः प्रवालकम् ॥ ३ ॥
वैदूर्य्यञ्च तथा नील एते च मणयो मताः ।
यत्नतः सङ्गृहीतव्या रसबन्धस्य कारणात् ॥ ४ ॥

अथ तृतीयाध्याये उपरस-साधारणरसानां शोधनादिनिरूपणानन्तरम् इदानीं रत्नानां नामलक्षणादिकं निरूपयितुं चतुर्थाध्यायमारभते, तत्रादौ रत्नानां सामान्य-कार्य्यमाह, मणय इति ।—मणयः रत्नानि । रत्नशब्दस्य निरुक्तिः राजनिघण्टौ उक्ता यथा—“धनार्थिनो जनाः सर्व्वे रमन्तेऽस्मिन्नतीव यत् । ततो रत्नमिति प्रोक्तं शब्दशास्त्र-विशारदैः ॥” इति । सूतबन्धनकारकत्वं सामान्यकार्य्यम् ॥ १ ॥

मणीनां नामान्याह, वैक्रान्त इति ।—वैक्रान्तादिनीलान्ताः चतुर्दश मणिभेदाः । वैक्रान्तः “चुणिविशेष” इति लोके । सूर्य्यकान्तः स्वनामख्यातः “आतसपाथर” इति लोके, यद्यप्यत्रास्य गुणादिकं नोक्तं तथाऽपि ग्रन्थान्तरदर्शनात् तज्ज्ञातव्यं, यथा राजनिघण्टौ—“सूर्य्यकान्तो भवेदुष्णो निर्म्मलश्च रसायनः । वातश्लेष्महरो मेध्यः पूजनात् रवितुष्टिदः ॥” इति । मणिः स्फटिकोपलः, अस्यापि गुणः यथा राजनिघण्टौ—“पित्तदाहरोगघ्नः रत्नसमवीर्य्यश्च” इति । चन्द्रकान्तः स्वनामख्यातः; अस्यापि गुणः तत्रैव द्रष्टव्यः यथा—“चन्द्रकान्तस्तु शिशिरः स्निग्धः पित्तास्रतापहृत् । शिवप्रीतिकरः स्वच्छः ग्रहालक्ष्मीविनाशकृत् ॥” इति । राजावर्त्तः पश्चिमदेशे “रेवटी” इति नाम्ना ख्यातः । गरुडोद्गारकः मरकतः “पान्ना” इति लोके । पुष्परागः

अथ श्रेष्ठमणीनां नामानि ।—

पद्मरागेन्द्रनीलाख्यौ तथा मरकतोत्तम' ।
पुष्पराग' सवज्राख्य. पञ्च रत्नवरा: स्मृता: ॥ ५ ॥

अथ दुष्टनवग्रहाणां प्रसादकरत्नानि ।—

माणिक्यमुक्ताफलविद्रुमाणि तार्क्ष्यञ्च पुष्पं भिदुरञ्च नीलम् ।
गोमेदकञ्चाथ विदूरकञ्च क्रमेण रत्नानि नवग्रहाणाम् ॥ ६ ॥

अथ अन्यविधानि दुष्टनवग्रहाणां प्रसादकरत्नानि ।—

ग्रहानुमैत्र्या कुरुविन्दपुष्प-प्रवालमुक्ताफलतार्क्ष्यवज्रम् ।
नीलाख्य-गोमेदविदूरकञ्च क्रमेण मुद्राधृतमिष्टसिद्धेः ॥ ७ ॥

अथ रत्नधारणस्य सिद्धिप्रदत्वोक्ति ।—

रसे रसायने दाने धारणे देवतार्चने ।
सुलक्ष्माणि सुजातीनि रत्नान्युक्तानि सिद्धये ॥ ८ ॥

पीतवर्णमणिविशेष "पोख्राज्" इति लोके । गोमेद रक्तवर्णमणिविशेष । पद्मराग, रक्तवर्णमणिविशेष । एतस्यापि गुण यथा राजनिघण्टौ—"माणिक्य मधुर स्निग्ध वातपित्तप्रणाशनम् । रत्नप्रयोगप्रज्ञाना रसायनकर परम् ॥ माणिक्य पद्मराग" इति । वैदूर्य्यं विदूरभूमिजमणिविशेष पाश्चमे "लशुनिया" इति ख्यात, तच्च मेघगर्ज्जनेन अङ्कुरीभवति इति प्रसिद्धि । नील इन्द्रनील "नीला" इति ख्यात ॥ २—४ ॥

श्रेष्ठरत्नाना नामान्याह, पद्मरागेति ।—इन्द्रनील नील । मरकतोत्तम गरुडोद्गारक, गारुत्मत इति यावत् । वज्र हीरकम् ॥ ५ ॥

नवग्रहेषु कुपितेषु यस्य प्रसादनार्थं यानि रत्नानि धार्य्याणि तेषा नामान्याह, माणिक्येति ।—माणिक्य पद्मराग । तार्क्ष्य गरुडोद्गारक, मरकतमिति यावत् । पुष्प पुष्पराग । भिदुर हीरकम् । माणिक्यादीनि विदूरकान्तानि एतानि नव रत्नानि सूर्य्यादिकेत्वन्ताना नवग्रहाणा प्रसादनार्थं क्रमेण धार्य्याणि इत्यर्थ ॥ ६ ॥

नवग्रहप्रसादनार्थं रत्नधारणविषये मतान्तरमाह, ग्रहेति ।—ग्रहानुमैत्र्या ग्रहाणा नवग्रहाणा मैत्री प्रसादम् अनु लक्ष्यीकृत्य इति ग्रहानुमैत्री तया नवग्रहप्रसादनहेतुना इत्यर्थ । कुरुविन्द पद्मराग । क्रमेणेति ।—क्रमेण पौर्वापर्य्यानुसारेण, मुद्रया अङ्गुरीयकेण सह धृत सत् इष्टसिद्धेः अभिलषितफललाभाय, भवतीति शेष ॥ ७ ॥

रत्नाना सिद्धिकारकत्वमाह, रसे इति ।—सुलक्ष्माणि प्रशस्तलक्षणानि

अथ माणिक्यम् ।—

अथ द्विविधमाणिक्यनिर्देश ।—

माणिक्यं पद्मरागाख्य द्वितीय नीलगन्धि च ॥ ९ ॥

अथ प्रशस्तपद्मरागमाणिक्यलक्षणम ।—

कुशेशयदलच्छायं स्वच्छ स्निग्ध महत् स्फुटम् ।
वृत्तायतं समं गात्रं माणिक्य श्रेष्ठमुच्यते ॥ १० ॥

अथ प्रशस्तनीलगन्धिमाणिक्यलक्षणम ।—

नीलं गङ्गाम्बुसम्भूत नीलगर्भारुणच्छवि ।
पूर्वमाणिक्यवच्छ्रेष्ठं माणिक्य नीलगन्धि तत् ॥ ११ ॥

अथ निकृष्टमाणिक्यलक्षणम् ।—

रन्ध्रकार्कश्यमालिन्य-रौक्ष्यावैशद्यसयुतम् ।
चिपिट लघु वक्रञ्च माणिक्य दुष्टमष्टधा ॥ १२ ॥

"सुरत्नाणि" इति पाठे—सु शोभन यथा तथा रत्नाणि उत्तमप्रयत्नेन रक्षणार्हा-णीत्यर्थ । सुजातीनि उत्कृष्टजातीयानि । रसादिविषये सिद्धिलाभाथम उक्तानि उत्कृष्टजातीयरत्नानि सर्वप्रयत्नेन व्यवहर्त्तव्यानि भवन्तीति ॥ ८ ॥

माणिक्यस्य द्वैविध्यमाह, माणिक्यमिति ।—प्रथम पद्मरागनामक द्वितीय नील-गन्धिनामकम् । इदं हि आदित्यस्य प्रसादनार्थं धार्य्यम् इति ग्रहविद ॥ ९ ॥

प्रशस्तपद्मरागमाणिक्यलक्षणमाह कुशेशयेति ।—कुशेशयदलच्छायं पद्म पत्राभम् । स्वच्छ निर्मलम् । स्निग्ध मसृणम् । महत् गुरुभारम् । स्फुट दीप्तिमत । वृत्तायत वर्त्तुल विस्तृतञ्च । सम गात्रम उच्चनीचरहितावयवम्, यद्वा—समं समावयवम्, गात्र स्थूलमित्यर्थ । माणिक्य पद्मरागमाणिक्य तस्यैव प्राथम्येनोक्तत्वात् नीलगन्धिमाणिक्यलक्षणस्य पश्चादुल्लिखितत्वाच्च ॥ १० ॥

नीलगन्धिमाणिक्येषु श्रेष्ठस्य लक्षणमाह नीलमिति ।—नीलमव नीलगन्धि-माणिक्यभेद, न तु इन्द्रनील । नीलगर्भारुणच्छवि अन्तर्नीलाभमरुणवर्णम । पूर्वमाणिक्यवत् प्रथमोक्तपद्मरागमाणिक्यलक्षणवत् स्वच्छस्निग्धादिगुणविशिष्टम् इत्यर्थ ॥ ११ ॥

अपकृष्टमाणिक्यलक्षणमाह, रन्ध्रेति ।—रन्ध्र छिद्रम । अवैशद्यम अनुज्ज्वल-मित्यर्थ । "वैशद्य" इति पाठे—धूलिस्पर्शवदपैच्छिल्य, खरत्वमित्यर्थ, ॥ १२ ॥

अथ माणिक्यस्य गुणाः ।—

माणिक्यं दीपनं वृष्यं कफवातक्षयार्त्तिनुत् ।
भूतवेतालपापघ्नं कर्मजव्याधिनाशनम् ॥ १३ ॥

[इति माणिक्याधिकारः] ।

अथ मौक्तिकम् ।—

अथ प्रशस्तमौक्तिकलक्षणम् ।—

ह्लादि श्वेतं लघु स्निग्धं रश्मिवन्निर्मलं महत् ।
ख्यातं तोयप्रभं वृत्तं मौक्तिकं नवधा शुभम् ॥ १४ ॥

अथ मौक्तिकगुणाः ।—

मुक्ताफलं लघु हिमं मधुरञ्च कान्ति-
दृष्ट्यग्निपुष्टिकरणं विषहारि भेदि ।
वीर्य्यप्रदं जलनिधेर्जनिता च शुक्ति-
र्दीप्ता च पक्तिरुजमाशु हरेदवश्यम् ॥ १५ ॥

गुणमाह, माणिक्यमिति ।—दीपनम् अग्निकारकम् । तल्लक्षणं यथा—"पचेन्नामं वह्निकृत यद्दीपन तत यथा मिषि" इति । भूतेति ।—भूतवेताल्लाद्यावेशनाशन पापनाशनञ्च, तच्च धारणेनेति ज्ञेयम् । कर्मजव्याधिनाशनमपि धारणेन बोध्यम् ॥१३॥

प्रशस्तमौक्तिकलक्षणमाह, ह्लादीति ।—ह्लादि आनन्दजननम् । रश्मिवत् प्रभा-विशिष्टम् अत्युज्ज्वलमिति यावत् । महत स्थूलम् । तोयप्रभ जलाभ, यत्र तिष्ठति तत्र दूरतो जलभ्रमोत्पादकमित्यर्थः, यद्वा—जलवत् तरलच्छाय, लावण्यविशिष्टमिति यावत । लावण्यशब्द जलशब्देन उपचरित कविभि, यथा—"लावण्यलीलाजलम्" इति । नवधा शुभम एतन्नवलक्षणविशिष्ट मौक्तिक प्रशस्तम् । इद चन्द्रप्रसादकम्, मतान्तरे चान्द्रे ॥ १४ ॥

गुणमाह, मुक्ताफलमिति ।—भेदि रेचनम् । मौक्तिकयोनित्वात् मौक्तिकगुण-वर्णनप्रसङ्गेनात्र शुक्तेरपि गुणमाह, जलनिधेरिति ।—जलनिधे जनिता समुद्रभवा, जनिता शब्दोऽत्र जातार्थे प्रयुक्त इति बोध्यम् । दीप्ता दीपनगुणसम्पन्ना, अग्निदीपनी इति यावत् । अथवा—दीप्ता उज्ज्वला । पक्तिरुज परिणामशूलार्त्तिम् । मौक्तिक-योनिशक्तिप्रसङ्गेनात्र अन्येऽपि तद्योनय ग्रन्थान्तरानुसरणात् ज्ञातव्या, तद्यथा—

अथ निकृष्टमौक्तिकलक्षणम्।—

रूक्षाङ्गं निर्जलं श्यावं ताम्राभं लवणोपमम्।
अर्द्धशुभ्रञ्च विकटं ग्रन्थिलं मौक्तिकं त्यजेत्॥ १६॥

अथ मौक्तिकस्य गुणान्तरम्।—

कफपित्तक्षयध्वंसि कासश्वासाग्निमान्द्यनुत्।
पुष्टिदं वृष्यमायुष्यं दाहघ्नं मौक्तिकं मतम्॥ १७॥

[इति मौक्तिकाधिकारः]।

अथ प्रवालम्।—

अथ प्रशस्तप्रवाललक्षणम्।—

पक्वविम्बफलच्छायं वृत्तायतमवक्रकम्।
स्निग्धमव्रणकं स्थूलं प्रवालं सप्तधा शुभम्॥ १८॥

अथ निकृष्टप्रवाललक्षणम्।—

पाण्डुरं धूसरं रूक्षं सव्रणं कोटरान्वितम्।
निर्भारं शुभ्रवर्णञ्च प्रवालं नेष्यतेऽशुभम्॥ १९॥

"शुक्तिः शङ्खो गजः क्रोडः फणी मत्स्यश्च दर्दुरः। वेणुरेते समाख्यातास्तज्ज्ञैर्मौक्तिकयोनयः॥" इति॥ १५॥

वर्जनीयमुक्तालक्षणमाह, रूक्षाङ्गमिति।—निर्जलं निर्जडं, डलयोरैक्यात् अशिशिरमित्यर्थः, उष्णमिति यावत्, यद्वा—विच्छायं, दृश्यते च लावण्ये जलशब्दोपचारः, मुक्ताफलस्य तरलच्छाया एव लावण्यशब्दबोधिका, यदुक्तं,—"मुक्ताफलेषु च्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमिहोच्यते॥" इति। अत्र जलशब्देन मुक्ताफलगततरलच्छाया बोध्या। श्यावं शुक्लानुविद्धकृष्णवर्णम्। लवणोपमं लवणसदृशखरस्पर्शम्। अर्द्धशुभ्रं मत्स्याद्याभमाविलम्। विकटं विषमगात्रम्। ग्रन्थिलं सव्रणं, ग्रन्थिविशिष्टमिति यावत्॥ १६॥

गुणान्तरमाह, कफेति।—दाहघ्नमिति धारणात्॥ १७॥

उत्तमप्रवालस्य लक्षणमाह, पक्वेति।—पक्वविम्बफलच्छायं विम्बफलम् ओष्ठोपमाफलं "तेलाकुचा" "बनकुँदरि" इति च भाषा, पक्वबिम्बफलवत् रक्तवर्णम्। अव्रणकं ग्रन्थ्यादिरहितम्। सप्तधा शुभम् एतत्सप्तविधलक्षणविशिष्टं प्रवालं मङ्गलप्रदम्। रत्नमेतत् भूमिसुतस्य ज्ञेयम्॥ १८॥

अथ प्रवालगुणाः ।—

अथ पित्तास्र-कासघ्नं दीपनं पाचनं लघु ।
विषभूतादिशमनं विद्रुमं नेत्ररोगनुत् ॥ २० ॥

[इति प्रवालाधिकारः] ।

अथ तार्क्ष्यम् ।—

अथ प्रशस्ततार्क्ष्यलक्षणम् ।—

हरिद्वर्णं गुरु स्निग्धं स्फुरद्रश्मिचयं शुभम् ।
मसृणं भासुरं तार्क्ष्यं गात्रं सप्तगुणं मतम् ॥ २१ ॥

अथाप्रशस्ततार्क्ष्यलक्षणम् ।—

कपिलं कर्कशं नीलं पाण्डु कृष्णं मलान्वितम् ।
चिपिटं विकटं रूक्षं लघु तार्क्ष्यं न शस्यते ॥ २२ ॥

अथ तार्क्ष्यगुणाः ।—

ज्वरच्छर्दिविषश्वास-सन्निपाताग्निमान्द्यनुत् ।
दुर्नामपाण्डुशोफघ्नं तार्क्ष्यमोजोविवर्द्धनम् ॥ २३ ॥

[इति तार्क्ष्याधिकारः] ।

कुप्रवाललक्षणमाह, पाण्डुरमिति ।—पाण्डुरं श्वेतपीतमिश्रवर्णम् । धूसरं श्वेतकृष्णमिश्रवर्णम् । कोटरान्वितं सौसङ्गं, सच्छिद्रमिति यावत् । निर्भारं लघु ॥ १९ ॥

गुणमाह, यथेति ।—पाचनम् आमपाचकं किन्तु नाग्निसन्धुक्षणम् , तल्लक्षणं यथा शार्ङ्गधरे—"पचत्यामं न वह्निञ्च कुर्य्यात् यत्तद्धि पाचनम्" इति । विषभूतादिशमनं धारणादिति ज्ञेयम् ॥ २० ॥

प्रशस्ततार्क्ष्यलक्षणमाह, हरिदिति ।—हरिद्वर्णं नीलपीतमिश्रवर्णं, हरितवर्णमिति यावत् । स्फुरद्रश्मिचयं विसारिकिरणसमूहम् । भासुरं प्रभासमन्वितम् । तार्क्ष्यं मरकतं । गात्रं स्थूलम् । एतत्सप्तगुणसंयुक्तं तार्क्ष्यं शुभं ज्ञेयम् । इदं बुधग्रहप्रसादनार्थं धार्य्यं, मतान्तरे सुरगुरोरिति ॥ २१ ॥

दुष्टतार्क्ष्यलक्षणमाह, कपिलमिति ।—कपिलं पिङ्गलवर्णम् । विकटं विकृताङ्गम् ॥ २२ ॥

गुणमाह, ज्वरेति ।—सुगमम् ॥ २३ ॥

अथ पुष्परागः ।—

अथ प्रशस्तपुष्परागलक्षणम् ।—

पुष्परागो गुरुः स्वच्छः स्निग्धः स्थूलः समो मृदुः ।
कर्णिकारप्रसूनाभो मसृणश्च शुभोऽष्टधा ॥ २४ ॥

अथाप्रशस्तपुष्परागलक्षणम् ।—

निष्प्रभं कर्कशं रूक्षं पीतश्याम नतोन्नतम् ।
कपिशं कपिलं पाण्डु पुष्परागं परित्यजेत् ॥ २५ ॥

अथ पुष्परागगुणाः ।—

पुष्परागो विषच्छर्दि-कफवाताग्निमान्द्यनुत् ।
दाहकुष्ठास्रशमनो दीपनः पाचनो लघुः ॥ २६ ॥

[इति पुष्परागाधिकारः] ।

अथ वज्रम् ।—

अथ वज्राणां त्रैविध्यनिर्देशः ।—

वज्रञ्च त्रिविधं प्रोक्तं नरो नारी नपुंसकम् ।
पूर्वं पूर्वमिह श्रेष्ठं रसवीर्य्यविपाकतः ॥ २७ ॥

उत्कृष्टपुष्परागलक्षणमाह, पुष्पराग इति ।—समः समगात्रः । मृदुः सुखस्पर्श इत्यर्थः । कर्णिकारप्रसूनाभः कर्णिकारः कृमारवधः, "छोट सोँदाल" इति भाषा, तस्य पुष्पसदृशवर्णविशिष्टः, पीत इति यावत् । एतदष्टलक्षणसमन्वितः पुष्परागः शुभप्रदः ज्ञेयः । अयं बार्हस्पत्यः, मतान्तरे सौमस्य इति ॥ २४ ॥

वर्जनीयपुष्परागलक्षणमाह, निष्प्रभमिति ।—निष्प्रभं ज्योतिःशून्यं, मलिनमिति यावत् । पीतश्यामं कृष्णपीतमिश्रवर्णम् । नतोन्नतं विषमगात्रम् । कपिशं श्याववर्णम् । कपिलं पिङ्गलवर्णम् ॥ २५ ॥

गुणमाह, पुष्पराग इति ।—सुगमम् ॥ २६ ॥

स्त्रीपुंसादिभेदेन वज्रस्य त्रैविध्यमाह वज्रमिति ।—पूर्वं पूर्वं श्रेष्ठं नपुंसकात् नारी नार्य्या नरः श्रेष्ठः । रसेति ।—रसादिहेतोरित्यर्थः, तत्र रसः द्रव्याणां स्वाभाविकमधुरत्वादिगुणयोगः, वीर्य्यं द्रव्यगता कार्य्यसाधिका स्वाभाविकी शक्तिः, यदुक्तं

अथ पुं-वज्रलक्षणम् ।—

अष्टास्रञ्चाष्टफलकं षट्कोणमतिभासुरम् ।
अम्बुदेन्द्रधनुर्वारितरं पुं-वज्रमुच्यते ॥ २८ ॥

अथ स्त्रीवज्र नपुंसकवज्रलक्षणे ।—

तदेव चिपिटाकारं स्त्रीवज्रं वर्त्तुलायतम् ।
वर्त्तुलं कुण्ठकोणाग्रं किञ्चिद्गुरु नपुंसकम् ॥ २९ ॥

सुश्रुते—"द्रव्याणि येन कुर्वन्ति तद्वीर्य्यम्" इति । (येन गुणेनेत्यर्थ । कुर्वन्ति क्रियामिति शेष) तच्च द्विविध, यदुक्तं भावप्रकाशे—"उष्णशीतगुणोत्कर्षात बुधैर्वीर्य्यं द्विधा स्मृतम । यत सर्वमग्निषोमीय दृश्यते भुवनत्रयम ॥" इति (अग्निषोमीयम् अग्निषोमगुणविशिष्ट, शीतोष्णगुणमित्यर्थ) अन्यत्राप्युक्त—"तत द्विविध चिन्त्याचिन्त्य-क्रियाहेतुत्वेन, तत्र चिन्त्यक्रियाहेतु या द्रव्यरसादीना स्वस्वकर्मणि स्वभावसिद्धा शक्ति, अचिन्त्यक्रियाहेतुश्च प्रभावापरपर्य्याय द्रव्याणा रसाद्यननुरूपकार्य्यकरणशक्ति" इति । अत्र द्रव्यगतचिन्त्यक्रियाहेतुर्या स्वभावसिद्धा शक्ति सैव वीर्य्यशब्दाभिधेया ज्ञेया । विपाक भुक्तद्रव्यपाकानन्तर माधुर्य्यादिपरिणाम , यदुक्तं भावप्रकाशे —"जाठरेणाग्निना योगात यदुदेति रसान्तरम् । रसाना परिणामान्ते स विपाक इति स्मृत ॥" इति । इद दैत्यगुरोरिति ॥ २७ ॥

तेषु पुंजातीयवज्रस्य लक्षणमाह, अष्टास्रमिति ।—अष्टास्रम अष्टकोणम । अष्ट-फलकम् अष्टधारम् अस्त्रादीनामग्रभागवत सूक्ष्माग्रमित्यर्थ । षट्कोण वा । अम्बु-देति ।—अम्बुदे मेघे, इन्द्रधनु इन्द्रधनुरिव "इवाद्यर्थे प्रयुक्त शब्दो वतिमन्तरेणापि वत्यर्थं गमयति" इति नियमात इन्द्रधनु शब्देनात्र इन्द्रधनुरिवेति बोध्यम् , वारिणि जले तरति प्लवते इति तादृश, कृष्णवर्णमेघमण्डले वर्णोज्ज्वलेन्द्रधनु यथा भासते तद्वत कृष्णवर्णजले भास्वत् पुंवज्र तरति इत्यर्थ , अथवा—अम्बुदशब्देनात्र तात्स्थ्यात् लक्षणया तडित बोध्या, तेन तडिदिव इन्द्रधनुरिव च अतिभासुरमिति द्वितीयचरणेन सम्बन्ध , तथा वारितर लघु इत्यर्थ । वज्रस्य लघुता एव प्रशस्ता, यदुक्तं गारुडे —"गुरुता सर्वरत्नाना गौरवाधानकारणम् । वज्रे सा वैपरीत्येन सूरय परिचक्षते ॥" इति । इन्द्रधनुष उद्भवकारण स्वरूपञ्चान्यत्र द्रष्टव्य यथा—"रविकिरणा बहुवर्णा वातेन विलोडिता नभसि । शक्रायुधसस्थाना दृश्यन्ते तत्तु इन्द्रधनु ॥" इति ॥ २८ ॥

स्त्रीनपुंसकयोर्लक्षणे आह, तदेवेति ।—चिपिटाकारम् अथवा वर्त्तुलमायतञ्च

अथ तेषां जातिभेदेनाधिकारिभेदनिर्देशः।—

स्त्री-पुं-नपुंसकं वज्रं योज्यं स्त्री पुं-नपुंसके।
व्यत्यासान्नैव फलदं पुं-वज्रेण विना क्वचित्॥ ३० ॥

अथ तेषां वर्णभेदेनाधिकारिभेदनिर्देशः।—

श्वेतादिवर्णभेदेन तदेकैकं चतुर्विधम्।
ब्रह्म-क्षत्रिय-विट्-शूद्रं स्वस्ववर्ण-फलप्रदम्॥ ३१ ॥
उत्तमोत्तमवर्णं हि नीचवर्णफलप्रदम्।
न्यायोऽयं भैरवेणोक्तः पदार्थेष्वखिलेष्वपि॥ ३२ ॥

अथ वज्रगुणाः।—

आयुष्प्रदं झटिति सद्गुणदञ्च वृष्यं
दोषत्रयप्रशमनं सकलामयघ्नम्।

स्त्रीवज्रं ज्ञेयम्। कुण्ठकोणाग्रं कुण्ठं क्रियासु मन्दं कोणः अग्रञ्च यस्य तत् स्खलितधारमित्यर्थः। किञ्चित् गुरु स्त्रीपुंजात्यपेक्षया इति बोध्यम्॥ २९ ॥

केन कीदृशं व्यवहर्त्तव्यं तदाह, स्त्रीति।—सुगमम्॥ ३० ॥

वर्णभेदेन तेषां प्रत्येकं चातुर्विध्यं तथा यज्जातीयाय यज्जातीयं फलप्रदं तच्चाह, श्वेतेति।—स्त्रीपुंनपुंसकजातीयं वज्रं प्रत्येकं श्वेतरक्तपीतकृष्णवर्णभेदेन यथाक्रमं ब्राह्मणक्षत्रियवैश्यशूद्रवर्णसञ्ज्ञकं चतुर्विधं ज्ञेयम्, तत्र शुभ्रं विप्रवर्णं विप्रवर्णेषु, रक्तं क्षत्रियवर्णं क्षत्रियवर्णेषु, पीतं वैश्यवर्णं वैश्यवर्णेषु कृष्णं शूद्रवर्णं शूद्रेषु गुणकारि, किञ्च ब्राह्मणाद्युत्तमवर्णं वज्रं निम्नवर्णेन पुरुषेण धृतमपि फलदं भवति किन्तु अधमवर्णं नोत्तमवर्णैः धार्य्यम् इति। अत्र वज्रस्य उत्कृष्टापकृष्टलक्षणं वर्णजात्यादिकञ्च विस्तरतोऽनुक्तमपि तन्त्रान्तरदर्शनात् ज्ञातव्यं, तद्यथा—"स्वच्छं विद्युत्प्रभं स्निग्धं सुन्दरं लघु लेखनम्। षडारं तीक्ष्णधारञ्च सुश्यामारं श्रियं दिशेत्॥ भस्माङ्गं काकपादञ्च रेखाक्रान्तन्तु वर्त्तुलम्। अधारं मलिनं विन्दुसन्त्रासं स्फुटितं तथा॥ नीलाभं चिपिटं रूक्षं तद्वज्रं दोषलं त्यजेत्। स तु श्वेतः स्मृतो विप्रो लोहितः क्षत्रियः स्मृतः॥ पीतो वैश्योऽसितः शूद्रश्चतुर्वर्णात्मकश्च सः। रसायने मतो विप्रः सर्वसिद्धिप्रदायकः॥ क्षत्रियो व्याधिविध्वंसी जरामृत्युहरः स्मृतः॥ वैश्यो धनप्रदः प्रोक्तस्तथा देहस्य दार्ढ्यकृत्। शूद्रो नाशयति व्याधीन् वयःस्तम्भं करोति च॥" इति। (अत्र काकपादः काकपादवत् आकृतिविशिष्टः काकपदवद्रेखाङ्कितं वा। स. हीरक.)॥ ३१।३२ ॥

सूतेन्द्रबन्धबधसद्गुणकृत् प्रदीपनं

मृत्युञ्जयं तदमृतोपममेव वज्रम् ॥ ३३ ॥

अथ सर्वरत्नानां साधारणदोषनिर्देशः ।—

ग्रासस्त्रासश्च बिन्दुश्च रेखा च जलगर्भता ।

सर्वरत्नेष्वमी पञ्च दोषाः साधारणा मताः ॥

क्षेत्र-तोयभवा दोषा रत्नेषु न लगन्ति ते ॥ ३४ ॥

अथ वज्रशोधनम् ।—

कुलत्थक्वाथके स्विन्नं कोद्रवक्वथितेन वा ।

एकयामावधि स्विन्नं वज्रं शुध्यति निश्चितम् ॥ ३५ ॥

अथ वज्रमारणम् ।—

वज्रं मत्कुणरक्तेन चतुर्वारं विभावितम् ।

सुगन्धिमूषिकामांसैर्वर्त्तितैः परिवेष्ट्य च ॥ ३६ ॥

पुटेत् पुटैर्वराहाख्यैस्त्रिंशद्वार ततः परम् ।

ध्मात्वा ध्मात्वा शतं वारान् कुलत्थक्वाथके क्षिपेत् ॥

अन्येरुक्तः शतं वारान् कर्त्तव्योऽयं विधिः क्रमात् ॥ ३७ ॥

गुणमाह,—आयुरिति । सूतेति ।—सूतेन्द्रस्य पारदस्य बन्ध बध सद्गुणञ्च करोति इति तत् तथाभूत, रसनिगड रसमारकं तथा रसस्य गुणवर्द्धनञ्चेत्यर्थः । प्रदीपन वह्निसन्दीपनम् ॥ ३३ ॥

वज्रस्य नैसर्गिकदोषानाह, ग्रास इति ।—ग्रासत्रासादयः पञ्च दोषा सर्वरत्नेष्वेव सहजा ज्ञेया, किन्तु तेषाम् आकरजलादिसम्भवत्वात ते रत्नस्य न काऽपि गौरव-हानिरिति ॥ ३४ ॥

वज्रशोधनमाह, कुलत्थेति ।—कोद्रव कोरदूष "कोदो" इति ख्यात धान्य-विशेष । प्रहर यावत कौलत्थे कषाये कोद्रवकषाये वा दोलायन्त्रे संस्विद्य वज्रं शोधयेत इति ॥ ३५ ॥

मारणमाह, वज्रमिति ।—मत्कुण वस्त्राश्रय कीटविशेष "छारपोका" इति ख्यातः । सुगन्धिमूषिका छुछुन्दरी "छुँचा" इति ख्याता । शोधितवज्र मत्कुण-रक्तेन वारचतुष्टय भावयेत्, ततो गन्धमूषिकामांसं सम्पिष्य पिण्डाकार कृत्वा तदन्तः

अथ मारणान्तरम्।—

कुलत्थक्काथसयुक्त-लकुचद्रवपिष्टया।
शिलया लिप्तमूषायां वज्रं क्षिप्त्वा निरुध्य च ॥ ३८ ॥
अष्टवार पुटेत् सम्यग्विशुष्कैश्च वनोत्पलैः।
शतवार ततो ध्मात्वा निक्षिप्त शुद्धपारदे ॥
निश्चित म्रियते वज्र भस्म वारितर भवेत् ॥ ३९ ॥
सत्यवाक् सोमसेनानीरितद्वज्रस्य मारणम्।
दृष्टप्रत्ययसयुक्तमुक्तवान् रसकौतुकी ॥ ४० ॥

मतान्तरम्।—

विलिप्तं मत्कुणस्यास्रैः सप्तवारं विशोषितम्।
कासमर्दरसापूर्णे लोहपात्रे निवेशितम् ॥ ४१ ॥
सप्तवार परिध्मात वज्र भस्म भवेत् खलु।
ब्रह्मज्योतिर्मुनीन्द्रेण क्रमोऽयं परिकीर्त्तितः ॥ ४२ ॥

त वज्र सस्थाप्य मूषाया निरुध्य च अरत्निपरिमितकुण्डे पुटेत, एव विशद्वार कार्य्यं, तत भस्त्राग्निना ध्मात्वा पुन. कुलत्थकषाये निक्षिपेत, एव शतवारं कुर्य्यात। अथ मतान्तरमाह, अन्यैरिति।—केषाञ्चिन्मते मत्कुणरक्तेन भावनामारभ्य कुलत्थ-क्काथे निक्षेपान्त कृत्स्नो विधि यथोक्तक्रमेण शतवार कार्य्य इति ॥ ३६।३७ ॥

मारणे सोमसेनानीमतमाह, कुलत्थेति।—लकुच डहुक। शिलया मन-शिलया। अत्रायं विधि,—कुलत्थक्काथलकुचस्वरसाभ्याम् एकीभूताभ्या मन शिला पिष्ट्वा तेन मूषागर्भमालिप्य तत्र वज्र निधाय सन्धिरोध कृत्वा मृत्कर्पटादिना मूषाबहिर्लिप्त्वा वन्यकरीषाग्निना पुटेत्, एवमष्टवार, पश्चिमपुटानन्तर शोधित पारदेन सह एकीकृत्य पारदपिण्डमध्ये निधाय वा धमेत्, एव शतवार कार्य्यम्, तेन वज्रस्य वारितर भस्म सञ्जायेत, प्रक्रियेय सोमसेनाख्या विहिता इति ॥ ३८—४० ॥

मुनीन्द्रब्रह्मज्योति प्रोक्त मारणमाह, विलिप्तमिति।—मत्कुणशोणितेन वज्रं सप्तवार विलेपयेत् आतपे शोषयेच्च, तत कासमर्दस्वरसपरिपूर्णलोहपात्रे तदाप्लुत्य भस्त्राग्निना धमेत्, एव सप्तधाकरणेन भस्मीभवेत् इति ॥ ४१।४२ ॥

मतान्तरम् ।—

नीलज्योतिर्लताकन्दे घृष्टं घर्मे विशोषितम् ।
वज्रं भस्मत्वमायाति कर्मवज्ज्ञानवह्निना ॥ ४३ ॥

मतान्तरम् ।—

मदनस्य फलोद्भूतरसेन चौणिनागकैः ।
कृतकल्केन सलिप्य पुटेद्विंशतिवारकम् ॥
वज्रचूर्णं भवेद्दिव्यं योजयेच्च रसादिषु ॥ ४४ ॥

मतान्तरम् ।—

तद्वज्रं चूर्णयित्वाऽथ किञ्चिट्टङ्कणसयुतम् ।
खरभूनागसत्त्वेन विंशेनाऽऽवर्त्तयेद्ध्रुवम् ॥
तुल्यस्वर्णेन तद्ध्मातं योजनीयं रसादिषु ॥ ४५ ॥

अथ प्रयोगविशेषेण गुणविशेषकथनम् ।—

त्रिगुणेन रसेनैव सम्मर्द्य गुटिकीकृतम् ।
मुखे धृतं करोत्याशु चलदन्तविबन्धनम् ॥ ४६ ॥

अग्निसम्पर्कं विनाऽपि वज्रभस्मप्रक्रियामाह, नीलेति ।—नील नीलीवृक्ष नीलापराजिता वा, ज्योतिर्लता ज्योतिष्मती "लताफट्की" इति भाषा । नीलवृक्षमूलरसेन नीलापराजितामूलरसेन वा तथा ज्योतिष्मतीमूलरसेन च घृष्ट वज्रम् आतपे सशोषणात भस्मीभवति । अत्र दृष्टान्तमाह, कर्मवदिति ।—ज्ञानाग्नि यथा सर्वकर्माणि भस्मसात् करोति तथेत्यर्थः ॥ ४३ ॥

मतान्तरमाह, मदनस्येति ।—चौणीनागकै भूनागकै, "केँचो" इति ख्याते । नागकैरिति स्वार्थे क । मदनफलरसेन भूनाग पिष्ट्वा तत्कल्केन वज्र सलिप्य पुटेत, एव विंशतिवारकरणेन वज्र चूर्णीभवति ॥ ४४ ॥

मतान्तरमाह, तदिति ।—तत् पूर्वोक्तविधानेन मारितम् । पूर्वप्रक्रियया मारित वज्र किञ्चित टङ्कणेन सह सचूर्ण्य पुष्टाङ्गविंशतिसङ्ख्याककिञ्चुलुकरसेन सह आलोड्य समानसुवर्णेन सह मूषाया निरुध्य ध्मापयेत, तेन गुणाधिक्य जायते इति ॥ ४५ ॥

प्रयोगविशेषेण गुणविशेषमाह, त्रिगुणेनेति ।—त्रिगुणेन वज्रभागमपेक्ष्य इति बोध्यम् ॥ ४६ ॥

प्रयोगान्तरम्।—

त्रिंशद्भागमितं हि वज्रभसितं स्वर्णं कलाभागिकं
तारश्चाष्टगुणं सितामृतवरं रुद्रांशकश्चाभ्रकम्।
पादांशं खलु ताप्यकं वसुगुणं वैक्रान्तकं षड्गुणं
भागोऽप्युक्तरसे रसोऽयमुदितः षाड्गुण्यसंसिद्धये॥ ४७॥

[इति वज्राधिकारः]।

अथ नीलम्।—

अथ नीलस्य द्वैविध्यकथनम्।—

जलनीलश्चेन्द्रनीलं शक्रनीलं तयोर्वरम्॥ ४८॥

अथ नीलद्वयस्य सामान्यलक्षणम्।—

श्वैत्यगर्भित-नीलाभं लघु तज्जलनीलकम्।
कार्ष्ण्यगर्भित-नीलाभं सभारं शक्रनीलकम्॥ ४९॥

प्रयोगान्तरमाह त्रिंशदिति।—वज्रभसितं हीरकभस्म। कलाभागिकं षोडशभागम्, "कला तु षोडशो भागः" इत्युक्तेः, न तु षोडशभागैकभागः इति। सितामृतवरं शुभ्रपारदम्। रुद्रांशकम् एकादशभागम्। पादांशं चतुर्भागम्। ताप्यकं स्वर्णमाक्षिकम्। वसुगुणम् अष्टगुणम्। भागः भागपरिमितः, यथाग्निमात्रया इत्यर्थः, सेवित इति शेषः। रसे पूर्वोक्तकुलत्थकोद्रवकासमर्दलकुचमदनफलादीनां रसे। अयं रसः वज्रभस्मादिकृत औषधविशेषः। षाड्गुण्यसंसिद्धये षाड्गुण्यं विद्यावितर्कादिकं तस्य सम्यक् सिद्धिलाभाय, षाड्गुण्यमुक्तं चरके यथा—"विद्या वितर्को विज्ञानं स्मृतिस्तत्परता क्रिया। यस्यैते षड्गुणास्तस्य—" इति। एतद्रसवरसेवनात् धीधृतिस्मृतिमेधादिसमन्वितः विद्यावितर्कादिसिद्धिं लभते इति निष्कर्षः। अस्य पर्वो यथा—हीरकभस्म ३० स्वर्णभस्म १६ रौप्यभस्म ८ सुशुभ्रशुद्धपारदः तद्भस्म वा ११ अभ्रभस्म ४ स्वर्णमाक्षिकभस्म ८ वैक्रान्तभस्म ६ सर्वमेकीकृत्य कुलत्थादिरसेन सम्मर्द्य योग्यमात्रा उपयोज्या। "भागोऽप्युक्त" इत्यत्र "भागश्चोक्त" इति पाठकल्पनं समीचीनम्॥ ४७॥

नीलस्य द्वैविध्यमाह, जलनीलमिति।—शक्रनीलम् इन्द्रनीलम्॥ ४८॥

तयोः साधारणलक्षणमाह, श्वैत्येति।—श्वैत्यगर्भितनीलाभम् अन्तःशुभ्राभनीलवर्णम्। लघु निर्भारिकम्। कार्ष्ण्यगर्भितनीलाभम् अन्तःकृष्णाभनीलवर्णम्। सौरेरिदं ज्ञेयम्॥ ४९॥

अथ प्रशस्तशक्रनीललक्षणम् ।—

एकच्छायं गुरु स्निग्धं स्वच्छं पिण्डितविग्रहम् ।
मृदु मध्ये लसज्ज्योतिः सप्तधा नीलमुत्तमम् ॥ ५० ॥

अथ जलनीलस्य विशेषलक्षणम् ।—

कोमलं विहितं रूक्षं निर्भारं रक्तगन्धि च ।
चिपिटाभं ससूक्ष्मञ्च जलनीलञ्च सप्तधा ॥ ५१ ॥

अथ गुणाः ।—

श्वासकासहरं वृष्यं त्रिदोषघ्नं सुदीपनम् ।
विषमज्वरदुर्नामपापघ्नं नीलमीरितम् ॥ ५२ ॥

[इति नीलाधिकारः] ।

इन्द्रनीलस्य विशेषलक्षणमाह, एकेति ।—एकच्छायम् एका अद्वितीया, अतुल्या इत्यर्थः, अन्यधर्माग्राहिणीति यावत्,' छाया कान्तिः यस्य तत्, यत् द्रव्यान्तरस्य प्रतिबिम्बं न गृह्णाति, किन्तु स्वकान्त्या द्रव्यान्तरं रञ्जयति, यदुक्तं राजनिघण्टौ—"यः पात्रं रञ्जयत्याशु स जात्यो नील उच्यते" इति । अन्यच्च—"क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेन्नीलतां व्रजेत् । इन्द्रनीलमिति ख्यातम्" इति । यद्वा—एका मुख्या श्रेष्ठा इति यावत् छाया कान्तिः यस्य तत् उत्तमकान्तिमत्, यद्वा—एका केवला छाया आतपाभावः औष्ण्यशून्यता इति यावत् यत्र तत् स्पर्शशीतमित्यर्थः आतपस्य औष्ण्य-धर्मित्वेन छायायाश्च शैत्यतया तथाभूतोऽर्थो बोध्यः । स्वच्छं निर्मलम् । पिण्डितविग्रहं घनीभूतावयवं, स्थूलमित्यर्थः । मृदु अदारुणं, सुखस्पर्शमिति यावत् । मध्ये लसज्ज्योतिः अभ्यन्तरे दीप्तप्रकाशं, ज्योतिर्मयमित्यर्थः, नीलम् उत्तमम् इन्द्रनीलम् एतत्सप्तविध-गुणसम्पन्नं ज्ञेयम् । वज्रवन्नीलस्यापि विप्रश्वेतादिवर्णभेदेन चातुर्विध्यं बोध्यं, तथा च निघण्टुराजे—"सितशोणपीतकृष्णाच्छाया नीले क्रमादिमाः कथिताः । विप्रादिवर्ण-सिद्ध्यै धारणमस्यापि वज्रवत् फलवत् ॥" इति ॥ ५० ॥

जलनीलस्य विशेषलक्षणमाह, कोमलमिति ।—कोमलं मनोहरं पञ्चवर्णविशिष्ट-मित्यर्थः । विहितम् अर्द्धभागेन सम्पूर्णं वर्णम् अर्द्धभागेन पञ्चवर्णमित्यर्थः । निर्भारं लघु । ससूक्ष्मं कृशावयवमित्यर्थः ॥ ५१ ॥

गुणमाह, श्वासेति ।—पापघ्नं धारणेनेति बोध्यम्, यद्वा—पापरोगमसूरिकादि-नाशनं, तस्य मङ्गल्यत्वात् प्रभावाच्च इति ॥ ५२ ॥

अथ गोमेदः।—

अथ गोमेदस्य निरुक्तिः।—

गोमेदः-समरागत्वाद्गोमेदं रत्नमुच्यते ॥ ५३ ॥

अथ प्रशस्तगोमेदलक्षणम्।—

सु-स्वच्छ-गोजलच्छायं स्वच्छं स्निग्धं समं गुरु।
निर्दलं मसृणं दीप्तं गोमेदं शुभमष्टधा ॥ ५४ ॥

अथाप्रशस्तगोमेदलक्षणम्।—

विच्छायं लघु रूक्षाङ्गं चिपिटं पटलान्वितम्।
निष्प्रभं पीतकाचाभं गोमेदं न शुभावहम् ॥ ५५ ॥

अथ गुणाः।—

गोमेदं कफपित्तघ्नं क्षयपाण्डुक्षयङ्करम्।
दीपनं पाचनं रुच्यं त्वच्यं बुद्धिप्रबोधनम् ॥ ५६ ॥

[इति गोमेदाधिकारः]।

गोमेदस्य निरुक्तिमाह, गोमेद इति।—गो मेदसा समः तुल्यः रागः वर्णः, यस्य तथात्वात् ईषद्रक्तत्वादित्यर्थः ॥ ५३ ॥

शुभगोमेदस्य लक्षणमाह, सुस्वच्छेति।—सुस्वच्छगोजलच्छायम् अनाविलगोमूत्र-वर्णम्। समं समगात्रम्। निर्दलं निष्पत्रम् अशुभगोमेदस्य सपटलत्वात् अत्र शुभ-गोमेदस्य निर्दलत्वावतारणम्। राहुप्रसादनमेतत् ॥ ५४ ॥

अप्रशस्तगोमेदलक्षणमाह, विच्छायमिति।—विच्छायं विकृतकान्ति, मलिन-मित्यर्थः। पटलान्वितं सदलम्। निष्प्रभम् अनुज्ज्वलम्। पीतकाचाभं पीतवर्ण-काचाख्यमणिविशेषतुल्यं गौरकृष्णमिश्रितवर्णाभम् इति वा, काचशब्दः कृष्णार्थकोऽपि दृश्यते, यथा—काचलवणं कृष्णलवणम्, यद्वा—पीतकाचाभं श्वेतपीतमिश्र-वर्णमिति ॥ ५५ ॥

गुणमाह, गोमेदमिति।—क्षयपाण्डुक्षयङ्करं क्षयस्य राजयक्ष्मणः पाण्डोश्च क्षयङ्करं नाशनम्। क्षयङ्करमित्यत्र विभक्तेरलुक् छान्दसत्वात्। त्वच्यं त्वक्प्रसादनं, त्वचः सौकुमार्य्यसम्पादकमित्यर्थः ॥ ५६ ॥

अथ वैदूर्य्यम् ।—

अथ शुभवैदूर्य्यलक्षणम् ।—

वैदूर्य्यं श्यामशुभ्राभं समं स्वच्छं गुरु स्फुटम् ।
अभ्रशुभ्रोत्तरीयेण गर्भितं शुभमीरितम् ॥ ५७ ॥

अथ अशुभवैदूर्य्यलक्षणम् ।—

श्यामं तोयसमच्छायं चिपिटं लघु कर्कशम् ।
रक्तगर्भोत्तरीयञ्च वैदूर्य्यं नैव शस्यते ॥ ५८ ॥

अथ गुणाः ।—

वैदूर्य्यं रक्तपित्तघ्नं प्रज्ञाऽऽयुर्बलवर्द्धनम् ।
पित्तप्रधानरोगघ्नं दीपनं मलमोचनम् ॥ ५९ ॥

[इति वैदूर्य्याधिकारः] ।

अथ नवरत्नानां शोधनम् ।—

शुध्यत्यम्लेन माणिक्यं जयन्त्या मौक्तिकं तथा ।
विद्रुमं क्षारवर्गेण तार्क्ष्यं गोदुग्धकैस्तथा ॥ ६० ॥
पुष्परागञ्च सन्धानैः कुलत्थक्वाथसंयुतैः ।
तण्डुलीयजलैर्वज्रं नीलं नीलीरसेन च ॥
रोचनाभिश्च गोमेदं वैदूर्य्यं त्रिफलाजलैः ॥ ६१ ॥

मङ्गल्यवैदूर्य्यलक्षणमाह वैदूर्य्यमिति ।—श्यामशुभ्राभं श्वेतकृष्णमिश्रवर्णम् । समं समगात्रम् । स्फुटं प्रकाशवत्, उज्ज्वलमित्यर्थः । अभ्रेति ।—अभ्रवत् शुभ्रेण शुक्लवर्णेन उत्तरीयेण ऊर्द्ध्वदेहधार्य्यवस्त्रविशेषाकारचिह्नेनेत्यर्थः, गर्भितं मध्ययुक्तमित्यर्थः, लम्बितोत्तरीयवदुपवीतवद्वा शुभ्ररेखाविशिष्टमध्यमित्यर्थः । केतुरत्नमिति प्रसिद्धमेतत् ॥ ५७ ॥

कुवैदूर्य्यलक्षणमाह, श्याममिति ।—श्यामम् अमिश्रकृष्णवर्णं, शुभवैदूर्य्यस्य श्यामशुभ्रत्वात् । तोयसमच्छायं जलसमानकान्तिमत्, दूरतो दर्शने जलभ्रमोत्पादकं, न तु जलवत् द्रवमित्यर्थः । रक्तगर्भोत्तरीयं रक्तं रक्तवर्णं गर्भे उत्तरीयं यस्य तत्, पूर्ववत् रक्तरेखाविशिष्टमध्यम् इत्यर्थः ॥ ५८ ॥

गुणमाह, वैदूर्य्यमिति ।—मलमोचनं पुरीषरेचनं दोषनाशनं वा ॥ ५९ ॥

अथ नवरत्नानां प्रत्येकं शोधनमाह, शुध्यतीति ।—अम्लेन "अम्लवेतसजम्बीर-

अथ रत्नानां मारणम्।—

लकुचद्रावसम्पिष्टैः शिलागन्धकतालकैः ।
वज्रं विनाऽन्यरत्नानि म्रियन्तेऽष्टपुटैः खलु ॥ ६२ ॥

अथ रत्नानां द्रावणम्।—

रामठं पञ्चलवणं क्षारत्रितयं तथा ।
मासद्रवोऽम्लवेतस्य चूलिकालवणं तथा ॥ ६३ ॥
स्थूलकुम्भीफलं पक्वं तथा ज्वालामुखी शुभा ।
द्रवन्ती च रुदन्ती च पयस्या चित्रमूलकम् ॥ ६४ ॥
दुग्धं स्नुह्यास्तथाऽर्कस्य सर्वं सम्मर्द्य यत्नतः ।
गोलं विधाय तन्मध्ये प्रक्षिपेत्तदनन्तरम् ॥ ६५ ॥
गुणवन्नवरत्नानि जातिमन्ति शुभानि च ।
भूर्जे तं गोलकं कृत्वा सूत्रेणाऽऽवेष्ट्य यत्नतः ॥ ६६ ॥

शुक्राम्लचणकाम्लका। नागरङ्गं तिन्तिडी च चञ्चापदञ्च निम्बुकम् ॥ चाङ्गेरी दाडिमञ्चैव करमर्दं तथैव च। एष चाम्लगणः प्रोक्तो वेतसाम्लसमायुतः ॥" इत्युक्ताम्लवर्गरसेन काञ्जिकेन वा। माणिक्यं पद्मरागः। जयन्त्या जयन्तीपत्रस्वरसेन। क्षारवर्गेण "स्वर्जिका टङ्कणञ्चैव यवक्षार उदाहृतः" इत्युक्तवर्गेण। पुष्परागमिति।—कुलत्थक्वाथमिश्रकाञ्जिके पुष्परागं शुध्यति। तण्डुलीयजले "कॉटानटे" इति ख्यातक्षुपविशेषमूलरसे। नीली नीलवृक्षः। रोचना गोरोचना हरिद्रा वा। यथायोग्यमेषां स्वरसादिभिः सह दोलायन्त्रे विपाच्य रत्नानि शोधयेत इति। हस्तलिखितादर्शपुस्तकविशेषे एते वक्ष्यमाणश्लोका मूलमध्ये अधिकतया पठिता दृश्यन्ते, यथा—"रत्नानां शोधनं श्रेष्ठं मारणं न गुणप्रदम्। भस्मना वीर्य्यहानिः स्यात् तस्मात्तानि च शोधयेत् ॥ रसे रसायने दाने धारणे देवतार्चने। सुलक्षणानि सुजातीनि रत्नाण्युक्तानि शोधयेत् ॥ शुद्धिं चरन्ति रत्नानि निम्बूम्बुनि तुषाम्बुनि। विशुध्यन्ति त्रिदिवसैः विघृतानि च सर्वशः ॥" इति ॥ ६०।६१ ॥

मारणमाह, लकुचेति।—लकुचः डहुकः। लकुचरसपिष्टमनःशिलागन्धकहरितालकल्कमध्ये वज्रव्यतिरिक्तानि रत्नानि स्थापयित्वा अष्टकृत्वः पुटनेन म्रियन्ते इति ॥ ६२ ॥

पुनर्वस्त्रेण संवेष्ट्य दोलायन्त्रे निधाय च ।
सर्वाम्लयुक्तसन्धान-परिपूर्णघटोदरे ॥ ६७ ॥
अहोरात्रत्रयं यावत् स्वेदयेत्तीव्रवह्निना ।
तस्मादाहृत्य सङ्क्षाल्य रत्नजां द्रुतिमाहरेत् ॥
रत्नतुल्यप्रभा लघ्वी देहलोहकरी शुभा ॥ ६८ ॥

अथ मुक्ताद्रावणे विशेषक्रमः ।—

मुक्ताचूर्णन्तु सप्ताहं वेतसाम्लेन मर्दितम् ।
जम्बीरोदरमध्ये तु धान्यराशौ विनिक्षिपेत् ॥
सप्ताहादुद्धृतञ्चैव पुटं दत्त्वा द्रुतिं हरेत् ॥ ६९ ॥

सर्वरत्नानां द्रावणमाह, रामठमिति ।—रामठं हिङ्गु । मातद्रवं अम्लवेतसभेदः, यदुक्तं राजनिघण्टौ—"शङ्खमांसादिद्रावी स्यात् द्विधा चैवाम्लवेतसः" इति । अम्लवेतसः प्रसिद्ध एव । "मांसद्राव्यम्लवेतश्च" इति पाठे—मांसद्रावणात्तोऽम्लवेतसः, न तु प्रसिद्धोऽपरः । चूलिकालवणं लवणविशेषः नरसारो वा । स्थूलकुम्भीफलं पक्वं सुपक्वपरिपुष्टाङ्गजेपालबीजम् । ज्वालामुखी शुभा उत्तमा लाङ्गली "ईशलाङ्गला" इति भाषा, भल्लातको वा । द्रवन्ती चीरितपत्रदन्तीभेदः, वृहद्दन्तीति यावत्, आखुकर्णी लता वा । रुदन्ती उत्कलादिदेशे स्वनामख्याता, तल्लक्षणं यथा राजनिघण्टौ—"चणपत्रसमं पत्रं क्षुपश्चैव तथाम्लकः । शिशिरे जलविन्दूनास्रवन्तीति रुदन्तिका ॥" इति । पयस्या चीरकाकोली भूमिकुष्माण्डो वा । जातिमन्ति अकृत्रिमाणि उत्कृष्टानीति यावत् । शुभानि मङ्गल्यानि । भूर्जे भूर्जपत्रे । अयमत्र क्रमः,—रामठाद्यर्कक्षीरान्तं सर्वमनुरूपं गृहीत्वा सम्पिष्य तत्पिण्डान्तः वररत्नानि निदध्यात्, ततः भूर्जपत्राभ्यन्तरे ततः पिण्डं संस्थाप्य सूत्रेण दृढं बद्ध्वा पुनः वस्त्रेणावेष्ट्य अम्लवेतसाद्यम्लवर्गरसमिश्रकाञ्जिकेन सह महत्स्थाल्यां दोलायां तीव्रवह्निना त्रिदिनं पचेत्, तेन रत्नानि द्रवीभवन्ति, अनन्तरमवतार्य्य वस्त्रादिवेष्टनमपसार्य्य प्रक्षाल्य च मध्यस्थद्रुतिं गृह्णीयादिति ॥ ६३—६८ ॥

मुक्ताद्रावणे विशेषक्रममाह, मुक्तेति ।—सप्ताहं यावत् अम्लवेतसेन सह मुक्ताचूर्णं खल्लयित्वा तेन जम्बीरगर्भमापूर्य्य मृत्कर्पटादिना संलिप्य धान्यराशौ सप्ताहं स्थापयेत्, सप्ताहानन्तरमुद्धृत्य पुटो देयः ॥ ६९ ॥

अथ वज्रद्रावणे विशेषक्रमः ।—

वज्रवल्ल्यन्तरस्थञ्च कृत्वा वज्रं निरोधयेत् ।
अम्लभाण्डगतं स्वेद्यं सप्ताहाद्द्रवतां व्रजेत् ॥ ७० ॥

अथ वैक्रान्तद्रावणे विशेषक्रमः ।—

श्वेतवर्णन्तु वैक्रान्तमम्लवेतसभावितम् ।
सप्ताहान्नात्र सन्देहः खरघर्मे द्रवत्यलम् ॥ ७१ ॥

मतान्तरम् ।—

केतकीस्वरसं ग्राह्यं सैन्धवं स्वर्णपुष्पिका ।
इन्द्रगोपकसंयुक्तं सर्वं भाण्डे विनिक्षिपेत् ॥
सप्ताहं स्वेदयेत्तस्मिन् वैक्रान्तं द्रवतां व्रजेत् ॥ ७२ ॥

मतान्तरम् ।—

लोहाष्टके तथा वज्रे वापनात् स्वेदनाद्द्रुतिः ।
जायते नात्र सन्देहो योगस्यास्य प्रभावतः ॥ ७३ ॥

वज्रद्रावणमाह, वज्रवल्लीति ।—वज्रवल्ली अस्थिसंहार "हाडजोडा" इति प्रसिद्धा । वज्रवल्लीमूलपिण्डाभ्यन्तरे वज्रं निरुध्य काञ्जिकपूर्णघटे दोलायां सप्ताहं स्वेदयेत, तेन द्रवत्वमायाति कुलिशम ॥ ७० ॥

वैक्रान्तद्रावणमाह, श्वेतवर्णमिति ।—महारसविशेषस्य वैक्रान्तस्य शोधनादिकं द्वितीयाध्याये महारसाधिकारे प्रागेवोक्तं, किन्तु द्रावणस्य तत्रानुक्तत्वात् अस्य उपरत्न विशेषत्वाच्च रत्नद्रावणप्रसङ्गे अत्र द्रावणं निर्दिष्टं पुनरुक्तिरत्र कृता ग्रन्थकृता । किञ्च महारसत्वेऽपि अस्य उपरत्नत्वं नासङ्गत, यतो ग्रन्थान्तरे वज्रस्यापि उपरसमध्ये ग्रहणं दृश्यते । किंवा केषाञ्चिन्मते अस्य महारसत्वं केषाञ्चित् उपरत्नत्वम, उभयमपि अविरुद्धं स्मृतिद्वैधवत । वर्णभेदेनाष्टविधेषु वैक्रान्तेषु श्वेतवर्णवैक्रान्तम् अम्लवेतसक्वाथेन तीव्रातपे सप्ताहं भावयेत, तेन निश्चितमेव द्रवीभवति इति ॥ ७१ ॥

मतान्तरमाह, केतकीति ।—स्वर्णपुष्पिका स्वर्णयूथिका, पीतपुष्पयूथिका इत्यर्थः । इन्द्रगोपकः वार्षिककीटविशेषः "आषाढे पोका" इति "कीण्डाइ" इति वा भाषा । केतकीस्वरसादिद्रव्यचतुष्टयेन सह वैक्रान्तं स्थालीमध्ये संस्थाप्य सप्ताहं दोलायन्त्रे स्वेदनेन द्रवीभवतीति ॥ ७२ ॥

मतान्तरमाह, लोहाष्टक इति ।—लोहाष्टकम् अष्टलोहं, तच्च स्वर्णरौप्यताम्रवङ्ग-

अथ सर्वरत्नानां सामान्यद्रावणम् ।—

कुरुते योगराजोऽयं रत्नानां द्रावणं परम् ॥ ७४ ॥

अथ राजावर्त्तः ।—

अथोत्तममध्यमराजावर्त्तलक्षणम् ।—

राजावर्त्तोऽल्परक्तोरु नीलिकामिश्रितप्रभः ।
गुरुश्च मसृणः श्रेष्ठस्तदन्यो मध्यमः स्मृतः ॥ ७५ ॥

अथ गुणाः ।—

प्रमेहक्षयदुर्नाम-पाण्डुश्लेष्मानिलापहः ।
दीपनः पाचनो वृष्यो राजावर्त्तो रसायनः ॥ ७६ ॥

अथ राजावर्त्ताद्युपरत्नानां सामान्यशोधनम् ।—

निम्बुद्रवैः सगोमूत्रैः सक्षारैः स्वेदिताः खलु ।
द्वित्रिवारेण शुध्यन्ति राजावर्त्तादिधातवः ॥ ७७ ॥

अथ राजावर्त्तशोधनम् ।—

शिरीषपुष्पार्द्ररसैः राजावर्त्तं विशोधयेत् ॥ ७८ ॥

क्षीसपित्तल कान्तलौह-तीक्ष्णलौहात्मकम् । उक्ताष्टविधलौहभस्ममध्ये तथा वज्रभस्म-मध्ये च वैक्रान्तं प्रक्षिप्य दोलायन्त्रे स्वेदनात् द्रवीभवति ॥ ७३ ॥

सर्वरत्नानां द्रावणमाह, कुरुते इति ।—योगराजोऽयं लौहाष्टकादिकृतः अयं योगः । रत्नानां माणिक्यादीनाम् ॥ ७४ ॥

उत्तममध्यमभेदेन द्विविधराजावर्त्तयोः स्वरूपलक्षणमाह, राजावर्त्त इति ।—अल्परक्तोरुनीलिकामिश्रितप्रभः ईषद्रक्तानल्पनीलद्युतिः । तदन्यः श्रेष्ठलक्षणविपरीतः, अनल्परक्तोषन्नीलद्युतिः लघुः खरश्चेत्यर्थः ॥ ७५ ॥

राजावर्त्तस्य गुणमाह, प्रमेहेति ।—सुगमम् ॥ ७६ ॥

राजावर्त्ताद्युपरत्नानां सामान्यशोधनमाह, निम्बुद्रवैरिति ।—निम्बुरसगोमूत्राभ्यां यवक्षारेण च सह राजावर्त्तादिकं स्थाल्यां दोलायन्त्रे वारद्वयं वारत्रयं वा स्वेदयेत् तेन शुध्यतीति ॥ ७७ ॥

राजावर्त्तस्य विशेषशोधनमाह, शिरीषेति ।—सद्यस्कशिरीषपुष्पस्वरसैः राजावर्त्तं भावयित्वा स्वेदयित्वा वा शोधयेदिति ॥ ७८ ॥

अथ राजावर्त्तमारणम्।—

लुङ्गाम्बुगन्धकोपेतो राजावर्त्तो विचूर्णितः।
पुटनात् सप्तवारेण राजावर्त्तो मृतो भवेत्॥ ७९॥

अथ सत्त्वपातनम्।—

राजावर्त्तस्य चूर्णन्तु कुनटी-घृतमिश्रितम्।
विपचेदायसे पात्रे महिषीक्षीरसयुतम्॥ ८०॥
सौभाग्यपञ्चगव्येन पिण्डीबद्धन्तु जारयेत्।
ध्मापितं खदिराङ्गारैः सत्त्वं मुञ्चति शोभनम्॥ ८१॥

[इति राजावर्त्ताधिकारः]।

अथ द्रुतीनां दीर्घकालरक्षणोपायः।—

कुसुम्भतैलमध्ये तु संस्थाप्या द्रुतयः पृथक्।
तिष्ठन्ति चिरकालन्तु प्राप्ते कार्य्ये नियोजयेत्॥ ८२॥

मारणमाह, लुङ्गाम्बुिति।—लुङ्गाम्बु मातुलुङ्गरसः। मातुलुङ्गरसेन तुल्यगन्धकं राजावर्त्तं पिष्ट्वा सप्तवारं पुटेत इति॥ ७९॥

सत्त्वपातनविधिमाह, राजावर्त्तस्येति।—कुनटी मनःशिला। अयमत्र क्रमः,— राजावर्त्तचूर्णं घृतमनःशिलाभ्यां तुल्याभ्यां पिष्ट्वा महिषीक्षीरेण चतुर्गुणेन क्षीरशोषणं यावत् लौहपात्रे पचेत् ततः तुल्यटङ्कणेन पिण्डत्वसम्पादनार्हेण पञ्चगव्येन च सम्मर्द्य पिण्डाकारं कृत्वा मूषायां संस्थाप्य पुटं दद्यात्, ततः खदिरकाष्ठाङ्गारेण भस्त्रया ध्मापयित्वा सत्त्वं गृह्णीयादिति। ननु उद्देशे वैक्रान्तादीनि चतुर्दश रत्नान्युक्त्वा विवरणे एकादशानामेव गुणादिकमुक्तं, तत् कथमिति चेदुच्यते—"रत्नं गारुत्मतं पुष्प-रागो माणिक्यमेव च। इन्द्रनीलश्च गोमेदस्तथा वैदूर्य्यमित्यपि॥ मौक्तिकं विद्रुमश्चेति रत्नान्युक्तानि वै नव॥" इति नवरत्ननिर्देशात् अत्र प्राधान्येन तेषामेव परिचयादिकमुक्तम्। वैक्रान्त सूर्य्यकान्त स्फटिक चन्द्रकान्त राजावर्त्ताख्यानां मणीनाम् उपरत्नजातीयानां रत्नाधिकारे निर्देशे कृतेऽपि सूर्य्य चन्द्रकान्तस्फटिकानामौषधादिषु बाहुल्येन प्रयोगादर्शनात् लक्षणादिकं नोक्तं, वैक्रान्तराजावर्त्तयोस्तु प्रयोगदर्शनात् उल्लिखितम् इति। (अत्र रत्न हीरकम्)॥ ८०।८१॥

द्रवाणां चिरकालमविकृततया संस्थापने प्रकारमाह, कुसुम्भेति।— सुगमम्॥ ८२॥

अथ रत्नधारणगुणा ।—

सूर्य्यादिग्रह-निग्रहापहरणं दीर्घायुरारोग्यदं
सौभाग्योदय-भाग्य वश्य-विभवोत्साहप्रदं धैर्य्यकृत् ।
दुश्छाया-चलधूलि-सङ्गतिभवाऽलक्ष्मीहरं सर्वदा
रत्नानां परिधारणं निगदितं भूतादि भीनाशनम् ॥ ८३ ॥

अथ गैरिकम् ।—

अथ गैरिकस्य शोधनं सत्त्वपातनञ्च ।—

अनेन क्रमयोगेन गैरिकं विमलं भवेत् ।
क्रमात् पीतञ्च रक्तञ्च सत्त्वं पतति शोभनम ॥ ८४ ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
रत्नानां शुद्ध्यादिनिरूपणं नाम चतुर्थोऽध्यायः ॥ ४ ॥

रत्नधारणगुणमाह, सूर्य्येति ।—सूर्य्यादिभिः ग्रहैः कृतस्य निग्रहस्य अपहरणं विग्रहं नवग्रहजनितापत्प्रशमनम् । सौभाग्येति ।—सौभाग्यं स्त्रीप्रियत्वम उदयः उन्नति भाग्यं शुभादृष्टं "भाग्य" इत्यत्र 'भोग्य" इति पाठे—भोगार्हवस्तु इत्यर्थः, वश्यं लोकवशीकरणसामर्थ्यं विभवं धनम उत्साहः कार्य्येषु उद्यम तान् प्रददाति इति तथाभूतम् । दुश्छायेति ।—दुः दुष्टा अशुभोत्पादिका इत्यर्थः, छाया प्रतिविम्बं तथा चला वातेन स्थानान्तरं नीयमाना धूलिः पांशुः अजादीनां खुरोत्था इति भावः तयोः सङ्गत्या सम्पर्शेन भवा या अलक्ष्मीः श्रीहीनता दैन्यमिति यावत, तां हरतीति तथाभूतम् । भूतादिभीनाशनं भूतप्रेतादिभ्यो भयनिवारणम ॥ ८३ ॥

उपरसभेदस्य गैरिकस्य शोधनादिकं तृतीयाध्याये उपरसाधिकारे उक्तमपि राजावर्त्तवत् शोधनाद्यतिदेशार्थमत्रापि पुनस्तदाह, अनेनेति ।—अनेन राजावर्त्तस्य शोधनसत्त्वपातनविध्यनुसारेण । क्रमात पीतञ्च रक्तञ्चेत्यत्र पाषाणगैरिकस्य पीतं स्वर्णगैरिकस्य च रक्तं सत्त्वं बोध्यमिति ॥ ८४ ॥

इति रसरत्नसमुच्चयबोधिन्यां चतुर्थाध्यायः ॥ ४ ॥

अथ पञ्चमोऽध्यायः।

अथ लोहानि।—

अथ लोहानां जातिनिरूपणम्।—

शुद्धं लोहं कनकरजतं भानुलोहाश्मसारं
पूतीलोहं द्वितयमुदितं नागवङ्गाभिधानम्।
मिश्रं लोहं त्रितयमुदितं पित्तलं कांस्यवर्त्तं
धातुर्लोहे लुह इति मतः सोऽप्यनेकार्थवाची ॥ १ ॥

अथ चतुर्थाध्याये रत्नानां शोधनादिकं निरूप्य स्वर्णाद्यष्टलोहानामपि रत्नसदृश-गुणवत्त्वात् इदानीं तेषामपि शोधनादिविवरणार्थं पञ्चमाध्यायमारभते, तत्रादौ तेषां जातीः निरूपयति, शुद्धमिति।—भानुलोहाश्मसारं भानुना ताम्रेण सह लोहाश्मसारं कान्तादिसञ्ज्ञकलौहत्रयमित्यर्थः। स्वर्णं रौप्यं ताम्रं तथा कान्तमुण्डतीक्ष्णाख्यलौहत्रयम् अमिश्रलोहं ज्ञेयम्। सीसकं वङ्गञ्च द्वयं पूतिलोहाभिधानम्, पूतिलोहमिति लोहस्य जातिविशेषः, अथवा वङ्गस्य पूतिगन्धेतिपर्य्यायकत्वात् नागस्य च वङ्गसदृश-गुणवत्त्वात् लोहविशेषयोर्नागवङ्गयोः पूतिलोहाभिधानम् इति। पित्तलादित्रयं मिश्रलोहसञ्ज्ञं तेषां धात्वन्तरसंयोगजत्वात्, यदुक्तं भावप्रकाशे—"रीतिरप्युपधातुः स्यात्ताम्रस्य यशदस्य च। पित्तलस्य गुणा ज्ञेयाः स्वयोनिसदृशा जने ॥ संयोगज-प्रभावेण तस्यान्येऽपि गुणाः स्मृताः ॥ ताम्रत्रपुजमाख्यातं कांस्यं घोषञ्च कंसकम्। उपधातुर्भवेत् कांस्यं द्वयोस्तरणिरङ्गयोः ॥ कांस्यस्य तु गुणा ज्ञेयाः स्वयोनिसदृशा जने। संयोगजप्रभावेण तस्यान्येऽपि गुणाः स्मृताः ॥" इति। वर्त्तलोहस्य मिश्रत्वञ्चाग्रे वक्ष्यति। वर्त्तलोहं कंसलोहं "विदरी" इति ख्यातम्। लोहे कनकादिधातौ लुहधातुः इति मतः, लुहः लोहस्य पर्य्यायः इत्यर्थः। अनेकार्थ-वाची अगुरुलोहितसुवर्णादिबह्वर्थबोधकः। "तत्त्वार्थवाची" इति पाठे—स लुहाख्यः धातुर्लोहे तत्त्वार्थवाची लौहस्य प्रकृतार्थस्याय शब्दस्य बोधकः इत्यर्थः। "कर्षार्थ-वाची" इति पाठे—कर्षार्थबोधकः, कर्षपर्य्यायः इत्यर्थः ॥ १ ॥

अथ स्वर्णम् ।—

अथ स्वर्णस्य पञ्चविधत्वनिर्देश ।—

प्राकृतं सहज वह्निसम्भूतं खनिसम्भवम् ।
रसेन्द्रवेधसञ्जात स्वर्णं पञ्चविधं स्मृतम् ॥ २ ॥

तत्रादौ सर्वलोहप्राधान्यात् स्वर्णस्य पञ्चधा भेदमाह, प्राकृतमिति ।—प्राकृतं प्रकृत्या स्वभावेन निवृत्तम् अकृत्रिम, सृष्टेरादौ स्वभावत एव उत्पन्नत्वात , यद्वा— ब्रह्मण प्रकृतिभूतस्य अण्डस्य आवरकत्वात प्राकृतम् । सहज ब्रह्मणा सह जातं गर्भावरकस्य उल्वापराख्यस्य जरायो ब्रह्मणा सहैव निसृतत्वात । वह्निसम्भूतम् अग्नि-सम्भवम, अस्य विवृतिश्च अग्रे द्रष्टव्या । खनिसम्भव भूगर्भस्याकरजातम् । रसेन्द्रवेध सञ्जात रसेन्द्रस्य पारदस्य वेध स्वेदनाद्यूनविंशतिकर्मान्तर्गतकर्मविशेष, येन कर्मणा स्पर्शादिमात्रेणैव रसस्य अन्यपदार्थविद्धकरणशक्तिरुत्पद्यते सा च स्वर्णादिसंयोगे भवति, यदुक्त रसेन्द्रचिन्तामणौ—“अष्टानवतिभागस्तु रूप्यमेकञ्च हाटकम् । सूतकेन च वेध स्यात शतांशविधिरीरित ॥ चन्द्रस्यैकोनपञ्चाशत्तथा शुद्धस्य भास्वत । वह्नि-रेक शम्भुरेक शतांशविधिरीरित ॥ द्वावेव रजतयोनिताम्रयोनित्वेनोपचर्य्यते , एवं सहस्रवेधादयो जारणबीजवशादनुसर्त्तव्या । अतिविद्रुते तस्मिन् वेध्योऽसौ दण्डवेधेन । विद्ध रसेन यद्द्रव्य पश्चाद स्थापयेद्भुवि । तत आनीय नगरे विजानीत विचक्षण ॥” इति । तस्मात सञ्जात रसेन्द्रवेधकर्मणि उत्पन्नम् । रसेन्द्रवेधजस्वर्णस्य करणप्रकारो मातृकाभेदतन्त्रेऽप्युक्त, यथा—“आनीय पारद देवि । स्थापयेत् प्रस्तरोपरि । तस्योपरि जपेन्मन्त्र सवलक्ष्मयात्मकम ॥ साष्टसहस्रं देवेशि । प्रजपेत् साधकाग्रणी । स्वयम्भुपुष्पसयुक्ते वस्त्रे चारुणसन्निभे ॥ सस्थाप्य पारद देवि । मृत्पात्रयुगले शिवे ! । पुष्पयुक्तेन सूत्रेण बध्नीयात बहुयत्नत ॥ मृत्तिकया रक्तेनैव धान्यस्य परमेश्वरि ! । लेपयेत् बहुयत्नेन रौद्रे शुष्काणि कारयेत् ॥ पुनश्च लेपयेद्धीमान् ततो वह्नौ विनि-क्षिपेत । अष्टमीनवमीरात्रौ क्षिपेन्नैव सुरेश्वरि ! ॥ अथवा परमेशानि । मृत्पात्रे स्थापयेद्रसम् । वल्लीरसेन तद्द्रव्य शोधयेत् बहुयत्नत ॥ घृतनारीरसेनैव तथैव शोधन चरेत् । एव कृते तु गुटिका यदि स्यात् दृढबन्धना ॥ धुस्तूरञ्च समानीय मध्ये शून्यञ्च कारयेत् । कृष्णाख्यतुलसीयोगे तथा घृतकुमारिका ॥ एव कृते वह्नियोगे भस्मसात् जायते ध्रुवम् । भस्मयोगे भवेत् स्वर्णं धनदाया प्रसादत ॥ विवर्णं जायते द्रव्य यदि पूजा न चाचरेत् ॥” इति । राजनिघण्टौ पुन “तच्चैक रसवेधजं तदपर जात स्वय भूमिजम् । किञ्चान्यद्बहुलोहसङ्करभवञ्चेति त्रिधा काञ्चनम् ॥” इति

अथ स्वर्णरौप्ययोः सामान्यगुणाः।—

आयुर्लक्ष्मीप्रभाधीस्मृतिकरमखिलव्याधिविध्वंसि पुण्यं
भूतावेशप्रशान्ति-स्मरभरसुखद सौख्यपुष्टिप्रकाशि।
गाङ्गेयञ्चाथ रूप्यं गदहरमजराकारि मेहापहारि
क्षीणानां पुष्टिकारि स्फुटमतिकरणं वीर्यवृद्धिप्रकारि॥३॥

अथ प्राकृतस्वर्णस्योत्पत्तिः।—

ब्रह्माण्डं संवृतं येन रजोगुणभुवा खलु।
तत् प्राकृतमिति प्रोक्तं देवानामपि दुर्लभम्॥ ४॥

अथ सहजस्वर्णोत्पत्तिः।—

ब्रह्मा येनाऽऽवृतो जातः सुवर्णेन जरायुणा।
तन्मेरुरूपतां यातं सुवर्णं सहजं हि तत्॥ ५॥

यदस्य वैविध्यमुक्तं, तत् प्राकृतसहजयोः दुर्लभतया भूमिजान्तर्गणनया वा बोध्यम॥ २॥

स्वर्णरौप्ययोः सामान्यगुणमाह, आयुरिति।—गाङ्गेयं स्वर्णम्। स्फुटमतिकरणं चित्तोन्मेषसम्पादनम॥ ३॥

प्राकृतस्वर्णस्योत्पत्तिमाह, ब्रह्माण्डमिति।—रजोगुणभुवा रजोगुणोत्पन्नेन रजसः सृष्टिप्रवर्त्तकत्वात् ब्रह्मणश्च सृष्टिकर्त्तृत्वात तद्योने हैमाण्डस्यापि रजोगुणोद्भूतत्वं तथा कारणभूतहैमाण्डस्य रजोगुणसम्भवत्वात् कार्य्यभूतब्रह्मणोऽपि रजोगुणमयत्वं बोध्यम्, येन सुवर्णेन ब्रह्माण्डं ब्रह्मणः आधारभूतः स्वर्णमयः अण्डाकारः भुवनकोषः संवृतं पिहितम, यदुक्तं मनुसंहितायां—"सोऽभिध्याय शरीरात स्वात सिसृक्षुर्विविधाः प्रजाः। अप एव ससर्जादौ तासु बीजमवासृजत्॥ तदण्डमभवद्धैमं सहस्रांशु-समप्रभम्। तस्मिन् जज्ञे स्वयं ब्रह्मा सर्व्वलोकपितामहः॥" इति॥ ४॥

सहजस्वर्णस्योत्पत्तिमाह, ब्रह्मेति।—येन सुवर्णेन सुवर्णमयेन जरायुणा गर्भ-मन्दिररूपविष्णुनाभिपद्मेन आवृतः वेष्टितः, तदन्तःस्थः सन् इति यावत, ब्रह्मा जातः, तदुक्तं श्रीमद्भागवते—"पुरावरैषा भूतानामात्मा यः पुरुषः परः। स एवासीदिदं विश्वं कल्पान्तेऽन्यन्न किञ्चन॥ तस्य नाभेः समभवत् पद्मकोषो हिर-ण्मयः। तस्मिन्नजे महाराज! स्वयम्भुश्चतुराननः॥" इति॥ ५॥

अथ वह्निजस्वर्णोत्पत्तिः ।—

विसृष्टमग्निना शैवं तेजः पीतं सुदुःसहम् ।
अभूत् सर्वं समुद्दिष्टं सुवर्णं वह्निसम्भवम् ॥ ६ ॥

अथ प्राकृतादित्रयाणां लक्षणगुणौ ।—

एतत् स्वर्णत्रयं दिव्यं वर्णैः षोडशभिर्युतम् ।
धारणादेव तत् कुर्य्याच्छरीरमजरामरम् ॥ ७ ॥

अथ खनिजस्वर्णस्योत्पत्तिलक्षणगुणाः ।—

तत्र तत्र गिरीणां हि जातं खनिषु यद्भवेत् ।
तच्चतुर्दशवर्णाढ्यं भक्षितं सर्वरोगहृत् ॥ ८ ॥

अथ रसेन्द्रवेधजस्वर्णस्योत्पत्तिगुणौ ।—

रसेन्द्रवेधसम्भूतं तद्वेधजमुदाहृतम् ।
रसायनं महाश्रेष्ठं पवित्रं वेधजं हि तत् ॥ ९ ॥

वह्निजस्वर्णस्योत्पत्तिमाह, विसृष्टमिति ।—विसृष्टं त्यक्तम् । वह्निसम्भूतसुवर्णस्योत्पत्तिकथा यथा—प्रस्तुतस्य रुद्ररेतसः अग्निसङ्क्रान्तस्याग्निना दैवताप्रार्थनया गङ्गायामाहितस्य तया च वोढमसमर्थतया "समुत्ससर्ज्ज तं गर्भं मेरौ गिरिवरे तदा" इत्यनेन मेरौ निक्षिप्तस्य तस्य तेजसैव मेरोः सर्वं वस्तु सुवर्णीकृतं, तदेव वह्निजं सुवर्णं ज्ञेयम् , यथोक्तं भारतानुशासनिके—"तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः । यद्द्रव्यं परिसंसृष्टं पृथिव्यां पर्वतेषु च । तत् सर्वं काञ्चनीभूतं समन्तात् प्रत्यदृश्यत ॥ • •तस्मात् सुवर्णं माङ्गल्यं रत्नानामुत्तमोत्तमम् । सहजं कार्त्तिकेयस्य वह्नेस्तेजः परं मतम् ॥" इति ॥ ६ ॥

प्राकृतादीनां त्रिविधानां गुणमाह, एतदिति ।—स्वर्णत्रयं प्राकृतसहजवह्निसम्भूतत्रिविधसुवर्णम् ॥ ७ ॥

खनिजस्वर्णस्योत्पत्तिमाह, तत्रेति ।—गिरीणां विन्ध्यसुमेरुहिमाचलादिपर्वतानाम् । खनिषु आकरेषु । चतुर्दशवर्णाढ्यं चतुर्दशविधवर्णसम्पन्नम् ॥ ८ ॥

रसेन्द्रवेधजस्वर्णस्य विवृतिमाह, रसेन्द्रेति ।—एतस्य प्रकारस्तु प्रागेव प्रदर्शितः ॥ ९ ॥

अथ गुणाः।—

स्निग्धं मेध्यं विषगदहरं बृंहणं वृष्यमग्र्यं
यक्ष्मोन्मादप्रशमनपरं देहरोगप्रमाथि।
मेधाबुद्धिस्मृतिसुखकरं सर्वदोषामयघ्नं
रुच्यं दीपि प्रशमितरुजं स्वादुपाकं सुवर्णम्॥ १०॥

अथाशोधितामारितस्वर्णस्य दोषाः।—

सौख्यं वीर्य्यं बलं हन्ति रोगवर्गं करोति च।
अशुद्धममृतं स्वर्णं तस्माच्छुद्धञ्च मारयेत्॥ ११॥

अथ सुवर्णस्य सुवर्णसम्पादनम्।—

कर्षप्रमाणन्तु सुवर्णपत्रं शरावरुद्धं पटुधातुयुक्तम्।
अङ्गारसंस्थं प्रहरार्द्धमानं ध्मानेन तत् स्यान्ननु वर्णपूर्णम्॥१२॥

अथ लोहमारकद्रव्येषु उत्तमादिनिर्देशः।—

लोहानां मारणं श्रेष्ठं सर्वेषां रसभस्मना।
मूलिभिर्मध्यमं प्राहुः कनिष्ठं गन्धकादिभिः॥
अरिलोहेन लोहस्य मारणं दुर्गुणप्रदम्॥ १३॥

गुणमाह, स्निग्धमिति।—मेध्यं पवित्रम्। बृंहणं पुष्टिकरम्। वृष्यमग्र्यं श्रेष्ठवाजीकरम्। "यक्ष्मोन्माद" इत्यत्र "यक्षोन्माद" इति पाठे—यक्षग्रहावेशजोन्मादनाशनम्। दीपि अग्निवर्द्धकम्। प्रशमितरुजं रुजाप्रशमकम्॥ १०॥

अशुद्धामृतस्वर्णस्य दोषमाह, सौख्यमिति।—सुगमम्॥ ११॥

स्वर्णस्य प्रशस्तवर्णसम्पादनप्रकारमाह, कर्षेति।—पटुधातुः गन्धकः। कण्टकवेध्यं कर्षप्रमाणं स्वर्णपत्रं गन्धकेन सह शरावसम्पुटे रुद्ध्वा निर्धूमाङ्गाराग्नौ संस्थाप्य अर्द्धप्रहरं यावत् भस्त्रया ध्मापनेन वर्णोत्कर्षतां याति॥ १२॥

लोहमारणे प्रवरावरादिसहाययोगमाह, लोहानामिति।—लोहानां स्वर्णाद्यष्टविधलोहानाम्। मूलिभिः ओषधीनां मूलविशेषैः इत्यर्थः। अरिलोहेन लोहारिणा हरितालेनेति यावत्। दुर्गुणप्रदम् अपकर्षतासम्पादकमित्यर्थः॥ १३॥

अथ स्वर्णमारणम् ।—

क्षत्वा कण्टकवेध्यानि स्वर्णपत्राणि लेपयेत् ।
लुङ्गाम्बु भस्मसूतेन म्रियते दशभिः पुटैः ॥ १४ ॥

मतान्तरम् ।—

द्रुते विनिक्षिपेत् स्वर्णे लोहमानं मृतं रसम् ।
विचूर्ण्य लुङ्गतोयेन दरदेन समन्वितम् ॥
जायते कुङ्कुमच्छाय स्वर्णं द्वादशभि. पुटै' ॥ १५ ॥

मतान्तरम् ।—

हेम्नः पादं मृतं सूतं पिष्टमम्लेन केनचित् ।
पत्रे लिप्ता पुटैः पश्चादष्टभिर्म्रियते ध्रुवम् ॥ १६ ॥

अथ स्वर्णद्रावणम् ।—

मण्डूकास्थिवसाटङ्क-हयलालेन्द्रगोपकै' ।
प्रतिवापेन कनकं सुचिर तिष्ठति द्रुतम् ॥ १७ ॥

मारणमाह, क्षत्वेति ।—लुङ्गाम्बु मातुलुङ्गरस । भस्मसूत पारदभस्म, रससिन्दूर-मित्यर्थ ॥ १४ ॥

मतान्तरमाह, द्रुते इति ।—द्रुते गलिते । लोहमानं स्वर्णपरिमितम् । दरदेन हिङ्गुलेन । टङ्कणादिद्रावणवर्गेण द्राविते स्वर्णे तुल्यमान पारदभस्म तथा हिङ्गुलञ्च प्रक्षिप्य मातुलुङ्गरसेन सम्पिष्य पुटो देय., एव द्वादशपुटेन स्वर्णस्य कुङ्कुमवर्णं भस्म जायते ॥ १५ ॥

मतान्तरमाह. हेम्न इति ।—शुद्धसुवर्णस्य चतुर्थांश सूतभस्म जम्बीराद्यम्लाना केनापि सम्पिष्य तेन कल्केन कण्टकवेध्यस्वर्णपत्रौ लिप्ता लघुपुटो देय , एवमष्ट-कृत्व कार्य्यम् ॥ १६ ॥

द्रावणमाह, मण्डूकेति ।—मण्डूकास्थिवसा भेकास्थि भेकवसा च । हयलाला अश्वलाला । "हयलाला" इत्यत्र "हयमार" इति पाठे—करवीर इत्यर्थ बोध्य । इन्द्रगोपक' रक्तवर्णवार्षिककीटविशेष "आषाढे पोका" इति "वीरवहुटी" इति वा भाषा । प्रतिवाप गलितस्य धातो द्रव्यान्तरेण अवचूर्णनम् । विशुद्धसुवर्णं द्रावणवर्गेण वह्नौ द्रावितं मण्डूकास्थ्यादिभि अवचूर्णने अवचूर्णित सुचिरकाल द्रुतं तिष्ठति इति ॥ १७ ॥

अथ द्रावणान्तरम्।—

चूर्णं सुरेन्द्रगोपाणां देवदालीफलद्रवैः।
भावितं सदृशं हेम करोति जलवद्द्रुतम्॥ १८॥

अथ मारितस्वर्णस्य प्रयोगविधिः।—

एतद्भस्म सुवर्णजं कटुघृतोपेतं द्विगुञ्जोन्मितं
लीढं हन्ति नृणां क्षयाग्निसदनं श्वासञ्च कासारुचिम्।
ओजोधातुविवर्द्धनं बलकरं पाण्ड्वामयध्वंसनं
पथ्यं सर्वविषापहं गरहरं दुष्टग्रहघ्नादिनुत्॥ १९॥

अथ अमारितस्य स्वर्णस्य दोषः।—

बलञ्च वीर्य्यं हरते नराणां रोगव्रजं कोपयतीव काये।
असौख्यकारञ्च सदैव हेमाऽपक्कं सदोषं मरणं करोति॥२०॥

[इति स्वर्णाधिकारः]।

प्रकारान्तरमाह, चूर्णमिति।—सुरेन्द्रगोपः इन्द्रगोपकीटः। देवदाली हस्तिघोषकः। सदृशं हेमतुल्यमित्यर्थः, सुरेन्द्रगोपाणां चूर्णमित्यनेनान्वयः। अत्र हेम इति कर्मपदं बोध्यम्। इन्द्रगोपकीटचूर्णं स्वर्णतुल्यमानं हस्तिघोषकफलरसैः भावयित्वा तच्चूर्णयेत्, तस्यावचूर्णनेन स्वर्णं जलवत् तरलं भवति॥ १८॥

मृतस्वर्णस्य प्रयोगविधिमाह, एतदिति।—कटुशब्देनात्र त्रिकटुर्बोध्यः क्षयादिहन्तृत्वात्, त्रिकटुचूर्णघृताभ्यां सह द्विगुञ्जोन्मितं सुवर्णजं भस्म इति योज्यः यद्वा—कटुघृतोपेतम् अपेतमाधुर्य्यपुराणघृतसंयुक्तम्। ओजोधातुविवर्द्धनं "हृदि तिष्ठति यच्छुद्धं रक्तमीषत् सपीतकम्। ओजः शरीरे सङ्ख्यातं तन्नाशान्ना विनश्यति॥" अन्यच्च—"अष्टविन्दुप्रमाणं तदीषद्रक्तं सपीतकम्। अग्निसोमात्मकत्वेन द्विरूपं वर्णितञ्च तत्॥" अन्यच्च—"ओजश्च तेजो धातूनां शुक्रान्तानां परं स्मृतम्। हृदयस्थमपि व्यापि देहस्थितिनिबन्धनम्॥" इत्याद्युक्तलक्षणस्य रसादिशुक्रान्तसर्वधातुसारं धातुविशेषस्य वृद्धिकारकम्। गरहरं संयोगजविषनाशनं, कृत्रिमविषापहारकमिति यावत्, गरस्वरूपं यथा वाग्भटे—"नानाप्राण्यङ्गशमलं विरुद्धौषधभस्मनाम्। विषाणाञ्चाल्पवीर्य्याणां योगो गर इति स्मृतः॥" इति॥ १९॥

अमृतस्वर्णस्य दोषमाह, बलमिति।—हेमापक्कम् अमृतं, स्वर्णमित्यर्थः। श्लोकोऽयं प्रक्षिप्त इति केचित्॥ २०॥

अथ रजतम् ।—

अथ रौप्यस्य वैविध्यनिर्देशः ।—

सहजं खनिसञ्जातं कृत्रिमं त्रिविधं मतम् ।
रजतं पूर्वपूर्वं हि स्वगुणैरुत्तरोत्तरम् ॥ २१ ॥

अथ सहजरौप्यस्योत्पत्तिर्गुणाश्च ।—

कैलासाद्यद्रिसम्भूतं सहजं रजतं भवेत् ।
तत् स्पृष्टं हि सकृत् व्याधिनाशनं देहिनां भवेत् ॥ २२ ॥

अथ खनिजरौप्यस्योत्पत्तिर्गुणाश्च ।—

हिमाचलादिकूटेषु यद्रूप्यं जायते हि तत् ।
खनिजं कथ्यते तज्ज्ञैः परमं हि रसायनम् ॥ २३ ॥

अथ कृत्रिमरौप्यस्योत्पत्तिर्गुणाश्च ।—

श्रीरामपादुकान्यस्तं वङ्गं यद्रूप्यतां गतम् ।
तत् पादरूप्यमित्युक्तं कृत्रिमं सर्वरोगनुत् ॥ २४ ॥

अथोत्तमरौप्यलक्षणम् ।—

घनं स्वच्छं गुरु स्निग्धं दाहे छेदे सितं मृदु ।
शङ्खाभं मसृणं स्फोटरहितं रजतं शुभम् ॥ २५ ॥

रजतस्य वैविध्यमाह, सहजमिति ।—स्वगुणैः आत्मगुणैः, रजतसहजगुणैरित्यर्थः, उत्तरोत्तरं श्रेष्ठात् श्रेष्ठतरमित्यर्थः, उत्तरशब्दोऽत्र श्रेष्ठार्थको बोध्यः, कृत्रिमापेक्षया खनिजं तदपेक्षया च सहजं गुणाधिकमित्यर्थः ॥ २१ ॥

सहजस्योत्पत्तिं गुणांश्चाह, कैलासादीति ।—सकृत् एकवारम् ॥ २२ ॥

खनिजस्योत्पत्तिं गुणांश्चाह हिमाचलादीति ।—कूटेषु शिखरेषु ॥ २३ ॥

कृत्रिमरौप्यस्योत्पत्तिं गुणांश्चाह, श्रीरामेति ।—श्रीरामचन्द्रस्य पादुकानिबद्धं वङ्गं यत् रौप्यत्वं प्राप्तं, तत्पादस्पर्शात् इति शेषः । पादरूप्यं चरणसंस्पर्शजनित-रौप्यम् ॥ २४ ॥

प्रशस्तरौप्यलक्षणमाह, घनमिति ।—घनं निबिडावयवं, नीरन्ध्रमिति यावत् । स्वच्छं निर्मलम् । दाहे तथा छेदेऽपि सितम् अन्तः शुभ्रम् । मृदु अदारुणं, सुखस्पर्श-मित्यर्थः । स्फोटरहितं व्रणवत् गर्त्तरहितम् ॥ २५ ॥

अथापकृष्टरौप्यलक्षणम् ।—

दाहे रक्तञ्च पीतञ्च कृष्णं रूक्षं स्फुटं लघु ।
स्थूलाङ्गं कर्कशाङ्गञ्च रजतं त्याज्यमष्टधा ॥ २६ ॥

अथ रौप्यगुणाः ।—

रूप्यं विपाकमधुरं तुवराम्लसारं
शीतं सरं परम-लेखनकञ्च रूप्यम् ।
स्निग्धञ्च वातकफजिज्जठराग्निदीपि
बल्यं परं स्थिरवयस्करणञ्च मेध्यम् ॥ २७ ॥

अथ गुणान्तरम् ।—

रौप्यं शीतं कषायाम्लं स्निग्धं वातहरं गुरु ।
रसायनविधानेन सर्वरोगापहारकम् ॥ २८ ॥

अथ स्वर्णादिशोधनम् ।—

तैले तक्रे गवां मूत्रे ह्यारनाले कुलित्थजे ।
क्रमान्निषेचयेत्तप्तं द्रावे द्रावे तु सप्तधा ॥
स्वर्णादिलोहपत्राणां शुद्धिरेषा प्रशस्यते ॥ २९ ॥

अथ अशोधितमारितरौप्यस्य दोषाः ।—

आयुः शुक्रं बलं हन्ति तापविड्बन्धरोगकृत् ।
अशुद्धममृतं तारं शुद्धं मार्य्यमतो बुधैः ॥ ३० ॥

निकृष्टरौप्यलक्षणमाह, दाहे इति ।—स्फुटं भिन्नं, विदीर्णमिति यावत्, "स्फुटं यत् घनाहतं स्फुटति" इति भावमिश्रः ॥ २६ ॥

गुणमाह, रूप्यमिति ।—तुवराम्लसारं कषायाम्लरसमित्यर्थः । सरं सारकमित्यर्थः । लेखनकं "धातून् मलान् वा देहस्य विशोष्योल्लेखयेच्च यत् । लेखनं तत्" इति-लक्षणोक्तकर्शकारकमित्यर्थः ॥ २७ ॥

मतान्तरे गुणमाह, रौप्यमिति ।—सुगमम् ॥ २८ ॥

शोधनमाह, तैले इति ।—कुलित्थजे कुलत्थक्वाथे । काष्टकवेध्यं रौप्यपत्रम् अग्नौ प्रताप्य प्रताप्य क्रमात् तैलादौ प्रत्येकं सप्तकृत्वः निषिञ्चेत्, एवं रजतं शुद्धिमायाति । स्वर्णादिसर्वलोहानामपि शोधने अयमेव क्रमः प्रशस्तः ॥ २९ ॥

अथ रौप्यस्य विशेषशोधनम् ।—

नागेन टङ्कणेनैव वापितं शुद्धिमृच्छति ।
तारं त्रिवारं निक्षिप्तं तैले ज्योतिष्मतीभवे ॥ ३१ ॥

मतान्तरम् ।—

खर्परे भस्मचूर्णाभ्यां परितः पालिकां चरेत् ।
तत्र रूप्यं विनिक्षिप्य समसीससमन्वितम् ॥ ३२ ॥
जातसीसक्षयं यावद्धमेत्तावत्पुनः पुनः ।
इत्थं संशोधितं रूप्यं योजनीयं रसादिषु ॥ ३३ ॥

अथ रौप्यमारणम् ।—

लकुचद्रवसूताभ्यां तारपत्रं प्रलेपयेत् ।
ऊर्द्धाधो गन्धकं दत्त्वा मूषामध्ये निरुध्य च ॥ ३४ ॥
स्वेदयेद्वालुकायन्त्रे दिनमेकं दृढाग्निना ।
स्वाङ्गशीतां च तां पिष्टिं साम्लतालेन मर्दिताम् ॥
पुटेद्द्वादशवाराणि भस्मीभवति रूप्यकम् ॥ ३५ ॥

अशोधितान्तरौप्यस्य दोषमाह आयुरिति ।—सुगमम् ॥ ३० ॥

रौप्यस्य विशेषशोधनमाह नागेनेति ।—वापितं कल्कीकृतं, पिष्टमित्यर्थः । तैले ज्योतिष्मतीभवे ज्योतिष्मती "लताफट्की" इति भाषा, तत्फलसम्भूते तैले । कण्टकवेधार्हं रौप्यपत्रं समपरिमितसीसकभस्मटङ्कणचूर्णाभ्यां सह पिष्ट्वा वारत्रयं ज्योतिष्मतीफलोत्थतैले निक्षिपेत्, तेन शुद्धिं याति ॥ ३१ ॥

मतान्तरमाह खर्परे इति ।—भस्मचूर्णाभ्यां सीसकभस्मटङ्कणचूर्णाभ्याम् । पालिकाम् आलवालम् । अत्रायं विधिः —नागभस्मटङ्कणचूर्णं जलेन पिष्ट्वा तत्पिण्डेन सरखर्परं परितः आलवालं रचयित्वा तन्मध्ये समसीसचूर्णपिष्टरौप्यं निक्षिप्य तावत् भस्त्रया धमेत यावत् सीसक्षयो न भवेदिति ॥ ३२।३३ ॥

मारणमाह, लकुचेति ।—साम्लतालेन सकाञ्जिकहरितालेन , लकुचद्रवसूताभ्यां रौप्यपत्रं प्रलिप्य मूषामध्ये ऊर्द्धाधो गन्धकं दत्त्वा संस्थाप्य मृत्कर्पटादिना सन्धिरोधं कृत्वा च आतपे शोषयेत्, ततः दिनमेकं तीव्राग्निना वालुकायन्त्रे पचेत्, ततः स्वाङ्गशीतं तमुद्धृत्य भूयः काञ्जिकहरितालाभ्यां पेषयित्वा द्वादशवारं पुटेदिति ॥ ३४।३५ ॥

मतान्तरम्।—

माचीकचूर्णलुङ्गाम्ल-मर्दितं पुटितं शनैः।
त्रिंशद्वारेण तत्तारं भस्मसाज्जायतेतराम्॥ ३६॥

अथ रौप्यस्य निरुत्थभस्मीकरणम।—

भाव्यं ताप्यं स्नुहीक्षीरैस्तारपत्राणि लेपयेत्।
मारयेत् पुटयोगेन निरुत्थं जायते ध्रुवम्॥ ३७॥

अथ निरुत्थभस्मीकरणे मतान्तरम्।—

तारपत्रं चतुर्भाग भागैक शुद्धतालकम।
मर्द्यं जम्बीरजद्रावैस्तारपत्राणि लेपयेत्॥ ३८॥
शोषयेदन्धयन्त्रे च त्रिंशदुत्पलकैः पचेत्।
चतुर्दशपुटैरेवं निरुत्थं जायते ध्रुवम्॥ ३९॥

अथ स्वर्णरौप्ययोर्द्रावणम।—

सप्तधा नरमूत्रेण भावयेद्देवदालिकाम्।
तच्चूर्णावापमात्रेण द्रुतिः स्यात् स्वर्णतारयोः॥ ४०॥

मतान्तरमाह, माचीकेति।—लुङ्गाम्ल मातुलुङ्ग॥ ३६॥

रौप्यस्य निरुत्थभस्मप्रकारमाह, भाव्यमिति।—ताप्य स्वर्णमाक्षिकम, स्नुहीक्षीरे सप्ताह स्वर्णमाक्षिकं भावयित्वा तेन रौप्यपत्र प्रलिप्य यावन्मृति पुटेत, एवं रौप्यस्य निरुत्थ भस्म जायते॥ ३७॥

निरुत्थभस्मीकरणे मतान्तरमाह, तारपत्रमिति।—अन्धयन्त्रे अन्धमूषायाम, इदमेव वज्रमूषानाम्ना ख्याता इति केचित। तल्लक्षणं यथा—"अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा। सैवाच्छिद्रान्विता मध्ये गम्भीरा सारणोचिता॥ द्वौ भागौ तुषदग्धस्य एका वल्मीकमृत्तिका। लौहकिट्टस्य भागैकं श्वेतपाषाणभागिकम॥ नरकेशसमं किञ्चित छागीक्षीरेण पेषयेत। यामद्वय दृढ मर्द्य तेन मूषा सुसम्पुटाम॥ शोषयित्वा रस क्षिप्वा तत्कल्कै सन्निरोधयेत। वज्रमूषेयमाख्याता सम्यक् पारदसाधिका॥" इत्यपि। एतदन्याक्तवज्रमूषालक्षणमग्रे द्रष्टव्यम। उत्पलकै वन्यकरीषै॥३८।३९॥

स्वर्णरौप्ययो द्रावणमाह, सप्तधेति।—देवदालिका हस्तिघोषक। तच्चूर्णावापमात्रेण नृमूत्रभावितहस्तिघोषकमूलचूर्णप्रक्षेपमात्रेण॥ ४०॥

अथ रौप्यप्रयोगः ।—

भस्मीभूतं रजतममलं तत्समौ व्योमभानू
सर्वैस्तुल्यं त्रिकटु सवरं सारघाज्येन युक्तम् ।
लीढं प्रातः क्षपयतितरां यक्ष्मपाण्डूदरार्शः
श्वासं कासं नयनजरुजः पित्तरोगानशेषान् ॥ ४१ ॥

[इति रजताधिकारः] ।

अथ ताम्रम् ।—

अथ ताम्रस्य द्वैविध्यनिर्देशः ।—

म्लेच्छं नेपालकञ्चेति तयोर्नैपालमुत्तमम् ।
नेपालादन्यखन्युत्थं म्लेच्छमित्यभिधीयते ॥ ४२ ॥

अथ म्लेच्छताम्रस्य लक्षणम् ।—

सितकृष्णारुणच्छायमतिवामि कठोरकम् ।
क्षालितञ्च पुनः कृष्णमेतन्म्लेच्छकताम्रकम् ॥ ४३ ॥

अथ नेपालताम्रलक्षणम् ।—

सुस्निग्धं मृदुलं शोणं घनघातक्षमं गुरु ।
निर्विकारं गुणश्रेष्ठं ताम्रं नेपालमुच्यते ॥ ४४ ॥

रजतप्रयोगमाह, भस्मीभूतमिति ।—तत्समौ प्रत्येकं मृतरजतसमौ । व्योमभानू मृताभ्रताम्रे । सर्वैरिति ।—मिलिततिकटुत्रिफलाचूर्णं रजतादीनां मिलितचूर्णसमम् । सारघाज्येन क्षौद्रघृतेन । अस्य पत्री यथा—रौप्यभस्म र २, अभ्रभस्म र २, ताम्रभस्म र २, त्रिकटु प्र र १, त्रिफला प्र र १, अतुल्यघृतमधुना सम्मर्द्य प्रातः लेह्यम् ॥ ४१ ॥

ताम्रस्य द्वैविध्यं परिचययन्नाह, म्लेच्छमिति ।—नेपालकं नेपालदेशीयखनि-समुत्थम् ॥ ४२ ॥

म्लेच्छताम्रस्य लक्षणमाह, सितेति ।—अतिवामि वमनातिशय्यकारकम् ॥ ४३ ॥

नेपालताम्रस्य लक्षणमाह, सुस्निग्धमिति ।—शोणं जपाकुसुमसङ्काशरक्तवर्णम् । घनघातक्षमं पुनः पुनराघातसहम् । निर्विकारम् अतिवामकादिदोषपरिशून्यम् इत्यर्थः ॥ ४४ ॥

अथ रसकर्मनिर्दिष्टताम्रलक्षणम्।—

पाण्डुरं कृष्णशोणञ्च लघु स्फुटनसंयुतम्।
रूक्षाङ्गं सदलं ताम्रं नेष्यते रसकर्मणि॥ ४५॥

अथ ताम्रस्य गुणाः।—

ताम्रं तिक्तकषायकञ्च मधुरं पाकेऽथ वीर्य्योष्णकं
साम्लं पित्तकफापहं जठररुक्कुष्ठामजन्त्वन्तकृत्।
ऊर्द्धाधःपरिशोधनं विष-यकृत् स्थौल्यापहं लुत्कर
दुर्नामक्षयपाण्डुरोगशमनं नेत्रं परं लेखनम्॥ ४६॥

अथाशोधितामारिततामस्य दोषाः।—

अशुद्धं ताम्रमायुर्घ्नं कान्तिवीर्य्यबलापहम्।
वान्तिमूर्च्छाभ्रमोत्क्लेद न मृत कुष्ठशूलकृत्॥ ४७॥
उत्क्लेदभेदभ्रमदाहमोहास्ताम्रस्य दोषा खलु दुर्द्धरास्ते।
विशोधनात्तद्विगतस्वदोषं सुधासमं स्याद्रसवीर्य्यपाके॥४८॥

अथ ताम्रशोधनम्।—

ताम्रं क्षाराम्लसयुक्तं द्रावितं दत्तगैरिकम्।
निक्षिप्तं महिषीतक्रे छगणे सप्तवारकम्॥
पञ्चदोषविनिर्मुक्तं सप्तवारेण जायते॥ ४९॥

रसकर्मायोग्यताम्रलक्षणमाह, पाण्डुरमिति।—कृष्णशोणं धूम्रवर्णम्। स्फुटन-संयुतं विदीर्णप्रायम्। सदलं सपत्रं, पटलसंयुतमिति यावत्, "दल ओर इति लोके" इति भावमिश्रः॥ ४५॥

गुणमाह, ताम्रमिति।—पाके मधुरमिति योज्यम्। जन्तु क्रिमि। ऊर्द्धाध-परिशोधनं वमनविरेचनकारकम्। लेखनं लेखनगुणविशिष्टम्॥ ४६॥

अशुद्धामृतस्य दोषमाह, अशुद्धमिति।—उत्क्लेदम् उत्थापितवमनवेगम्। दुर्द्धरा दुर्वारा॥ ४७।४८॥

शोधनमाह, ताम्रमिति।—क्षाराम्लसंयुक्तं यवक्षार-काञ्जिकाद्यम्लसहितम्। छगणे करीषे। पञ्चदोषविनिर्मुक्तम् उत्क्लेदभेदभ्रमदाहमोहदोषशून्यम्। क्षाराम्लमर्दितं ताम्रं छगणे द्रवीकृत्य तत्र गैरिकचूर्णं दत्त्वा महिषीतक्रे निक्षिपेत्, एवं सप्तवारम्॥ ४९॥

मतान्तरम्।—

ताम्रनिर्मलपत्राणि लिप्ता निम्बुम्बुसिन्धुना।
ध्मात्वा सौवीरकक्षेपात् विशुध्यत्यष्टवारतः॥ ५० ॥

मतान्तरम्।—

निम्बुम्बुपटुलिप्तानि तापितान्यष्टवारकम्।
विशुध्यन्त्यर्कपत्राणि निर्गुण्ड्या रसमज्जनात्॥ ५१ ॥

मतान्तरम्।—

गोमूत्रेण पचेद्यामं ताम्रपत्रं दृढाग्निना।
शुध्यते नात्र सन्देहो मारणञ्चाप्यथोच्यते॥ ५२ ॥

अथ ताम्रमारणम्।—

जम्बीर-रससम्पिष्ट रसगन्धकलेपितम्।
शुल्वपत्रं शरावस्थं त्रिपुटैर्याति पञ्चताम्॥ ५३ ॥

अथ रसरत्नाकरोक्ताम्रतीकरणम्।—

अथवा मारितं ताम्रमम्लेनैकेन मर्दितम्।
तद्गोलं शूरणस्यान्ता-रुद्धा सर्वत्र लेपयेत्॥ ५४ ॥
शुष्क गजपुटे पश्चात् सर्वदोषहर भवेत्।
वान्तिं भ्रान्तिं विरेकञ्च न करोति कदाचन॥ ५५ ॥

मतान्तरमाह, ताम्रेति।—निम्बुम्बुसिन्धुना जम्बीररस सैन्धवलवणेन। सौवीरक्षेपात निस्तुषयवकृतकाञ्जिके निक्षेपात॥ ५० ॥

मतान्तरमाह, निम्बिति।—निम्बुम्बु इत्यादौ पटु सैन्धवलवणम्। निर्गुण्ड्या सिन्दुवारस्य। जम्बीररसमिश्रसैन्धवलवणेन ताम्रपत्राणि लिप्ता अग्नौ प्रताप्य निर्गुण्डीरसे निक्षिपेत, एवमष्टवारान्॥ ५१ ॥

मतान्तरमाह, गोमूत्रेणेति।—सुगमम्॥ ५२ ॥

मारणमाह, जम्बीरेति।—जम्बीररसपिष्टकज्जल्या ताम्रपत्री लिप्ता शरावसम्पुटे रुद्धा पुटत्रय देय, तेन ताम्र भस्मीभवति॥ ५३ ॥

रसरत्नाकरोक्ताम्रतीकरणमाह, अथवेति।—अथवा-शब्दोऽत्र तद्गन्योक्तप्रक्रिया-

अथ मारणान्तरम्।—

ताम्रपत्राणि सूक्ष्माणि गोमूत्रे पञ्चयामकम्।
क्षिप्त्वा रसेन भाण्डे तद्द्विगुणं देहि गन्धकम्॥ ५६॥
अम्लपर्णीं प्रपिष्याथ ह्यभितो देहि ताम्रकम्।
सम्यङ्निरुध्य भाण्डे तमग्निं ज्वालय यामकम्॥
भस्मीभवति ताम्रं तद्यथेष्टं विनियोजयेत्॥ ५७॥

अथ सोमनाथोक्तताम्रप्रयोग।—

शुल्वतुल्येन सूतेन बलिना तत्समेन च।
तदर्द्धांशेन तालेन शिलया च तदर्द्धया॥ ५८॥
विधाय कज्जलीं श्लक्ष्णां भिन्नकज्जलसन्निभाम्।
यन्त्राध्यायविनिर्दिष्ट-गर्भयन्त्रोदरान्तरे॥ ५९॥
कज्जलीं ताम्रपत्राणि पर्य्यायेण विनिक्षिपेत्।
प्रपचेद्यामपर्य्यन्तं स्वाङ्गशीतं विचूर्णयेत्॥ ६०॥
तत्तद्रोगहरानुपानसहितं ताम्रं हिवल्लोन्मितं
संलीढं परिणामशूलमुदरं शूलञ्च पाण्डुज्वरम्।
गुल्मप्लीहयकृत् क्षयाग्निसदनं मेहञ्च मूलामयं
दुष्टाञ्च ग्रहणीं हरेद्ध्रुवमिदं तत् सोमनाथाभिधम्॥ ६१॥

न्तरापेक्षया बोध्य। मृतताम्र येन केनापि एकेनाम्लेन मर्दयित्वा पिण्ड कुर्य्यात, तत शूरणकन्दगर्भे तत् पिण्ड संस्थाप्य मुख रुद्ध्वा मृत्कर्पटादिना लेपयेत, शुष्के गजपुटो देय॥ ५४।५५॥

मारणान्तरमाह, ताम्रपत्राणीति।—अम्लपर्णी चाङ्गेरी। कण्टकवेध्यताम्रपत्र गोमूत्रे क्षिप्त्वा पञ्चयाम स्थापयेत, तत उद्धृत्य खल्ले समानपारदेन सहितं ताम्रद्विगुण गन्धक दत्त्वा सम्मर्द्य चाङ्गेरीकल्केन तत सरसगन्धक ताम्रपत्र लेपयेत्, ततो भाण्डमध्ये सम्यक् निरुध्य याम यावत् ज्वाला देया, तेन भस्मीभवति॥ ५६।५७॥

सोमनाथोक्तताम्रप्रयोगमाह, शुल्वेति।—शुल्व ताम्रम्। बलिना तत्समेन पारद-तुल्येन गन्धकेन। तदिति।—गन्धकार्द्धेन हरितालेन हरितालार्द्धेन मनःशिलाचूर्णेन चेत्यर्थ। यन्त्रेति।—"गर्भयन्त्र प्रवक्ष्यामि पिष्टिकाभस्मकारकम्" इत्यादिना

अथ ग्रन्थान्तरोक्तताम्रप्रयोग ।—

सूताद्द्विगुणितं ताम्र-पत्रं कन्यारसैः प्लुतम् ।
पिष्ट्वा तुल्येन बलिना भाण्डमध्ये विनिक्षिपेत् ॥ ६२ ॥
रुद्ध्वा शरावकेणैतत्तदूर्ध्वं लवणं त्यजेत् ।
मुखे शरावकं दत्त्वा वह्निं यामचतुष्टयम् ॥ ६३ ॥
अवचूर्ण्यैव तच्छुल्वं वल्लमात्रं प्रयोजयेत् ।
पिप्पलीमधुना सार्द्धं सर्वरोगेषु योजयेत् ॥ ६४ ॥
श्वासं कासं क्षयं पाण्डुमग्निमान्द्यमरोचकम् ।
गुल्मप्लीहयकृन्मूर्छा-शूलपक्त्यर्थमुत्तमम् ॥ ६५ ॥
दोषत्रयसमुद्भूतानामयान् जयति ध्रुवम् ।
रोगानुपानसहित जयेद्धातुगतं ज्वरम् ॥
रसे रसायने चैव योजयेद्युक्तमात्रया ॥ ६६ ॥

[इति ताम्राधिकारः] ।

अथायः ।—

अथायोभेदा ।—

मुण्डं तीक्ष्णञ्च कान्तञ्च त्रिप्रकारमयः स्मृतम् ॥ ६७ ॥

वक्ष्यमाणदशमाध्यायोक्तगर्भयन्त्रमध्ये । आदौ यथानिर्दिष्टा कज्जली कियत्परिमाणा मूषाया सस्थाप्य तदुपरि ताम्रपत्री तदुपरि पुन कज्जली तदुपरि ताम्रपत्री तत कज्जलीमेवक्रमेण सस्थाप्य याम यावत गर्भयन्त्रे पचेत्, स्वाङ्गशीत यदा भवेत तदा विचूर्ण्य स्थापयेत् । तत्तदिति ।—यस्मिन् यस्मिन् रोगे ताम्र प्रयोज्य, तत्तद्रोगनाशकानुपानसहितम् । सोमनाथाभिध सोमनाथप्रोक्तत्वात् सोम नाथाह्वम् ॥ ५८—६१ ॥

ग्रन्थान्तरोक्तताम्रप्रयोगमाह, सूतादिति ।—पारदापेक्षया द्विगुण ताम्रपत्र घृतकुमारीरसेनाप्लाव्य तेनैव पिष्ट्वा भाण्डमध्ये सस्थाप्य च ताम्रतुल्यगन्धकमूर्द्धाधो दत्त्वा स्वल्पशरावकेण पिधाय लवणेनोर्द्ध्वे पूरयेत, ततो भाण्डमुख शरावान्तरेणाच्छाद्य यामचतुष्टय वह्निना पचेत ॥ ६२—६६ ॥

लौहस्य भेदानाह, मुण्डमिति ।—मुण्ड कृषिलौहम् । तीक्ष्णं कक्रलौहम्, इस्पात्" इति भाषा । कान्तम् अयस्कान्त, कान्तलौहमिति यावत् ॥ ६७ ॥

अथ मुण्डलौहस्य वैविध्यम्।—

मृदु कुण्ठं कडारञ्च त्रिविधं मुण्डमुच्यते ॥ ६८ ॥

अथ मृदुमुण्डलक्षणम्।—

द्रुतद्रावमविस्फोटं चिक्कणं मृदु तच्छुभम् ॥ ६९ ॥

अथ कुण्ठमुण्डलक्षणम्।—

हतं यत् प्रसरेद्दुःखात्तत् कुण्ठं मध्यम स्मृतम् ॥ ७० ॥

अथ कडारमुण्डलक्षणम्।—

यद्धतं भज्यते भङ्गे कृष्णं स्यात्तत् कडारकम् ॥ ७१ ॥

अथ मुण्डगुणा।—

मुण्डं परं मृदुलकं कफवातशूल
मूलाममेहगद-कामलपाण्डुहारि।
गुल्मामवातजठरार्त्तिहरं प्रदीपि
शोफापहं रुधिरकृत् खलु कोष्ठशोधि ॥ ७२ ॥

अथ अशुद्धलौहस्य दोषा।—

अशुद्धलोहं न हितं निषेवणा-
दायुर्बलं कान्तिविनाशि निश्चितम्।

तत्रादौ मुण्डलौहस्य भेदमाह, मृद्विति।—कडारमित्यत्र कुठारमिति पाठान्तरम् ॥ ६८ ॥

मुण्डभेदस्य मृदुनो लक्षणमाह, द्रुतेति।—द्रुतद्रावम् अग्नौ शीघ्रद्रवणशीलम्। अविस्फोटं विस्फोटाकृति-गण्डादिशून्यगात्रम्, यद्वा—स्फुटनादिरहितम्, अभङ्गुरमिति यावत्। चिक्कणं स्निग्धम् ॥ ६९ ॥

कुण्ठस्य लक्षणमाह, हतमिति।—पत्रीकरणार्थम् अग्नौ दग्ध्वा आघातितमपि कृच्छ्रेण विस्तारं गच्छेत। मध्यमं मध्यगुणविशिष्टम् ॥ ७० ॥

कडारस्य लक्षणमाह, यदिति।—पूर्ववत् आघातितं सत् अल्पेनैव भग्नतां याति। मृदुकुण्ठयोरुत्तममध्यमत्वोक्त्या अनुक्तमपि एतस्य अधमत्वमर्थाद्‌व्यज्यते। कडारकमित्यत्रापि कुठारकमिति पाठान्तरम् ॥ ७१ ॥

मुण्डलौहस्य गुणमाह, मुण्डमिति।—परं मृदुलकम् अत्यर्थं मृदु, तीक्ष्णकान्तापेक्षया हीनगुणमित्यर्थः ॥ ७२ ॥

हृदि प्रपीडां तनुते ह्यपाटवं
रुजं करोत्येव विशोध्य मारयेत् ॥ ७३ ॥

अथ तीक्ष्णलौहस्य षड्विधत्वम् ।—

खरं सारञ्च हृन्नालं तारावट्टञ्च वाजिरम् ।
काललोहाभिधानञ्च षड्विधं तीक्ष्णमुच्यते ॥ ७४ ॥

अथ खरतीक्ष्णलक्षणम् ।—

परुषं पोगरोन्मुक्तं भङ्गे पारदवच्छवि ।
नमने भङ्गुरं यत्तत् खरलोहमुदाहृतम् ॥ ७५ ॥

अथ सपर्य्याय पोगरलक्षणम् ।—

अङ्गच्छया च वङ्गञ्च पोगरस्याभिधात्रयम् ।
चिकुरं भङ्गुरं लोहात् पोगरं तत् परं मतम् ॥ ७६ ॥

अथ सारतीक्ष्णलक्षणम् ।—

वेगभङ्गुरधारं यत् सारलोहं तदीरितम् ।
पोगराभासकं पाण्डुभूमिजं सारमीरितम् ॥ ७७ ॥

अशुद्धलौहस्य दोषमाह, अशुद्धेति ।—सुगमम् ॥ ७३ ॥

तीक्ष्णलौहस्य भेदानाह खरमिति ।—सुगमम् ॥ ७४ ॥

तीक्ष्णभेदखरस्य लक्षणमाह, परुषमिति ।—पोगरं कुञ्चितालकवत् तरङ्गायितं तेन उन्मुक्तं तद्रहितमित्यर्थः ॥ ७५ ॥

खरलक्षणे "पोगरोन्मुक्तम्" इत्युक्तम्, अत पोगरस्य पर्य्यायादिकमाह, अङ्गच्छयेति ।—विलक्षणं पोगरमपेक्ष्य बोध्यं, तेन अङ्गच्छया वङ्गं पोगरञ्च इत्येकार्थम् । पोगरस्य स्वरूपलक्षणमाह, चिकुरमिति ।—लोहात् लौहगाते इत्यर्थः । अत्र सप्तम्यर्थे पञ्चमीति बोद्धव्यम्, यत् चिकुरं भङ्गुरं कुञ्चितकुन्तलवद्भङ्गीविशेषः इत्यर्थः ॥ ७६ ॥

सारस्य लक्षणमाह, वेगभङ्गुरधारमिति ।—वेगभङ्गुरधारं वेगेन जवेन प्रबलाघातेन भङ्गुरा भग्नप्रवणा धारा यस्य तादृशम्, अल्पर्थाघातेनैव भङ्गुरधारं, न त्वल्पाघातेनेत्यर्थः, "वेगभं गुरुधारम्" इति पाठे—वेगेन किम्पाकेन अल्पोत्तापेनेत्यर्थः, "जवे प्रवाहे किम्पाके वेगशब्दस्त्रिषु स्मृतः" इति शाश्वतवचनात्, भा दीप्ति

अथ हृन्नालतीक्ष्णलक्षणम्।—

कृष्णपाण्डुवपुश्चञ्चु बीजतुल्योरु-पोगरम्।
छेदने चातिपरुषं हृन्नालमिति कथ्यते ॥ ७८ ॥

अथ वाजिरतीक्ष्णलक्षणम्।—

पोगरैर्वज्रसङ्काशैः सूक्ष्मरेखैश्च सान्द्रकैः।
निचितं श्यामलाङ्गञ्च वाजिरं तत् प्रकीर्त्त्यते ॥ ७९ ॥

अथ काललोहाख्यतीक्ष्णलक्षणम्।—

नीलकृष्णप्रभं सान्द्रं मसृणं गुरु भासुरम्।
लोहघातेऽप्यभङ्गात्मधारं कालायसं मतम् ॥ ८० ॥

अथ खरतीक्ष्णगुणाः।—

रूक्षं स्यात् खरलोहकं समधुरं पाकेऽथ वीर्य्ये हिमं
तिक्तोष्णं कफपित्तकुष्ठजठर-प्लीहामपाण्ड्वर्त्तिनुत्।
मद्यं शूलयकृद्‌दक्षयजरा मेहामवातापहं
दीप्तञ्चातिरसायनं बलकरं दुर्नामदाहापहम् ॥ ८१ ॥

औज्ज्वल्यमित्यर्थः, यस्य तादृशम्, अल्पोत्तापेनैव प्रभासम्पन्नमित्यर्थः, वेगा वेगिनी अत्यर्था भा प्रभा यस्य तादृशमित्यर्थो वा, तथा गुरुधारं स्थूलधारमित्यर्थः। पोगरा-भासकं तरङ्गितकुन्तलच्छायम्। पाण्डुभूमिजं पाण्डुवर्णमृत्तिकाविशिष्टदेश-जातम् ॥ ७७ ॥

हृन्नालस्य लक्षणमाह, कृष्णेति।—कृष्णपाण्डुवपुः कृष्णपाण्डुमिश्रवर्णमित्यर्थः। चञ्च्विति।—एरण्डबीजतुल्यं प्रव्यक्तपोगरञ्च। छेदने भङ्गे इत्यर्थः ॥ ७८ ॥

वाजिरस्य लक्षणमाह, पोगरैरिति।—हीरकवत् कठिनैरुज्ज्वलैर्वा तथा सूक्ष्मरेखावद्भिः घनसन्निविष्टैश्च पोगरैः व्याप्तं श्यामदेहञ्च वाजिराख्यतीक्ष्णलौहं ज्ञेयम् इत्यर्थः ॥ ७९ ॥

काललोहलक्षणमाह, नीलेति।—सान्द्रं स्थूलमित्यर्थः। लोहेति।—लौहान्तरेण आघाते कृतेऽपि अभङ्गुरधारविशिष्टम् ॥ ८० ॥

तीक्ष्णलौहभेदस्य खरलोहस्य गुणमाह, रूक्षमिति।—सुगमम् ॥ ८१ ॥

अथ सारादीनां पञ्चानां गुणः ।—

खरलोहात् परं सर्वमेकैकस्माच्छतोत्तरम् ॥ ८२ ॥

अथ कान्तलौहस्य पञ्चविधत्वम् ।—

भ्रामकं चुम्बकञ्चैव कर्षकं द्रावकं तथा ।

एवं चतुर्विधं कान्तं रोमकान्तञ्च पञ्चमम् ॥ ८३ ॥

अथ पञ्चविधस्य कान्तस्य भेदान्तरनिर्देशः ।—

एक-द्वि-त्रि-चतुष्पञ्च-सर्वतोमुखमेव तत् ।

पीतं कृष्णं तथा रक्तं त्रिवर्णं स्यात् पृथक् पृथक् ॥

क्रमेण देवतास्तत्र ब्रह्मविष्णुमहेश्वराः ॥ ८४ ॥

अथ वर्णभेदेन कान्तस्य कार्य्यभेदनिर्देशः ।—

स्पर्शवेधि भवेत् पीतं कृष्णं श्रेष्ठं रसायने ।

रक्तवर्णं तथा चापि रसबन्धे प्रशस्यते ॥ ८५ ॥

सारादीनां गुणमाह, खरलोहादिति ।—सारादिलौहं खरलोहादुत्तरोत्तरशत-गुणाधिकमित्यर्थः ॥ ८२ ॥

कान्तलोहस्य भेदानाह, भ्रामकमिति ।—सुगमम् । राजनिघण्टौ—"स्याद्भ्रामकं तदनु चुम्बकरोमकाख्यं स्याच्छेदकाख्यमिति तच्च चतुर्विधं स्यात्" इत्यनेन यदस्य चातुर्विध्यमुक्तं तत् चुम्बककर्षकयोः प्रायस्तुल्यगुणत्वेनाभेदं विगणय्य एकत्वेन गणनादिति मन्तव्यम् । किञ्च द्रावकच्छेदकयोरपि तुल्यार्थत्वात् तदोक्तं छेदकमेव अत्र द्रावकं ज्ञेयम् ॥ ८३ ॥

पञ्चविधानां तेषां भेदान्तरमाह, एकेति ।—किञ्चित् एकमुखं किञ्चित् द्विमुखमित्यादि । अथवा सर्वतोमुखी प्रतिभा इतिवत् एकमुखादिशब्देन एकविध द्विविधत्रिविधादिकार्य्ये उपयुक्तम्, यतः अग्रे वक्ष्यति "कनिष्ठं स्यादेकमुखम्" इत्यादि । क्रमेणेति ।—पीतादिवर्णवति कान्तलौहे यथाक्रमं ब्रह्मविष्णुमहेश्वराः अधिष्ठातृदेवता ज्ञेया ॥ ८४ ॥

वर्णभेदेन कार्य्यभेदमाह, स्पर्शवेधीति ।—स्पर्शवेधि स्पर्शमात्रेणैव वेधकारकं रसेन्द्रस्य वेधाख्यसंस्कारसम्पादकं वा इत्यर्थः । "स्पर्शबोधे" इति पाठे—स्पर्शज्ञान-जनने, सुप्तिनाशार्थमित्यर्थः । रसबन्धे रसस्य निगडीकरणार्थम् ॥ ८५ ॥

अथ भ्रामकादीनामधममध्यमत्वादिनिर्देश ।—

भ्रामकन्तु कनिष्ठं स्याच्चुम्बकं मध्यम तथा ।
उत्तमं कर्षकञ्चैव द्रावकञ्चोत्तमोत्तमम् ॥ ८६ ॥

अथ भ्रामककान्तलक्षणम् ।—

भ्रामयेल्लौहजातन्तु तत् कान्त भ्रामक मतम् ॥ ८७ ॥

अथ चुम्बक कर्षककान्तद्वयलक्षणम ।—

चुम्बयेच्चुम्बकं कान्तं कर्षयेत् कर्षकं तथा ॥ ८८ ॥

अथ द्रावककान्तलक्षणम् ।—

साक्षात् यत् द्रावयेल्लोहं तत् कान्तं द्रावकं भवेत् ॥८९॥

अथ रोमकान्त-कान्तलक्षणम् ।—

तत् रोमकान्तं स्फुटितात् यतो रोमोद्गमो भवेत् ॥ ९० ॥

अथ एकादिमुखभेदेन कान्तस्याधममध्यमत्वादिनिर्देश ।—

कनिष्ठं स्यादेकमुखं मध्यं द्वित्रिमुखं भवेत् ।
चतुष्पञ्चमुख श्रेष्ठमुत्तम सर्वतोमुखम् ॥ ९१ ॥

कान्तलौहभेदभ्रामकादीनामधममध्यमत्वादिक निर्दिशति, भ्रामकमिति ।—सुगमम् ॥ ८६ ॥

भ्रामकस्य लक्षणमाह, भ्रामयेदिति ।—यत कान्तलौह सन्निकर्षवशात् लौहान्तर-समूह विघूर्णयेत् तत भ्रामकाख्य ज्ञेयम ॥ ८७ ॥

चुम्बककर्षकयोर्लक्षणे आह, चुम्बयेदिति ।—यत सन्निकर्षवशात लौहान्तरम आश्लिष्यति तत् चुम्बकम्, यच्च लौहान्तरम् आकृष्य स्वान्तिकमानयति तत् कर्षकमिति ॥ ८८ ॥

अथ द्रावकस्य लक्षणमाह, साक्षादिति ।—यत्तु लौहान्तर द्रवीकरोति तत द्रावकाख्य ज्ञेयम् ॥ ८९ ॥

रोमकान्त-कान्तलक्षणमाह, तदिति ।—यच्च भग्ने विदीर्णे वा उद्भिन्नपुलकवत स्फुटितगात्र दृश्यते, तत् रोमकान्त बोध्यम् ॥ ९० ॥

एकमुखत्वादिभेदेन तेषामपकर्षतामुत्कर्षताञ्चाह, कनिष्ठमिति ।—प्राक् भ्रामकस्य कनिष्ठत्वमुक्तम्, अत्र तु एकमुखस्य कनिष्ठत्वोक्तै भ्रामकमेव एकमुख

अथ भ्रामकादीनां कार्य्यनिर्देशः ।—

भ्रामकं चुम्बकञ्चैव व्याधिनाशे प्रशस्यते ।
रसे रसायने चैव कर्षकं द्रावकं हितम् ॥ ९२ ॥

अथ रसकर्म्मणि कान्तस्य विशेषोपयोगिता ।—

मदोन्मत्तगजः सूतः कान्तमङ्कुशमुच्यते ॥ ९३ ॥

अथ कान्तस्य ग्राह्यवर्ज्यत्वनिर्देशः ।—

चैवं ज्ञात्वा ग्रहीतव्यं तत् प्रयत्नेन धीमता ।
मारुताऽऽतपविच्छिन्नं वर्जयेन्नात्र संशयः ॥ ९४ ॥

अथ कान्तलौहलक्षणम् ।—

पात्रे यस्य प्रसरति जले तैलबिन्दुर्न लिप्तो
हिङ्गुर्गन्धं विसृजति तथा तिक्तता निम्बकल्कः ।
पाके दुग्धं भवति शिखराकारकं नैति भूमौ
कान्तं लौहं तदिदमुदितं लक्षणोक्तं न चान्यत् ॥ ९५ ॥

अथ कान्तलौहगुणाः ।—

कान्तायोऽतिरसायनोत्तरतरं स्वस्थे चिरायुःप्रदं
स्निग्धं मेहहरं त्रिदोषशमनं शूलाममूलापहम् ।

कनिष्ठं ज्ञेयम्, एवं चुम्बकादीनामपि । उत्तमं सर्वतोमुखमित्यत्र उत्तम-शब्देन उत्तमोत्तमं ग्राह्यम् ॥ ९१ ॥

क्रियाविशेषे भ्रामकादीनामुपयोगितामाह, भ्रामकमिति ।—सुगमम् ॥ ९२ ॥

रसबन्धनादिषु कान्तलौहस्योपयोगितां प्रदर्शयति मदोन्मत्तेति ।—अङ्कुशताडनेन यथा गजो वशीभवति तथा कान्तलौहसंयोगेन रसो बद्धो भवति इत्यर्थः ॥ ९३ ॥

कीदृशस्थानस्थं कान्तलौहं ग्राह्यं वर्ज्यं वा तदाह, चैवमिति ।—मारुतातपविच्छिन्नं, चैवमिति शेषः ॥ ९४ ॥

कान्तलौहस्य लक्षणमाह, पात्रे इति ।—यस्य पात्रे जले यन्निर्मितपात्रस्थे जले, न प्रसरति न विसृमरी भवति, इदं हि तैलधर्मं यत्—जले निक्षेपमात्रेणैव तत् प्रसृतं भवति, किन्तु कान्तपात्रस्थे जले निक्षिप्तं तत् स्थिरमेव तिष्ठतीत्यर्थः । लिप्त इत्यस्य हिङ्गुरित्यनेनान्वयः, तत्पात्रे लिप्तो हिङ्गुः निजगन्धं त्यजतीत्यर्थः ॥ ९५ ॥

गुल्मप्लीहयकृत्-क्षयामयहरं पाण्डूदरव्याधिनुत्
तिक्तोष्णं हिमवीर्य्यकं किमपरं योगेन सर्व्वार्त्तिनुत् ॥ ९६ ॥

अथ लौहस्य शोधनमारणयोरावश्यकता ।—

सम्यगौषधकल्पानां लौहकल्पः प्रशस्यते ।
तस्मात् सर्वप्रयत्नेन शुद्धलौहं विमारयेत् ॥ ९७ ॥

अथ मारणार्थं लौहस्य परिमाणनिर्देश ।—

नायः पचेत् पञ्चपलादर्वागूर्द्धं त्रयोदशात् ॥ ९८ ॥

अथ लोहमारणे मन्त्रम ।

आदौ मन्त्रस्ततः कर्म कर्त्तव्यं मन्त्र उच्यते ॥ ९९ ॥
"ओम् अमृतोद्भवाय स्वाहा ।"

अनेन मन्त्रेण लौहमारणम् ।

गुणमाह, कान्ताय इति ।—षतिरसायनोत्तरतर रसायने अतिश्रेष्ठतरमित्यर्थः । स्वस्थे इति ।—व्याधिविवर्जितेन देहिना सेवित सत् दीर्घायुष्यद भवति । "स्वस्थे" इत्यत्र "स्वच्छम्" इति पाठे—स्वच्छ मलादिरहित दोषशून्यमित्यर्थ ॥ ९६ ॥

लौहाना शोधनमारणयोरावश्यकतामाह, सम्यगिति ।—औषधकल्पानाम् औषधान्तरकल्पनाना मध्ये सम्यक् यथाविधि लौहकल्प लौहकल्पना लौहप्रयोग इति यावत, प्रशस्यते , यद्वा—औषधकल्पाना त्रिफलाकल्प-शाल्मलीकल्पप्रभृतीना मध्य लौहकल्प एव प्रशस्त ॥ ९७ ॥

मारणाययाह्यलौहस्य परिमाणमाह, नाय इति ।—पञ्चपलात अर्वाक् विंशतिकर्षात् न्यूनमित्यर्थ । ऊर्द्ध त्रयोदशात् त्रयोदशपलातिरिक्तमित्यर्थ ॥ ९८ ॥

मारणार्हलौहे मन्त्रेणाभिमन्त्रणस्यावश्यकतामाह, आदाविति ।—कर्म मारण-कर्मेत्यर्थ । "ओम् अमृतोद्भवाय स्वाहा" इति मन्त्र पठित्वा सम्मर्द्य पश्चात पुटो देय. । रसरत्नाकरे तु—"ओम् अमृतोद्भवोद्भवाय स्वाहा" इति पाठो दृश्यते । तत्र चास्य बलिदानमन्त्रोऽप्युक्त , तद्यथा—"ओम् अमृतोद्भवाय हूं फट् स्वाहा । ओँ नमश्चण्ड-वज्रपाणये महायक्षासनाधिपतये सुरु सुरु स्वाहा यक्षविद्याबलाय स्वाहा" इति । तन्त्रान्तरे चास्य "शाणिघर्षणम उद्वर्त्तनम् अम्लभावनम् आतपशोष निषेक मारणं दलन चालन सूर्य्यपाकः स्थालीपाक. चूर्णन पुटपाक. पाकनिष्पत्तिश्च" इति त्रयोदशविध. सस्कार उक्त. ॥ ९९ ॥

अथ लौहत्रयाणामुत्तरोत्तरगुणाधिक्यम् ।—

लक्षोत्तरगुणं सर्वं लोहं स्यादुत्तरोत्तरम् ।
कान्तं कोटिगुणं तत्र तदप्येव गुणोत्तरम् ॥ १०० ॥

अथ सर्वलौहानां सामान्यशोधनम् ।—

शश-क्षतजसंलिप्तं त्रिवारं परितापितम् ।
मुण्डादि सकलं लोहं सर्वदोषान् विमुञ्चति ॥ १०१ ॥

अथ लौहानां गिरिजदोषशोधनम् ।—

क्वाथ्यमष्टगुणे तोये त्रिफला-षोडश पलम् ।
तत्क्वाथे पादशेषे तु लोहस्य पलपञ्चकम् ॥ १०२ ॥
कृत्वा पत्राणि तप्तानि सप्तवारं निषेचयेत् ।
एवं प्रलीयते दोषो गिरिजो लोहसम्भवः ॥ १०३ ॥

लौहानामुत्तरोत्तरगुणाधिक्यमाह, लक्षोत्तरगुणमिति ।—मुण्डादिसर्वप्रकारलौहमुत्तरोत्तरं लक्षगुणाधिकं, तत्र च कान्तलौहं कोटिगुणं ज्ञेयं, तदपि कोटिगुणमपि सत् कान्तम् एव पूर्वोक्तविधानेन आदौ मन्त्रेणाभिमन्त्रितं पश्चात् शोधनादिकर्मणा संस्कृतं सत् कोटिगुणादपि अधिकगुणवत् भवेत् । रसरत्नाकरेऽपि उक्तं—"किट्टात् शतगुणं मुण्डं मुण्डात् तीक्ष्णं शताधिकम् । तीक्ष्णाल्लक्षगुणं कान्तं भक्षणात् कुरुते गुणम् ॥ तस्मात् कान्तं सदा सेव्यं जरामृत्युहरं परम् ॥" इति । यत्तु रसेन्द्रचिन्तामणौ "सामान्यात् द्विगुणं क्रौञ्चं कालिङ्गोऽष्टगुणस्ततः । कलेर्दशगुणं (शतगुणं) भद्रं भद्रात् वज्रं सहस्रधा ॥ वज्रात् शतगुणं पाण्डि निरङ्गं दशभिर्गुणैः । तस्मात् सहस्रगुणितमयः कान्तं गुणाधिकम् ॥" (ततः कोटिसहस्रैर्वा कान्तलौहं महागुणम् ॥") इत्यनेन क्रौञ्च कालिङ्ग कलि-भद्र वज्र पाण्डि-निरङ्ग कान्तभेदेन लौहस्य अष्टविधत्वमुक्तं तत्तु मुण्डादीनां प्रकारभेदतयैव समाधेयं, लौहजातीयानां बहुधात्वात् । अत्र तु प्रयोगबाहुल्यदर्शनात् गुणाधिकत्वाच्च मुण्डादित्रिविधमेवोक्तम् इति ॥ १०० ॥

सर्वलौहानां सामान्यशोधनमाह, शशेति ।—शशरक्तेन लौहपत्रम् आलिप्य वारत्रयम् अग्नौ सन्तापयेत् ॥ १०१ ॥

सर्वलौहानां गिरिजदोषशोधनमाह, क्वाथ्यमिति ।—अष्टगुणे तोये इति त्रिफलाषोडशपलापेक्षया बोध्यम् । गिरिजो दोषः शस्त्रदोषः, यदुक्तं भावप्रकाशे धात्वादि-

मतान्तरम्।—

सामुद्रलवणोपेत तप्त निर्वापितं खलु।
त्रिफलाक्वथिते नूनं गिरिदोषमयस्त्यजेत्॥ १०४॥

मतान्तरम्।—

चिञ्चाफल-जलक्काथादयो दोषमुदस्यति॥ १०५॥

मतान्तरे शोधन मारणञ्च।—

यद्वा फलत्रयोपेत गोमूत्रे क्वथितं चणम्।
रेचितं घृतसयुक्त चिप्ताऽयः खर्परे पचेत्॥ १०६॥
चालयेल्लोहदण्डेन यावत् चिप्त तृण दहेत्।
पिष्ट्वा पिष्ट्वा पचेदेव पञ्चवारमतः परम्॥ १०७॥
धात्रीफलरसैर्यद्वा त्रिफलाक्वथितोदकैः।
पुटेल्लोहं चतुर्वार भवेद्वारितर खलु॥ १०८॥

वर्गे—"गुरुता दृढतोत्क्लेद कश्मलं दाहकारिता। अश्मदोष सुदुर्गन्धो दोषा" सप्तायसस्य तु॥" इति॥ १०२।१०३॥

मतान्तरमाह, सामुद्रेति।—सामुद्रलवण "करकच" इति ख्यातम्। सामुद्र-लवण जलेन गोलयित्वा तेन लौहपत्रम् आलिप्य तप्त कृत्वा च त्रिफलाक्वाथे सप्तधा निर्वापयेत् इति॥ १०४॥

मतान्तरमाह, चिञ्चेति।—चिञ्चाफलं तिन्तिडीफलं जलं वालक तयो क्वाथात् क्वाथे निक्षेपात् इति हेत्वर्थे पञ्चमी ल्यब्लोपे पञ्चमी वा, क्वाथे निक्षेप प्राप्य इत्यर्थः, यद्वा—चिञ्चा तिन्तिडी, फल त्रिफला। "जल" इत्यत्र "दल" इति पाठे—दल तेजपत्रम्॥ १०५॥

मतान्तरे शोधन तथा मारणञ्चाह, यद्वेति।—रेचितं स्रावितम्। पूर्वोक्तक्रम-मनुसृत्य षोडशपलत्रिफलासयुक्तं पञ्चपललौहचूर्णम् अष्टगुणे गोमूत्रे नि क्वाथ्य अर्द्धावशेष विस्राव्य समघृतेन पिष्ट्वा खर्परे लौहदर्व्या विघट्टयन् तावत् पचेत् यावत लौहोपरि चिप्त तृण न भस्मीभवेत्, एव पञ्चवारं कार्य्यं, तत. आमलकीस्वरसेन त्रिफलाक्वाथेन वा पिष्ट्वा पिष्ट्वा चतुष्पुटो देय., तेन वारितर भस्म भवति॥ १०६—१०८॥

मतान्तरे मारणम्।—

स्नेहाक्तं लोहरजो मूत्रे खरसेऽपि रात्रिधात्रीणाम्।
पृथगेव सप्तकृत्वो भर्जितमखिलामये योज्यम्॥ १०९॥

अथ तीक्ष्णलोहस्य मारणम्।—

तीक्ष्णलोहस्य पत्राणि निर्दलानि दृढेऽनले।
ध्मात्वा क्षिपेज्जले सद्यः पाषाणोलूखलोदरे॥ ११०॥
कण्डयेद्दृढनिर्घातैः स्थूलया लोहधारया।
तन्मध्यात् स्थूलखण्डानि रुद्ध्वा मल्लद्वयान्तरे॥ १११॥
ध्मात्वा क्षिप्त्वा जले सम्यक् पूर्ववत् कण्डयेत् खलु।
तच्चूर्णं सूतगन्धाभ्यां पुटेद्विंशतिवारकम्॥ ११२॥
पुटे पुटे विधातव्यं पेषणं दृढवत्तरम्।
एवं भस्मीकृतं लोहं तत्तद्रोगेषु योजयेत्॥ ११३॥

अथ कान्तलोहस्य रससिन्धूक्तगुणाः।—

कान्तायः कमनीयकान्तिजननं पाण्डामयोन्मूलनं
यक्ष्मव्याधिनिबर्हणं गरहरं दोषत्रयोन्मूलनम्।

मारणे मतान्तरमाह स्नेहाक्तमिति।—स्नेहाक्तं घृतपिष्टम्। मूत्रे गोमूत्रे। रात्रि हरिद्रा॥ १०९॥

तीक्ष्णलोहस्य मारणमाह, तीक्ष्णलोहस्येति।—लोहधारया लोहमपि धारयति समापयति निःशेषेण चूर्णयति या तया लौहदण्डेनेत्यर्थः। मल्लद्वयान्तरे पात्रद्वयमध्ये। अत्रायं क्रमः,—तीक्ष्णलौहं दलरहितं सूक्ष्मपत्रं कृत्वा तीव्राग्नौ भस्त्रया ध्मातम् जले निक्षिपेत् निक्षेपानन्तरञ्च सद्य एव उद्धृत्य पाषाणोलूखले स्थूललौहदण्डेन दृढमाहत्य चूर्णीकुर्य्यात्, तत्र यानि स्थूललौहपत्राणि न चूर्णीभवन्ति तानि शरावद्वयमध्ये पुनः रुद्ध्वा आध्माप्य च पूर्ववत् जले निक्षिपेत्, तत्क्षणमेव उद्धृत्य चूर्णयेच्च, एवं यावत् सम्यक्तया चूर्णीभूतानि न भवन्ति तावत् कुर्य्यात् ततः चूर्णीभूतानि तानि समसूतगन्धाभ्यां मर्दयित्वा विंशतिवारं पुटेत् प्रतिपुटं दृढतरं पेषयेच्च इति॥ ११०—११३॥

नानाकुष्ठनिवर्हणं बलकरं वृष्यं वयःस्तम्भनं
सर्वव्याधिहरं रसायनवरं भौमामृतं नापरम् ॥ ११४ ॥

अथ सर्वलौहानां मारणे मतान्तरम् ।—

हिङ्गुलस्य पलान् पञ्च नारीस्तन्येन पेषयेत् ।
तेन लौहस्य पत्राणि लेपयेत् पलपञ्चकम् ॥ ११५ ॥
रुद्धा गजपुटे पश्चात् कषायैस्त्रैफलैः पुनः ।
जम्बीरैरारनालैर्वा विंशत्यंशेन हिङ्गुलम् ॥ ११६ ॥
पिष्ट्वा रुद्धा पचेल्लौहं तद्द्रवैः पाचयेत् पुनः ।
चत्वारिंशत्पुटैरेवं कान्तं तीक्ष्णञ्च मुण्डकम् ॥
म्रियते नात्र सन्देहो दत्त्वा दत्त्वैव हिङ्गुलम् ॥ ११७ ॥

अथ तीक्ष्णलौहस्य विशेषमारणम् ।—

अथ पूर्वोदितं तीक्ष्णं वसुभल्लकवासयोः ।
पुटितं पत्रतोयेन त्रिंशद्वाराणि यत्नतः ॥
शोणितं जायते भस्म क्षतसिन्दूरसन्निभम् ॥ ११८ ॥

रससिन्धूक्तं कान्तलौहस्य गुणमाह, कान्तायः इति ।—भौमामृतं नापरं कान्तलौहमेव पार्थिवामृतं नापरं किञ्चित्, तस्य श्रेष्ठरसायनत्वात् वयःस्तम्भकत्वादिगुणवत्त्वाच्च अमृतत्वेन निर्देशो बोध्यः ॥ ११४ ॥

मतान्तरे सर्वलौहानां मारणमाह, हिङ्गुलस्येति ।—विंशत्यंशेन हिङ्गुलं लौहापेक्षया विंशतिभागैकभागं, कर्षमितमित्यर्थः । आदौ पञ्चपलमितं हिङ्गुलं गृहीत्वा स्त्रीस्तन्येन सम्पिष्य तेन पलपञ्चमितानि तनुलौहपत्राणि लेपयेत् ततो मूषामध्ये संस्थाप्य गजपुटे पचेत्, द्वितीयदिने कर्षमितेन हिङ्गुलेन सह तानि पत्राणि त्रिफलाक्वाथेन जम्बीररसेन आरनालेन वा पिष्ट्वा पूर्ववत् गजपुटे पचेत् । ततः पुनः पूर्वोक्तद्रवे प्रागुल्लिखितमानं हिङ्गुलं पिष्ट्वा तेन तान्येव लौहपत्राणि लिप्त्वा गजपुटे पचेत्, एवं चत्वारिंशद्वारं कुर्य्यात्, प्रतिपुटे एवं हिङ्गुलं दद्यात् इति ॥ ११५—११७ ॥

तीक्ष्णलौहस्य विशेषमारणमाह, अथेति ।—वसुभल्लकः श्वेतपुनर्नवा । पूर्वोक्त-

मतान्तरम्।—

यद्वा तीक्ष्णदलोद्भूतं रजश्च त्रिफलाजलैः।
पिष्ट्वा दत्त्वौदनं किञ्चिच्चक्रिका प्रविधाय च ॥ ११९ ॥
शोषयित्वाऽतियत्नेन प्रपचेत् पञ्चभिः पुटैः।
रक्तवर्णं हि तद्भस्म योजनीयं यथायथम् ॥ १२० ॥

अथ मतान्तरे सर्वलौहानां मारणम्।—

मत्स्याक्षीगन्धवाह्लीकैर्लकुचद्रवपेषितैः।
विलिप्य सकलं लोहं मत्स्याक्षीकल्कपेषितम् ॥ १२१ ॥
भस्त्राभ्यां सुदृढं ध्मात्वा त्रिशूलीनिर्गमावधि।
अथोद्धृत्य क्षिपेत् क्वाथे त्रिफलागोजलात्मके ॥ १२२
तस्मादाहृत्य सन्ताड्य मृतमादाय लोहकम्।
पुनश्च पूर्ववद्ध्मात्वा मारयेदखिलायसम् ॥ १२३ ॥
खण्डयित्वा ततो गन्ध-गुडत्रिफलया सह।
पुटेत्त्रिंशतिवाराणि निरुत्थं भस्म जायते ॥ १२४ ॥

क्रमेण चूर्णीकृत तीक्ष्णलौह श्वेतपुनर्नवाया तथा वासायाश्च स्वरसेन पिष्ट्वा त्रिंशत्पुट दद्यात्, एव तस्य सिन्दूरवत रक्तवर्णं भस्म जायते ॥ ११८ ॥

मतान्तरमाह, यद्वेति।—ओदन पिष्टतण्डुलम् अन्न वा। किञ्चित् चतुर्थांशम्, लौहचूर्ण चतुर्थांशेन पिष्टतण्डुलेन अन्नेन वा सह त्रिफलाक्वाथेन पिष्ट्वा चक्रिका कार्य्या, तत शोषयित्वा पञ्चपुटो देय ॥ ११९।१२० ॥

सर्वलौहमारणे प्रकारान्तरमाह, मत्स्याक्षीति।—मत्स्याक्षी शालिञ्च, लौहमारकत्वात, गन्ध गन्धक, वाह्लीक कुङ्कुम हिङ्गु वा। त्रिशूली त्रिशूलवत् चटिकात्रयमित्यर्थ। लकुचद्रवेण मत्स्याक्ष्यादिक पिष्ट्वा तेन कल्केन सर्वविध लौहमालिप्य सशोष्य च पुनरपि केवलमत्स्याक्षीकल्केन पिष्ट्वा भस्त्राद्वयेन उभयत तीव्राग्निना सुदृढ धमेत् यावत उभयपार्श्वं विदार्य्य चटिका निर्गत्य त्रिशूल वत परिदृश्यमान न भवेत्, तत त्रिफलाक्वाथे गोमूत्रे च निर्वाप्य पाषाणोदूखले स्थूललौहदण्डेन तावत् ताडयेत् यावत चूर्णं निर्गच्छति, यदा च चूर्णनिर्गमरहितो भवेत् तदा पुनश्च पूर्वक्रमात् चूर्णं गृह्णीयात्, एव यावत

मतान्तरम्।—

समगन्धमयश्चूर्णं कुमारीवारिमर्दितम्।

पुटीकृतं कियत्कालमवश्यं म्रियते ह्ययः॥ १२५॥

मतान्तरम्।—

जम्बीर-रससंयुक्ते दरदे तप्तमायसम्।

बहुवारं विनिक्षिप्तं म्रियते नात्र संशयः॥ १२६॥

मतान्तरम्।—

गोमूत्रैस्त्रिफला क्वाथ्या तत्कषायेण भावयेत्।

त्रिःसप्ताहं प्रयत्नेन दिनैकं मर्दयेत् पुनः॥ १२७॥

कृत्वा गजपुटे पश्चाद्दिनं क्वाथेन मर्दयेत्।

दिवा मर्द्यं पुटेद्रात्रावेकविंशद्दिनावधि॥

एकविंशत्पुटैश्चैव म्रियते त्रिविधं ह्ययः॥ १२८॥

अथ तीक्ष्णलौहद्रावणम्।—

त्रिःसप्तकृत्वो गोमूत्रे जालिनीभस्म भावितम्।

शोषयेत्तस्य वापेन तीक्ष्णं मूषागतं द्रवेत्॥ १२९॥

सम्यक्तया चूर्णं न भवति तावत् कुर्य्यात् ततस्तच्चूर्णं गन्धकगुडत्रिफलाक्वाथेन पिष्ट्वा त्रिंशद्वार पुटेत्, प्रतिपुटे एव गन्धकादिकं दद्यात्॥१२१—१२४॥

मारणान्तरमाह, समगन्धमिति।—सुगमम्॥ १२५॥

प्रकारान्तरमाह, जम्बीरेति।—निमज्जनयोग्यजम्बीररसे किञ्चित् हिङ्गुलं सम्मिश्र्य तत्र सन्तप्तलौहपत्रं बहुवारं विनिक्षिपेत्, तेन लौहं म्रियेत॥ १२६॥

अपरमतमाह, गोमूत्रैरिति।—"भाव्यद्रव्यसमं क्वाथ्यम्" इत्यादिपरिभाषया लौहतुल्या त्रिफला क्वथनीया, ततश्च एकविंशतिदिनानि तेन क्वाथेन लौहं भावयित्वा अनन्तरमेकदिनं तेनैव क्वाथेन सम्मर्द्य चक्रिकां विधाय रात्रौ गजपुटे पचेत्, अपरदिने पुनश्च पूर्वोक्तक्वाथेनैकदिनं मर्दयित्वा पूर्ववत् पुटेत्, एवमेकविंशतिदिनानि कुर्य्यादिति॥ १२७।१२८॥

तीक्ष्णलौहस्य द्रावणमाह, त्रिःसप्तेति।—त्रिःसप्तकृत्वः एकविंशतिवारान्। जालिनीभस्म पीतपुष्पघोषालताक्षारः। वापेन प्रक्षेपेण। गोमूत्रे एकविंशतिवारं

मतान्तरे द्रावणम् ।—

सुरदालिभस्म गलितं त्रिःसप्तकृत्वोऽथ गोजले शुष्कम् ।
तापेन सलिलसदृशं करोति मूषागतं तीक्ष्णम् ॥ १३० ॥

अथ लौहप्रयोग ।—

एतत् स्यादपुनर्भवं हि भसितं लोहस्य दिव्यामृतं
सम्यक् सिद्धरसायनं त्रिकटुकौवेल्लाज्यमध्वन्वितम् ।
हन्यान्निष्कमितं जरामरणजव्याधींश्च सत्पूवद
दिष्टं श्रीगिरिशेन कालयवनोद्भूत्यै पुरा तत्पितुः ॥ १३१ ॥

अथ कान्तलोहस्य रामराजीप्रोक्तशोधनम् ।—

यत्पात्राध्युषिते तोये तैलविन्दुर्न सर्पति ।
तारेणाऽऽवर्त्तते यत्तत् कान्तलोहं तदुक्तम् ॥ १३२ ॥
अयसामुत्तम सिञ्चेत्तप्तं तप्तं वरारसे ।
एवं शुद्धानि लोहानि पिष्टान्यम्लेन केनचित् ॥ १३३ ॥
मृतसूतस्य पादेन प्रलिप्तानि पुटानले ।
पचेत्तुल्येन वा ताप्य गन्धाश्म-ह्वरतेजसा ॥ १३४ ॥

भावित ज्वालिनीभस्म आतपे शोषयेत ततो मूषामध्ये तद्भस्म संस्थाप्य तन्मध्ये तीक्ष्णलोह स्थापयेत, तेन च तत द्रवीभवति। अथवा शोषाक्षारोदके भावित लौहं गोमूत्रे निक्षिप्य रौद्रयन्त्रे शोषयेत, एवम् एकविंशतिवार कुर्य्यात, ततस्तस्मिन् एव क्षारे मूषास्थे लोह प्रक्षिपेत ॥ १२९ ॥

प्रकारान्तरेण द्रावणमाह, सुरदालीति।—सुरदाली देवदाली, हस्तिघोषक इति यावत, तस्या भस्म। गलित परिस्रुतम्। गोमूत्रे एकविंशतिवार परिस्रुत हस्तिघोषकक्षार शुष्क कृत्वा तत्क्षारमध्ये तीक्ष्णलौह निक्षिप्य मूषाया निरुध्य च अग्निसन्तापेन द्रवीकुर्य्यादिति ॥ १३० ॥

लौहस्य प्रयोगविधिमाह, एतदिति।—एतत पूर्वोक्तरूपम्। अपुनर्भव निरुत्थमित्यर्थ। भसित लोहस्य लौहभस्म। दिव्यामृत स्वर्गीयामृतवत गुणविशिष्टमित्यर्थः। वेल्ल विडङ्गम। त्रिकटुकादिकम् अनुरूपमात्रया ग्राह्यम्। निष्कमितम् अर्द्धतोलक परिमाणम्। दिष्टम् उपदिष्टम। कालयवनोद्भूत्यै कालयवनाख्यस्य द्वापरीयासुरराजस्य जन्मनिमित्तम्। तत्पितु. कालयवनपितु. ॥ १३१ ॥

तप्त क्षाराम्लसंलिप्त प्रभग्रहके निधापितम् ।
कान्तलोहं भवेच्छुद्धं सर्वदोषविवर्जितम् ॥ १३५ ॥

अथ सर्वविधलोहाना सामान्यीप्रोक्तमारणम ।—

शुद्धसूतं द्विधा गन्धं खल्लेन कृतकज्जलम् ।
द्वयो. सम लोहचूर्णं मर्दयेत् कन्यकाद्रवे. ॥ १३६ ॥
यामद्वयात् समुद्धृत्य तद्गोल ताम्रपात्रके ।
आच्छाद्यैरण्डपत्रैश्च यामार्द्धेऽत्युष्णतां व्रजेत् ॥ १३७ ॥
धान्यराशौ न्यसेत् पश्चात्त्रिदिनान्ते समुद्धरेत् ।
सम्पेष्य गालयेद्वस्त्रे सत्य वारितरं भवेत् ॥
कान्तं तीक्ष्णञ्च मुण्डञ्च निरुत्थ जायते मृतम् ॥ १३८ ॥
स्वर्णादीन् मारयेदेवं चूर्णं कृत्वा च लोहवत् ।
सिद्धयोगो ह्यय ख्यातः सिद्धाना सुमुखागतः ॥ १३९ ॥
अनुभूत मया सत्यं सर्वरोगजराऽपहम् ।
त्रिफलामधुसयुक्त सर्वरोगेषु योजयेत् ॥ १४० ॥

सलक्षण कान्तलौहस्य विशेषशोधनमाह, यदिति ।—यस्य यस्मिन् वा पात्रे अभ्युषिते स्थापिते तोये तैलविन्दु, प्रक्षिप्त सन्निति शेष, न सर्पति, यच्च लोह तारेण रौप्येण सह आवर्त्तते आवर्त्तित मिश्रित सत् तिष्ठति, अथसामुत्तम तत् कान्तलोह तनूकृत सूक्ष्मपत्रीकृत तप्तं तप्त सन्ताप्य सन्ताप्य वरारसे त्रिफलाक्काथे सिञ्चेत् इत्येव योजना । एव सशोधित तत् जम्बीरारनालादीनामम्लाना केनचिद्रसेन पिष्टा लौहापेक्षया पादमितभस्मसूतेन सलिप्य, लौहतुल्येन मिलितस्वर्णमाक्षिक गन्धकपारदेन सलिप्य वा पुटाग्नौ पचेत् तत टङ्कणेन केनचित अम्लरसेन च सलिप्य प्रभग्रहके सप्तदिन निधाय अनन्तर प्रक्षाल्य गृह्णीयादिति ॥ १३२—१३५ ॥

सर्वविधलौहानां सामान्यमारणमाह, शुद्धसूतमिति ।—यामद्वयात् यामद्वयादूर्द्ध्वम् । ताम्रपात्रे, सस्थाप्य इति शेष । "ताम्रपात्रके" इत्यत्र "कांस्यपात्रके" इति पाठान्तरम् । यामार्द्धेऽत्युष्णता व्रजेत् यामार्द्ध यावत् पुट दद्यादित्यर्थ । "आच्छाद्य" इत्यादौ "घर्मे धूलीरुवूकस्य" इत्यादिरसेन्द्रचिन्तामणिपाठे—घर्मे इत्यस्य अग्निसन्तापे इत्यर्थ. काव्य , रौद्रसन्तापे इत्यर्थे कृते तु अग्निसम्पर्काभावेण कज्जलीसम्मिश्रणजनितगुरुत्वसद्भावात्

अथ लौहानां रामराजीप्रोक्तगुणाः ।—

लौहं जन्तुविकारपाण्डुपवन-क्षीणत्वपित्तामय-
स्थौल्यार्शोग्रहणीज्वरार्त्ति-कफजिच्छोफप्रमेहप्रणुत् ।
गुल्मप्लीहविषापहं बलकरं कुष्ठाग्निमान्द्यप्रणुत्
सौख्यालम्बि रसायनं मृतिहरं कान्तादिकं किट्टवत् ॥१४१॥

मृतानि लौहानि रसीभवन्ति निघ्नन्ति युक्तानि महामयांश्च ।
अभ्यासयोगाद्दृढदेहसिद्धिं कुर्वन्ति रुग्जन्मजराविनाशम् ॥१४२॥

वाहितरत्वासम्भवादिति । धान्यराशाविति ।—धान्यराशौ स्थापनमपि एरण्डपत्रेणाच्छाद्यैव कार्य्यम् । मया वाग्भटेनेत्यर्थः । प्रयोगविधिमाह,—त्रिफलेति । लौहमारणप्रसङ्गेन एतद्ग्रन्थानुक्तं पतञ्जल्यादिभिर्लौहविद्भिश्चोक्तं सम्यक्पाकादिलक्षणमत्र प्रदर्श्यते, तथा च पतञ्जलिः,—"तावल्लौहं पचेद्वैद्यो यावत् वस्त्रेण गालितम् । स सुद्रं जायते व्यक्तं न निःसरति सन्धिभिः ॥" अन्यच्च—"अङ्गुलिभ्यां दृढं घृष्टं यदा चूर्णत्वमागतम् । तदा सिद्धं विजानीयाल्लौहं लौहविदां वर ॥ अञ्जनाभं घनं स्निग्धं श्लक्ष्णमूलमलेपनम् । अक्लिन्नमम्भसि क्षिप्तं सम्यक्पक्वस्य लक्षणम् ॥ मन्दमाहुरथो लौहमलस्याखिललक्षणम् । अतिपाकेन तज्ज्ञेयं खरमुज्झितलक्षणम् ॥" इति । अमोघतन्त्रे चोक्तं—"पाकास्तु त्रिविधाः प्रोक्ता मृदुमध्यमतीक्ष्णकाः । त्रैविध्यात् सर्वधातूनां पित्तानिलकफात्मनाम् ॥ दर्वीमाश्लिष्यते यत्तत् खैरं स्खलति वा न वा । मृदुपाकं विजानीयात् पित्ते तद्वीक्ष्य योजयेत् ॥ सितापुञ्जोपमं यत्तु मूषिकोत्करसन्निभम् । तदयः खरपाकं स्यात् श्लेष्मण्येव प्रकीर्त्तितम् ॥ एकैकगुणयोगित्वान्न तदिच्छन्ति तद्विदः । सर्वप्रकृतिसेव्यत्वान्मध्यमं बहुपूजितम् ॥ गुडादिं प्रविशेद्यच्च तत्र पाकोऽस्य मुद्रया ॥" इति ॥ १३६—१४० ॥

मृतलौहस्य गुणमाह, लौहमिति ।—जन्तुविकारः क्रिमिरोगः । पवनक्षीणत्वं वातक्षयः, पवनः वातविकृतिः, क्षीणत्वं कार्श्यमिति वा । सौख्यालम्बि सौख्यम् आलम्बते दधाति यत् तत् सुखदायकमित्यर्थः । मृतिहरम् अकालमृत्युनाशनं कालमृत्योर्दुर्हरणीयत्वात् । किट्टवत् सकिट्टं मुण्डतीक्ष्णकान्तलौहानि मण्डूरञ्चेत्यर्थः ॥ १४१ ॥

रामराजीप्रोक्तगुणमाह, मृतानीति ।—अरसाः रसाः भवन्ति इति रसीभवन्ति रसतुल्यगुणवन्ति भवन्तीत्यर्थः ॥ १४२ ॥

अथ उत्तमकान्तलौहस्य लक्षणम् ।—

पक्कजम्बूनिभच्छायं कान्तलौहं तदुत्तमम् ॥ १४३ ॥

अथ कान्तलौहस्य विशेषमारणम् ।—

सुरदालिभवं भस्म नरमूत्रेण गालितम् ।

त्रिःसप्तवारं तत्क्षार-वापात् कान्तहृतिर्भवेत् ॥ १४४ ॥

अथाष्टलौहानां द्रावणम् ।—

गन्धकं कान्तपाषाणं चूर्णयित्वा समं समम् ।

द्रुते लौहे प्रतीवापो देयो लौहाष्टकं द्रवेत् ॥ १४५ ॥

मतान्तरम् ।—

देवदाल्या द्रवैर्भाव्य गन्धकं दिनसप्तकम् ।

तेन प्रवापमात्रेण लौहं तिष्ठति सूतवत् ॥ १४६ ॥

अथ मण्डूरः ।—

अथ मण्डूरशोधनम् ।—

अक्षाङ्गारैर्धमेत् किट्टं लौहजं तद्गवां जलैः ।

सेचयेदक्षपात्रान्त सप्तवारं पुनः पुनः ॥

मण्डूरोऽयं समाख्यातश्चूर्णं श्लक्ष्णं प्रयोजयेत् ॥ १४७ ॥

वर्णभेदेन प्रशस्तकान्तलौहस्य लक्षणमाह, पक्केति ।—सुगमम् ॥ १४३ ॥

कान्तलौहस्य विशेषमारणमाह, सुरदालिभवमिति ।—नरमूत्रेण एकविंशतिवार परिस्रुते हस्तिघोषकक्षारोदके प्रक्षिप्य कियन्ति दिनानि स्थापनात् कान्तलौह मृत भवेत । "हृत" इत्यत्र "द्रुति" इति पाठे—कान्तस्य द्रुति द्रावण जलवत तारल्य मित्यर्थो बोध्य ॥ १४४ ॥

अष्टविधलौहाना द्रावणमाह, गन्धकमिति ।—कान्तपाषाण "चुम्बक" इति ख्यात प्रस्तरविशेष । स्वर्णाद्यष्टविधलौहाना यत्किञ्चिल्लौह द्रवीकृत्य तत्र प्रत्यक लौहपरिमितं गन्धकचूर्ण कान्तपाषाणचूर्णञ्च प्रक्षिपेत, एवञ्च सर्वविधलौह द्रवीभूय तिष्ठति, अथवा—लौहमिति प्रसिद्ध लौह द्रवीकृत्य तत्र उक्तचूर्णद्वय प्रक्षिप्य स्वर्णाद्यन्यतमलौह प्रक्षिपेत, एवञ्च तत द्रवीभूय एव तिष्ठति ॥ १४५ ॥

द्रावणान्तरमाह, देवदाल्या इति ।—तेन प्रवापमात्रेण तद्गन्धकचूर्णप्रक्षेपमात्रेणैव । सूतवत् पारदवत् तरलमेव इत्यर्थ. ॥ १४६ ॥

मतान्तरम् ।—

गोमूत्रैस्त्रिफला क्वाथ्या तत्क्वाथे सेचयेच्छनैः ।
लोहकिट्टं सुसन्तप्त यावज्जीर्य्येति तत् स्वयम् ॥
तच्चूर्णं जायते पेष्यं मण्डूरोऽयं प्रयोजयेत् ॥ १४८ ॥

अथ लौहमण्डूरयो तुल्यगुणत्वनिर्देश ।—

ये गुणा मारिते मुण्डे ते गुणा मुण्डकिट्टके ।
तस्मात् सर्वत्र मण्डूरं रोगशान्त्यै प्रयोजयेत् ॥ १४९ ॥

अथ मण्डूरस्य लौहानाञ्च उत्तरोत्तरगुणाधिक्यम ।—

किट्टाद्दशगुण मुण्ड मुण्डात्तीक्ष्ण शतोन्मितम् ।
तीक्ष्णाल्लक्षगुणं कान्तं भक्षणात् कुरुते गुणान ॥
तस्मात् कान्तं सदा सेव्य जरामृत्युहर नृणाम् ॥ १५० ॥

किट्टस्य लौहसगुणत्वात लौहमलत्वाच्च लौहशोधनमारणप्रकरण एव तस्यापि शोधनादिकमाह, अक्षाङ्गारैरिति ।—विभीतककाष्ठाग्नौ मण्डूर भस्त्रया ध्मापयित्वा विभीतककाष्ठमयपात्राभ्यन्तरे स्थापिते गोमूत्रे सिञ्चेत, एव सप्तवारेण मण्डूर शुध्यति, तत श्लक्ष्ण चूर्णीकृत्य कार्य्येषु नियोजयेत् इति ॥ १४७ ॥

मतान्तरमाह, गोमूत्रैरिति ।—क्वाथश्चात्र मण्डूरापेक्षया द्विगुणो ग्राह्य ॥१४८॥

लौहमण्डूरयो तुल्यगुणशालित्व प्रदर्श्य मण्डूरस्य प्रयोगार्हतामाह, ये इति ।—अत्र मुण्डशब्द तीक्ष्णकान्तयोरुपलक्षण, यत यल्लौह यद्गुण तत्किट्टमण्डूरोऽपि तद्गुणविशिष्ट इत्युक्तम् , तथा च भावमिश्र,—"ध्मायमानस्य लौहस्य मल मण्डूर-मुच्यते । लौहसिंहानिका किट्टी सिंहानञ्च निगद्यते ॥ यल्लौह यद्गुण प्रोक्त तत्किट्टमपि तद्गुणम् ॥" इति ॥ १४९ ॥

मण्डूरस्य तथा विविधलौहस्य च उत्तरोत्तरगुणाधिक्य प्रदर्शयति, किट्टादिति ।—यत्तु प्राक् "ये गुणा मारिते मुण्डे" इत्यादिना लौहमण्डूरयो समानगुणत्वमुक्त तत लौहाप्राप्तौ मण्डूरेणैव लौहसाध्यकर्मसम्पादनार्थं, लोहमलत्वात लौहगुणा. तस्मिन् विद्यन्ते एव इति ज्ञापनार्थञ्च , वस्तुतस्तु मलमपेक्ष्य साराशस्य गुणबाहुल्य स्वाभाविकमेव इति । अत्रानुक्तोऽपि ग्रन्थान्तरात् मण्डूरगुणो द्रष्टव्य., तद्यथा राजनिघण्टौ—"लोहकिट्टन्तु मधुर कटूष्ण क्रिमिवातनुत । पक्तिशूल मरुच्छूलं मेहगुल्मार्त्तिशोषनुत् ॥" इति । किञ्च मण्डूरस्य उत्तममध्यमत्वादिकमप्यत्रानुक्त

अथ अशुद्धलौहस्य ग्रन्थान्तरोक्तदोषाः।—

अशुद्धलोहं न हितं निषेवणादायुर्बलं कान्तिविनाशि निश्चितम्।
हृदि प्रपीडा तनुते ह्यपाटवं रुजं करोत्येव विशोध्य मारयेत्॥१५१॥

अथ शुद्धलौहस्य ग्रन्थान्तरोक्तगुणाः।—

आयुष्प्रदाता बलवीर्यकर्त्ता रोगप्रहर्त्ता मदनस्य कर्त्ता।
अयःसमानं न हि किञ्चिदन्यद्रसायनं श्रेष्ठतमं हि जन्तोः॥१५२॥

[इत्ययोऽधिकारः]।

अथ वङ्गम्।—

अथ वङ्गस्य द्वैविध्यनिर्देशः।—

खुरकं मिश्रकञ्चेति द्विविधं वङ्गमुच्यते।
खुरं तत्र गुणैः श्रेष्ठं मिश्रकं न हितं मतम्॥ १५३॥

अथ खुरकवङ्गस्य लक्षणम्।—

धवलं मृदुलं स्निग्धं द्रुतद्रावं सगौरवम्।
निःशब्दं खुरवङ्गं स्यात्—"

अथ मिश्रकवङ्गस्य लक्षणम्।—

"—मिश्रकं श्यामशुभ्रकम्॥१५४॥

प्रदर्श्यते, यथा रसेन्द्रचिन्तामणौ—"शतोर्द्ध्वमुत्तमं किट्टं मध्यञ्चाशीतिवार्षिकम्। अधमं षष्टिवर्षीयं ततो हीनं विषोपमम्॥" इति॥ १५०॥

अशुद्धलौहसेवने ग्रन्थान्तरोक्तं दोषमाह, अशुद्धलोहमिति।—आयुर्बलमित्यत्र विनाशयेदिति शेषः॥ १५१॥

तत्रोक्तं शुद्धलौहस्य गुणमाह, आयुरिति।—मदनस्य कर्त्ता वाजीकरण-मित्यर्थः॥ १५२॥

इदानीं वङ्गस्य द्वैविध्यमुक्त्वा तयोरुत्तमाधमतां निर्दिशति, खुरकमिति।—खुरकं "पद्मखुरि रां" इति प्रसिद्धम्। मिश्रकं तदितरत् ज्ञेयम्॥ १५३॥

खुरकस्य मिश्रकस्य च लक्षणमाह, धवलमिति।—द्रुतद्रावं शीघ्रद्रवणशीलम्। निःशब्दं पत्रीभूतमपि शब्दरहितं, पत्रीभूतं रङ्गान्तरं यथा सशब्दं भवति तथा नेत्यर्थः। मिश्रकमिति।—कृष्णश्वेतमिश्रवर्णत्वात् मिश्रकमिति संज्ञा ज्ञेया॥१५४॥

अथ वङ्गगुणाः ।—

वङ्गं तिक्तोष्णकं रूक्षमीषद्वातप्रकोपणम् ।
मेहश्लेष्मामयघ्नञ्च मेदोघ्नं क्रिमिनाशनम् ॥ १५५ ॥

अथ खुरकवङ्गशोधनम् ।—

द्रावयित्वा निशायुक्ते क्षिप्तं निर्गुण्डिकारसे ।
विशुध्यति त्रिवारेण खुरवङ्गं न संशयः ॥ १५६ ॥

अथ मिश्रकवङ्गशोधनम् ।—

अम्लतक्रविनिक्षिप्तं वर्षाभूविषतिन्दुभिः ।
कट्फलाम्बुगतं वङ्गं द्वितीयं परिशुध्यति ॥ १५७ ॥

अथ नागवङ्गकांस्यताम्राणां सामान्यशोधनम् ।—

शुध्यति नागो वङ्गो घोषो रविरातपेऽपि मुनिसङ्घैः ।
निर्गुण्डीरससेकैस्तन्मूलरजःप्रवापैश्च ॥ १५८ ॥

गुणमाह, वङ्गमिति ।—स्पष्टार्थम् ॥ १५५ ॥

खुरकवङ्गस्य शोधनमाह, द्रावयित्वेति ।—निशा हरिद्रा । अग्निसन्तापेनादौ वङ्गं तरलीकृत्य पश्चात् हरिद्राचूर्णसंयुक्ते हरिद्रास्वरससंयुक्ते वा निर्गुण्डीस्वरसे निक्षिपेत्, एवं वारत्रयेण वङ्गं शुध्यति ॥ १५६ ॥

मिश्रकस्य शोधनमाह, अम्लेति ।—विषतिन्दुः कुचेला "कुँचिला" इति भाषा । वर्षाभूविषतिन्दुभिः, क्वथितक्वाथे विनिक्षिप्तमिति शेषः । द्वितीयं मिश्रकम् । अम्लतक्रे दिनत्रयं पुनर्नवा विषमुष्टिक्वाथे दिनत्रयं तथा कट्फलक्वाथे च दिनत्रयं वङ्गं निमज्ज्य स्थापयेत । 'विनिक्षिप्तम्" इत्यत्र "विनिष्पिष्टम्" इति पाठे—अम्लतक्रेण सह वङ्गं निष्पिष्य वर्षाभूविषतिन्दुक्वाथे कट्फलक्वाथे च दिनत्रयं स्थापयेत । "विष-तिन्दुभिः" इत्यत्र "वृषतिन्दुभिः" इति पाठे—वृषः वासकः तिन्दुः विषतिन्दुकः । "विषसिन्दुभिः" इति पाठे—विषं वत्सनाभविषं सिन्दुः सिन्दुवारः । "विषसिन्धुभिः" इति पाठेऽपि स एवार्थः । "कट्फलाम्बुगतम्" इत्यत्र "कटुलाबुगतम्" इति पाठे—तिक्ततुम्बीमध्यस्थितमित्यर्थः । "वङ्गं द्वितीयम्" इत्यत्र "वङ्गं द्वितयं" "वङ्गद्वितयम्" इति च पाठे—खुरकं मिश्रकञ्च द्विविधवङ्गमित्यर्थः ॥ १५७ ॥

तुल्यशोधनत्वात् वङ्गशोधनप्रसङ्गे नागताम्रकांस्यानामपि शोधनमाह, शुध्यतीति ।—घोषः कांस्यकम् । रविः ताम्रम् । मुनिसङ्घैः सप्तसङ्घैः । तन्मूलरजःप्रवापैः

अथ वङ्गमारणम् ।—

सतालेनार्कदुग्धेन लिप्ता वङ्गदलानि च ।
बोधि-चिञ्चात्वचः क्षारैर्दद्याल्लघुपुटानि च ॥
मर्दयित्वा चरेद्भस्म तद्रसादिषु शस्यते ॥ १५९ ॥

मारणे मतान्तरम् ।—

प्रद्राव्य खर्परे वङ्गं षोडशांश रसं क्षिपेत् ।
स्वल्पस्वल्पाऽऽलकं दत्त्वा भारद्वाजस्य काष्ठतः ॥
मर्दयित्वा चरेद्भस्म तद्रसादिषु कीर्त्तितम् ॥ १६० ॥

मतान्तरम् ।—

पलाशद्रवयुक्तेन वङ्गपत्रं प्रलेपयेत् ।
तालेन पुटितं पश्चाल्म्रियते नात्र संशयः ॥ १६१ ॥

मतान्तरम् ।—

भल्लाततैलसंलिप्तं वङ्गं वस्त्रेण वेष्टितम् ।
चिञ्चा-पिप्पल-पालाश-काष्ठाग्नौ याति पञ्चताम् ॥ १६२ ॥

निर्गुण्डीमूलचूर्णमध्ये निक्षिपेत् । नागादिचतुष्टयं प्रत्येकं सिन्दुवाररसान्तः संस्थाप्य आतपे शोषयित्वा सिन्दुवारमूलचूर्णमध्ये प्रक्षिप्य च दिनमेकं न्यसेत्, एवं सप्तवारं कुर्य्यात् ॥ १५८ ॥

वङ्गस्य मारणमाह, सतालेनेति ।—सतालेन हरितालसहितेन । बोधिः अश्वत्थः, चिञ्चा तिन्तिडी तयोः त्वचः क्षारैः । चरेत् आचरेत्, रोगेषु प्रयुञ्जीतेत्यर्थः ॥ १५९ ॥

मतान्तरमाह, प्रद्राव्येति ।—आलकं हरितालम् । भारद्वाजस्य वनकार्पास्याः । वङ्गं खर्परे कृत्वा अग्नौ विद्राव्य वङ्गषोडशभागैकभागं रसं तत्र निक्षिपेत्, ततः तत्र अल्पमल्पं हरितालचूर्णं दत्त्वा दत्त्वा आरण्यकार्पासदण्डेन तावत् निरन्तरं मर्दयेत् यावत् भस्म न भवेत् इति ॥ १६० ॥

मतान्तरमाह, पलाशेति ।—पलाशद्रवः पलाशमूलरसः ॥ १६१ ॥

प्रकारान्तरमाह, भल्लातेति ।—भल्लातकोद्भवेन तैलेन वङ्गं लिप्त्वा वस्त्रखण्डेनावेष्ट्य च तिन्तिडिकाश्वत्थपलाशकाष्ठाग्नौ भस्मीकुर्य्यात् । भल्लाततैलविधिश्चायम्—आदौ गोमूत्रे भावितान् भल्लातकान् क्षीरे त्रिरात्रम् अधिवास्य द्विधाकुर्य्यात्, ततः लौहकुम्भे तान् संस्थाप्य सच्छिद्रशरावेण मुखं बद्ध्वा लौहमयकुम्भान्तरस्य भूमावाकण्ठं निखातस्यो-

अथ वङ्गप्रयोग ।—

वङ्गभस्मसमं कान्तं व्योमभस्म च तत्समम् ।
मर्दयेत् कनकाम्भोभिर्निम्बपत्ररसैरपि ॥ १६३ ॥
दाडिमस्य मयूरस्य रसेन च पृथक् पृथक् ।
भूपालावर्त्तभस्माथ विनिक्षिप्य समांशकम् ॥ १६४ ॥
गोमूत्रक-शिलाधातु-जलैः सम्यक् विमर्दयेत् ।
ततो गुग्गुलतोयेन मर्दयित्वा दिनाष्टकम् ॥ १६५ ॥
विशोष्य परिचूर्ण्याथ समभागेन योजयेत् ।
घृष्टं बन्धूकनिर्यासैर्नाकुलीबीजचूर्णकैः ॥ १६६ ॥
ततः क्षिपेत् करण्डान्तर्विधाय पटगालितम् ।
गोतक्रपिष्ट-रजनी-सारेण सह पाययेत ॥ १६७ ॥
चतुर्भिर्वल्लकैस्तुल्यं रम्यं वङ्गं रसायनम् ।
निशितं तेन नश्यन्ति मेहा विंशतिभेदकाः ॥ १६८ ॥
शालयो मुद्गसूपश्च नवनीतं तिलोद्भवम् ।
पटोलं तिक्ततुण्डीरं तक्रं पथ्याय शस्यते ॥ १६९ ॥

[इति वङ्गाधिकारः] ।

परि भल्लातपूर्णकुम्भं तमधोमुखं योजयित्वा सन्धिरोधं कृत्वा च उपरिष्टात् करीषाग्निं दद्यात्, अग्निसन्तापेन तस्मात् निस्रुतः यः स्नेहः तलभाण्डे पतिष्यति, तदेव भल्लाततैलं ग्राह्यम् इति ॥ १६२ ॥

वङ्गप्रयोगमाह, वङ्गभस्मसममिति ।—कान्तं कान्तलौहं, तच्च मारितं ग्राह्यम् । कनकाम्भोभिः धुस्तूरपत्ररसैः । "कनकाम्भोभिः" इत्यत्र "कन्यकाम्भोभिः" इत्येव पाठः साधीयान्, तत्र—कन्यकाम्भोभिः घृतकुमारीरसैः । मयूरस्य अपामार्गस्य । भूपालावर्त्तः राजावर्त्तः । समांशकं वङ्गभस्मतुल्यम् । गोमूत्रकशिलाधातुजलैः गोमूत्रेण शिलाजतुजलेन च, गोमूत्रगन्धिशिलाजतुजलेन इत्यर्थो वा, अत्र जलैरिति बहुवचननिर्देशेन सप्तवारमर्दनं बोद्धव्यम् । समभागेन इत्यत्र गृहीतैरिति शेषः, बन्धूकनिर्यासैर्नाकुलीबीजचूर्णकैरित्यनेनान्वयः । बन्धूकनिर्यासैः बन्धूकः बन्धुजीवपुष्पं "बाँधुलि" इति भाषा, तस्य निर्यासैः क्षीरैः क्वाथैर्वा । नाकुलीबीजं रास्नाबीजं शाल्मलीबीजं वा ।

अथ सीसकम्।—

अथ शुद्धाशुद्धसीसकलक्षणम्।—

द्रुतद्रावं महाभारं छेदे कृष्णं समुज्ज्वलम्।
पूतिगन्धं वहिः कृष्णं शुद्धं सीसमतोऽन्यथा॥ १७०॥

अथ सीसकगुणाः।—

अत्युष्णं सीसकं स्निग्धं तिक्तं वातकफापहम्।
प्रमेह-तोयदोषघ्नं दीपनञ्चाऽऽमवातनुत्॥ १७१॥

अथ सीसकशोधनम्।—

सिन्दुवारजटा-कौन्ती-हरिद्राचूर्णकं क्षिपेत्।
द्रुते नागेऽथ निर्गुण्ड्यास्त्रिवारं निक्षिपेद्रसे॥
नागः शुद्धो भवेदेवं मूर्च्छास्फोटादि नाऽऽचरेत्॥ १७२॥

"घृष्टं बब्बूलनिर्यासेर्वाकुचीबीजचूर्णके" इत्यत्र 'घृष्टबब्बुलनिर्यासैर्वाकुचीबीज-चूर्णके" इति पाठे—वाकुची सोमराजी। वङ्गकान्तलौहाभ्रकभस्म तुल्यमानं गृहीत्वा कनकादीनां प्रत्येकं स्वरसैरेकैकदिनं मर्दयेत्, ततः राजावर्तभस्म वङ्गमानं तत्र दत्त्वा गोमूत्रेण शिलाजतुक्वाथेन च शिलाजतुमिश्रजलेन वा अथवा गोमूत्रगन्ध-शिलाजतुक्वाथेन सप्ताहं भावयित्वा पश्चात् गुग्गुलुक्वाथेन दिनाष्टकं मर्दयेत्, अनन्तरं शोषयित्वा विचूर्ण्य च बब्बूलनिर्यासेन वाकुचीबीजचूर्णेन च तुल्येन मर्दयेत्, ततो वस्त्रपूतं विधाय पात्रान्तः स्थापयेत्। अष्टरक्तिमितं तच्चूर्णं हरिद्राचूर्ण-गव्यतक्रानुपानेन प्रयोजयेत्। तिलोद्भवं तिलतैलं तिलबीजं वा। तिक्ततुण्डीरं बिम्बी-फलम्॥ १६३—१६९॥

प्रशस्ताप्रशस्तसीसकलक्षणमाह, द्रुतद्रावमिति।—अतोऽन्यथा इत्यत्र अशुद्धमिति शेषः॥ १७०॥

सीसकगुणमाह, अत्युष्णमिति।—तोयदोषघ्नं दुष्टजलोपयोगजनितव्याधिनिवा-रकम् इत्यर्थः॥ १७१॥

शोधनमाह, सिन्दुवारजटेति।—कौन्ती रेणुकम्। सीसकमग्निसन्तापेन विलाप्य सिन्दुवारमूलादीनां चूर्णं सह दृष्ट्वा दृष्ट्वा निर्गुण्डीरसे निक्षिपेत्, एवं वार-त्रयम्॥ १७२॥

अथ सीसकमारणम्।—

तिर्य्यगाकारचुल्ल्यान्तु तिर्य्यग्वक्त्रं घटं न्यसेत्।
तच्च वक्त्रं विना सर्वं गोपयेत् यत्नतो मृदा ॥ १७३ ॥
भृष्टयन्त्राभिधे तस्मिन् पात्रे सीसं विनिक्षिपेत्।
पलविंशतिकं शुद्धमधस्तीव्रानलं क्षिपेत् ॥ १७४ ॥
द्रुते नागे क्षिपेत् सूतं शुद्धं कर्षमितं शुभम्।
घर्षयित्वा क्षिपेत् क्षारमेकैकं हि पलं पलम् ॥ १७५ ॥
अर्जुनस्याक्षवृक्षस्य महा-राजगिरेरपि।
दाडिमस्य मयूरस्य चिञ्चा क्षारं पृथक् पृथक् ॥ १७६ ॥
एवं विंशतिरात्राणि पचेत्तीव्रेण वह्निना।
विघट्टयन् दृढं दोर्भ्यां लोहदर्व्या प्रयत्नतः ॥ १७७ ॥
रक्तं तज्जायते भस्म कपोतच्छायमेव वा।
नागं दोषविनिर्मुक्तं जायतेऽतिरसायनम् ॥ १७८ ॥

मतान्तरम्।—

हतमुत्थापितं सीसं दशवारेण सिध्यति।
तन्मृतं सीसकं सर्वदोषमुक्तं रसायनम् ॥ १७९ ॥

मारणमाह, तिर्य्यगिति।—अक्ष विभीतकः। महा राजगिरि शाकविशेषः, राजशाकमिति यावत् स तु लघुस्थूलभेदेन द्विविधः, अत्र च स्थूलो ग्राह्यः। मयूरः अपमार्गः। अवेदं कार्य्यं—वक्राकारां चुल्लीं कृत्वा तदुपरि घटमेकं वक्रमुखं कृत्वा स्थापयेत्, ततो वक्त्रमात्रं विहाय कृत्स्नं घटावयवं मृल्लेपेनाच्छादयेत्, भृष्टयन्त्राख्येऽस्मिन् यन्त्रे विंशतिपलमानं शुद्धं सीसकं दत्त्वा तीव्रोत्तापेन द्रवीकुर्य्यात्, ततः तस्मिन् कर्षप्रमाणं शोधितपारदं प्रक्षिप्य दर्व्या घट्टयेत्, मिश्रीभूते च तस्मिन् प्रत्येकं पलमानम् अर्जुनादीनां क्षारं पृथक् पृथक् दत्त्वा लौहदर्व्या दृढं घट्टयन् तीव्राग्निना विंशतिरात्रं पचेत्। कपोतच्छायं पारावतवर्णं, धूसरवर्णमिति यावत् ॥ १७३—१७८ ॥

मतान्तरे मारणमाह, हतमिति।—आदौ भस्मीकृत्य ऊर्द्धपातनायन्त्रे उत्थापयेत्, ततः पुनः भस्मीकृत्य पुनरुत्थापयेत्, एवं दशवारेण सीसकस्य निरुत्थं भस्म भवति।

अथ सीसकस्य निरुत्थभस्मीकरणम्।—

अश्वत्थ-चिञ्चात्वग्भस्म नागस्य चतुरंशतः।
क्षिपेन्नागं पचेत् पात्रे चालयेल्लोहचाटुना ॥ १८० ॥
यामाद्भस्म तदुद्धृत्य भस्मतुल्या मनःशिला।
जम्बीरैरारनालैर्वा पिष्ट्वा रुद्ध्वा पुटे पचेत् ॥ १८१ ॥
स्वाङ्गशीतं पुनः पिष्ट्वा विंशत्यंशशिलायुतम्।
अम्लेनैव तु यामैकं पूर्ववत् पाचयेत् पुटे ॥
एवं षष्टिपुटैः पक्वो नागः स्यात् सुनिरुत्थितः ॥ १८२ ॥

अथ निरुत्थभस्मीकरणे मतान्तरम्।—

शिलया रविदुग्धेन नागपत्राणि लेपयेत्।
मारयेत् पुटयोगेन निरुत्थं जायते तथा ॥ १८३ ॥

अथ सीसकप्रयोगः।—

एवं नागोद्भवं भस्म ताप्यभस्मार्द्धभागिकम्।
पादं पादं क्षिपेद्भस्म शुल्वस्य विमलस्य च ॥ १८४ ॥
कान्ताभ्रसत्त्वयोश्चापि स्फटिकस्य पृथक् पृथक्।
सर्वमेकत्र सञ्चूर्ण्य पुटेत्त्रिफलवारिणा ॥ १८५ ॥
त्रिंशद्वनगिरिखण्डैश्च त्रिंशद्वारं विचूर्ण्य तत्।
व्योषवेल्लकचूर्णैश्च समांशैः सह मेलयेत् ॥ १८६ ॥

उत्थापनप्रकारो यथा—"मर्दयेत् कन्यकाद्रावैः चूर्णिते रविपादकैः। पातयेत् पातनायन्त्रे इत्युत्थापनमीरितम् ॥" इति ॥ १७९ ॥

मतान्तरमाह, अश्वत्थचिञ्चेति।—लोहचाटुना लौहदर्व्या। सीसकात् प्रत्येकं पादिकम् अश्वत्थवल्कलभस्म तथा तिन्तिडीत्वग्भस्म पात्रस्थे द्रुते नागे क्षिप्त्वा लौहदर्व्या यामं विघट्टयन् भस्म कुर्य्यात्, ततः तं भस्मनागं तुल्यमनःशिलया सन्नीय जम्बीररसैरारनालैर्वा पि०। पुटे पचेत् स्वाङ्गशीतञ्च तमुद्धृत्य विंशतिभागैकभागमनःशिलया सह जम्बीरादीनां केनचिदम्लेन पुनः मर्दयित्वा यामं पुटेत्, एवं षष्टिपुटैः नागस्य निरुत्थं भस्म जायते ॥ १८०—१८२ ॥

प्रकारान्तरमाह, शिलयेति।—स्पष्टम् ॥ १८३ ॥

मध्वाज्यसहित हन्ति प्रलीढ वल्लमात्रया ।
अशीतिं वातजान् रोगान् धनुर्वातं विशेषतः ॥ १८७ ॥
कफरोगानशेषांश्च मूत्ररोगाश्च सर्वशः ।
श्वास कास क्षयं पाण्डुं श्वयथुं शीतकज्वरम् ॥ १८८ ॥
ग्रहणीमामदोषञ्च वह्निमान्द्य सुदुर्जरम् ।
सर्वानुदकदोषाश्च तत्तद्रोगानुपानत ॥ १८९ ॥

[इति सीसकाधिकारः] ।

अथ पित्तलम् ।—

अथ पित्तलस्य द्वैविध्यनिर्देश ।—

रीतिका काकतुण्डी च द्विविधं पित्तल भवेत् ॥ १९० ॥

अथ रीतिकालक्षणम् ।—

सन्ताप्य काञ्जिके क्षिप्ता ताम्राभा रीतिका मता ॥ १९१ ॥

अथ काकतुण्डीलक्षणम ।—

एवं या जायते कृष्णा काकतुण्डीति सा मता ॥ १९२ ॥

नागप्रयोगमाह एवमिति ।—एव पूर्वक्रमेण भस्मीभूतम् । ताप्येति ।—सीसकाद्ध स्वर्णमाक्षिकभस्म। विशदिति ।—विशद्वर्नोपलै विशद्वार पुटेदिति योजनीयम् । वेल्लक विडङ्गम् । समांशै प्रत्येक नागपरिमितै, वल्लमाने. व्योषादिचूर्णैरित्यर्थ ॥ १८४—१८९ ॥

पित्तलस्य भेदमाह रीतिकेति ।—रीतिका पित्तलम् । काकतुण्डी राजरीति., पित्तलविशेष, 'काँचा पितल' "वेङ्गा पितल" इति च भाषा। तच्च कृत्रिमधातुर्ज्ञेय, यदुक्त भावप्रकाशे—"रीतिरप्युपधातु स्यात ताम्रस्य यशदस्य च। पित्तलस्य गुणा ज्ञेया स्वयोनिसदृशा जनै ॥ संयोगजप्रभावेण तस्याप्यन्ये गुणा स्मृता ॥" इति ॥ १९० ॥

रीतिकाया लक्षणमाह, सन्ताप्येति ।—यत् पित्तलमुष्णीकृतं काञ्जिके क्षिप्त ताम्रवर्ण भवेत सा रीतिकेत्यर्थ ॥ १९१ ॥

काकतुण्डीलक्षणमाह, एवमिति ।—यच्च उष्णीकृत काञ्जिके क्षिप्त कृष्णवर्णं स्यात सा काकतुण्डी ज्ञेया इत्यर्थ. ॥ १९२ ॥

अथ रीतिकाया गुणा ।—

रीतिस्तिक्तरसा रूक्षा जन्तुघ्नी साम्रपित्तनुत् ।
पाण्डुकुष्ठहरा योगात् सोष्णवीर्य्या च शीतला ॥ १९३ ॥

अथ काकतुण्ड्या गुणा ।—

काण्डतुण्डी गतस्नेहा तिक्तोष्णा कफपित्तनुत् ।
यकृत्प्लीहहरा शीत-वीर्य्या च परिकीर्त्तिता ॥ १९४ ॥

अथ शुभरीतिकालक्षणम् ।—

गुर्वी मृद्वी च पीताभा साराङ्गी ताडनक्षमा ।
सुस्निग्धा मसृणाङ्गी च रीतिरेतादृशी शुभा ॥ १९५ ॥

अथ अशुभरीतिकालक्षणम ।—

पाण्डु-पीता खरा रूक्षा बर्बरा ताडनाक्षमा ।
पूतिगन्धा तथा लघ्वी रीतिर्नेष्टा रसादिषु ॥ १९६ ॥

अथ रीतिकाशोधनम ।—

तप्ता क्षिप्ता च निर्गुण्डी-रसे श्यामारजोऽन्विते ।
पञ्चवारेण सशुद्धिं रीतिरायाति निश्चितम् ॥ १९७ ॥

रीतिकाया गुणमाह, रीतिरिति ।—जन्तुघ्नी क्रिमिनाशिनी । योगादिति ।—उष्णवीर्य्यद्रव्यसंयोगात् उष्णवीर्य्या शीतवीर्य्यद्रव्यसंयोगाच्च शीतवीर्य्या भवतीत्यर्थः ॥ १९३ ॥

काकतुण्ड्या गुणमाह, काकतुण्डीति ।—गतस्नेहा निःस्नेहा, रूक्षा इति यावत् । "गतस्नेहा" इत्यत्र "त्वतिस्नेहा" इति पाठान्तरम , युक्तञ्चैतत राजनिघण्टुसंवादात्, तथा च—"शुद्धा स्निग्धा मृदु शीता" इत्यादि ॥ १९४ ॥

प्रशस्तरीतिलक्षणमाह, गुर्वीति ।—मृद्वी कोमला सुखस्पर्शा इत्यर्थः । साराङ्गी दृढा, छिद्ररहितेत्यर्थो वा । ताडनक्षमा आघातसहा, घनघातेऽपि न भज्यते इत्यर्थः ॥ १९५ ॥

दुष्टरीतिलक्षणमाह, पाण्डुपीतेति ।—पाण्डुपीतमिश्रवर्णा । बर्बरा अधमा इत्यर्थः ॥ १९६ ॥

शोधनमाह, तप्तेति ।—श्यामारजोऽन्विते हरिद्राचूर्णसंयुते ॥ १९७ ॥

अथ रीतिकाद्रावणम् ।—

सुवर्णरीतिकाचूर्णं भक्षितं विष्ठितं पुन ।
छागेन कृष्णवर्णेन मत्तेन तरुणेन च ॥ १९८ ॥
तल्लिप्त खर्परे दग्ध द्रुतिं मुञ्चति शोभनाम् ।
चतुर्दश-लसद्वर्ण-सुवर्ण-सदृशच्छविः ॥
देहलोहकरी प्रोक्ता युक्ता रसरसायने ॥ १९९ ॥

अथ रीतिकामारणम् ।—

निम्बूरस-शिला-गन्ध-वेष्टिता पुटिताऽष्टधा ।
रीतिरायाति भस्मत्वं ततो योज्या यथायथम् ॥ २०० ॥

मतान्तरम् ।—

ताम्रवन्मारणं तस्या. कृत्वा सर्वत्र योजयेत् ॥ २०१ ॥

अथ पित्तलप्रयोग ।—

मृतारकूटकं कान्त व्योमसत्त्वञ्च मारितम् ।
त्रय समांशकं तुल्य-व्योषं जन्तुघ्नसयुतम् ॥ २०२ ॥
ब्रह्मबीजाजमोदाग्नि-भल्लाततिलसयुतम् ।
सेवित निष्कमात्रं हि जन्तुघ्न कुष्ठनाशनम् ॥
विशेषाच्छ्वेतकुष्ठघ्न दीपनं पाचनं हितम् ॥ २०३ ॥

[इति पित्तलाधिकार.] ।

द्रावणमाह, सुवर्णेति ।—सुवर्णवत् पीताभपित्तलचूर्ण कृष्णवर्ण तरुण मत्तञ्च छागं भोजयेत्, यदा भक्षित तत रीतिकाचूर्णं विष्ठारूपेण परिणत सत निर्गच्छति, तदा त मल खर्परे लिप्त्वा दहेत्, एवञ्च उत्कृष्ट द्रव नि सरति । चतुर्दशेति ।—चतुर्दशभि चतुर्दशविधै लसद्भि उज्ज्वलै वर्णै सुवर्णसदृशी छवि कान्ति यस्या सा तादृशी अत्युज्ज्वलकर्वूरवर्णा इत्यर्थ । प्रागुक्ता द्रुतिमिति द्वितीयान्तपदम् अत्र आकृष्य लिङ्गविपरिणामेन अन्वेतव्य ॥ १९८।१९९ ॥

मारणमाह, निम्बूरसेति ।—सुगमम् ॥ २०० ॥

मारणान्तरमतिदिशति, ताम्रवदिति ।—सुगमम् ॥ २०१ ॥

पित्तलप्रयोगविधिमाह, मृतारकूटकमिति ।—मृतारकूटक पित्तलभस्म । जन्तुघ्न:

अथ कांस्यम्।—

अथ कांस्यस्य उत्पत्तिनिर्देशः।—

अष्टभागेन ताम्रेण द्विभागखुरकेण च।
विद्रुतेन भवेत् कांस्यं तत् सौराष्ट्रभवं शुभम्॥ २०४॥

अथ प्रशस्तकांस्यलक्षणम्।—

तीक्ष्णशब्दं मृदु स्निग्धमीषच्छ्यामलशुभ्रकम्।
निर्मलं दाहरक्तञ्च षोढा कांस्यं प्रशस्यते॥ २०५॥

अथ अप्रशस्तकांस्यलक्षणम्।—

तत् पीतं दहने ताम्रं खरं रूक्षं घनासहम्।
मन्दनादं गतज्योतिः सप्तधा कांस्यमुत्सृजेत्॥ २०६॥

अथ कांस्यगुणाः।—

कांस्यं लघु च तिक्तोष्णं लेखनं दृक्-प्रसादनम्।
कृमिकुष्ठहरं वात-पित्तघ्नं दीपनं हितम्॥ २०७॥

विडङ्गम्। ब्रह्मबीजं पलाशबीजं ब्रह्मीशाकबीजं वा। अजमोदा यमानी, अन्त्रपरिमार्जकत्वात्। आग्नं चित्रकं। आरकूटादि तिलान्तं द्वादशद्रव्यं समांशं गृहीत्वा मिश्रीकृत्य शाणमानेन प्रयोक्तव्यमिति॥ २०२।२०३॥

मिश्रधातौ कांस्यस्य उत्पत्तिप्रकारमाह, अष्टभागेनेति।—खुरकेण तदाख्यवङ्गेन। "खुरकेण" इत्यत्र "कुटिलेन" इति पाठे—कुटिलेन वङ्गेन। तदिति।—सौराष्ट्रदेशोत्पन्नं तत् कांस्यम् उत्तमम्, एतादृशमिश्रणेन यत् कांस्यं भवति तदेव सुराष्ट्रजं कांस्यं शुभञ्च इत्यर्थः। एतस्य मिश्रधातुत्वे प्रमाणं प्रागेव प्रदर्शितम् इति॥२०४॥

प्रशस्तकांस्यलक्षणमाह, तीक्ष्णशब्दमिति।—मृदु कोमलं, सुखस्पर्शमित्यर्थः। ईषदिति।—ईषत् श्यामाभशुभ्रवर्णम्। दाहरक्तम् अग्निसन्तापेन रक्तवर्णम्। षोढा षड्विधम्॥ २०५॥

अवरकांस्यलक्षणमाह, तदिति।—घनासहं "घनाग्निसहसूक्ष्माङ्गं कांस्यमुत्तममीरितम्" इति राजनिघण्टुवचनेन घनाग्निसहत्वस्य उत्तमकांस्यलक्षणत्वात् तद्विपर्य्यासेन घनाग्न्यसहं, तीव्रानले विदीर्य्यमाणमित्यर्थः। "मन्दनादं गतज्योतिः" इत्यत्र "मर्दनादागतज्योतिः" इति पाठे तु—घर्षणादिना प्राप्तौज्ज्वल्यम्॥ २०६॥

घृतमेकं विना चान्यत् सर्वं कांस्यगतं नृणाम् ।
भुक्तमारोग्यसुखदं हितं सात्म्यकरं तथा ॥ २०८ ॥

अथ कांस्यशोधनम् ।—

तप्तं कांस्यं गवां मूत्रे वापितं परिशुध्यति ॥ २०९ ॥

अथ कांस्यमारणम् ।—

म्रियते गन्धतालाभ्यां निरुत्थं पञ्चभिः पुटैः ॥ २१० ॥

मतान्तरम् ।—

त्रिक्षारं पञ्चलवणं सप्तधाऽम्लेन भावयेत् ।
कांस्यारकूटपत्राणि तेन कल्केन लेपयेत् ॥
रुद्ध्वा गजपुटे पक्वं शुद्धिमायाति नान्यथा ॥ २११ ॥

[इति कांस्याधिकारः] ॥

अथ वर्त्तलोहम् ।—

अथ वर्त्तलोहस्वरूपम् ।—

कांस्यार्क-रीति-लोहाहि-जातं तद्वर्त्तलोहकम् ।
तदेव पञ्चलोहाख्यं लोहविद्भिरुदाहृतम् ॥ २१२ ॥

गुणमाह,—कांस्यमिति । घृतमेकमिति ।—केवलं घृतं विना अन्यत् सर्वं कांस्यपात्रस्थं सेवितम् आरोग्यादिप्रदं भवति, कांस्यपात्रस्थघृतस्य विषवदपकारकत्वादिति ॥ २०७।२०८ ॥

शोधनमाह, तप्तमिति ।—वापितं प्रक्षिप्तम् ॥ २०९ ॥

मारणमाह, म्रियते इति ।—गन्धतालाभ्यां गन्धकहरितालाभ्यां समभागाभ्याम् ॥ २१० ॥

मतान्तरे मारणमाह, त्रिक्षारमिति ।—त्रिक्षारं "स्वर्जिक्षारं यवक्षारं टङ्कणक्षारमेव च । क्षारत्रयं समाख्यातं त्रिक्षारञ्च प्रकीर्त्तितम् ॥" इत्युक्तस्वरूपम् । पञ्चलवणं "सौवर्चलं सैन्धवञ्च विडमौद्भिदमेव च । सामुद्रेण समं पञ्च लवणानि" इत्युक्तरूपम् । आरकूटं पित्तलम् । "कांस्यारकूटपत्राणि" इत्यत्र "कांस्यारघोषपत्राणि" इति पाठे—आर इति घोषः शब्दः, संज्ञा इति यावत्, यस्य स आरघोषः पित्तलशब्दवाच्य इत्यर्थः ॥ २११ ॥

अथ वर्त्तलोहगुणा ।—

हिमाम्लं कटुक रूक्ष कफपित्तविनाशनम् ।
रुच्यं त्वच्य कृमिघ्नञ्च नेत्र्यं मलविशोधनम् ॥ २१३ ॥
तद्भाण्डे साधितं सर्वमन्नव्यञ्जनसूपकम् ।
अम्लेन वर्जितञ्चाति-दीपनं पाचनं हितम् ॥ २१४ ॥

अथ वर्त्तलोहशोधनम् ।—

द्रुतमश्वजले क्षिप्त वर्त्तलोह विशुध्यति ॥ २१५ ॥

अथ वर्त्तलोहमारणम् ।—

म्रियते गन्धतालाभ्यां पुटित वर्त्तलोहकम् ।
तेषु तेष्वथ योगेषु योजनीयं यथाविधि ॥ २१६ ॥

[इति वर्त्तलोहाधिकारः] ।

अथ रसोपरसलोहाना सूतसाधकत्वनिर्देश ।—

जातिमद्भिर्विशुद्धैश्च विधिना परिसाधितैः ।
रसोपरस-लोहाद्यैः सूत सिध्यति नान्यथा ॥ २१७ ॥

वर्त्तलोहस्य उत्पत्तिप्रकार पर्य्यायञ्चाह, कांस्येति ।—कांस्यताम्रारकूटसीस-लौहेतिपञ्चधातुसम्मेलनोत्पन्नत्वात तस्य पञ्चलौहेति नामान्तर बोध्यम् । वर्त्तलोहं "विदरी" इति लोके प्रसिद्धम ॥ २१२ ॥

गुणमाह, हिमाम्लमिति ।—त्वच्य त्वच सौकुमार्य्यसम्पादकम । तद्भाण्डे वर्त्तलोह-निर्मितस्थाल्याम् । साधित निष्पादित पक्वमित्यर्थ ॥ २१३।२१४ ॥

शोधनमाह, द्रुतमिति ।—द्रुत द्रावितमित्यर्थ । अश्वजले अश्वमूत्रे ॥ २१५ ॥

मारणमाह, म्रियते इति ।—गन्धतालाभ्या गन्धकहरितालाभ्याम ॥ २१६ ॥

शोधितानामेव रसोपरसादीना सूतकर्मणि प्रयोज्यतामाह जातिमद्भिरिति ।—जातिमद्भि अकृत्रिमै । विशुद्धै प्रशस्तै । विधिना परिसाधितै यथाशास्त्र शोधितमारितै । रसेति ।—रसशब्देनात्र महारसा ग्राह्या । एवविधमहारसोप रसलौहादिसयोगात स्वेदनमूर्च्छनाद्यनेकविधकर्मसिद्ध. पारद. देहलोहसयत्वादि-करी भवति, नान्यथा इति ॥ २१७ ॥

अथ भस्मीभूतरत्नादीनामेव सूतयोगे प्रयोज्यतानिर्देश ।—

रत्नानि लोहानि वराटशुक्ति-पाषाणजात खुरशृङ्गशल्यम् ।
महारसाद्येषु कठोरदेहं भस्मीकृत तत् खलु सूतयोग्यम्
॥ २१८ ॥

अथ भूनागः ।—

अथ भूनागसत्त्वपातनम् ।—

वज्राणां द्रावणार्थाय सत्त्व भूनागज ब्रुवे ।
तदेव परमं तेजः सूतराजेन्द्र-वज्रयो ॥ २१९ ॥
धौत-भूनागसम्भूतं मर्दयेद्भृङ्गजद्रवैः ।
निम्बुद्रवैश्च निर्गुण्ड्याः स्वरसैस्त्रोटन पृथक् ॥ २२० ॥
तद्द्रावणगणोपेत सम्मर्द्य वटकीकृतम् ।
निरुध्य दृढमूषाया हिदण्ड प्रधमेद्दृढम् ॥ २२१ ॥
स्वत शीत समाहृत्य पट्टके विनिवेश्य तत् ।
रवकान् राजिकातुल्यान् रेणूनतिभरान्वितान् ॥ २२२ ॥
द्वादशांशार्कसयुक्तान् धमित्वा रवकान् हरेत् ।
प्रक्षाल्य रवकानाशु समादाय प्रयत्नतः ॥ २२३ ॥
वज्रादिद्रावण तेन प्रकुर्वीत यथेप्सितम् ।
खरसत्त्वमिदं प्रोक्त रसायनमनुत्तमम् ॥
द्वित्रिमूषासु चैकस्या सत्त्व भवति निश्चयः ॥ २२४ ॥

रत्नादीना सूतसाधनकर्मणि उपयोगिकरणप्रकारमाह, रत्नानीति ।— शल्यम् अस्थि । महारसाद्येषु यत कठोरदेह वैक्रान्तमाक्षिकादिकठिनद्रव्यम् । सूतयोग्य पारदकर्मोपयोगि, भवति इति शेष ॥ २१८ ॥

वज्रमारणे भूनागसत्त्वस्य उपयोगिता प्रागुक्ता, इदानी पुनर्द्रावणार्थं तस्य सत्त्व-पातनमाह, वज्राणामिति ।—भूनाग भूजन्तु रक्ततुण्डकादिपर्यायक द्रव्यविशेष । किञ्चुलूक इति केचित. दृश्यते च—किञ्चलूकप्रचारस्थाने सीसकघृष्टरेखावत् रेखा, अत एव तस्य भूनागसञ्ज्ञा इति, किञ्च तुखस्यापि तस्य किञ्चिदारक्ताभत्वात् इति

मतान्तरम्।—

भुजङ्गमानुपादाय चतुष्पृष्ठसमन्वितान्।
सुवर्णरूप्यताम्रायस्कान्त-सम्भूतिभूमिजान्॥ २२५॥
प्रक्षाल्य रजनीतोयैः शीतलैश्च जलैरपि।
उपोषितं मयूरं वा शूरं वा चरणायुधम्॥ २२६॥
क्रमेण चारयित्वाऽथ तद्विष्ठां समुपाहरेत्।
क्षारास्तैः सह सम्पेष्य विशोष्य च खरातपे॥ २२७॥
ततः खर्परके क्षिप्त्वा भर्जयित्वा मषीं चरेत्।
मषीं द्रावणवर्गेण संयुक्तां सम्प्रमर्दिताम्॥ २२८॥
निरुध्य कोष्ठिकामध्ये प्रधमेद्घटिकाद्वयम्।
शीतलीभूतमूषायाः खोटमाहृत्य पेषयेत्॥ २२९॥
प्रक्षाल्य रवकान् सूक्ष्मान् समादाय प्रयत्नतः।
सुवर्णमानवद्ध्मात्वाऽनव कृत्वा निर्याजयेत्॥ २३०॥

च तेषामाशय। यत्तु केचिदेव भूनागशब्देन सीसकमित्याहुः तच्चिन्त्यम, सीसक-प्रकरणे तत्सत्त्वपातनमनुक्त्वा अत्र पुनस्तत्प्रसङ्गावतारणस्यासमीचीनत्वादिति। तज्ज्ञं सत्त्व सारम्। तदेवेति।—पारदहीरकयो तत भूनागसत्त्वमेव अतीव तेजोवर्द्धकम्। रवकान् तीक्ष्णान् खरानिति यावत, चञ्चलानिति वा। धौतभूनागसम्भूतमित्यव चूर्ण-मिति शेष, भूनागमुद्धृत्य प्रक्षाल्य च चूर्णं कृत्वा भृङ्गादीनां प्रत्येक स्वरसे दिनवयं मर्दयेत, ततो द्रावणगणेन सह दिनमेकं सम्मर्द्य चक्रिका कृत्वा दृढमूषायाम् अवरुध्य दण्डद्वय तीव्राग्निना आधमेत। तत स्वाङ्गशीतम् आदाय पट्टके स्थाप्य राजिकाख्य-सर्षपसदृशान् खरान् गुरूंश्च रेणून् गृहीत्वा द्वादशांशतास्रेण सह पुनरपि भस्त्रया आधाप्य खररेणून् गृह्णीयात, एवं द्विविवारेण कदाचिदेकवारेणापि सत्त्व भवति, ततस्तान् प्रक्षाल्य काचकूप्यां निधापयेत्। इदमेव खरसत्त्वाह्वं बोध्यम॥ २१९—२२४॥

मतान्तरमाह भुजङ्गमानिति।—भुजङ्गमशब्देनात्र प्रकरणवशात भूभुजङ्गो बोध्य, ततश्च भूनाग इत्यर्थ। शूर चरणायुधं पराक्रान्तकुक्कटम्। चारयित्वा अवचार्य्य, भोजयित्वेत्यर्थ.। तद्विष्ठामित्यादि।—विष्ठासमाहरणे चात्र तस्या. प्रथमांश परित्याज्यः,

अथ भूनागसत्त्वप्रयोगविधि ।—

भूनागोद्भवसत्त्वमुत्तममिदं श्रीसोमदेवोदितं
दत्त पादमित द्विशाणकनकेनैकङ्गतेनोर्मिकाम् ।
तद्धौताम्बुविलेपन स्थिर-चरोद्भूत विष नेत्ररुक्
शूल मूलगदश्च कर्णजरुजो हन्यात् प्रसूतिग्रहम् ॥२३१॥

[इति भूनागाधिकार] ।

—"मल मूत्र गृहीत्वा च सन्त्यज्य प्रथमाशिकम" इति रसेन्द्रचिन्तामणि-प्रमाणात । खोट रसजारणबन्धनद्रव्यविशेषम , भूनागसत्त्वस्य रसजारकत्वात अत्र खोटशब्देन रवकरूपं भूनागसत्त्व बोध्यम । सुवर्णमानवत सुवर्णस्य मान परिमाण तद्वत तद्विशिष्ट, स्वर्णतुल्यामित्यर्थ । अनव कृत्वा पुरातन कृत्वा, पुरातनमेव तत्सत्त्व प्रयोज्य ,न तु नव, "पुराणा स्युगुणैर्युक्ता आसवा धातवो रसा " इत्युक्ते । अत्रायमर्थ —सुवर्णादीनामाकरभूतभूमिस्थान् चतुष्पथस्थितान् भूनागान् उद्धृत्य हरिद्रास्वरस-शीतलजलाभ्या प्रक्षाल्य च उपोषितमयूर वीर्यवन्त कुक्कुट वा तान् भोजयेत, ततो यदा स मयूर कुक्कुटो वा पुरीषमुत्सृजेत, तदा त्यक्तप्रथमांश तत् पुरीष गृहीत्वा टङ्कणक्षाराम्लकाञ्जिकादिभि सह मर्दयित्वा च तीव्रातपे विशोषयेत, तत खर्परे सस्थाप्य भर्जनक्रमेण यदा मसीवत कृष्णवर्ण भवेत, तदा तदादाय द्रावणवर्गेण सह सम्पिष्य कोष्ठिकामध्ये रुद्ध्वा च दण्डद्वय भस्त्रया धमेत, स्वाङ्गशीताञ्च ता मूषामुद्घाट्य खोटाभाख्य रसबन्धनसाधन तत खरसत्त्वमादाय पिष्ट्वा प्रक्षाल्य च समसुवर्णेन सह पुन ध्मात्वा तन्निस्सृतरवकान् गृहीत्वा च काचकूप्या स्थापयेत, अतीते च संवत्सरे तत रसकर्मणि अवचारयेत इति । रसेन्द्रचिन्तामणावप्यस्य सत्त्वपातनविधिमाह, यथा —"सद्यो भूनागमादाय धारयेत शिखिन बुध । अथवा कुक्कुट वीर कृत्वा मन्दिरमागतम् ॥ मल मूत्र गृहीत्वा च सन्त्यज्य प्रथमाशिकम् । आलोड्य क्षारमध्वाज्ये धमेत सत्त्वार्थमादरात ॥ मुञ्चन्ति ताम्रवत सत्त्व तन्मुद्राजलपानत । नश्यन्ति जङ्गमविष स्थावरञ्च न सशय ॥" इति । ताम्रवत सत्त्ववत्त्वात, वज्रद्रावण सूतबन्धनादिकर्मोपयोगित्वाच्च अ धातोरपि भूनागसत्त्वस्य लौहनिरूपणाधिकारे ग्रहण बोध्यम् ॥ २२५—२३० ॥

भूनागसत्त्वप्रयोगविधिमाह, भूनागोद्भवसत्त्वमिति ।—पादमितमिति द्विशाण-कनकापेक्षया ज्ञेयं, तेन भूनागसत्त्वस्य माषकद्वय कनकस्य च शाणद्वय ग्राह्यम् ।

अथ तैलपातनविधिः ।—

अथ अङ्कोल्लबीजात् तैलपातनम् ।—

मूलान्युत्तरवारुण्या जर्जरीकृत्य काञ्जिके ।
क्षिपेदङ्कोल्लबीजानां पेशिका जर्जरीकृताम् ॥
तत्तैलं घृतवत् स्यात्तं ग्राह्यं तत्तु यथाविधि ॥ २३२ ॥

मतान्तरम् ।—

सम्पेष्योत्तरवारुण्या पेटकार्य्या दलान्यथ ।
काञ्जिकेन ततस्तेन कल्केन परिमर्दयेत् ॥ २३३ ॥
रजश्चाङ्कोल्लबीजानां तद्बद्ध्वा विरलाम्बरे ।
तद्विलम्ब्याऽऽतपे तीव्रे तस्याधश्चषकं न्यसेत् ॥
तस्मिन्निपतितं तैलमादेयं श्वित्रनाशनम् ॥ २३४ ॥

ऊर्मिका अङ्गुरीयकमित्यर्थः । प्रसूतिग्रह प्रसूतिरोग, सूतिकातङ्कमिति यावत् । सुवर्णतोलकेन सह भूनागसत्त्वमाषद्वयं मिश्रयित्वा अङ्गुरीयकरणोपयोगिकं विधाय तेन अङ्गुरीयकं कुर्य्यात्, तदङ्गुरीयकधौताम्बुविलेपनेन स्थावरजङ्गमविषादिकं विनश्यति ॥ २३१ ॥

तैलानां बीजसत्त्वत्वात् सत्त्वपातनवर्णनप्रसङ्गेन तैलपातनविधिं विवक्षुरादौ अङ्कोल्लबीजात् तैलपातनविधिमाह, मूलानीति ।—उत्तरवारुण्या "राखालशशा" इति प्रसिद्धाया इन्द्रवारुण्याः । अङ्कोल्ल अङ्कोठ "धल् आँकुडा" इति ख्यातः, अङ्कोल्लो देवदारु इति वा, "ढीकडा" इति ख्यातो वा "कांकरोल" इति वा ख्यातः, तस्य बीजानां पेशिका बीजमज्जानम् । जर्जरीकृतां चूर्णितामित्यर्थः । उत्तरवारुणीमूलं कुट्टयित्वा तद्रसेन अङ्कोठमज्जचूर्णं परिभाव्य काञ्जिके क्षिप्त्वा तीव्रातपे न्यसेत्, घृतवत् स्यात् यत्तैलं काञ्जिकोपरि उत्तिष्ठेत् तत् वस्त्रखण्डेन पाणिना वा आकृष्य गृह्णीयात्, यद्वा,—वक्ष्यमाणविधिना कुट्टितोत्तरवारुणीमूलम् अङ्कोल्लमज्ज-चूर्णञ्च काञ्जिकेन पिष्ट्वा सूक्ष्मवस्त्रे बद्ध्वा च तीव्रातपे लम्बयेत् तदधः पात्रमेकं स्थापयेच्च, लम्बमानवस्त्रबद्धौषधात् यत् तैलं च्यवेत तत् ग्राह्यम् इति ॥ २३२ ॥

अस्यैव प्रकारान्तरमाह, सम्पेष्येति ।—पेटकारी ज्योतिष्मती । विरलाम्बरे श्लथवस्त्रे । चषकं पात्रम्, चषकशब्दः सुरापात्रप्रार्थकोऽपि अत्र पात्रमात्रार्थको

मतान्तरम् ।—

अङ्कोल्लबीजसम्भूत चूर्णं सम्मर्द्य काञ्जिके ।
एकरात्रोषितं तत्तु पिण्डीकृत्य ततः परम् ॥ २३५ ॥
स्वेदयेत् कन्दुके यन्त्रे घटिकाद्वितय ततः ।
ताञ्च पिण्डीं दृढे वस्त्रे बद्ध्वा निष्पीड्य काष्ठत ॥ २३६ ॥
अधःपात्रस्थित तैलं समाहृत्य नियोजयेत् ।
एव कन्दुकयन्त्रेण सर्वतैलान्युपाहरेत् ॥ २३७ ॥

मतान्तरम् ।—

अङ्कोल्लस्यापि तैल स्यात् काकतुण्ड्या समूलया ॥ २३८ ॥

अथ बाकुचीबीज घोषाबीजाभ्या तैलपातनम् ।—

बाकुची-देवदाल्योश्च कर्कोटीमूलतो भवेत् ॥ २३९ ॥

अथ विषमुष्टितैलपातनम् ।—

अपामार्गकषायेण तैल स्याद्विषमुष्टिजम् ॥ २४० ॥

बोध्य । इन्द्रवारुण्या ज्योतिष्मत्याश्च पत्राणि काञ्जिकेन पिष्ट्वा तत्कल्केन अङ्कोल्लबीजचूर्ण मर्दयेत तत पूर्वोक्तक्रमानुसारेण तैल गृह्णीयात ॥ २३३।२३४ ॥

प्रकारान्तरमाह, अङ्कोल्लेति ।—अङ्कोठबीजचूर्ण काञ्जिकेन मर्दयित्वा एकरात्र वासयेत, अपरेद्यु तत पिण्डीकृत्य कन्दुकयन्त्रे दण्डद्वयं स्वेदयित्वा पश्चात् दृढे वस्त्रे बद्ध्वा काष्ठद्वयेन उभयत पेषयेत, अध स्थपात्रे तैल पतेदिति । कन्दुकयन्त्रलक्षणञ्च अग्रे वक्ष्यति । ग्रन्थान्तरे इद स्वेदनयन्त्राख्यम् , तल्लक्षण यथा —"साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्य निधाय च । पिधाय पच्यते यत्र तत यन्त्र स्वेदन स्मृतम् ॥" इति ॥ २३५—२३७ ॥

मतान्तरमाह, अङ्कोल्लस्येति ।—काकतुण्डी श्वेतगुञ्जा । समूलकाकतुण्डीरसेन अङ्कोल्लबीज मर्दयित्वा पूर्ववत कन्दुकयन्त्रे तैल ग्राह्यम् ॥ २३८ ॥

बाकुचीबीज-घोषाबीजाभ्या तैलपातनविधिमाह, बाकुचीत्यादि ।—बाकुची सोमराजी । देवदाली हस्तिघोषक । कर्कोटी कर्कोटक, "काँक्रोल" इति भाषा । कार्कोटीमूलरससर्दितबाकुची देवदालीबीजाभ्या पूर्वरीत्या तैलमाहरेदिति ॥ २३९ ॥

विषमुष्टिबीजात तैलपातनविधिमाह, अपामार्गकषायेणेति ।—विषमुष्टिः

अथ जैपालात् तैलपातनम्।—

मूलक्वाथैः कुमार्य्याश्च तैलं जैपालजं हरेत्॥ २४१॥

अथ बाकुचीबीजात तैलपातने प्रकारान्तरम्।—

क्वाथै रक्तापमार्गस्य बाकुचीतैलमाहरेत्॥ २४२॥

अथ कृष्णामिश्रश्वेतगुञ्जाबीजात तैलपातनम्।—

कृष्णायाः काकतुण्ड्याश्च बीजचूर्णानि कारयेत्।
कान्तपाषाणचूर्णञ्च एकीकृत्य निरोधयेत्।
धान्यराशिगतं पश्चादुद्धृत्य तैलमाहरेत्॥ २४३॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये लोहशोधनमारणादिनिरूपणं नाम पञ्चमोऽध्यायः॥ ५॥

"कुँचिला" इति ख्याता। अपामार्गकषायभावितविषमुष्टिबीजात पूर्वोक्तक्रमेण तैलमाहरेदिति॥ २४०॥

जैपालबीजात्तैलपातनविधिमाह, मूलक्वाथैरिति।—कुमार्य्या घृतकुमार्य्या। पूर्वरीत्या कुमारीमूलक्वाथभावितजैपालबीजात तैलमाहरेत॥ २४१॥

बाकुचीबीजात तैलपातने प्रकारान्तरमाह, क्वाथैरिति।—अत्रापि पूर्वक्रमो बोध्य। "रक्तापमार्गस्य" इत्यत्र छन्दश्छान्दस॥ २४२॥

कृष्णामिश्रश्वेतगुञ्जाबीजात तैलपातनमाह कृष्णाया इति।—कृष्णा पिप्पली कालाजाजी वा। कान्तपाषाणम् अयस्कान्त। कृष्णादिद्रव्यत्रयमेकीकृत्य पात्रमध्ये संस्थाप्य निरुध्य च धान्यराशिमध्ये पञ्च निधापयेत्, पश्चादुत्तोल्य पूर्ववत् तैलमाकर्षेत् इति॥ २४३॥

इति रसरत्नसमुच्चयबोधिन्यां पञ्चमोऽध्यायः॥ ५॥

अथ षष्ठोऽध्यायः ।

अथ शिष्योपनयनम् ।— *

अथ रसशास्त्रप्रकटने हेतुनिर्देश ।—

रसशास्त्राणि सर्वाणि समालोच्य यथाक्रमम् ।
साधकाना हितार्थाय प्रकटीक्रियतेऽधुना ॥ १ ॥

अथ शास्त्रक्रमयोरन्योऽन्यापेक्षित्वनिर्देश ।—

न क्रमेण विना शास्त्रं न शास्त्रेण विना क्रमः ।
शास्त्रं क्रमयुतं ज्ञात्वा यः करोति स सिद्धिभाक् ॥ २ ॥

रसशास्त्राणा प्रकटीकरणे कारण विवक्षुराचार्य्य स्वस्मिन् शिष्याणा प्रत्ययोत्पादनार्थमादौ आत्मन रसशास्त्रेषु विशेषज्ञत्व विवृणोति, रसशास्त्राणीति ।—यथाक्रम पौर्वापर्य्यानुसारेण, शास्त्रविहितस्वेदनमूर्च्छनोत्थापनादिप्रक्रियाया यथानिर्देशानुसारेण, यद्वा—यथाक्रम यथाऽनुष्ठान, स्वयमनुष्ठानादिक कृत्वा इत्यर्थ, नाह स्वय किञ्चिदपि विदधामि किन्तु पूर्वाचार्य्यप्रणीतानि सर्वाणि शास्त्राणि सम्यक् आलोच्य अनुष्ठानादिना जातप्रत्यय सन् प्रकटीकरोमि अत एव एतत् सर्वं विश्वास्यमिति ॥१॥

शास्त्रक्रमयोरन्योऽन्यापेक्षित्वमाह, नेति ।—पौर्वापर्य्यरूपेण विन्यासविरहित शास्त्र न शास्त्र, शास्त्रविरहितक्रमोऽपि न क्रम, शास्त्रादन्यत्र क्रमविधानस्य

---

* सूतस्य सर्वार्थसाधकशक्त्याधाने प्रागुक्तमहारसादीना विशिष्टोपयोगितया प्राक् तेषा सर्वविधसंस्कारमुक्त्वा इदानी रसस्य शोधनादिक विवक्षु आचार्य्य रसकर्म्मणि सम्यक्सिद्धिलाभस्य मन्त्रपूजाद्यायत्तत्वात्, मन्त्रादौ पुन अदीक्षितस्य अनधिकारित्वाच्च रसकर्म शिशिक्षिषो शिष्यस्य मन्त्राद्युच्चारणे अधिकारलाभार्थं शिष्योपनयनीय नाम षष्ठमध्यायमारभते, अथेति ।—उपनयनम् उप समीप, गुरोरिति शेष, नीयते प्राप्यते वेदादिशास्त्राभ्यासार्थमिति तात्पर्य्यं, येन कर्म्मणा तत्, "गृह्योक्तकर्म्मणा येन समीप नीयते गुरो । बालो वेदाय तद्योगात् बालस्योपनय विदु ॥" इत्युक्तलक्षणवेदाधिकारिकरणयोग्यसंस्कारविशेष, अत्र च अथर्ववेदोपाङ्गायुर्वेदाधिकारिकरणाय संस्कारविशेषो बोध्य ।

अथ रसविद्याया गुरोर्लक्षणम्।—

आचार्य्यो ज्ञानवान् दक्षो रसशास्त्रविशारदः।
मन्त्रसिद्धो महावीरो निश्चलः शिववत्सलः॥ ३॥
देवीभक्तः सदा धीरो देवता-याग-तत्परः।
सर्वाऽऽम्नायविशेषज्ञ कुशलो रसकर्मणि॥
एवं-लक्षणसंयुक्तो रसविद्यागुरुर्भवेत्॥ ४॥

अथ रसविद्यासाधकशिष्यलक्षणम्।—

गुरुभक्ताः सदाचाराः सत्यवन्तो दृढव्रताः।
निरालस्याः स्वधर्मज्ञाः सदाऽऽज्ञापरिपालकाः॥ ५॥
दम्भ-मात्सर्य्यनिर्मुक्ताः कुलाचारेषु दीक्षिताः।
अत्यन्तसाधकाः शान्ता मन्त्राराधनतत्पराः॥
इत्येवं-लक्षणैर्युक्ता शिष्याः स्युः सूतसिद्धये॥ ६॥

अथ रसविद्यासाधकस्य सहायलक्षणम्।—

सहायाः सोद्यमास्तत्र यथा शिष्यास्ततोऽधिकाः।
कुलीनाः स्वामिभक्ताश्च कर्त्तव्या रसकर्मणि॥ ७॥

ज काऽप्युपयोगिता इत्यर्थः, यद्वा—अनुष्ठानं विना शास्त्रं न, शास्त्रं विना अनुष्ठानमपि न, यदि अनुष्ठानं न क्रियते तदा शास्त्रपठनस्य वैयर्थ्य, यदि शास्त्रं नाधीयते, तदा अनुष्ठानमपि सम्यक् न जायते अतस्तस्य वैयर्थ्यम् इति॥ २॥

रसकर्मोपदेष्टृगुरुलक्षणमाह, आचार्य्य इति।—आचार्य्य "उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विज। सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते॥" इत्युक्तलक्षण सकल्परहस्यवेदाध्यापयिता। निश्चल स्थिरमति॥ ३।४॥

उपदेष्टव्यशिष्यलक्षणमाह, गुरुभक्ता इति।—कुलाचारेषु स्ववर्णोचितधर्मेषु दीक्षिता प्राप्तोपदेशा, स्वधर्मनिष्ठा इत्यर्थः, यद्वा—"जीव प्रकृतितत्त्वञ्च दिक्कालाकाशमेव च। क्षित्यप्तेजोवायवश्च कुलमित्यभिधीयते॥ ब्रह्मबुद्ध्या निर्विकल्पमेतेष्वाचरणञ्च यत। कुलाचार स एवोक्त" इत्युक्तलक्षणेषु कुलाचारेषु दीक्षिता सर्वभूते समदर्शिन इत्यर्थः। सूतसिद्धये सूतस्य सर्वसिद्धिप्रदगुणसम्पादनाय॥ ५।६॥

रसकर्मसाधने उपयुक्तसहायलक्षणमाह, सहाया इति।—सहाया सहचराः,

अथ रसविद्यासाधने नास्तिकादीनां वैफल्यनिर्देशः ।—

नास्तिका ये दुराचारास्तुम्बका गुरुतोऽपरात् ।
विद्यां ग्रहीतुमिच्छन्ति चौर्य्याच्छद्मखलोत्सवात् ॥ ८ ॥
न तेषां सिध्यते किञ्चिन्मणिमन्त्रौषधादिकम् ।
कुर्वन्ति यदि मोहेन नाशयन्ति स्वकं धनम् ॥
इहलोके सुखं नास्ति परलोके तथैव च ॥ ९ ॥

अथ रसविद्यायां गुरुसन्तोषस्य सिद्धिप्रदत्वनिर्देशः ।—

तस्माद्भक्ति-बलादेव सन्तुष्यति यदा गुरुः ।
तदा शिष्येण सा ग्राह्या रसविद्याऽऽत्मसिद्धये ॥
हस्तमस्तकयोगेन वरं लब्ध्वा सुसाधयेत् ॥ १० ॥

अथ रससाधनोपयोगिदेशनिर्देशः ।—

आतङ्करहिते देशे धर्मराज्ये मनोरमे ।
उमामहेश्वरोपेते समृद्धे नगरे शुभे ॥ ११ ॥
कर्त्तव्यं साधनं तत्र रसराजस्य धीमता ।
अत्यन्तोपवने रम्ये चतुर्द्वारोपशोभिते ॥ १२ ॥
तत्र शाला प्रकर्त्तव्या सुविस्तीर्णा मनोरमा ।
सम्यग्वातायनोपेता दिव्यचित्रैर्विचित्रिता ॥ १३ ॥

परिचारका इति यावत् । सोद्यमा इति ।—शिष्येभ्योऽपि अधिकोद्यमशीला इत्यर्थः । कुलीनाः सद्वंशजाः ॥ ७ ॥

नास्तिकादीनां रसकर्मणि वैफल्यमाह, नास्तिका इति ।—तुम्बकाः धूर्त्ताः, ग्रन्थैकदेशाभिज्ञा वा, पल्लवग्राहिण इति यावत् । गुरुत इति ।—गुरुं विहाय अन्यस्मात् चौर्य्यमाश्रित्य अथवा छद्मना गुप्तभावेनेत्यर्थः, खले खलकर्मणि यः उत्सवः आनन्दः आसक्तिरिति यावत्, तस्मात् स्वकीयनास्तिक्यादिकं निह्नुत्य साधुत्वव्यपदेशादित्यर्थः, विद्यां ग्रहीतुमिच्छन्ति इति योजना ॥ ८।९ ॥

गुरुसन्तोषस्य सिद्धिहेतुत्वमाह, तस्मादिति ।—हस्तमस्तकयोगेन करशिरःसंयोगरूपप्रणामेन । "सुसाधयेत्" इत्यत्र "सुशोधयेत्" इति पाठान्तरम् ॥ १० ॥

अथ रसविद्यादाने दीक्षाविधि ।—

रसविद्या शिवेनोक्ता दातव्या साधकाय वै ।
यथोक्तेन विधानेन गुरुणा मुदितात्मना ॥ २७ ॥
सुमुहूर्त्ते सुनक्षत्रे चन्द्रताराबलान्विते ।
कलस तोयसम्पूर्णं हेमरत्नफलैर्युतम् ॥ २८ ॥
स्थापयेद्रसलिङ्गाग्रे दिव्यवस्त्रेण वेष्टितम् ।
गन्धपुष्पाक्षतैर्धूपैर्नैवेद्यैश्च सुपूजयेत् ॥ २९ ॥
पूजाऽन्ते हवनं कुर्य्याद्‌योनिकुण्डे सुलक्षणे ।
तिलाऽऽज्ये. पायसैः पुष्पैः शतपुष्पादिकै पृथक् ॥ ३० ॥
अघोरेण रसाङ्कुश्या होमान्ते शिष्यमाह्वयेत् ।
कालिनीशक्तिसयुक्तं रससिद्धिपरायणम् ॥ ३१ ॥

तत्र कालिनीलक्षणम् ।—

यस्यास्तु कुञ्चिताः केशाः श्यामा या पद्मलोचना ।
सुरूपा तरुणी भिन्ना विस्तीर्णजघना शुभा ॥ ३२ ॥
सङ्कीर्णहृदया पीन-स्तनभारेण नम्रिता ।
चुम्बनालिङ्गनस्पर्श-कोमला मृदुभाषिणी ॥ ३३ ॥
अश्वत्थपत्रसदृश-योनिदेश-सुशोभिता ।
कृष्णपक्षे पुष्पवती सा नारी कालिनी स्मृता ॥
रसबन्धे प्रयोगे च उत्तमा सा रसायने ॥ ३४ ॥

तत्र कालिन्यभावे तदनुकल्पविधि ।—

तदभावे सुरूपा तु या काचित्तरुणाङ्गना ।

दिश आरभ्य दक्षिणावर्त्तेन। नाममन्त्रैरिति।—"ओँम् नन्दिने नम" इत्यादि-रूपमन्त्रै ॥ २५।२६ ॥

रसविद्यादानार्थं दीक्षाविधिमाह, रसविद्येति।—योनिकुण्डे योन्याकारे होमकुण्डे। अघोरेण रसाङ्कुश्या इत्यत्र मन्त्रेणेति शेष, हवन कुर्य्यादित्यनेनान्वय। कालिनीशक्तिसयुक्त "यस्यास्तु" इत्यादिना वक्ष्यमाणलक्षणान्वितस्त्री-द्वितीयम्। कालिनीलक्षणमाह, यस्या इति।—भिन्ना प्रस्फुटितयोनिका इत्यर्थ.।

तस्या देयं त्रिसप्ताहं गन्धकं घृतसंयुतम् ॥
कर्षैकैकं प्रभाते तु सा भवेत् कालिनीसमा ॥ ३५ ॥

एवं शक्तियुतो योऽसौ दीक्षयेत्तं गुरूत्तमः ।
सुस्नातमभिषिञ्चेत मन्त्रेण कलसोदकैः ॥ ३६ ॥
अघोरामङ्कुशीं विद्यां दद्याच्छिष्याय सद्गुरुः ।
यथाशक्त्या सुशिष्येण दातव्या गुरुदक्षिणा ॥ ३७ ॥
अथाऽऽज्ञया गुरोर्मन्त्रं लक्षं लक्षं पृथग्जपेत् ।
"ओँम् क्रा क्रों क्रूम् अघोरतर प्रस्फुट २ प्रकट २
कह २ शमय २ जात २ दह २ पातय २
ओँम् क्रों क्रै क्रौ क्रूम् अघोराय फट्" इममघोरमन्त्रन्तु
"ओँम् कामराजशक्तिबीजरसाङ्कुशायै आज्ञैया
विद्या रसाङ्कुशाम्"
अनया पूजयेद्देवीं शक्तिमङ्कुशविद्यया ॥ ३८ ॥

तत्र होमविधि ।—

दशांशं जुहुयात् कुण्डे त्रिकोणे हस्तमात्रके ।
जातिपुष्पं त्रिमध्वाक्तं पूर्णान्ते कन्यकाऽर्चनम् ॥ ३९ ॥

कृत्वाऽथ प्रविशेच्छालां शुद्धां लिप्तां सवेदिकाम् ।
षट्कोणं मण्डलं तत्र सिन्दूरेण द्विहस्तकम् ॥ ४० ॥

नस्तिता नम्रा जाता । अत्र "नामिता" इति साधीयान । पुष्पवती ऋतुमती । कालिन्या अभावे तदनुकल्पमाह, तदिति ।—कर्षैकैकम् एकैककर्ष गन्धकमेककर्षं घृतञ्चैककर्षमित्यर्थ । दीक्षाप्रकारमाह, एवमिति ।—कलसोदकै रसलिङ्गाग्रे स्थापितस्य हेमरत्नादियुतकलसस्य जलै । अथेति ।—अघोरमन्त्र तथा रसाङ्कुशाविद्या प्रत्येक लक्षजप कुर्य्यात । अघोरमन्त्रमाह,—ओँम् क्रामित्यादि । रसाङ्कुशमन्त्रमाह,—ओँम् कामेत्यादि । पूजान्ते होमविधिमाह, दशांशमिति ।—दशांशमिति जपसङ्ख्यापेक्षया दशभागैकभागं त्रिमध्वाक्तं मध्वाज्यशर्करासयुक्तं जातिपुष्प जुहुयात । त्रिमधुलक्षण यथा राजनिघण्टौ—"सितामाक्षिकसर्पींषि मिलितानि यदा तदा । मधुरत्रयमाख्यातं त्रिमधु स्यात् मधुत्रयम् ॥" इति ।

अथ रससाधनोपयोगिगृहनिर्माणप्रकारनिर्देशः।—

तत्समीपे समे दीप्ते कर्त्तव्यं रसमण्डपम्।
अतिगुप्तं सुविस्तीर्णं कपाटार्गलशोभितम्॥ १४॥
ध्वजच्छत्रवितानाढ्यं पुष्पमालाविलम्बितम्।
भेरि-काहल-घण्टादि-शृङ्गिनादविनादितम्॥ १५॥
भूः समा तत्र कर्त्तव्या सुदृढा दर्पणोपमा।
तन्मध्ये वेदिका रम्या कर्त्तव्या लक्षणान्विता॥ १६॥

अथ रसलिङ्गप्रस्तुतप्रकारनिर्देशः।—

निष्कत्रयं हेमपत्रं रसेन्द्रं नवनिष्ककम्।
अम्लेन मर्दयेद्यामं तेन लिङ्गन्तु कारयेत्॥ १७॥
दोलायन्त्रे सारनाले जम्बीरस्थं दिनं पचेत्।
तल्लिङ्गं पूजयेत्तत्र सुशुभैरुपचारकैः॥ १८॥

अथ रसलिङ्गार्चनादौ फलनिर्देशः।—

लिङ्गकोटिसहस्रस्य यत् फलं सम्यगर्चनात्।
तत् फलं कोटिगुणितं रसलिङ्गार्चनाद्भवेत्॥ १९॥

रससाधनोपयोगिदेशं तथा सामान्यतो गृहप्रकारञ्चाह, आतङ्केति।—अत्यन्तोपवने उपवनबहुले, उपवनप्रान्ते वा। तत्र पूर्वोक्तप्रकारदेशे॥ ११—१३॥

तत्र केवलरससाधनार्थमेव विशेषगृहनिर्माणप्रकारमाह, तदिति।—तत्समीपे पूर्वोक्तदिशा निर्मितगृहसन्निकृष्टस्थाने। दीप्ते सुस्पष्टे सूर्य्यकिरणोद्भासिते इत्यर्थः, भूमौ इति शेषः। वितानः चन्द्रातपः, ध्वजादिभिः आढ्यं समृद्धम्। काहलः महाढक्का। समा अनुच्चनीचा। दर्पणोपमा मालिन्यविरहिता मसृणा वा इत्यर्थः। लक्षणान्विता वेदिका डमरुकाऽऽकारपिण्डिकावती कृतसंस्कारा परिष्कृता चतुरस्रादिलक्षणसंयुक्ता भूमिः॥ १४—१६॥

रसलिङ्गप्रस्तुतप्रकारमाह, निष्कत्रयमिति।—निष्कत्रयं सार्द्धतोलकम्। दोलायन्त्रे इति।—जम्बीररसमध्ये अहोरात्रस्थितं शिवलिङ्गं दोलायन्त्रे काञ्जिकेन पचेत्, यद्वा—जम्बीरफलमध्यस्थं लिङ्गं दिनं यावत् काञ्जिकेन दोलायन्त्रे पचेत्। तत्र वेदिकायाम्॥ १७।१८॥

ब्रह्महत्यासहस्राणि स्त्री-गोहत्याऽयुतानि च।
तत्क्षणाद्विलयं यान्ति रसलिङ्गस्य दर्शनात्॥
स्पर्शनात् प्राप्यते मुक्तिरिति सत्यं शिवोदितम्॥ २० ॥

अथ पूजाविधिनिर्देशः।—

आग्नेय्यां श्रीमघोरेण मन्त्रराजेन चार्चयेत्॥ २१ ॥

अथ ध्यानम्।—

अष्टादशभुजं शुभ्रं पञ्चवक्त्रं त्रिलोचनम्।
प्रेतारूढं नीलकण्ठं रसलिङ्गे विचिन्तयेत्॥ २२ ॥
तस्योत्सङ्गे महादेवीमेकवक्त्रां चतुर्भुजाम्।
अक्षमालाऽङ्कुशं दक्षे वामे पाशाभयं शुभम्॥
दधतीं तप्तहेमाभां पीतवस्त्रां विभावयेत्॥ २३ ॥

अथ देवीपूजायां मन्त्रम्।—

"वाङ्मायाश्रीः कामराजशक्तिबीजं रसाङ्कुशा—।
यै नमो" द्वादशार्णैषा ज्ञेया विद्या रसाङ्कुशा॥ २४ ॥

अथ पूजने प्रकारनिर्देशः।—

अनया पूजयेद्देवीं गन्धपुष्पाक्षतादिभिः।
नन्दी-भृङ्गी-महाकाल-कुलीरान् पूर्वदिक्क्रमात्॥ २५ ॥
पूजयेन्नाममन्त्रैश्च प्रणवादि-नमोऽन्तकैः।
एवं नित्यार्चनं तत्र कर्त्तव्यं रससिद्धये॥ २६ ॥

रसलिङ्गार्चनादिफलमाह, लिङ्गकोटिसहस्रस्येति।—सुगमम्॥ १९।२० ॥

रसलिङ्गस्य पूजाविधिमाह, आग्नेय्यामिति।—आग्नेय्याम् अग्निकोणे, वेदिकाया स्थापितमिति शेषः। श्रीमघोरेण मन्त्रराजेन वक्ष्यमाण "श्रीँम् ऋाम्" इत्यादिरूपेण अघोरमन्त्रेण॥ २१ ॥

ध्यानमाह, अष्टादशभुजमिति।—दक्षे दक्षिणहस्ते॥ २२।२३ ॥

देवीपूजने मन्त्रमाह, वाङ्मायेति।—द्वादशार्णा द्वादशाक्षरा॥ २४ ॥

पूजनप्रकारमाह, अनयेति।—अनया रसाङ्कुशाविद्यया। पूर्वदिक्क्रमात् पूर्वस्या

वेदिकायां लिखेत् सम्यक् तद्बहिश्चाष्टपत्रकम् ।
कमलं चतुरस्रञ्च चतुर्द्वारैः सुशोभितम् ॥ ४१ ॥
कर्णिकायां न्यसेत् खल्वं लौहजं स्वर्णलेखितम् ।
तन्मध्ये रसराजन्तु पलानां शतमात्रकम् ॥
पञ्चाशत् पञ्चविंशद्वा पूजयेद्रसलिङ्गवत् ॥ ४२ ॥

तत्र रसशक्तयः ।—

वज्रवैक्रान्तवज्राभ्र-कान्तपाषाणटङ्कणम् ।
भूनागः शक्तयश्चैताः षट्कोणे पूजयेत् क्रमात् ॥४३॥

तत्र उपरसाः ।—

गन्धतालककासीस-शिलाकङ्कुष्ठभूषणम् ।
राजावर्त्तो गैरिकञ्च ख्याता उपरसा अमी ॥
पूज्या अष्टदलेष्वेते पूर्वादीशानगं क्रमात् ॥४४॥

तत्र महारसाः ।—

रसकं विमलं ताप्यं चपलं तुत्थमञ्जनम् ।
हिङ्गुलं सस्यकञ्चैव ख्याता एते महारसाः ॥
पूर्वादीशानपर्य्यन्तं पत्राग्रेषु प्रपूजयेत् ॥४५॥

पूर्णान्ते पूर्णाहुतिशेषे। कन्यकाऽर्चनं कुमारीपूजनम् । द्विहस्तकं हस्तद्वयपरिमितपरिधि-विशिष्टं मण्डलमित्यनेनान्वयः । कर्णिकायामित्यादि ।—कर्णिकायां लिखितपद्म-बीजकोषोपरि लौहखल्वं संस्थाप्य तन्मध्ये सुवर्णेन रेखामङ्कयित्वा तदुपरि शतपलं पञ्चाशत्पलं पञ्चविंशतिपलं वा पारदं न्यस्य रसलिङ्गपूजनक्रमेण पूजयेत् । रसशक्तीराह, वज्रेत्यादि ।—संयोगेन रसशक्तिवर्द्धकत्वात् वज्रादिभूनागान्ताः षट् शक्तय उक्ताः, ताश्च अङ्कितमण्डलस्य षट्सु कोणेषु स्थापयित्वा पूजयितव्याः । दीक्षाविधौ उपरसानां नामान्याह, गन्धेति ।—भूषणं सौराष्ट्रमृत्तिका । राजा-वर्त्तस्य उपरत्नत्वेऽपि यदत्र उपरसमध्ये गणनं, तत् रससाधनकर्मण्येव बोध्यम्, तेन रसवादे अस्य उपरसत्वं धातुवादे च उपरत्नत्वम् इति । दीक्षाविधौ महारसानां नामान्याह, रसकमिति ।—तुत्थं खर्परीतुत्थकम् । सस्यकं मयूरकण्ठाभं तुत्थकम् । पूर्ववदत्रापि अञ्जनहिङ्गुलयोरुपरससाधारणरसमध्ये प्राक् पठितयोः यत् महारसेषु

तत्र अष्टलोहपूजाक्रमः ।—

पूर्वद्वारे स्वर्णरूप्ये दक्षिणे ताम्रसीसके ।
पश्चिमे वङ्गकान्तौ च उत्तरे मुण्डतीक्ष्णके ॥
सर्वमेतदघोरेण पूजयेदङ्कुशान्वितम् ॥ ४६ ॥

तत्र उपकरणानां पूजाविधिः ।—

विडं काञ्जिकयन्त्राणि क्षारमृल्लवणानि च ।
कोष्ठी मूषा वङ्कनालतुषाङ्गारवनोपलाः ॥ ४७ ॥

भस्त्रिका दण्डिकाऽनेका शिला खल्लान्युलूखलम् ।
स्वर्णकारोपकरणं समस्ततुलनानि च ॥ ४८ ॥

मृत्काष्ठताम्रलोहोत्थ-पात्राणि विविधानि च ।
दिव्यौषधीनां वर्गाश्च रञ्जकस्नेहनानि च ॥
एतानि द्वारवाह्ये तु मूलमन्त्रेण पूजयेत् ॥ ४९ ॥

वाङ्मायाः क्लीं ततः चेच्च क्षश्च पञ्चाक्षरो मनुः ।
अनेन मूलमन्त्रेण भैरवं तत्र पूजयेत् ॥
सर्वेषां रससिद्धानां नाम सङ्कीर्त्तयेत्तदा ॥ ५० ॥

गणनं तत्र रसवादे बोध्यम्, अन्यत्र तु साधारणरसोपरसत्वमेव। लोहाष्टकस्य पूजाक्रममाह, पूर्वद्वारे इति।—अङ्कुशान्वितं रसाङ्कुशमन्त्रेणाभिमन्त्रितम्। साधनानां नामानि पूजाविधिश्चाह, विडमिति।—विडं रसजारणार्थक्षारबहुल-द्रव्यविशेषः। यदुक्तं रसेन्द्रचिन्तामणौ—"टङ्कणं शतधा भाव्यं द्रावे पालाशवृक्षजे। विडो वह्निमुखो नाम द्वितीयः सत्त्वजारणे॥" इति। अस्य च बहवः प्रकाराः सन्ति विस्तरभयात्ते नात्रोदाहृताः, ग्रन्थान्तरे द्रष्टव्याः। यन्त्राणि ऊर्द्ध्वपातनादीनि। क्षारः "स्वर्जिका टङ्कणञ्चैव यवक्षार उदाहृतः" इत्युक्तलक्षणक्षारवर्गः। मृत् "वल्मीकमृत्तिका धूमं गैरिकञ्चेष्टका पटुः। इत्येताः मृत्तिकाः पञ्च' इत्युक्तपञ्च-मृत्तिकाः। कोष्ठीमूषादयोऽग्रे वक्ष्यमाणाः। दण्डिका मर्दनार्थं स्वल्पदण्डविशेषः। "दण्डिका" इत्यत्र "दंशिका" इति पाठे—सन्दंशयन्त्रमित्यर्थो बोध्यः। दिव्यौषधीनां वर्गाः जीवकर्षभकादयः। रञ्जकस्नेहनानि "मञ्जिष्ठा किंशुकञ्चैव खदिरं रक्तचन्दनम्।

तत्र रससिद्धानां नामानि।—

व्यालाचार्य्यश्चन्द्रसेनः सुबुद्धिर्नरवाहनः।
नागार्जुनो रत्नघोषः सुरानन्दो यशोधनः॥५१॥

इन्द्रधूमश्च माण्डव्यश्चर्पटिः शूरसेनकः।
आगमो नागबुद्धिश्च खण्ड कापालिको मतः॥ ५२॥

कामारिस्तान्त्रिकः शम्भुर्लङ्कालम्पटशारदौ।
बाणासुरो मुनिश्रेष्ठो गोविन्दः कपिलो बलिः॥ ५३॥

एते सर्वे तु सूतेन्द्राः रससिद्धा महाबलाः।
चरन्ति सर्वलोकेषु नित्या भोगपरायणाः॥५४॥

सप्तविंशतिसङ्ख्याका रससिद्धिप्रदायकाः।
वैद्याः पूज्या प्रयत्नेन ततः कुर्य्याद्रसार्चनम्॥५५॥

हर्षयन् द्विजदेवानां तर्पयेदिष्टदेवताः।
कुमारी-योगिनी-योगीश्वरान्मेलकसाधकान्॥
तर्पयेत् पूजयेद्भक्त्या यथाशक्त्यनुसारतः॥५६॥
इत्येव सर्वसम्भार-युक्तं कुर्य्याद्रसोत्सवम्।
सर्वविघ्नप्रशान्त्यर्थं सर्वेप्सितफलप्रदम्॥ ५७॥

करवीर देवदारु सरल रजनीद्वयम्॥ अन्यानि रक्तपुष्पाणि पिष्ट्वा लाक्षारसेन तु। तैलं विपाचयेत्तेन कुर्य्याद्बीजादिरञ्जनम्॥" इति रसेन्द्रचिन्तामण्युक्तपारद-रञ्जकतैलादीनि। सर्वाण्येतानि रसकल्पाहीणि रसकर्माणि विघ्नविनाशाय पूज्यानि इति बोध्यम्। मनु मन्त्र। रससिद्धानां नामानि पूज्यत्वस्याह, व्यालाचार्य्य इति।—सूतेन्द्राः सूतसाधने इन्द्रतुल्याः, सूतसाधकश्रेष्ठा इत्यर्थः। "सूतेन्द्रा" इत्यत्र "राजेन्द्रा" इति पाठे—राजेन्द्रतुल्या इत्यर्थः। रससिद्धाः रसे रसशास्त्रे सिद्धाः प्राप्तसाफल्याः, आयत्तीकृतरसशास्त्रा इत्यर्थः। नित्याः अविनाशिनः॥ २७—५७॥

अदीक्षितस्य रसविद्यासाधनवैफल्यनिर्देशः ।—

अन्यथा यो विमूढात्मा मन्त्रदीक्षाक्रमाद्विना ।
कर्त्तुमिच्छति सूतस्य साधनं गुरुवर्जितः ॥ ५८ ॥
नासौ सिद्धिमवाप्नोति यत्नकोटिशतैरपि ।
तस्मात् सर्वप्रयत्नेन शास्त्रोक्तां कारयेत् क्रियाम् ॥ ५९ ॥

अथ रससाधने सिद्धिलाभहेतुनिर्देशः ।—

सम्यक्साधनसोद्यमा गुरुयुता राजाऽऽज्ञयाऽलङ्कृता
नानाकर्मपराङ्मुखा रसपराश्चाऽऽढ्या जनैश्चार्थिताः ।
मात्रा-यन्त्र-सुपाककर्मकुशलाः सर्वौषधे कोविदा-
स्तेषां सिध्यति नान्यथा विधिबलाच्छ्रीपारदः पारदः ॥६०॥

गुरुसन्निधाने अदीक्षितस्य रससाधनैषिणो नैष्फल्यमाह, अन्यथेति ।— सुगमम् ॥ ५८।५९ ॥

रसकर्मणि साफल्यहेतुमाह सम्यगिति ।—सम्यक् यथाशास्त्रं साधनानि विडाद्युपाया येषां ते, तथा सह उद्यमेन वर्त्तमानाः सोद्यमाः सम्यक् साधनाश्च ते सोद्यमाश्च सम्यक् साधनसोद्यमाः विडादिसाधनवन्त उद्यमशीलाश्च। राजाज्ञया राजाज्ञां प्राप्य अलङ्कृता भूषिताः राजाज्ञाप्राप्त्या सर्वजनपूज्याः । गुरुयुता इत्यादिविशेषणद्वयेन एतस्य विश्वस्तत्वं ज्ञत्वञ्च प्रतिपादितम् । नानाकर्मपराङ्मुखाः रसपराश्च सर्वकर्माणि परित्यज्य केवलं रसकर्मनिष्ठाः , एताभ्यामस्य कार्य्यसाफल्यम् अवश्यम्भावि इति दर्शितम् । आढ्या धनवन्तः , एतेनास्य सर्वोपकरणसमन्वितत्वं तेन च अवश्यमेव कार्य्यसाधकत्वम् उक्तम्। जनैः अर्थिताः पारदसाधनं कुरु इत्येवरूपेण प्रार्थिताः , अनेनास्य परोपकारशीलत्वं ज्ञापितम् । मात्रेति ।—मात्रा शोधनार्थग्राह्यरसादीनां परिमाणं यन्त्रम् ऊर्द्धपातनादिरूपं सुपाककर्म सुष्ठुरूपेण औषधपाकक्रिया तेषु कुशलाः निपुणाः, इयन्मानं रसादिकं शोध्यम्, एवंविधं यन्त्रं करणीयम्, एतादृशः पाकः कर्त्तव्यः इत्यादिषु अभिज्ञाः । सर्वौषधे कोविदाः सर्वविधौषधपरिचये प्रयोगे च अभिज्ञाः , एताभ्यामस्य दृष्टकर्मत्वेन अवश्यमेव पाकादिसिद्धिः इति बोधितम्। ये एवंविधाः तेषां विधिबलात् विधानवशात् यथाशास्त्रक्रियाकरणात् इत्यर्थः, पारदः पारं जरामरणादिभयार्त्तानाम् आश्रयमित्यर्थः, ददाति इति तथोक्तः, यदुक्तं रसेश्वरदर्शने—"विविधव्याधि-

अथ कस्मै किमर्थं रसविद्या दातव्या तन्निर्देशः ।—

रसशास्त्रं प्रदातव्यं विप्राणां धर्महेतवे ।
राज्ञे वैश्याय वृद्ध्यर्थं दास्यार्थमितरस्य च ॥ ६१ ॥

अथ गुरुसन्तोषस्य सर्वसिद्धिहेतुत्वनिर्देशः ।—

गुरौ तुष्टे शिवस्तुष्येच्छिवे तुष्टे रसस्तथा ।
रसे तुष्टे क्रियाः सर्वाः सिध्यन्त्येव न संशयः ॥ ६२ ॥

अथ रसविद्याया अवश्यगोप्यत्वनिर्देशः ।—

रसविद्या दृढं गोप्या मातुर्गुह्यमिव ध्रुवम् ।
भवेद्वीर्य्यवती गुप्ता निर्वीर्य्या च प्रकाशनात् ॥ ६३ ॥
न रोगिविदितं कार्य्यं बहुभिर्विदितं तथा ।
रोगिणा बहुभिर्ज्ञातं भवेन्निर्वीर्य्यमौषधम् ॥ ६४ ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये शिष्योपनयनं नाम षष्ठोऽध्यायः ॥ ६ ॥

भयोदयमरणजरासङ्कटेऽपि मर्त्यानाम्। पारं ददाति यस्मात्तस्मात् अयमेव पारदः कथितः ॥" इति। श्रीपारदः पारदाख्यधातुः सिध्यति, अन्यथा एतद्विपर्य्ययेण, सिध्यतीति शेषः ॥ ६० ॥

कस्मै किमर्थं रसविद्या दातव्या तदाह, रसशास्त्रमिति।—दास्यार्थं विप्रादिवर्णत्रयाणां रससाधनकर्मणि साहाय्यकरणार्थम् इत्यर्थः। इतरस्य शूद्रस्य सम्बन्धे ॥ ६१ ॥

रसकर्मसिद्धौ गुरुतुष्टेः मुख्यहेतुत्वमाह, गुराविति।—सुगमम् ॥ ६२ ॥

रसविद्याया अवश्यगोप्यत्वं तथा प्रकाशे च वीर्य्यहीनत्वमाह रसविद्येति।—सुगमम् ॥ ६३।६४ ॥

इति रसरत्नसमुच्चयबोधिन्यां षष्ठोऽध्यायः ॥ ६ ॥

अथ सप्तमोऽध्यायः ।

अथ रसशाला ।—

अथ रसशालानिर्माणस्य स्थाननिर्देशः ।—

रसशालां प्रकुर्वीत सर्वबाधाविवर्जिते ।
सर्वौषधिमये देशे रम्ये कूपसमन्विते ॥ १ ॥
यक्ष-त्र्यक्ष-सहस्राक्षदिग्विभागे सुशोभने ।
नानोपकरणोपेतां प्राकारेण सुशोभिताम् ॥ २ ॥

अथ रसशालायां कुत्र किं कर्म कर्त्तव्यं तन्निर्देशः ।—

शालायाः पूर्वदिग्भागे स्थापयेद्रसभैरवम् ।
वह्निकर्माणि चाऽऽग्नेये याम्ये पाषाणकर्म च ॥ ३ ॥
नैर्ऋत्ये शस्त्रकर्माणि वारुणे क्षालनादिकम् ।
शोषणं वायुकोणे च वेधकर्मोत्तरे तथा ॥
स्थापनं सिद्धवस्तूनां प्रकुर्य्यादीशकोणके ॥ ४ ॥

पूर्वाध्याये शिष्योपनयनप्रसङ्गेन रसकर्मसम्पादनार्हगृहादीनां सङ्क्षिप्तविधानमुक्त्वा इदानीं सर्वोपकरणानामाश्रयत्वेन गृहस्य प्राधान्यात् रसशालायां स्थापनीयद्रव्यवर्णनात् प्राक् पुनश्च तत्स्थापनयोग्यं भूविभागं निरूपयति, रसशालामिति ।—रसशाला रससाधनोपयोगि गृहम् । यक्षेति ।—यक्षः कुबेरः उदीच्याधिपतिः, त्र्यक्षः ईशानः ईशानकोणपतिः, सहस्राक्षः इन्द्रः प्राच्यधिपतिः, तेषां दिग्विभागे उत्तरस्यामैशान्यां पूर्वस्यां वा दिशि, पूर्वोत्तरस्यां दिशि वा ॥ १।२ ॥

एवं-निर्मितगृहस्य कुत्र किं प्रयोजनं सम्पादनीयं तदाह, शालाया इति ।—रसभैरवं प्रागुक्तरसनिर्मितलिङ्गम् । वह्निकर्माणि ध्मापनपुटनादिक्रिया । पाषाणकर्म शिलायां मर्दनादिक्रिया । शस्त्रकर्माणि धातूनां परीक्षार्थं यन्त्रादिकरणार्थञ्च छेदनादिक्रिया । वारुणे वरुणसम्बन्धिनि, पश्चिमस्यामित्यर्थः । क्षालनादिकं काञ्जिकादिना धावनादिकर्म । शोषणम् आर्द्रद्रव्याणामातपे शुष्कीकरणम् । वेधकर्म स्पर्शमात्रेण रसेन्द्रस्य सर्वद्रव्याणां सुवर्णत्वादिप्रापणरूपशक्त्याधानकर्म । सिद्धवस्तूनां यथाविधि

अथ रसशालायां सङ्ग्राह्याणि उपकरणानि ।—

पदार्थसङ्ग्रहः कार्य्यो रससाधनहेतुकः ।
सत्त्वपातनकोष्ठीञ्च क्षरत्कोष्ठीं सुशोभनाम् ॥ ५ ॥
भूमिकोष्ठीं चलत्कोष्ठीं जलद्रोण्योऽप्यनेकशः ।
भस्त्रिकायुगलं तद्वन्नलिके वंशलोहयोः ॥ ६ ॥
स्वर्णायो-घोष-शुल्वाश्म-कुण्ड्यश्चर्मकृता तथा ।
करणानि विचित्राणि द्रव्याण्यपि समाहरेत् ॥ ७ ॥
कण्डनी पेषणी खल्वा द्रोणीरूपाश्च वर्त्तुलाः ।
आयसास्तप्तखल्लाश्च मर्दकाश्च तथाविधाः ॥ ८ ॥

मारणादिसिद्धरसादीनाम् । अत्र पूर्वदिग्भागे रसलिङ्गस्थापनं पूर्वाभिमुखीभूत्वा पूजाकार्य्यस्य प्राशस्त्यात् तत्सम्पादनार्थम् । अग्निकोणस्य अग्निदेवताकत्वात् अग्निसाध्यकर्मणां तत्रैव करणप्राशस्त्यात आग्नेय्यां कृतिनिर्देशः । दक्षिणस्य दण्डधराधिपतिकत्वात दण्डपाषाणसाध्यमर्दनादिकर्मणां तत्रैव विधानं कृतम् । नैर्ऋतस्य राक्षसाधिपतिकत्वात् शस्त्रकर्मणश्च आसुरकत्वात् तन्निष्पाद्यानां तत्रैव विधानं सङ्गतम् । पश्चिमस्य वरुणदैवतत्वात् वरुणस्य च जलाधिपत्वात् क्षालनादिकर्मणः तत्राभिधानम् । वायुकोणस्य मरुद्देवताकत्वात् मरुतश्च शोषकत्वात् शोषणादिकर्मणां तत्र सम्पादनं कर्त्तव्यम् । उत्तरस्य कुबेराधिदेवताकत्वात् कुबेरस्य च धनाधिपत्वात् सुवर्णाद्युत्पादकवेधकर्मणः उत्तरस्यां निर्देशः । ईशानस्य ईशानापरनामक-शिवदैवतत्वात् शिवस्य च शिवकरत्वात् शिवकराणां मारणादिसिद्धरसादीनां तत्र स्थापनविधानम्, यद्वा—"आरोग्यं भास्करादिच्छेत्" इत्युक्त्या ईशानस्य सूर्य्यमूर्त्तिधर ईशानाधिपतिकत्वात् सूर्य्यस्य च आरोग्यप्रदत्वात् आरोग्यजनकसिद्धवस्तूनाम् ऐशान्यां स्थापनं बोध्यमिति ॥ ३।४ ॥

तत्र रससाधनार्थं यानि यानि द्रव्याणि स्थाप्यानि तेषां नामान्याह, पदार्थसङ्ग्रह इति ।—सत्त्वपातनकोष्ठ्यादिलक्षणमग्रे वक्ष्यति । जलद्रोण्यः काष्ठादिनिर्मितजलाधाराः । भस्त्रिका चर्मप्रसेविका, कर्मकाराणां चर्मनिर्मितयन्त्रविशेषः "हापर" इति भाषा । नलिके इति ।—वंशनिर्मितं लौहनिर्मितञ्च नलिकाद्वयम् । स्वर्णेति ।—स्वर्णादिनिर्मिताः कुण्ड्यः स्वल्पाः स्थाल्यः । तथा चर्मकृता चर्मकाराणां करणानि साधनानि उपकरणभूतानीत्यर्थः, विचित्राणि विविधानि द्रव्याणि । कण्डनी पेषणी

सूक्ष्मच्छिद्रसहस्राऽऽढ्या द्रव्यगालनहेतवे ।
चालनी च कटत्राणि शलाका हि च कुण्डली ॥ ९ ॥

तत्र त्रिविधचालनीनां स्थूलद्रव्यचालनार्थं चालनीस्वरूपम् ।—

चालनी त्रिविधा प्रोक्ता तत्स्वरूपञ्च कथ्यते ।
वैणवीभिः शलाकाभिर्निर्मिता ग्रथिता गुणैः ॥
कीर्त्तिता सा सदा स्थूल-द्रव्याणां गालने हिता ॥ १० ॥

तत्र चूर्णचालनार्थचालनीस्वरूपम् ।—

चूर्णचालनहेतोश्च चालन्यन्याऽपि वंशजा ॥ ११ ॥

तत्र सूक्ष्मतरचूर्णचालनार्थं चालनीस्वरूपम् ।—

कर्णिकारस्य शाल्मल्या हरिजातस्य कम्बया ।
चतुरङ्गुलविस्तार-युक्तया निर्मिता शुभा ॥ १२ ॥

कुण्डल्यरत्निविस्तारा छागचर्माभिवेष्टिता ।
वाजि-वालाम्बरानद्ध-तला चालनिकाऽपरा ॥
तया प्रचालनं कुर्य्याद्वर्त्तुं सूक्ष्मतरं रजः ॥ १३ ॥

खल्या इत्यत्र खल्या इत्यस्य कण्डनीपेषणीभ्यामुभाभ्यामेव सम्बन्ध, तेन खल्या कण्डनी चन्द्राकारोदूखलमूषल तथा खल्या पेषणी चुद्राकृतिपेषणशिला च। द्रोणीति। —वर्त्तुलाकारद्रोणीसदृशपात्रविशेषा। आयसा इति।—तप्तखल्लार्थं लौहखल्ला लौहनिर्मितखल्लदण्डाश्च। कटत्राणि कटतीति कट वर्षण तस्मात त्रायते इति तानि प्रश्यादिनिवारणार्थमाच्छादनविशेषा, यद्वा—कटम् औषध त्रायते इति तानि औषधाच्छादनार्थं द्रव्यविशेषा, यद्वा—कटत्राणि कषायितचर्मखण्डानि इत्यर्थ। शलाका रससिन्दूरादिपाकार्थं लौहनिर्मितालोडनीविशेष। कुण्डली स्थाली-कटाहादिसंस्थापनार्थं तृणादिकृतवेष्टनीविशेष। चालन्यास्त्रैविध्यमाह,—चालनी त्रिविधेति। तासु स्थूलद्रव्यचालनार्थं चालन्या स्वरूपमाह, वैणवीभिरिति।—वैणवीभि वंशनिर्मिताभि'। गुणै रज्जुभि। तासु चूर्णचालनार्थं चालन्या स्वरूप-माह,—चूर्णेति। तासु अतिसूक्ष्मचूर्णचालनार्थं चालन्या स्वरूपमाह, कर्णिकार-स्येति।—कर्णिकारस्य चुद्रारग्वधस्य। हरिजातस्य हरि वंश जात यस्मात्तस्य वंशाङ्कुरस्य कम्बया वल्कलेन, चतुरङ्गुलविस्तारयुक्तया इत्यस्य कम्बयेत्यनेनान्वय।

मूषा-स्तुष-कार्पास-वनोपलक-पिष्टकम्।
त्रिविध भेषजं धातु-जीव-मूलमय तथा॥
शिखित्रा गोवरश्चैव शर्करा च सितोपला॥ १४॥

तत्र शिखित्रस्वरूपम्।—

{शिखित्राः पावकोच्छिष्टा अङ्गाराः कोकिला मताः॥१५॥}

तत्र कोकिलास्वरूपम्।—

{कोकिलाश्चेतिताङ्गारा निर्वाणाः पयसा विना॥१६॥}

तत्र उपलस्य पर्य्यायाः।—

{पिष्टकं छगणं छाणमुपलञ्चोत्पलं तथा।
गिरिखण्डोपलसाठो च संशुष्कच्छगणाभिधाः॥१७॥}

काचायोमृद्वराटाना कूपिका चषकाणि च॥ १८॥

तत्र कूपिकायाः पर्य्यायाः।—

{कूपिका कुपिका सिद्धा गोला चैव गिरिखण्डिका॥१९॥}

कुण्डली चालन्या वेष्टनी। अरत्निविस्तारा प्रसारितकनिष्ठाङ्गुलिबद्धमुष्टिहस्त-प्रमाणायता, चतुरङ्गुलविस्तृतकर्णिकारादिवल्कलनिर्मिता अरत्निविस्तारवेष्टनीयुक्ता छागचर्ममण्डिता अश्वपुच्छकेश सूक्ष्मवस्त्ररचिततलदेशा सूक्ष्मतरद्रव्यचालनार्थमपरविध। चालनीत्यर्थ। पिष्टक तण्डुलपिष्ट "पिटुलो" इति भाषा। त्रिविध भेषजमिति।—धातुमय स्वर्णादिरूप स्थावर, जीवमय चीरमूत्रपुरीषादिक जङ्गम, मूलमय वनौषधा-दिकम् औद्भिदम्। शर्करा बालुका। सितोपला कठिनी "फुलखडी" इति भाषा। शिखित्रा शब्दस्यार्थमाह, शिखित्रा इति।—पावकोच्छिष्टा अग्निना भुक्तावशिष्टा, अप्रज्वलिता किन्तु अग्निसस्पृष्टा इत्यर्थ, अङ्गारा अङ्गारस्वरूपा कोकिला, शिखित्रा शिखिनम् अनल त्रायन्ते पालयन्ति प्रदीपनेन रचन्ति इति तादृशा ज्वलदङ्गारा इत्यर्थ, मता। शिखित्रलक्षणं कोकिला उक्ता, अत कोकिला-शब्दस्यार्थमाह, कोकिला इति।—चेतिताङ्गारा तप्ताङ्गारा, पयसा विना स्वय निर्वाणा शान्ता चेत् ते अङ्गारा कोकिला मता, कोकिला "कयला" इति भाषा। शुष्कगोवरस्य पर्य्यायमाह, पिष्टकमिति। —पिष्टकाद्युपलसाठ्यन्ता सप्त शब्दा सशुष्कच्छगणाभिधा शुष्कगोमयस्य पर्य्याया इत्यर्थ.। कूपिकाचषकयो स्वरूपमाह, काचेति।—कूपिका "शिशि" "बोतल"

तत्र चषकस्य पर्य्यायाः ।—

{ चषकश्च कटोरी च वाटिका खारिका तथा ।
कञ्चोली ग्राहिका चेति नामान्येकार्थकानि हि ॥२०॥ }

शूर्पादिवेणुपात्राणि क्षुद्रश्मिप्राश्च शङ्किकाः ।
क्षुरप्राश्च तथा पाक्यं यच्चान्यत्तत्र युज्यते ॥
पालिका कर्णिका चैव शाककच्छेदनशस्त्रकाः ॥२१॥

अथ रससाधनाङ्गानामर्चनायाः कर्त्तव्यतानिर्देशः ।—

शालासम्मार्जनाद्यं हि रसपाकान्तकर्म यत् ।
तत्रोपयोगि यच्चान्यत्तत् सर्वं परविद्यया ॥ २२ ॥
श्रीरसाङ्कुशया सर्वं मन्त्रयित्वा समर्चयेत् ।
अन्यथा तद्गतं तेजः परिगृह्णन्ति भैरवाः ॥ २३ ॥

अथ रसकर्मणि यादृशा वैद्या नियोज्याः तत्कथनम् ।—

रससर्वित्तरा वैद्या निघण्टुज्ञाश्च वार्त्तिकाः ।
सर्वदेशजभाषाज्ञाः सङ्ग्राह्यास्तेऽपि साधकैः ॥ २४ ॥

इति भाषा । चषकः पानपात्रं, "वाटी" "ग्लास" इति प्रसिद्धम । कूपिकायाः पर्य्यायमाह,—कूपिकेति । चषकस्य पर्य्यायमाह,—चषकमिति । शूर्पं शस्यगतधूल्याद्यपनयनार्थं वंशशलाकादिनिर्मितं कणिकाकारपात्रविशेषः । क्षुद्रश्मिपा क्षुद्राकारा शुक्तयः । शङ्किका क्षुद्रशङ्खा । "क्षुद्रश्मिप्राश्च शङ्किका" इत्यत्र "नद्राच्चिप्राश्च शङ्किका" इति पाठे—क्षुद्राकारा मन्दगामिन्यश्च शङ्किका शम्बूका इत्यर्थः । पाक्यम् औषधपाकसम्पादनार्थं पात्रविशेषः पाशुलवणं वा । पालिका पाकपात्रविशेषः । कर्णिका अस्त्रविशेषः । शाकच्छेदनशस्त्रका शाकानां पत्रपुष्पफलादीनां छेदनार्थं शस्त्रविशेषाः ॥ १—२१ ॥

रससाधनोपयोगिद्रव्याणामभिमन्त्रणस्य कर्त्तव्यतामाह, शालेति ।—गृहमार्जनमारभ्य रसपाकान्तं यत् कर्म, द्रव्याणि च यानि तत्र उपयोगीनि तानि सर्वाणि परमगुह्यश्रीरसाङ्कुशामन्त्रेण अभिमन्त्र्य पूजयेत् तेन च रसकर्म निर्विघ्नं सिध्यति । अन्यथा अपूजने । तद्गतं द्रव्यनिष्ठम् । भैरवाः शिवानुचरभेदाः ॥ २२।२३ ॥

रससाधकेन तत्कर्मसाधनार्थं यादृशा वैद्याः सहायत्वेन ग्राह्याः, तदाह, रस-

अथ रसपाककाले मन्त्रजपस्य कर्त्तव्यतानिर्देशः।—

रसपाकावसानं हि सदाऽघोरञ्च जापयेत्॥ २५॥

अथ परिचारकलक्षणम्।—

सोद्यमाः शुचयः शूरा बलिष्ठाः परिचारकाः॥ २६॥

अथ रसकर्मयोग्यस्य वैद्यस्य लक्षणम्।—

धर्मिष्ठः सत्यवान् विद्वान् शिवकेशवपूजकः।

सदयः पद्महस्तश्च स योज्यो रसवैद्यके॥ २७॥

अथ पद्महस्तवैद्यलक्षणम्।—

पताका-कुम्भ-पाथोज-मत्स्य-चापाङ्कपाणिकः।

अनामाधःस्थ-रेखाङ्कः स स्यादमृतहस्तवान्॥ २८॥

अथ वर्जनीयवैद्यलक्षणम्।—

अदेशिकः कृपामुक्तो लुब्धो गुरुविवर्जितः।

कृष्णरेखा-करो वैद्यो दग्धहस्तः स उच्यते॥ २९॥

सवित्तरा इति।—रससवित्तरा रसविषये अतीव ज्ञानिनः। "रससवित्तरा वैद्या" इत्यत्र 'रससहितया वैद्या" इति पाठे—रसशास्त्राभिज्ञा इत्यर्थः, "धान्येन धनवान्" इतिवत् तृतीया। वार्त्तिका "उक्तानुक्तदुरुक्तार्थ-व्यक्तकारि तु वार्त्तिकम्" इत्युक्तलक्षणे सूत्रानुक्ताद्यथाविष्कारके शास्त्रविशेषे निपुणाः। एतेन रससवित्तरा इत्यादिविशेषण-चतुष्टयेन सर्वशास्त्रदर्शिनो विपश्चितः वैद्यस्य रससाधने सहायीभवितुमधिकार इति प्रदर्शितम्॥ २४॥

रसस्य पाकशेषपर्य्यन्तं मन्त्रजपस्य कर्त्तव्यतामाह, रसपाकेति।—अघोरम् अघोरमन्त्रम्॥ २५॥

परिचारकलक्षणमाह, सोद्यमा इति।—सुगमम्॥ २६॥

रससाधनयोग्यस्य वैद्यस्य लक्षणं निर्दिशति, धर्मिष्ठ इति।—पद्महस्तः अमृतहस्तः पीयूषपाणिः इत्यर्थः॥ २७॥

पद्महस्तं विवृणोति, पताकेति।—पाथोजं पद्मम्। अनामेति।—अनामिकाया अङ्गुल्या अधोदेशपर्य्यन्तमूर्द्ध्वरेखाचिह्नितकरः इत्यर्थः। अमृतहस्तवान् अमृतहस्त इत्यपरपर्य्यायकः पद्महस्तवान्, पीयूषपाणिरित्यर्थः॥ २८॥

रससाधनाधिकारिपद्महस्तपुरुषनिर्देशप्रसङ्गेन अनधिकारिदग्धहस्तपुरुषलक्षण-

अथ निधिसाधने नियोज्यपुरुषलक्षणम् ।—

भूतनिग्रहमन्त्रज्ञास्ते योज्या निधिसाधने ॥ ३० ॥

अथ बलिसाधने नियोज्यपुरुषलक्षणम् ।—

बलिष्ठाः सत्यवन्तश्च रक्ताक्षाः कृष्णविग्रहाः ।
भूतत्रासनविद्याश्च ते योज्या बलिसाधने ॥ ३१ ॥

अथ रसायने नियोज्यपुरुषलक्षणम् ।—

निर्लोभाः सत्यवक्तारो देवब्राह्मणपूजकाः ।
यमिनः पथ्यभोक्तारो योजनीया रसायने ॥ ३२ ॥

अथ धातुवादे नियोज्यपुरुषलक्षणम् ।—

धनवन्तो वदान्याश्च सर्वोपस्करसंयुताः ।
गुरुवाक्यरता नित्यं धातुवादेषु ते शुभाः ॥ ३३ ॥

माह, अदेशिक इति ।—अदेशस्य निन्दितदेशस्य म्लेच्छादिभूमेरिति यावत्, अयमिति म्लेच्छादिदेशवासीत्यर्थः, कुग्रामीति वा । कृष्णरेखाकरः कृष्णवर्णरेखाङ्कितकरः पुरुषः । एवम्भूतः पुरुषः दम्भदृष्टः अतः वर्जनीय इत्याशयः ॥ २९ ॥

अधिकारिनिर्देशप्रसङ्गेन रससाधनार्थं यादृशि कर्मणि यद्विधानां पुंसामधिकारस्तान् विवरीषन् आदौ निधिसाधनार्हानाह, भूतेति ।—निधीनां पद्मशङ्खादीनां साधने आयत्तीकरणे इत्यर्थः । रसकर्मणो बह्वर्थसाध्यत्वात् तदर्थमङ्गहार्थं निधिसाधनप्रयोजनम्, भूताश्च तत्र विघ्नकरा भवन्ति अतस्तदुत्सादनार्थं भूताभिज्ञानां प्रयोजनम् इति बोध्यम् ॥ ३० ॥

बलिसाधने नियोज्यान् पुरुषानाह, बलिष्ठा इति ।—भूतत्रासनविद्या भूतेभ्यस्त्रासनं भयप्रदर्शनं विद्या येषां ते भूतापसारकाः । बलिसाधने देव्यादिसमीपे उपहारीकृतद्रव्याणां रक्षणायम्, विविधशुभकार्य्येषु भूतानां विघ्नोत्पादकत्वादिति ॥ ३१ ॥

रसायनसाधने नियोज्यानाह निर्लोभा इति ।—यमिनः इन्द्रियनिग्रहशीलाः ॥ ३२ ॥

धातुवादे नियोज्यानाह, धनवन्त इति ।—वदान्याः दानशीलाः । सर्वोपस्करसंयुताः सर्वोपस्करैः समस्तोपकरणैः संयुताः सर्वोपकरणवन्तः । धातुवादेषु स्वर्णरौप्यादिधातुसाधनक्रियासु ॥ ३३ ॥

अथ भेषजाहरणे नियोज्यपुरुषलक्षणम् ।—

तत्तदौषधनामज्ञाः शुचयो वञ्चनोज्झिताः ।
नानाविषयभाषाज्ञास्ते मता भेषजाहृतौ ॥ ३४ ॥

अथ रसविद्यायां लब्धव्यसाफल्यस्य लक्षणम् ।—

शुचीनां सत्यवाक्यानामास्तिकानां मनस्विनाम् ।
सन्देहोज्झितचित्तानां रसः सिध्यति सर्वदा ॥ ३५ ॥

अथ रससिद्धसाधकस्य कर्त्तव्यनिर्देशः ।—

दशाष्टक्रियया सिद्धो रसोऽसौ साधकोत्तमः ।
हा रसो नष्ट इत्युक्त्वा सेवेतान्यत्र तं रसम् ॥ ३६ ॥

अथ रससिद्धेः फलम् ।—

रससिद्धो भवेन्मर्त्त्यो दाता भोक्ता न याचकः ।
जरामुक्तो जगत्पूज्यो दिव्यकान्तिः सदा सुखी ॥ ३७ ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
रसशालाप्रकरणं नाम सप्तमोऽध्यायः ॥ ७ ॥

भेषजाहरणे नियोज्यानाह, तत्तदिति ।—वञ्चनोज्झिताः साध्वाचाराः । नानाविषयभाषाज्ञाः नानादेशीयभाषाभिज्ञाः ॥ ३४ ॥

अवन्ध्यप्रयत्नं रससाधकं निर्दिशति, शुचीनामित्यादि ।—सन्देहोज्झितचित्तानां सिद्धिलाभे निश्चितमनसाम् ॥ ३५ ॥

रससिद्धौ कर्त्तव्यान्तरमाह, दशाष्टक्रिययेति ।—यथायथं स्वेदनाद्यष्टादशविध कर्मणा रसः रसकर्म, सिद्धः सफलः जरामरणादिनिवारकशक्तिसम्पन्न इत्यर्थः, चेत्, तदा असौ साधकोत्तमः हा खेदे, रसः नष्टः मृतः इत्युक्त्वा स्थानान्तरे पुनरपि रसकर्म्म आचरेत । अत्र स्वप्रयत्नसाफल्यजनितहर्षज्ञापकाव्ययप्रयोगस्यौचित्येऽपि यत् "हा" इति विषादार्थकः शब्दः प्रयुक्तः, तत् दैवांशसम्भूतस्य महाप्रभावस्य रसस्य एव स्वेदनादि-कदर्थनाजनितस्वरूपनाशनरूपमरणात् सदयस्य विपश्चितः सहृदयत्वज्ञापनार्थमिति बोध्यं, यथा शत्रु विनाशेऽपि श्रीरामयुधिष्ठिरादीनां विषादः । अथवा हा इति विस्मये । "सिद्धो रसः" इत्यत्र "सिद्धे रसे" इति पाठे—रसे सिद्धे सति ॥ ३६ ॥

रससिद्धस्य गुणवत्तामाह, रससिद्ध इति ।—सुगमम् ॥ ३७ ॥

इति रसरत्नसमुच्चयबोधिन्यां सप्तमोऽध्यायः ॥ ७ ॥

अथाष्टमोऽध्यायः ।

अथ परिभाषा ।—

अथ परिभाषाया प्रयोजनम् ।—

कथ्यते सोमदेवेन मुग्धवैद्यप्रबुद्धये ।
परिभाषा रसेन्द्रस्य शास्त्रे सिद्धैश्च भाषिता ॥ १ ॥

अथ धन्वन्तरिभाग ।—

अर्द्धं सिद्धरसस्य तैलघृतयोर्लौहस्य भागोऽष्टमः
संसिद्धाखिललोहचूर्णवटकादीना तथा सप्तमः ।
यो दीयेत भिषग्वराय गदिभिर्निर्दिश्य धन्वन्तरिं
सर्वारोग्यसुखाप्तये निगदितो भागः स धन्वन्तरेः ॥ २ ॥

शास्त्रकृतामिय शैली यत ते सुखग्रहणार्थं नातिविस्तरार्थञ्च केषाञ्चित शब्दानाम् अवयवार्थमनादृत्य समुदायार्थज्ञापनाय परिभाषानाम्नीं विशिष्टसञ्ज्ञा विदधति, तज्ज्ञानमन्तरेण च शास्त्रार्थो दुर्बोधो भवति, अतस्ता निर्देष्टुम अष्टमाध्यायमारभते, तत्र स्वल्पज्ञाना बोधसौकर्यार्थं सोमदेवोक्ता रसशास्त्रीया परिभाषामाह, कथ्यते इति ।—सोमदेवेन तदाख्यरसतन्त्रकर्त्रा । मुग्धेति ।—अनभिज्ञभिषजा बोध सौकर्य्यार्थम् । परिभाषा अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थप्रकाशक मानादिज्ञापकश्च ग्रन्थविशेष., यदुक्त परिभाषाप्रदीपे—"ध्वान्ते पथि चरिष्णूना यथा दीप प्रदर्शक । नानाशास्त्रज्ञभिषजा सङ्ग्रहोऽय तथा भवेत् ॥ अव्यक्तानुक्तलेशोक्तसन्दिग्धार्थ-प्रकाशिका । परिभाषा प्रकथ्यन्ते दीपीभूता सुनिश्चिता ॥" इति । अत्र तु रस-कर्मणि रसविद्भि विहितस्य समुदायार्थबोधकसञ्ज्ञाविशेषस्य अर्थप्रकाशिका परिभाषा इत्यर्थो बोध्य । सिद्धै योगसिद्धपुरुषै ॥ १ ॥

भिषजा धन्वन्तर्य्यंशत्वात धन्वन्तरिप्रसादनार्थं रोगिभि वैद्याय यस्य यस्यौषधस्य धन्वन्तरिभाग इति नाम्ना प्रसिद्धः यावान् यावानंश दातव्य, तदाह, अर्द्धमिति ।— सिद्धरसस्य जारणादिक्रियानुष्ठानेन जरामरणादिविनाशकशक्तिसम्पन्नस्य रसस्य अर्द्धं प्रस्तुतौषधापेक्षया अर्द्धांशम्, तैलघृतयोरित्यस्यापि अर्द्धमित्यनेन सम्बन्ध.,

अथ रुद्रभागः।—

भैषज्यक्रीणितद्रव्य-भागोऽप्येकादशो हि यः।
वणिग्भ्यो गृह्यते वैद्यै रुद्रभागः स उच्यते ॥ ३ ॥

अथ विश्वासघातकवैद्यलक्षणम्।—

प्रगृह्याधिकरुद्रांशं योऽसमीचीनमौषधम्।
दापयेल्लुब्धधीर्वैद्यः स स्याद्विश्वासघातकः ॥ ४ ॥

अथ कज्जली।—

धातुभिर्गन्धकाद्यैश्च निर्द्रवैर्मर्दितो रसः।
सुश्लक्ष्णः कज्जलाभोऽसौ कज्जलीत्यभिधीयते ॥ ५ ॥

अथ रसपङ्कः।—

सद्रवा मर्दिता सैव रसपङ्क इति स्मृतः ॥ ६ ॥

तेन सिद्धरसस्य षड्‌ तैलघृतयोरपि षड्‌ देयमिति बोध्यम्, एवमष्टम सप्तमभागावपि प्रस्तुतलेहाद्यपेक्षया बोध्यौ। एवंविधांशग्रहणञ्च गुरुविप्रसिद्धतपस्विदुर्गतानाम् औषधप्रस्तुताच्चगृणां स्वभेषजैः चिकित्साकरणार्थं बोद्धव्य, यदुक्तं चरके—"गुरु-विप्रसिद्धतपस्विदुर्गताना स्वभेषजैरुपाचरेत्" इति ॥ २ ॥

रुद्रस्य तन्त्रकर्तृत्वात् तदनुजीविभिर्भिषग्भि रुद्रप्रसादसम्पादनार्थं रुद्रभाग इति नाम्ना प्रसिद्ध अंश यथा ग्राह्य तदाह, भैषज्येति।—अत्र वणिग्भ्य भैषज्यार्थं क्रीणितद्रव्याणां य एकादशो भाग इत्येवमन्वय कार्य्य, किञ्च "सविशेष्ये हि विशेषणे विशेष्य बाधित्वाऽपि विशेषणमुपसङ्क्रामति" इति न्यायात् शिखी विनष्ट पुरुषो न नष्ट इत्येवदिशा भैषज्यक्रीणितद्रव्यस्य एकादशो भाग इति योजनीयम्। "भैषज्यक्रीणित द्रव्य भाग" इति पाठे—भैषज्यार्थं क्रीणीत यत् द्रव्य तस्य य एकादशो भाग इत्येवमन्वयः। श्लोकोऽय प्रक्षिप्त इति केचित ॥ ३ ॥

निन्दनीयवैद्यमाह, प्रगृह्येति।—अधिकरुद्रांशम् एकादशभागादप्यधिकम्। दापयेत, वणिग्भि रोगिभ्य इति शेष। य वणिग्भ्य अधिकरुद्रांशमुत्कोचस्वरूपं गृहीत्वा अपकृष्ट द्रव्यमुत्कृष्टमित्युक्ता ते रोगिभ्यो दापयेदित्यर्थ ॥ ४ ॥

कज्जलीमाह, धातुभिरिति।—धातुभि, स्वर्णादिभि। गन्धकाद्यैरित्यत्र आदि-पदेन अभ्रादीना ग्रहण बोध्यम् ॥ ५ ॥

अथ पिष्टी।—

अर्कांशतुल्याद्रसतोऽथ गन्धान्निष्कार्द्धतुल्यात्त्रुटिशोऽधिखल्ले।
अर्कातपे तीव्रतरे विमर्द्यात् पिष्टी भवेत् सा नवनीतरूपा ॥७॥

मतान्तरे पिष्टी।—

खल्ले विमर्द्य गन्धेन दुग्धेन सह पारदम्।
घर्षणात् पिष्टता याति सा पिष्टीति मता परैः ॥ ८ ॥

अथ पातनपिष्टी।—

चतुर्थांशसुवर्णेन रसेन घृष्टपिष्टिका।
भवेत् पातनपिष्टी सा रसस्योत्तमसिद्धिदा ॥ ९ ॥

अथ स्वर्णरौप्ययोः क्रष्टी।—

रूप्यं वा जातरूपं वा रसगन्धादिभिर्हतम्।
समुत्थितञ्च बहुशः सा क्रष्टी हेमतारयोः ॥ १० ॥

रसपङ्कमाह, सद्रवेति।—सद्रवा केनचिद्द्रवेण सहिता। सैव कज्जली एव ॥ ६ ॥

पिष्टीमाह, अर्कांशतुल्यादिति।—अर्कांशः द्वादशभागः, स च निष्कार्द्धापेक्षया इति बोध्यः, तेन सार्द्धकर्षो रसस्येति। निष्कार्द्धतुल्यात् माषद्वयमितात्। त्रुटिशः खण्डशः। अधिखल्ले खल्लमध्ये। अत्र तुल्यादिति प्रयोगद्वये ल्यब्लोपे पञ्चमी, तेन अर्कांशतुल्यं निष्कार्द्धतुल्यञ्च गृहीत्वा इत्येवं योजनीयम् ॥ ७ ॥

पिष्ट्या मतान्तरमाह, खल्ले इति।—सुगमम् ॥ ८ ॥

पातनपिष्टीमाह, चतुर्थांशेति।—रसापेक्षया चतुर्थांशसुवर्णेन इत्यर्थः। घृष्टपिष्टिका आदौ घृष्टा पश्चात् पिष्टिका पिष्टीकृता। पातनपिष्टी ऊर्द्धपातनाद्यर्थं पिष्टी ॥ ९ ॥

क्रष्टीलक्षणमाह, रूप्यमिति।—जातरूपं सुवर्णम्। समुत्थितमिति अन्तर्भूतण्यर्थप्रयोगः, तेन समुत्थापितं शोधितमित्यर्थः, ऊर्द्धपातनायन्त्रे साधितमित्यर्थो वा। सा उत्थापनक्रिया। क्रष्टीति।—स्वर्णरौप्ययोः सा क्रिया क्रष्टीति बोध्यम्। रसादिभिः सह स्वर्णं वा रौप्यं वा केनचिन्मारकद्रव्येण सम्मर्द्य बहुश आतपे शोषयेत, अथवा—रसगन्धादिभिर्मारितं स्वर्णं रौप्यं वा बहुवारम् ऊर्द्धपातनयन्त्रेण समुत्थापयेत सा क्रिया क्रष्टी बोध्या ॥ १० ॥

अथ कृष्ट्या कार्य्यम्।—

कृष्टीं क्षिपेत् सुवर्णान्तर्न वर्णो हीयते तया॥ ११॥

अथ स्वर्णकृष्टीकृतवीजस्य कार्य्यम्।—

स्वर्णकृष्ट्या कृतं वीजं रसस्य परिरञ्जनम्॥ १२॥

अथ वरलोहकम्।—

ताम्रं तीक्ष्णसमायुक्तं द्रुतं निक्षिप्य भूरिशः।
स-गन्ध-लकुचद्रावे निर्गतं वरलोहकम्॥ १३॥

अथ हेमरक्ती।—

तेन रक्तीकृत स्वर्णं हेमरक्तीत्युदाहृतम्॥१४॥

अथ हेमरक्त्याः कार्य्यम्।—

निक्षिप्ता सा द्रुते स्वर्णे वर्णोत्कर्षविधायिनी।
तारस्य रञ्जनी चापि वीजरागविधायिनी॥ १५॥

कृष्ट्या कार्य्यमाह, कृष्टीमिति।—पूर्वरीत्या कृतया सुवर्णरौप्ययोरन्यतरकृष्ट्या सह सुवर्णं सम्मर्द्य पुटनेन स्वर्णस्य वर्णान्यथा न जायते॥ ११॥

स्वर्णकृष्टीकृतवीजस्य कार्य्यमाह, स्वर्णकृष्ट्येति।—वीज "निर्वापणविशेषेण" इत्यादिना वक्ष्यमाणलक्षण धातुविशेषाणा विचित्रसंस्कारविशेष। उक्तप्रकारेणैव कृतस्वर्णकृष्टीनिर्मित वीज पारद रञ्जयेत॥ १२॥

वरलोहप्रस्तुतप्रकारमाह, ताम्रमिति।—तीक्ष्णसमायुक्त तीक्ष्णलौहसंयुक्तम। भूरिश सप्तवारानित्यर्थ। तीक्ष्णलौह ताम्रञ्च अग्निसन्तापेन द्रवीकृत्य गन्धक-चूर्णमिश्रितलकुचरसे निक्षिपेत्, घनीभूत तद्द्वयमुत्तोल्य पुन द्रावयित्वा पूर्वरसे निक्षिपेत, एव सप्तवारम। "द्रुतम्" इत्यत्र "मृतम्" इति पाठे,—मृत भस्मीभूतम। एव प्रक्रियया तस्मात उत्कृष्टलौह निर्गमिष्यतीति। १३॥

हेमरक्तीमाह तेन रक्तीकृतमिति।—तेन वरलोहसंयोगेन रक्तीभूत सुवर्णं हेमरक्ती इति नाम्ना ख्यातम्॥ १४॥

हेमरक्त्या कार्य्यमाह, निक्षिप्तेति।—सा हेमरक्ती। तारस्य रौप्यस्य। बीजरागविधायिनी निर्वापणविशेषेण इत्यादिना वक्ष्यमाणलक्षणस्य विचित्रसंस्कार-विशिष्टधातुविशेषस्य रञ्जनी॥ १५॥

अथताररञ्जी।—

एवमेव प्रकर्त्तव्या ताररञ्जी मनोहरा।
रञ्जनी खलु रूप्यस्य बीजानामपि रञ्जनी॥ १६॥

अथ दलम्।—

मृतेन वा बद्धरसेन वाऽन्यलोहेन वा साधितमन्यलोहम्।
सितञ्च पीतत्वमुपागतं तद्दलं हि चन्द्रानलयोः प्रसिद्धम्॥ १७॥

अथ अन्यविधदलम्।—

आ-मास-कृतबद्धेन रसेन सह योजितम्।
साधितं वाऽन्यलोहेन सितं पीतञ्च तद्दलम्॥ १८॥

अथ शुल्वनागम्।—

माक्षिकेण हतं ताम्रं दशवारं समुत्थितम्।
तद्वद्धि शुद्धनागं हि द्वितयं तच्चतुष्पलम्॥ १९॥

ताररञ्जीमाह, एवमिति।—एवं हेमरञ्जीप्रक्रियामनुसृत्य इत्यर्थः। ताररञ्जी रौप्यरञ्जी॥ १६॥

दलमाह, मृतेनेति।—बद्धरसेन निगडीकरणक्रियया संयमितसूतेन। अन्यलोहेन अष्टलोहानामन्यतमलोहेन, अन्यत् लोहमन्यलोहमिति अलुक् समासः, तेन। अन्यलोहम् अष्टलोहानां यत् किञ्चिदेकं लोहमित्यर्थः। चन्द्रानलयोः दलमिति सितत्व-पीतत्वप्राप्तलोहविशेषस्य संज्ञाविशेषः। मृतसूतादीनामन्यतमेन साधितं यत्किञ्चिदेकं लोहं यदा सितत्वं पीतत्वं वा प्राप्नोति तदा सितपीतान्यतरत्वमुपागतं तत् चन्द्रानलयोः दलमिति संज्ञां लभते, एवञ्च सितत्वमुपागतं लोहं चन्द्रदलं पीतत्वमुपागतञ्च लोह-मनलदलमिति बोध्यम॥ १७॥

दलक्रियाया क्रमान्तरमाह, आ मासेति।—आ मास कृतबद्धेन मासं यावत् कृतनिगडीकरणक्रियेण, मासं यावत् निगडीकरणक्रियया संयमितेनेत्यर्थः। "आ-मास" इत्यत्र "आवास" इति पाठे—"सर्पाक्षी चीरिणी" इत्यादिनोक्तनियामक-गणे सम्यग्वासनद्वारा नियमितेनेत्यर्थः। योजितं मिश्रयित्वा साधितमित्यर्थः। तत् यत्किञ्चिल्लोहम्॥ १८॥

नीलाञ्जनहतं भूयः सप्तवार समुत्थितम्।
इति संसिद्धमेतद्धि शुल्वनागं प्रकीर्त्यते ॥ २० ॥

अथ शुल्वनागगुणाः।—

साधितस्तेन सूतेन्द्रो वदने विधृतो नृणाम्।
निहन्ति मासमात्रेण मेहव्यूहमशेषतः ॥ २१ ॥
पथ्याशनस्य वर्षेण पलितं वलिभिः सह।
गृध्रदृष्टिर्लसत्पुष्टिः सर्वारोग्यसमन्वितः ॥ २२ ॥

अथ पिञ्जरी।—

लोहं लोहान्तरे क्षिप्तं ध्मातं निर्वापितं द्रवे।
पाण्डुपीतप्रभं जातं पिञ्जरीत्यभिधीयते ॥ २३ ॥

अथ चन्द्रार्कम्।—

भागाः षोडश तारस्य तथा द्वादश भास्वतः।
एकत्राऽऽवर्त्तितास्तेन चन्द्रार्कमिति कथ्यते ॥ २४ ॥

अथ निर्वाहणम्।—

साध्यलोहेऽन्यलोहं चेत् प्रक्षिप्तं वङ्कनालतः।
निर्वापणन्तु तत् प्रोक्तं वैद्यैर्निर्वाहणं खलु ॥ २५ ॥

शुल्वनागमाह, माक्षिकेणेति।—स्वर्णमाक्षिकेण सह मारितं ताम्रं तथा सीसकञ्च पृथक् पृथक् दशवारं समुत्थापितं कृत्वा तयोः प्रत्येकं चतुष्पलम् आदाय एकीकुर्य्यात् ततः तदुभयं भूयः नीलाञ्जनेन सह भस्मीकृत्य सप्तवारं समुत्थापयेत्, एवञ्च तयोः शुल्वनाग इति सञ्ज्ञा जायते इति ॥ १९।२० ॥

शुल्वनागस्य गुणमाह, साधित इति।—साधितः मारितः। वदने विधृतः, गुटिकां कृत्वेति शेषः ॥ २१।२२ ॥

पिञ्जरीमाह, लोहमिति।—किमपि द्रुतं लोहमन्यतरस्मिन् द्रुते लोहे निक्षिप्य त्रिफलाद्यन्यतरद्रावे निर्वापयेत्, एवञ्च पाण्डुपीतप्रभं तल्लोहं पिञ्जरीसञ्ज्ञां प्राप्नोति इत्यर्थः ॥ २३ ॥

चन्द्रार्कसञ्ज्ञामाह, भागा इति।—भास्वतः ताम्रस्य। एकत्राऽऽवर्त्तिताः एकस्मिन्नेव पात्रे युगपत् द्रवीकृत्य आलोडिताः। तेन तथा आलोडनेन ॥ २४ ॥

अथ निर्वापणस्य मात्रानिर्देशः ।—

क्षिपेन्निर्वापणं द्रव्यं निर्वाह्ये समभागिकम् ।
आवाह्यं वापनीये च भागे दृष्टे च दृष्टवत् ॥ २६ ॥

अथ वारितरलोहलक्षणम् ।—

मृतं तरति यत्तोये लोहं वारितरं हि तत् ॥ २७ ॥

अथ रेखापूर्णाख्यमृतलोहलक्षणम् ।—

अङ्गुष्ठतर्जनीघृष्टं यत्तद्रेखान्तरे विशेत् ।
मृतलोहं तदुद्दिष्टं रेखापूर्णाभिधानतः ॥ २८ ॥

अथ अपुनर्भवलोहलक्षणम् ।—

गुड-गुञ्जा-सुखस्पर्श-मध्वाज्यैः सह योजितम् ।
नाऽऽयाति प्रकृतिं ध्मानादपुनर्भवमुच्यते ॥ २९ ॥

निर्वाहणमाह, साध्यलोहे इति ।—साध्यलोहे मारणीयलोहे । वङ्कनालतः वङ्कनालाख्ययन्त्रविशेषेण । वङ्कनाललक्षणञ्चाग्रे दशमाध्याये "मूषाग्निं" इत्यादिना "दृढध्मानाय कीर्त्तितम्" इत्यन्तेन वक्ष्यति । निर्वापणं मारणलोहम् । निर्वाहणं सञ्ज्ञाविशेषः । मारणार्हलोहे तत्तल्लोहमारकं लोहान्तरं यदि वङ्कनालेन प्रक्षिपेत् तर्हि तन्मारकं लोहं निर्वाहणसञ्ज्ञां लभते ॥ २५ ॥

निर्वापणद्रव्यस्य मानमाह, क्षिपेदिति ।—निर्वापणं मारणद्रव्यम् । निर्वाह्ये सम्पादनीये, साध्ये इति यावत्, लोहादिद्रव्ये इति शेषः । साध्यलोहे मारणद्रव्यं साध्यलोहसमभागं प्रक्षेप्यम्, अथवा वापनीये प्रक्षेपयोग्ये भागे माने दृष्टे सति, उपदेष्टृसकाशे इति शेषः, दृष्टवत् यथा दृष्टं तथा, प्रक्षिप्येति शेषः, आवाह्यम् आ सम्यक् वाह्यं सम्पादनीयम् । "आवाह्यम्" इत्यत्र "आवाप्यम्" इति पाठे—गुरुसकाशे यथा दृष्टं तथा प्रक्षेप्यम् इति ॥ २६ ॥

वारितरलोहलक्षणमाह, मृतमिति ।—वारिणि जले तरति प्लवते भासते इति यावत्, इति वारितरम् ॥ २७ ॥

रेखापूर्णलोहलक्षणमाह, अङ्गुष्ठेति ।—तद्रेखान्तरे तयोः तर्जन्यङ्गुष्ठयोः रेखान्तरे रेखावकाशे, अङ्गुष्ठतर्जनीभ्यां घर्षणे कृते यत्र लोहे तयोरङ्गुल्योः रेखासमूहः अङ्कितो भवेदित्यर्थः ॥ २८ ॥

निरुत्थलोहलक्षणमाह, गुडेति ।—सुखस्पर्शः टङ्कणः, निरुत्थीकारकमित्रपञ्चकवर्गे

अथ ऊनमलक्षणम्।—

तस्योपरि गुरुद्रव्यं धान्यञ्चोपनयेद्ध्रुवम्।
हंसवत्तीर्य्यते वारिण्यूनम परिकीर्त्तितम्॥ ३०॥

अथ निरुत्थलौहलक्षणम्।—

रौप्येण सह संयुक्तं ध्मातं रौप्येण चेन्नगेत्।
तदा निरुत्थमित्युक्त लोह तदपुनर्भवम्॥ ३१॥

अथ बीजलक्षणम्।—

निर्वापणविशेषेण तत्तद्वर्णं भवेद्यदा।
मृदुलं चित्रसंस्कारं तद्बीजमिति कथ्यते॥ ३२॥

अथ उत्तरणम्।—

इदमेव विनिर्दिष्टं वैद्यैरुत्तरणं खलु।
संसृष्टलोहयोरेक-लोहस्य परिनाशनम्॥ ३३॥

टङ्कणशब्दग्रहणात्, यदुक्त रसेन्द्रसारे—"मधुसर्पिस्तथा गुञ्जा टङ्कण गुग्गुलुस्तथा। मित्रपञ्चकमेतत्तु गणितं धातुमिलने॥" इति। मित्रपञ्चकोक्तगुग्गुलो कार्य्यमत्र गुडेन सम्पादनीयमिति। प्रकृति स्वरूपम्। अपुनर्भवम् अपुनरुत्थान, निरुत्थमिति यावत्॥ २९॥

ऊनमाख्यमृतलौहलक्षणमाह, तस्येति।—तस्य उक्तप्रकारेण मृतलोहस्योपरि किमपि भारवद्द्रव्य धान्यञ्च संस्थाप्य जले निक्षिप्ते सति तत तरति चेत ऊनमाख्य तल्लौह ज्ञेयम्॥ ३०॥

निरुत्थस्य लक्षणान्तरमाह रौप्येणेति।—रौप्य लौहञ्च एकत्र संस्थाप्य भस्त्रया ध्मापनेन यदि परस्पर मिश्रीभवेत तदाऽपि निरुत्थ ज्ञेयम्॥ ३१॥

बीजमाह, निर्वापणेति।—पूर्वनिर्दिष्टसाध्यलौहे तत्तल्लोहमारकान्यलोहनिक्षेप रूपनिर्वाहणाख्यसंस्कारविशेषेण यदा साध्यलोह प्रक्षिप्तलौहवर्ण भवेत, तदा मृदुल मुखस्पर्श, चित्रसंस्कारम् आहितापूर्वगुणान्तर तत बीजमिति ज्ञेयम्॥ ३२॥

उत्तरणमाह, इदमिति।—इद संसृष्टलोहयोरित्यादिना वक्ष्यमाणरूपमित्यर्थ। उत्तरणमिति संज्ञाविशेष। संसृष्टेति।—मिश्रितलौहयो एकलोहस्य परिनाशन ध्मापनादिक्रियाविशेषेण एकस्मात अन्यत् पृथक्कृत्य भस्मीकरणम्, एकस्मात अन्यस्य बहिर्निष्काशन वा॥ ३३॥

अथ ताडनम् ।—

प्रध्मातं वङ्कनालेन तत्ताडनमुदाहृतम् ॥ ३४ ॥

अथ धान्याभ्रलक्षणम् ।—

चूर्णाभ्रं शालिसंयुक्तं वस्त्रबद्धं हि काञ्जिके ।
निर्यातं मर्दनाद्वस्त्राद्धान्याभ्रमिति कथ्यते ॥ ३५ ॥

अथ सत्त्वलक्षणम् ।—

क्षाराम्लद्रावकैर्युक्तं ध्मातमाकरकोष्ठके ।
यस्ततो निर्गतः सारः सत्त्वमित्यभिधीयते ॥ ३६ ॥

अथ एककोलीसकलक्षणम् ।—

कोष्ठिका-शिखरापूर्णैः कोकिलैर्ध्मानयोगतः ।
मूषाकण्ठमनुप्राप्तै-रेककोलीसको मतः ॥ ३७ ॥

अथ द्रावणादिकर्मसाधने काष्ठनिर्देशः ।—

द्रावणे सत्त्वपाते च माधुकाः खादिराः शुभाः ।
दुर्द्रावे वंशजास्ते तु स्वेदने बादराः शुभाः ॥ ३८ ॥

ताडनमाह, प्रध्मातमिति ।—तत् उत्तरणक्रियानिष्पन्नं सकृष्टलौहशोरेक-लौहम् ॥ ३४ ॥

धान्याभ्रमाह, चूर्णाभ्रमिति ।—व्याख्यातमेतत् द्वितीयाध्याये ॥ ३५ ॥

सत्त्वमाह, क्षारेति ।—क्षारः टङ्कणः लौहशोधकत्वात्, अम्लं काञ्जिकादिकं, द्रावकं "गुञ्जाटङ्कणमध्वाज्यगुडा द्रावकपञ्चकम्" इत्युक्तस्वरूपं तैः । आकरकोष्ठके कोष्ठिकायन्त्रे । सारः स्थिरांशः, प्रसादभाग इति यावत् ॥ ३६ ॥

एककोलीसकमाह, कोष्ठिकेति ।—कोष्ठिकायन्त्राग्रभागपर्यन्तम् अङ्गारैरापूर्य ध्मापनवशात् मारणीयद्रव्ये मूषाकण्ठपर्यन्तमागते उपलक्षिते यत् कर्म स एककोलीसकाख्यः क्रियाविशेषो मतः ॥ ३७ ॥

द्रावणादिकर्मसम्पादनार्थमिन्धनं निर्दिशति, द्रावणे इति ।—माधुकाः मधुककाष्ठाङ्गाराः । "माधूकाः" इति पाठे—मधूकः मधुद्रुमः "महुया" इति भाषा, मधूककाष्ठाङ्गाराः इत्यर्थः । दुर्द्रावे माधुकखादिराभ्यां द्रावयितुं दुष्करे इत्यर्थः ॥ ३८ ॥

अथ हिङ्गुलाकृष्टरसः ।—

विद्याधराख्ययन्त्रस्थादार्द्रकद्रावमर्दितात् ।
समाकृष्टो रसो योऽसौ हिङ्गुलाकृष्ट उच्यते ॥ ३९ ॥

अथ घोषाकृष्टलक्षणम् ।—

स्वल्पतालयुतं कांस्यं वङ्कनालेन ताडितम् ।
मुक्तरङ्गं हि तत्ताम्रं घोषाकृष्टमुदाहृतम् ॥ ४० ॥

अथ वरनागलक्षणम् ।—

तीक्ष्णनीलाञ्जनोपेतं ध्मातं हि बहुशो दृढम् ।
मृदु कृष्णं द्रुतद्रावं वरनागं तदुच्यते ॥ ४१ ॥

अथ उत्थापनालक्षणम् ।—

मृतस्य पुनरुद्भूतिः सम्प्रोक्तोत्थापनाख्यया ॥ ४२ ॥

अथ ढालनलक्षणम् ।—

द्रुतद्रव्यस्य निक्षेपो द्रवे तड्ढालनं मतम् ॥ ४३ ॥

हिङ्गुलाकृष्टरसमाह, विद्याधरेति ।—विद्याधरयन्त्रलक्षणञ्चाग्रे वक्ष्यमाणम् । मर्दितादित्यत्र हिङ्गुलादिति शेषः ॥ ३९ ॥

घोषाकृष्टमाह, स्वल्पेति ।—मुक्तरङ्ग पृथग्भूतरङ्गधातुक, कांस्यस्य ताम्रवङ्ग-संयोगजत्वात । तत्ताम्र रङ्गस्य पृथक्करणेन अवशिष्ट ताम्रम् । घोषाकृष्ट घोषात कांस्यात आकृष्ट निष्काशितमिति तादृशम् ॥ ४० ॥

वरनागलक्षणमाह, तीक्ष्णेति ।—अत्र विशेष्यपदोल्लेखाभावेऽपि वरनाग इति संज्ञाबलादेव तीक्ष्णनीलाञ्जनोपेतमित्यत्र नागमिति विशेष्यपद शेष बोध्य । तीक्ष्ण-लौहनीलाञ्जनसंयुक्त यत सीसक बहुवार दृढमाध्मात सत सुकोमल कृष्णवर्ण द्रुतद्रावञ्च स्यात तत सीसक वरनाग बोध्यम् । "तीक्ष्णम्" इति पृथक् पाठे—नीलाञ्जन तीक्ष्णलौहञ्च इत्यर्थ ॥ ४१ ॥

उत्थापनामाह, मृतस्येति ।—पुनरुद्भूति यन्त्रादियोगेन स्वरूपापादनम् इत्यर्थ ॥ ४२ ॥

ढालनमाह, द्रुतद्रव्यस्येति ।—द्रुतद्रव्यस्य गलितद्रव्यस्य ॥ ४३ ॥

अथ नागसम्भूतचपल ।—

त्रिंशत्पलमितं नागं भानुदुग्धेन मर्दितम् ।
विमर्द्य पुटयेत्तावद्यावत् कर्षावशेषितम् ॥ ४४ ॥
न तत् पुटसहस्रेण क्षयमायाति सर्वथा ।
चपलोऽयं समादिष्टो वार्त्तिकैर्नागसम्भवः ॥ ४५ ॥

अथ वङ्गसम्भूतचपल ।—

इत्थं हि चपल कार्य्यो वङ्गस्यापि न संशयः ॥ ४६ ॥

अथ चपलस्य कार्य्यम् ।—

तत्स्पृष्टहस्त-संस्पृष्ट' केवलो बध्यते रसः ॥ ४७ ॥

अथ तादृशबद्धरसस्य कार्य्यम् ।—

स रसो धातुवादेषु शस्यते न रसायने ।
अयं हि खर्वणाख्येन लोकनाथेन कीर्त्तितः ॥ ४८ ॥

नागसम्भूतचपलमाह, त्रिंशदिति ।—भानुदुग्धेन अर्कक्षीरेण। पुटयेदिति ।—यावता पुटेन त्रिंशतपल तत कर्षशेषं स्यात तावत पुटेत। तत कर्षावशेष नागम्। वार्त्तिकै "उक्तानुक्तदुरुक्तार्थ व्यक्तकारि तु वार्त्तिकम्" इत्युक्तलक्षणकसूत्रानुक्ताद्यर्थाविष्कारकग्रन्थविशेषाभिज्ञै ॥ ४४।४५ ॥

वङ्गसम्भूतचपलमाह, इत्थमिति ।—इत्थं नागसम्भूतचपलवत् ॥ ४६ ॥

द्विविधचपलस्य कार्य्यमाह, तदिति ।—तेन चपलेन, स्पृष्टाभ्या हस्ताभ्या संस्पृष्ट स्पर्शविषयीकृत, केवल एक अन्याविमिश्र, रस बध्यते संयमितो भवति, अनुड्डयनस्वभावो भवति इत्यर्थ ॥ ४७ ॥

तादृशबद्धरसस्य कार्य्यमाह, स इति ।—स रस' पूर्वोक्तक्रियया बद्धो रस । धातुवादेषु लौहादीना स्वर्णादिरूपेण परिणमनक्रियासु। खर्वणाख्येन खर्वण इति नाम्ना ख्यातेन। क्वचित् एतच्छ्लोकानन्तर "नाग निरुत्थित कृत्वा खर्परे षड्गुणै सह। षष्टिश्चतुर्थवेधेन तारमायाति काञ्चनम् ॥" इत्यधिक श्लोको दृश्यते। अत्र च षष्टिरित्यस्य निरुत्थितमित्यनेनान्वय, षष्टिवारं निरुत्थित कृत्वा इत्यर्थ। चतुर्थवेधेन उक्तविधनिरुत्थितनागद्वारा वारत्रयवेधानन्तर चतुर्थवारवेधकर्मसम्पादनेनेत्यर्थ. ॥ ४८ ॥

अथ धौतम् ।—

भू-भुजङ्ग-शक्रतोये प्रक्षाल्यापहृतं रजः ।
कृष्णवर्णं हि तत् प्रोक्तं धौताख्यं रसवादिभिः ॥ ४९ ॥

अथ इन्द्वानम् ।—

द्रव्ययोर्मर्दनाद्ध्मानात् इन्द्वानं परिकीर्त्तितम् ॥ ५० ॥

अथ भञ्जनी ।—

भागाद्द्रव्याधिकक्षेप-मनु वर्णसुवर्णके ।
द्रवैर्वा वह्निकाग्रासो भञ्जनी वादिभिर्मता ॥ ५१ ॥

अथ चुल्लका ।—

पतङ्गीकल्कतो जाता लोहे तारे च हैमता ।
दिनानि कतिचित् स्थित्वा यात्यसौ चुल्लका मता ॥ ५२ ॥

धौतमाह, भूभुजङ्गेति ।—अपहृतम् अपचित, निःसारितमित्यर्थः । रजः पुटनादिकाले तन्मलयाङ्गारादिचूर्णम् । तत् चपलीभूत नाग वङ्गञ्च । भूनागमलरसैः तन्मलमिश्रजलैर्वा परिशोधितमलादिकं कृष्णवर्णं चपलीभूत नाग वङ्गञ्च धौतनाग धौतवङ्गञ्च प्रोक्तमिति निष्कर्षः ॥ ४९ ॥

इन्द्वानमाह, द्रव्ययोरिति ।—संसृष्टद्रव्यद्वय मर्दयित्वा ध्मापनेन इन्द्वानसञ्ज्ञा जायते । "इन्द्वानम्" इत्यत्र "बन्धनम्" इति पाठान्तरम् ॥ ५० ॥

भञ्जनीमाह, भागादिति ।—वर्णेन सुवर्णं इव तस्मिन् वर्णसुवर्णके राजपित्तले, भागात् मारणार्थनिर्दिष्टप्रक्षेप्यभागम् अपेक्ष्य, द्रव्याधिकक्षेप द्रव्याणां प्रक्षेप्यद्रव्याणाम् अधिकक्षेपम् अधिकप्रक्षेपम्, अनु पश्चात् अधिकप्रक्षेपानन्तरमित्यर्थः, यः वह्निकाग्रासः मारणीयद्रव्यगतवह्निनिर्वापणं, वा अथवा द्रवैः जलादिभिः यः वह्निकाग्रासः, स भञ्जनीति सञ्ज्ञया वादिभिः रसवादिभिः मता कथिता ॥ ५१ ॥

चुल्लकामाह, पतङ्गीति ।—पतङ्गीकल्कतः पतङ्गीकल्कात्, इत्यर्थः, कतिचिद्दिनानि स्थित्वा, लौहे तारञ्चेति शेषः, तत्र लौहे विशेषतः तारे च या हैमता स्वर्णसादृश्यं जाता असौ हैमता चुल्लका याति चुल्लका इति सञ्ज्ञां लभते इत्यर्थः, इति मता । चुल्लका "गिल्टी" इति लोके । यद्वा—लक्षणद्वयमिदं, तेन पतङ्गीत्यारभ्य हैमता इत्यन्तेन श्लोकार्द्धेन हैमतालक्षणम्, दिनानीत्यादिश्लोकार्द्धेन च चुल्लकालक्षणं ज्ञेयम् । अस्मिन् पक्षे—वक्ष्यमाणपतङ्गीरागाख्यरञ्जकद्रव्यविशेषस्य

अथ पतङ्गीराग ।—

रञ्जिताद्धि चिराल्लोहाद्ध्मानाद्वा चिरकालतः ।
विनिर्यासः स निर्दिष्टः पतङ्गीरागसञ्ज्ञकः ॥ ५३ ॥

अथ आवाप ।—

द्रुते द्रव्यान्तरक्षेपो लोहाद्ये क्रियते हि यः ।
स आवापः प्रतीवापस्तदेवाऽऽच्छादन मतम् ॥ ५४ ॥

अथ अभिषेक ।—

द्रुते वह्निस्थिते लोहे विरम्याष्टनिमेषकम् ।
सलिलस्य परिक्षेपः सोऽभिषेक इति स्मृतः ॥ ५५ ॥

अथ निवाप ।—

तप्तस्याप्सु विनिक्षेपो निर्वापः स्नपनञ्च तत् ॥ ५६ ॥

अथ प्रक्षेपकालनिर्देश ।—

प्रतीवापादिकं कार्य्यं द्रुते लोहे सुनिर्मले ॥ ५७ ॥

कल्कलेपनेन सर्वलौहे विशेषत रौप्ये हेमता इति सञ्ज्ञा जायते । हेम्नो भाव इति हेमता स्वर्णसादृश्यम् । तथा असौ लौह तारयोर्हेमता, कतिचिद्दिनानि स्थित्वा, पतङ्गीकल्के इत्याशय, चुल्लका याति चुल्लकेत्याख्यया ख्याति यातीत्यर्थ ॥ ५२ ॥

पूर्वश्लोके "पतङ्गी" इत्युक्तम्, अत तामेव विवृणोति, रञ्जितादिति ।—चिरात् दीर्घकालं व्याप्य रञ्जितात् वक्ष्यमाणरक्तादिवर्गान्यतमवर्गेण रागपरिप्रापितात्, यस्मात् कस्मादपि लौहात अथवा चिरकालत सुदीर्घकाल ध्मानात् आपितात् यस्मात् कस्मादपि रञ्जितलौहात् य विनिर्यास नि स्राव, सत्त्वमिति यावत्, निर्गच्छतीति शेष स पतङ्गीरागसञ्ज्ञक निर्दिष्ट ॥ ५३ ॥

आवापमाह, द्रुते इति ।—द्रुते द्रवीभूते ॥ ५४ ॥

अभिषेकमाह, द्रुते इति ।—वह्निस्थिते प्रज्वलितचुल्ल्युपरि एव अवस्थिते । अष्टनिमेषकम् अष्टवारमक्ष्णोर्निमीलनोन्मीलनात्मक काल विरम्य द्रवीभवनानन्तरमपेक्ष्य ॥ ५५ ॥

निर्वापमाह, तप्तस्येति ।—तप्तस्य इत्यत्र लौहस्येति शेष. । स्नपनमिति निर्वापस्य नामान्तरम् ॥ ५६ ॥

अथ शुद्धावर्त्त।—

यदा हुताशो दीप्तार्चिः शुक्लोत्थानसमन्वितः।
शुद्धावर्त्तस्तदा ज्ञेयः स कालः सत्त्वनिर्गमे॥ ५८॥

अथ वीजावर्त्त।—

द्राव्यद्रव्यनिभा ज्वाला दृश्यते धमने यदा।
द्रावस्योन्मुखता सेयं वीजावर्त्तः स उच्यते॥ ५९॥

अथ स्वाङ्गशीतलम्।—

वह्निस्थमेव शीतं यत्तदुक्तं स्वाङ्गशीतलम्॥ ६०॥

अथ वहिः शीतलम्।—

अग्नेराकृष्य शीतं यत्तद्बहिःशीतमीरितम्॥ ६१॥

अथ स्वेदनलक्षणम्।—

क्षाराम्लैरौषधैर्वाऽपि दोलायन्त्रे स्थितस्य हि।
पचनं स्वेदनाख्यं स्यान्मलशैथिल्यकारकम्॥ ६२॥

आवापादीनां कालमाह, प्रतीवापादिकमिति।—चकारादिपदेन निर्वापाभिषेकयोर्ग्रहणं बोध्यम्। द्रुते लोहे सुनिर्मले द्रवीभूत लोहं यदा सुनिर्मलं भवति तदित्यर्थः॥ ५७॥

शुद्धावर्त्तमाह, यदेति।—शुक्लोत्थानसमन्वितः शुभ्रोर्द्धज्वालासंयुक्तः। ध्मापनकाले यदा वह्निः दीप्तार्चिः शुभ्रज्वालासमन्वितश्च भवेत् तदा तस्य शुद्धावर्त्त इति संज्ञा ज्ञातव्या। तदैव सत्त्वनिर्गमो भावीति च ज्ञातव्यम्॥ ५८॥

वीजावर्त्तमाह, द्राव्येति।—द्राव्यद्रव्यनिभा द्रावणीयद्रव्यसदृशी। धमने ध्मापनकाले। द्रावस्योन्मुखता द्रवीभवनारम्भः॥ ५९॥

स्वाङ्गशीतलक्षणमाह, वह्निस्थमिति।—सुगमम्॥ ६०॥

वहिःशीतलक्षणमाह, अग्नेरिति।—सुगमम्॥ ६१॥

स्वेदनमाह, क्षाराम्लैरिति।—औषधैः तत्तल्लौहशोधकद्रव्याणां स्वरसादिभिरित्यर्थः। मलशैथिल्यकारकं स्वेदनेन मार्दवे जाते अन्तर्मलानां पृथक्करणं वीकरणं वा॥ ६२॥

अथ मर्दनलक्षणम्।—

उदितैरौषधैः सार्द्धं सर्वाम्लैः काञ्जिकैरपि।
पेषणं मर्दनाख्यं स्याद्बहिर्मलविनाशनम्॥ ६३॥

अथ मूर्च्छनलक्षणम्।—

मर्दनादिष्टभैषज्यैर्नष्टपिष्टत्वकारकम्।
तन्मूर्च्छनं हि वङ्गाहि-मलादिदोषनाशनम्॥ ६४॥

अथ उत्थापनलक्षणम्।—

स्वेदातपादियोगेन स्वरूपाऽऽपादनं हि यत्।
तदुत्थापनमित्युक्तं मूर्च्छाव्यापत्तिनाशनम्॥ ६५॥

अथ बन्धनलक्षणम्।—

स्वरूपस्य विनाशेन पिष्टत्वाद्बन्धनं हि तत्।
विद्वद्भिर्निर्जितः सूतो नष्टपिष्टिः स उच्यते॥ ६६॥

मर्दनमाह, उदितैरिति।—उदितैरौषधैः तत्र तत्रोक्तभेषजद्रव्याणां स्वरसैः क्वाथैर्वा इत्यर्थः॥ ६३॥

मूर्च्छनमाह, मर्दनादिति।—इष्टभैषज्यैः शोधकादित्वेन अभिमतौषधैः। नष्टपिष्टत्वकारकं पेषणेन स्वरूपनाशात् यत् मूर्त्तिबद्धत्वम्। वङ्गेति।—नागवङ्गादिदोषनाशनम्। एतत्तु रसमुद्दिश्य उक्तं, धात्वन्तराणामपि स्वस्वदोषनाशनमिति आदिपदेन बोध्यम्॥ ६४॥

उत्थापनमाह, स्वेदेति।—स्वेदः ऊर्द्धपातनादिना स्वेदनम्, आतपः रौद्रसन्तापः, आदिना मर्दनादीनां ग्रहणम्। स्वरूपाऽऽपादनं प्रकृत्यवस्थापनम्। मूर्च्छाव्यापत्तिनाशनं मूर्च्छनक्रियाजनितस्वरूपध्वंसरूपविपत्तिवारणम्॥ ६५॥

बन्धनमाह, स्वरूपस्येति।—पिष्टम् इष्टभैषज्यैः पेषणं, पिष्टमिति भावे क्तः, तस्य भावः तत्त्वात्, स्वरूपस्य विनाशेन स्वकीयशुभ्रत्व चपलत्वादिरूपापायेन, यद्रूपापादनमिति शेषः, तत् बन्धनं वह्निनाऽनुच्छिद्यमानत्वं मूर्त्तिबद्धत्वमिति वा, ज्ञेयमिति शेषः। अस्यैव नष्टपिष्टिरिति संज्ञाऽन्तरमाह, विद्वद्भिरिति।—निर्जितः बन्धनेन नष्टस्वरूपः, यद्वा—निर्जितः मृतः, सः सूतः, विद्वद्भिः नष्टपिष्टिः उच्यते॥ ६६॥

अथ पातनलक्षणम्।—

उक्तौषधैर्मर्दितपारदस्य यन्त्रस्थितस्योर्द्ध्वमधश्च तिर्य्यक्।
निर्यातनं पातनसंज्ञमुक्तं वङ्गाहिसम्पर्कज-कञ्चुकघ्नम्॥ ६७॥

अथ रोधनलक्षणम्।—

जलसैन्धवयुक्तस्य रसस्य दिवसत्रयम्।
स्थितिरास्थापनी कुम्भे याऽसौ रोधनमुच्यते॥ ६८॥

अथ नियमनलक्षणम्।—

रोधनाल्लब्धवीर्य्यस्य चपलत्वनिवृत्तये।
क्रियते पारदे स्वेदः प्रोक्तं नियमनं हि तत्॥ ६९॥

अथ दीपनलक्षणम्।—

धातु-पाषाण-मूलाद्यैः संयुक्तो घटमध्यगः।
ग्रासार्थं त्रिदिनं स्वेदो दीपनं तन्मतं बुधैः॥ ७०॥

पातनामयमाह, उक्तौषधैरिति।—निर्यातनं शोधनार्थं यत् कदर्थन-मित्यर्थः॥ ६७॥

रोधनमाह, जलेति।—जलसैन्धवाभ्यां सह कुम्भमध्ये दिवसत्रयं रसस्य या आस्थापनी आ सम्यक् स्थापनी षण्ढदोषनाशपूर्वकं स्ववीर्य्ये स्थापनकारिणी, क्रियेति शेषः, असौ स्थितिः स्थापनं, रोधनमित्युच्यते। इदं हि स्वेदनादिक्रियाजनितकदर्थनेन षण्ढभावप्राप्तस्य रसस्य तद्दोषनाशपूर्वकवीर्य्यप्रकर्षाधानार्थं ज्ञातव्यम्। ग्रन्थान्तरेऽस्य बोधनम् इति संज्ञा निर्दिष्टा॥ ६८॥

नियमनमाह, रोधनादिति।—स्वेदः स्वेदनम्। यद्यप्यत्र स्वेदनार्थं द्रव्यनिर्देशो न कृतः, तथाऽपि अध्येतॄणां विज्ञानार्थं ग्रन्थान्तरोक्तं तत् निर्दिश्यते, तथा च रसेन्द्र-चिन्तामणौ,—"सर्पाक्षीचिञ्चिकाकन्या-भृङ्गारकनकाम्बुभिः। दिनं सुस्वेदितः सूतो नियमात् स्थिरतां व्रजेत्॥" इति। नियमनं चपलत्वपरिहारपूर्वकस्थिरत्व-सम्पादनम्॥ ६९॥

दीपनमाह धात्विति।—ग्रासार्थं घनहेमादीनामिति शेषः। स्वेदः, दोलायन्त्रे काञ्जिकादिना रसस्य इति शेषः। दीपनं ग्रासशक्तिसञ्जननक्रियाविशेषः। रसेन्द्रचिन्ता-मणिकारेण दीपनद्रव्याणि अन्यविधान्युक्तानि यथा—"कासीसं पञ्चलवणं राजिका मरिचानि च। भूशिग्रुबीजमेकत्र टङ्कणेन समन्वितम्॥ आलोड्य काञ्जिके

अथ ग्रासमानम् ।—

इयन्मानस्य सूतस्य भोज्यद्रव्यात्मिका मितिः ।
इयतीत्युच्यते याऽसौ ग्रासमानं समीरितम् ॥ ७१ ॥

अथ जारणायास्त्रैविध्यनिर्देश ।—

ग्रासस्य चारणं गर्भे द्रावणं जारणं तथा ।
इति त्रिरूपा निर्दिष्टा जारणा वरवार्त्तिकैः ॥ ७२ ॥

अथ जारणाया पुनस्त्रैविध्यनिर्देश ।—

ग्रासः पिण्ड परीणामस्त्रिसञ्ज्ञाख्याः पराः पुनः ॥ ७३ ॥

अथ जारणाया पुनर्द्वैविध्यनिर्देश ।—

समुखा निर्मुखा चेति जारणा द्विविधा पुनः ॥ ७४ ॥

अथ निर्मुखजारणालक्षणम् ।—

निर्मुखा जारणा प्रोक्ता वीजादानेन भागतः ॥ ७५ ॥

दोला यन्त्रे पाकाद्दिनैस्त्रिभि । दीपन जायते सम्यक् सूतराजस्य जारणे ॥ अथवा चित्रकद्रावै काञ्जिके त्रिदिन पचेत ॥" इति ॥ ७० ॥

ग्रासमानमाह, इयन्मानस्येति ।—इयन्मानस्य एतावत्परिमाणस्य सूतस्य, सम्बन्धविवक्षया षष्ठी, इयन्मिते सूते इत्यर्थ, या इयती मिति एतावत्परिमाण, भोज्यद्रव्याणामिति शेष, इति उच्यते, भोज्यद्रव्यात्मिका ग्रसनीयस्वर्णादिद्रव्याणा मानानिर्देशरूपा असौ उक्ति ग्रासमान समीरितम्. इयन्मान सूत इयन्मान स्वर्णादिद्रव्य ग्रसितु समर्थ, एव-रूपमाननिर्देश ग्रासमान ज्ञेयम् ॥ ७१ ॥

जारणात्रयमाह, ग्रासस्येति ।—ग्रासस्य ग्रासयोग्यस्य स्वर्णादेरित्यर्थ, चारण रसान्त क्षपण, गर्भे द्रावण रसान्त तरलीभवन, जारणं विडयन्त्रादियोगेन द्रवीभूतग्रासस्य पाक ॥ ७२ ॥

जारणाया अपर त्रैविध्यमाह, ग्रास इति ।—ग्रास कवलीकरणरूपजारणा, पिण्ड कर्दमवत पिण्डीभवनरूपजारणा । परीणाम अवस्थान्तरप्रापणरूपजारणा ॥ ७३ ॥

उक्तरूपजारणाया' पुनरवान्तरभेदद्वयमाह, समुखेति ।—समुखनिर्मुखसंज्ञकजारणाद्वयलक्षणमाचार्य्य स्वयमेवाग्रे वक्ष्यति ॥ ७४ ॥

तत्रादौ निर्मुखजारणामाह, निर्मुखेति ।—नि, नास्ति मुख वक्ष्यमाणचतु षष्ट्यश

अथ बीजनिर्देश ।—

शुद्ध स्वर्णञ्च रूप्यञ्च बीजमित्यभिधीयते ॥ ७६ ॥

अथ मुखलक्षणम् ।—

चतुःषष्ठ्यंशतो बीज-प्रक्षेपो मुखमुच्यते ॥ ७७ ॥

अथ समुखजारणालक्षणम ।—

एव कृते रसो ग्रास-लोलुपो मुखवान् भवेत् ।
कठिनान्यपि लोहानि क्षमो भवति भक्षितुम् ॥
इय हि समुखा प्रोक्ता जारणा मृगचारिणा ॥ ७८ ॥

अथ राक्षसवक्त्ररसलक्षणम ।—

दिव्यौषधिसमायोगात् स्थित: प्रकटकोष्ठिषु ।
भुञ्जीताखिललोहाद्य योऽसौ राक्षसवक्त्रवान् ॥ ७९ ॥

अथ चारणालक्षणम् ।—

रसस्य जठरे ग्रास-क्षपणं चारणा मता ॥ ८० ॥

अथ गर्भद्रुतिलक्षणम् ।—

ग्रस्तस्य द्रावणं गर्भे गर्भद्रुतिरुदाहृता ॥ ८१ ॥

बीजप्रक्षेपरूपमुखलक्षणं यच जारणाया तादृशी । बीजेति ।—भागत यथाभाग, तत्तद्द्रव्यजारणाया निर्दिष्टभागमनतिक्रम्य, वक्ष्यमाणचतुःषष्टिभागात् न्यूनतया अधिकतया वा इत्यर्थ , बीजादानेन शुद्धस्वर्णरौप्यात्मकबीजग्रहणेन ॥ ७५ ॥

निर्मुखजारणाया बीजमित्युक्तमतो बीजलक्षणमाह, शुद्धमिति ।—सुगमम् ॥७६॥

समुखा निर्मुखा च इत्युक्त, तत्र मुख तावत् किमित्यपेक्षायामाह, चतुःषष्टीति । —रसापेक्षया चतुःषष्टिभागेनेत्यर्थ ॥ ७७ ॥

समुखजारणामाह, एवमिति ।—एव कृते चतुःषष्ठ्यंशतो बीजप्रक्षेपे कृते । मुखवान् समुख । मृगचारिणा तदाख्येन केनचित् रसतन्त्रकृता ॥ ७८ ॥

राक्षसमुखरसमाह, दिव्यौषधीति ।—दिव्यौषधि मन शिला । प्रकटकोष्ठिषु विवृताननकोष्ठिकायन्त्रेषु । भुञ्जीत ग्रसेत ॥ ७९ ॥

जारणाभेद-चारणालक्षणमाह, रसस्येति ।—जठरे मध्ये इत्यर्थ , ग्रासक्षपण ग्रासस्य ग्रासार्हलोहादे क्षपण क्षयमापादन, रसेन सह एकीकरणमित्यर्थ ॥ ८० ॥

जारणाभेद गर्भद्रुतिमाह, ग्रस्तस्येति ।—ग्रस्तस्य ग्रस्तलोहादे ॥ ८१ ॥

अथ बाह्यद्रुतिलक्षणम् ।—

बहिरेव द्रुतीकृत्य घनसत्त्वादिकं खलु ।
जारणाय रसेन्द्रस्य सा बाह्यद्रुतिरुच्यते ॥ ८२ ॥

अथ द्रुते पञ्चविधत्वनिर्देशः ।—

निर्लेपत्वं द्रुतत्वञ्च तेजस्त्वं लघुता तथा ।
असंयोगश्च सूतेन पञ्चधा द्रुतिलक्षणम् ॥ ८३ ॥

अथ द्रुतिस्वरूपम् ।—

औषधाध्मानयोगेन लोहं धात्वादिकं तथा ।
सन्तिष्ठते द्रवाकारं सा द्रुतिः परिकीर्त्तिता ॥ ८४ ॥

अथ जारणाभेदं जारणालक्षणम् ।—

द्रुतग्रासपरीणामो विडयन्त्रादियोगतः ।
जारणेत्युच्यते तस्याः प्रकाराः सन्ति कोटिशः ॥ ८५ ॥

गर्भद्रुतिप्रसङ्गेन बाह्यद्रुतिमाह, बहिरिति ।—बहिरेव चुल्ल्युपरिस्थकटाहादौ, न तु रसगर्भे इत्यर्थः । घनसत्त्वादिकम् अभ्रसत्त्वादिकम्, अत्रादिपदेन स्वर्ण-सत्त्वादीनां ग्रहणं बोध्यम् ॥ ८२ ॥

द्रुतेः पञ्चधाभेदानाह, निर्लेपत्वमिति ।—निर्लेपत्वं निः निश्चयेन निःशेषेण वा लेपत्वं लीनत्वं, द्रावान्तरेण सह निःशेषेण एकीभवनमित्यर्थः, यद्वा—निः निर्गतः लेपः लिप्तपदार्थः मलादिर्यस्मात् तत्त्वं, पृथग्भूतमलादिकमित्यर्थः । द्रुतत्वं विशेषेण द्रवीभवनम् । तेजस्त्वं स्वरूपापेक्षया तेजोभूयस्त्वम् । लघुता स्वाभाविकगुरुत्वमपेक्ष्य लाघवम् । असंयोगश्च सूतेन पारदेन सह पृथक्तया अवस्थानम् ॥ ८३ ॥

द्रुतिस्वरूपमाह, औषधेति ।—द्रावकौषधेन सह अग्निसंयोगादिक्रियया लोहं स्वर्णाद्यष्टविधं, तथा धात्वादिकम् अभ्रादयः, तेषामपि देहधारकत्वात् धातुसंज्ञया व्यपदेशः । अत्रादिपदेन रत्नादीनां ग्रहणम् । "लोहं धात्वादिकम्" इत्यत्र "लोहधात्वादिकम्" इति पाठान्तरेऽपि—स एवार्थः, अस्मिन् पक्षे—तथा इत्यस्य निर्लेपत्वादिरूपेणेत्यर्थः ॥ ८४ ॥

जारणाभेदं जारणामाह, द्रुतेति ।—विडं वक्ष्यमाणलक्षणलक्षितं, यन्त्रं कोष्ठि-कादिकं तदादियोगतः, अत्रादिपदेन मूषापुटादीनां ग्रहणम्, द्रुतस्य गर्भे तरलितस्य ग्रासस्य स्वर्णादेः परीणामः परिपाकः, स्वात्मनि अभेदरूपेण परिणमनम् । रसेन्द्र-

अथ विडलक्षणम्।—

क्षारैरम्लैश्च गन्धाद्यैर्मूत्रैश्च पटुभिस्तथा।
रसग्रासस्य जीर्णार्थं तद्विड परिकीर्त्तितम्॥ ८६॥

अथ रञ्जनलक्षणम्।—

सुसिद्धबीज-धात्वादि-जारणेन रसस्य हि।
पीतादिरागजनन रञ्जन परिकीर्त्तितम्॥ ८७॥

चिन्तामणौ तु "जारणा हि पातनगालनव्यतिरेकेण घनहेमादिग्रासपूर्वक पूर्वावस्थापन्नत्वम" इत्यनेन यत प्रकारान्तर जारणालक्षणमुक्तं तत चारणाख्य जारणाभिप्रायेण बोध्यम॥ ८५॥

पूर्वश्लोके विडयन्त्रादियोगत इत्युक्त, तत्र किन्तावत विडमित्यपेक्षायामाह, क्षारैरिति।—क्षारै वास्तूकक्षारादिभि टङ्कणादिभिश्च, अम्लै काञ्जिकादिभि जम्बीरादिभिर्वा, यदुक्त रसेन्द्रचिन्तामणौ—"जम्बीरबीजपूरकचाङ्गेरीवेतसाम्लसयोगात। क्षारा भवन्ति सुतरा गर्भद्रुतिजारणे शस्ता॥" इति। गन्धाद्यैरित्यत आद्यशब्देन काशीशसौराष्ट्र्यादीना शङ्खादीना वा ग्रहणम्। मूत्रैरष्टविधैरित्याशय। पटुभि लवणै, तानि चात्र षड्विधानि बोध्यानि, यदुक्त रसेन्द्रचिन्तामणौ—"वास्तूकेरण्डकदलीदेवदालीपुनर्नवा। वासापलाशनिचुल-तिलकाञ्चनमोचका॥ सर्वाङ्गखण्ड सच्छिद्र नातिशुष्क शिलातले। दग्ध काण्ड तिलानाञ्च पञ्चाङ्ग मूलकस्य च॥ स्रावयेन्मूत्रवर्गेण जल तस्मात परिस्रुतम्। लौहपात्रे पचेद्यन्त्रे हसपाकेऽग्निमानवित॥ वाष्पाणा बुद्बुदानाञ्च बहूनामुद्गमो यदा। तदा काशीशसौराष्ट्री-क्षारत्रयकटुत्रयम॥ गन्धकञ्च सिता हिङ्गुर्लवणानि च षट् तथा। एषा चूर्णं क्षिपेद्देवि। लौहसम्पुटमध्यत॥ सप्ताह भुगत पश्चात धार्य्यस्तु प्रचुरो विड॥ अत्र सकलक्षारे साम्यं तिलकाण्डक्षाराणामिति नित्यनाथपादा" इति। हसपाकयन्त्रलक्षणमपि तत्रैव यथा—'खर्पर सिकतापूर्ण कृत्वा तस्योपरि क्षिपेत। तत्सम खर्पर तत्र शनैर्मृद्वग्निना पचेत॥ हसपाक समाख्यात यन्त्रं तत वार्त्तिकोत्तमै॥" इति। षड्लवणानि यथा राजनिघण्टौ,—"काचकैन्धवसामुद्र विडसौवर्चले समे। स्यात् पञ्चलवण तच्च रुमकोपेत षडाह्वयम॥" इति। काच कृष्णलवण "कालालवण" इति प्रसिद्धम्, "सोरा" इति केचित। रुमका शाम्बरलवणम्। रसग्रासस्य रसेन ग्रस्तस्येत्यर्थ, स्वर्णादेरिति शेष॥ ८६॥

रञ्जनमाह, सुसिद्धेति।—शोधितस्वर्णरौप्याभ्या तथा जीर्णताम्रादियोगेन क्रियाविशेषमाश्रित्य रसस्य यत् पीतादिरागजननमित्यन्वय:॥ ८७॥

अथ सारणालक्षणम् ।—

सूते सतैलयन्त्रस्थे स्वर्णादिक्षेपणं हि यत् ।
वेधाधिक्यकरं लोहे सारणा सा प्रकीर्त्तिता ॥ ८८ ॥

अथ वेधलक्षणम् ।—

व्यवायि-भेषजोपेतो द्रव्ये क्षिप्तो रसः खलु ।
वेधः इत्युच्यते तज्ज्ञैः स चानेकविधः स्मृतः ॥ ८९ ॥

अथ वेधस्य पञ्चविधत्वनिर्देश ।—

लेपः क्षेपश्च कुन्तश्च धूमाख्यः शब्दसञ्ज्ञकः ॥ ९० ॥

अथ लेप वेधलक्षणम् ।—

लेपनं कुरुते लोहे स्वर्णं वा रजतं तथा ।
लेपवेधः स विज्ञेयः पुटमत्र च सौरकम् ॥ ९१ ॥

सारणामाह, सूते इति ।—सतैलयन्त्रस्थे तैलपूर्णान्धमूषामध्यस्थिते सूते रसे यत् स्वर्णादिक्षेपणं स्वर्णादिप्रक्षेप, लोहे ताम्रादौ इत्यर्थ, वेधाधिक्यकरं वेधस्य स्वर्णादिजननरूपवेधशक्ते, आधिक्यकरम् आतिशय्यजनकम् । उक्तञ्च रसेन्द्र चिन्तामणौ,—"अथ सारणोच्यते—'अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा । सैव छिद्रान्विता मध्ये गम्भीरा सारणोचिता ॥' अस्यामेव मूषायां तत्तैलमपगतकल्क-विमलमापूर्य्यमस्मिन्नधिकमधस्तात् द्रुतबीजप्रक्षेपसमकालमेव समावर्जनीय सूत-वरस्तदनु सद्यो मूषाननमाच्छादनीयम् । एततैलाक्तखण्डग्रन्थिवस्त्रेन अरुणासित-बीजाभ्याम अश्वनासारकर्मणा (?) मिलितश्चेत सारित सम्यक् सग्रमित विज्ञातव्य ।" सारणार्थं तैलमपि तत्रैवान्वेष्टव्य विस्तरभयान्नोद्धृतम् इति ॥८८॥

सारणालक्षणे वेधाधिक्यकरमित्युक्त कस्तावत वेध इत्यपेक्षायामाह, व्यवायीति । —नागवल्लीकुमारिकाधुस्तूरादिव्यवायिगुणवद्भेषजसयुक्त इत्यर्थ । व्यवायिलक्षण शार्ङ्गधरे यथा,—"पूर्वं व्याप्याखिल काय तत पाकञ्च गच्छति । व्यवायि तद्यथा भङ्गा फेनञ्चाहिसमुद्भवम् ॥" इति । द्रव्ये स्वर्णादिरूपेण परिणि-णमयिषौ लोहे ॥ ८९ ॥

वेधभेदानाह, लेप इति ।—स्पष्टम् ॥ ९० ॥

तेषु लेप-वेधलक्षणमाह, लेपनमिति ।—लेपन वेधसामर्थ्योपादककियाविशेष-

अथ क्षेप वेधलक्षणम् ।—

प्रक्षेपण द्रुते लोहे वेधः स्यात् क्षेपसंज्ञितः ॥ ९२ ॥

अथ कुन्त वेधलक्षणम ।—

सन्दंशधृतसूतेन द्रुतद्रव्याहृतिश्च या ।
सुवर्णत्वादिकरणं कुन्तवेधः स उच्यते ॥ ९३ ॥

अथ धूम-वेधलक्षणम् ।—

वह्नौ धूमायमानेऽन्तः-प्रक्षिप्त-रस-धूमतः ।
स्वर्णाद्यापादन लोहे धूमवेध. स ईरितः ॥ ९४ ॥

अथ शब्द-वेधलक्षणम् ।—

मुखस्थितरसेनाल्प-लोहस्य धमनात् खलु ।
स्वर्णरूप्यत्वजनन शब्दवेध. स कीर्त्तितः ॥ ९५ ॥

सिद्धरसेनेत्याशय । अत्र लेपवेधे । सौरक पुट, दद्यादिति शेष, सूर्य्यपाकं कुर्य्यादित्यर्थ ॥ ९१ ॥

क्षेप वेधलक्षणमाह, प्रक्षेपणमिति ।—गलित स्वर्णेतरलौहे रसप्रक्षेपेण यत् सुवर्णीकरण, स क्षेपाख्यवेधो ज्ञेय ॥ ९२ ॥

कुन्त वेधमाह, सन्दशेति ।—सन्दश "सॉडाशी" इति ख्यात, सन्दशयन्त्रेण मूर्त्तिबद्धसूत धृत्वा द्रुतलौहे निमज्जनेन तत्सम्पर्कात स्वर्णादिरूपेण परिणतस्य लौहस्य यदाहरण स कुन्त-वेधसञ्ज्ञको ज्ञेय ॥ ९३ ॥

धूम-वेधमाह, वह्नाविति ।—सधूमवह्निमध्ये वेधसमर्थरसनिक्षेपेण यो धूम निर्गच्छति तत्सम्पर्कात् यत्किञ्चिल्लौहस्य स्वर्णादिरूपेण य' परिणाति स धूमवेध ॥९४॥

शब्द-वेधमाह, मुखेति ।—धमनात शब्दोच्चारणादित्यर्थ फूत्कारादित्यर्थो वा । "धम ध्माने" इत्यस्मात ल्युट । मुखमध्ये वेधसमर्थरसगुटिका संस्थाप्य परो लौहखण्डमेक धृत्वा शब्दोच्चारणे कृते फुत्कारे दत्ते वा तत लौहखण्ड स्वर्णादिरूपेण परिणमेत् । "धमनात्" इत्यत्र "दमनात्" इति पाठे—मुखमध्ये वेधसमर्थरसगुटिका संस्थाप्य क्षुद्रलौहखण्ड तन्निम्ने निधाय च पीडने कृते अध.स्थलौहखण्ड यत्र वेधे स्वर्णादिरूपेण परिणमेत् स शब्दवेध. इत्यर्थ. ॥ ९५ ॥

अथ उद्घाटनलक्षणम् ।—

सिद्धद्रव्यस्य सूतेन कालुष्यादिनिवारणम् ।
प्रकाशनञ्च वर्णस्य तदुद्घाटनमीरितम् ॥ ९६ ॥

अथ स्वेदनलक्षणम् ।—

क्षाराम्लैरौषधैः सार्द्धं भाण्डं रुद्ध्वातियत्नतः ।
भूमौ निखन्यते यत्नात् स्वेदनं सम्प्रकीर्त्तितम् ॥ ९७ ॥

अथ सन्न्यासलक्षणम् ।—

रसस्यौषधयुक्तस्य भाण्डरुद्धस्य यत्नतः ।
मन्दाग्नियुतचुल्ल्यन्तः क्षेपः सन्न्यास उच्यते ॥ ९८ ॥

अथ रसस्य स्वेदसन्न्यासयोः गुणः ।—

द्वावेतौ स्वेदसन्न्यासौ रसराजस्य निश्चितम् ।
गुणप्रभावजनकौ शीघ्रव्याप्तिकरौ तथा ॥ ९९ ॥

उद्घाटनमाह सिद्धद्रव्यस्येति ।—सिद्धद्रव्यस्य मृतलौहादेरित्यर्थः, सूतेन क्रियाविशेषनिष्पन्नसूतसंयोगेन, यत् कालुष्यादिनिवारणं मालिन्यादिप्रोञ्छनं, वर्णस्य च प्रकाशनम् औज्ज्वल्यसम्पादनम्, यद्वा—सूतेन सूतसंयोगेन सिद्धद्रव्यस्य मारितलौहादेः कालुष्यादिनिवारणं यया क्रियया द्रव्यान्तरसंयोगजनितमालिन्यादिनाशनं स्यादित्येव योजनीयम् । "सिद्धद्रव्यस्य सूतेन" इत्यत्र "सिद्धद्रव्येण सूतस्य" इति पाठे—मृतलौहादिसंयोगद्वारा सूतस्य यत् कालुष्यादिनिवारणमित्यर्थः ॥ ९६ ॥

स्वेदनमाह, क्षाराम्लैरिति ।—औषधैः स्वेदनीयौषधैः । भाण्डं रसपूर्णभाण्डमित्यर्थः । अत्र उष्णवीर्य्यैः क्षाराम्लैः सह भूम्यधःस्थापनेन तदुष्मणा अनग्निस्वेदो बोध्यः ॥ ९७ ॥

सन्न्यासमाह, रसस्येति ।—औषधयुक्तस्य क्षाराम्लौषधयुक्तस्येत्यर्थः । मन्दाग्नियुतचुल्ल्यन्तः मृद्वग्निविशिष्टचुल्लीमध्ये, न तु तीव्राग्नियुतचुल्ल्यामित्यर्थः ॥ ९८ ॥

स्वेदनसन्न्यासयोः फलमाह, द्वाविति ।—शीघ्रव्याप्तिकरौ सेवनानन्तरमेव सर्वदेहविसरणशीलौ, व्याध्यग्निगुणजनकावित्यर्थः, यद्वा—रसस्य योगवाहित्वात् संसर्गितद्रव्येषु त्वरितमात्मगुणसञ्चारणशीलौ ॥ ९९ ॥

अथ परिभाषाज्ञानस्य फलम्।—

रसनिगममहाब्धेः सोमदेवः समन्तात्
स्फुटतरपरिभाषा-नामरत्नानि हृत्वा।
व्यरचयदतियत्नात्तैरिमां कण्ठमालां
कलयतु भिषगग्र्यो मण्डनार्थं सभायाम्॥ १०० ॥
भवेत् पठितवारोऽयमध्यायो रसवादिनाम्।
रसकर्माणि कुर्वाणो न स मुह्यति कुत्रचित्॥ १०१ ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
रसपरिभाषाकथनं नामाष्टमोऽध्याय॥ ८ ॥

अथ नवमोऽध्यायः।

अथ यन्त्राणि।—

अथ प्रस्तुताध्यायस्य वक्तव्यनिर्देशः।—

अथ यन्त्राणि वक्ष्यन्ते रसतन्त्राण्यशेषतः।
समालोक्य समासेन सोमदेवेन साम्प्रतम्॥
स्वेदादिकर्म निर्मातुं—" ॥ १ ॥

उपसंहरति द्वाभ्यां रसेत्यादिभ्याम्।—हृत्वा आहृत्य। इमाम् उक्तरूपाम्। कलयतु गृह्णातु, धारयतु इत्यर्थ, कण्ठे इति शेष, कण्ठस्थां करोतु अभ्यस्यतु इत्याशय। भिषगग्र्य भिषक्श्रेष्ठ। भवेदिति।—सुगमम्॥ १००।१०१ ॥

इति रसरत्नसमुच्चयबोधिन्याम् अष्टमोऽध्याय॥ ८ ॥

पूर्वाध्याये परिभाषा निरूप्य इदानीं रसादिकर्मणां यन्त्रपुटनाद्यायत्तसिद्धित्वात् यन्त्रविधिज्ञानं विना च पुटनाद्यसिद्धेः आदौ यन्त्राण्येव विवरीतुं नवमाध्यायमारभते। तत्र प्रथमं तावदेतदध्यायस्य अभिधेयं निर्दिशति, अथेति।—अथ रसपरिभाषाकथनानन्तरम्। यन्त्राणि वक्ष्यमाणदोलादीनि। स्वेदादीत्यत्र आदिपदेन मर्दन-मूर्च्छनाद्यूनविंशतिविधरसकर्मणां ग्रहणम्॥ १ ॥

अथ यन्त्रशब्दस्य निरुक्तिः ।—

"—वार्त्तिकेन्द्रैः प्रयत्नतः ।
यन्त्र्यते पारदो यस्मात्तस्माद्यन्त्रमिति स्मृतम् ॥ २ ॥

अथ दोलायन्त्रम् ।—

द्रवद्रव्येण भाण्डस्य पूरितार्द्धोदरस्य च ।
मुखस्योभयतो द्वार-द्वयं कृत्वा प्रयत्नतः ॥ ३ ॥
तयोस्तु निक्षिपेद्दण्डं तन्मध्ये रसपोट्टलीम् ।
बद्ध्वा तु स्वेदयेदेतद्दोलायन्त्रमिति स्मृतम् ॥ ४ ॥

अथ स्वेदनीयन्त्रम् ।—

साम्बुस्थालीमुखे बद्ध-वस्त्रे पाक्यं निवेशयेत् ।
पिधाय पच्यते यत्र स्वेदनी-यन्त्रमुच्यते ॥ ५ ॥

अथ पातनायन्त्रलक्षणम् ।—

अष्टाङ्गुलपरीणाहमानाह्वेन दशाङ्गुलम् ।
चतुरङ्गुलकोत्सेधं तोयाधारं गलादधः ॥ ६ ॥

यन्त्रस्य निरुक्तिमाह, वार्त्तिकेन्द्रैरिति ।—वार्त्तिकेन्द्रैः वार्त्तिकशास्त्रविशारदैः, वार्त्तिकलक्षणञ्च प्रकटितं प्रागेव। यन्त्र्यते नियम्यते बध्यते इत्यर्थः, रक्ष्यते वा, अनेनोपायेनेति शेषः । "यत्रि सङ्कोचने" इत्यस्य कर्मणि रूपसिद्धिः ॥ २ ॥

दोलायन्त्रमाह, द्रवद्रव्येणेति ।—द्रवद्रव्येण काञ्जिकादिस्वेदनद्रव्येण। मुखस्येति ।—भाण्डकन्धराया प्रान्तद्वये छिद्रद्वयं कृत्वेत्यर्थः । तयोः छिद्रयोः । तन्मध्ये दण्डमध्ये। स्वेदनार्हेण काञ्जिकादिना केनचित् द्रवेण भाण्डार्द्धमापूर्य्य भाण्डकन्धराप्रान्तद्वये छिद्रद्वयं कृत्वा तन्मध्ये दण्डमेकं निधाय तस्मिन् रसपोट्टलीं बद्ध्वा च एवं लम्बयेत यथा भाण्डस्थद्रवे सा निमज्जेत, परन्तु भाण्डं न स्पृशेदिति निष्कर्षः ॥३।४॥

स्वेदनीयन्त्रमाह, साम्बुस्थालीति ।—पाक्यं स्वेद्यम्। अत्राम्बुशब्दो द्रवमात्रोपलक्षणः तेन यथास्वदोषनाशकद्रवपूर्णस्थालीमुखं वस्त्रेणावेष्ट्य तत्र स्वेद्यं निधाय शरावेणाच्छाद्य च स्थाल्यधो ज्वालां दद्यादिति॥ ५ ॥

पातनायन्त्रस्य स्वरूपमाह, अष्टाङ्गुलेति ।—परीणाहः विस्तारः, परिधिरिति

अधोभाण्डं मुखं तस्य भाण्डस्योपरिवर्त्तिनः ।
षोडशाङ्गुलविस्तीर्ण-पृष्ठस्याऽऽस्ये प्रवेशयेत् ॥ ७ ॥
पार्श्वयोर्महिषीक्षीर-चूर्णमण्डूरफाणितैः ।
लिप्त्वा विशोषयेत् सन्धिं जलाधारे जलं क्षिपेत् ॥
चुल्ल्यामारोपयेदेतत् पातनायन्त्रमीरितम् ॥ ८ ॥

अथ अधःपातनप्रकारः ।—

अथोर्द्ध्वभाजने लिप्तस्थापितस्य जले सुधीः ।
दीप्तैर्वनोत्पलैः कुर्य्यादधःपातं प्रयत्नतः ॥ ९ ॥

अथ दीपिकायन्त्रम् ।—

कच्छपयन्त्रान्तर्गत-मृन्मयपीठस्थ-दीपिकास्थः ।
यस्मिन्निपतति सूतः प्रोक्तं तद्दीपिकायन्त्रम् ॥ १० ॥

यावत् । आनाहः औन्नत्यं, दैर्घ्यमिति यावत् । उत्सेधः उपचितिः, स्थौल्यमिति यावत् । फाणितम् अर्द्धावर्त्तितेक्षुरसविकृतिगुडविशेषः, तल्लक्षणं यथा भावप्रकाशे—"इक्षो रसस्तु यः पक्वः किञ्चिद्गाढो बहुद्रवः । स एवेक्षुविकारेषु ख्यातः फाणितसंज्ञया ॥" इति । अत्रैवमन्वयः कार्य्यः,—अष्टाङ्गुलपरीणाहमानाहेन दशाङ्गुलं चतुरङ्गुलकोत्सेधं तोयाधारमधोभाण्डं कुर्य्यादिति शेषः । तस्य तोयाधारस्य अधोभाण्डस्य मुखं षोडशाङ्गुलविस्तीर्णपृष्ठस्य उपरिवर्त्तिनः भाण्डस्य आस्ये गलादधःपर्य्यन्तं प्रवेशयेदिति । एतेन षोडशाङ्गुलविस्तीर्णपृष्ठमपरमेकं भाण्डं कर्त्तव्यं, तच्च उपरिदेशे स्थाप्यमिति प्रतीयते । अष्टाङ्गुलपरिधिविशिष्टं दशाङ्गुलदीर्घं चतुरङ्गुलस्थूलञ्च जलाधारमेकं निर्माय अधः स्थापयित्वा तत्र जलं निक्षिपेत्, ततः षोडशाङ्गुलविस्तृतपृष्ठदेशम् औषधलिप्तोदरम् अधोमुखं भाण्डमेकं पूर्वोक्तभाण्डस्य मुखे कण्ठदेशादधःपर्य्यन्तं प्रवेश्य महिषीक्षीरादिभिः सन्धिं लिप्त्वा विशोष्य च चुल्ल्यां स्थापयेत् इति यन्त्रविधिः । अत्र पातनायन्त्रशब्देन अधःपातनं लक्षितमिति बोध्यम् ॥ ६—८ ॥

अध पातनायन्त्रे पातनक्रममाह, अथेति ।—अथ उक्तरीत्या यन्त्रनिर्माणानन्तरम्, ऊर्द्ध्वभाजने उपरिस्थाधोमुखभाण्डोदरे इत्यर्थः आदौ लिप्तं पश्चात् स्थापितं तस्य लिप्तस्थापितस्य रसस्येति शेषः, जले, अधोभाण्डस्थिते इति शेषः, दीप्तैः वनोत्पलैः वन्यकरीषाग्निभिः ॥ ९ ॥

दीपिकायन्त्रमाह, कच्छपेति ।—वक्ष्यमाणकच्छपयन्त्रमध्यवर्त्तिमृन्मयघटखर्पर-

अथ डेकीयन्त्रम् ।—

भाण्डकण्ठादधश्छिद्रे वेणुनालं विनिक्षिपेत् ।
कांस्यपात्रद्वयं कृत्वा सम्पुटं जलगर्भितम् ॥ ११ ॥
नलिकाऽऽस्यं तत्र योज्यं दृढं तच्चापि कारयेत् ।
युक्तद्रव्यैर्विनिक्षिप्तः पूर्वं तत्र घटे रसः ॥ १२ ॥
अग्निना तापितो नालात्तोये तस्मिन् पतत्यधः ।
यावदुष्णं भवेत् सर्वं भाजनं तावदेव हि ॥
जायते रससन्धानं डेकीयन्त्रमितीरितम् ॥ १३ ॥

अथ जारणायन्त्रम् ।—

लोहमूषाद्वयं कृत्वा द्वादशाङ्गुलमानतः ।
ईषच्छिद्रान्वितामेकां तत्र गन्धकसंयुताम् ॥ १४ ॥
मूषायां रसयुक्तायामन्यस्यां तां प्रवेशयेत् ।
तोयं स्यात् सूतकस्याधः ऊर्ध्वाधो वह्निदीपनम् ॥ १५ ॥

कूप-पीठोपरि प्रदीपमेकं संस्थाप्य तत्र सूतं स्थापयेत्, कच्छपयन्त्राध वह्निञ्च दद्यात्, एवं प्रदीपस्थसूतं कच्छपयन्त्रे पतति तत् दीपिकाख्यं यन्त्रं ज्ञेयम् ॥ १० ॥

डेकीयन्त्रमाह, भाण्डकण्ठादिति ।—भाण्डस्य कण्ठनिम्ने छिद्रमेकं विधाय तत्र वंशनिर्मितं नलमेकं संयोज्य स्थापयेत् । अन्यच्च जलपूर्णकांस्यपात्रद्वयेन सम्पुटमेकं कृत्वा भाण्डकण्ठस्थ-नलाग्रं तत्र प्रवेश्य दृढं सन्धिरोधं कुर्य्यात् । ततो भाण्डमध्ये निर्दिष्टद्रव्यैः सह रसं क्षिप्त्वा अग्निज्वाला देया, तेन नालच्छिद्रानुसारी रसः कांस्य-पात्रमध्यस्थजले पतति । एवं यावत् सर्वं पात्रम् उष्णं भवेत् तावत् कुर्य्यात् । रससन्धानं रसनिर्गमनम् इत्यर्थः ॥ ११—१३ ॥

जारणायन्त्रमाह, लोहेत्यादि द्वाभ्याम् ।—वितस्तिमानं लौहमयमूषाद्वयं निर्माय तयोरीषच्छिद्रान्वितायाम् एकस्यां मूषायां गन्धकं संस्थापयेत्, ततः रसगर्भाया-मन्यस्यां मूषायां पूर्वोक्तां सगन्धकमूषां प्रवेश्य सूतगर्भमूषाधो जलं स्थापयित्वा ऊर्ध्वं ऊर्ध्वञ्च वह्निं प्रज्वालयेदिति ॥ १४।१५ ॥

अथ जारणायन्त्रस्य प्रकारान्तरम् ।—

रसोनक-रस भद्रे ! यत्नतो वस्त्रगालितम् ।
दापयेत् प्रचुरं यत्नादाप्लाव्य रसगन्धकौ ॥ १६ ॥
स्थालिकाया पिधायोर्द्ध्वं स्थालीमन्या दृढा कुरु ।
सन्धिं विलेपयेत् यत्नात् मृदा वस्त्रेण चैव हि ॥ १७ ॥
स्थाल्यन्तरे कपोताख्यं पुट कर्षाग्निना सदा ।
यन्त्रस्याध. करीषाग्नि दद्यात्तीव्राग्निमेव वा ॥ १८ ॥
एवं तु त्रिदिनं कुर्य्यात्ततो यन्त्र विमोचयेत् ।
तप्तोदके तप्तचुल्ल्यां न कुर्य्याच्छीतलक्रियाम् ॥ १९ ॥
न तत्र चीयते सूतो न च गच्छति कुत्रचित् ।
अनेन च क्रमेणैव कुर्य्याद्गन्धकजारणम् ॥ २० ॥

अथ कच्छपयन्त्रम् ।—

जलपूर्णपात्रमध्ये दत्त्वा घटखर्पर सुविस्तीर्णम् ।
तदुपरि विडमध्यगत: स्थाप्य. सूत क्षत. कोष्ठ्याम् ॥ २१ ॥

अन्यविध जारणायन्त्रमाह, रसोनक रसमिति ।—"रसोनकरसम" इत्यत्र "रसोनकवसाम्" इति पाठे—रसोनस्य मण्ड मज्जा वा, वसावत् प्रतीयमानत्वात् तथात्वेन निर्देशो बोध्य । भद्रे इति पार्वत्या सम्बोधनम् । कपोताख्य पुट कपोतपुट, तल्लक्षण यथा भावप्रकाशे—"यत पुट दीयते खाते अष्टसङ्ख्यैर्वनोपलै । कपोतपुटमेतत्तु कथित पुटपण्डितै ॥" इति । कर्षाग्निना करीषाग्निनेत्यर्थ, विभीतककाष्ठाङ्गारैरित्यर्थो वा । अय विधि,—स्थालीमध्ये रसगन्धकौ सस्थाप्य वस्त्रपूतेन प्रचुररसोनद्रवेण आप्लावयेत, तत स्वल्पगर्त्तावेण रसगन्धकौ तौ पिधाय स्थाल्युपरि अन्या दृढा स्थाली सस्थाप्य मृद्वस्त्रेण सन्धि लिप्त्वा च ऊर्द्ध्वस्थालीमध्ये कपोतपुटो देय, यन्त्राधोऽपि करीषाग्नि तीव्राग्नि वा दद्यात, एव त्रिदिन निरन्तर, त्र्यहवसरादूर्द्ध्व सन्तप्तचुल्ल्युपरि उष्णोदकमध्ये यन्त्र सस्थाप्य मोचयेत शीतक्रियाञ्च तदा न कुर्य्यात । अनेनैव विधानेन गन्धकमपि जारयेत इति ॥ १६—२० ॥

कच्छपयन्त्रमाह, जलपूर्णेति ।—घटखर्परं घटकपाल "खाप्रा" इति भाषा ।

लघुलोहकटोरिकया कृतषण्मृत्सन्धिलेपयाऽऽच्छाद्य ।
पूर्वोक्तघटखर्परमध्येऽङ्गारैः खदिर-कोलभवैः ॥ २२ ॥
स्वेदनतो मर्दनतः कच्छपयन्त्रस्थितो रसो जरति ।
अग्निबलेनैव ततो गर्भे द्रवन्ति सर्वसत्त्वानि ॥ २३ ॥

अथ विद्याधरयन्त्रम् ।—

यन्त्रं विद्याधरं ज्ञेयं स्थालीद्वितयसम्पुटात् ।
चुल्लीं चतुर्मुखीं कृत्वा यन्त्रभाण्डं निवेशयेत् ॥ २४ ॥
तत्रौषधं विनिक्षिप्य निरुन्ध्याद्भाण्डकाननम् ।
कोष्ठीयन्त्रमिदं नाम्ना तन्त्रज्ञैः परिकीर्त्तितम् ॥ २५ ॥

अथ सोमानलयन्त्रम् ।—

ऊर्द्ध्वं वह्निरधश्चाऽऽपो मध्ये तु रससङ्ग्रहः ।
सोमानलमिदं प्रोक्तं जारयेद्गगनादिकम् ॥ २६ ॥

कोष्ठ्या कटोरिकाया मूषाया वा इत्यर्थः । कृतेति ।—कृताः षड्भिः मृद्भिः "वल्मीकमृत्तिका धूमः गैरिकञ्चेष्टका पटु । इत्येता मृत्तिकाः पञ्च इत्युक्तप्रकाराः पञ्च मृदः तथा सामान्या मृच्च इत्येताभिः षण्मृद्भिः, यद्वा—कृतः षट् षड्वारं मृदा सन्धिलेपः यस्याः तथाभूतया, लघुलोहकटोरिकया इत्यनेन सम्बन्धः । सजलपात्रमध्ये दृढतमं खर्परखण्डमेकं संस्थाप्य तदुपरि कटोरिका मूषां वा एकां स्थापयित्वा तत्र विडमध्यगतं रसं रचयेत्, पश्चात् स्वल्पलोहकटोरिकया रसं समावृत्य षड्भिर्मृद्भिः मृदा षड्वारं वा सन्धिलेपं कृत्वा च प्रागुक्तखर्परं खादिरकौलयोरन्यतराङ्गारैरापूर्य्य स्वेदयेत् मर्दयेच्च तेन रसो जीर्य्यति । अस्मिन्नेव यन्त्रे अग्निबलेनैव अन्यान्यपि सत्त्वानि गर्भे द्रवन्ति ॥ २१—२३ ॥

विद्याधरयन्त्रमाह, यन्त्रमिति ।—स्थालीद्वितयसम्पुटात् हण्डिकाद्वयकृतपुटविशेषात् । तदेव विवृणोति, चुल्लीमिति ।—अधोभाण्डे औषधं निक्षिप्य भाण्डान्तरेण मुखं पिधाय चुल्ल्यां चतुर्मुख्यां संस्थाप्य च ज्वाला देया । कोष्ठीयन्त्रमिति नामान्तरमस्य । ग्रन्थान्तरे तु विद्याधरयन्त्रलक्षणमन्यविधं, तत्तु अग्रे स्वयमेव वक्ष्यति ॥ २४।२५ ॥

सोमानलयन्त्रमाह, ऊर्द्ध्वमिति ।—गगनादिकम् अभ्रादिकम् । स्थालीमध्ये

अथ गर्भयन्त्रम् ।—

गर्भयन्त्रं प्रवक्ष्यामि पिष्टिका-भस्मकारकम् ।
चतुरङ्गुलदीर्घान्तु त्र्यङ्गुलोन्मितविस्तराम् ॥ २७ ॥
मृन्मयीं सुदृढां मूषां वर्त्तुलं कारयेन्मुखम् ।
लोणस्य विंशतिर्भागा भाग एकस्तु गुग्गुलो ॥ २८ ॥
सुश्लक्ष्णं पेषयित्वा तु वारं वारं पुनः पुनः ।
मूषालेपं दृढं कृत्वा लवणाद्दन्मृदम्बुभिः ॥ २९ ॥
कर्षतुषाग्निना भूमौ स्वेदयेन्मृदु मानवित् ।
अहोरात्रं त्रिरात्रं वा रसेन्द्रो भस्मतां व्रजेत् ॥ ३० ॥

अथ हंसपाकयन्त्रम् ।—

खर्परं सिकतापूर्णं कृत्वा तस्योपरि न्यसेत् ।
अपरं खर्परं तत्र शनैर्मृद्वग्निना पचेत् ॥ ३१ ॥
पञ्चक्षारैस्तथा मूत्रैर्लवणञ्च विडं ततः ।
हंसपाकं समाख्यातं यन्त्रं तद्वार्त्तिकोत्तमैः ॥ ३२ ॥

रसमूषा संस्थाप्य शरावेण मुखं पिधाय मृद्वस्त्रेण सन्धिं लिप्त्वा च जलपूर्णस्थाल्यन्तरोपरि स्थाली तां स्थापयेत् शरावोपरि करीषाग्निञ्च दद्यादिति ॥ २६ ॥

गर्भयन्त्रमाह गर्भयन्त्रमिति ।—पिष्टिका नष्टपिष्टीकृत रस इत्यर्थः । विस्तरामिति छान्दसं, विस्तारामित्यर्थः । लोणस्य लवणस्य, "लोणस्य" इत्यत्र "लोहस्य" इति पाठान्तरं न युक्तं, "लवणाद्दन्मृदम्बुभिः" इति वक्ष्यमाणवाक्यविरोधात् । अत्र वारं वारमिति पदं पेषयित्वा, तथा पुनः पुनरिति पदं मूषालेपमित्यनेन योजनीयम् । लवणाद्दन्मृदम्बुभिरिति सहार्थे तृतीया, तेन लवणाद्दन्मृदम्बुभिः सह लोणगुग्गुलू पेषयित्वा इति तथा विंशतिभागलवणापेक्षया मृदोऽल्पत्वमिति च बोध्यम् । कर्षेत आतपे शोषयेत ॥ २७—३० ॥

हंसपाकयन्त्रमाह, खर्परमिति ।—सिकतापूर्णं वालुकापूर्णम् । पञ्चक्षारैः "यवमुष्ककमञ्जाना पलाशतिलयोस्तथा । क्षारैस्तु पञ्चभिः प्रोक्तः पञ्चक्षाराभिधो गणः ॥" इत्युक्तप्रकारैः । अत्र क्षारमाहचर्यात् मूत्रस्यापि पञ्चत्वं बोध्यम्, तानि च "गवामजानां मेषीणां महिषीणाञ्च मिश्रितम् । मूत्रेण गर्दभीनां यत्तन्मूत्रं मूत्रपञ्च-

अथ वालुकायन्त्रम्।—

सरसा गूढवक्त्रा मृद्वस्त्राङ्गुलघनावृताम्।
शोषिता काचकलसीं त्रिषु भागेषु पूरयेत्॥ ३३॥
भाण्डे वितस्तिगम्भीरे वालुका सुप्रतिष्ठिता।
तद्भाण्डं पूरयेत्त्रिभिरन्याभिरवगुण्ठयेत्॥ ३४॥
भाण्डवक्त्रं मणिकया सन्धिं लिम्पेन्मृदा पचेत्।
तुल्यया तृणस्य चाऽऽदाहान्मणिकापृष्ठवर्त्तिनः॥
एतद्धि वालुकायन्त्रं तद्यन्त्रं लवणाश्रयम्॥ ३५॥

अथ वालुकायन्त्रस्य प्रकारान्तरम्।—

पञ्चाढ-वालुकापूर्ण-भाण्डे निक्षिप्य यत्नतः।
पच्यते रसगोलाद्यं वालुकायन्त्रमीरितम्॥ ३६॥

कम॥" इति। लवणानि चात्र षट् बोध्यानि रसेन्द्रचिन्तामणिसंवादात्, तत्तु प्रागेव विवृतम्, पञ्चक्षारैस्तथा पञ्चमूत्रैः सह लवणानि संयोज्य विडं पचेदिति योज्यम्। यन्त्रमेतत् विडपाकार्थं ज्ञेयम्॥ ३१।३२॥

वालुकायन्त्रमाह, सरसामिति।—सरसां पारदगर्भाम्। गूढवक्त्रां सङ्कीर्णमुखीम्। मृदिति।—मृद्वस्त्रेण मृल्लिप्तवस्त्रेण अङ्गुलघनम् अङ्गुलमानोत्सेधं यथा तथा आवृताम्। त्रिषु भागेषु पूरयेत् पाच्यरसादिना काचकलस्या भागत्रयं पूरयेदित्यर्थः। त्रिषु भागेष्विति अवच्छेदे सप्तमी। भाण्डे इत्यत्र काचकलसीं स्थापयेदिति शेषः। वालुकाभिः कियान् भागः पूरयितव्यः इत्यपेक्षायामाह,—तद्भाण्डमिति। त्रिभिरित्यत्र भागैरिति शेषः। तृतीया चात्र अभेदे, भाण्डस्य भागत्रयमित्यर्थः, पूरयेत्, वालुकयेति शेषः। अन्याभिः वालुकाभिरित्यर्थः, अवशिष्टांशं पूरयेदिति शेषः। अवगुण्ठयेदित्यस्य मणिकया इत्यनेन सम्बन्धः, मणिकया शरावेण। अयमर्थः,—सङ्कीर्णमुखीं काचकूपिकां मृद्वस्त्रेणाङ्गुलोत्सेधमालिप्य शोषयित्वा च तस्याः भागत्रयं रसेनापूरयेत्, ततो वितस्तिप्रमाणगभीरे वालुकया त्रिभागपूर्णे भाण्डमध्ये तां निवेश्य ऊर्द्धं वालुकया आच्छादयेत्, ततश्च शरावेण भाण्डवक्त्रं पिधाय मृत्तिकया सन्धिं लिप्त्वा च तावत् पचेत् यावत् शरावोपरि न्यस्तं तृणं न दहेदिति। तुल्यलक्षणत्वात् वालुकायन्त्रप्रसङ्गे लवणयन्त्रमप्यतिदिशति, तदिति।—तत् उक्तप्रकारं यन्त्रं, लवणाश्रयम्, अपि भवतीति शेषः, लवणयन्त्रमपि वालुकायन्त्रवत् भवतीत्यर्थः॥ ३३—३५॥

अथ लवणयन्त्रम् ।—

एवं लवणनिक्षेपात् प्रोक्तं लवणयन्त्रकम् ॥ ३७ ॥

अथ लवणयन्त्रस्य प्रकारान्तरम् ।—

अन्तःकृतरसालेप-ताम्रपात्रमुखस्य च ।
लिप्ता मृल्लवणेनैव सन्धिं भाण्डतलस्य च ॥ ३८ ॥
तद्भाण्डपटुनाऽऽपूर्य्य क्षारैर्वा पूर्ववत् पचेत् ।
एव लवणयन्त्रं स्याद्रसकर्मणि शस्यते ॥ ३९ ॥

अथ नालिकायन्त्रम् ।—

लोहनालगतं सूतं भाण्डे लवणपूरिते ।
निरुद्धं विपचेत् प्राग्वन्नालिकायन्त्रमीरितम् ॥४०॥

अथ भूधरयन्त्रम ।—

बालुकागूढसर्वाङ्गां गर्त्ते मूषां रसान्विताम् ।
दीप्तोत्पलैः सन्तुणुयात् यन्त्रं तद्भूधराह्वयम् ॥ ४१ ॥

अन्यविधं बालुकायन्त्रमाह पचेति ।—चत्वारिंशच्छरावमितबालुकापूर्णभाण्डे इत्यर्थः । अत्र बालुकामध्ये एव रसगोलादिकं स्थापयेत्, न तु काच-कूप्यामिति विशेषः ॥ ३६ ॥

बालुकायन्त्रे "तदयन्त्रं लवणाश्रयम" इत्युक्तम्, अतस्तदेव लवणयन्त्रमाह, एव-मिति ।—एवं बालुकायन्त्रवत् । भाण्डमध्ये बालुकास्थाने लवणनिक्षेपात् लवणयन्त्रं ज्ञेयम्, अन्यत सर्वं तुल्यमिति ॥ ३७ ॥

लवणयन्त्रस्य प्रकारान्तरमाह, अन्तरिति ।—अन्तः ताम्रपात्रमध्ये इत्यर्थः, कृत रसेन आलेपः यत्र तथाभूतं यत ताम्रपात्रं तस्य मुखं तस्य रसलिप्तोदरताम्रपात्रमुखस्य, तथा भाण्डतलस्य ताम्रपात्रमुखोपरि स्थापितभाण्डाधोभागस्य । तद्भाण्डम उपरिस्थभाण्डम् । पूर्ववत तृणस्य चादाहात् इत्यर्थः । ताम्रपात्रोदरे रस निक्षिप्य तदुपरि लवणपूर्णं क्षारपूर्णं वा भाण्डमेकं विन्यसेत्, ततो मृल्लवणेन सन्धिं रुद्ध्वा पचेत् इति ॥ ३८।३९ ॥

नालिकायन्त्रमाह, लोहेति ।—लौहमयनालमध्ये पारदमापूर्य्य छिद्ररोधं कृत्वा च लवणपूरितभाण्डान्त नालं त निरुन्ध्यात्, ततो मणिकया भाण्डवक्त्रमाच्छाद्य आलिप्य च सन्धिं तावत् पचेत् यावत् शरावोपरिस्थं तृणं न दहेत् इति ॥ ४० ॥

अथ पुटयन्त्रम् ।—

शरावसम्पुटान्तःस्थं करीषेष्वग्निमानवित् ।
पचेच्चुल्ल्यां द्वियामं वा रस तत् पुटयन्त्रकम् ॥ ४२ ॥

अथ कोष्ठीयन्त्रम् ।

षोडशाङ्गुलविस्तीर्णं हस्तमात्राऽऽयतं समम् ।
धातुसत्त्वनिपातार्थं कोष्ठीयन्त्रमिति स्मृतम् ॥ ४३ ॥

अथ वलभीयन्त्रम् ।—

यत्र लोहमये पात्रे पार्श्वयोर्वलयद्वयम् ।
तादृक् स्वल्पतर पात्रं वलयप्रोतकोष्ठकम् ॥ ४४ ॥
पूर्वपात्रोपरि न्यस्य स्वल्पपात्रे परिक्षिपेत् ।
रस सम्मूर्च्छित स्थूल-पात्रमापूर्य्य काञ्जिके ॥४५॥

भूधरयन्त्रमाह, बालुकेति ।—गर्त्तस्थबालुकोपरि रसगर्भा मूषा संस्थाप्य बालुकया चाच्छाद्य उपरिदेशे करीषाग्नि दद्यादिति । ग्रन्थान्तरे तु यन्त्रमेतत अन्यथा पठित, तद्यथा अत्रिसंहितायां,—"यन्त्र डमरुवद्वाऽथ वाऽध पातनयन्त्रवत । भूगर्त्ते तत समाधाय चोर्द्धमाकीर्य्य वह्निना ॥ अध स्थाल्यां जल क्षिप्त्वा मृतक तत्र पातयेत । एतद्भूधरयन्त्र स्यात मृतसंस्कारकर्म्मणि ॥" इति ॥ ४१ ॥

पुटयन्त्रमाह, शरावेति ।—करीषेषु पचेत अथवा अग्निमानवित् द्वियाम चुल्ल्याम् अङ्गारेषु पचेदिति योज्यम ॥ ४२ ॥

कोष्ठीयन्त्रमाह, षोडशेति ।—अत्र सममिति पदेन मिलितभाण्डद्वयस्य षोडशाङ्गुलवादि बोध्यम , एवञ्च वितस्तिप्रमाणदीर्घस्य अष्टाङ्गुलविस्तीर्णस्य च अधोभाण्डस्य मुखोपरि तावन्मान भाण्डान्तरमधोमुख संस्थाप्य अधो दृढाङ्गारै भस्त्रया धमेत, तेन धातुसत्त्व निर्गच्छतीति । अत्रिसंहितायामेतच्छ्लोकानन्तरमस्यैवापरार्द्ध पठित तद्यथा,—"परिपूर्णं दृढाङ्गारैरधो वातेन कोष्ठके । भावयन् ज्वालमार्गेण ज्वालयेच्च हुताशनम् ॥" इति ॥ ४३ ॥

वलभीयन्त्रमाह, यत्रेति ।—वलयद्वय वलय "कडा" "आटा" इति ख्यातम । तादृक् लौहमयम । वलयेति ।—वलये बृहत्पात्रस्थवलये प्रोतम् आबद्ध कोष्ठ मध्यदेशो यस्य तादृशम् । अयमर्थः,—बृहदाकार कान्तलौहमय पात्रमेक निर्माय तस्यान्तर्गलादध पार्श्वद्वये वलयद्वयं संयोजनीयम् , क्षुद्राकारमपरमपि तथाविधं

द्वियामं स्वेदयेदेव रसोत्थापनहेतवे।
एतत् स्याद्दलभीयन्त्रं रसे षाड्गुण्यकारकम्॥
सूक्ष्मकान्तमये पात्रे रसः स्याद्गुणवत्तरः॥ ४६॥

अथ तिर्य्यक्पातनयन्त्रम्।—

क्षिपेद्रसं घटे दीर्घनताधोनालसंयुते।
तन्नालं निक्षिपेदन्य-घटकुक्ष्यन्तरे खलु॥ ४७॥
तत्र रुद्ध्वा मृदा सम्यग्वदने घटयोरथ।
अधस्ताद्रसकुम्भस्य ज्वालयेत्तीव्रपावकम्॥ ४८॥
इतरस्मिन् घटे तोयं प्रक्षिपेत् स्वादु शीतलम्।
तिर्य्यक्पातनमेतद्धि वार्त्तिकैरभिधीयते॥ ४९॥

अथ पालिकायन्त्रम्।—

चषकं वर्त्तुलं लौहं विनताग्रोर्द्ध्वदण्डकम्।
एतद्धि पालिकायन्त्रं बलिजारणहेतवे॥ ५०॥

पात्रमेकं कृत्वा बृहत्पात्रस्थे वलये अस्पृष्टतलभागं यथा तथा आबध्य तत्र मूर्च्छितरसं परिक्षिपेत्, काञ्जिकेन स्थूलपात्रञ्च पूरयेदिति। रसे षाड्गुण्यकारकं षाड्गुण्यं "विद्या वितर्कौ विज्ञानं स्मृतिस्तत्परता क्रिया" इत्युक्तं षड्गुणप्रद-शक्ति-जनकम्, एवंविधरसोपयोक्ता उक्तषाड्गुण्यसिद्धिं लभते इत्यर्थः॥ ४४—४६॥

तिर्य्यक्पातनयन्त्रमाह, क्षिपेदिति।—दीर्घनताधोनालसंयुते दीर्घाकारं नतं निम्नाभिमुखञ्च यत् अधोनालं तेन संयुते। अथ विधिः,—एकस्मिन् घटे रसं निधाय तस्य उदराधो दीर्घमधोलम्बितं नालमेकं संयोज्य द्वितीयघटोदरस्थच्छिद्रे नालाग्रं प्रवेश्य मृद्वस्त्रेण सन्धिमालिप्य च घटयोर्मुखमपि तथा लिम्पेत्, रसकुम्भाधश्च तीव्राग्निं प्रज्वालयेत्, द्वितीयघटे स्वादुशीतलं जलञ्च प्रक्षिपेत् इति॥ ४७—४९॥

पालिकायन्त्रमाह, चषकमिति।—विनतम् अग्रं यस्य तत् न्यञ्चीकृताग्रभागम्, ऊर्द्ध्वम् उच्चैः कृतः दण्डः यस्य तत् उन्नतदण्डं, विनताग्रञ्च तत् ऊर्द्ध्वदण्डञ्चेति विनताग्रोर्द्ध्वदण्डकं लौहं लोहमयं वर्त्तुलं गोलाकारं चषकं कटोरिका, कार्य्यमिति शेषः। चषकशब्दस्य मद्यपानपात्रार्थकत्वेऽपि पात्रमात्रार्थकत्वं प्रागेव प्रदर्शितम्। बलिजारणहेतवे गन्धकजारणार्थम्॥ ५०॥

अथ घटयन्त्रम् ।—

चतुष्प्रस्थ-जलाधारश्चतुरङ्गुलिकाऽऽननः ।
घटयन्त्रमिदं प्रोक्तं तदाप्यायनकं स्मृतम् ॥ ५१ ॥

अथ इष्टकायन्त्रम् ।—

विधाय वर्त्तुलं गर्त्तं मल्लमत्र निधाय च ।
विनिधायेष्टका तत्र मध्यगर्त्तवतीं शुभाम् ॥ ५२ ॥
गर्त्तस्य परितः कुर्य्यात् पालिकामङ्गुलोच्छ्रयाम् ।
गर्त्ते सूतं विनिक्षिप्य गर्त्तास्ये वसनं क्षिपेत् ॥ ५३ ॥
निक्षिपेत् गन्धकं तत्र मल्लेनाऽऽस्यं निरुध्य च ।
मल्ल-पालिकयोर्मध्ये मृदा सम्यङ्निरुध्य च ॥ ५४ ॥
वनोत्पलैः पुटं देयं कपोताख्यं न चाधिकम् ।
इष्टिकायन्त्रमेतत् स्याद्गन्धकं तेन जारयेत् ॥ ५५ ॥

अथ हिङ्गुलाकृष्टिविद्याधरयन्त्रम् ।—

स्थालिकोपरि विन्यस्य स्थालीं सम्यङ्निरुध्य च ।
ऊर्द्धस्थाल्यां जलं क्षिप्त्वा वह्निं प्रज्वालयेदधः ॥
एतद्विद्याधरं यन्त्रं हिङ्गुलाकृष्टिहेतवे ॥ ५६ ॥

घटयन्त्रमाह चतुरिति ।—षोडशशरावमितजलधारणसमर्थं चतुरङ्गुलविस्तृत-मुखविशिष्टश्च घटः घटयन्त्रमिति निष्कर्षः । आप्यायनकं रसादीनां तर्पणं, षाड्गुण्यसम्पादनमिति यावत् । "आप्यायनकम्" इत्यत्र "उत्थापनकम्" इति पाठे —रसोत्थापनसाधनमित्यर्थः ॥ ५१ ॥

इष्टकायन्त्रमाह, विधायेति ।—मल्लं शरावपात्रम् । पालिकाम् आलवालम् । गोलाकारं गर्त्तमेकं कृत्वा तत्र शरावं संस्थाप्य तदुपरि मध्यच्छिद्रामिष्टकामेकां विन्यसेत् इष्टकागर्त्तं परितः अङ्गुलिमितोन्नतम् आलवालमेकञ्च कुर्य्यात्, ततः इष्टकारन्ध्रे पारदं विनिक्षिप्य रन्ध्रमुखे वस्त्रं तदुपरि गन्धकञ्च विन्यस्य शरावान्तरेण रुद्ध्वा शरावालवालयोः सन्धिं मृदा सम्यगालिप्य च वन्यकरीषैः कपोताख्यपुटं दद्यादिति निष्कर्षः ॥ ५२—५५ ॥

हिङ्गुलाकृष्टिविद्याधरयन्त्रमाह, स्थालिकोपरीति ।—स्थालीमित्यत्र ऊर्द्धमुखी-

अथ डमरुयन्त्रम्।—

यन्त्रस्थाल्युपरि स्थालीं न्युब्जां दत्त्वा निरुन्धयेत्।
यन्त्रं डमरुकाख्यं तद्रसभस्मकृते हितम्॥ ५७॥

अथ नाभियन्त्रम्।—

मल्लमध्ये चरेद्गर्त्तं तत्र सूतं सगन्धकम्।
गर्त्तस्य परितः कुड्यं प्रकुर्य्यादङ्गुलोच्छ्रितम्॥ ५८॥
ततश्चाऽऽच्छादयेत् सम्यग्गोस्तनाकारमूषया।
सम्यक् तोयमृदा रुद्ध्वा सम्यगत्राच्यमानया॥ ५९॥

तत्र तोयमृल्लक्षणम्।—

लोहवल्कृतबब्बूल-क्वाथेन परिमर्दितम्।
जीर्णकिट्टरजः सूक्ष्मं गुडचूर्णसमन्वितम्॥
इयं हि जलमृत् प्रोक्ता दुर्भेद्या सलिलैः खलु॥६०॥

तत्र वह्निमृत्स्ना।—

खटिकापटुकिट्टैश्च महिषीदुग्धमर्दितैः।
वह्निमृत्स्ना भवेद्घोर-वह्नितापसहा खलु॥ ६१॥

मिति शेषो बोध्यः। अत्र हिङ्गुलाकृष्टिप्रकारस्य अनुक्तत्वात् ग्रन्थान्तरोक्तस्तत्प्रकारः प्रदर्श्यते, तद्यथा—जम्बीरादिरसशोधितहिङ्गुलम् अधःस्थाल्यां पर्णोपरि संस्थाप्य कण्ठनीचृष्टतलभागामुत्तानां स्थालीमपरां तदुपरि दत्त्वा मृद्वस्त्रादिभिः सन्धिमालिप्य च अधो ज्वाला देया ऊर्द्ध्वस्थाल्यां जलञ्च, उष्णे च तस्मिन् तत् निःक्षिप्य पुनर्देयम्, एवं विंशद्वारं कुर्य्यात्। ग्रन्थान्तरेऽस्य ऊर्द्ध्वपातनमिति नामान्तरम्। क्वचिदेतदनन्तरं "रसं सम्मूर्च्छितं स्थूलपात्रमापूर्य्य काञ्जिकैः। दिनयामं स्वेदयेदेवं रसौत्थापनहेतवे॥" इत्यधिकः पाठो विद्यते॥ ५६॥

डमरुयन्त्रमाह, यन्त्रेति।—न्युब्जाम् अधोमुखीम्। डमरुकाख्यं डमरुवीणयन्त्रविशेषं तदाख्यम्॥ ५७॥

नाभियन्त्रमाह, मल्लमध्ये इति।—कुड्यं भित्तिं, आलवालाकारमिति यावत्। अत्रोच्यमानया अत्र यन्त्रे उच्यमानया कथ्यमानया, तोयमृदा लोहवदित्यादिना वक्ष्यमाणया परिभाषिकमृदा इत्यर्थः। अत्र प्रथमं सम्यक् "आच्छादयेत्" द्वितीयं सम्यक्

एतया मृत्स्नया रुद्धो न गन्तुं क्षमते रसः ।
विदग्धवनिताप्रौढ-प्रेम्णा रुद्ध पुमानिव ॥ ६२ ॥
नन्दी नागार्जुनश्चैव ब्रह्मज्योतिर्मुनीश्वरः ।
वेत्ति श्रीसोमदेवश्च नापरः पृथिवीतले ॥ ६३ ॥

ततो जलं विनिक्षिप्य वह्निं प्रज्वालयेदधः ।
नाभियन्त्रमिदं प्रोक्तं नन्दिना सर्ववेदिना ॥
अनेन जीर्य्यते सूतो निर्धूमः शुद्धगन्धकः ॥ ६४ ॥

अथ ग्रस्तयन्त्रम् ।—

मूषा मूषोदराविष्टामाद्यन्तं समवर्त्तुलाम् ।
चिपिटाश्च तले प्रोक्तं ग्रस्तयन्त्रं मनीषिभिः ॥
सूतेन्द्ररन्धनार्थं हि रसविद्भिरुदीरितम् ॥ ६५ ॥

अथ स्थालीयन्त्रम् ।—

स्थाल्यां ताम्रादि निक्षिप्य मल्लेनाऽऽस्यं निरुध्य च ।
पच्यते स्थालिकाधस्तात् स्थालीयन्त्रमितीरितम् ॥ ६६ ॥

अथ धूपयन्त्रम् ।—

विधायाष्टाङ्गुलं पात्रं लौहमष्टाङ्गुलोच्छ्रयम् ।
कण्ठाधो द्व्यङ्गुले देशे गलाधारे हि तत्र च ॥ ६७ ॥
तिर्य्यग्लोहशलाकाश्च तन्वीस्तिर्य्यग्विनिक्षिपेत् ।
तनूनि स्वर्णपत्राणि तासामुपरि विन्यसेत् ॥६८॥

"रुद्धा" तृतीयं सम्यक् "उच्यमानया" सम्बध्यते। तोयमृत्प्रकारमाह,—लोहवदिति। लेपार्थमृत्तिकाप्रस्तुतप्रसङ्गक्रमेण वह्निमृत्प्रकारमाह,—खटिकेति। अथ विधिः,—पात्रमध्ये किञ्चित् गर्त्तं कृत्वा तत्र रसगन्धकौ निवेश्य गर्त्तस्य चतुर्दिक्षु अङ्गुलोच्छ्रायम् आलवालं कुर्य्यात् ततो गोस्तनाकृतिमूषया सालवालं सरसगन्धकं गर्त्तमाच्छाद्य तोयमृदा सन्धिं लिम्पेत्, ततस्तत्र जलं दत्त्वा यन्त्राधो वह्निं दापयेत् इति ॥५८—६४॥

ग्रस्तयन्त्रमाह मूषामिति।—सूतेन्द्ररन्धनार्थं रसपाकार्थम् ॥ ६५ ॥

स्थालीयन्त्रमाह, स्थाल्यामिति।—सुगमम् ॥ ६६ ॥

धूपयन्त्रमाह, विधायेति।—गलाधारे शलाकास्थापनार्थं गलदेशस्थपालिका॰

पत्नाधो निक्षिपेद्धूमं वक्ष्यमाणमिहैव हि।
तत् पात्रं न्युब्जपात्रेण छादयेदपरेण हि ॥ ६९ ॥
मृदा विलिप्य सन्धिञ्च वह्निं प्रज्वालयेदधः।
तेन पत्राणि कृत्स्नानि हतान्युक्तविधानतः ॥ ७० ॥
रसश्चरति वेगेन द्रुतं गर्भे द्रवन्ति च।
गन्धालकशिलाना हि कज्जल्या वा मृताहिना ॥ ७१ ॥
धूपनं स्वर्णपत्राणां प्रथमं परिकीर्त्तितम्।
तारार्थं तारपत्राणि मृतवङ्गेन धूपयेत् ॥ ७२ ॥
धूपयेच्च यथायोग्यैरन्यैरुपरसैरपि।
धूपयन्त्रमिदं प्रोक्तं जारणाद्रव्यसाधने ॥ ७३ ॥

अथ कन्दुकयन्त्रम्।—

स्थूलस्थाल्यां जलं क्षिप्त्वा वासो बद्ध्वा मुखे दृढम्।
तत्र स्वेद्यं विनिक्षिप्य तन्मुखं प्रपिधाय च ॥ ७४ ॥
अधस्ताज्ज्वालयेदग्निं तत् स्यात् कन्दुकयन्त्रकम्।
स्वेदनी-यन्त्रमित्यन्ये प्राहुश्चेदं मनीषिणः ॥ ७५ ॥

बटाधारविशेषे इत्यर्थ। अत्र प्रथमं तिर्य्यक् "लोहशलाका" इत्यनेन द्वितीयञ्च "विनिक्षिपेत" इत्यनेन सम्बध्यते। तिर्य्यक् वक्राकारा तन्वी सूक्ष्मा लोहशलाका तिर्य्यक् वक्रभावेन विनिक्षिपेत् इत्यन्वय। तेनेत्यादि।—उक्तविधिना हतानि कृत्स्नानि पत्राणि द्रुतं गर्भे द्रवन्ति ततश्च रस स स्वर्णपत्रद्रव वेगेन चरति स्वकार्य्यं साधयतीत्यर्थ। पत्राधो निक्षिपेद्धूममित्युक्तं, किन्तद्धूमामित्याह,—गन्धेति। प्रथमं श्रेष्ठम। दैर्घ्यविस्तारतोऽष्टाङ्गुलमानं लौहपात्रमेकं कारयित्वा तस्य कण्ठाधः अङ्गुलिद्वयपरिमितस्थाने गलाधारं सूक्ष्मतिर्य्यग्लौहशलाका तिर्य्यग्भावेन विन्यस्य तदुपरि कण्टकवेध्यस्वर्णपत्राणि स्थापयेत्, तत्पत्राधः पात्राभ्यन्तरे गन्धकहरितालमनःशिलाभिः कृतकज्जलीं मृतनागं वा निक्षिप्य अधोमुखपात्रान्तरेण तत् पात्रं पिधाय मृदादिना सन्धिं रुद्ध्वा च पात्राधो वह्निं प्रज्वालयेत्, तेन सन्तप्तकज्जल्यादितो धूमं निर्गत्य स्वर्णपत्रे लगिष्यति पत्राणि तानि भस्मीभवन्ति गर्भे द्रवन्ति च ॥ ६७—७३ ॥

कन्दुकयन्त्रमाह, स्थूलस्थाल्यामिति।—स्पष्टम्। स्वेदनीयन्त्रतया प्रागुक्तमपि

अथ कन्दुकयन्त्रस्य प्रकारान्तरम्।—

यद्वा स्थाल्यां जलं क्षिप्त्वा तृणं क्षिप्त्वा मुखोपरि।
स्वेद्यद्रव्यं परिक्षिप्य पिधानं प्रविधाय च॥
अधस्ताज्ज्वालयेद्वह्निं तत् स्यात् कन्दुकयन्त्रकम्॥ ७६॥

अथ खल्लयन्त्रम्।—

खल्लयोग्या शिला नीला श्यामा स्निग्धा दृढा गुरुः।
षोडशाङ्गुलकोत्सेधा नवाङ्गुलकविस्तरा॥ ७७॥
चतुर्विंशाङ्गुला दीर्घा घर्षणी द्वादशाङ्गुला।
विंशत्यङ्गुलदीर्घा वा स्यादुत्सेधे दशाङ्गुला॥
खल्लप्रमाणं तज्ज्ञेयं श्रेष्ठं स्याद्रसकर्मणि॥ ७८॥

अथ खल्लयन्त्रस्य त्रैविध्यनिर्देशः।—

खल्लयन्त्रं त्रिधा प्रोक्तं रसादिसुखमर्दने॥ ७९॥

द्विविधखल्लयोः सामान्यलक्षणम्।—

निरुद्गारौ सुमसृणौ कार्य्यौ पुत्रिकया युतौ॥ ८०॥

इदं मतान्तरप्रदर्शनार्थं पुनरुक्तम्, अथवा तत्र स्थाल्या विशेषो नोक्तः अतः या काचित् स्थाली एव ग्राह्या, अत्र तु स्थूलस्थाली एव ग्राह्या, अतः स्वेदनीयन्त्रात् अस्य वैशिष्ट्यम् इति॥ ७४।७५॥

प्रकारान्तरमाह, यद्वेति।—मुखोपरि स्थाल्या मुखोपरि इत्यर्थः। 'मुखो-परि" इत्यत्र "तृणोपरि" इति पाठे—स्थाल्यां तृणं क्षिप्त्वा तत्तृणोपरि इत्यर्थः। जलपूर्णस्थालीमुखे तृणं संस्थाप्य तदुपरि स्वेद्यद्रव्यं निधाय च पिधानं दत्त्वा वह्निज्वाला देया॥ ७६॥

खल्लयन्त्रमाह, खल्लयोग्येति।—उत्सेधः पार्श्वतः उन्नतः। दीर्घं आयामेन उन्नतं इति दीर्घोत्सेधयोर्भेदः। घर्षणी कण्डनी, पुत्रिका इति यावत्, "नोडा" इति भाषा॥ ७७।७८॥

कार्य्यविशेषार्थं खल्लस्य प्रकारभेदमाह खल्लयन्त्रमिति।—स्पष्टम्॥ ७९॥

तत्र द्विविधयोः सामान्यलक्षणमाह, निरुद्गाराविति।—निरुद्गारौ उद्गारकाले यथा देहस्य ऊर्ध्वनयनादिकं भवति तद्वत् न भवति इति तादृशौ, मौसृण्या-

अथ शोधनार्थम् अर्द्धचन्द्राकृतिखल्लनिर्देशः ।—

उत्सेधे स दशाङ्गुलः खलु कलातुल्याङ्गुलायामवान्
विस्तारेण दशाङ्गुलो मुनिमितैर्निम्नस्तथैवाङ्गुलैः ।
पाल्यां द्व्यङ्गुलविस्तरश्च मसृणोऽतीवार्द्धचन्द्रोपमो
घर्षो द्वादशकाङ्गुलश्च तदयं खल्लो मतः सिद्धये ॥ ८१ ॥

अस्मिन् पञ्चपलं सूतो मर्दनीयो विशुद्धये ।
तत्तदौचित्ययोगेन खल्लेष्वन्येषु योजयेत् ॥ ८२ ॥

अथ मर्दनार्थं वर्त्तुलखल्लनिर्देशः ।—

द्वादशाङ्गुलविस्तारः खल्लोऽतिमसृणोपलः ।
चतुरङ्गुलनिम्नश्च मध्येऽतिमसृणीकृतः ॥ ८३ ॥
मर्दकश्चिपिटोऽधस्तात् सुग्राह्यश्च शिखोपरि ।
अयं हि वर्त्तुलः खल्लो मर्दनेऽतिसुखप्रदः ॥ ८४ ॥

वक्रतारहितौ समौ इत्यर्थः, यद्वा—निरुद्गारौ वान्तादिपरिशून्यौ, वान्तञ्चात्र मर्दनकाले रसः उद्गीरणादिरूपम्, एतेन दृढमसृणौ समगात्रौ न तु उन्नतकर्णिकौ इत्यर्थः समायाति इति । घृष्टिकया घर्षण्या इत्यर्थः । निरुद्गारौ इत्यादिषु खल्लौ इति विशेष्यपदम् ऊहनीयम्, तेन च विविधेषु खल्लेषु द्विविधौ खल्लौ एवम्भूतौ कार्यौ इत्याशयः । अत्र द्विवचनम् "उत्सेधे" इत्यारभ्य "अति-सुखप्रदः" इत्यन्तेन वक्ष्यमाणद्विविधखल्लबोधनार्थं, तृतीयस्य तु लौहमयत्वात् पृथक् ग्रहणं बोध्यम् ॥ ८० ॥

निरुद्गारौ इत्यादिसामान्यलक्षणेनोक्तयोर्द्विविधखल्लयोर्विशेषलक्षणं विवक्षुः प्रथमं तावत् रसादिशोधनार्थमर्द्धचन्द्राकृतिखल्लप्रकारमाह उत्सेधे इति ।—उत्सेधः पार्श्वतः औन्नत्यम् । कलेति ।—षोडशाङ्गुलदीर्घः । मुनिमितैः सप्तभिः । निम्नः गभीरः । पाल्यां चतुष्पार्श्वस्थतटवत्प्रदेशे । अर्द्धचन्द्रोपमः चन्द्रार्द्धवदाकारविशिष्टः । घर्षः शिलापुत्रः । सिद्धये रसकर्मसिद्ध्यर्थम् । प्रयोजनानुसारेण खल्लान्तरेऽपि रसः शोधनीय इति वक्तुमाह, तत्तदिति ।—तत्तदौचित्ययोगेन विशिष्टप्रयोजनानुसारेण, पञ्चपलादधिक-सूते मर्दनीये बृहत् खल्लान्तरमपि व्यवहरेदित्यर्थः ॥ ८१।८२ ॥

मर्दनार्थं द्वितीयं वर्त्तुलखल्लमाह,—द्वादशेति । मर्दक इति ।— घृष्टिका अधोभागे

अथ तप्तखल्वार्थं खल्वनिर्देश ।—

लौहो नवाङ्गुल: खल्वो निम्नत्वे च षडङ्गुल: ।
मर्दकोऽष्टाङ्गुलश्चैव तप्तखल्वाभिधोऽप्ययम् ॥८५॥

अथ तप्तखल्वविधि ।—

कृत्वा खल्वाकृतिं चुल्लीमङ्गारै: परिपूरिताम् ।
तस्यां निवेश्य त खल्व पार्श्वे भस्त्रिकया धमेत् ॥ ८६ ॥
तदन्तर्मर्दिता पिष्टि: क्षारैरम्लैश्च सयुता ।
प्रद्रवत्यतिवेगेन स्वेदिता नात्र संशय: ॥
कृत: कान्तायसा सोऽय भवेत् कोटिगुणो रस' ॥८७॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
यन्त्रनिरूपण नाम नवमोऽध्याय ॥ ९ ॥

चिपिटवद्‌विस्तीर्णा उपरिभागे च सुखेन यथा धारणीया भवति तथा कर्त्तव्या इत्यर्थ ॥ ८३।८४ ॥

तप्तोय तावल्वार्थं खल्वमाह, लौह इति ।—लौह लौहमय इत्यर्थ ॥ ८५ ॥

तप्तखल्वविधिमाह,—कृत्वेति । तदन्तरिति ।—अङ्गारपूर्णचुल्ल्युपरि स्थापितखल्व-मध्ये क्षाराम्लसयोगेन मर्दितरसादिपिष्टि, इत्यर्थ । कान्तायसा कान्तलौहनिर्मित-तप्तखल्वेन इत्यर्थ ॥ ८६।८७ ॥

इति रसरत्नसमुच्चयबोधिन्या नवमोऽध्याय ॥ ९ ॥

अथ दशमोऽध्यायः ।

अथ मूषादिकथनम् ।—

अथ मूषाया पर्य्याया ।—

मूषा हि क्रौञ्चिका प्रोक्ता कुमुदी करहाटिका ।
पाचनी वह्निमित्रा च रसवादिभिरिष्यते ॥ १ ॥

अथ मूषाया निरुक्ति ।—

मुष्णाति दोषान् मूषा या सा मूषेति निगद्यते ॥ २ ॥

अथ मूषाया उपादानम् ।—

उपादान भवेत्तस्या मृत्तिका लोहमेव च ॥ ३ ॥

अथ मूषाप्रशंसा ।—

मूषामुखविनिष्क्रान्ता वरमेकाऽपि काकिणी ।
दुर्जनप्रणिपातेन धिग्लक्षमपि मानिनाम् ॥ ४ ॥

यन्त्रवत् मूषा पुटादीनामपि रसकर्मणि यौगिकत्वात पूर्वाध्याये यन्त्रनिरूपणानन्तरं मूषादिक निरूपयितु दशमाध्यायमारभते ; तत्रादौ तावत् मूषापर्य्यायमाह, मूषेति । —स्पष्टम् ॥ १ ॥

मूषाया निरुक्तिमाह, मुष्णातीति ।—मुष्णाति अपहरति, नाशयतीति यावत, दोषान् रसादिगतनागादिदोषान् इत्यर्थः, दोषमोषणात् मूषा इति सार ॥ २ ॥

मूषाया सामान्योपादानमाह, उपादानमिति ।—सुगमम् ॥ ३ ॥

मूषासाध्यरसादिजीविना प्रशसनीयत्वमाह, मूषेति ।—मूषामुखविनिष्क्रान्ता मूषापुटादिसिद्धरसादिलब्धा इत्यर्थ । काकिणी विंशतिकपर्दक कपर्दको वा, "पणगण्डकयोस्तुर्य्ये उदमानस्य काकिणी" इति रुद्रवचनात "काकिणी पणतुर्य्यांशे मानदण्डेऽपि दृश्यते । कृष्णलैकवराट्यो स्यादुन्मानस्यांशकेऽपि च ॥" इति मेदिनी वचनात, तथा "वराटकानां दशकद्वय तत सा काकिणी" इति लीलावत्युक्तेश्च । दुर्जनप्रणिपातेन निन्दितजनचित्तवृत्त्यनुसरणार्थं प्रणामादिद्वारा इत्यर्थ, लक्ष्यमिति शेष. ॥ ४ ॥

अथ सन्धिलेपस्य पर्य्याया ।—

मूषापिधानयोर्बन्धे बन्धन सन्धिलेपनम् ।
अन्धणं रन्धणञ्चैव सश्लिष्टं सन्धिबन्धनम् ॥ ५ ॥

अथ मूषोपयोगिमृत्तिका ।—

मृत्तिका पाण्डुरस्थूला शर्करा शोणपाण्डुरा ।
चिराध्मानसहा सा हि मूषार्थमतिशस्यते ॥
तदभावे च वाल्मीकी कौलाली वा समीर्य्यते ॥ ६ ॥

अथ मूषोपयोगिद्रव्याणि ।—

या मृत्तिका दग्धतुषैः शणेन शिखित्रकैर्वा हयलद्दिना च ।
लौहेन दण्डेन च कुट्टिता सा साधारणा स्यात् खलु मूषिकार्थे ॥७॥

अथ मूषाया उपकरणान्तराणि ।—

श्वेताश्मानस्तुषा दग्धाः शिखित्राः शणखर्परे ।
लद्दि किट्ट कृष्णमृत्स्ना संयोज्या मूषिकामृदा ॥८॥

सन्धिलेपपर्य्यायमाह, मूषापिधानयोरिति ।—मूषा च पिधानं मूषावरकञ्च तयो बन्धे संयोजने, बन्धनादिशब्द प्रयोज्य इति शेष ॥ ५ ॥

मूषार्थं प्रशस्तमृत्तिकामाह, मृत्तिकेति ।—पाण्डुरस्थूला पाण्डुवर्णा स्थूला च, अथवा शोणपाण्डुरा रक्तपाण्डुमिश्रवर्णा, चिराध्मानसहा दीर्घकालं व्याप्य अग्निसन्तापं प्राप्यापि अविदारणशीला, एवंविधा या शर्करा मृत्तिका कङ्कररूपा मृत्तिका । शर्करामृत्तिकाभावे ग्राह्यमृत्तिकामाह, तदिति ।—वाल्मीकी क्रमिशैलोद्भवा मृत् "उइमाटी" इति वङ्गभाषा । कौलाली कुम्भकारमृदित्यर्थ ॥ ६ ॥

सामान्यमूषार्थम उपादानान्याह, येति ।—हयलद्दिना अश्वपुरीषेण ॥ ७ ॥

उपादानान्तराण्याह, श्वेताश्मान इति ।—श्वेताश्मानः श्वेतप्रस्तराः । खर्परं कपालखण्ड, दग्धमृत्तिका इति यावत् । "शणखर्परे" इत्यत्र "शणकर्पटे" इति पाठे—कर्पट छिन्नवस्त्रम् । लद्दि हयलद्दि । किट्ट मण्डूरम् । कृष्णमृत्स्ना कृष्णवर्ण- मृत्तिका । मूषिकामृदा मूषार्थग्राह्यमृत्तिकया सहेत्यर्थ. ॥ ८ ॥

अथ वज्रमूषा ।—

मृदस्त्रिभागा शणलद्दिभागौ भागश्च निर्दग्धतुषोपलादेः ।
किट्टार्द्धभागं परिखण्ड्य वज्र-मूषा विदध्यात् खलु सत्त्वपाते ॥९॥

अथ योगमूषा ।—

दग्धाङ्गारतुषोपेता मृत्स्ना वल्मीकमृत्तिका ।
तत्तद्विडसमायुक्ता तत्तद्विडविलेपिता ॥ १० ॥
तया या विहिता मूषा योगमूषेति कथ्यते ।
अनया साधित सूतो जायते गुणवत्तरः ॥ ११ ॥

अथ वज्रद्रावणोपयोगिमूषा ।—

गारभूनागधौताभ्यां शणैर्दग्धतुषैरपि ।
समैः समा च मूषामृन्माहिषोदुग्धमर्दिता ॥१२॥
कौश्चिका यन्त्रमात्रे हि बहुधा परिकीर्त्तिता ।
तया विरचिता मूषा वज्रद्रावणकोचिता ॥ १३ ॥

वज्रमूषामाह, मृद इति ।—मृद' पूर्वोक्तरूपमृत्तिकायाः । शण लद्दिभागौ शणस्य लद्दस्य प्रत्येक भागद्वयम् । परिखण्ड्य चूर्णयित्वा ॥ ९ ॥

योगमूषामाह, दग्धेति ।—दग्धशब्दोऽत्र अङ्गारतुषाभ्यां प्रत्येकं सम्बध्यते । मृत्स्ना पाण्डुरस्थूलादिगुणोपेता शर्करामृत्तिकेत्यर्थः । तत्तद्विडसमायुक्ता सूतजारणाद्यर्थाभिरूपितविडमिश्रिता । तत्तद्विडविलेपिता तेनैव विडेनालिप्ता । दग्धाङ्गारादि-विडान्त सर्वमेकत्र सन्नीय मूषा विरचय्य विडेन लिप्ता गुप्तीकृत्य मृत्स्नाया-दिति ॥ १०।११ ॥

वज्रद्रावणोपयोगिमूषामाह, गारेति ।—गारशब्दोऽत्र कोष्ठागारिकार्थकः, "नामैकदेशेनापि नामसाकल्यग्रहणम्" इति न्यायात, कोष्ठागारिका मृत्तिका विशेष "कुमोरे पोकार माटी" इति भाषा । भूनागशब्देनापि तन्मृत्तिका ग्राह्या, एवञ्च गारभूनागधौताभ्यां धौतकोष्ठागारिका किञ्चुलुकामृद्भ्याम् । मूषामृत् पूर्वोक्तशर्करावाल्मीकिकौलाल्यादीनामन्यतमा । गारादितुषान्त सर्वं सम, मृत्तिका च सर्वैः समाना ग्राह्या । कौञ्चिकेति ।—यन्त्रमात्रे हि कौञ्चिका सञ्ज्ञा वर्त्तते, सा हि बहुधा विविधप्रकारा परिकीर्त्तिता इत्यन्वय. ॥ १२।१३ ॥

अथ गारमूषा ।—

दग्धषड्गुणगाराष्ट-किट्टाङ्गारशणान्विता ।
कृष्णमृद्भिः कृता मूषा गारमूषेत्युदाहृता ॥
यामयुग्मपरिध्मानान्नासौ द्रवति वह्निना ॥ १४ ॥

अथ वरमूषा ।—

वज्राङ्गारतुषास्तुल्यास्तच्चतुर्गुणमृत्तिका ।
गारा च मृत्तिकातुल्या सर्वैरेतैर्विनिर्मिता ॥
वरमूषेति निर्दिष्टा याममग्निं सहेत सा ॥ १५ ॥

अथ वर्णमूषा ।—

पाषाणरहिता रक्ता रक्तवर्गानुभाविता ।
मृत्तया साधिता मूषा क्षितिखेचरलेपिता ॥
वर्णमूषेति सा प्रोक्ता वर्णोत्कर्षे नियुज्यते ॥ १६ ॥

अथ रूप्यमूषा ।—

एवं हि श्वेतवर्गेण रूप्यमूषा समीरिता ॥ १७ ॥

गारमूषामाह, दग्धेति ।—गारस्य षड्गुणत्वं किट्टाङ्गारशणानाञ्च प्रत्येकमष्टगुणत्वं कृष्णमृदपेक्षया बोध्यम् । दग्धञ्च मर्दनयोग्यम् ॥ १४ ॥

वरमूषामाह, वज्रेति ।—वज्रं तदाख्यलौहं, पूर्वोक्तवज्रत्यः तत्किट्टं वा बोध्यम् ॥ १५ ॥

वर्णमूषामाह, पाषाणरहितेति ।—रक्ता रक्तवर्णा । रक्तवर्गानुभाविता वक्ष्यमाणकुसुम्भादिमाञ्जिष्ठान्तवर्गक्वाथेन भाविता स्रुता वा । क्षितिखेचरलेपिता क्षितिश्च खञ्च क्षितिखे तत्र चरत इति क्षितिखेचरौ भूनागमृत काशीशञ्च, यद्वा— क्षितिस्थं खेचरं काशीशमित्यर्थः । वर्णोत्कर्षे प्रशस्तवर्णतापादने, रक्तवर्णजनने इत्याशयः ॥ १६ ॥

रूप्यमूषामतिदिशति, एवमिति ।—एवं वर्णमूषाप्रक्रियानुसारेणेत्यर्थः । श्वेतवर्गेण वक्ष्यमाणतगरादिकन्दान्तवर्गेण । एवञ्च पाषाणरहिता श्वेता श्वेतवर्गानुभाविता या मृत्तया साधिता क्षितिखेचरलेपिता मूषा रूप्यमूषेति निष्कर्षः ॥ १७ ॥

अथ विडमूषा।—

तत्तद्विडमृदोद्भूता तत्तद्विडविलेपिता।
देहलोहार्थयोगार्थं विडमूषेत्युदाहृता॥ १८॥

अथ वज्रद्रावणोपयोगिमूषान्तरम।—

गारभूनागधौताभ्या तुषमृष्टशणेन च।
समैः समा च मूषामृन्माहिषोदुग्धमर्दिता॥ १९॥
कौम्भिका यन्त्रमाते हि बहुधा परिकीर्त्तिता।
तया विरचिता मूषा लिप्ता मत्कुणशोणितैः॥ २०॥
बालाब्दध्वनिमूलैश्च वज्रद्रावणकौम्भिका।
सहतेऽग्निं चतुर्याम द्रवेण व्यधिता सती॥ २१॥

अथ मूषाऽऽप्यायनम्।—

द्रवे द्रवीभावमुखे मूषाया ध्मानयोगतः।
क्षणमुद्धरणं यत्तन्मूषाऽऽप्यायनमुच्यते॥ २२॥

विडमूषामाह, तत्तदिति।—तत्तद्विडमृदोद्भूता शर्करादीनामन्यतमवृदा रचिता इत्यर्थ। "तत्तद्विडमृदोद्भूता" इत्यत्र "तत्तद्विडमृदोद्भूता" इति पाठ—पूर्वोक्तविडेन पूर्वोक्तमृदा च उद्भूता निर्मिता। देहलोहार्थयोगार्थं देहस्य लौहवत दार्ढ्यसम्पादनार्था ये योगा तदर्थं तत्कर्मसम्पादनार्थमित्यथ॥ १८॥

पूर्वोक्तवज्रद्रावणोपयोगिमूषाया प्रकारान्तरमाह, गारेति।—मत्कुण 'छार-पोका" इति ख्यात क्रिमिविशेष तस्य शोणिते। अब्दध्वनि वनतण्डलीयक "काँटानटे" इति भाषा, बालाब्दध्वनिमूलै नवोत्पन्नतण्डुलीयमूलै, यद्वा—बाल अश्वपुच्छकेश तथा अब्दध्वनिमूल तै, लिप्ता इत्यनेनान्वय। द्रवेण व्यधिता विद्रा, स्पृष्टा इत्यर्थ, द्रवपूर्णा इत्याशय॥ १९—२१॥

मूषाऽऽप्यायनमाह द्रवे इति।—ध्मायते अनेनेति ध्मानमग्नि तद्योगत अग्नि-संयोगात, द्रवे द्रावणोपयोगिनि द्रव्ये, द्रवीभावमुखे द्रवीभावप्रारम्भ, मूषाया यत क्षणमुद्धरणम् अग्नित उत्तोलनम्, अवतारणमित्यर्थ, तत आप्यायन तर्पण, स्थायित्वसम्पादनम् इत्यर्थ॥ २२॥

अथ वृन्ताकमूषा।—

वृन्ताकाकारमूषाया नालं द्वादशकाङ्गुलम्।
धत्तूरपुष्पवच्चोर्द्ध्वं सुदृढं श्लिष्टपुष्पवत्॥ २३॥
अष्टाङ्गुलञ्च सच्छिद्रं सा स्याद्वृन्ताकमूषिका।
अनया खर्परादीनां मृदूनां सत्त्वमाहरेत्॥ २४॥

अथ गोस्तनीमूषा।—

मूषा या गोस्तनाकारा शिखायुक्तपिधानका।
सत्त्वानां द्रावणे शुद्धौ मूषा सा गोस्तनी भवेत्॥ २५॥

अथ मल्लमूषा।—

निर्दिष्टा मल्लमूषा या मल्लद्वितयसम्पुटात्।
पर्पट्यादि-रसादीनां स्वेदनाय प्रकीर्त्तिता॥ २६॥

अथ पक्वमूषा।—

कुलालभाण्डरूपा या दृढा च परिपाचिता।
पक्वमूषेति सा प्रोक्ता पोटल्यादिविपाचने॥ २७॥

अथ गोलमूषा।—

निर्वक्त्रगोलकाकारा पुटनद्रव्यगर्भिणी।
गोलमूषेति सा प्रोक्ता सत्वरद्रवरोधिनी॥ २८॥

वृन्ताकमूषामाह, वृन्ताकेति।—वृन्ताकं वार्त्ताकु, वार्त्ताकुफलसदृशाकारां मूषां कृत्वा तत्र द्वादशाङ्गुलदीर्घं नालं योजयेत्, नालाग्रभागञ्च धुस्तूरपुष्पवत् उपर्य्यधो युग्मरूपावस्थितम् अष्टाङ्गुलं सच्छिद्रञ्च कुर्य्यात्॥ २३।२४॥

गोस्तनीमूषामाह, मूषेति।—सुगमम्॥ २५॥

मल्लमूषामाह, निर्दिष्टेति।—स्पष्टम्॥ २६॥

पक्वमूषामाह, कुलालेति।—घटकपालयो पृथक् पृथक् निर्माणार्थं यः प्रतिरूपः स कुलालभाण्डशब्देनोच्यते, तद्रूपा इत्यर्थः। पोटल्यादिविपाचने रत्नगर्भपोट्टल्यादिपाके इत्यर्थः॥ २७॥

गोलमूषामाह, निर्वक्त्रेति।—मुखविरहितगोलाकारा इत्यर्थः। सत्वरद्रवरोधिनी

अथ महामूषा ।—

तले या कूर्पराकारा क्रमादुपरि विस्तृता ।
स्थूलवृन्ताकवत् स्थूला महामूषेत्यसौ स्मृता ॥
सा चायोऽभ्रकसत्त्वादेः पुटाय द्रावणाय च ॥ २९ ॥

अथ मण्डूकमूषा ।—

मण्डूकाकारमूषा या निम्नताऽऽयामविस्तरा ।
षडङ्गुलप्रमाणेन मूषा मण्डूकसञ्ज्ञका ॥
भूमौ निखन्य तां मूषां दद्यात् पुटमथोपरि ॥३०॥

अथ मुषलमूषा ।—

मूषा या चिपिटा मूले वर्त्तुलाऽष्टाङ्गुलोच्छ्रया ।
मूषा सा मुषलाख्या स्याच्चक्रिबद्धरसे हिता ॥ ३१ ॥

अथ कोष्ठिकाप्रस्ताव ।—

सत्त्वानां पातनार्थाय पातितानां विशुद्धये ।
कोष्ठिका विविधाकारास्तासां लक्षणमुच्यते ॥३२॥

अथ अङ्गारकोष्ठी ।—

राजहस्तसमुत्सेधा तदर्द्धायामविस्तरा ।
चतुरस्रा च कुड्येन वेष्टिता मृन्मयेन च ॥ ३३ ॥

द्रवपदार्थस्रावनिवारिणी इत्यर्थ । मध्यस्थितपुटनद्रव्या सम्यङ्निरुद्धानना गोला-कृतिमूषा गोलमूषा बोध्या ॥ २८ ॥

महामूषामाह, तले इति ।—कूर्पराकारा कूर्पर कफोणि, भुजमध्यसन्धिरित्यर्थः तदाकारा ॥ २९ ॥

मण्डूकमूषामाह, मण्डूकेति ।—मण्डूक भेक तदाकारा । षडङ्गुलप्रमाणेन निम्नताऽऽयामविस्तरा षडङ्गुलप्रमाणगभीरतादैर्घ्यविस्तारयुक्ता ॥ ३० ॥

मुषलमूषामाह, मूषेति ।—वर्त्तुला मूलादूर्द्ध्वमिति बोध्यम् । चक्रिबद्धरसः स्त्रीरोगाधिकारोक्त औषधविशेष ॥ ३१ ॥

सत्त्वपातनाद्यर्थं कोष्ठिका वक्तुं प्रतिजानीते, सत्त्वानामिति ।—स्पष्टम् ॥ ३२ ॥

एकभित्तौ चरेद्द्वारं वितस्त्याभोगसयुतम् ।
द्वारं सार्द्धवितस्त्या च सम्मित सुदृढ शुभम् ॥ ३४ ॥
देहल्यधो विधातव्यं धमनाय यथोचितम् ।
प्रादेशप्रमिता भित्तिरुत्तरङ्गस्य चोर्द्धत ॥ ३५ ॥
द्वारस्योपरि कर्त्तव्य प्रादेशप्रमितं खलु ।
ततश्चेष्टकया रुद्ध्वा द्वारसन्धि विलिप्य च ॥ ३६ ॥
शिखित्रैस्तां समापूर्य्य धमेद्भस्त्राद्वयेन च ।
शिखित्रान् धमनद्रव्यमूर्द्धद्वारेण निक्षिपेत् ॥ ३७ ॥
सत्त्वपातनगोलांश्च पञ्च पञ्च पुन पुन. ।
भवेदङ्गारकोष्ठीय खराणा सत्त्वपातनी ॥ ३८ ॥

अथ पातालकोष्ठी ।—

दृढभूमौ चरेद्गर्त्तं वितस्त्या सम्मितं शुभम् ।
वर्त्तुलञ्चाथ तन्मध्ये गर्त्तमन्य प्रकल्पयेत् ॥ ३९ ॥

अङ्गारकोष्ठिकालक्षणमाह, राजहस्तेति ।—राजहस्तसमुत्सेधा हस्तद्वयोन्नता । राजहस्तस्य विस्तृतव्याख्या गजपुटव्याख्यायां द्रष्टव्या । चतुरस्रा चतुष्कोणा । वितस्त्याभोगसंयुत द्वादशाङ्गुलविस्तृतम् । द्वार सार्द्धवितस्त्या च इत्यस्य देहल्यध. इत्यनेन सम्बन्ध । देहली द्वारनिम्ने पिण्डिका । प्रादेशप्रमिता "अङ्गुष्ठस्य प्रदेशिन्या व्यास प्रादेश उच्यते" इत्युक्तलक्षणा तर्जनीसहितविस्तृताङ्गुष्ठप्रमाणा । उत्तरङ्गस्य द्वारोर्द्धस्थदारुण । हस्तद्वयोत्सेध हस्तमितायामविस्तार चतुष्कोण समन्तात् मृन्मयभित्तिवेष्टितञ्च चुल्ल्याकारमेक मार्त्तिक यन्त्र कृत्वा तस्य एकभित्तौ वितस्तिविस्त र द्वार द्वारपिण्डिकाध अष्टादशाङ्गुलमान द्वारान्तरञ्च कुर्य्यात । द्वारोर्द्धभागे अङ्गुष्ठतर्ज्जन्योर्मध्यवत विस्तृता भित्ति स्थापयित्वा तदुपरि तद्वद्विस्तृत द्वारमन्यत् विदध्यात , तत इष्टकया द्वारसन्धि रुद्ध्वा आलिप्य च कोष्ठीमङ्गारै परिपूर्य्य द्वाभ्या भस्त्राभ्या धमेत । भस्मीभूते च अङ्गारे पुनरपि अङ्गार सत्त्वपातनगोलादिकञ्च पञ्च पञ्च कृत्वा ऊर्द्धद्वारेण पुन पुन निक्षिपेत् । इयमङ्गारकोष्ठी खरद्रव्याणा सत्त्वपातने शुभा ज्ञेया ॥ ३३—३८ ॥

पातालकोष्ठिकामाह, दृढभूमाविति ।—कठिनमृत्तिकायां वितस्तिमान वर्त्तुले

चतुरङ्गुलविस्तार-निम्नत्वेन समन्वितम्।
गर्त्तोदरणिपर्य्यन्तं तिर्य्यङ्नालसमन्वितम् ॥ ४० ॥
किञ्चित् समुन्नतं वाह्य-गर्त्ताभिमुखनिम्नगम्।
मृच्चक्रीं पञ्चरन्ध्राढ्यां गर्भगर्त्तोदरे क्षिपेत् ॥ ४१ ॥
आपूर्य्य कोकिलैः कोष्ठीं प्रधमेदेकभस्त्रया।
पातालकोष्ठिका ह्येषा मृदूना सत्त्वपातनी ॥
ध्मानसाध्यपदार्थाना नन्दिना परिकीर्त्तिता ॥ ४२ ॥

अथ गारकोष्ठी।—

द्वादशाङ्गुलनिम्ना या प्रादेशप्रमिता तथा।
चतुरङ्गुलतश्चोर्द्ध्वं वलयेन समन्विता ॥ ४३ ॥
भूरिच्छिद्रवतीं चक्रीं वलयोपरि निक्षिपेत्।
शिखितांस्तत्र निक्षिप्य प्रधमेद्वङ्कनालतः ॥
गारकोष्ठीयमाख्याता मृष्टलोहविनाशिनी ॥ ४४ ॥

अथ वङ्कनालम।—

मूषाम्हिर्विधातव्यमरत्निप्रमितं दृढम्।
अधोमुखञ्च तद्वक्रे नाल पञ्चाङ्गुल खलु ॥
वङ्कनालमिद प्रोक्त दृढध्मानाय कीर्त्तितम् ॥ ४५ ॥

गर्त्तमेक कृत्वा तन्मध्ये चतुरङ्गुलविस्तार चतुरङ्गुलगभीर गर्त्तात भूपृष्ठपर्य्यन्तयायि-वक्राकृतिनालसयुक्ताम् ईषदुच्छ्रितञ्च गर्त्तमन्य कुर्य्यात। तत अभ्यन्तरगर्त्तमध्ये पञ्चरन्ध्रसयुक्ता मृच्चक्रीं स्थापयित्वा अङ्गारै कोष्ठीं परिपूर्य्य च एकभस्त्रया प्रधमेत। कटद्रव्याणा सत्त्वपातनार्थमिय पातालकोष्ठीति ज्ञेयमिति निष्कर्ष ॥ ३९—४२ ॥

गारकोष्ठीमाह, द्वादशेति।—द्वादशाङ्गुलगभीरा प्रादेशप्रमाणविस्तारविशिष्टा कोष्ठी एका कार्य्या तस्या ऊर्द्ध्वं चतुरङ्गुले वलयाकारमालवालमेक दत्त्वा तदुपरि बहुच्छिद्रा चक्री निधाय अङ्गार निक्षिप्य च वङ्कनालेन प्रधमेत इति। मृष्टलोह-विनाशिनी शोधितलोहमारिणीत्यर्थ ॥ ४३।४४ ॥

गारकोष्ठिकाया वङ्कनालमित्युक्त किन्तत् वङ्कनालमित्याशङ्कायामाह मूषाम्हि-रिति।—अर्द्धहस्तदीर्घमरत्निप्रमाणमाशि मूषोपयोगिम्हि अरत्निप्रमित दृढमेक नाल कृत्वा

अथ सिद्धरसादीनां कोष्ठी ।—

कोष्ठी सिद्धरसादीनां विधानाय विधीयते ।
द्वादशाङ्गुलकोत्सेधा सा बुध्ने चतुरङ्गुला ।
तिर्य्यक्प्रधमनाऽऽस्या च मृदुद्रव्यविशोधनी ॥ ४६ ॥

[इति मूषाकोष्ठिकायन्त्राणि] ।

अथ पुटानि ।—

अथ पुटस्य प्रयोजननिर्देशः ।—

रसादिद्रव्यपाकानां प्रमाणज्ञापनं पुटम् ।
नेष्टो न्यूनाधिकः पाकः सुपाकं हितमौषधम् ॥ ४७ ॥

अथ पुटस्य फलम् ।—

लोहादेरपुनर्भावो गुणाधिक्यं ततोऽग्रता ।
अनप्सुमज्जनं रेखा-पूर्णता पुटतो भवेत् ॥ ४८ ॥
पुटाद्ग्राव्णो लघुत्वञ्च शीघ्रव्याप्तिश्च दीपनम् ।
जारितादपि सूतेन्द्राल्लोहानामधिको गुणः ॥ ४९ ॥
यथाऽऽत्मनि विशेद्वह्निर्वहिस्थपुटयोगतः ।
चूर्णत्वाद्वि गुणावाप्तिस्तथा लोहेषु निश्चितम् ॥ ५० ॥

तन्मुखे पञ्चाङ्गुलप्रमाणम् अधोमुखं नालमेकं योजयेत्, दृढध्मानाय तत्त बङ्कनालं वेदितव्यम् ॥ ४५ ॥

सिद्धरसादिपाकार्थं कोष्ठ्यन्तरमाह, कोष्ठीति ।—बुध्ने मूलभागे, अधोभागे इत्यर्थः । तिर्य्यगिति ।—तिर्य्यक् वक्रभावेनावस्थितं प्रधमनार्थमास्यं द्वारं यस्या सा ॥ ४६ ॥

मूषाकोष्ठिकादिसाध्यद्रव्याणां पुटनायत्तसिद्धित्वात् मूषाविनिर्देशानन्तरं पुटम् अभिधातुं तत्प्रयोजनादिकमाह, रसादीति ।—सुपक्वरसादिद्रव्यस्य पाकसिद्धिज्ञापक-मित्यर्थः, पुटविशेषादेव रसादीनां सम्यक् पाको जायते इति निष्कर्षः ॥ ४७ ॥

पुटस्य गुणमाह, लोहादेरिति ।—ग्राव्णः प्रस्तरस्य, पद्मरागादेरित्यर्थः । अग्रता श्रेष्ठता । अनप्सुमज्जनं न अप्सु मज्जनं वारितरत्वमित्यर्थः । रेखापूर्णता "अङ्गुष्ठतर्ज्जनीघृष्टम्" इत्याद्युक्तलक्षणविशिष्टता । शीघ्रव्याप्तिः सत्वरं सूक्ष्मस्रोतो

अथ महापुटम्।—

निम्नविस्तरतः कुण्डे द्विहस्ते चतुरस्रके।
वनोत्पलसहस्रेण पूरिते पुटनौषधम् ॥ ५१ ॥
क्रौञ्चीं तु प्रयत्नेन पिष्टिकोपरि निक्षिपेत्।
वनोत्पलसहस्रार्द्धं क्रौञ्चिकोपरि विन्यसेत् ॥
वह्निं प्रज्वालयेत्तत्र महापुटमिदं स्मृतम् ॥ ५२ ॥

अथ गजपुटम्।—

राजहस्तप्रमाणेन चतुरस्रञ्च निम्नकम्।
पूर्णञ्चोपलसाठीभिः कण्ठावध्यथ विन्यसेत् ॥ ५३ ॥
विन्यसेत् कुमुदीं तत्र पुटनद्रव्यपूरिताम्।
पूर्णच्छगणतोऽर्द्धानि गिरिण्डानि विनिक्षिपेत् ॥
एतत् गजपुटं प्रोक्तं महागुणविधायकम् ॥ ५४ ॥

ऽनुसरणम्। यथेति।—वाच्यत पुटे दत्तेऽपि मूषास्थपुटनद्रव्ये यथा वह्निर्विशेत् वह्निगुणाधानेन लघुत्वदीपनत्वादिकं जायते, तथा पुटयोगेन चूर्णत्वात् लौहेष्वपि वह्निगुणाधानेन गुणाधिक्यं स्यात् इत्यर्थः ॥ ४८—५० ॥

महापुटमाह, निम्नेति।—निम्नविस्तरतः गभीरतायां विस्तारे च, द्विहस्ते इत्यनेनान्वयः। चतुरस्रके चतुष्कोणाकारे। कौञ्च्यां मूषायाम्। पिष्टिकोपरि वनोपल-सहस्रोपरि। वनोत्पलसहस्रार्द्धं पञ्चशतवनोपलम् ॥ ५१।५२ ॥

गजपुटमाह, राजहस्तेति।—राजहस्तः सपादहस्तः, हस्तश्चतुर्विंशत्यङ्गुलप्रमाणः स सपादः, तेन त्रिंशदङ्गुलप्रमाणहस्तो राजहस्तः स च गजहस्तस्यैव नामान्तरं इति बोध्यम्, भावप्रकाशोक्तगजपुटलक्षणे तत्समार्थकप्रयोगदर्शनात्, तथा च,—"सपाद-हस्तमानेन कुण्डे निम्ने तथाऽऽयते। वनोपलसहस्रेण पूर्णे मध्ये विधारयेत् ॥ पुटन-द्रव्यसंयुक्तां कोष्ठिकां मुद्रितां मुखे। अथाऽर्द्धानि करण्डानि अर्द्धान्युपरि निक्षिपेत् ॥ एतद्गजपुटं प्रोक्तं ख्यातं सर्वपुटोत्तमम् ॥" इति। गजहस्तस्यापि अर्थः तत्रैव यथा, —"साधारणनराङ्गुल्या त्रिंशदङ्गुलको गजः" इति। किञ्च सूत्रस्य बोधन-क्रियायां रसेन्द्रसारसङ्ग्रहे यत्र 'गजहस्तप्रमाणेन" इति पाठः, रसेन्द्रचिन्तामणौ पुनः तत्रैव "राजहस्तप्रमाणेन' इति पाठदर्शनात् द्वयोरेव एकार्थत्वं नासङ्गतमिति।

अथ वाराहपुटम् ।—

इत्थमारत्निके कुण्डे पुटं वाराहमुच्यते ॥ ५५ ॥

अथ कुक्कुटपुटम् ।—

पुटं भूमितले यत्तद्वितस्तिद्वितयोच्छ्रयम् ।
तावच्च तलविस्तीर्णं तत् स्यात् कुक्कुटकं पुटम् ॥५६॥

अथ कपोतपुटम् ।—

यत् पुटं दीयते भूमावष्टसङ्ख्यैर्वनोत्पलैः ।
बद्धा सूताकभस्मार्थं कपोतपुटमुच्यते ॥ ५७ ॥

अथ गोवरस्वरूपम् ।—

गोष्ठान्तर्गोखुरक्षुण्णं शुष्कं चूर्णितगोमयम् ।
गोवरं तत् समादिष्टं वरिष्ठं रससाधने ॥ ५८ ॥

अथ गोवरपुटम् ।—

गोवरैर्वा तुषैर्वाऽपि पुटं यत्र प्रदीयते ।
तद्गोवरपुटं प्रोक्तं रसभस्मप्रसिद्धये ॥ ५९ ॥

राजहस्तत्वञ्चास्य साधारणचतुर्विंशत्यङ्गुलकहस्तापेक्षया षडङ्गुलाधिक्येन हस्तेषु श्रेष्ठत्वात् बोध्यम्। राजहस्तप्रमाणेन निम्नके चतुरस्रे इत्यन्वयः। कुमुदीं मूषाम् ॥ ५३।५४ ॥

वाराहपुटमाह, इत्थमिति।—अरत्निके विस्तृतकनिष्ठाङ्गुलिमुष्टिः अरत्निः, तत्प्रमाणे कुण्डे ॥ ५५ ॥

कुक्कुटपुटमाह, पुटमिति।—वितस्तिद्वितयोच्छ्रयं हस्तप्रमाणोन्नतम्। तावच्च तलविस्तीर्णम् अधोभागेऽपि हस्तप्रमाणविस्तृतम्। एतत्तु भूमेरुपरि एव कार्य्यं न तु गर्त्तं खानित्वा ॥ ५६ ॥

कपोतपुटमाह यदिति।—बद्धा मूषायां रुद्धेत्यर्थः। सूताकभस्मार्थं रसभस्मार्थं ताम्रभस्मार्थञ्च ॥ ५७ ॥

गोवरपुटं विवक्षुरादौ गोवरस्वरूपमाह गोष्ठान्तरिति।—स्पष्टम् ॥ ५८ ॥

गोवरपुटमाह, गोवरैरिति।—एतच्च बृहद्भाण्डमध्ये एव कार्य्यम्, यदुक्तं भावप्रकाशे,—"बृहद्भाण्डस्थिते यत्र गोवरैर्दीयते पुटम्। तद्गोवरपुटं प्रोक्तं भिषग्भिः सूतभस्मने ॥" इति ॥ ५९ ॥

अथ भाण्डपुटम् ।—

स्थूलभाण्डे तुषापूर्णे मध्ये मूषासमन्विते ।
वह्निना विहिते पाके तद्भाण्डपुटमुच्यते ॥ ६० ॥

अथ वालुकापुटम् ।—

अधस्तादुपरिष्टाच्च क्रौञ्चिकाऽऽच्छाद्यते खलु ।
वालुकाभिः प्रतप्ताभिर्यत्र तद्वालुकापुटम् ॥ ६१ ॥

अथ भूधरपुटम् ।—

वह्निमित्राः क्षितौ सम्यङ्निखन्याद्द्वयङ्गुलादधः ।
उपरिष्टात् पुटं यत्र पुटं तद्भूधराह्वयम् ॥ ६२ ॥

अथ लावकपुटम् ।—

ऊर्द्ध्वषोडशिकामूल्यैस्तुषैर्वा गोवरैः पुटम् ।
यत्र तल्लावकाख्यं स्यात् सुमृदुद्रव्यसाधने ॥ ६३ ॥

भाण्डपुटमाह स्थूलभाण्डे इति ।—तुषपूर्णबृहदाकारभाण्डमध्ये औषधपूर्णां मूषां संस्थाप्य वह्निं दत्त्वा भाण्डमुखं निरोधयेत । यदुक्तं भावप्रकाशे,—"बृहद्भाण्डे तुषैः पूर्णे मध्ये मूषां विधारयेत् । छिद्राऽग्निं मुद्रयेत् भाण्डं तद्भाण्डपुट-मुच्यते ॥" इति ॥ ६० ॥

वालुकापुटमाह अधस्तादिति ।—पुटेऽस्मिन् अधः उपरि च प्रतप्तवालुकयैव मूषाच्छादनं कार्य्यम ॥ ६१ ॥

भूधरपुटमाह, वह्निमित्रा इति ।—वह्निमित्रा मूषा, दीर्घकालं वह्निना सहावस्थानात् अस्या वह्निमित्रत्वं ज्ञातव्यम् । स्पष्टमन्यत् ॥ ६२ ॥

लावकपुटमाह, ऊर्द्ध्वेति ।—ऊर्द्ध्वषोडशिका षोडशिकोर्द्ध्वं पलाधिकमित्यर्थः, यद्वा —ऊर्द्ध्वषोडशिका कर्षमध्यात्मकषोडशिकाया अपि उपरिवर्त्तिषोडशिका पलमिति यावत, तावत्परिमिते मूल्ये पलात् किञ्चिदधिकमूल्ये पलपरिमितमूल्यैर्वा सह तुषैः गोवरैर्वा यत्र पुटमित्यन्वयः । "ऊर्द्ध्वषोडशिकामूल्ये" इत्यत्र "ऊर्द्ध्वषोडशिकामाने" इति पाठे—पलात् किञ्चिदधिकपरिमाणे पलपरिमितैर्वा तुषैः गोवरैर्वा इत्यन्वयः । "ऊर्द्ध्वम्' इति व्यस्तपाठे तु—ऊर्द्ध्वमुपरिभागे यत्र पुटमिति योजनीयम् ॥ ६३ ॥

अथ अनुक्तपुटमाने कर्त्तव्यनिर्देशः ।—

अनुक्तपुटमाने तु साध्यद्रव्यबलाबलात् ।
पुटं विज्ञाय दातव्यमूहापोहविचक्षणैः ॥ ६४ ॥

अथ उपलपर्य्यायाः ।—

पिष्टकं छगणं छागमुत्पलञ्चोपलं तथा ।
गिरिण्डोपलसाठा च वराटी छगणाभिधा ॥ ६५ ॥

अथ अकृत्रिमकृत्रिमलोहानि ।—

सुवर्णं रजतं ताम्रं त्रपु सीसकमायसम् ।
षडेतानि च लोहानि कृत्रिमौ कांस्यपित्तलौ ॥ ६६ ॥

अथ षड्लवणानि ।—

लवणानि षडुच्यन्ते सामुद्रं सैन्धवं विडम् ।
सौवर्चलं रोमकञ्च चूलिकालवणं तथा ॥ ६७ ॥

अथ क्षारत्रयम् ।—

क्षारत्रयं समाख्यातं यवसर्जिकटङ्कणम् ॥ ६८ ॥

अनुक्तस्थले पुटविधिमाह, अनुक्तेति ।—अनुक्तपुटमाने कतिभिः उपलैः कति वा पुटो देय इत्यादि परिमाणानुक्तौ इत्यर्थः ॥ ६४ ॥

"निघण्टुना विना वैद्यो विद्वान् व्याकरणं विना । अनभ्यासेन धानुष्कस्त्रयो हास्यस्य भाजनम् ॥" इति स्मरणात् निघण्टुज्ञानं विना वैद्यस्य सिद्धेरसम्भवात् विशेषोपयोगिनः कांश्चिन्निघण्टून् वक्तुमिच्छुरादौ उपलपर्य्यायानाह, पिष्टकमिति ।—पिष्टकादिवराट्यन्तं सर्वं छगणाभिधं करीषपर्य्यायो बोध्यः ॥ ६५ ॥

लोहषट्कमष्टलोहञ्चाह, सुवर्णमिति ।—षडेतानि लोहानि, विशुद्धानीति शेषः । धात्वन्तरमिश्रणेन अस्यैव अष्टत्वमाह कृत्रिमाविति ।—सुवर्णादीनि षट् प्राकृतानि, कांस्यपित्तलौ कृत्रिमौ मिश्रौ ज्ञेयौ ॥ ६६ ॥

लवणषट्कमाह, लवणानीति ।—सामुद्रं "करकच्" इति ख्यातम् । रोमकं रुमानदीभवं, शाम्बर इति ख्यातम् । चूलिकालवणं नरसारः ॥ ६७ ॥

क्षारत्रयमाह, क्षारत्रयमिति ।—यवः यवक्षारः । सर्जिकः सर्जिकाक्षारः ॥ ६८ ॥

अथ क्षारपञ्चकम् ।—

पलाशमुष्ककक्षारौ यवक्षारः सुवर्चिका ।

तिलनालोद्भवः क्षारः सयुक्तं क्षारपञ्चकम् ॥ ६९ ॥

अथ मधुरत्रयम् ।—

घृतं गुडो माक्षिकञ्च विज्ञेयं मधुरत्रयम् ॥ ७० ॥

अथ रसकर्माणि तैलयोनिफलानि ।—

कङ्गुणी-तुम्बिनी-घोषा-करीर-श्रीफलोद्भवम् ।

कटु[illegible]शोक-सिद्धार्थ-सोमराजी-विभीतजम् ॥ ७१ ॥

अत[illegible] महाकाला-निम्बजं तिलजं तथा ।

अ[illegible]देवदाली-दन्ती-तुम्बुरुविग्रहात् ॥ ७२ ॥

अङ्को[illegible]न्मत्त-भल्लात-पलाशेभ्यस्तथैव च ।

एतेभ्यस्तैलमादाय रसकर्माणि योजयेत् ॥ ७३ ॥

अथ वसावर्ग ।—

जम्बूक-मण्डूकवसा वसा कच्छपसम्भवा ।

कर्कटो शिशुमारो च गो-शूकर-नरोद्भवा ॥

अजाष्ट्र-खर-मेषाणां महिषस्य वसा तथा ॥ ७४ ॥

क्षारपञ्चकमाह, पलाशेति ।—मुष्कक. घण्टापाटला । सुवर्चिका स्वर्जिकाक्षार ॥ ६९ ॥

मधुरत्रयमाह घृतमिति ।—माक्षिकं मधु ॥ ७० ॥

रसकर्मसाधनोपयोगितैलयोनिफलान्याह, कङ्गुणीति ।—कङ्गुणी महाज्योतिष्मतीलता, "स्यात् कङ्गुणी तदनु शैलसुता सुतैला" इति राजनिघण्टुक्त्या अस्यास्तैलयोनित्व बोध्यं तथा बीजञ्च ग्राह्यमिति । "कङ्गुनी" इति दन्त्यनपाठे तु—प्रियङ्गुबीजमित्यर्थ । तुम्बिनी कटुतुम्बी सरलकाष्ठ वा । घोषा स्वनामख्याता । करीर मरुजद्रुमविशेष, "करीर" इत्यत्र "करञ्ज" इति पाठान्तरम् । महाकाली स्वनामख्याता "माकाल" इति वङ्गभाषा । देवदाली हस्तिघोषक । तुम्बुरु. स्वनामख्यातवणिग्द्रव्यविशेष, नेपालधन्याकमिति केचित् । अङ्कोल. अङ्कोठ, "आँकोड" इति भाषा । उन्मत्त. धुस्तूर. ॥ ७१—७३ ॥

अथ मूत्रवर्ग ।—

मूत्राणि हस्ति-करभ-महिषी-खर-वाजिनाम् ।
गोऽजावीनां स्त्रियः पुंसां पुष्प बीजन्तु योजयेत् ॥ ७५ ॥

अथ पञ्चमाहिषम् ।—

माहिषाम्बु दधि क्षीरं साभिघारं शकृद्रसः ।
तत् पञ्चमाहिषं ज्ञेय—"

अथ छागलपञ्चकम् ।—

"—तद्वच्छागलपञ्चकम् ॥७६॥

अथ अम्लवर्ग ।—

अम्लवेतस-जम्बीर-निम्बकं बीजपूरकम् ।
चाङ्गेरी चणकाम्लञ्च अम्लीकं कोल-दाडिमम् ॥ ७७ ॥
अम्बष्ठा तिन्तिडीकञ्च नारङ्ग रसपत्रिका ।
करमर्दं तथा चान्यदम्लवर्गः प्रकीर्त्तित ॥ ७८ ॥

येषां प्राणिनां वसा रसकर्मसु प्रशस्ता तानाह, जम्बूकेति ।—कर्कटी कुलीरकस्त्री । शिशुमारी शिशुमार जलजन्तुविशेष "शुशु" इति ख्यात, तस्य स्त्री ॥७४॥

मूत्राष्टकमाह मूत्राणीति ।—करभ उष्ट्रशावक । मूत्रादिकन्तु स्त्रीजातीयानामेव प्रशस्तम्, यदुक्तं परिभाषाप्रदीपे—"स्त्रीणां मूत्रं गवां तीक्ष्णं न तु पुंसां विधीयते । पित्तात्मिका स्त्रियो यस्मात् सौम्यास्तु पुरुषा मता ॥" इति । प्राणङ्गज वसामूत्रादिवचनप्रसङ्गेन स्त्रीपुंसोरन्यदपि ग्राह्यं तदाह, स्त्रिय इति ।—स्त्रीणामार्त्तवं तथा पुंसां शुक्रमपि रसकर्मणि ग्राह्यम् ॥ ७५ ॥

माहिषपञ्चकमाह, माहिषाम्ब्विति ।—माहिषाम्बु महिषीमूत्रं, तासां मूत्रस्यैव तीक्ष्णत्वात् "स्त्रीणां मूत्रं गवां तीक्ष्णं" "स्त्रियश्चतुष्पदे ग्राह्या" इत्यादि परिभाषास्मरणात् । दधिक्षीरादयोऽपि महिष्या एव ग्राह्या । साभिघारं सघृतं, दधि क्षीरमित्यनेन सम्बन्ध । शकृद्रस महिषीविष्ठारसः । छागलपञ्चकमाह, तद्वदिति ।—तद्वत पञ्चमाहिषवत ॥ ७६ ॥

अम्लवर्गमाह, अम्लवेतसेति ।—चाङ्गेरी चुक्रिका, "चुकापाल" इति ख्याता । अम्लीकं तिन्तिडीफलम् । अम्बष्ठा अम्ललोणिका, "आमरुल" इति ख्यातम् । तिन्तिडीकं महार्द्रकम् । नारङ्गं "कमलालेबु" इति ख्यात मधुरनिम्बुकविशेष,

चणकाम्लश्च सर्व्वेषामेक एव प्रशस्यते।
अम्लवेतसमेकं वा सर्व्वेषामुत्तमोत्तमम्॥
रसादीनां विशुद्ध्यर्थं द्रावणे जारणे हितम्॥ ७९॥

अथ अम्लपञ्चकम्।—

कोल-दाडिम-वृक्षाम्ल-चुल्लिका-चुक्रिकारसः।
पञ्चाम्लकं समुद्दिष्टं तच्चोक्तञ्चाम्लपञ्चकम्॥ ८०॥

अथ पञ्चमृत्तिका।—

इष्टिका गैरिका लोणं भस्म वल्मीकमृत्तिका।
रसप्रयोगकुशलैः कीर्त्तिताः पञ्च मृत्तिकाः॥८१॥

विषवर्गः।—

शृङ्गीकं कालकूटञ्च वत्सनाभं सक्तुकम्।
पित्तञ्च विषवर्गोऽयं स वरः परिकीर्त्तितः॥ ८२॥
रसकर्मणि शस्तोऽयं तद्दहनविधावपि।
अयुक्त्या सेवितश्चायं मारयत्येव निश्चितम्॥ ८३॥

रसपत्रिका कपित्थाम्लम्। करमर्दं "करमचा" इति ख्यातम्, "करमर्दम्" इत्यत्र "करवन्दम" इति पाठेऽपि स एवार्थः॥ ७७—७९॥

पञ्चाम्लमाह कोलेति।—वृक्षाम्लं महाद्रकं तिन्तिडी वा। "चुल्लिका" इत्यत्र "कोलदाडिमवृक्षाम्लचुक्रीकाचुक्रिकारसः। पञ्चाम्लकं मुखालिप्य सद्यस्तृष्णां नियच्छति॥" इति चक्रसङ्ग्रहोक्त "चुक्रीका" इति पाठान्तरं समीचीनम्, चुल्लिकाशब्दस्य अम्लवाचकद्रव्यविशेषे प्रयोगादर्शनात्। चुक्रीका "चुकापालङ्" इति तथा चुक्रिका "आमरुल" इति च ख्यातम्॥ ८०॥

पञ्चमृत्तिका आह, इष्टिकेति।—लोणं लवणम्। भस्म भूतिः, "भस्म" इत्यत्र "धूमम्" इति क्वचित् पाठः॥ ८१॥

विषवर्गमाह, शृङ्गीकमिति।—शृङ्गीकं "यस्मिन् गोशृङ्गके बद्धे दुग्धं भवति लोहितम्। तत् शृङ्गीकमिति प्रोक्तं द्रव्यतत्त्वविशारदैः॥" इत्युक्तलक्षणविषभेदः, केचित्तु "सिमूलखार" (शेंको) इति वदन्ति। कालकूटं "देवासुररणे देवैर्हतस्य पृथुमालिनः। दैत्यस्य रुधिराज्जातस्तरुरश्वत्थसन्निभः। निर्य्यासः

अथ उपविषवर्गः ।—

लाङ्गली विषमुष्टिश्च करवीरं जया तथा ।
नीलकः कनकोऽर्कश्च वर्गो ह्युपविषात्मकः ॥ ८४ ॥

अथ दुग्धवर्गः ।—

हस्त्यश्व-वनिता धेनुर्गर्दभी छागिकाऽविका ।
उष्ट्रिकोदुम्बराश्वत्थ-भानु-न्यग्रोध-तिल्वकम् ॥ ८५ ॥
दुग्धिका स्नुग्गणश्चैव तथैवोत्तमकण्टिका ।
एषां दुग्धैर्विनिर्दिष्टो दुग्धवर्गो रसादिषु ॥ ८६ ॥

कालकूटोऽयं मुनिभिः परिकीर्त्तितः ॥ सोऽहिच्छत्रे शृङ्गवेरे कोङ्कणे मलये भवेत् ॥" इत्युक्तलक्षणम् । वत्सनाभः "सिन्दुवारसदृक्पत्रो वत्सनाभ्याकृतिस्तथा । यत्पार्श्वे न तरोर्वृद्धिर्वत्सनाभः स भाषितः ॥" इत्युक्तलक्षणविषभेदः "मिठा" "अमृत" इति ख्यातम्, एतत्त्रयं स्थावरम् । कृत्रिमं गरः संयोगजविषमिति यावत् । "सक्तुविमम" इत्यत्र "च सक्तुकम्" इति पाठान्तरं समीचीनम्, तत्र सक्तुकः "यद्ग्रन्थिः सक्तुकेनेव पूर्णमध्यः स सक्तुकः" इत्युक्तलक्षणविषभेदः । पित्तं पित्तविषम्, एतच्च जङ्गमाश्रयं बोध्यम्, यदुक्तं सुश्रुतेन—"दृष्टिनिश्वासदंष्ट्रानखमूत्रपुरीषशुक्रलालाऽऽर्त्तवमुख-सन्दंशविशर्द्धितगुदास्थिपित्तशूकशवानीति ।" तच्च पित्तं शकुलीमत्स्यरक्तराजीवरकी-मत्स्यादीनां बोध्यम् । राजनिघण्टौ तु विषवर्गः अन्यथा उक्तः, यथा—'शृङ्गिकः कालकूटश्च मुस्तको वत्सनाभकः । सक्तुकश्चेति योगोऽयं महापञ्चविषाभिधः ॥" इति । वरं श्रेष्ठं । तदिति ।—तत् विषं भेदनविधौ विरेचनयोगे ॥ ८२।८३ ॥

उपविषाणाह, लाङ्गलीति ।—जया त्रैलोक्यविजया, भङ्गा इति यावत् । नीलकः भल्लातकः । कनकः धुस्तूरः जैपाली वा । ग्रन्थान्तरे तु भिन्नविषमुपविषं पठितं तद्यथा,—"अर्कक्षीरं स्नुहीक्षीरं लाङ्गली करवीरकः । गुञ्जाहिफेनधुस्तूराः सप्तोप-विषजातयः ॥" इति ॥ ८४ ॥

दुग्धवर्गमाह, हस्तीति ।—हस्त्यश्ववनिता हस्तिनी अश्वी च, यद्वा—हस्तिनी अश्विनी वनिता नारी चेत्यर्थः । अविका मेषी । भानुः अर्कः । तिल्वकः लोध्रः । दुग्धिका क्षीरिका "खिरइ" इति ख्यातम् । स्नुक् स्नुही तासां गणः बहुविधस्नुहीजातयः । उत्तमकण्टिका क्षुपविशेषः, "वागा भेरेण्डा" जामाल-गोटा" इति च भाषा, यद्वा—उत्तमकण्टिका वेतसः क्षीरित्वात्, अश्मन्तको

अथ विड्वर्गः ।—

पारावतस्य चाषस्य कपोतस्य कलापिनः ।
गृध्रस्य कुक्कुटस्यापि विनिर्दिष्टो हि विड्गणः ॥
शोधनः सर्वलोहानां पुटनाल्लेपनात् खलु ॥ ८७ ॥

अथ रक्तवर्गः ।—

कुसुम्भं खदिरो लाक्षा मञ्जिष्ठा रक्तचन्दनम् ।
अक्षी च बन्धुजीवश्च तथा कर्पूरगन्धिनी ॥
माक्षिकश्चेति विज्ञेयो रक्तवर्गोऽतिरञ्जनः ॥ ८८ ॥

अथ पीतवर्गः ।—

किंशुकः कर्णिकारश्च हरिद्राद्वितयं तथा ।
पीतवर्गोऽयमादिष्टो रसराजस्य कर्मणि ॥ ८९ ॥

वा, चरके क्षीरकथनप्रस्तावे स्नुह्यर्काभ्यां सह अश्मन्तकस्य ग्रहणात्, तथा च— "अथापरे वयो वृक्षा पृथक् ये फलमूलिभिः । स्नुह्यर्काश्मन्तकास्तेषामिदं कर्म पृथक् पृथक् ॥ वमनेऽश्मन्तकं विद्यात् स्नुहीक्षीरं विरेचने । क्षीरमर्कस्य विज्ञेयं वमने सविरेचने ॥" इति तथा "—क्षीराणि वृक्षाश्च षड् ये दृष्टाः पयस्त्वच ॥" इति च ॥ ८५।८६ ॥

विड्गणमाह, पारावतस्येति ।—पारावतः गृहकपोतः । चाषः पक्षिविशेषः, स्वर्णचातकः नीलकण्ठो वा इति यावत् । कपोतः पारावतभेदः । कलापी मयूरः । एष तु गणः लौहशोधने प्रयुज्यते ॥ ८७ ॥

रक्तवर्गमाह, कुसुम्भमिति ।—कुसुम्भं स्वनामख्यातम् । अक्षी अक्षीकः, रञ्जकवृक्षविशेष इत्यर्थः, "आउच" इति भाषा, "अक्षी च" इत्यत्र "अक्षीवम्" इति पाठे—रक्तशोभाञ्जनमित्यर्थः । बन्धुजीवः पुष्पविशेषः, "बान्धुलिफुल" इति भाषा, स च मध्याह्ने विकसति पराह्णे सूर्योदये च शुष्यति । कर्पूरगन्धिनी कर्पूरगन्धि हरिद्राविशेषः । माक्षिकं सुवर्णमाक्षिकम् । एष रक्तवर्गः पारदादीनां रञ्जने प्रयोज्यः ॥ ८८ ॥

पीतवर्गमाह, किंशुक इति ।—किंशुकः पलाशः । कर्णिकारः चतुराङ्गुलः द्रुमोत्पलो वा, "सोनाट् कम्बल" इति भाषा । हरिद्राद्वितयं हरिद्रा दारुहरिद्रा च ॥ ८९ ॥

अथ श्वेतवर्गः ।—

तगरः कुटजः कुन्दो गुञ्जा जीवन्तिका तथा ।
सिताम्भोरुहकन्दश्च श्वेतवर्ग उदाहृतः ॥ ९० ॥

अथ कृष्णवर्गः ।—

कदली कारवल्ली च त्रिफला नीलिका नलः ।
पङ्कः कासीसबालाम्रं कृष्णवर्ग उदाहृतः ॥ ९१ ॥

अथ रक्तवर्गादीनां प्रयोजननिर्देशः ।—

रक्तवर्गादिवर्गैश्च द्रव्यं यज्जारणात्मकम् ।
भावनीयं प्रयत्नेन तादृग्रागाप्तये खलु ॥ ९२ ॥

अथ शोधनीयगणः ।—

काचटङ्कणशिग्राभिः शोधनीयो गणो मतः ॥९३॥

अथ लोहानां मलनाशनगणः ।—

सत्त्वानां वङ्गसूतस्य लोहानां मलनाशनः ।
कापाली-कङ्गुणी-ध्वंसी रसवादिभिरुच्यते ॥ ९४ ॥

श्वेतवर्गमाह, तगर इति ।—तगरः पुष्पविशेषः "टगर" इति भाषा । गुञ्जाऽत्र श्वेता ग्राह्या । जीवन्तिका स्वनामप्रसिद्धा ॥ ९० ॥

कृष्णवर्गमाह, कदलीति ।—कारवल्ली क्षुद्रकारवेल्लः "छोट उच्छे" इति भाषा । नीलिका नीलिनी, "नील गाछ" इति भाषा । पङ्कः कर्दमः । बालाम्रम् अचिरजाताम्रफलम् आम्रमज्जा वा ॥ ९१ ॥

रक्तवर्गादीनां प्रयोजनमाह, रक्तेति ।—सुगमम् ॥ ९२ ॥

रसशोधकगणमाह, काचेति ।—काचः मृत्तिकाविशेषः, स च क्षाररसः उष्णवीर्य्यः अञ्जनादृष्टिकरश्च, विडाख्यलवणो वा । शिग्रा शुक्तिविशेषः इत्यर्थः ॥ ९३ ॥

नैर्मल्यसम्पादनवर्गमाह, सत्त्वानामिति ।—सत्त्वानां धातुसत्त्वानामित्यर्थः । कापाली अहिंस्रा, "काँटा गुडकाँउनि" इति भाषा, कङ्गुणी प्रियङ्गुः, "काँउनि-धान" इति प्रसिद्धः तृणधान्यविशेषो वा, ध्वंसी काञ्चनदेशीयपार्वत्याक्षोडफलम् । सत्त्वादीनां मलनाशनार्थम् एभिः मर्दनं कार्य्यम् ॥ ९४ ॥

अथ लोहकाठिन्यनाशनो योगः।—

महिषी मेषशृङ्गी च कलिङ्गो धववीजयुक्।
शशास्थीनि च योगोऽयं लोहकाठिन्यनाशनः ॥ ९५ ॥

अथ द्रावणीयो गणः।—

गुड-गुग्गुलु-गुञ्जाऽऽज्य-सारघैष्टङ्कणान्वितैः।
दुर्द्रावाखिललोहादेर्द्रावणाय गणो मतः ॥ ९६ ॥

अथ क्षाराम्लविषस्नेहानां कार्य्यम्।—

क्षाराः सर्वे मलं हन्युरम्लं शोधनजारणम्।
मान्द्यं विषाणि निघ्नन्ति स्नैग्ध्यं स्नेहाः प्रकुर्वते ॥९७॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
मूषाकोष्ठिकापुटादिकथनं नाम दशमोऽध्यायः ॥ १० ॥

लोहानां मार्दवजननवर्गमाह, महिषीति।—महिषी महिषीकन्दाख्यमहाकन्दविशेषः, श्वेतालुक इति यावत्। मेषशृङ्गी कर्कटशृङ्गी अजशृङ्गी वा। कलिङ्ग इन्द्रयवः। धववीजयुक् धववीजसंयुक्तः। एष योगः लोहानां काठिन्यविनाशपूर्वकं कोमलतासम्पादने समर्थः ॥ ९५ ॥

द्रावणवर्गमाह, गुडेति।—सारघं माक्षिकम्। दुर्द्रावेति।—दुःखेन कष्टेन द्रावः द्रावणं येषां तथाभूतानाम् अखिललोहानां सर्वविधलौहानाम् ॥ ९६ ॥

उक्तक्षारादीनां कार्य्यमाह, क्षारा इति।—मान्द्यं जडता धातुगतजाड्यादिकं वा ॥ ९७ ॥

इति रसरत्नसमुच्चयबोधिन्यां दशमोऽध्यायः ॥१०॥

अथ एकादशोऽध्यायः ।

अथ रसशोधनादिकथनम् ।—

अथ मानपरिभाषा ।—

षट्त्रुट्यश्चैकलिक्षा स्यात् षड्लिक्षा यूकमेव च ।
षड्यूकास्तु रजस्तच्च कथितं तव सुव्रते ! ॥ १ ॥
षड्रजः सर्षपः साक्षात् सिद्धार्थः स च कीर्त्तितः ।
षट्सिद्धार्थैर्न देवेशि ! यवस्त्वेकः प्रकीर्त्तितः ॥ २ ॥
षड्यवैरेकगुञ्जा तु त्रिगुञ्जो वल्ल उच्यते ।
षड्भिरेव तु गुञ्जाभिर्माष एकः प्रकीर्त्तितः ॥
माषा द्वादश तोलः स्यादष्टौ तोलाः पलं भवेत् ॥ ३ ॥

अथ मानपरिभाषाया मतान्तरम् ।—

त्रुटिः स्यादणुभिः षड्भिस्तैर्लिक्षा षड्भिरीरिता ।
ताभिः षड्भिर्भवेद्यूका षड्यूकास्तद्रजः स्मृतम् ॥ ४ ॥
षड्रजः सर्षपः प्रोक्तस्तैः षड्भिर्यव ईरितः ।
एका गुञ्जा यवैः षड्भिर्निष्पावस्तु द्विगुञ्जकः ॥ ५ ॥
स्याद्गुञ्जात्रितयं वल्लो द्वौ वल्लौ माष उच्यते ।
द्वौ माषौ धरणं ते द्वे शाणं निष्ककला स्मृता ॥६॥

मूषाकोष्ठिकादिकमन्तरेण रसशोधनादिकार्य्यस्य असम्भवत्वात् तद्विवरणानन्तरं रसशोधनादिकं विवरीतुमेकादशाध्यायमारभते, तत्र सर्वभेषजानां मानायत्तत्वाद्धि प्रथमं तावत् मानपरिभाषामाह, षट्त्रुट्यश्चेति ।—त्रुटिः त्रसरेणुः, षडणव इति यावत्, षड्भिः परमाणुभिः त्रुटिः स च त्रसरेणुपर्य्यायः, यदुक्तं ब्रह्मवैवर्त्ते—"परमाणुद्वयेनाणुस्त्रसरेणुस्तु ते त्रयः" इति, परमाणुषट्कात्मकं द्व्यणुकत्रयात्मकं वा त्रुटिः ॥ १—३ ॥

अन्यविधां विस्तृतां परिभाषामाह, त्रुटिरिति ।—द्वौ वल्लौ षड्गुञ्जा इत्यर्थः ।

निष्कद्वयन्तु वटकः स च कोल इतीरितः।
स्यात् कोलत्रितयं तोलः कर्षो निष्कचतुष्टयम् ॥ ७ ॥
उडुम्बरं पाणितलं सुवर्णं कवलग्रहः।
अक्षं विडालपदकं शुक्तिः पाणितलद्वयम् ॥ ८ ॥
शुक्तिद्वयं पल केचिदन्ये शुक्तित्रयं विदुः।
तदेव कथित मुष्टिः प्रकुञ्चो विल्वमित्यपि ॥ ९ ॥
पलद्वयन्तु प्रसृतं तद्दय कुडवोऽञ्जलि।
कुडवौ मानिका तौ स्यात् प्रस्थो द्वे मानिके स्मृतः ॥१०॥
प्रस्थद्वयं शुभं तौ द्वौ पात्रकं द्वयमाढकम्।
तैश्चतुर्भिर्घटोन्मान-नल्वनामर्मणशूर्पकाः ॥ ११ ॥
द्रोणस्य शब्दा. पर्य्यायाः पलानां शतकं तुला।
चत्वारिंशत्पलशत-तुला भारः प्रकीर्त्तितः ॥ १२ ॥
रसार्णवादिशास्त्राणि निरीक्ष्य कथितं मया।
रसोपयोगि यत्किञ्चिद्विज्ञात्र तत् प्रदर्शितम् ॥१३॥

अथ पारदस्य संस्कारकथने प्रतिज्ञा।—

अधुना रसराजस्य संस्कारान् सम्प्रचक्ष्महे ॥ १४ ॥

उडम्बरेत्यादि विडालपदकान्त कर्षपर्य्यायो बोध्य। शुक्तिरिति।—पाणितलद्वय कर्षद्वय शुक्ति। तदेव पलमेव, मुष्ट्यादिविल्वान्ता पलपर्य्याया। तौ द्वौ पात्रक ताभ्या शुभाभ्या पात्रकमित्यर्थ, द्वयमाढकञ्च तस्य नामान्तरम्। तैश्चतुर्भि पात्रचतुष्टये। घटादिशूर्पकान्ता पञ्च द्रोणपर्य्याया। पलाना शतकं शतपल तुला। चत्वारिंशदिति।—पलशतात्मकतुलाया चत्वारिंशत्तुलया एको भार स्यात. यद्यपि चरकादिसम्मतमागधमाने "भार' स्याद्विंशतिस्तुला" इति परिदृश्यते. तथाऽपि मानपरिभाषा एषा रसोपयोगिनी इति आचार्य्येण स्वयमेवोक्तत्वात् तन्त्रान्तर-विरोधो न मन्तव्य, एवमन्येऽपि विरोधा समाधेया ॥ ४—१३ ॥

अथ रसस्य अष्टादशविधसंस्कारान् वक्तु प्रतिजानीते, अधुनेति।—स्पष्टम् ॥ १४ ॥

अथ अष्टादशसंस्काराणां नामानि ।—

स्यात् स्वेदनं तदनु मर्दनमूर्च्छने च
उत्थापनं पतनरोधनियामनानि ।
सन्दीपनं गगनभक्षणमानमत्र
सञ्चारणा तदनु गर्भगता द्रुतिश्च ॥ १५ ॥
बाह्या द्रुतिः सूतकजारणा स्याद्ग्रासस्तथा सारणकर्म पश्चात् ।
सङ्क्रामणं वेधविधिः शरीरे योगस्तथाऽष्टादशधाऽत्र कर्म ॥१६॥

अथ व्याधिविशेषे रसप्रयोगनिषेधः ।—

न योज्यो मर्मणि छिन्ने न च क्षाराग्निदग्धयोः ॥१७॥

अथ शुद्धमूर्च्छितरसयोर्गुणाः ।—

शुद्धः समृद्धाग्निसहो मूर्च्छितो व्याधिनाशनः ॥ १८ ॥

अथ मृतरसस्य गुणाः ।—

निष्कम्पवेगस्तीव्राग्नावायुरारोग्यदो मृतः ॥ १९ ॥

अथ रसस्य नैसर्गिकदोषत्रयं तेषां कार्य्याणि च ।—

विषं वह्निर्मलश्चेति दोषा नैसर्गिकास्त्रयः ।
रसे मरणसन्तापमूर्च्छानां हेतवः क्रमात् ॥ २० ॥

संस्काराणां नामानि विवृणोति, स्यादिति ।—स्वेदन मर्दन मूर्च्छन उत्थापन पतन रोध नियामन सन्दीपन गगनभक्षणमान-सञ्चारणा गर्भद्रुति बाह्यद्रुति जारणा-ग्रास-सारणा-सङ्क्रामण वेधविधि योगा इति अष्टादशसंस्काराः । रसेन्द्रचिन्तामणौ तु अष्टादशसंस्काराणां सञ्ज्ञाविधौ किञ्चित् परिवर्त्तनं दृश्यते, तद्यथा—"स्वेदन मर्दन-मूर्च्छनोत्थापनपातन बोधननियमनदीपनानुवासनगगनादिग्रासप्रमाण चारणगर्भद्रुति-बाह्यद्रुतियोगजारणरञ्जनसारणक्रामणवेधभक्षणानि" इति ॥ १५।१६ ॥

रसस्याविषयमाह, नेति ।—सुगमम् ॥ १७ ॥

शोधितमूर्च्छितरसयोः गुणमाह, शुद्ध इति ।—समृद्धाग्निसहः शोधनविशेषेण छिन्नपक्षत्वात् तीव्राग्नावपि स्थिरः, अनुड्डयनशील इत्यर्थः ॥ १८ ॥

मृतरसस्य गुणमाह, निष्कम्पवेग इति ।—निष्कम्पवेगः निश्चलः, स्थिर इत्यर्थः, तीव्राग्नौ तीक्ष्णाग्नौ, अपीति शेषः ॥ १९ ॥

रसस्य नैसर्गिकदोषान् तेषां कर्माणि चाह, विषमिति ।—सुगमम् ॥ २० ॥

अथ रसस्य यौगिकदोषद्वयं तयोः कार्य्यञ्च ।—

यौगिकौ नागवङ्गौ द्वौ तौ जाड्याध्मानकुष्ठदौ ॥ २१ ॥

अथ रसस्य औपाधिकदोषाः ।—

औपाधिकाः पुनश्चान्ये कीर्त्तिताः सप्तकञ्चुकाः ।

भूमिजा गिरिजा वार्जा—" ॥ २२ ॥

अथ रसदोषाणां द्वादशत्वकथनम् ।—

"—ते च द्वौ नागवङ्गजौ ।

द्वादशैते रसे दोषाः प्रोक्ता रसविशारदैः ॥ २३ ॥

अथ सप्तकञ्चुकानां नामानि ।—

पर्पटी पाटनी भेदी द्रावी मलकरी तथा ।

अन्धकारी तथा ध्वाङ्क्षी विज्ञेयाः सप्त कञ्चुकाः ॥ २४ ॥

अथ भूमिजादीनां कार्य्यम् ।—

भूमिजाः कुर्वते कुष्ठं गिरिजा जाड्यमेव च ।

वारिजा वातसङ्घातं दोषाद्यं नागवङ्गयोः ॥ २५ ॥

रसस्य यौगिकदोषौ तयोः कर्म चाह, यौगिकाविति ।—सुगमम् ॥ २१ ॥

औपाधिकदोषानाह, औपाधिका इति ।—औपाधिका भूम्यादिसम्पर्काद्वाहिता, आरोपिता इत्यर्थः । वार्जा वारिजाता इत्यर्थः । भूमिजा गिरिजा वार्जा इति अन्ये सप्त कञ्चुका दोषाः पुनः औपाधिकाः कीर्त्तिता इत्यन्वयः ॥ २२ ॥

समासतः रसस्य द्वादश दोषानाह, ते चेति ।—ते पूर्वोक्ता विष वह्निर्मलश्चेति त्रयो नैसर्गिकदोषाः, तथा सप्तौपाधिकदोषा इति मिलित्वा दश इत्यर्थः, नागवङ्गजौ च द्वौ यौगिकौ दोषौ एते द्वादश रसदोषाः ॥ २३ ॥

औपाधिकाः सप्त कञ्चुका इत्युक्तं के ते इत्यपेक्षायां तान् विवृणोति, पर्पटीति ।—पर्पट्यादि सप्त कञ्चुकानां संज्ञा, तत्र पर्पटीसदृशशोषकत्वात् पर्पटी, पर्पटी यथा शोषिणी ग्राहिणी च, पारदस्य पर्पट्याख्यकञ्चुकोऽपि नरदेहे तत्क्रियाजननी, विदारकत्वात् पाटनी, मलभेदकत्वात् भेदिनी, शारीरधातूनां द्रवत्व सम्पादनात् द्रावी, दोषवर्द्धकत्वात् मलकरी, अन्धत्वजननात् अन्धकारी, ध्वाङ्क्षी यथा कर्कशस्वरी भवति तथा स्वरपारुष्यजननात् ध्वाङ्क्षीति ज्ञेयम् ॥ २४ ॥

भूमिजादिदोषत्रयाणां कार्य्यमाह, भूमिजा इति ।—भूमिजा, इत्यत्र कञ्चुका

अथ उपसंहारः ।—

तस्मात् सूतविधानार्थं सहायैर्निपुणैर्युतः ।
सर्वोपस्करमादाय रसकर्म समारभेत् ॥ २६ ॥

अथ संस्कारार्थं सूतस्य परिमाणनिर्देशः ।—

द्वे सहस्रे पलानान्तु सहस्रं शतमेव वा ।
अष्टाविंशत्पलान्येव दश पञ्चैकमेव वा ॥ २७ ॥
पलार्द्धेनैव कर्त्तव्यः संस्कारः सूतकस्य च ।
सुदिने शुभनक्षत्रे रसशोधनमारभेत् ॥ २८ ॥

अथ संस्काराः ।—

अथ स्वेदनविधिः ।—

त्र्यूषणं लवणासुर्यौ चित्रकार्द्रकमूलकम् ।
क्षिप्त्वा सूतो मुहुः स्वेद्यः काञ्जिकेन दिनत्रयम् ॥ २९ ॥

इति शेषः । वारिजा कञ्चुका नागवङ्गयोः दोषाश्च जाड्याध्मानकुष्ठबहुलं वातसङ्घातं कुर्वते इत्यर्थः ॥ २५ ॥

उपसंहरति, तस्मादिति ।—उपस्करम् उपकरणम् ॥ २६ ॥

संस्कारार्थं क्रियमाणाः सूता ग्राह्या इत्याह, द्वे इति ।—स्पष्टम् । एतेन इदं ज्ञातव्यं यत् द्विसहस्रपलाधिकः पलार्द्धादूनो वा रसः संस्कारार्थं न ग्राह्य इति । ग्रन्थान्तरे तु औषधार्थं यावन्मात्रं प्रयोजनं, तावन्मात्रस्यापि ग्राह्यत्वं दृश्यते, तथा च रसेन्द्रसारे—"शतं पञ्चाशतं वाऽपि पञ्चविंशद्दशैव च । पञ्चैकं वा पलञ्चैव पलार्द्धं कर्षमेव च ॥ कर्षान्न्यूनो न कर्त्तव्यो रससंस्कार उत्तमः । प्रयोगेषु च सर्वेषु यथालाभं प्रकल्पयेत ॥" इति ॥ २७।२८ ॥

अथ उद्देशानुसारेण संस्कारान् विवक्षुरादौ स्वेदनाख्यं प्रथमसंस्कारमाह, त्र्यूषणमिति ।—लवणासुर्यौ सैन्धवं राजिका च । मुहुः निरन्तरम् । त्र्यूषणादिकं काञ्जिके क्षिप्त्वा चतुरावृत्तवस्त्रेण बद्धं पारदं तत्र निधाय दिनत्रयमविच्छेदेन दोलायन्त्रे स्वेदयेदिति ॥ २९ ॥

अथ मर्दनविधिः ।—

गृहधूमेष्टिकाचूर्णं तथा दधि गुडान्वितम् ।
लवणासुरिसंयुक्तं क्षिप्त्वा सूतं विमर्दयेत् ॥ २० ॥
षोडशांशन्तु तद्द्रव्यं सूतमानान्नियोजयेत् ।
सूतं क्षिप्त्वा समं तेन दिनानि त्रीणि मर्दयेत् ॥ २१ ॥
जीर्णाभ्रकं तथा बीजजीर्णसूतं तथैव च ।
नैम ..र्थं हि सूतस्य खल्ले धृत्वा तु मर्दयेत् ॥ २२ ॥
गृ.... निर्मलो रागान् ग्रासे ग्रासे विमर्दितः ।
मर्दनाख्यं हि यत् कर्म तत् सूतगुणकृद्भवेत् ॥ २३ ॥

अथ मूर्च्छनविधिः ।—

गृहकन्या मलं हन्यात्त्रिफला वह्निनाशनी ।
चित्रमूलं विषं हन्ति तस्मादेभिः प्रयत्नतः ॥ २४ ॥
मिश्रितं सूतकं द्रव्यैः सप्तवाराणि मूर्च्छयेत् ।
इत्थं सम्मूर्च्छितः सूतो दोषशून्यः प्रजायते ॥ २५ ॥

अथ उत्थापनविधिः ।—

अस्माद्विरेकात् सशुद्धो रसः पात्यस्ततः परम् ।
उद्धृतः काञ्जिकक्काथात् पूतिदोषनिवृत्तये ॥ २६ ॥

मर्दनमाह, गृहधूमेति ।—गृहधूमः अत्लान्धू "झुल" इति "आन्धु" इति वा बङ्गभाषा । बीजजीर्णसूतं पूर्वोक्तस्वर्णादिकृष्टीकृतजारितरसम् । ग्रासे ग्रासे स्वर्णादीनां प्रतिग्रासे । अयमर्थः,—सूतात् षोडशांशं गृहधूमादि प्रत्येकं गृहीत्वा दिनत्रयं यावत् यथाक्रमं सूतेन सह मर्दयेत्, ततः गृहधूमादिभिर्मर्दनजनितमलापनोदनार्थं जीर्णाभ्रकं बीजजीर्णसूतञ्च खल्ले संस्थाप्य पुनः घर्षयेत्, तेन सूतः निर्मलो भूत्वा रञ्जितो जायते इति ॥ २०—२३ ॥

मूर्च्छनमाह, गृहकन्येति ।—गृहकन्या कुमारी । मूर्च्छयेत् मिश्रयेदित्यर्थः । गृहकन्यादिभिः द्रव्यैः पृथक् पृथक् पारदं मिश्रीकृत्य सप्त सप्तवारं मर्दयेत् ॥२४।२५॥

उत्थापनमाह अस्मादिति ।—विरेकात् शोधनात्, दोषशोधकत्वेन गृहकन्यादयः एवात्र विरेकशब्दस्य लक्ष्यभूताः ज्ञेयाः । उक्तादिशा शुद्धं रसं पूतिदोषनिवारणाय

अथ पातनविधि ।—

ताम्रेण पिष्टिकां कृत्वा पातयेदूर्ध्वभाजने ।
वङ्गनागौ परित्यज्य शुद्धो भवति सूतकः ॥ ३७ ॥

अथ ऊर्द्धाध पातनयो सङ्ख्यानिर्देश ।—

शुल्वेन पातयेत् पिष्टिं त्रिधोर्द्धं सप्तधा त्वधः ॥ ३८ ॥

अथ अध पातनविधि ।—

त्रिफलाशिग्रुशिखिभिर्लवणासुरिसंयुतैः ।
नष्टपिष्टं रसं कृत्वा लेपयेच्चोर्द्ध्वभाजने ॥
ततो दीप्तैरध.पातमुत्पलैस्तत्र कारयेत् ॥ ३९ ॥

अथ पातने प्रकारान्तराणि ।—

हरिद्राऽङ्कोल्लशम्याक-कुमारीत्रिफलाऽग्निभिः ।
तण्डुलीयकवर्षाभू-हिङ्गुसैन्धवमाक्षिकैः ॥ ४० ॥
पिष्ट रसं सलवणैः सर्पाक्ष्यादिभिरेव वा ।
पातयेदथवा देवि ! व्रणघ्नीयक्षलोचनैः ॥ ४१ ॥

काञ्जिकादौ निक्षिप्य धौतीकृत्य च उद्धरेत, तत पातनायन्त्रे पातयेच्च । काञ्जिकादौ धौतीकृत्य उद्धरणमेव उत्थापन बोध्यम् ॥ ३६ ॥

ऊर्द्धपातनमाह, ताम्रेणेति ।—पिष्टिका चक्रिका, पिण्डाकृति वा । ऊर्द्धभाजने ऊर्द्धपातनयन्त्रे ॥ ३७ ॥

शोधनाय रसस्य कतिवारम् ऊर्द्धपातन कतिवार वा अध पातन कार्य्यमित्यपेक्षायामाह, शुल्वेनेति ।—त्रिवारम् ऊर्द्ध पातयेत्, सप्तवारञ्चाध पातयेत् इत्यर्थ ॥ ३८ ॥

अध पातनमाह, त्रिफलेति ।—शिखी चित्रकम् । नष्टपिष्ट रस त्रिफलादिभि सह मर्दनेन पारदस्य अपगतस्वरूपपिण्डाकारम् ॥ ३९ ॥

पातनान्तराण्याह, हरिद्रेति ।—अङ्कोल्ल' अङ्कोठ "आँकोड" इति भाषा । शम्याक आरग्वध । तण्डुलीयक काण्डमारिष "काँटानटे" इति भाषा । सर्पाक्षी गन्धनाकुली, रास्नाभेद इत्यर्थ, तदादिभि , सर्पाक्ष्यादिस्तु "सर्पाक्षी चोरिणी रम्या" इत्यादिना वक्ष्यमाणो गण.। व्रणघ्नी क्षुद्रकारवेल्लः, यक्ष: यक्षतरुः,

इत्थं ह्यधोर्द्ध्वपातेन पातितोऽसौ यदा भवेत्।
तदा रसायने योग्यो भवेद्द्रव्यविशेषतः॥ ४२॥

अथ प्रकारान्तरम्।—

अथवा दीपकयन्त्रे निपातितः सर्वदोषनिर्मुक्तः॥ ४३॥

अथ तिर्य्यक्पातनम्।—

तिर्य्यक्पातनविधिना निपातितः सूतराजस्तु।
श्लक्ष्णीकृतमभ्रदलं रसेन्द्रयुक्तं तथाऽऽरनालेन॥ ४४॥
खल्ले दत्त्वा मृदितं यावत्तन्नष्टपिष्टतामेति।
कुर्य्यात्तिर्य्यक्पातनपातितसूतं क्रमेण दृढवह्निम्॥ ४५॥
संस्वेद्यः पात्योऽसौ न पतति यावद्दृढश्चाग्नौ।
तदाऽसौ शुध्यते सूतः कर्मकारी भवेद्ध्रुवम्॥ ४६॥

अथ मर्दनादीना गुण।—

मर्दनैर्मूर्च्छनैः पातैर्मन्दः शान्तो भवेद्रसः॥ ४७॥

न्यग्रोधत्वच इति यावत, अस्य त्वक् ग्राह्या, लोचन नीरकम्। हरिद्रादिभि' माचिकान्तै द्रव्यै अथवा ससैन्धवै सर्पाक्ष्यादिभिरथवा व्रणघ्नादिभि नष्टपिष्ट रसम् ऊर्द्धभाजनोदरे लिप्त्वा अधोभाण्डे जल सस्थाप्य भूम्यध निखन्य च उपरिष्टात पुट दद्यात। इत्थमिति।—ताम्रेण पिष्टिकामित्यारभ्य व्रणघ्नीयत्वलोचनै इत्यन्त-ग्रन्थेनोक्तेन ऊर्द्धपातनविधिना अध पातनविधिना चेत्यर्थ.। द्रव्यविशेषत द्रव्यविशेष-सयोगात॥ ४०—४२॥

पद्यान्तरमाह, अथवेति।—दीपकयन्त्रे प्रागुक्तदीपिकायन्त्रे॥ ४३॥

तिर्य्यक्पातनमाह, तिर्य्यक्पातनविधिनेति।—तिर्य्यक्पातनविधिना निपातित सूतराज सर्वदोषनिर्मुक्तो भवेदिति पूर्वेणान्वय। तमेव विधिमाह, श्लक्ष्णीकृतमिति।—क्रमेण दृढवह्नि मृदुमध्यतीव्राग्नि, दत्त्वेति शेष। अयमर्थ —अभ्रदल रसेन्द्रञ्च आरनालेन सह खल्ले श्लक्ष्णं पिष्ट्वा नष्टपिष्टि कुर्य्यात, तत एकस्मिन् घटे नष्टपिष्टी-कृत त घटान्तरे जलञ्च सस्थाप्य रसघटगलाधश्छिद्रे नालमेकं स योजयेत, जलघट-कुक्षिस्थच्छिद्रे च नालाग्रभाग निक्षिप्य मृदा उभयोर्मुखे रुद्ध्वा रसघटाध मृदुमध्य-तीव्रक्रमेण वह्निज्वाला दद्यात यावत् रसो जलघटान्त न विशेत, एवम् ऊर्द्धाध-स्तिर्य्यक्पातनक्रमेण शुद्धो रस. कर्मसु प्रयोज्यो भवेत्॥ ४४—४६॥

अथ रोधनम् ।—

रुद्ध्वाम्बुजैर्निरोधेन ततो मुखकरो रसः ।
स्वेदनादिवशात् सूतो वीर्य्यं प्राप्नोत्यनुत्तमम् ॥ ४८ ॥

अथ नियामनम् ।—

नियम्योऽसौ ततः सम्यक् चपलत्वनिवृत्तये ।
कर्कोटी-फणिनेत्राभ्यां वृश्चिकाम्बुज-मार्कवैः ॥
सम कृत्वाऽऽरनालेन स्वेदयेच्च दिनत्रयम् ॥ ४९ ॥

अथ प्रकारान्तरम् ।—

मरिचैर्भूखगयुक्तैर्लवणासुरिशिग्रुटङ्कणोपेतैः ।
काञ्जिकयुक्तैस्त्रिदिन ग्रासार्थी जायते स्वेदात् ॥ ५० ॥

मर्दनादीना फलमाह, मर्दनैरिति ।—मर्दनादिक्रियाभि मन्द सदोष रस श्रान्त दोषमुक्त भवेत ॥ ४७ ॥

रोधनमाह, रुद्ध्वाम्बुजैरिति ।—स्वेदनादिवशात आदिपदेन मर्दनमूर्च्छनपातनादीना ग्रहण, निर्वीर्य्यता गत इति शेष, सूत रुद्ध्वाम्बुजे रुष्टि वृद्धि, अम्बु वालक, न विष "मान्द्य विषाणि निघ्नन्ति" इत्युक्ते विषस्य रसवीर्य्यजनकत्वात, तै, निरोधेन रोधनकर्मणा, भाण्डमध्ये एभि सह रस क्षिप्त्वा दिनत्रय भूम्यध स्थापनेन, अनुत्तम वीर्य्यं प्राप्नोति तत रस मुखकर स्वर्णादिग्राससमर्थ भवेत । रसेन्द्रचिन्तामणौ इद बोधननाम्ना उक्त, पाठश्च अन्यविधो दृश्यते यथा—"एव कदर्थित सूत षण्ढत्वमधिगच्छति । तन्मुक्तयेऽस्य क्रियते बोधन कथ्यते हि तत ॥ विस्त्रामितकपाले वा काचकूप्यामथापि वा । सृष्टाम्बुज विनिक्षिप्य तत्र तन्मज्जनावधि ॥ पूरयेत्त्रिदिन भूम्या राजहस्तप्रमाणत । अनेन सूतराजोऽयं षण्ढभाव विमुञ्चति ॥" इति । रसेन्द्रसारेऽपि एवमेव पाठ केवल "सृष्टाम्बुजम्" इत्यत्र "सूते जल" तथा "राजहस्त" इत्यत्र "गजहस्त" इति पाठभेद ॥ ४८ ॥

नियामनमाह, नियम्य इति ।—कर्कोटी कर्कोटक "कॉक्रोल" इति भाषा । फणिनेत्र सर्पाक्षी, रास्नाभेद इति यावत् । वृश्चिक श्वेतपुनर्नवा । अम्बुज इज्जल । मार्कव भृङ्गराज । सुगममन्यत् ॥ ४९ ॥

मतान्तरमाह, मरिचैरिति ।—भूखग सुवर्णमाक्षिकम् । आसुरि. राजिका । एतया प्रक्रियया रस, ग्राससमर्थोऽपि भवेत् ॥ ५० ॥

अथ दीपनम् ।—

विच्चारसिन्धुखगभू-शिखिशिग्रुराजी-
तीच्णाम्लवेतसमुखैर्लवणोषणाम्लैः ।
नेपालताम्रदलशोषितमारनाले
साम्लासवाम्लपुटितं रसदीपनं तत् ॥५१॥

अथ प्रकारान्तरदीपनम् ।—

स्वेदयेदासवाम्लेन वीर्य्यतेजःप्रवृद्धये ।
यथोपयोगं स्वेद्यः स्यान्मूलिकाना रसेषु च ॥ ५२ ॥

अथ रसभावनादौ मूलिन्य ।—

सर्पाची चौरिणी वन्ध्या मत्स्याची शङ्खपुष्पिका ।
काकजङ्घा शिखिशिखा ब्रह्मदण्डाखुकर्णिका ॥ ५३ ॥
वर्षाभूः कम्बुकी दूर्वा सैय्यकोत्पलशिम्बिकाः ।
शतावरी वज्रलता वज्रकन्दाग्निकर्णिका ॥ ५४ ॥

दीपनमाह, विच्चारेति ।—खगभू भूखग इत्यथ, राजी "राइ" इति ख्यातः सर्षपभेद, तीच्णा चवी, शिखी चित्रक, अम्लवेतसमुखै अम्लवेतसादिभि अम्लद्रव्यै , लवणोषणाम्लै विच्चारादिभि अम्लवेतसान्तैरेतैलवणोषणाम्लरसविशिष्ट-द्रव्यै सह, नेपालताम्रदलशोषित नेपालदेशीयताम्रपत्रेण सह सम्मर्द्य नष्टपिष्टीकृत रसम् आरनाले, पचेदिति शेष, तत साम्लासवाम्लपुटितम् अम्लासवेन काञ्जिकेन, अम्लेन अन्येनाम्लद्रव्येण च सह पुटित पुटन, कार्य्यमिति शेष, तत् एतद्विधान रसदीपन रसस्य वीर्य्योद्दीपन, ज्ञेयमिति शेष ॥ ५१ ॥

दीपनान्तरमाह, स्वेदयेदिति ।—आसवाम्लेन काञ्जिकेन। यथोपयोग यथा लाभम् । मूलिकाना वक्ष्यमाणसर्पाच्यादीनाम् ॥ ५२ ॥

स्वेद्यद्रव्यमूलिकाना नामान्याह, सर्पाचीति ।—चौरिणी स्वनामप्रसिद्धा "चोरइ" इति वङ्गीया । वन्ध्या वन्ध्याकर्कोटकी, "तित् काँक्रोल्" इति भाषा । शिखिशिखा मयूरशिखा, "मयूरचुटी" इति भाषा, अपामार्गस्य वीजाधारदण्डो वा "आपाशीष" इति ख्यात.। ब्रह्मदण्डी भार्गी, "छागलदाँडि, वामनदाँडि"

श्वेतार्कशिग्रुधत्तूर-मृगदूर्वारसाङ्कुशा. ।
रम्भा रक्ताभनिर्गुण्डी लज्जालु सुरदालिका ॥ ५५ ॥
मण्डूकपर्णी पाताली चित्रकं ग्रीष्मसुन्दरा ।
काकमाची महाराष्ट्री हरिद्रा तिलपर्णिका ॥ ५६ ॥
जाती जयन्ती श्रीदेवी भूकदम्ब. कुसुम्भक: ।
कोशातकी नीरं कणा लाङ्गली कटुतुम्बिका ॥५७॥
चक्रमर्दोऽमृता कन्द. सूर्य्यावर्त्तेषुपुङ्खिका ।
वाराही हस्तिशुण्डी च प्रायेण रसमूलिका: ॥ ५८ ॥
रसस्य भावने स्वेदे मूषालेपे च पूजिता: ।
इत्यष्टौ सूतसंस्कारा. समा द्रव्ये रसायने ॥
कार्य्यास्ते प्रथमं शेषा नोक्ता द्रव्योपयोगिन: ॥ ५९ ॥

इति भाषया ख्याता वा । आखुकर्णी मूषिककर्णी । कम्बुकी अश्वगन्धा । सैंध्यक' श्वेतभिण्टी । वज्रलता अस्थिसंहार । वज्रकन्द शर्कराकन्दालुक । अग्निकर्णिका औषधिविशेष स च पार्वतीय एव । मृगदूर्वा मृगप्रिया दूर्वा, सुकोमलदूर्वा इत्यर्थ । रसाङ्कुश औषधिविशेष । लज्जालु लज्जावती । सुरदालिका देवदाली, हस्ति-घोषक इति यावत । पाताली पातालगरुडी, छिलिहिण्ट इति यावत् । ग्रीष्मसुन्दरा "गिमा" इति भाषा । महाराष्ट्री जलपिप्पली । तिलपर्णिका "तिल्लोनि" इति ख्यात' शाकविशेष, श्वेतचन्दन वा । श्रीदेवी सुवर्चला तुलसी वा । कोशातकी घोषक । नीर वालकम् । इषुपुङ्खिका शरपुङ्ख । वाराही वाराहीकन्द । रसमूलिका रससंस्कारार्थं मूलानि इत्यर्थ , एभि यथालाभ रसस्य भावना रसस्वेदन रसपूर्णमूषालेपनञ्च कार्य्यम् । इति पूर्वोक्तरूपा, अष्टौ अष्टविधा स्वेदनमर्दन-मूर्च्छनोत्थापनपातनरोधननियामनदीपनाख्या सूतसंस्कारा द्रव्ये औषधविषये रसायने च समा तुल्या, उक्ता इति शेष, औषधार्थं रसायनार्थञ्च संस्कार एकविध इत्यर्थ, ते संस्कारा' प्रथमम आदौ कार्य्या, यद्वा—प्रथमं श्रेष्ठा, द्रव्यरसायनोभयोपयोगित्वात , शेषा गगनभक्षणमानादय' संस्कारा द्रव्योप-योगिन' केवलम् औषधोपयोगिन , न तु रसायनोपयोगिन इत्यर्थ., अत. न उक्ता ॥ ५३—५९ ॥

अथ रसबन्धन वक्तुं प्रतिज्ञा ।—

पञ्चविंशतिसङ्ख्याकान् रसबन्धान् प्रचक्ष्महे ।
येन येन हि चाञ्चल्यं दुर्ग्रहत्वञ्च नश्यति ॥
रसराजस्य सम्प्रोक्ता बन्धनार्थो हि वार्त्तिकैः ॥६०॥

अथ रसबन्धा ।—

हठारोटौ तथाऽऽभासः क्रियाहीनश्च पिष्टिका ।
क्षारः खोटश्च पोटश्च कल्कबन्धश्च कज्जलिः ॥ ६१ ॥
सजीवश्चैव निर्जीवो निर्वीजश्च सवीजकः ।
शृङ्खला-द्रुतिबन्धौ च बालकश्च कुमारकः ॥ ६२ ॥
तरुणश्च तथा वृद्धो मूर्त्तिबद्धस्तथाऽपरः ।
जलबन्धोऽग्निबन्धश्च सुसंस्कृतकृताभिधः ॥
महाबन्धाभिधश्चेति पञ्चविंशतिरीरिता ॥ ६३ ॥

अथ मतान्तरीयबन्ध ।—

केचिद्वदन्ति षड्विंशो जलूकाबन्धसंज्ञकः ।
स तावन्नेष्यते देहे स्त्रीणां द्राविऽतिशस्यते ॥६४॥

अथ हठबन्ध ।—

हठो रसः स विज्ञेयः सम्यक् शुद्धिविवर्जितः ।
स सेवितो नृणां कुर्य्यात् मृत्युं वा व्याधिमुद्धतम् ॥ ६५ ॥

रसबन्धान् वक्तुं प्रतिजानीते, पञ्चविंशतीति ।—सुगमम ॥ ६० ॥

बन्धनस्य पञ्चविंशतिभेदानाह, हठारोटाविति ।—हठ आरोट आभास क्रियाहीन-पिष्टिका क्षार खोट पोट कल्कबन्ध कज्जलि- सजीव-निर्जीव निर्वीज सवीज शृङ्खला-द्रुति बालक- कुमार तरुण वृद्ध मूर्त्तिबद्ध -जलबन्ध अग्निबन्ध- सुसंस्कृतकृत-महाबन्ध-नामका पञ्चविंशतिबन्धभेदा बोध्या ॥ ६१—६३ ॥

केषाञ्चिन्मते जलूकाबन्धाख्य षड्विंशति बन्धान्तरमाह, केचिदिति ।—स जलूकाबन्ध देहे शारीररोगे न इष्यते, परन्तु स्त्रीणां द्रावे कामिनीद्रावणे, योनि-द्रावणे वशीकरणे वा इत्यर्थ, शस्यते ॥ ६४ ॥

अथ आरोटबन्धः ।—

सुशोधितो रसः सम्यगारोट इति कथ्यते ।
स चेत्रीकरणे श्रेष्ठः शनैर्व्याधिविनाशनः ॥ ६६ ॥

अथ आभासबन्धः ।—

पुटितो यो रसो याति योगं मुक्त्वा स्वभावताम् ।
भावितो धातुमूलाद्यैराभासो गुणवैकृतैः ॥६७॥

अथ क्रियाहीनबन्धः ।—

असंशोधितलोहाद्यैः साधितो यो रसोत्तमः ।
क्रियाहीनः स विज्ञेयो विक्रियां यात्यपथ्यतः ॥६८॥

अथ पिष्टिकाबन्धः ।—

तीव्रातपे गाढतरावमर्दात् पिष्टी भवेत् सा नवनीतरूपा ।
स रसः पिष्टिकाबन्धो दीपनः पाचनस्तराम् ॥६९॥

अथ क्षारबन्धः ।—

शङ्खशुक्तिवराटाद्यैर्योऽसौ संसाधितो रसः ।
क्षारबन्धः परं दीप्ति-पुष्टिकृच्छूलनाशनः ॥ ७० ॥

तत्र प्रथमं हठबन्धमाह, हठ इति ।—सम्यक् शुद्धिविवर्जितः असम्यक्तया शोधितो रसः हठबद्धो ज्ञेयः, तत्सेवने मृत्युः व्याधिर्वा जायते ॥ ६५ ॥

आरोटबन्धमाह, सुशोधित इति ।—चेत्रीकरणे देहस्य दार्ढ्यसम्पादने, जरायुशोधनद्वारा गर्भग्रहणसामर्थ्यदाने वा इत्यर्थः ॥ ६६ ॥

आभासबन्धमाह, पुटित इति ।—धातुमूलाद्यैः प्रागुक्तस्वर्णादिधातुभिस्तथा सर्पाक्ष्यादिमूलिकाभिः भावितः पुटितश्च रसः गुणवैकृतैः द्रव्यान्तरसंयोगेन स्वाभाविकगुणविपर्ययात् स्वभावतां स्वाभाविकगुणादिकं मुक्त्वा योगं योगवाहितां याति स आभासः, कथ्यते इति शेषः ॥ ६७ ॥

क्रियाहीनबन्धमाह, असंशोधितेति ।—अपथ्यतः अहितोपयोगात् ॥ ६८ ॥

पिष्टिकाबन्धमाह, तीव्रातपे इति ।—गाढतरावमर्दात् द्रव्यान्तरेण सह दृढमर्दनात् । पिष्टी पिष्टिकाबन्धः ॥ ६९ ॥

क्षारबन्धमाह, शङ्खेति ।—संसाधितः मर्दनपुटनादिभिः सुसम्पादितः । स्पष्टमन्यत् ॥ ७० ॥

अथ खोटबन्ध ।—

बन्धो यः खोटतां याति ध्मातो ध्मात क्षयं व्रजेत्।
खोटबद्धः स विज्ञेयः शीघ्र सर्वगदापहः॥ ७१ ॥

अथ पोटबन्धलक्षणम् ।—

द्रुतकज्जलिका मोचा-पत्रके चिपिटीकृता।
स पोटः पर्पटी सैव बालाद्यखिलरोगनुत् ॥ ७२ ॥

अथ कल्कबन्धलक्षणम् ।—

स्वेदाद्यै साधित सूतः पङ्कत्वं समुपागतः।
कल्कबद्धः स विज्ञेयो योगोक्तफलदायकः॥ ७३ ॥

अथ कज्जलीबन्धलक्षणम् ।—

कज्जली रसगन्धोत्था सुश्लक्ष्णा कज्जलोपमा।
तत्तद्योगेन सयुक्ता कज्जलीबन्ध उच्यते ॥ ७४ ॥

खोटबन्धमाह, बन्ध इति।—खोटता वह्निस्थोऽपि अनुड्डयनस्वभावता, यदुक्तम "अग्निमध्ये यदा तिष्ठेत् खोटबद्धस्य लक्षणम्" इति। ध्मातो ध्मातः अस्त्रया पुन पुनराध्मापित इत्यथ, क्षय व्रजेत द्रव्यान्तरेण सह एकीभावात अदर्शनता गच्छेदित्यर्थ ॥ ७१ ॥

पोटबन्धमाह, द्रुतकज्जलिकेति।—द्रुतकज्जलिका वह्निसन्तापेन दूषदार्द्रीभूत-कज्जलीत्यथ। मोचापत्रके कदलीपत्रे। पर्पटीति तस्य सज्ञाऽन्तरम्। एतद्बन्धस्य विस्तृतप्रक्रिया तु चक्रदत्तीयग्रहण्यधिकारे रसपर्पटीप्रस्तावे द्रष्टव्या॥ ७२ ॥

कल्कबन्धमाह, स्वेदाद्यैरिति।—स्वेदाद्यै स्वेदनमर्दनार्हद्रव्ये सह स्वेदनमर्दना-दिभि इत्यथ, साधित खिन्न मर्दितश्च इत्यर्थ, पङ्कत्व पङ्कवत पिण्डाकारताम। योगोक्तफलदायक यस्मिन् योगे स प्रयोज्य तस्य फलोत्कर्षप्रद इत्यर्थ, अथवा स्वेदनमर्दनार्थं गृहीतकल्कद्रव्याणाम् उपयोगे यत फल, तत्फलप्रद इत्यथ ॥ ७३ ॥

कज्जलीबन्धमाह कज्जलीति।—सुश्लक्ष्णा चिक्कणा। तत्तद्योगेन सयुक्ता रस-गन्धकशोधकद्रव्यसयोगेन शुद्धा इत्यथ ॥ ७४ ॥

अथ सजीवबन्धलक्षणम् ।—

भस्मीकृतो गच्छति वह्नियोगात्
रसः सजीवः स खलु प्रदिष्टः ।
संसेवितोऽसौ न करोति भस्म-
कार्य्यं जवाद्व्याधिविनाशनञ्च ॥ ७५ ॥

अथ निर्जीवबन्धलक्षणम् ।—

जीर्णाभ्रको वा परिजीर्णगन्धो
भस्मीकृतश्चाखिललोहमौलिः ।
निर्जीवनामा हि स भस्मसूतो
निःशेषरोगान् विनिहन्ति वेगात् ॥ ७६ ॥

अथ निर्बीजबन्धलक्षणम् ।—

रसस्तु पादांशसुवर्णजीर्णः पिष्टीकृतो गन्धकयोगतश्च ।
तुल्यांशगन्धैः पुटितः क्रमेण निर्बीजनामा सकलामयघ्नः ॥ ७७ ॥

सजीवबन्धमाह, भस्मीकृत इति ।—यः रसः भस्मीकृतः सन् वह्नियोगात् अग्निसम्पर्कात्, गच्छति उड्डीनो भवति इत्यर्थः । भस्मकार्य्यं भस्मीभूतपारदोपयोगस्य यत् फलम् । जवात् वेगात्, शीघ्रमित्यर्थः । उड्डयनसमर्थत्वादस्य सजीवत्वं बोध्यम् ॥ ७५ ॥

निर्जीवबन्धमाह, जीर्णाभ्रक इति ।—जीर्णाभ्रकः ग्रासीकृताभ्रः इत्यर्थः । परिजीर्ण-गन्धः सम्यग्-ग्रासितगन्धकः इत्यर्थः । अखिलेति ।—अखिलानां सर्वेषां लोहानां स्वर्णादीनामित्यर्थः, मौलिः शिरोभूषणस्वरूपः, सर्वलोहोपयोगे ये गुणा भवन्ति, तेभ्योऽप्यधिकगुणप्रदः इत्यर्थः । वह्नियोगेऽपि निर्गमनासामर्थ्यात् अस्य निर्जीवत्वं बोध्यम् ॥ ७६ ॥

निर्बीजबन्धमाह, रस इति ।—पादांशसुवर्णजीर्णः पादांशं चतुर्थांशं सुवर्णं जीर्णं स्वर्णभस्म यत्र तादृशः । गन्धकयोगतः तुल्यगन्धकसंयोगात्, वक्ष्यमाण "तुल्यांशगन्धैः" इत्यत्र तुल्यांश इति वाक्यबलात् अत्रापि तुल्यांशत्वं ज्ञेयम्, चतुर्थांशस्वर्णभस्मना तुल्यगन्धकेन च पिष्टीकृतः रसः तुल्यगन्धकेन सप्तवारं पुटितः निर्बीजबन्धनामतां याति इति निष्कर्षः ॥ ७७ ॥

अथ सबीजबन्धलक्षणम् ।—

पिष्टीकृतैरभ्रकसत्त्वहेम-तारार्ककान्तैः परिजारितो यः ।
हतस्ततः षड्गुणगन्धकेन सबीजबद्धो विपुलप्रभावः ॥ ७८ ॥

अथ शृङ्खलाबन्धलक्षणम् ।—

वज्रादिनिहतः सूतो हतः सूतः समोऽपरः ।
शृङ्खलाबद्धसूतस्तु देहलोहविधायकः ॥
चित्रप्रभावो वेगेन व्याप्तिं जानाति शङ्करः ॥ ७९ ॥

अथ द्रुतिबन्धलक्षणम् ।—

युक्तोऽपि बाह्यद्रुतिभिश्च सूतो
बन्धं गतो वा भसितस्वरूपः ।
स राजिकापादमितो निहन्ति
दुःसाध्यरोगान् द्रुतिबद्धनामा ॥ ८० ॥

अथ बालकबन्धलक्षणम् ।—

समाभ्रजीर्णः शिवजस्तु बालः संसेवितो योगयुतो जवेन ।
रसायनो भाविगदापहश्च सोपद्रवारिष्टगदान्निहन्ति ॥ ८१ ॥

सबीजबन्धमाह, पिष्टीकृतैरिति ।—पिष्टीकृतैः पेषणेन कृतपिण्डाकारैः । आदौ पिष्टीकृतैरभ्रसत्त्वादिभिः सह जारितः पश्चात् षड्गुणगन्धकेन सह मारितश्च रसः सबीजबन्धनामा भवति ॥ ७८ ॥

शृङ्खलाबन्धमाह, वज्रादीति ।—वज्रादिनिहतः हीरकादिसहयोगेन मारितः सूतः तथा समः समपरिमितः अपरश्च हतः प्रकारान्तरेण मारितः सूतः शृङ्खलाबद्धसूतः, उभयोर्मर्दनादिति शेषः । चित्रप्रभावाम् अलौकिकसामर्थ्यां, वेगेन व्याप्तिं शृङ्खलाबन्धसूतस्य देहे इति शेषः ॥ ७९ ॥

द्रुतिबन्धमाह, युक्त इति ।—बाह्यद्रुतिभिः रसस्य द्रवत्वसम्पादकक्रियाविशेषैः युक्तः अपि बन्धं गतः बन्धनतां प्राप्तः, वा अथवा भसितस्वरूपः भस्मीभूतः सूतः द्रुतिबद्धनामा ज्ञेयः । सः द्रुतिबद्धसूतः राजिका "राइ" इति ख्यातः रक्तवर्णसर्षपविशेषः तस्याः पादमितः चतुर्भागपरिमितः ॥ ८० ॥

बालकबन्धमाह, समाभ्रेति ।—समेन तुल्येन अभ्रेण सह जीर्णः जारितः शिवजः

अथ कुमारबन्धलक्षणम् ।—

हरोद्भवो यो द्विगुणाभ्रजीर्ण स स्यात् कुमारो मिततण्डुलोऽसौ ।
त्रि सप्तरात्रैः खलु पापरोग-सङ्घातघाती च रसायनञ्च ॥ ८२ ॥

अथ तरुणबन्धलक्षणम् ।—

चतुर्गुणव्योमकृताशनोऽसौ रसायनाग्र्यस्तरुणाभिधानः ।
स सप्तरात्रात् सकलामयघ्नो रसायनो वीर्य्यबलप्रदाता ॥ ८३ ॥

अथ वृद्धबन्धलक्षणम् ।—

यस्याभ्रकं षड्गुणितो हि जीर्णः
प्राणाग्निसख्यः स हि वृद्धनामा ।
देहे च लोहे च नियोजनीयः
शिवादृते कोऽस्य गुणान् प्रवक्ति ? ॥ ८४ ॥

अथ मूर्त्तिबन्धलक्षणम् ।—

यो दिव्यमूलिकाभिश्च कृतोऽत्यग्निसहो रसः ।
विनाऽभ्रजारणात् स स्यान्मूर्त्तिबन्धो महारसः ॥ ८५ ॥
अयं हि जार्य्यमाणस्तु नाग्निना क्षीयते रसः ।
योजितः सर्वयोगेषु निरौपम्यफलप्रदः ॥ ८६ ॥

पारद बाल बालकबन्ध । योगयुत रसायनादियोगे प्रयुक्त । आविगदापह अनागतव्याधिप्रतिषेधक इत्यर्थ ॥ ८१ ॥

कुमारबन्धमाह, हरोद्भव इति ।—हरोद्भव पारद । कुमार कुमारबन्ध । मिततण्डुल तण्डुलमान । त्रि सप्तरात्रैं एकविंशतिदिवसै । पापेति ।—पापरोगाणा कुष्ठमसूरिकादीना सङ्घात समूह हन्ति नाशयति इति तथोक्त ॥ ८२ ॥

तरुणबन्धमाह, चतुर्गुणेति ।—चतुर्गुणव्योमकृताशन चतुर्गुणाभ्रजीर्ण असौ रसः रसायनाग्र्य रसायनश्रेष्ठ. ॥ ८३ ॥

वृद्धबन्धमाह, यस्येति ।—अभ्रक षड्गुणित जीर्णं षड्गुणाभ्रजीर्ण । प्राणाग्निसख्य अग्निसन्तापेऽपि अनुड्डयनशीलत्वात सखित्व ज्ञेयम् । देहे शारीररोगे, तथा लोहे लौहप्रयोगे च इत्यर्थ ॥ ८४ ॥

मूर्त्तिबन्धमाह, य इति ।—दिव्यमूलिकाभि. हिमवत्पादसम्भूतमण्डूकपर्णी-

अथ जलबन्धलक्षणम् ।—

शिलातोयमुखैस्तोयैर्बद्धोऽसौ जलबन्धवान् ।
स जरारोगमृत्युघ्नः कल्पोक्तफलदायकः ॥ ८७ ॥

अथ अग्निबन्धलक्षणम् ।—

केवलो योगयुक्तो वा ध्मातः स्याद्गुटिकाकृतिः ।
अक्षीणश्चाग्निबद्धोऽसौ खेचरत्वादिकृत् स हि ॥ ८८ ॥

अथ महाबन्धलक्षणम् ।—

हेम्ना वा रजतेन वा सहचरो ध्मातो व्रजत्येकता-
मक्षोभो निविडो गुरुश्च गुटिकाकारोऽतिदीर्घोज्ज्वलः ।
चूर्णत्वं पटुवत् प्रयाति निहतो घृष्टो न मुञ्चेन्मलं
निर्बन्धो द्रवति क्षणात् स हि महाबद्धाभिधानो रसः ॥ ८९ ॥

दिभिर्दोषाद्यविशेषे । अत्यग्निसह तीव्राग्नावपि स्थिर इत्यर्थः । निरौपम्यफलप्रद अतुलनीयसिद्धिसम्पादक ॥ ८५।८६ ॥

जलबन्धमाह शिलेति ।—शिलातोयमुखैस्तोयैः क्षारकादिजलैः । कल्पोक्त-फलदायकः रसकल्पोक्तफलदायक इत्यर्थः ॥ ८७ ॥

अग्निबन्धमाह, केवल इति ।—केवलः द्रव्यान्तरासंयुक्त इत्यर्थः । योगयुक्तः द्रव्या-न्तरसंयुक्तः । ध्मातः अग्नौ सन्तप्तः । अक्षीणः अग्नितापेऽपि यथामात्रायां स्थितः, न तु किञ्चिदप्यूनः । खेचरत्वादिकृत् मुखे धृतः नभोगतिसामर्थ्यप्रद इत्यर्थः । उद्देशग्रन्थे "जलबन्धोऽग्निबन्धश्च सुसंस्कृतकृताभिधः" इत्यनेन अग्निबन्धानन्तरं महाबन्धाच्च प्राक् सुसंस्कृतकृताख्यबन्धान्तरस्य समुल्लेखो विद्यते, विवरणग्रन्थे तु तदुल्लेखा-दर्शनात् बन्धः स लिपिकरप्रमादात् प्रमादान्तराद्वा अदर्शनतां गत इति लक्ष्यः । किञ्च सुसंस्कृतकृताभिध इत्यस्य अग्निबन्धस्य विशेषणत्वमपि न युज्यते तथात्वे बन्धस्य चतुर्विंशतिसङ्ख्याकत्वात् "पञ्चविंशतिसङ्ख्याकान् रसबन्धान् प्रचक्ष्महे" इति प्रतिज्ञाहान्यापत्तेरिति ॥ ८८ ॥

महाबन्धमाह, हेम्नेति ।—एकतां व्रजति स्वर्णरौप्याभ्यां सह मिश्रितो भवति । निविडः नोन्नतानतः, समानसर्वावयव इत्यर्थः । गुटिकाकारः स्वर्णेन रौप्येण वा सह ध्मानवशात् एकीभूय गुटिकाकारेण परिणत इत्यर्थः । अतिदीर्घोज्ज्वलः विच्छुरित-प्रभाविशिष्टः, सुचिरस्थायिप्रभासम्पन्नो वा । निहतः प्रासाघातः सन् पटुवत् लवणवत्

अथ सूतानां सङ्क्षिप्तमूर्च्छाकल्पः ।—

विष्णुक्रान्ता-शशि-लता-कुम्भी-कनकमूलकैः ।
विशाला-नागिनी-कन्द-व्याघ्रपादी-कुरुण्टकैः ॥ ९० ॥
वृश्चिकालीभशुण्डीभ्यां हंसपाद्या सहासुरैः ।
अप्रसूतगवां मूत्रैः पिष्ट्वा वा कुलके पचेत् ॥ ९१ ॥
पक्वमेवं सूतैर्लोहैर्मर्दितं विपचेद्रसम् ।
यन्त्रेषु मूर्च्छा सूतानामेष कल्पः समासतः ॥ ९२ ॥

अथ जलूकाबन्धलक्षणम् ।—

सूते गर्भनियोजितार्द्धकनके पादांशनागेऽथवा
पञ्चाङ्कुष्ठक-शाल्मली-क्षतमदा-श्लेष्मातबीजैस्तथा ।

चूर्णत्वं प्रयाति । निबन्धः यथायथमसम्पादितबन्धनक्रियः चेत् क्षणात् द्रवति, अग्नौ इति शेषः ॥ ८९ ॥

रसस्य सङ्क्षिप्तमूर्च्छाकल्पमाह, विष्णुक्रान्तेति ।—विष्णुक्रान्ता अपराजिता। शशी कर्पूरः । लता लताकस्तूरिका, यद्वा—शशिलता इत्येकपदं, तत्र श्वेतयूथिका इत्यर्थः । कुम्भी वारिपर्णी 'पाना" इति भाषा, दन्ती वा। कनकं धुस्तूरः । मूलकः स्वनामख्यातकन्दविशेषः, "मूलकैः" इत्यत्र "कूलकैः" इति पाठे—पटोलपत्रैरित्यर्थः । विशाला गोरक्षकर्कटी । नागिनी नागदन्ती। कन्दः शूरणम् । व्याघ्रपादी विकङ्कतः, "वैंचि" इति भाषा। कुरुण्टकः पीतझिण्टी, "कुरुण्टकैः" इत्यत्र "कुतुम्बकैः" इति पाठे—द्रोणपुष्पीरसैः । वृश्चिकाली वृश्चिकपत्री "विछाटी" इति ख्याता। इभशुण्डी हस्तिशुण्डी । हंसपादी गोधापदीलता । आसुरं बिडाख्यलवणम् । एषां समस्तानां यथाप्राप्तानां वा मूलाद्यन्यतमाङ्गैः सह, अप्रसूतगवां मूत्रैर्वा सह रसं पिष्ट्वा कुलके करीषाग्नौ, 'वा कुलके" इत्यत्र "वालुकके" इति पाठे—विष्णुक्रान्तादीनां मूलाद्यन्यतमाङ्गैः तथा अप्रसूतगवां मूत्रैः सह पिष्ट्वा वालुकायन्त्रे, "कुक्कुटे" इति पाठे—कुक्कुटपुटे, अयमेव पाठः साधीयस्त्वया प्रतिभाति । सुगममन्यत् ॥ ९० — ९२ ॥

जलूकाबन्धमाह, सूते इति ।—गर्भे अभ्यन्तरे नियोजितं स्थापितम् अर्द्धम् अर्द्धभागः कनकं यत्र तथाविधे अथवा पादांशः चतुर्थांशः नागः सीसकं यत्र

तद्वत्तेजिनि-कोलकाख्यफलजैश्चूर्णैं तिल पत्रक
तप्ते खल्लतले निधाय मृदिते जाता जलूका वरा ॥ ९३ ॥

अथ क्रियाविशेषेण जलूकाया गुणविशेष ।—

सैषा स्यात् कपिकच्छुरोमपटले चन्द्रावतीतैलके
चन्द्रे टङ्कणकामपिप्पलिजले स्विन्ना भवेत्तेजिनी ।
तप्ते खल्लतले विमर्दनविधियन्त्राद्वलियां कृता
सा स्त्रीणां मददर्पनाशनकरी ख्याता जलूका वरा ॥९४॥

अथ जलूकाया त्रिविधप्रमाणनिर्देश ।—

बाल्ये चाष्टाङ्गुला योज्या यौवने च दशाङ्गुला ।
द्वादशैव प्रगल्भाना जलूका त्रिविधा मता ॥ ९५ ॥

तादृशे घृते तिलचूर्णं तथा तेजपत्रचूर्णञ्च दत्त्वा तप्तखल्ले निधाय पञ्चाङ्गुष्ठादिभि सह मर्दनेन जलूकाबन्ध भवेत् इत्यर्थ । तत्र पञ्चाङ्गुष्ठ एरण्डमूलम् । कृतमदा त्रैलोक्यविजया । श्लेष्मातबीज भव्यफलबीजम् । तेजिनि मूर्वा । कोलकाख्यफल बदरफलमज्जा ॥ ९३ ॥

प्रक्रियाविशेषेण अस्या गुणविशेषमाह, सैषेति ।—सैषा जलूका, कपिकच्छुरोमपटले शूकशिम्बीफलगात्रस्थशुङ्गानिचये, तत्क्वाथे इत्यर्थ, तेन पर्य्युषितजले इत्यर्थो वा, चन्द्रावती चन्द्रमल्लिका इति ख्यात पुष्पविशेष तस्या तैलके बीजोत्थतैले, एलाबीजोत्थतैले वा, चन्द्रे कर्पूरे, कर्पूरोदके, काम दमनक "दौना" इति ख्यात, टङ्कणकामाभ्या सह पिप्पलीजले पिप्पलीक्वाथे, स्विन्ना पाचिता, तेजिनी तेज सम्पन्ना, "सर्वे सान्तास्त्वदन्ता" इति नियमानुसारेण अदन्ततेजशब्दात प्राशस्त्ये इन्, भवेत, तत तप्तखल्ले मर्दन कृत्वा यन्त्रात् यन्त्रयोगेन वलयाकार करणोपयोगियन्त्रविशेषेण, या वलि वलय कृता, सा जलूका । मददर्पेति ।—स्त्रीणा दर्पनाशनत्वञ्च मुखे बाहौ वा धारणात बोध्यम् ॥ ९४ ॥

वयोभेदेन जलूकाया मानमाह, बाल्ये इति ।—बाल्ये इत्यस्य नात्यन्तबाल्यावस्थायामित्यर्थो बाच्य, अथवा बालायामित्यर्थ करणीय, अत्र पक्षे—द्वादशादूर्द्ध षोडशादर्वाक् इत्यर्थ । यौवने षोडशादूर्द्ध त्रिंशतोऽर्वाक् । प्रगल्भाना प्रौढाना, त्रिंशत ऊर्द्ध पञ्चाशतोऽर्वागित्यर्थ. ॥ ९५ ॥

अथ जलूकायाः संस्कारविशेषः ।—

धृत्वा सूक्ष्ममुखे पात्रे मेषीक्षीरं प्रदापयेत् ।
स्थापयेदातपे तीव्रे वासराण्येकविंशतिः ॥ ९६ ॥

अथ अन्यविधां जलूकां वक्तुं प्रतिज्ञा ।—

द्वितीयाऽत्र मया प्रोक्ता जलूका द्रावणे हिता ।
पुरुषाणां स्थिता मूर्ध्नि द्रावयेद्बीजमद्भुतम् ॥ ९७ ॥

अथ द्वितीयप्रकारजलूकाबन्धः ।—

मुनिपत्ररसञ्चैव शाल्मलीवृन्तवारि च ।
जातीमूलस्य तोयञ्च शिग्रुपातीयसंयुतम् ॥ ९८ ॥
श्लेष्मातकफलञ्चैव त्रिफलाचूर्णमेव च ।
कोकिलाक्षस्य चूर्णञ्च पारदं मर्दयेद्बुधः ॥ ९९ ॥
जलूका जायते दिव्या रामाजनमनोहरा ।
सा योज्या कामकाले तु कामयेत् कामिनीं स्वयम् ॥१००॥

जलूकायाः संस्कारविशेषमाह, धृत्वेति ।—धृत्वा जलूकाबन्धरूपितं शेषं सूक्ष्ममुखे सङ्कीर्णमुखविशिष्टे । "सूक्ष्ममुखे पात्रे" इत्यत्र "सूतमुखं पात्रम्" इति पाठान्तरे—जलूकाबन्धे वलयीकृतस्य सूतस्य संयोगदेशे पात्रं धृत्वा इत्यर्थः । मेषीदुग्धे एकविंशतिदिनानि तीव्रातपे स्थापनरूपसंस्कारविशेषेण जलूकाबन्धस्य गुणवृद्धि-र्जायेत इति ॥ ९६ ॥

अन्यविधजलूकाबन्धं वक्तुं प्रक्रमते, द्वितीयेति ।—द्रावणे कामिनीद्रावणे इत्यर्थः । मूर्ध्नि स्थिता धृता इत्यर्थः । बीजं स्त्रीवीर्यम् । अद्भुतत्वञ्च पुंमूर्ध्नि स्थिता अपि स्त्रीबीजद्रावणात् बोध्यम् ॥ ९७ ॥

तमेव बन्धप्रकारमाह, मुनिपत्ररसमिति ।—मुनिपत्ररसम् अगस्त्यपत्ररसं, बकपुष्पपत्रस्वरसम् इत्यर्थः, दमनकपत्रस्वरसं वा । शाल्मलीवृन्तवारि शाल्मलीपुष्पस्य प्रसववन्धनरसम् । जातीमूलस्य तोयं मालतीलतामूलस्वरसम् । शिग्रुपातीयं संयुतं "शिग्रु" इति ख्यातवृक्षमूलस्वरससंयुतम् । श्लेष्मातकफलं बहुवारफलम् । मुनिपत्रादीनां स्वरसं त्रिफलाकोकिलाक्षयोश्चूर्णं सूतञ्चैकीकृत्य मर्दयित्वा जलूकां कुर्य्यात् ॥ ९८—१०० ॥

अथ जलूकावन्धान्तरम् ।—

त्रिफला-भृङ्ग-महौषध-मधु-सर्पिश्छागदुग्ध-गोमूत्रे ।
नागं सप्तनिषिक्तं समरसजारित जलूका स्यात् ॥ १०१ ॥

अथ प्रकारान्तरम ।—

भानुस्वरदिनसङ्ख्याप्रमाणसूतं गृहीतदीनारम् ।
अङ्कोल-राजवृक्ष-कुमारीरसशोधन कुर्य्यात् ॥ १०२ ॥
शशिरेखा-वरवर्णी-सकोकिलाक्षापामार्ग-कनकानाम् ।
चूर्णैः सहैकविंशतिदिनानि सम्मर्दयेत् सम्यक् ॥ १०३ ॥
निशाया काञ्जिक यूष दत्त्वा योनौ प्रवेशयेत् ।
बालमध्यमवृद्धासु योज्या विज्ञाय तत् क्रमात् ॥
नीरसानामपि नृणा योषा स्यात् सङ्गमोत्सुका ॥ १०४ ॥

जलूकान्तरमाह, त्रिफलेति ।—त्रिफलाक्वाथादौ पृथक् पृथक् सप्तवारं वह्नि सन्तप्त सीसक निषिच्य समरसेन सह जारित कृत्वा पूर्ववत जलूका कुर्य्यात् ॥१०१॥

प्रकारान्तरमाह, भान्विति ।—भानु द्वादश, स्वर सप्त, दिनम् एक, एतत्सङ्ख्याप्रमाणसूत द्वादशादित्रय मिलित्वा विंशतिसङ्ख्याप्रमाणरस, विंशतिपलप्रमाणरसमित्यर्थ, रससंस्कारकर्म्मणि सर्वत्रैव पलाङ्कनेन मानविधानदर्शनात् अत्रापि पलमानतैव युक्ता । गृहीतदीनार कवलितकर्षद्वयसुवर्णम् । राजवृक्ष आरग्वध । कुमारी गृहकन्या । शशिरेखा सोमराजी गुडूचौ वा । वरवर्णी गोरोचना हरिद्रा वा । कनक धुस्तूर । निशाया हरिद्राया काञ्जिक यूष काञ्जिकेन सह कृत यूषमित्यर्थ, स च यूष मुद्गादिशमीधान्येन सह काथ्य, यूषयोनित्वात् मुद्गादीनाम्, यद्वा —निशाया स्वरस, काञ्जिक तथा यूष मुद्गादियूषम् । अयमर्थ,—यामीकृतचतु र्तोलकमितस्वर्णं विंशतिपलमान सूतम् अङ्कोलादीना स्वरसेन सम्मद्य शोधन कुर्य्यात, तत तत्र शशिरेखादीनां चूर्ण युक्त्या किञ्चित् किञ्चित् दत्त्वा निशाकाञ्जिकयूषेण निशास्वरसादिभि वा एकविंशतिदिनानि मर्दयित्वा च प्रयुञ्जीत । बालेति ।—अत्रापि पूर्ववत् बालाद्यवस्थाभेदेन अष्ट दश द्वादशाङ्गुलमाना योज्या इति ॥ १०२—१०४ ॥

प्रकारान्तरम् ।—

खरमञ्जरिबीजान्वितपुष्करबीजैः सुचूर्णितैः कल्कम् ।
कृत्वा सूतं पुटयेद्दृढमूषाया भवेद्भस्म ॥ ११४ ॥

प्रकारान्तरम् ।—

काकोडुम्बरिकाया दुग्धेन सुभावितो हिङ्गुः ।
मर्दनपुटेन विधिना सूत भस्मीकरोत्येव ॥ ११५ ॥

प्रकारान्तरम् ।—

देवदालीं हरिक्रान्तामारनालेन पेषयेत् ।
तद्द्रवै सप्तधा सूत कुर्यान्मर्दितमूर्च्छितम् ॥११६॥
तत् सूत खर्परे दद्याद्दत्त्वा दत्त्वा तु तद्द्रवम् ।
चुल्लयोपरि पचेद्याङ्क भस्म स्याल्लवणोपमम् ॥११७॥

प्रकारान्तरम् ।—

अपामार्गस्य बीजानि तथैरण्डस्य चूर्णयेत् ।
तच्चूर्णं पारदे देयं मूषायामधरोत्तरम् ॥
रुद्ध्वा लघुपुटैः पश्चाच्चतुर्भिर्भस्मता नयेत् ॥ ११८ ॥

प्रक्रियान्तरमाह, खरमञ्जरीति ।—खरमञ्जरीबीजम् अपामार्गबीजम् । पुष्करबीज पद्मबीजम् । पद्मापामार्गबीजचूर्णेन सह कल्कीकृत पारद दृढमूषाया रुद्ध्वा पुटयेत्, तेन भस्मीभवति ॥ ११४ ॥

साधनान्तरमाह, काकोडुम्बरिकाया इति ।—काकोडुम्बरिका कोठोडम्बर "डुमुर" इति भाषा । हिङ्गुम् उडुम्बरक्षीरेण सप्तधा भावयेत्, तत तेन हिङ्गुना सह यथाविधि मर्दनपुटनाभ्या सूतो भस्मीभवति ॥ ११५ ॥

प्रकारान्तरमाह, देवदालीमिति ।—देवदाली हस्तिघोषक । हरिक्रान्ता विष्णुक्रान्ता, नीलपुष्पापराजिता इति यावत् । एतद्द्वयस आरनालेन सह पेषयेत, तत तरलीभूताभ्या ताभ्या सूतस्य सप्तवार मर्दनमूर्च्छनादिक कृत्वा खर्परोपरि चुल्ल्या तत सूत संस्थाप्य च उक्तद्रव तत्र पुन पुनर्दत्त्वा दत्त्वा सञ्चाल्य च दिन यावत् पचेत् एव लवणोपम भस्म जायते ॥ ११६।११७ ॥

अन्यविधमाह अपामार्गस्येति ।—अधरोत्तरम् उपर्यध. । चतुर्भि इत्यस्य लघु पुटैरित्यनेनान्वय ॥ ११८ ॥

प्रकारान्तरम् ।—

कटुतुम्ब्युद्भवे कन्दे गर्भे नारीपयःप्लुते ।
सप्तधा म्रियते सूतः स्वेदितो गोमयाग्निना ॥ ११९ ॥

प्रकारान्तरम् ।—

अङ्कोलस्य शिफावारि-पिष्टं खल्ले विमर्दयेत् ।
सूतं गन्धकसन्तुल्यं दिनान्ते तं निरोधयेत् ॥
पुटयेद्भूधरे यन्त्रे दिनान्ते स मृतो भवेत् ॥१२०॥

अन्यविधम् ।—

वटक्षीरेण सूताभ्रौ मर्दयेत् प्रहरत्रयम् ।
पाचयेत्तेन काष्ठेन भस्मीभवति तद्रसः ॥ १२१ ॥

अथ रसभस्मसेवनविधि ।—

अथाऽऽतुरो रसाचार्य्यं मान्याद्देवं महेश्वरम् ।
साधितञ्च रसं शृङ्ग-दन्तवैरवाटिधारितम् ॥ १२२ ॥
अर्चयित्वा यथाशक्ति देवगोब्राह्मणानपि ।
पर्णखण्डे धृतं सूतं जग्ध्वा स्यादनुपानतः ॥ १२३ ॥

अथ रससेवने पथ्यविधि ।—

घृतसैन्धवधान्याक-जीरकार्द्रकसंस्कृतम् ।
तण्डुलीयकधान्याक-पटोलालम्बुषादिकम् ॥१२४॥

मतान्तरमाह, कटुतुम्ब्युद्भवे इति ।—कटुतुम्बी तिक्तालावु कटुतुम्बी उद्भवति अस्मात् तादृशे कन्दे मूले, गर्भे मध्ये कटुतुम्बीमूलकल्कमध्ये इत्यर्थः ॥ ११९ ॥

विधानान्तरमाह, अङ्कोलस्येति ।—अङ्कोल "धल आँकोड" इति प्रसिद्ध । आदौ खल्ले अङ्कोठमूलरसेन तुल्यगन्धक पारद दिन यावत विमर्दयेत, ततो मूषाया निरुध्य चतुर्याम भूधरे पचेत ॥ १२० ॥

अपरमाह, वटक्षीरेणेति ।—तेन काष्ठेन वटकाष्ठेन ॥ १२१ ॥

मृतरसस्य भक्षणविधिमाह, अथेति ।—रसाचार्य्यं पारदभस्मकर्त्तार वैद्यम । पर्ण-खण्डे धृत सूतमित्यादि ।--भस्मरसं पर्णखण्डमध्ये संस्थाप्य यथाव्याध्यनुपानयोगतः भक्षयित्वा वक्ष्यमाणपथ्यसेवी स्यात् ॥ १२२।१२३ ॥

गोधूमजीर्णशाल्यन्नं गव्य क्षीरं घृत दधि ।
हंसोदक मुद्गरस: पथ्यवर्ग. समासत: ॥ १२५ ॥

अथ रससेवने अपथ्यानि ।—

बृहतीविल्वकुष्माण्डं वेत्राग्रं कारवेल्लकम् ।
माषं मसूरं निष्पावं कुलित्थं सर्षप तिलम् ॥१२६॥
लङ्घनोद्वर्त्तनस्नान-ताम्रचूडसुराऽऽसवान् ।
आनूपमांस धान्याम्ल भोजन कदलीदले ।
कांस्ये च गुरु विष्टम्भि तीक्ष्णोष्णञ्च भृशं त्यजेत् ॥१२७॥

अथ देवीशास्त्रोक्त ककारादिगण ।—

कण्टारीफलकाञ्जिकञ्च कलमस्तैलं तथा राजिका
निम्बूकं कतक कलिङ्गफल कुष्माण्डक कर्कटी ।
कारीकुक्कुटकारवेल्लकफल कर्कोटिकाया: फल
वृन्ताकञ्च कपित्थक खलु गण प्रोक्त ककारादिक: ॥१२८॥
देवीशास्त्रोदित: सोऽयं ककारादिगणो मत: ।
शास्त्रान्तरविनिर्दिष्ट: कथ्यतेऽन्यप्रकारत: ॥१२९॥

पथ्यवर्गमाह घृतेति ।—घृतादिभि मस्त्रा० तण्डुलीयादिक पथ्य सेवेत । अत्र अन्लबवा मुण्डिरी । हंसोदक "दिवा सूर्य्यांशुसन्तप्त निशि चन्द्रांशुशीतलम् । कालेन पक्वमनलमगस्त्येनाविषीकृतम् ॥ हंसोदकमिति ख्यात शारद विमल शुचि ॥" इत्युक्तलक्षणम् ॥ १२४।१२५ ॥

रसोपयोगे वर्जनीयान्याह, बृहतीति ।—कारवेल्लक "करला उच्छे" इति ख्यातम् । निष्पाव शिम्बि । लङ्घनम उपवास । उद्वर्त्तन चूर्णादिना गात्रघर्षणम् । ताम्रचूड कुक्कुट. । कदलीपत्रे कांस्यपात्रे च भोजन तथा गुर्वन्नादिकञ्च त्यजेत ॥ १२६।१२७ ॥

रसोपयोगे कुष्माण्डकारवेल्लादिरूपककारादिद्रव्यवर्जनप्रसङ्गेन देवीशास्त्रोक्त ककारादिगणमाह कण्टारीति ।—कण्टारीफल कण्टकारीफलम । कलम शालिविशेष, "कलमाधान" इति प्रसिद्ध, "कलम" इत्यत्र "कमठ" इति पाठे —कूर्मः इत्यर्थ: । तैलं कटुतैलं, वक्ष्यमाणककारादिगणे कटुतैलग्रहणात् ।

अथ श्रीकृष्णदेवोक्त-ककारादिगण ।—

कङ्गुः कन्दुककोलकुक्कुटकल-क्रोडा कुलत्थास्तथा
कण्टारो कटुतैलकृष्णगलक कूर्मः कलाय कणा ।
ककारुश्च कठिल्लकश्च कतकं कर्कोटक कर्कटी
काली काञ्जिकमेष कादिकगणः श्रीकृष्णदेवोदितः ॥१३०॥

अथ ककारादिनिषेधस्यापवाद ।—

यस्मिन् रसे च कण्ठोक्त्या ककारादिर्निषेधितः ।
तत्र तत्र निषेध्यस्तु तदौचित्यमतोऽन्यतः ॥ १३१ ॥

अथ रसव्यापदि प्रतीकार ।—

उद्गारे सति दध्यन्नं कृष्णमीन सजीरकम् ।
अभ्यङ्गमनिलक्षोभे तैलैर्नारायणादिभिः ॥ १३२ ॥

राजिका रक्तसर्षप । कतकं जलप्रसादनफल, "निर्मली" इति प्रसिद्धम् । कलिङ्गकफलम इन्द्रयव तरम्बुजो वा । कर्कटी "काँकुड" इति भाषा । कारी कण्टकारीभेद ; "कारी' इत्यत्र "कीरी" इति पाठे—शुकी, शुकजातीया स्त्रीत्यर्थ, "केकी" इति पाठे—मयूर इत्यर्थ । कर्कोटिकाया फल "काँक्रोल' इति भाषा । तैलराजिकानिम्बूकवृन्ताकाना ककारादिकत्वाभावेऽपि वर्जनीयत्वात् वर्जनीयद्रव्यप्रसङ्गेन ककारादिषु अन्तर्भावो बोध्य ॥ १२८।१२९ ॥

श्रीकृष्णदेवोक्त ककारादिगणमाह, कङ्गुरिति ।—कङ्गु प्रसातिका "काँउनि" इति प्रसिद्ध । कन्दुक पूगफलम् । कोल वदरफलम् । कल कलकण्ठ, हंसपारावतादिरित्यर्थ । क्रोड वराह । कृष्णगलक कृष्णवर्णगडकमत्स्य, "गडुइ माछ" इति भाषा, कुक्कुभपक्षी वा, "कुको पक्षी' इति भाषा । कलाय वर्त्तुलकलाय, "मटर" इति प्रसिद्ध । कणा पिप्पली, "कणा" इत्यत्र "कणी" इति पाठे—अश्वकण्ठलता । ककारु कुष्माण्डभेद "कखारु" इति उत्कले प्रसिद्ध । कठिल्लक, कारवेल्लक । काली असितवेत कृष्णजीरको वा । श्रीकृष्णदेवनामा कश्चित भिषक् ॥१३०॥

ककारादिनिषेधस्यापवादविषयमाह, यस्मिन्निति ।—कण्ठोक्त्या कण्ठरवेण तेषा नामग्रहणेन । अन्यत अन्यस्मिन् रसे । औचित्यम् उचितत्वात् न निषेध्य-मित्यर्थ ॥ १३१ ॥

रसोपयोगे मात्रादिदोषात् कस्याञ्चित् व्यापत्तौ सत्या तत्प्रतीकारमाह, उद्गारे

अरतौ शीततोयेन मस्तकोपरि सेचनम् ।
तृष्णायां नारिकेलाम्बु मुद्गयूषं सशर्करम् ॥ १३३ ॥

अथ रससेवने उपचारविधिः ।—

द्राक्षादाडिमखर्जूर-कदलीनां फलं भजेत् ।
रसवीर्य्यविवृद्ध्यर्थं दधिक्षीरेक्षुशर्करा ॥
शीतोपचारमन्यच्च—" ॥१३४॥

अथ रसत्यागे उपचारविधिः ।—

"—रसत्यागविधौ पुनः ।
भक्षयेद्बृहतीबिल्वं सकृत् साधारणो विधिः ॥ १३५ ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
रसशोधनबन्धनभस्मजलूकादिनिरूपणं नामैकादशोऽध्यायः ॥११॥

इति ।—कृष्णमीनं कृष्णवर्णमत्स्यविशेषं शङ्गीमद्गुरादिकं तच्च सजीरकं नीरकं संस्कृतं कृत्वा दद्यादिति शेषः । अन्यत् स्पष्टम् ॥ १३२।१३३ ॥

उपयुक्तरसस्य वीर्य्योत्कर्षार्थं क्रियाविशेषमाह, द्राक्षेति ।—दध्यादिकं भक्षयेत् उक्तातिरिक्तं शीतोपचारञ्च कुर्य्यात् ॥ १३४ ॥

रससेवनप्रयोजने सिद्धे त्यागकालिककर्त्तव्यमाह, रसत्यागविधाविति ।—सकृत् एकवारं बृहतीं बिल्वञ्च भक्षयेत्, एतेन रसोपयोगफलं स्थिरं भवेत् त्यागजन्या काचित् व्यापत्तिः कालान्तरे फलापगमो वा न जायते इति बोध्यम् । साधारणो विधिः अतः परं यथेष्टाहाराचारः करणीयः, यद्वा—साधारणविधिः रससेवायाम् एष सामान्यनियमः ॥ १३५ ॥

इति रसरत्नसमुच्चयबोधिन्याम् एकादशोऽध्यायः ॥ ११ ॥

अथ द्वादशोऽध्यायः ।

अथ ज्वरचिकित्सनम् ।—

अथ चिकित्सनीयरोगाणां यथाक्रमं नामानि ।—

ज्वरस्य रक्तपित्तस्य कासस्य श्वासहिध्मयोः ।
वैस्वर्य्यस्य क्षयस्यापि तथाऽरोचप्रसेकयोः ॥ १ ॥
छर्दिहृद्रोगयोश्चैव तृष्णामद्योद्भवार्शसाम् ।
उदावर्त्तातिसाराणां ग्रहण्यन्त्रिप्रवाहिणोः ॥ २ ॥
विसूच्या वह्निमान्द्यस्य मूत्रकृच्छ्राश्मरीरुजाम् ।
मेहस्य सोमरोगस्य पिडकानाञ्च विद्रधेः ॥ ३ ॥
वृद्धिगुल्मादिरोगाणां शूलानामुदरस्य च ।
पाण्डुशोफविसर्पाणां कुष्ठचित्रनभस्वताम् ॥ ४ ॥
वातास्रस्याऽऽहतानाञ्च वन्ध्यानां गर्भिणीरुजाम् ।
सूतिकाबालरोगाणामुन्मादेऽपस्मृतावपि ॥ ५ ॥
नेत्ररोगे कर्णरोगे नासारोगाऽऽस्यरोगयोः ।
शिरःसञ्जातरोगेषु व्रणे भग्ने भगन्दरे ॥ ६ ॥

सर्व्वेष्वेव रोगेषु उपयोगितया रसस्य प्राधान्यात प्रथमं रसाध्यायं विहाय इदानीं सर्वरोगेषु प्रथमोत्पन्नत्वात तथा जन्ममरणयोरवश्यम्भावित्वेन सर्वरोगेषु अव्यभिचारितया वर्त्तमानत्वेन च प्राधान्याच्च आदौ ज्वरचिकित्सितं वक्तुं द्वादशाध्यायमारभते, तत्र च प्रस्तुतग्रन्थोक्तरोगाणां नामनिर्देशानन्तरं यथाक्रमं चिकित्सितं वक्तुं प्रतिजानीते, ज्वरस्येति ।—हिध्मा हिक्का । प्रसेकः प्रतिश्यायः । मद्योद्भवः मदात्ययः । प्रवाहिणः प्रवाहिकायाः । पिडकानां प्रमेहपिडकानां । कुष्ठेति ।—चित्रं कुष्ठविशेषः श्वेतकुष्ठं वा, नभस्वान् वायुः तेषां, कुष्ठादिरोगाणामित्यर्थः, यद्वा—चित्रनभस्वतां विविधवातरोगाणाम्, "चित्रनभस्वताम्" इत्यत्र "श्वित्रनभस्वताम्" इति पाठान्तरं समीचीनम् । आहतानामित्यत्र वातानामिति शेषो बोध्यः, दोषाच्छन्नवायूनामिति यावत् । भग्ने भग्नरोगे । गुह्यरोगे उपदंशादिगोपनीयरोगे

अन्यथादौ क्षुद्ररोगेषु गुह्यरोगे विषेषु च।
जरायास्त्वनपत्यानां बीजपोषणहेतवे ॥ ७ ॥
परिपाट्याऽनया सर्वं रोगाणां हि चिकित्सितम्।
रसलोहविषैरत्र योगैर्वक्ष्ये यथाऽऽगमम् ॥ ८ ॥

अथ वातज्वरलक्षणम्।—

रोमाञ्चकम्पौ वदने मधुत्वमुज्जृम्भणं मस्तकतोददाहौ।
वातज्वरस्योक्तमिदं हि लक्ष्म भुक्तोत्तरं स्याद्यदि शश्वदेव ॥९॥

गुदभ्रंशादिरोगे वा। जरायाः वार्द्धक्यस्य। अनपत्यानां पुत्रहीनानां बीजपोषणहेतवे शुक्रवृद्ध्यर्थं, चिकित्सितम् इति योज्यम्, तत्र जरायाः चिकित्सितं रसायनौषधं, "यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्" इत्युक्तेः, तथा अनपत्यानां बीजपोषणार्थं चिकित्सितं वाजीकरणौषधमिति ज्ञेयम्। परिपाट्या पर्यायक्रमेण, उद्देशानुयायिपौर्वापर्यानुक्रमेणेत्यर्थः। रसलोहविषैः रसाश्च लोहाश्च विषाणि च यत्र तैः, तादृशैः योगैः रसादिनिर्मितभेषजैः। यथाऽऽगमं यथाशास्त्रम्। क्वचित्—"योगैर्वक्ष्ये यथाऽऽगमम्" इत्यनन्तरं "ज्वरितो हितमश्नीयात् यथा नास्यारुचिर्भवेत्। अन्नकाले ह्यभुञ्जानः क्षीयते म्रियतेऽथवा॥ यावत् सूतं न शुद्धं न च मृतमथ नो मूर्च्छितं गन्धबद्धं नो वज्रं मारितं वा न च गगनवधो नोपसृताश्च शुद्धाः। स्वर्णाद्यं सर्वलोहं विषमपि न मृतं तैलपाकेऽनभिज्ञः तावद्वैद्यः क्व सिद्धो भवति वसुमुजां मण्डले श्लाघ्ययोग्यः॥ अथ ज्वराणां लक्षणानि प्रतीकाराश्चोच्यन्ते" इत्यधिकः पाठो दृश्यते॥ १—८॥

अथ उद्देशानुसारेण ज्वरचिकित्सितं वक्ष्ये चिकित्सायां वातजादिभेदज्ञानस्य विशिष्टोपयोगित्वात् वातजादिलक्षणं विवक्षुराचार्यः वातविकाराणामसङ्ख्येयत्वात् आशुकारित्वाच्च दोषेषु वातस्यैव प्राधान्यात् आदौ वातज्वरलक्षणमाह, रोमाञ्चेति।—रोमाञ्चः रोमहर्षः। वदने मधुत्वं माधुर्यम्, "वदने मधुत्वम्" इति पाठस्तु मुद्राकरप्रमादज इति मन्ये, यतः वातः कषायरसः, तज्जविकारे च मुखस्य कषायरसतायाः एव सर्वत्रैव चरकादिषु समुल्लेखः दृश्यते, अतः अत्र "अमधुत्वम्" इत्येव पाठः साधुः, अमधुत्वं माधुर्याभावः, मुखस्य विरसता इत्यर्थः, तथा च चरकनिदानस्थाने वातज्वरलक्षणे,—"कषायास्यत्वमास्यवैरस्यं वा" इति। सुश्रुतेऽपि उत्तरतन्त्रे ज्वरप्रतिषेधे "शिरोहृद्गात्ररुग्वक्त्रवैरस्यम्" इति। लक्ष्म चिह्नं, रूपमित्यर्थः।

अथ पित्तज्वरलक्षणम् ।—

विरेकशोषास्यकटुत्वतीव्र-तापप्रलापभ्रमसूर्च्छनानि ।
एतानि पित्तज्वरलक्षणानि वमिः सतृष्णाङ्गविदाहिता च ॥१०॥

अथ कफज्वरलक्षणम् ।—

कासश्वासौ मुखे जाड्यं माधुर्य्यं बहुनिद्रता ।
प्रस्वेदः स्वल्पदाहश्च श्लेष्मजज्वरलक्षणम् ॥ ११ ॥

भुक्तोत्तरमिति ।—यदि अस्मिन् नित्यं भुक्तोत्तर भुक्तस्य भोजनस्य उत्तरम अनन्तरमित्यर्थ, भोजनपरिणामानन्तरमिति यावत, तस्यैव वातप्रकोपकत्वेन उक्तत्वात, तथा च—"वायुर्वारिधरागमे परिणते चान्नेऽपराह्णेऽपि च" इति, अन्ने परिणते जीर्णे इत्यर्थः । यदि स्यात, कोप इति शेष' ॥ ९ ॥

पित्तज्वरलक्षणमाह, विरेकेति ।—विरेक विरेचन, द्रवमलनि सरणम् इति यावत। शोष, मुखस्येति शेष । आस्यकटुत्व मुखस्य तिक्तता अथवा पित्तस्य कटुत्वात् कटुरसत्वमपि भवितुमर्हति मुखस्य, तथा च "कट स्यात कटुतिक्तयो" इति मेदिनी । तीव्रसन्ताप इत्यत्र देहस्य इति शेषो बोध्य । प्रलाप अनन्वयकवाक्यप्रयोग । भ्रम स्वदेहभ्रमणज्ञानम, अथवा—भ्रम पीत शङ्ख इत्यादिवत भ्रमज्ञानम, ननु अशीतिवातविकारमध्ये पठितस्य भ्रमस्य पित्तविकारमध्ये ग्रहणं कथ सङ्गच्छते इति चेत उच्यते—तस्य वातलिङ्गत्वेऽपि "रज पित्तानिलाद्भ्रम" इति उत्तरत्र दर्शनात् पित्तस्यापि तत्र कर्त्तृत्वोपलब्धे सपित्तवातस्यैव तदुत्पादकत्व बोध्यम् इति । अङ्गविदाहिता अङ्गेषु वि विशेषेण दाह ॥ १० ॥

कफज्वरलक्षणमाह, कासेति ।—जाड्य स्तब्धता, देहस्य जडिमा इत्यर्थ । माधुर्य्यमित्यस्य मुखे इत्यनेनान्वयो बोध्य, अथवा—जाड्यमपि मुखे एव, कफस्य अरुचिकारित्वात भोजनविषये अक्षमता इत्यर्थ । प्रस्वेद अत्यर्थं स्वेददर्शन, किन्तु ज्वरे प्रायश स्वेदावरोधस्य एव अनुशासनदर्शनात् प्रस्वेद इत्यत्र अस्वेद इति पाठ युक्ततया प्रतिभाति, अथवा प्रस्वेद प्रगत स्वेद तेन स्वेदाभाव इत्यर्थ, प्रशब्दस्य प्रगतार्थकत्वम् अन्यत्रापि दृश्यते, यथा चक्रपाणिकृतसङ्ग्रहस्य अतीसारचिकित्सितव्याख्याने शिवदास,—"कार्य्यश्चानशनस्यान्ते प्रद्रव लघुभोजनम्" इत्यत्र "प्रद्रव प्रगतद्रवम्", विस्तरस्तु तत्रैव अनुसन्धेय । स्वल्पदाहश्चेति ।—"गौरव शीतमुत्क्लेद" इत्यादिसौश्रुतकफज्वरलक्षणे शीतदर्शनात् कफजे स्वल्पदाह, इति लक्षण यद्यपि

अथ द्वन्द्वसन्निपातज्वराणामतिदेशिकलक्षणम् ।—

मिश्रितं लक्षणं यत्तु द्वयोस्त्रिषु भवेच्च तत् ॥ १२ ॥

अथ रसायनानि । ॐ—

अथ त्रैलोक्यसुन्दररसः ।—

विमर्दिताभ्यां रसगन्धकाभ्यां
नीरेण कुर्यादिह गोलकं तम् ।
भाण्डे नवीने विनिवेश्य पश्चात्
तद्गोलकस्योपरि ताम्रपात्रम् ॥ १३ ॥

भाण्डं मुहूर्त्तं विनिरुध्य धीमान्द्दीपयेद्दीप्तकृशानुनाऽस्य ।
अधस्ततः सिध्यति पर्पटीयं नवज्वरारण्यकृशानुमेघः ॥१४॥

विरुद्धतया प्रतिभाति तथाऽपि सर्वस्मिन्नेव ज्वरे पित्तस्याव्यभिचरितत्वात् कफजेऽपि स्वल्पदाहः सम्भवत्येव इति न कश्चिद्विरोधः ॥ ११ ॥

द्वन्द्वजसन्निपातजानां लक्षणमतिदिशन्नाह मिश्रितमिति ।—यत् लक्षणं मिश्रितं वातादिदोषत्रयाणां पृथक् पृथक् यल्लक्षणमुक्तं तत् लक्षणं संसृष्टं द्वयोः द्वन्द्वजेषु, वातपित्त वातश्लेष्म पित्तश्लेष्मजेषु इत्यर्थः, त्रिषु त्रिदोषजेषु, सन्निपातेषु इत्यर्थः, भवेत्, द्वन्द्वजेषु द्वयोर्द्वयोर्दोषयोः पृथक् पृथक् यल्लक्षणमुक्तं तदेव मिलितं भवेत् एवं त्रिदोषजेऽपि त्रयाणां दोषाणां पृथक् पृथक् यल्लक्षणमुक्तं तन्मिलितं भवेदिति ॥१२॥

त्रैलोक्यसुन्दररसे—नवज्वरारण्यकृशानुमेघः नवज्वर एव आरण्यकृशानुः दावानलः तस्य मेघः लक्षणया मेघनिःसृतमिव, मेघस्य अनलप्रशमनशक्तेरदृष्टत्वात्, मेघनिःसृतं वारि यथा अनलं निर्वापयति, अथ त्रैलोक्यसुन्दरोऽपि

इदानीम् उद्दिष्टानां व्याधीनां प्रशमनं वक्तुं प्रस्तौति, अथ रसायनानीति । —यद्यपि चरकादौ "यज्जराव्याधिविध्वंसि भेषजं तद्रसायनम्" इत्यनेन जराव्याधिविनाशनौषधानां रसायनसंज्ञा तथा "कायतन्त्रं रसायनतन्त्रम्" इत्यादिना ज्वरादिचिकित्सिताधिकारात् रसायनाधिकारस्य पृथक्त्वञ्च परिदृश्यते, तथाऽपि "रसेन्द्रमिव निःशेषं जराव्याधिविनाशनम्" "हतो हन्ति जराव्याधिम्" इत्याद्युक्त्या रसघटितानां सर्वेषामेवौषधानां जराव्याधिनाशनसामर्थ्यात् तेष्वपि रसायनसंज्ञा न दोषावहा इति ।

विलिप्य पूर्वं रसनाञ्च तालु-देशञ्च सिन्धूद्भवजीरकार्द्रैः ।
वस्त्रोन्मितां चाऽऽर्द्रकतोयमिश्रामेनां नियोज्य स्थगयेत् पटेन ॥१५॥
घर्मोद्गमो यावदतः परञ्च तक्रौदनं पथ्यमिह प्रयोज्यम ।
कुर्य्याद्दिनानां त्रितयं यदीत्थं ज्वरस्य शङ्काऽपि तदा भवेत् किम् ?
॥ १६ ॥

अथ त्रैलोक्यडम्बररसः ।—

सूतार्कगन्धचपला-जयपालतिक्ता
पथ्या त्रिवृच्च विषतिन्दुकजान् समांशान् ।
सम्भाव्य वज्रिपयसा मधुना त्रिवल्ल-
स्त्रैलोक्यडम्बररसोऽभिनवज्वरघ्नः ॥ १७ ॥

अथ मेघनाद रसः ।—

पादांशकंसाररविः समांश-गन्धो विपक्वः स्वकषायपिष्टः ।
रसः क्रमान्माषमितश्चलादि-ज्वरेषु नाम्ना किल मेघनादः ॥१८॥

तथा नवज्वरं नाशयतीत्यर्थः । आदौ यथाविधि शुद्धरसगन्धकं कज्जलीकृत्य जलेन सम्मर्द्य च गोलकं कुर्य्यात्, ततः तद्गोलकं नूतनभाण्डे स्थापयित्वा केनचित्ताम्रपात्रेण आच्छाद्य च सन्धिं लिप्त्वा चुल्ल्युपरि संस्थापयेत्, अधश्च वह्निं दत्त्वा मुहूर्त्तं (दण्डद्वयं) पचेत्, ततः पर्पटिकाकारो भवेत्। अस्योपयोगकाले च आर्द्रकरसेन सैन्धवजीरकैः पिष्ट्वा तेन जिह्वातालू आलिप्य आर्द्रकरसेनैव अस्य रक्तिद्वयं पीत्वा पश्चात् वस्त्रेणात्मानमवगुण्ठयेत् घर्मदर्शनं यावत्, ततः तक्रौदनं पथ्यं कर्त्तव्यम्, एवं दिनत्रयेणैव ज्वरो नश्यति ॥ १३—१६ ॥

त्रैलोक्यडम्बररसे—अर्कः ताम्रं, चपला पिप्पली, तिक्ता कटुकी विषतिन्दुकजान् कुचीलुबीजानि "कुँचिला" इति ख्यातान् । सम्भाव्य भावयित्वा, भावना च सप्तकृत्व देया। वज्रिपयसा स्नुहीक्षीरेण । त्रिवल्लः गुञ्जाषटकपरिमितः ॥ १७ ॥

मेघनादरसे—पादांशकंसाररविः पादांशः रसभागापेक्षया प्रत्येकं चतुर्थभागः, कंसः कांस्यम्, आरः पित्तलं, रविः ताम्रं एव तादृशः । समांशगन्धः रसेन तुल्यः गन्धकः । विपक्वः पुटे पक्वः । स्वकषायपिष्टः मेघनादस्य स्वरसेन क्वाथेन वा पिष्टः, मेघनादः रक्ततण्डुलीयकः । रसः पारदः । चलादिज्वरेषु वातादिज्वरेषु, "रूक्षः शीतो लघुः सूक्ष्मश्चलोऽथ विशदः खरः" इत्युक्त्या चलस्य वातधर्मत्वात्

अथ ज्वरगजहरिरसः ।—

दरदजलदयुक्तं शुद्धसूतञ्च गन्धं
प्रहरमथ सुपिष्टं वल्लयुग्मञ्च दद्यात् ।
ज्वरगजहरिसंज्ञं शृङ्गवेरोदकेन
प्रथमजनितदाहो क्षीरभक्तेन भोज्यः ॥ १९ ॥

अथ दीपिकारसः ।—

सप्तमसीसभागञ्च पारदं गन्धकं कणाम् ।
समभागं पृथक्त्वत्र मेलयेच्च यथाविधि ॥ २० ॥
जम्बीरस्य रसे सर्वं मर्दयेच्च दिनत्रयम् ।
मेघनादकुमार्य्योश्च रसे चापि दिनत्रयम् ॥ २१ ॥
दिनद्वयमजामूत्रे गवां मूत्रे दिनत्रयम् ।
भावयेच्च यथायोग्यं तस्मिन्नेतानि दापयेत् ॥ २२ ॥
सैन्धवं चित्रकं भागं सौवर्च्चलवणं तथा ।
तेन सम्मेलनं कृत्वा भावयेच्च पुन. पुनः ॥ २३ ॥

धर्मधर्मिणोरभेदोपचारात् चलशब्देनात्र वातो गम्यते, यद्वा—चलादिज्वरेषु विषमज्वरादिषु, "यः स्यादनियतात् कालात् शीतोष्णाभ्यां तथैव च । वेगतश्चापि विषमो ज्वरः स विषमः स्मृतः ॥" इति विषमज्वरलक्षणे कालस्यानियतत्वं चलत्वं बोध्यम् । यत्तु रसेन्द्रसारसङ्ग्रह रसेन्द्रचिन्तामण्यादौ "आरं कांस्यं मृतं ताम्रं त्रिभिस्तुल्यञ्च गन्धकम् । रसेन मेघनादस्य पिष्ट्वा बद्ध्वा पुटे पचेत् ॥" इत्यादिना मेघनादरस उक्तः स रसयुक्तात् अस्माद्भिन्न एव इति मन्तव्यम् ॥ १८ ॥

ज्वरगजहरिरसे—दरदं हिङ्गुलम् । जलदम् अभ्रं, न मुस्तकं, दरदसूतादिसाहचर्य्यानुरोधात् । वल्लयुग्मं चतुर्गुञ्जामितम् । प्रथमेति ।—प्रथमं ज्वरादौ जनितः उत्पादितः, दोषैरिति शेषः, यद्वा—जनित इति स्वार्थे णिच् तेन जात इत्यर्थः, दाहः स अस्यास्तीति दाहपूर्वज्वरीत्यर्थः । क्षीरभक्तेन सदुग्धान्नेन करणेन भोज्यः भोजनं कारयितव्य इत्यर्थः ॥ १९ ॥

दीपिकारसे—सप्तमसीसभागं सीसकभस्मनः भागमेकम् । कणां पिप्पलीम् । सम सीसकभागे । यथाविधि यथाक्रमम् । मेघनादः तण्डुलीयकः, कुमारी

अनेन विधिना सम्यक् सिद्धो भवति तद्रसः।
शर्कराघृतसंयुक्तं दद्याद्वल्लत्रयं रसम् ॥ २४ ॥
गोधूमस्यौदनं पथ्यं माषसूपञ्च वास्तुकम्।
धात्रीफलसमायुक्तं सर्वज्वरविनाशनम् ॥
दीपिकारस इत्येष तन्त्रज्ञैः परिकीर्त्तितः ॥ २५ ॥

अथ शीतभञ्जीरसः।—

पारदं रसकं तालं तुत्थं गन्धकटङ्कणम्।
सर्वमेतत् समं शुद्धं कारवल्ल्या द्रवैर्दिनम् ॥ २६ ॥
मर्दयेत्तेन कल्केन ताम्रपात्रोदरं लिपेत्।
अङ्गुलार्द्धार्द्धमानेन तं पचेत् सिकताह्वये ॥ २७ ॥
यन्त्रे यावत् स्फुटन्त्येव व्रीहयस्तस्य पृष्ठतः।
ततः सुशीतलं ग्राह्यं ताम्रपात्रोदराद्भिषक् ॥ २८ ॥
शीतभञ्जो रसो नाम चूर्णयेन्मरिचैः समम्।
माषैकं पर्णखण्डेन भक्षयेन्नाशयेज्ज्वरम् ॥
त्रिदिनैर्विषमं तीव्रमेकाहिकद्वित्रिचतुर्थकम् ॥ २९ ॥

घृतकुमारिका, अनयो प्रत्येकस्वरसेन दिनत्रयं भाव्यम्। सैन्धवमिति।—शीसकादिकं जम्बीरादीनां रसेन यथाविधि भावयित्वा पश्चात् सैन्धवादिकं मेलयित्वा च पुनः जम्बीरादिभि यथोक्तविधानेन भावयेत्। गोधूमस्यौदनं गोधूमकृतभक्ष्यम्। धात्रीफलसमायुक्तम् आमलक्या संस्कृतम् ॥ २०—२५ ॥

शीतभञ्जीरसे—रसकं खर्परम्। तालं हरितालम्। लिपेदित्यत्र नुमोऽभाव आर्षस्छान्दसो वा, तेन लिम्पेदित्यर्थः। अङ्गुलार्द्धार्द्धमानेन पादाङ्गुलि-प्रमाणोत्सेधवता इत्यर्थः, कल्केन इत्यनेनान्वयः। सिकताह्वये वालुकायन्त्रके। पारदादिद्रव्यषट्कं कारवेल्लरसेन दिनमेकं मर्दयेत् तावत् यावत् पिण्डतां गच्छेत्, ततः तत्कल्केन ताम्रपात्रस्य कस्यचित् अभ्यन्तरदेशं पादाङ्गुलोत्सेधप्रमाणं यथा भवति तथा लिप्त्वा पात्रान्तरेणाच्छाद्य च सन्धिं लिप्त्वा तत्पात्रं वालुकायन्त्रगं पचेत्, वालुकोपरि कतिचित् व्रीहीन् संस्थापयेच्च, ततः पात्राधस्तावज्ज्वाला देया, यावत् व्रीहयः न स्फुटन्ति, अनन्तरं स्वाङ्गशीतलात् ताम्रपात्रादौषधमाकृष्य चूर्णयेत्,

अथ मृतजीवनरस ।—

कुष्माण्डचूर्णतिलजै प्रतिशुद्धताल
गाढ विमर्द्य सुषवीसलिलेन तुल्यम् ।
सूतेन हिङ्गुलभुवा सिकताख्ययन्त्रे
गोलं विधाय परिवृत्तकपालमध्ये ॥ ३० ॥

पत्रेण त दिनपतेरपिधाय रुद्ध्वा
सन्धि तयोर्गुडसुधाखटिकाशिवाभिः ।
वह्नौ पचेन्मृदुनि यावदिह स्थशालि-
वैवर्ण्यमात्रमवधि प्रविधाय धीमान् ॥ ३१ ॥

वल्ल ततः सुरसमिश्रममुष्य दद्यात्
सर्पि सिता कणपयो मधु चानुपेयम् ।
जेतुं ज्वरान् प्रविषमानिह वान्तिशान्त्यै
मौलौ सुशीतलजलस्य ददीत धाराम् ॥ ३२ ॥

अथाऽऽमयान्त रसराजमौलि-भूषामणि तं मृतजीवनाख्यम् ।
सुधारसेनेव रसेन येन सञ्जीवन स्यात् सहसाऽऽतुराणाम् ॥ ३३ ॥

तत मरिचै पर्णखण्डेन च सह माषैकमौषध भक्षयेत । व्यवहारिकी मात्रा तु गुञ्जाद्वयमिता ॥ २६—२९ ॥

मृतजीवनरसे—कुष्माण्डचूर्णतिलजै कुष्माण्डसलिलेन चूर्णोदकेन तिलतैलेन च। "प्रतिशुद्ध" इत्यत्र "प्रविशुद्ध" इति पाठस्तु समीचीन । सुषवीसलिलेन कारवेल्लरसेन। सूतेन हिङ्गुलभुवा हिङ्गुलोत्थपारदेन। परिवृत्तकपालमध्ये गोलाकार-मृन्मूषामध्ये। दिनपते अर्कस्य। सुधा चूर्णम्। सुरसामिश्र तुलसीपत्ररससहितम्। मौलौ शिरसि। आमयान्तम् आमयानाम अन्तो यस्मात (रोगान्तकरम् । कुष्माण्ड-सलिलादिभि यथाविधि शोधितहरिताल हिङ्गुलोत्थपारदञ्च समपरिमित गृहीत्वा कारवेल्लरसेन गाढ विमर्द्य पिण्डाकार कुर्यात, तत अर्कपत्रेणावेष्ट्य सुदृढमृन्मूषायां सस्थाप्य च गुड चूर्ण खटिका हरीतकीचूर्णैर्मर्दितै सन्धि निरुन्ध्यात। तत वालुका-यन्त्रमध्ये मूषा ता सस्थाप्य पूर्ववत् वालुकोपरि शालीन् निधाय मन्दवह्निना तावत् पचेत् यावत शालयो विवर्णा जायन्ते, तत स्वाङ्गशीत त समुद्धृत्य सुगुप्त स्थापयेत्।

अथ शीतभञ्जीरस।—

सूततालशिलातुल्या मर्दयेत् कर्कटीरसे।
ताम्रपात्रे विनिक्षिप्य तत् कल्कं कज्जलीकृतम्॥ ३४॥
विपचेत् वालुकायन्त्रे यथोक्तविधिना ततः।
दद्यान्मरिचचूर्णेन माषमात्रं भिषग्वरः॥ ३५॥
प्रपिबेदुष्णतोयस्य चुलुकं शीतकज्वरे।
शीतभञ्जो रसः सोऽयं शीतज्वरनिवारणः॥ ३६॥

अथ वृहज्ज्वराङ्कुश।—

रसहिङ्गुलजैपालैर्वृद्धया दन्त्यम्बुमर्दितैः।
दिनार्द्धेन ज्वरं हन्याद्गुञ्जैकं सितया सह॥ ३७॥

अथ महाज्वराङ्कुश।—

शुद्धं सूतं विषं गन्धं धूर्त्तवीजं त्रिभिः समम्।
चतुर्भिश्च समं व्योषं चूर्णीकृत्य निधापयेत्॥ ३८॥
दन्तभाण्डेऽथवा शार्ङ्गे काष्ठे नैव कदाचन।
वातश्लेष्मज्वरे देयं द्वन्द्वजे वा त्रिदोषजे॥ ३९॥
रसेन शृङ्गवेरस्य जम्बीरस्याथवा पुनः।
गुञ्जाद्वयञ्च जीर्णेऽस्मिन् दधिभक्तं प्रयोजयेत्॥ ४०॥

गुञ्जाद्वयमितं ततं तुलसीरसेन पीत्वा सर्पिरादिकं सर्वमनुरूपमात्रया आलोड्य अनुपानं कुर्यात्। औषधसेवनेन चेत् वान्तिर्जायेत तदा सुशीतलजलेन मुखाननमभिषिञ्चेत॥ ३०—३३॥

शीतभञ्जीरसे—शिला मनःशिला। कर्कटी एर्वारु, "कर्कटी" इत्यत्र "मर्कटी" इति पाठान्तरे—मर्कटी शूकशिम्बी। चुलुकं गण्डूषम्॥ ३४—३६॥

वृहज्ज्वराङ्कुशे—वृद्धया भागवृद्धया, तेन रसस्य एको भागः हिङ्गुलस्य द्वौ जैपालस्य च त्रयो भागा ग्राह्याः। दन्त्यम्बुमर्दितैः दन्तीमूलक्वाथेन पिष्टैः। ग्रन्थान्तरेऽस्य हिङ्गुलेश्वरसंज्ञा ज्ञातव्या॥ ३७॥

महाज्वराङ्कुशे—मिलितव्योषं सूतादिभिश्चतुर्भिः तुल्यं ग्राह्यम्। दन्तभाण्डे हस्तिदन्तनिर्मितभाजने। शार्ङ्गे माहिषादिशृङ्गमये भाजने। वातश्लेष्मज्वरे वातज्वरे

एकद्वित्रिदिनैर्हन्याज्ज्वरान् दोषक्रमेण तु ।
महाज्वराङ्कुशो नाम रसोऽयं शम्भुनोदितः ॥ ४१ ॥

अथ मृत्युञ्जयः ।—

तालं ताम्ररजो रसश्च गगनं गन्धश्च नेपालकं
दीनारप्रमितं तदर्द्धमुदितं टङ्कं शिला माक्षिकम् ।
दीनारद्वितयं विषस्य शिखिनः पिष्ट्वा रसैः पाचितो
यश्चिन्तामणिवज्ज्वरौघविजयी नाम्ना तु मृत्युञ्जयः ॥४२॥

अथ सर्वज्वरारिः ।—

तालं ताम्रमयोरजश्च चपला-तुत्थाभ्रकं कान्तकं
नागं स्याच्च समांशकं सुमृदितं मूलञ्च पौनर्नवम् ।
भृङ्गीकासहरीपुनर्नवमहा-मन्दारपत्रोद्भवैः
कल्कं वालुकयन्त्रपाचितमिदं सर्वज्वरस्यान्तकृत् ॥४३॥

अथ चन्द्रसूर्य्यो नाम रसः ।—

तुत्थेन तुल्यः शिवजश्च गन्धो जम्बीरनीरेण विमर्दनीयः ।
दिनत्रयं मेलय तेन तुल्यं व्योषं ततः सिध्यति चन्द्रसूर्य्यः ॥४४॥

श्लेष्मज्वरे च, न तु वातश्लेष्मज्वरे, द्वन्द्वजस्य पृथगुपादानात् । अस्मिन् औषधे । एकेति ।—एकदोषजमेकदिनेन, द्विदोषजं दिनद्वयेन, सन्निपातजञ्च दिवसत्रयेण हन्यादित्यर्थः ॥ ३८—४१ ॥

मृत्युञ्जये—ताम्ररजः मारितताम्रचूर्णम् । गगनम् अभ्रम् । नेपालकं नेपाली, मनःशिला इत्यर्थः । दीनारप्रमितं शाणमितम् । तदर्द्धं दीनारार्द्धं, माषद्वयमित्यर्थः । टङ्कं टङ्कणम् । शिला शिलाजतु, "नेपालकम्" इत्यत्र "जेपालकम्" इति पाठे तु—शिलया मनःशिला ग्राह्या । माक्षिकं धातुमाक्षिकम । शिखिनः चित्रकस्य । पाचितः पुटपक्वः । चिन्तामणिवत् चिन्तामणिरसवत् नारायणवत् वा ॥ ४२ ॥

सर्वज्वरारौ—चपला पिप्पली । कान्तकं कान्तलौहं । नागं सीसकम् । पौनर्नवं मूलं पुनर्नवामूलम् । भृङ्गी विजया । कासहरी कासमर्दः कण्टकारी वा । पुनर्नवेत्यत्र श्वेतपुनर्नवाऽनुरोधात् । महा गोरक्षतण्डुला । मन्दारः पारिभद्रकः ॥ ४३ ॥

चन्द्रसूर्य्यरसे—शिवजः पारदः । तेन तुल्यादित्यर्थः तुल्यं व्योषं मिलितत्रिकटु-

वल्लो विजेतुं विषमावलम्बि दलेन देयो भुजगाख्यवल्ल्याः ।
दुग्धं हितं स्यादिह शृङ्गवेर-रसेन शैत्ये ह्युपसेवनीयः ॥४५॥
तक्रं सगर्भज्वरशूलयोस्तु द्राक्षाम्बुना पथ्यमनन्तरोक्तम् ।
रोधं वरायाः सलिलेन शूले जम्बीरनीरेण वराजलेन ॥४६॥
अपस्मृतावत्र नियोजनीयमभ्यञ्जनं निम्बपयोभवाभ्याम् ।
घृतौदनं स्यादिह भोजनाय जम्बीरनीरेण निहन्ति गुल्मम् ॥४७॥
हिङ्ग्वम्लिकानिम्बुरसेन देयं प्लीहोदरे स्यादिह तक्रभक्तः ।
स्तम्भार्थमस्मिन् ससितं पयः स्याद्गुडो नियोज्यो वमनप्रशान्त्यै ॥४८॥

अथ विषप्रयोगायोग्यनिर्देशः ।—

अशीतिर्यस्य वर्षाणि वसुवर्षाणि यस्य वा ।
विषं तस्य न दातव्यं दत्तं चेद्दोषकारकम् ॥ ४९ ॥

अथ उमाप्रसादनो रसः ।—

मेघपारदवैगन्ध-विषव्योषपटूनि च ।
जारकद्वयमेतानि समभागानि कारयेत् ॥ ५० ॥
सिन्दुवाररसेनापि लशुनस्य रसेन च ।
अपामार्गरसेनापि सप्तरात्रं विमर्दयेत् ॥ ५१ ॥
तत् पक्वं वालुकायन्त्रे गुञ्जामात्रं प्रयोजयेत् ।
सनागवल्लीमरिचं ततः शीताम्बु पाययेत् ॥५२॥

चूर्णम् । वल्लं रक्तिद्वयम् । विषमावलम्बि विषमाश्रितं, ज्वरमिति शेषः । भुजगाख्य-वल्ल्याः नागवल्ल्याः, ताम्बूलस्य इत्यर्थः । रोधं मलरोधम् । वरायाः सलिलेन त्रिफलोदकेन । अपस्मृतौ अपस्मारे वराजलेन त्रिफलायाः क्वाथेन शीतकषायेण वा औषधं पाययित्वा निम्बपयोभवाभ्यां निम्बपत्ररसघृताभ्याम् अभ्यञ्जनम् अभ्यङ्गः नियोजनीयम् । स्तम्भार्थं शुक्रस्तम्भनाय । गुड इति ।—औषधसेवनेन वमने जाते तत्प्रशान्त्यै गुडः प्रयोज्यः ॥ ४४—४८ ॥

अशीतिरिति ।—वसुवर्षाणि अष्टौ वर्षाणि । एकोनाशीतिवर्षादूर्द्धं नवमवर्षादर्वाक् च विषप्रयोगो न कर्त्तव्य इति निष्कर्षः । श्लोकोऽयं प्रक्षिप्त इति केचित् ॥ ४९ ॥

उमाप्रसादनरसे—मेघः मुस्तकम् । वैगन्धं गन्धकम् । पटु सैन्धवलवणम् ।

उमाप्रसादनो नाम रस शीतज्वरापहः ।
चातुर्थिकं त्रिरात्र वा नाशयेत् किमुतापरान् ? ॥५३॥

अथ ज्वराङ्कुशरस ।—

टङ्कणं रसगन्धौ च समभागान् प्रकल्पयेत् ।
नेपाल द्विगुण दत्त्वा मर्दयेत खल्लमध्यत ॥५४॥
श्लक्ष्णता याति तद्यावत्तावत्तन्मर्दयेच्छनै ।
सैन्धव मरिच शङ्ख चिञ्चाचार समाक्षिकम् ॥५५॥
तुल्यमेतत्त्रय कृत्वा निम्बुतोयेन मर्दयेत् ।
चणप्रमाणवटकान् भक्षयेच्च दिनत्रयम् ॥ ५६ ॥
ऐकाहिक द्व्याहिकञ्च त्र्याहिकञ्च चतुर्थकम् ।
सर्वज्वरविनाशाय ज्वराङ्कुश इति स्मृत ॥ ५७ ॥

अथ सर्वाङ्गसुन्दरचिन्तामणिरस. ।—

अभ्रक गन्धक सूत तोलैकैकं पृथक् पृथक् ।
गृहीत्वा विषतोलार्द्धं तोलार्द्धं तित्तिराफलम् ॥ ५८ ॥
एतत् सर्वं समं कृत्वा मर्दयेत् खल्लमध्यत ।
श्लक्ष्णता याति तद्यावत्तावत् सम्मर्दयेच्छनैः ॥५९॥
विस्तारे परिणाहे च गर्त्ता कृत्वा षडङ्गुलाम् ।
फणिवल्लीदलान्यन्तर्गर्त्तायां प्रक्षिपेन्नरः ॥६०॥

सिन्दुवाररसेन निर्गुण्डीस्वरसेन। सप्तरात्रमिति प्रत्येकस्वरसेन सप्तवारम्। मरिच-चूर्णनागवल्लीरसेन गुञ्जैकप्रमाणम् औषधमुपयोज्य शीतलजलमनुपाययितव्यम् इति ॥ ५०—५३ ॥

ज्वराङ्कुशरसे—नेपाल ताम्र, द्विगुणमित्येकभागमपेक्ष्य बोध्यम् । शङ्ख शङ्खभस्म । चिञ्चाचार तिन्तिडीक्षारम् । माक्षिक स्वर्णमाक्षिकम् । तुल्य प्रत्येक टङ्कणभाग । एतत त्रय टङ्कणादित्रयेणैक, नेपालमेक, सैन्धवादिपञ्चकेनैकमित्येतत्त्रयमित्यथ । निम्बुतोयेन जम्बीररसेन ॥ ५४—५७ ॥

सर्वाङ्गसुन्दरचिन्तामणिरसे—तित्तिरीफल जैपालवीजम्, "तित्तिरी" इत्यत्र "तित्तिडी" "तित्तिली" इति च पाठेऽपि—स एवार्थ. । विस्तारे दैर्घ्ये ।

पर्णेषु सूतकल्कं तं गर्त्तायां स्थापयेद्दृढम्।
कल्कादुपरि तत् पर्णैर्गर्त्तावक्त्रं प्रपूरयेत् ॥६१॥
गर्त्तायान्तु ततो देयं पुटमारण्यकोत्पलैः।
स्वाङ्गशीतलतां ज्ञात्वा समाकर्षेत्ततः परम् ॥६२॥
सूतलिप्तदलैः सार्द्धं कल्कं खल्ले विमर्दयेत्।
तोलार्द्धममृतं चित्वा तोलार्द्धं तिन्तिरीफलम् ॥६३॥
स्थापयेत् खल्लितं कल्कं योजयेद्गुञ्जमात्रया।
शृङ्गवेराम्भसा युक्तं तीक्ष्णचित्रकसैन्धवैः ॥ ६४ ॥
सन्निपाते तथा वाते त्रिदोषे विषमज्वरे।
अग्निमान्द्ये ग्रहण्याञ्च तथा देयोऽतिसारिणि ॥ ६५ ॥
भोजनं दधिभक्तञ्च रसेऽस्मिन् सम्प्रयोजयेत्।
व्याध्याधिक्यं यदा कुर्य्यादुदकं ढालयेत्ततः ॥६६॥
एष योगवरः श्रीमान् प्राणिनां प्राणदायकः।
चिन्तामणिरिति ख्यातो रसः सर्वाङ्गसुन्दरः ॥ ६७ ॥

परिणाहे वेष्टन्याम्। गर्त्ता गर्त्तम्, आवन्तगर्त्तशब्दोऽप्यस्तीति गम्यते प्रयोगदर्शनात्। फणिवल्लीदलानि ताम्बूलीपत्राणि। अन्तर्गर्त्तायां गर्त्ताभ्यन्तरे। पर्णेषु ताम्बूलीदलेषु, लिप्तमिति शेषः। सूतकल्कम् अभ्रादिकृतमौषधपिण्डम्। तीक्ष्णं मरिचं चविका वा। अथ विधिः,—अभ्रादिकं यथोक्तमानं खल्ले तावद्दृढं मर्दयेत्, यावत् चिक्कणतां गच्छति, ततः जलेन पर्णरसेन वा चूर्णं तदालोड्य सान्द्रं पर्णेषु लिम्पेत्। उत्सेधविस्ताराभ्यां षडङ्गुलमितं गर्त्तमेकं कृत्वा तन्मध्ये पर्णदलानि कतिचित् निक्षिप्य तदुपरि भेषजकल्कलिप्तानि तानि स्थापयेत्, अपराणि कति पर्णानि दत्त्वा गर्त्तमुखं प्रपूर्य्य वन्यकरीषैः पुटं दापयेत्, स्वाङ्गशीतलं समुद्धृत्य च सपर्णमेव तदौषधम् अमृतार्द्धतोलकेन जैपालार्द्धतोलकेन च खल्ले मर्दयित्वा स्थापयेत्। तस्माद्गुञ्जामानमौषधं तीक्ष्णादीनां प्रत्येकं रक्तिद्वयमितेन चूर्णेन आर्द्रकरसेन च दापयेत्। अनुपानं सदध्यन्नं कुर्य्यात्। प्रयोगेणानेन यदि व्याधेराधिक्यं भवति, तदा शिरसि उदकं ढालयेत् ॥ ५८—६७ ॥

अथ लोकनाथगुटिका।—

सूतेन्द्रं परिमर्द्य पञ्चपटुभिः क्षारैस्त्रिभिस्तु ततः
पिण्डे हिङ्गुमहौषधासुरिमये संस्वेद्य धान्योदके।
निर्गुण्ड्यम्बुहुताशमन्थ-तिलपर्ण्युन्मत्तभृङ्गार्द्रकं
कामातागिरिकर्णिकाप्लवदला-पञ्चाङ्गुलोत्थैर्जलैः ॥६८॥
सूतेन्द्रेण समैर्विमर्द्य सहजैः पित्तैस्ततो भावयेत्
दंष्ट्रिच्छाग-लुलायमत्स्यशिखिनां सा सन्निपातान् जयेत्।
विख्याता भुवि लोकनाथगुटिका मारीचमात्रा हिता
स्यादस्याः सहितं दधीक्षुशकलं वीर्यं भवेच्छीतलम् ॥६९॥

अथ सूचिकाभरणो रसः।—

वज्रवैक्रान्तयोर्भस्म प्रत्येकं निष्कसम्मितम्।
शृङ्गीविषं द्विनिष्कञ्च त्रिनिष्कं चूलिकापटु ॥ ७० ॥

लोकनाथगुटिकायां—पञ्चपटुभिः "सौवर्चलं सैन्धवञ्च विडमौद्भिदमेव च। सामुद्रेण सहैतानि पञ्चैव लवणानि च॥" इत्युक्तैः पञ्चलवणैः। क्षारैस्त्रिभिः "स्वर्जिका टङ्कणञ्चैव यवक्षार उदाहृतः" इत्युक्तैः त्रिक्षारैः, अत्र भागानुक्तत्वात् लवणक्षाराणां प्रत्येकं सूतेन्द्रसमत्वं बोध्यम्। आसुरि राजिका। धान्योदके काञ्जिके। निर्गुण्डी सिन्दुवारः। अम्बु वालकम्। हुताशमन्थः अग्निमन्थः। तिलपर्णी रक्तचन्दनम्। उन्मत्तः धुस्तूरः। भृङ्गः भृङ्गराजः। कामाता काकमाची। गिरिकर्णिका अपराजिता। प्लवः कैवर्त्तमुस्तकम्। दला ताम्बूलम्। पञ्चाङ्गुलः एरण्डः। सहजैः स्वाभाविकैः अविकृतैः, पित्तैरित्यनेन सम्बन्धः, रोगादिभिर्मृतानां पित्तं विकृतं भवति, अत्र तु अतद्विधैः। दंष्ट्री शूकरः। लुलायः महिषः। शिखी मयूरः। मारीचमात्रा मरिचप्रमाणा। सहितं हितसहितं, न त्वहितसहितमित्यर्थः, "सहितम्" इत्यत्र "ससितम्" इति पाठः साधुः, तत्र सशर्करमित्यर्थः। इक्षुशकलम् इक्षुखण्डम्। अयमर्थः,—मिलितैः पञ्चपटुभिः क्षारत्रयैश्च मिलितैः तुल्यं रसं सम्मर्द्य गोलकं विधाय हिङ्ग्वादिमये पिण्डे संस्थाप्य च दोलायन्त्रे काञ्जिकेन स्वेदयेत्, ततो दोलायन्त्रादुद्धृतं तदौषधं निर्गुण्ड्यादीनां प्रत्येकं स्वरसैः क्वाथैर्वा यथायोग्यं रससमैर्विमर्द्य पञ्चभिः पित्तैः यथाविधि भावयेत्॥ ६८।६९॥

पञ्चनिष्कोऽग्निजारस्य सर्वमेकत्र मेलयेत्।
तावद्भस्मरसं यावन्मर्दयेद्दिवसत्रयम् ॥ ७१ ॥
शार्ङ्गेष्टादिकवर्गस्य चारनीरेण भावयेत्।
त्रयोविंशतिवाराणि विमर्द्य च विशोष्य च ॥ ७२ ॥
ततो विमर्द्य दिवसं क्षिपेद्दन्तकरण्डके।
मृतसञ्जीवनाख्योऽयं सूचिकाभरणो रसः ॥ ७३ ॥
सन्निपातेन तीव्रेण मुमूर्षोर्भूगतस्य च।
तालुनि प्रच्छयित्वाऽथ रसमेनं विनिक्षिपेत् ॥ ७४ ॥
सूच्याऽतिसूक्ष्मया तोयाभिन्नयाऽतिप्रयत्नत।
ततस्तैलेन त लिप्त्वा निवाते सन्निवेशयेत् ॥ ७५ ॥
ततोऽर्द्धप्रहरादूर्द्ध्वं मुक्तमूत्रपुरीषकम्।
लब्धसञ्ज्ञ प्रतापाढ्यं दोलयन्त शिरो मुहु ॥ ७६ ॥
आयुषन्त विजानीयादन्यथा चान्यथा खलु।
ततः शीताम्बुसम्पूर्णे कटाहे त निवेशयेत् ॥ ७७ ॥
तत्र चोत्क्वथित तोयमपनीयापरं क्षिपेत्।
याचमानमसुं पश्चात् पाययेत् ससितं पयः ॥ ७८ ॥
दधि वा सितयोपेतं नारिकेलजल तथा।
रम्भाफलानि दद्याच्च म्रियते सोऽन्यथा खलु ॥७९॥

सूचिकाभरणरसे—वज्र हीरकम्। वैक्रान्त "चुणी" इति प्रसिद्धम्। निष्कसम्मित शाणमानम्। शृङ्गीविष कन्दविषभेद, तदभावे कालकूट अमृताख्य वा। चुलिकापटु चुल्लिकालवण, नरसार इत्यर्थ। अग्निजार पश्चिमसागरोद्भूत औषधविशेष। तावत् तावन्मान, मिलितानामेषां समानमित्यर्थ, भस्मरस रस-सिन्दूरम्। शार्ङ्गेष्टादिकेति।—वक्ष्यमाणस्य शार्ङ्गेष्टादिकवर्गस्य भस्मीकृतस्य चतुर्गुणे षड्गुणे वा तोये एकविंशतिवारपरिस्रुतेन चारोदकेनेत्यर्थ। दन्तकरण्डके गजदन्त-निर्मितभाजने। तोयाभिन्नया जलसिक्तया। प्रतापाढ्य बलवन्त, दोषवेगोदयात शयन परित्यज्य उद्गमनादिचेष्टावन्तम्। अन्यथा चान्यथा खलु प्रतापप्रदर्शनाद्यकरणे

लब्धसंज्ञं प्रभाषन्तं याचमानं फलादिकम् ।
तस्मादाकृष्य तैलाक्तं तैलं पिष्टाऽपनीय च ॥८०॥
लेपयेद्गन्धकर्पूरैरापादतलमस्तकम् ।
इत्यादिभिश्शिशिरैर्द्रव्यैः समरातमुपाचरेत् ॥ ८१ ॥
कर्णाच्छिनासिकावक्त्रे क्षिपेत् पोताश्रय मुहुः ।
अष्टमेऽहनि सम्प्राप्ते दर्दुरीमूलजं रसम् ॥ ८२ ॥
समितं पाययेद्वेगमवतारयितुं रसम ।
रसेऽवतारिते पश्चात् यथेष्टं भोजनं दधि ॥ ८३ ॥
श्वासोच्छ्वासयुतश्चान्यैर्मुक्तजीवनलक्षणैः ।
कटाहे जलसम्पूर्णे निक्षिपेद्बोधलब्धये ॥ ८४ ॥
लब्धबोधं तमाकृष्य पूर्ववत् समुपाचरेत् ।
जीवित्वा यावदायुष्यं म्रियते तदनन्तरम् ॥ ८५ ॥
सन्निपाते महाघोरे मज्जन्तं मृत्युसागरे ।
उद्धरेत्तस्य धर्मस्य ब्रह्माऽप्यन्तं न विन्दति ॥ ८६ ॥
सन्निपातमहामृत्यु-भयनिर्मुक्तमानवः ।
अपि सर्वस्वदानेन प्राणाचार्यं प्रपूजयेत् ॥ ८७ ॥

गतायुष विजानीयादित्यर्थ । उत्क्वथितम् आतुरस्य देहोष्मसम्पर्केण सन्ततम् । अपर शीतल तोयम । अन्यथा शीतोपचाराद्यकरणे समितदुग्धाद्यप्रदाने च । पिष्टा गात्रमार्जन्या उद्धृत्य, "पिष्टा" इत्यत्र "पिष्ट्या" इति पाठे—पिष्ट्या पिष्टिकया, तण्डुलादिचूर्णेन इत्यर्थ । पोताश्रय जलमित्यर्थ । दर्दुरीमूलजं पुनर्नवामूलो-त्थम् । वज्रादिक यथोक्तमान गृहीत्वा शार्ङ्गष्टादीना क्षारोदकेन वारविंशति-वार विभाव्य विशोष्य च पुनरेकादिन विमर्द्य गजदन्तभाजने स्थापयेत । मुमूर्षो सन्निपातिन शिरस्ताल कूर्चकेनान्येन वा केनचित प्रच्छनसाधनेन किञ्चित प्रच्छयित्वा जलसम्पृक्तेनातिसूक्ष्मेण सूचीवक्त्रेण रसमेन गृहीत्वा च तत्र दापयेत तैलेनाभ्यज्य निवाते स्थापयेच्च । तत प्रहरार्द्धानन्तर सज्ञा लब्ध्वा त्यक्तमूत्रपुरीष सन्निपाती चेत् शिरस्ताडनादिक कुर्यात तदा तमायुष्मन्त जानीयात् । तत, शीतलजलपूर्णे

अन्यथा नरकं तावद्यावत् कल्पविकल्पना ।
इत्याज्ञा शाङ्करी ज्ञेया शम्भुना परिकीर्त्तिता ॥८८॥
प्रकाशा नैव कर्त्तव्या रसोत्तरणमूलिका ।
शास्त्रं विना प्रयच्छन्ते मन्दा वित्ताभिकाङ्क्षया ॥
गुरुप्रसादमासाद्य सन्निपाते प्रयुज्यताम् ॥८९॥

अथ शार्ङ्गष्टादिवर्गः ।—

शार्ङ्गष्टा च तथा व्याघ्री करीरस्तिलपर्णिका ।
इन्द्रवारुणिका मुस्ता हरिद्राऽङ्कोलमूलिका ॥९०॥
अपामार्गः कणा स्वर्णः कटुतुम्बी च तिन्तिडी ।
शार्ङ्गष्टादिकवर्गोऽयं सन्निपातहरः परम् ॥ ९१ ॥

अथ सूचीमुखो रसः ।—

सूतं गन्धकतालकं मणिशिला ताप्यं लवं तुल्यकं
जैपालं विषटङ्कणं मधुफलं कृत्वा समांशं दृढम् ।
कृत्वा कज्जलिकां विषोल्वणफणैः पित्तैश्च सम्भावयेत्
क्षिप्ता सीसककूपिके रसवरः सूचीमुखो नामतः ॥९२॥

कोष्ठके तम् अवगाहयेत्, यदा च तज्जलमुष्णं भवेत् तदा तदपनीय पुनश्च शीतलजलेन ततः कोष्ठं पूरयेत् । अनन्तरं बुभुक्षवे तस्मै सशर्करदुग्धादिकं दापयेत्, अदत्ते च मृत्युर्भवितुमर्हति । ततः कोष्ठादवतार्य्य गात्रमार्जन्या तण्डुलपिष्टादिना वा तैलमपनीय कर्पूरचन्दनादिभिः शीतलद्रव्यैः आपादमस्तकमनुलेपयेत्, एवं सप्ताहं यावत् । अष्टमेऽहनि शीतलजलेन कर्णादिकमभिषिच्य सशर्करं पुनर्नवामूलरसं पाययेत्, एवमौषधसन्तापः प्रशाम्यति, पश्चात् प्रभूतं दधि भोजयेदिति ॥ ७०—८९ ॥

शार्ङ्गष्टादिवर्गमाह, शार्ङ्गष्टेति ।—शार्ङ्गष्टा काकमाची काकजङ्घा वा । करीरः वंशाङ्कुरः । तिलपर्णिका रक्तचन्दनम् । इन्द्रवारुणिका गोरक्षकर्कटी । अङ्कोलमूलिका अङ्कोठमूलम् । स्वर्णः धुस्तूरः । कटुतुम्बी तिक्तालाबु ॥९०।९१॥

सूचीमुखरसे—मणिशिलां मनःशिलाम् । ताप्यं स्वर्णमाक्षिकम् । लवं जातीफलम् । मधुफलं वैकङ्कतम् । विषोल्वणफणैः तीक्ष्णविषस्य कृष्णसर्पस्य पित्तैः, पित्तैरिति बहुत्वं सप्तभावनाबोधनार्थं, सर्पपित्तानां स्वल्पतया सप्तभिः

ब्रह्मद्वारविकीर्णलोहितलवे गुञ्जैकमात्रं दटेत्
दत्त्वा सम्पुटबद्धतन्द्रिकधनुर्वाते सशाखाहिमे ।
कास श्वासमरोचकं प्रलपनं कम्पञ्च हिक्कातुरं
मूकत्व बधिरत्वमुन्मदमपस्मार जयेत्तत्क्षणात् ॥ ९३ ॥

अथ सन्निपातगजाङ्कुश ।—

रसगन्धकताम्राभ्रं लाङ्गलीवह्निरामठम् ।
वन्ध्यापटोलनिर्गुण्डी-सुगन्धानिम्बपल्लवा: ॥ ९४ ॥
पाठा चारत्रयं क्ष्वेल-बीलधत्तूरतण्डुलै. ।
शृङ्गीमधूकसारञ्च जम्बीराम्लेन मर्दयेत् ॥ ९५ ॥
कुर्य्याद्धि निष्कमानेन वटिका सा नियच्छति ।
सस्वेददाहाभिन्यास सन्निपातगजाङ्कुश: ॥ ९६ ॥

अथ चातुर्थिकहरी रस ।—

ससारा वैष्णवीसेना अचला कादि कङ्कणा ।
रागरुद्रोपमोपेता प्रौढामस्तकशालिनी ॥ ९७ ॥

पित्ते सप्तभावनाया असङ्गतिश्चेत् यावद्धि पित्ते सर्वमेकीभूत सत् आर्द्रता व्रजेत् तावत्सङ्ख्याकं सप्तवारं भावयेत् इति द्योतनार्थं वा । सीसककूपिके सीसकनिर्मित-भाजने, एतच्च पात्रविशेषकथनं संस्कारार्थं बोध्यम् । ब्रह्मद्वारेति ।—ब्रह्मद्वारे ब्रह्मरन्ध्रे ब्रह्मतालुनि इत्यर्थ, ब्रह्मद्वारत्वञ्चास्य—एतच्छिद्रेण निष्क्रमणे जीवस्य ब्रह्मप्राप्तिश्रवणात्, विकीर्णं सूच्यग्रेण व्यधनात् बहिर्निःसृत लोहितलव रक्त-विन्दु तस्मिन् सति सूच्याग्रसूचीविद्धब्रह्मरन्ध्रात् रक्तविन्दौ निःसृते सति गुञ्जामात्र रस-मिम दापयेत् । सम्पुटेति ।—सम्पुटबद्ध बद्धमुष्टिक य तन्द्रिक तदाख्यसन्नि-पातभेद, तत्सहित धनुर्वात धनुस्तम्भ तस्मिन् बद्धमुष्टिकतन्द्रिकसन्निपाते धनुर्वाते चेत्यर्थ । सशाखाहिमे हस्तपादशैत्यसहिते ॥ ९२।९३ ॥

सन्निपातगजाङ्कुशे—लाङ्गली चव्य कलिकारिका वा । वह्नि चित्रक । रामठ हिङ्गु । वन्ध्या वन्ध्याकर्कोटकी । सुगन्धा रास्ना । पल्लवशब्द वन्ध्यादिभि: निम्बान्ते प्रत्येक सम्बध्यते । क्ष्वेल गरलम् । बील गन्धबील । तण्डुल: तण्डुलीयक. । शृङ्गी कर्कटशृङ्गी । मधूकसार. गुडपुष्पवृक्षसार. ॥९४—९६॥

त्रिभागं तालकं विन्द्यादेकभागन्तु पारदम्।
तदर्द्धं गन्धकञ्चैव तदर्द्धन्तु मनःशिला ॥ ९८ ॥
कारवल्लीदलरसैर्मर्दयेत् प्रहरत्रयम्।
पाचितो बालुकायन्त्रे चातुर्थिकनिवारणः ॥ ९९ ॥

अथ चातुर्थिकगजाङ्कुशः।—

स्याद्रसेन समायुक्तो गन्धकः सुमनोहरः।
ह्रियावल्लित्रिगुणितो निर्गुण्डीरसमर्दितः ॥ १०० ॥
सप्तवाराणि तद्योज्यमार्द्रकस्वरसेन तु।
सन्ततादिज्वरं हन्याच्चातुर्थिकगजाङ्कुशः ॥ १०१ ॥

अथ द्वितीयमृत्युञ्जयरसः।—

ताप्यतालकजैपाल-वत्सनाभमनःशिलाः।
ताम्रगन्धकसूतञ्च मुषलीरसमर्दितं ॥
मृत्युञ्जय इति ख्यातः कुक्कुटीपुटपाचितः ॥१०२ ॥

चातुर्थिकहररसे—ससारा सार पारद, सारत्वञ्चास्य शिववीर्य्यत्वात, तत्सहिता पारदसंयुक्ता इत्यर्थं। वैष्णवीसेना हरिताल, विष्णुवीर्य्यत्वाच्चास्य वैष्णवीसेनत्वम्। अचला मनःशिला, अत्रापि लक्ष्मीवीर्य्यत्वम् मनःशिलाया अचलत्वे हेतुरन्वेय। कादि कारवल्लीरस। कङ्कणा गन्धक, यत्तु केनचित कादिक कणा इति पदभेदेन कणाशब्देन पिप्पली इत्युक्त तन्न मनोरमम्, "त्रिभागम्" इत्यादिनोक्ते सारादीना भागविवरणे पिप्पल्या अदृष्टत्वात गन्धकस्य च ग्रहणादिति। राग ताम्रपात्र, यद्रीपमा बालुका च ताभ्यामुपेता। प्रौढामस्तकशालिनी शालिस्फुटनमात्रम् इत्यर्थं। अथैषा भागयुक्तिमाह, त्रिभागमिति।—तालक हरितालम्। तालकादिक यथोक्तमान गृहीत्वा कारवल्लीपत्ररसेन प्रहरत्रय विमर्दयेत, तत ताम्रपात्र संस्थाप्य रुद्धा च बालुकायन्त्रे पचेत, बालुकोपरि कति व्रीहीन् संस्थापयेच्च, यावत्ते न स्फुटन्ति तावत् रसोऽयं पक्तव्य इति निष्कर्षं ॥९७—९९॥

चातुर्थिकगजाङ्कुशे—ह्रियावल्लि हरिताल, स च रसभागापेक्षया त्रिगुणित. आह्य ॥ १००।१०१ ॥

द्वितीयमृत्युञ्जयरसे—ताप्य स्वर्णमाक्षिकम्। जैपाल जैपालवीजम्, "जैपाल"

वल्लद्वयं प्रयुञ्जीत यथेष्टं दधिभोजनम्।
नवज्वरं सन्निपातं हन्यादेष महारसः॥ १०३॥

अथ पञ्चवक्त्ररसः।—

शुद्धं सूतं विषं गन्धं मरिचं टङ्कणं कणाम्।
मर्दयेद्धूर्त्तजद्रावैर्दिनमेकन्तु शोषयेत्॥१०४॥
पञ्चवक्त्रो रसो नाम द्विगुञ्जः सन्निपातजित्।
अर्कमूलकषायञ्च सत्र्यूषमनुपाययेत्॥
दध्योदनं हितं तत्र जलयोगञ्च कारयेत्॥१०५॥

अथ उन्मत्तरसः।—

रसगन्धकतुल्यांशं धत्तूरफलजैर्द्रवैः।
मर्दयेद्दिनमेकन्तु तत्तुल्यं त्रिकटु क्षिपेत्॥
उन्मत्ताख्यो रसो नाम्ना नस्ये स्यात् सन्निपातजित्॥१०६॥

अथ सन्निपाताञ्जनरसः।—

निस्त्वग्जैपालजं वीजं दशनिष्कं प्रचूर्णयेत्।
मरिचं पिप्पली सूतं प्रतिनिष्कं विमिश्रयेत्॥१०७॥
भाव्यं जम्बीरजैर्द्रावैः सप्ताहं तत् प्रयत्नतः।
सन्निपातं निहन्त्याशु अञ्जने यः शिवः स्मृतः॥ १०८॥
मदनफलं विडलवणं सर्षपाः प्रतिनिष्कद्वयम्।
चूर्णयित्वा त्रिफलाक्काथेन सटङ्कणं पिबेत्॥ १०९॥

इत्यत्र 'नेपाल" इति पाठे—नेपालं ताम्रम्, अस्मिन् पक्षे ताम्रस्य द्वौ भागौ ग्राह्यौ। वत्सनाभं विषम्। मुषली तालमूली। कुक्कुटीपुटपाचितं "पुटं भूमितले यत्तद्वितस्तिद्वितयोच्छ्रयम्। तावच्च तलविस्तीर्णं तत् स्यात् कुक्कुटकं पुटम्॥" इत्युक्तलक्षणकपुटे पाचितं॥ १०२।१०३॥

पञ्चवक्त्ररसे—धूर्त्तजद्रावैः धुस्तूरपत्ररसैः। सत्र्यूषं त्रिकटुचूर्णसहितम्। जलयोगं जलसेकादिकम्॥ १०४।१०५॥

उन्मत्तरसे—तत्तुल्यं त्रिकटु कज्जलीतुल्यं समुदितत्रिकटुचूर्णम्॥ १०६॥

सन्निपाताञ्जनरसे—सूतं रससिन्दूरम्। शिवः आरोग्यप्रदः इत्यर्थः। जैपाल-

अथ नस्यम् ।—

कुष्ठपाण्डुज्वराजीर्ण-कामलाकण्ठरोगनुत् ।
नस्ये च गिरिकर्ण्युत्थ-बीजैक शीतवारिणा ॥११०॥

अथ प्रतापलङ्केश्वर ।—

प्रत्येकं रसगन्धयोर्द्विपलयोः कृत्वा मसीं शुद्धयो-
रस्यां म्लेच्छकुलायलोचनमनो-धात्रीप्रकुञ्चत्रयम् ।
पथ्याया बदरत्रिक त्रिकटु षट्शाण वचा धर्मिणी
वेल्लाम्भोधरपत्रकद्विरद-किञ्जल्काश्वगन्धाद्वयम् ॥ १११ ॥
पिष्ट्वैतत् समधूकसारमखिल कर्षान्वित न्यस्य तत्
शोन्मर्यार्द्धकरञ्जकामृतयुत सागस्तिकत्रूषणै ।
भूधात्रीविजयासरित्पतिफल ज्वालामुखीमार्कवैः
प्रत्येक विदधीत निश्चलमतिः सप्त क्रमाद्भावनाः ॥ ११२ ॥
पित्तैरथो पञ्च विधाय पञ्चभि करञ्जपत्रामृतधूपनं ततः ।
दत्त्वाऽऽर्द्रकस्य स्वरसेन तण्डुलाकृति विदध्याद्गुटिका भिषग्वरः
॥ ११३ ॥

बीजादिभिरादावञ्जन दत्त्वा पश्चात मदनफलादिटङ्कणान्ताना चतुर्णा चूर्णं योग्यमात्रया त्रिफलाक्वाथेन अनुपान कुर्यात ॥ १०७—१०९ ॥

नस्यमाह, कुष्ठेति ।—गिरिकर्णी अपराजिता । केवल शीतवारिपिष्टापराजिता-बीजनस्य कुष्ठादिनाशन भवेत ॥११०॥

प्रतापलङ्केश्वरे—मसी कज्जलीम । अस्या कज्जल्याम । म्लेच्छ ताम्रम् । कुलायलोचन महिषाक्षगुग्गलु । मन जटामासी । धात्री आमलकी, मनो धात्रीत्येकपद वा, तत्र मनोगुप्ता मन शिला इत्यर्थ, आसा प्रत्येक पलत्रयम् । बदरत्रिक कोलत्रयम् । त्रिकटु षट्शाण त्रिकटचूर्णं मिलितं कोलचयम्‌ । धर्मिणी रेणुका । वेल्ल विडङ्गम् । अम्भोधर मस्तकम् । पत्रक तेजपत्रम । द्विरद-किञ्जल्क नागकेशर । वचादयो मधूकसारान्ता प्रत्येक कर्षमिता । अर्द्धेति । —करञ्जक नक्तमाल, अस्य त्वक् । अमृत विषम । सागस्तिकत्रूषणैरित्यत्र अगस्तिकी वकपत्रम । भूधात्री तामलकी । विजया भङ्गा । सरित्पतिफलं

देयैका सन्निपाते प्रतिहतविषये मोहनेत्रप्रसुप्तौ:
स्याज्जुल्मे साजमादा पवनविकृतिषु त्र्यूषणेन ग्रहण्याम् ।
दातव्या जीरकेण द्विपतुरगनृणां प्राणसंरक्षणाय
कारुण्याम्भोधिरेतं रसकसमरसं वैद्यनाथोऽभ्यधत्त ॥ ११४ ॥

अथ प्राणेश्वर ।—

गन्धकाभ्रसमः सूतो वाराहीरसमर्दितः ।
पाचितो वालुकायन्त्रे त्रिफलाव्योषचित्रकैः ॥ ११५ ॥
त्रिक्षारपञ्चलवण-हिङ्गुगुग्गुलुदीप्यकैः ।
सजीरकैः सेन्द्रयवैः पृथग्रससमैर्युतः ॥ ११६ ॥
माषमात्रोऽनुपानेन द्विपलस्योष्णवारिणः ।
अभिन्यासानलभ्रंश-ग्रहणीपाण्डुगुल्मिनाम् ॥ ११७ ॥
कुर्यात् प्राणपरित्राणमतः प्राणेश्वरः स्मृतः ।
व्याधिवृद्धौ प्रयोगोऽस्य द्वौ वारौ वैद्यसम्मतः ॥ ११८ ॥

समुद्रफलम् इति नाम्ना ख्यातफलविशेषः, योगेऽस्मिन् करञ्जकाम्रतभयावीविजया-समस्तपतिफलानां प्रत्येकं कर्षार्द्धं ग्राह्यम् । ज्वालामुखी चित्रकः । मार्कवः भृङ्गराजः, सागल्लिकत्र्यूषणे ज्वालामुखीमार्कवे सप्त भावना विदधीत इति योजनीयम् । पित्तैरिति ।—पञ्चभिः पित्तैः पञ्च भावना देया । करञ्जेत्यादौ करञ्जः नक्तमालत्वक् पत्रं तेजपत्रम् अमृत विषम् एभिर्धूपनं कार्यं संस्कारायम् । तण्डुलाकृतिः तण्डुलाकारम् । प्रतिहतविषये रूपरसादीनामिन्द्रियाणां ग्रहणासामर्थ्ये । रसकसमरसम् अमृतवद्गुणकारकम् । अयमर्थ,—सर्वं यथोक्तमानं गृहीत्वा सागल्लिकत्र्यूषणे ज्वालामुखीमार्कवे प्रत्येकं सप्त सप्त वारान् भावयित्वा पञ्चभिः पित्तैश्च पञ्च वारान् भावयेत्, अनन्तरं गुणप्रकर्षाधानार्थं करञ्जादिभिर्धूपनं कर्त्तव्यम् ॥ १११—११४ ॥

प्राणेश्वरे—मिलितगन्धकाभ्रतुल्यः पारदः । वाराही वाराहीकन्दः । दीप्यकः यमानी । वाराहीकन्दरसेन मर्दितं गन्धकादित्रयं काचकूप्यां संस्थाप्य मृत्कर्पटाभ्यां लिप्त्वा च सिन्दूररसविधिना वालुकायन्त्रे पचेत् । ततोऽवतार्य्य वाह्निं मान्द्य च त्रिफलादिभिः प्रत्येकं रससमैः संयोज्य सुगुप्तं स्थापयेत् । अस्मात् माषमितं गृहीत्वा द्विपलेनोष्णवारिणा अभिन्यासादौ दापयेत् ॥ ११५—११८ ॥

अथ मृतसञ्जीवन ।—

रसायोव्योषकङ्कुष्ठ-शिलातालाभ्रहिङ्गुलान् ।
कुम्भ्यग्निभृङ्गमारीष-तण्डुलीयकमाक्षिकान् ॥ ११९ ॥
हस्तिशुण्डोयुतास्तुल्यास्तदर्द्धशिवगन्धकान् ।
त्र्यहमार्द्राम्बुना पिष्ट्वा कूपिस्थं वालुकाग्निना ॥ १२० ॥
जयाजम्बीरनिर्गुण्डी-चाङ्गेरीवारि निक्षिपेत् ।
पक्त्वा चतुर्दशाहानि पिष्ट्वाऽऽर्द्रेण विशोषयेत् ॥ १२१ ॥
मृतसञ्जीवनाख्योऽयं रसो वल्लमितोऽशित: ।
द्राक् जयेदौषध सन्निपातादीन् सकलान् गदान् ॥ १२२ ॥

अथ द्वितीयमृतसञ्जीवन ।—

रसभागो भवेदेको गन्धको द्विगुणो मत' ।
विषतालककङ्कुष्ठ-शिलाहिङ्गुललोहकम् ॥ १२३ ॥
वह्नित्रिकटुभृङ्गाह्व-हेममाक्षिकमभ्रकम् ।
हस्तिशुण्डो विषं कुम्भी तण्डुलीयकताम्रकौ ॥ १२४ ॥
एषां प्रत्येकमेकैकं भागमादाय चूर्णयेत् ।
आर्द्रकस्य द्रवेणैव मर्दयेच्च दिनत्रयम् ॥ १२५ ॥
जम्बीरस्य रसो ग्राह्य' पलत्रयपरीक्षित' ।
त्रिफलायाश्च निर्गुण्ड्या: प्रत्येकञ्च पलत्रयम् ॥ १२६ ॥

मृतसञ्जीवने—रस पारद.। अय लौहम्। कङ्कुष्ठ स्वनामख्यात। कुम्भी दन्ती, अस्या बीज ग्राह्यम्। अग्नि चित्रक। भृङ्ग भृङ्गराज। मारीष तण्डुलीयक। तण्डुलीयक विडङ्गम्। तदर्द्धशिवगन्धकान् तेषां मिलितरसादीनाम् अर्द्धौ शिवगन्धकौ मिलितटङ्कणगन्धौ यत्र तान्, शिवोऽत्र टङ्कणं, स च रसादीनां मिलितानां पादांशो ग्राह्य, एव गन्धकोऽपि, यद्वा—शिव पारद गन्धकश्च, अस्मिन् पक्षे—रस रसाञ्जनम्। रसादिकं सर्वं यथानिर्देशं गृहीत्वा आर्द्रकरसेन दिनत्रयं सम्मर्द्य काचकूप्यां निधाय च वालुकायन्त्रे चतुर्दशदिनं पचेत्। तत: जयादिरसेन पिष्ट्वा भूयोऽप्यार्द्रकरसं दत्त्वा आतपे शोषयेत् इति ॥११९—१२२॥

रसस्य पलमात्रन्तु चाङ्गेर्य्याः परिकीर्त्तितम् ।
काचकूप्यां विनिक्षिप्य यन्त्रे क्षिप्त्वा प्रयत्नवान् ॥ १२७ ॥
उद्धृत्याऽऽर्द्रकनिर्य्यासैर्मर्द्दयित्वा विशोषयेत् ।
मृतसञ्जीवनो नाम रसोऽयं विदितो भुवि ॥
गुञ्जाद्वयं ददीतास्य सन्निपातापनुत्तये ॥ १२८ ॥

अथ सन्निपातकुठारः ।—

वङ्गं नागञ्च सूतञ्च नेपालं गन्धकं तथा ।
शुल्वं विषं समांशेन रसेनाऽऽर्द्रेण मर्दयेत् ॥ १२९ ॥
पुनर्मर्द्येत निर्गुण्ड्याश्चाङ्गेर्य्या रसमर्दितः ।
एकवल्लप्रयोगेण रसोऽयं सन्निपातनुत् ॥ १३० ॥

अथ नवज्वरारिः ।—

गन्धकञ्च रसं शुद्धं प्रत्येकं कर्षसम्मितम् ।
एकत्र कज्जलीं कृत्वा ततः कुर्वीत गोलकम् ॥ १३१ ॥
नवभाण्डे विनिक्षिप्य ताम्रपात्रेण गोपयेत् ।
दृढं निरुध्य तत् पात्रमग्नावारोपयेत्ततः ॥ १३२ ॥
व्रीहिस्फुटनमात्रेण स्वाङ्गशीतं समुद्धरेत् ।
नवज्वरे प्रयुञ्जीत रसं पर्पटिकाद्वयम ॥ १३३ ॥
आर्द्रकस्य रसेनैव त्रिवल्लं त्रिदिनं भिषक् ।
ज्वरितं छादयेद्गाढं यावत् स्वेदः समुद्भवेत् ॥ १३४ ॥

द्वितीयमृतसञ्जीवने—भृङ्गाह्वः भृङ्गराजः । पलत्रयपरीचितं पलत्रयपरिमितं इत्यर्थः । त्रिफलायाः क्वाथो ग्राह्यः । जम्बीरादीनां रसम् आर्द्रकरसमर्दितमौषधञ्च काचकूप्यां स्थापयेत । यन्त्रे बालुकायन्त्रे । "यन्त्रे क्षिप्त्वा प्रयत्नवान्" इत्यत्र "स्वेदयेत् सप्तकद्वयम्" इति पाठे—सप्तकद्वयं चतुर्दशदिनानि स्वेदयेत् पचेत्, पाकश्च बालुकायन्त्रे एव कर्त्तव्यः ॥ १२३—१२८ ॥

सन्निपातकुठारे—नागं सीसकम् । नेपालं मनःशिला । शुल्वं ताम्रम । समांशेन तुल्यमानेन गृहीतमेतत सर्वम् । आर्द्रेण रसेन आर्द्रकस्वरसेन ॥ १२९।१३० ॥

तक्रभक्तं भवेत् पथ्यं ज्वरमुक्तस्य देहिनः ।
नवज्वरारिरित्येष रसः परमदुर्लभः ॥
वातज्वरे विशेषेण रसः साधारणोऽप्ययम् ॥ १३५ ॥

अथ जलमञ्जरीरसः ।—

टङ्कणं रसगन्धौ च मरिचानि समांशकम् ।
सर्वं जम्बीरनीरेण दिनानि त्रीणि मर्दयेत् ॥ १३६ ॥
संशोष्य शर्करायुक्तं मत्स्यपित्तेन भावयेत् ।
भावितं तद्रसं सिद्धमार्द्रकस्वरसैस्त्र्यहम् ॥ १३७ ॥
वल्लत्रयं प्रयुञ्जीत पानार्थं वारि शीतलम् ।
तक्रभक्तं भवेत् पथ्यं वृन्ताकफलसंयुतम् ॥
सर्वान् नवज्वरान् हन्ति रसोऽयं जलमञ्जरी ॥ १३८ ॥
पित्तज्वरे ज्वरारिरप्यनुभूतः ।

अथ कान्तरसः ।—

कान्तलोहस्य पत्राणि कण्टवेध्यानि कारयेत् ।
ततः सम्पेष्य तं कल्कं मर्दयेत्त्रिदिनं पुनः ॥ १३९ ॥
रसतुल्येन मत्स्यस्य पित्तेन परिभावयेत् ।
सिद्धः कान्तरसो ह्येष प्रयोज्योऽभिनवज्वरे ॥
शृङ्गवेरानुपानेन मात्रया भिषगुत्तमैः ॥ १४० ॥

नवज्वरारौ—गोपयेत छादयेत । व्रीहिस्फुटनमात्रेण औषधस्यास्य पाकसिद्धि-निर्देशात् अनुक्तत्वेऽपि वालुकायन्त्रे एव पाको ज्ञेयः । पर्पटिका इत्यस्यैव नामान्तरम् ॥ १३१—१३५ ॥

जलमञ्जरीरसे—शर्करा विषं, सा च सर्वसमा ग्राह्या रसेन्द्रसारसंग्रहात्, तत्रायमुदकमञ्जरीरस इति प्रसिद्धः । मत्स्यपित्तेन भावयेत इत्यत्र सप्ताहमिति शेषः । आर्द्रकस्वरसेन त्र्यहं वल्लत्रयं प्रयुञ्जीत इत्यन्वयः ॥ १३६—१३८ ॥

कान्तरसे—रसतुल्येन समपरिमितेन रसेन उपलक्षितं तं कल्कमित्यर्थः, एवञ्च रसकान्तयोः समभागता बोध्या ॥ १३९।१४० ॥

अथ चन्द्रोदयः ।—

रसगन्धौ तथा वङ्गमभ्रकं समभागतः ।
मेलयित्वाऽथ वङ्गेन समं सूतं विमर्दयेत् ॥ १४१ ॥
ततैकीकृत्य गन्धाभ्रे पेष्यं जम्बीरवारिणा ।
सामान्यं पुटमादद्यात् सप्तधा साधितं रसम् ॥ १४२ ॥
कुमार्या चित्रकेणापि भावयित्वाऽथ सप्तधा ।
गुडेन जीरकेणापि ज्वरे जीर्णे प्रयोजयेत् ॥ १४३ ॥
कासे श्वासे कुमार्या च त्रिफलाक्वाथयोगतः ।
उन्मादश्च धनुर्वातमसृताक्वाथयोगतः ॥
इत्येव रोगतापघ्नो रसश्चन्द्रोदयाह्वयः ॥ १४४ ॥

अथ जीर्णज्वरारिः ।—

नागं वङ्गं रसं ताम्रं गन्धकं टङ्कणं तथा ।
सूतं विषञ्च नेपालं हरितालं समं तथा ॥ १४५ ॥
वटक्षीरेण मर्द्याथ सर्वं कुर्यात्तु गोलकम् ।
तं गोलकं भाण्डमध्ये पाचयेद्दीपवह्निना ॥ १४६ ॥
तं गोलं शीतलं कृत्वा भृङ्गराजेन मर्दयेत् ।
आर्द्रकस्य रसेनापि मर्दयेच्च पुनः पुनः ॥ १४७ ॥
चणप्रमाणवटकान् रसेनाऽऽर्द्रस्य दापयेत् ।
गुञ्जाद्वयप्रमाणेन ज्वरं जीर्णं हरत्यसौ ॥ १४८ ॥

चन्द्रोदये—समभागतः इत्यत्र ग्राह्यमिति शेषः । रसादीनां मिश्रणक्रममाह, मेलयित्वेति ।—आदौ वङ्गेन समं सूतं मेलयित्वा विमर्दयेदिति योजनीयम् । ततः गन्धाभ्रे मेलयित्वा जम्बीरवारिणा पेष्यमित्यन्वयः । ततः सप्तधा सप्तवारं सामान्यं पुटं लघुपुटम् आदद्यात्, प्रतिपुटमेव जम्बीररसेन पेषणं कार्यमिति । अनन्तरं पुटादाकृष्य तं रसं पुनः कुमार्या चित्रकेण च प्रत्येकं सप्तधा भावयेत् । अमृताक्वाथेन आमलकक्वाथेन ॥ १४१—१४४ ॥

जीर्णज्वरारौ—नागं सीसकम् । रसः रसाञ्जनम् । नेपालं मनःशिला । दीपवह्निना प्रदीप्तानलेनेत्यर्थः । पुनः पुनः सप्तवारान् ॥ १४५—१४८ ॥

अथ नवज्वरमुरारिः ।—

हरश्च गन्धकश्चैव कुनटी च समं समम् ।
मर्द्यं कर्कोटिकायाश्च रसेन विनियोजयेत् ॥ १४९ ॥
नवज्वरमुरारिः स्यादस्य शर्करया सह ।
तण्डुलीयरसेनानुपानं शर्करयाऽपि वा ॥
गुञ्जाद्वयप्रमाणेन ज्वरान् हन्ति नवान् हठात् ॥ १५० ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्यस्य कृतौ रसरत्नसमुच्चये ज्वरचिकित्सितं नाम द्वादशोऽध्यायः ॥ १२ ॥

अथ त्रयोदशोऽध्यायः ।

अथ रक्तपित्तादिचिकित्सनम् ।—

रक्तपित्तस्य निदानसम्प्राप्ती ।—

कट्वम्लतीक्ष्णलवणोष्णविदाहिरूक्षैः
पित्तं प्रदुष्टमशनैरतिसेवितैस्तैः ।
सन्दूष्य रक्तममुनोभयमार्गवर्त्ति
निर्यात्यसृक्स्थलयकृत्प्लिहतोऽतिमात्रम् ॥ १ ॥

नवज्वरमुरारौ—हरः पारदः । कुनटी मनःशिला । कर्कोटिका कर्कोटक-"काँकरोल" इति भाषा ॥ १४९।१५० ॥

इति रसरत्नसमुच्चयबोधिन्यां द्वादशोऽध्यायः ॥ १२ ॥

ज्वरे रक्तपित्ते च पित्तस्य अव्यभिचरितत्वेनावस्थानात् तथा प्रबलज्वरसन्तापेन रक्तपित्तप्रवृत्तिदर्शनाच्च परस्परसन्तापसाधर्म्यात् ज्वरचिकित्सानन्तरं रक्तपित्तचिकित्सां वक्तुं त्रयोदशाध्यायमारभते, तत्रादौ निदानं सम्प्राप्तिञ्च तत्राह, कट्विति ।—कट्वादिभिरशनैरतिसेवितैः, प्रदुष्टं पित्तं रक्तं सन्दूष्य, तिष्ठतीति शेषः । अमुना

अथ पटोलादियोगः ।—

पटोलमायसं चूर्णं सूतेन्द्रं समचारितम् ।
लोहारिवर्गसंसृष्टं रक्तपित्तहरं परम् ॥ २ ॥

अथ रसेन्द्रयोगः ।—

वृषादलानां स्वरसस्य कर्षं रसेन्द्रगुञ्जामधुशर्करायुतम् ।
लिहन् प्रभाते मनुजो निहन्याद्दुःखाकरं दारुणरक्तपित्तम् ॥ ३ ॥

अथ ऊर्द्ध्वपातितपारदादियोगः ।—

पारदं हिङ्गुलकञ्च ऊर्द्ध्वयन्त्रेण मेलयेत् ।
कुक्कुटाण्डरसं भागं टङ्कणक्षारमेव च ॥ ४ ॥
गन्धकस्य तथा भागं घृतेन परिमर्दयेत् ।
सिद्धं रसं समादाय जीरतोयेन दापयेत् ॥ ५ ॥

पित्तेन सह इत्यर्थः । उभयमार्गवर्त्ति नासाक्षिकर्णास्यरूपोर्द्ध्वमार्गेभ्यः मेढ्रयोनिगुद-रूपाधोमार्गेभ्यश्च प्रवर्त्तनशीलं रक्तमिति शेषः । असृगिति ।—रक्तवाहिशिरा-स्थानयकृत्प्लीहाभ्याम् ॥ १ ॥

पटोलादियोगे—पटोलं पटोलपत्रम् । "पटोलम्" इत्यत्र "पलैकम्" इति पाठान्तरं साधु । सूतेन्द्रं पारदभस्म, रससिन्दूरमिति यावत् । समचारितं तुल्यभागेन गृहीतम् । लोहारिवर्गसंसृष्टं लौहमारकगणक्वाथेन मर्दितम्, लोहारि-वर्गश्च—"त्रिफला त्रिवृता दन्ती कटुकी तालमूलिका । वृद्धदारकहंसीवृषपत्रक-चित्रकाः ॥ शृङ्गवेरविडङ्गौ च भृङ्गभल्लातकौषधम् । दाडिमस्य च पुष्पाणि शत-पुष्पी पुनर्नवा ॥ कुठारकामकौ कन्दं तन्त्री भेकस्य पर्णिका । हस्तिकर्णपलाशश्च कुलिशं केशराजकः ॥ माषः खण्डितकर्णश्च गोजिह्वा लौहमारकः । गिरि-शाल्मलकः प्रोक्तः त्रिफलादिरयं गणः ॥" इति । यद्वा—लोहारिवर्गसंसृष्टं रक्त-रोधकगणक्वाथेन मर्दितं, स च वृषकापामार्गनीलोत्पलशतावर्य्यादिकः । मात्रा चास्य गुञ्जाचतुष्टयमिता ॥ २ ॥

रसेन्द्रयोगे—वृषादलानां वासापत्राणाम् । रसेन्द्रेति ।—रसेन्द्रगुञ्जा च मधु च शर्करा च ताभिर्युतं वृषादलानां स्वरसस्य कर्षमित्यन्वयः । रसेन्द्रशब्देनात्रापि रससिन्दूरो ग्राह्यः ॥ ३ ॥

ऊर्द्ध्वपातितपारदादियोगे—पारदं हिङ्गुलकञ्च समभागम् । ऊर्द्ध्वयन्त्रेण ऊर्द्ध्वपातन-

दिनानि त्रीणि माषञ्च ग्रहणीरक्तदोषजित्।
ज्वरदाहविनाशञ्च रक्तपित्तविनाशनम् ॥ ६ ॥

अथ चन्द्रकलारसः।—

प्रत्येकं तोलमानेन सूतकं ताम्रभस्मकम्।
दिनानि त्रीणि गुटिकां कृत्वा चाग्नौ विनिक्षिपेत् ॥ ७ ॥
ततः शुष्कं समादाय पुनरेव च मर्दयेत्।
समस्तैः समगन्धैश्च कृत्वा कज्जलिकाञ्च तैः ॥ ८ ॥
मुस्तादाडिमदूर्वाभिः केतकीस्तनवारिभिः।
सहदेव्याः कुमार्य्याश्च पर्पटस्यापि वारिणा ॥ ९ ॥
रामशीतलिकातोयैः शतावर्य्या रसेन च।
भावयित्वा प्रयत्नेन दिवसे दिवसे पृथक् ॥ १० ॥
तिक्तं गुडूचिकासत्त्वं पर्पटोशीरमागधीः।
शृङ्गाटं सारिवां चैषां समानं सूक्ष्मचूर्णकम् ॥ ११ ॥
द्राक्षादिककषायेण सप्तधा परिभावयेत्।
ततः पोताश्रयं क्षिप्त्वा वट्यः कार्य्याश्चणोपमाः ॥ १२ ॥
अयं चन्द्रकला नाम रसेन्द्रः परिकीर्त्तितः।
सर्वपैत्तगदध्वंसी वातपित्तगदापहः ॥ १३ ॥

यन्त्रेण। कुक्कुटाण्डरसः कुक्कुटाण्डाभ्यन्तरस्थद्रवांशम्। जीरतोयेन जीरकक्वाथेन। आदौ पारदं हिङ्गुलञ्च समभागं गृहीत्वा ऊर्द्ध्वपातनयन्त्रेण पातयेत्, तेन एकीभूते च तस्मिन् सहिङ्गुलपारदे कुक्कुटाण्डरसादीनामेकैकभागं मेलयेत्। मात्रा च माषमाणा दातव्या ॥ ४—६ ॥

चन्द्रकलारसे—समगन्धैः सूतताम्राभ्यां तुल्यैः गन्धकैः। केतकीस्तनवारिभिः केतक्याः स्तनवत् प्रतीयमानस्य अंशविशेषस्य क्वाथैः केतकीक्षीरैर्वा। सहदेव्या बलाया। रामशीतलिका आरामशीतलिका दाक्षिणात्ये रामशालि इति प्रसिद्धः पत्रशाकविशेषः। तिक्तं पटोलपत्रम्। गुडूचीसत्त्वं गुडूचीसारः। मागधी पिप्पली। शृङ्गाटं "शिङ्गाडा" "पानिफल" इति वा ख्यातम्। द्राक्षादिककषायेण

अन्तर्बाह्यमहादाह-विध्वंसनमहाद्भुतम् ।
ग्रीष्मकाले शरत्काले विशेषेण प्रशस्यते ॥ १४ ॥
कुरुते नाग्निमान्द्यञ्च महातापज्वरं हरेत् ।
भ्रमं मूर्च्छां हरत्याशु स्त्रीणां रक्तं महाश्रमम् ॥ १५ ॥
ऊर्द्ध्वाधोरक्तपित्तञ्च रक्तवान्तिं विशेषतः ।
मूत्रकृच्छ्राणि सर्वाणि नाशयेन्नात्र संशयः ॥ १६ ॥

अथ पटोलकादियोगः ।—

सपटोलकहिङ्गूलः सक्षौद्रो रक्तपित्तनुत् ॥ १७ ॥

अथ नवनीतादियोगः ।—

नवनीतं सिता लाजा द्राक्षया सह भक्षयेत् ॥ १८ ॥

अथ शिरोलेपः ।—

मस्तके च घृतं दद्याद्रक्तपित्तहरं परम् ॥ १९ ॥

अथ द्राक्षादिक्वाथः ।—

द्राक्षावासायुतं क्वाथं शर्कराभावितं पिबेत् ॥ २० ॥

"द्राक्षामधूकमधुकं लोध्रकाश्मर्य्यसारिवा । मुस्तामलकह्रीबेरं पद्मकेशरपद्मकम् ॥ मृणालचन्दनोशीरं नीलोत्पलपरूषकम् ॥" इति वाग्भटोक्तद्राक्षादिक्वाथेन । पीताश्मय जलम्। आदौ पारदं ताम्रञ्च जलेन सम्मर्द्य गोलकं कृत्वा अग्नौ किञ्चित् प्रतापयेत्, तेन शुष्कीभूतं तमुद्धृत्य तुल्येन गन्धकेन सह कज्जलिकां कुर्य्यात्, ततः मुस्तादीनां पृथक् पृथक् यथायोग्यं स्वरसेन क्वाथेन वा एकैकं दिनं भावयेत्, ततः तिक्तादीनां प्रत्येकं सूतसमं चूर्णं तत्र मिश्रयित्वा द्राक्षादिक्वाथेन सप्तधा भावयित्वा च किञ्चित् जलं दत्त्वा चणमात्रां वटीं कुर्य्यात् ॥ ७—१६ ॥

पटोलकादियोगे—पटोलं पटोलपत्रचूर्णं हिङ्गुलसमं सक्षौद्रं लिहेत, केवलो हिङ्गुलुर्वा सक्षौद्रेण पटोलपत्ररसेन पिबेत् ॥ १७ ॥

नवनीतादियोगे—सर्वं तुल्यम ॥ १८ ॥

शिरोलेपे—घृतं पुराणं शतधौतं वा ग्राह्यम् ॥ १९ ॥

द्राक्षादिक्वाथे—शर्कराभावितं शर्कराप्रक्षेपयुक्तम् , "शर्कराभावितं पिबेत्" इत्यत्र "पिबेच्च शर्करान्वितम्" इति रसरत्नाकरोक्तपाठान्तरम् ॥ २० ॥

अथ योगद्वयम्।—

वासारसं सिताक्षौद्रैर्लाजान् वा शर्करासमान्।
भक्षयन् रक्तपित्तार्त्तस्तृषादाहज्वरं जयेत्॥ २१॥

अथ सितामृता।—

धात्रीचूर्णं सितातुल्यं भक्षयेद्रक्तपित्तनुत्॥ २२॥

[इति रक्तपित्तचिकित्सा]।

अथ कासचिकित्सा।—

अथ कासस्य निदानादिकम्।—

दोषाः शोषमनोऽभितापकुपिताः कुर्वन्ति कासं ततः
पित्तं पूतिकफं प्रपीतनयनं पूयोपमं ष्ठीवति।
शीतोष्णेच्छुरकारणेन बहुभुक्स्निग्धप्रसन्नाननः
पार्श्वास्थ्यल्पबलक्षयाकृतिरपि प्रादुर्भवत्यन्यथा॥ २३॥

अथ अर्कादियोगः।—

सार्कतीक्ष्णोऽभ्रकोऽगस्त्य-कासमर्दवरारसैः।
मर्दितो वेतसाम्लेन पिण्डितः कासनाशनः॥ २४॥

अथ रजतयोगः।—

तारं पिष्टशिला क्षिप्ता हरितालाच्चतुर्गुणाम्।
वासागोक्षुरसाराभ्यां मर्दयेत् प्रहरद्वयम्॥ २५॥

वासारसमित्यादियोगद्वये—धात्रीचूर्णम् आमलकचूर्णम्। "लाजान् वा शर्करासमान्" इत्यत्र "वासा वा शर्करासमा" इति रसरत्नाकरोक्तपाठान्तरम्॥२१॥

सितामृतायोगे—सर्वं स्पष्टम्॥ २२॥

रक्तपित्ते कासोपद्रवो भवतीति रक्तपित्तानन्तरं कासचिकित्सितं वक्तुं प्रक्रमन् आदौ तस्य निदानादिकं सङ्क्षेपत आह, दोषा इति।—शोषः धातुक्षय इत्यर्थः। प्रपीतनयनः अतिपीताभचक्षुः। शीतोष्णेच्छुरकारणेन शीतोष्णसेवनकारणाभावेऽपि शीतोष्णसेवनाभिलाषी॥ २३॥

अर्कादियोगे—अर्कः ताम्रम्। तीक्ष्णं तीक्ष्णलौहम्। अगस्त्यः मुनितरुः। पिण्डितः वटीकृत इत्यर्थः॥ २४॥

प्रस्विन्नो वालुकायन्त्रे गुञ्जाद्वितयसम्मित: ।
कासं त्रिकटुनिर्गुण्डी-मूलचूर्णयुतो हरेत् ॥ २६ ॥

अथ रत्नकरण्डकरस: ।—

भूनागाभ्रकयो: सत्त्वं कान्तहेमाभ्ररूपकम् ।
मुक्ताफलानि रत्नानि ताप्यं वैक्रान्तमेव च ॥ २७ ॥
भस्मीकृतमिदं सर्वं पृथङ्माषमितं मतम् ।
निष्कमात्रामितं शुद्धं राजावर्त्तरजस्तथा ॥ २८ ॥
एतत् सर्वं समं योज्यं मर्दयित्वाऽम्लवेतसै: ।
रुद्ध्वा मूषोदरे कोष्ठ्या धमेदाकाशदर्शनम् ॥ २९ ॥
शतवारं धमेदेव मर्दयित्वाऽम्लवेतसे ।
तत: सञ्चूर्णिते चास्मिन्मुक्ताभस्म द्विशाणकम् ॥ ३० ॥
मरिचं पञ्चशाणेयं क्षिप्त्वा सम्मर्द्य यत्नत: ।
रम्ये करण्डके क्षिप्त्वा स्थापयेत्तदनन्तरम् ॥ ३१ ॥
सोऽयं रत्नकरण्डको रसवरो मध्वाज्यसङ्ग्रासगो
हन्याच्छ्वासगदं ज्वरं ग्रहणिकां कासञ्च हिक्कामयम् ।
शूलं शोषमहोदरं बहुविधं कुष्ठञ्च हन्याद्गदान्
वह्नेर्वृष्यकरं प्रदीपनतम: स्वस्थोचितो वेगवान् ॥ ३२ ॥

रजतयोगे—तारे रौप्ये । पिष्टशिला चूर्णमनःशिलाम् । अत्र तारतालयो: समत्वं मनःशिलायाश्च तालाच्चातुर्गुण्यं बोद्धव्यम् ॥ २५।२६ ॥

रत्नकरण्डकरसे—भूनागाभ्रकयो: सत्त्वं प्राक्प्रदर्शितविधिना ग्राह्यम् । कान्तं कान्तलौहम् । रूपकं रौप्यम् । रत्नानि मरकतपद्मरागादीनि यथालाभं ग्राह्याणि । ताप्यं स्वर्णमाक्षिकम् । अम्लवेतसै: अम्लवेतसक्वाथै: । अत्र बहुवचननिर्देशात् बहुकृत्वो मर्दनं कार्य्यम् । कोष्ठ्या कोष्ठिकायन्त्रे । आकाशदर्शनम् अभ्रदर्शनं यावत्, यावत् कालं तन्मध्यस्थमभ्रकं किञ्चिदपि परिदृश्यमानं भवेत् तावद्धमेदित्यर्थ: अभ्रभागे सम्पूर्णतया तत्र मिलिते सति धमननिवृत्तिरिति बोध्यम् । पञ्चशाणेयं पञ्चशाणपरिमाणमित्यर्थ:, पञ्चशाणशब्दात् स्वार्थे ष्येञ् प्रत्ययश्च । रम्ये करण्डके मनोज्ञभाजने । मध्वाज्यसङ्ग्रासग: मध्वाज्याभ्या

अथ भूताङ्कुशरस ।—

शुद्धसूतस्य भागैकं भागैकं शुद्धगन्धकम् ।
भागत्रयं मृत ताम्रं मरिचं पञ्चभागिकम् ॥ ३३ ॥
मृताभ्रस्य चतुर्भागं भागमेकं विषं क्षिपेत् ।
भूताङ्कुशस्य भागैकं सर्वञ्चाम्लेन मर्दयेत् ॥ ३४ ॥
याम भूताङ्कुशो नाम माषैकं वातकासजित् ।
अनुपानं लिहेत् क्षौद्रैर्विभीतकफलत्वच ॥
पित्तकासारुचिश्वासक्षयकासांश्च नाशयेत् ॥ ३५ ॥

अथ बोलबद्धरस ।—

रसभस्म विषं तुल्यं गन्धकं द्विगुणं मतम् ।
बोलतालकबाह्लीक-कर्कोटीमाक्षिकं निशा ॥ ३६ ॥
कण्टकारीयवक्षार-लाङ्गलीक्षारसैन्धवम् ।
मधूकसारं सञ्चूर्ण्य समाहृत्याऽऽर्द्रकद्रवे ॥ ३७ ॥
गुटिकां बदराकारां श्लेष्मकासापनुत्तये ।
भक्षयेद्बोलबद्धोऽयं रसः सश्वासपाण्डुजित् ॥ ३८ ॥

अथाग्निरस ।—

रसगन्धकपिप्पल्यो हरीतक्यक्षवासकम् ।
षडुत्तरगुणं चूर्णं बब्बुलक्वाथभावितम् ॥ ३९ ॥
एकविंशतिवाराणि शोषयित्वा विचूर्णयेत् ।
भक्षयेन्मधुना हन्ति कासमग्निरसो ह्ययम् ॥ ४० ॥

सङ्कामणम् अवचारणं यस्य तथाभूत, मधुघृताभ्यां सेवित इत्यर्थ । हिक्काम—हिक्कारोगम । वयस्योचित सुस्थशरीरेऽपि प्रयोगात् ॥ २७—३२ ॥

भूताङ्कुशरसे—भूताङ्कुश गौरसर्षप । अम्लेन काञ्जिकेन ॥ ३३—३५ ॥

बोलबद्धरसे—रसभस्म रससिन्दूरम । बोल गन्धरस । बाह्लीक हिङ्गु । कर्कोटी कर्कोटकम् । निशा हरिद्रा । लाङ्गली 'ईशलाङ्गला" इति ख्याता । क्षार, चूलिकालवणम् । अत्र बोलादीनां प्रत्येकमेको भाग ग्राह्य ॥ ३६—३८ ॥

अथ भृङ्गराजयोग ।—

भृङ्गराजस्य पत्रन्तु चूर्णितं मधुना सह ।
गोलकं धारयेद्वक्त्रे कासविष्टम्भशान्तये ॥ ४१ ॥

अथ अर्कादियोग ।—

अर्कैरण्डस्य पत्राणां रसं पीत्वा च कासजित् ॥ ४२ ॥

अथ कासघ्नधूमद्वयम् ।—

दन्तीमूलस्य धूमं वा निर्गुण्ड्या वा पिबेज्जयेत् ॥ ४३ ॥

अथ स्वयमग्निरस ।—

त्रिकटु त्रिफला चैला जातीफललवङ्गकम् ।
एतेषां समभागानां समः पूर्वरसो भवेत् ॥ ४४ ॥
सच्चूर्णाऽऽलोडयेत् क्षौद्रे भक्ष्यो निष्कद्वयं द्वयम् ।
स्वयमग्निरसो नाम्ना क्षयकासनिकृन्तन ॥ ४५ ॥

अथ क्षयकासान्तको योग ।—

इन्द्रवारुणिकामूलं भृङ्गीकृष्णातिलैः सह ।
भक्षयेत् क्षयकासार्त्तो निष्कमात्रं प्रशान्तये ॥ ४६ ॥

[इति कासचिकित्सा]।

अग्निरसे—अक्ष विभीतकम्। षडुत्तरगुणं चूर्णम उत्तरोत्तर भागवृद्ध्या गृहीत चूर्णषट्क, तथा च रसस्य एक गन्धकस्य द्वौ पिप्पल्या त्रय हरीतक्या, चत्वार अक्षस्य पञ्च वासकस्य च षड्भागा ॥ ३९।४० ॥

भृङ्गराजयोगे—कासविष्टम्भशान्तये कासस्य विष्टम्भ, स्तब्धता तच्छान्तये शुष्ककासशान्तये इत्यर्थ ॥ ४१ ॥

अर्कादियोगे—अर्कपत्रम् अग्नौ किञ्चित सन्ताप्य तद्रसो ग्राह्य ॥ ४२ ॥

कासघ्नधूमे—दन्तीमूलचूर्णं शरावसम्पुटस्थे निर्धूमाङ्गारे निधाय सच्छिद्रशरावे-णाच्छाद्य छिद्रमुखे धूमनलिकाञ्च दत्त्वा धूम पातव्य, वर्त्तिं कृत्वा वा पातव्य इति बोद्धव्यम। एवं निर्गुण्ड्या अपि। जयेदित्यत्र कासमिति शेष ॥ ४३ ॥

स्वयमग्निरसे—पूर्वरस पूर्वोक्त अग्निरस, स च सम त्रिकट्वादिभिस्तुल्य, तथा च, प्रथमाग्निरसो ऽग्निरसादीना षण्णा मिलित्वा त्रिकट्वादिसमान त्रिकट्वादिष

अथ श्वासचिकित्सा।—

अथ श्वासस्य सम्प्राप्तिः।—

श्लेष्मोपरुद्धगमनः पवनोऽतिदुष्ट'
सन्दूषयन्ननु जलान्नवहाश्च नाडीः।
आमाशयोद्भवमिमं विदधात्युरस्थः
श्वासञ्च वक्रगमनो हि शरीरभाजाम्॥ ४७॥

अथ ऊर्द्धश्वासारिः।—

इन्द्रवारुणिकामूलं देवदारु कटुत्रयम्।
शर्करासहितं खादेदूर्द्धश्वासप्रशान्तये॥ ४८॥

अथ सूर्य्यावर्त्तरसः।—

सूतार्द्धं गन्धकं मर्द्यं यामैकं कन्यकाद्रवैः।
द्वयोः समं ताम्रपत्रं पूर्वकल्केन लेपयेत्॥ ४९॥

प्रत्येकं समभागं गृहीत्वा चौद्रेण मर्दयेत्, एवञ्च त्रिकटुादीनां प्रत्येकमेकैकभागं अग्निरसोक्तानां रसादीनां षण्णाञ्च प्रत्येकं सार्द्धैकभागो ग्राह्यः॥ ४४।४५॥

चयकासान्तकयोगे—इन्द्रवारुणिका गोरक्षकर्कटी। भृङ्गी अतिविषा। कृष्णा पिप्पली। अत्र इन्द्रवारुणिकादीनां प्रत्येकं समभागः॥ ४६॥

तुल्यनिदानत्वात् प्राणोदानदुष्टिसाधर्म्याच्च कासानन्तरं श्वासचिकित्सितं वक्तुं चिकित्सायाः विशिष्टसम्प्राप्तिज्ञानमूलकत्वात् आदौ सम्प्राप्तिमाह, श्लेष्मेति।—श्लेष्मोपरुद्धगमनः कफावृतमार्गः अत एव अतिदुष्टः उरःस्थः वक्षःस्थितः पवनः प्राणवायुः, तस्य उरःस्थानत्वात्, वक्रगमनः प्रतिलोमगामी ऊर्द्धगामीत्यर्थः, भवतीति शेषः, अनु पश्चात् जलान्नवहाः नाडीः उदकवाहिन्यः अन्नवाहिन्यश्च शिराः सन्दूषयन् श्वासं विदधाति। शरीरभाजां देहिनाम् इमं श्वासम् आमाशयोद्भवम् आमाशयसमुद्भूतं, जानीयादिति शेषः॥ ४७॥

ऊर्द्धश्वासारियोगे—शर्करासहितं शर्कराप्रक्षेपयुक्तम्, तेन च क्वाथेनायं योगो बोध्यः॥ ४८॥

सूर्य्यावर्त्तरसे—सूतः अर्द्धो यत्र तादृशं गन्धकं, तेन सूतस्य एको भागः गन्धकस्य च भागद्वयम्, अथवा—सूतार्द्धं सूतं अर्द्धं समांशः यत्र तादृशम्, "अर्द्धं समेंऽशके" इत्यमरः, तेन सूतगन्धकयोः समभागः, न तु सूतस्य अर्द्धं गन्धकं,

दिनैकं हण्डिकायन्त्रे पक्वमादाय चूर्णयेत् ।
सूर्य्यावर्त्तरसो ह्येष द्विगुञ्जः श्वासजिद्भवेत् ॥ ५० ॥

अथ सौगन्धिकयोगः ।—

गन्धकं मरिचं साज्यं पिबेच्छ्वासकफापहम् ॥ ५१ ॥

अथ शिलादिचूर्णम् ।—

शिला हिङ्गु विडङ्गञ्च मरिचं कुष्ठसैन्धवम् ।
मध्वाज्याभ्यां लिहेत् कर्षं श्वासकासकफापहम् ॥ ५२ ॥

अथ सूतपञ्चकम् ।—

सूतः षोडश तत्समो दिनकरस्तस्यार्द्धभागो बलिः
सिन्धुस्तस्य समः सुसूक्ष्ममृदितः षट् पिप्पलीचूर्णितः ।
जम्बीरस्वरसेन मर्दितमिदं तप्तं सुपक्वं भवेत्
कासश्वासकगुल्मशूलजठरं पाण्डुं लिहन्नाशयेत् ॥ ५३ ॥

अथ श्वासारिवटकः ।—

साधारणन्तु वटकं वक्ष्यामि शृणु तत्त्वतः ।
पारदं गन्धकञ्चैव पलमेकं पृथक् पृथक् ॥ ५४ ॥
पलत्रयं त्रिकटुकं वङ्गमेकपलं क्षिपेत् ।
सर्वमेकत्र संयोज्य दिनानि त्रीणि मर्दयेत् ॥ ५५ ॥

तन्त्रान्तरसंवादात्, तथा च रसेन्द्रसारसङ्ग्रहे—"गन्धकं सूतकं मर्द्यं यामैकं कन्यकाद्रवे" इति । पूर्वकल्केन रसगन्धककल्केन । हण्डिकायन्त्रे स्थालीयन्त्रे तल्लक्षणञ्च यन्त्राध्याये अनुसन्धेयम् ॥ ४९।५० ॥

सौगन्धिकयोगे—साज्यं सघृतम् ॥ ५१ ॥

शिलादिचूर्णे—शिला शिलाजतु ॥ ५२ ॥

सूतपञ्चके—तत्समं सूतसमं दिनकरं ताम्रम् । तस्यार्द्धभागो बलिः तस्य मिलितसूतताम्रस्य अर्द्धभागं गन्धकं, तेन सूतताम्रगन्धकानां प्रत्येकं समभागं, यद्वा—"अर्द्धं समेऽशके" इत्यमरवचनात् अर्द्धभागं समभागं । षट्पिप्पलीचूर्णितः पिप्पलीचूर्णस्य षड्भागाः । तप्तम् अग्निसंयोगेन किञ्चिदुत्तप्तीकृतम् । सुपक्वं सुनिष्पन्नमित्यर्थः ॥ ५३ ॥

मूत्रेण च तथा त्रीणि दिनानि परिमर्दयेत्।
अक्षप्रमाणवटकं छायाशुष्कन्तु कारयेत् ॥ ५६ ॥
नित्यमेकन्तु वटकं दिनानि त्रिंशदेव च।
श्वासकासज्वरहरमग्निमान्द्यारुचिप्रणुत् ॥ ५७ ॥

अथ भार्गीत्तरगुडिका।—

रसभागो भवेदेको गन्धको द्विगुणो मतः।
त्रिभागा पिप्पली ग्राह्या चतुर्भागा हरीतकी ॥ ५८ ॥
विभीतं पञ्चभागस्तु वासा षड्गुणिता भवेत्।
भार्ङ्गी सप्तगुणा ग्राह्या सर्वं चूर्णं प्रकल्पयेत् ॥ ५९ ॥
बब्बुलक्काथमादाय भावयेदेकविंशतिः।
विभीतकप्रमाणेन मधुना गुटिकां चरेत् ॥
एकैकां भक्षयेत् प्रातः श्वासकासनिवृत्तये ॥ ६० ॥

अथ नीलकण्ठः।—

सूतं शुल्वं सुलोहं बलिममृतयुतं त्रित्रिकं रेणुकाब्दं
गण्डीरं केशराग्निं द्विगुणगुडयुतं मर्दयित्वा समस्तम्।
कुर्य्यात् कोलास्थिमात्रान् सुरुचिरवटकान् भक्षयेत् प्राग्दिनादौ
पथ्याशी सर्वरोगान् हरति च नितरां नीलकण्ठाभिधानः ॥ ६१ ॥

अथ श्वासकासकरिकेशरी रसः।—

तारताम्ररसपिष्टिकाशिला-गन्धतालसमभागिकं रसैः।
आटरूषसुरसार्द्रमभ्भवैर्मर्दय प्रकुरु गोलकं ततः ॥ ६२ ॥

श्वासारिवटके—पलत्रयं त्रिकटुकमिति मिलित्वा। मूत्रेण गोमूत्रेण ॥ ५४—५७ ॥

भार्गीत्तरगुडिकायां—भार्ङ्गी ब्रह्मयष्टिका ॥ ५८—६० ॥

नीलकण्ठे—शुल्वं ताम्रम्। सुलोहं कान्तलौहम्। बलिं गन्धकम्। अमृतं विषम्। त्रित्रिकं त्रिकटु त्रिफला त्रिमदश्चेति त्रिकत्रयम्। गण्डीरं शमठम्। केशराग्निं नागकेशरं चित्रकञ्च। द्विगुणगुडयुतमिति एकभागापेक्षया द्विगुणो गुडः ॥ ६१ ॥

श्वासकासकरिकेशरीरसे—तारं रौप्यम्। रसपिष्टिका "अर्कांशतुल्यात् रसतोऽप्यगन्धात्" इत्यादिना अष्टमाध्याये उक्तः पारिभाषिकरसविशेषः। शिला

मृत्स्नया च परिवेष्ट्य गोलकं याममुग्ममथ भूधरे पचेत् ।
गन्धकेन कुरु तत्समं ततश्चाऽऽटरूषकटुकैश्च भावयेत् ॥ ६३॥
श्वासकासकरिकेशरो रसो वल्लमस्य परिसेवयेद्बुधः ॥ ६४ ॥

अथ सूर्यरसः ।—

रसगन्धकताम्राभ्र कणाशुण्ठ्यूषणं समम् ।
भूतमेकं विषञ्चैकं सूर्यः कासादिनाशनः ॥ ६५ ॥

[इति श्वासचिकित्सा] ।

अथ हिक्काचिकित्सा ।—

अथ भार्गोत्तररसः ।—

रसगन्धकधान्याभ्र-तालताप्योपलं क्रमात् ।
भागवृद्धं वचाकुष्ठ-हरिद्राक्षारचित्रकैः ॥ ६६ ॥
सपाठालाङ्गलीव्योष-सैन्धवाक्षविषैः समम् ।
भावितं भृङ्गनीरेण हिक्कावैस्वर्यकासनुत् ॥ ६७ ॥

अथ कज्जलयोगः ।—

पक्वताम्रे रसः पिष्टो बलिना हिध्मिना हितः ॥ ६८ ॥

मनःशिला । आटरूषः वासकः । सुरसा तुलसी । "गन्धकेन" इत्यत्र "गोलकेन" इति पाठे—तदयमर्थः गोलकेन सम तुल्यं गोलाकारमित्यर्थः । तारादिकं समभागमटरूषादीनां रसैर्मर्दयित्वा गोलकं कारयेत ततस्तत मूषायां संस्थाप्य मृत्तिकया परिवेष्ट्य च भूधरे यन्त्रे प्रहरद्वयं पचेत ततश्च वह्निर्निःसार्य गन्धकेन एकभागेन सम निश्रयित्वा वासारसेन त्रिकटुकाथेन च सप्तकृत्व भावयेत ॥ ६२—६४ ॥

सूर्यरसे—ऊषणं मरिचम् । भूत मुस्तकम् । विषम् अमृतम् । सूर्यः सूर्योरस इत्यर्थः ॥ ६५ ॥

तुल्यनिदानचिकित्सितत्वात श्वासानन्तरं हिक्काचिकित्सितं विवक्षुः भार्गोत्तररसमाह, रसेति ।—उपलं शिला, मनःशिलेति यावत । रसादीन्युपलान्तान्युत्तरोत्तरम एकैकभागवृद्ध्या ग्राह्याणि । वचादीनां प्रत्येकमेकभागतुल्यता । अक्षं सौवर्चलम्, सैन्धवसाहचर्यात ॥ ६६।६७ ॥

कज्जलयोगे—पक्वताम्रे नेपालदेशजताम्रपात्रे, शोणत्वघनघातक्षमत्वादिगुणयुक्तत्वात तस्य पक्वत्व बोद्धव्यम् । बलिना गन्धकेन । हिध्मिना हिक्किनाम् ॥ ६८ ॥

अथ शिलापूतरसः ।—

चूर्णं पाठेन्द्रवारुण्योर्भाण्डे दत्त्वाऽथ कुनटीम् ।
तत्पृष्ठे शुद्धसूतन्तु कुनट्यर्द्धं प्रदापयेत् ॥ ६९ ॥
सूतार्द्धं कुनटीचूर्णं तस्यार्द्धं पूर्वमूलिका ।
चूर्णं दत्त्वा पचेच्चुल्ल्यां यामाष्टं मृदुवह्निना ॥
शिलापूतो रसो नाम हन्ति हिक्कां त्रिगुञ्जकः ॥ ७० ॥

अथ रास्नादिक्षीरम् ।—

क्वाथ रास्नाबृहत्यग्नि-बलादुग्धैश्च पाययेत् ॥ ७१ ॥

अथ हिक्काघ्नधूमः ।—

हिक्किनं पाययेद्धूमं पत्रैः शिखिनिशोद्भवैः ॥ ७२ ॥

[इति हिक्काचिकित्सा]

अथ कासश्वासहिक्कास्वरभेदचिकित्सा ।—

अथ पर्पटीरसः ।—

रसं द्विगुणगन्धेन मर्दयित्वा सभृङ्गकम् ।
लोहपात्रे घृताभ्यक्ते द्रावितं बदराग्निना ॥ ७३ ॥
ऊर्द्ध्वाधो गोमयं दत्त्वा कदल्याः कोमले दले ।
स्निग्धे पटे ह्ययोदर्व्या पर्पटाकारतां नयेत् ॥ ७४ ॥
लोहपात्रे विनिक्षिप्ता लोहपर्पटिका भवेत् ।
ताम्रपात्रे विनिक्षिप्ता ताम्रपर्पटिका भवेत् ॥ ७५ ॥

शिलापूतरसे—कुनटी मनःशिला । पूर्वमूलिका पाठेन्द्रवारुणीमूलम् । भाण्डमध्ये पाठेन्द्रवारुण्योर्मूलचूर्णं सूतसमं संस्थाप्य तदुपरि मनःशिलाचूर्णं तत्समं दापयेत्, ततश्च मनःशिलासमं शुद्धसूतं तदुपरि विन्यस्य सूतार्द्धेन मनःशिलाचूर्णेन छादयित्वा च पाठादिचूर्णं कुनट्यर्द्धं दत्त्वा भाण्डमुखं निरुध्य च मृद्वग्निना दिनमेकं साधयेत् ॥ ६९।७० ॥

रास्नादिक्षीरे—अग्निः चित्रकः । क्षीरपाकयोगोऽयम्, तेन रास्नादीनां बलान्तानां मिलित्वा दुग्धादष्टमांशं गृहीत्वा क्षीरपाकविधिना पक्त्वा च पाययेत् इति ॥ ७१ ॥

हिक्काघ्नधूमे—शिखी चित्रकः । निशा हरिद्रा ॥ ७२ ॥

पर्पटीरसे—सभृङ्गकं भृङ्गराजरससहितम् । बदराग्निना बदरकाष्ठाङ्गारेण ।

विषपादञ्च युञ्जीत तत्साध्येष्वामयेषु च ।
सुरसाया जयन्त्याश्च कन्यकाटकरूषयोः ॥ ७६ ॥
त्रिफलाया मुनेर्भाङ्ग्या मुण्ड्यास्त्रिकटुचित्रयोः ।
भृङ्गराजस्य वह्नेश्च प्रत्यहं द्रवभावितम् ॥ ७७ ॥
आर्द्रकस्य रसेनापि सप्तधा भावयेत् पुनः ।
अङ्गारे स्वेदयेदीषत् पर्पटीरसमुत्तमम् ॥ ७८ ॥
गुञ्जाष्टकं ददीतास्य ताम्बूलीपत्रसंयुतम् ।
पिप्पलीदशकैः क्काथ निर्गुण्ड्याश्चानुपाययेत् ॥ ७९ ॥
त्रिकण्टकस्य मूलानि शुण्ठीं सङ्कुट्य निक्षिपेत् ।
अजाक्षीरे सनीरार्द्धे यावत् क्षीरं विपाचयेत् ॥ ८० ॥
तत् क्षीरं पाययेद्रात्रौ सकणं भोजनेऽपि च ।
कुष्माण्ड वर्जयेच्चिञ्चा वृन्ताकं कर्कटीमपि ॥ ८१ ॥
आरनालञ्च तैलञ्च ससर्गञ्च विवर्जयेत् ।
मासत्रयञ्च सेवेत कासश्वासनिवृत्तये ॥ ८२ ॥
स हिङ्गुजीरकव्योषैः शमयेत् ग्रहणीं रसः ।
दशमूलाम्भसा वात-ज्वरं त्रिकटुना कफम् ॥ ८३ ॥
ज्वरं मधुकसारेण पञ्चकोलेन सर्वजम् ।
यक्ष्माणं मधुपिप्पल्या गोमूत्रेण गुदाङ्कुरान् ॥ ८४ ॥
शूलमेरण्डतैलेन पाण्डुशोफं सगुग्गुलुः ।
कुष्ठानि भृङ्गभल्लात-वाकुचीपञ्चनिम्बकैः ॥ ८५ ॥
धत्तूरबीजसयोगात् मह्नोन्मादविनाशनी ।
अपस्मारं निहन्त्याशु व्योषनिम्बुदलैः सह ॥ ८६ ॥

विषपादं दातव्यपर्पटीमात्रामपेक्ष्य विषस्य पादांशम्। तत्साध्येषु आमयेषु विषसाध्येषु रोगेषु। सुरसाया तुलस्या। मुने वकपुष्पस्य। मुण्ड्या मुण्डिर्या। वह्ने भल्लातकस्य। त्रिकण्टकस्य गोक्षुरकस्य। पञ्चकोलेन सर्वजं पञ्चकोल-क्काथानुपानेन त्रिदोषजं ज्वरं शमयेत्। गुदाङ्कुरान् अर्शांसि। वाकुची सोम-

स्तनन्धयशिशूनान्तु नितरां पर्पटी हिता।
पथ्याच्च चूर्णादिवशात् व्याधीश्चान्यान् सुदुस्तरान् ॥ ८७ ॥
सजातीफलशीतोदं योजयेत् पर्पटीरसम्।
पित्ताजीर्णे शिरश्चास्य शीततोयेन सेचयेत् ॥ ८८ ॥

अथ कफरोगे क्रियासूत्रम्।—

नस्यं निष्ठीवनं धूमं तीक्ष्णं वमनरेचनम्।
अन्नं रूक्षाल्पतीक्ष्णोष्णं कटुतिक्तकषायकम् ॥
चिरकालस्थितं मद्यं योजयेत् कफरोगिणे ॥ ८९ ॥

अथ मन्थानभैरवः।—

मृतसूतं मृतं ताम्रं हिङ्गु पुष्करमूलकम्।
सैन्धवं गन्धकं तालं कटुकं चूर्णयेत् समान् ॥ ९० ॥

रात्रौ। पञ्चनिम्बके निम्बस्य त्वक्पत्रपुष्पफलमूलरूपपञ्चभिरङ्गैः। स्तनन्धय-शिशूनां स्तन्यपकालानाम्। सजातीफलशीतोदं जातीफलस्य शीतकषायेण सह। अयमर्थः,—द्विगुणगन्धेन सह रसं सम्मर्द्य कज्जलीं कुर्यात्, ततो भृङ्गराजरसेन मर्दयित्वा बादरवह्निस्थे घृताक्ते लौहपात्रे तां निधाय द्रावयेत्। कदलीपत्रस्य ऊर्ध्वमधश्च आर्द्रगोमयपिण्डं संस्थाप्य पिण्डोपरि घृताक्तं वसनखण्डं दापयेत्, ततो द्रवीभूतां तां वस्त्रोपरि पातयित्वा लौहदर्व्या सम्पीड्य पर्पटाकारतां नयेत्। विषमाध्येषु ज्वरातीसारादिषु पर्पटीभागमपेक्ष्य पादिकविशेषेण संयोज्य, अन्यच्च केवलामेव तां सुरसादिभिरेकैकदिनम् आर्द्रकस्वरसेन च सप्ताहं भावयित्वा निर्धूमा-ङ्गारायौ किञ्चित् प्रताप्य च स्थापयेत्। कासे श्वासे च पर्णेन सह पाययित्वा सपिप्पलीदशकाया निर्गुण्ड्या मिलित्वा कर्षमात्राया क्वाथमनुपाययेत्। रात्रौ च त्रिकण्टकमूलशुण्ठीकल्काभ्याम् षड्गुणकमजाक्षीरं क्षीरशेषं पक्त्वा पिप्पलीचूर्णं प्रक्षिप्य पाययेत्, एवं भोजनकालेऽपि। कुष्माण्डादिकञ्च निरामयं यावत् वर्जयेत्। ताम्रभाजने पक्वा ताम्रदर्व्या च पीडिता इयमेव ताम्रपर्पटिका भवेत् ॥ ७३—८८ ॥

कफरोगे क्रियासूत्रमाह, नस्यमिति।—चिरकालस्थितं मद्यं पुरातनं सुरा-सवादिकं, "पुराणाः स्युर्गुणैर्युक्ता आसवा धातवो रसाः," इत्युक्तेः पुरातनस्यैव तस्य गुणवत्त्वात् ॥ ८९ ॥

मन्थानभैरवरसे—मृतसूतं रससिन्दूरम्। कटुकं त्रिकटु। पुष्करमूलाभावे सर्वत्र

देवदालीपुनर्नव्योर्निर्गुण्डीमेघनादयोः ।
तिक्तकोशातकीद्रावैर्दिनैकं मर्दयेद्दृढम् ॥ ९१ ॥
माषमात्रं लिहेत् क्षौद्रैः रसं मन्थानभैरवम् ।
कफरोगप्रशान्त्यर्थं निम्बक्वाथं पिबेदनु ॥ ९२ ॥

अथ गन्धपाषाणयोगः ।—

कर्षैकं गन्धकं शुद्धं घृतैस्तोष्णोदकैः पिबेत् ।
कफं हन्ति—"

अथ कफे भेषजविशेषनिर्देशः ।—

"—अथवा क्षौद्रैः पञ्चवक्त्ररसः खलु ॥ ९३ ॥

अथ विश्वादिवटिका ।—

विश्वादित्रिक-निर्गतद्रवनिशा-कीरप्रियोत्थं दलं
नीलग्रीवगलालयं सुरपतेस्तार्त्तीयनेत्राभिधम् ।
विद्वत्यञ्जवती कृमिप्रतिभटं निर्गुण्डिकावारिणा
तुल्यांशाश्चणकप्रमाणवटिकाः सश्वासकासापहाः ॥ ९४ ॥

[इति कासश्वासहिक्कास्वरभेदचिकित्सा] ।

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये रक्तपित्त-
कासश्वासहिक्कावैस्वर्यचिकित्सितं नाम त्रयोदशोऽध्यायः ॥ १३ ॥

कुष्ठं ग्राह्यम् । देवदाली हस्तिघोषकः । मेघनादः तण्डुलीयः । तिक्तकोशातकी तिक्तघोषा । देवदाल्यादीनां रसेन एकैकदिनं मर्दनं कार्य्यम् ॥ ९०—९२ ॥

गन्धपाषाणयोगे—घृतोष्णोदकाभ्यां शुद्धगन्धककर्षं पिबेत् । कफरोगे भेषजविशेषं निर्दिशति, अथवेति ।—पञ्चवक्त्ररसः ज्वराधिकारोक्तः ग्राह्यः ॥ ९३ ॥

विश्वादिवटिकायां—विश्वादित्रिकं त्रिकटु । निर्गतद्रवनिशा निर्गतद्रवा उत्स्वेदनेन द्रवांशपरिहीना हरिद्रा । कीरप्रियोत्थं दलं कीरप्रियः कीरेष्टः निम्बवृक्षः इत्यर्थः, तत्पत्रम् । नीलेति ।—नीलग्रीवस्य नीलकण्ठस्य हरस्य गले कण्ठदेशे आलयो यस्य तादृशं विषमित्यर्थः । सुरपतेरिति ।—सुरपतेः हरस्य, हतीयनेत्रसाहचर्य्यात् सुरपतिशब्दस्यात्र हरार्थता एव बोद्धव्या, तार्त्तीयनेत्रं ललाटस्थतृतीयचक्षुरेव अभिधा यस्य तं वह्निमित्यर्थः, चित्रकमिति यावत् । विद्वदिति ।—विदुषां वैद्यानां

अथ चतुर्दशोऽध्यायः ।

अथ राजयक्ष्मादिचिकित्सनम् ।

अथ राजयक्ष्मलक्षणम् ।—

अग्निमान्द्यं ज्वरं शैत्यं वान्तिः शोणितपूययोः ।
सत्त्वहानिश्च दौर्बल्य रोगराजस्य लक्षणम् ॥ १ ॥

अथ कनकसुन्दर ।—

रसस्य तुल्यभागेन हेमभस्म प्रकल्पयेत् ।
तालक गन्धक तुत्थ माक्षिक रसक शिलाम् ॥ २ ॥
रससाम्येन युञ्जीत तुत्थं भस्मीकृतं न्यसेत् ।
वङ्गं भस्मीकृतञ्चैव मयूरकसुतुल्यकम् ॥ ३ ॥
किञ्चिट्टङ्कणक दत्त्वा मार्जारस्य विशा युतम् ।
प्रथम पुटयेद्दध्ना द्वितीयं मधुना सह ॥ ४ ॥

पुञ्ज समूह' अत्र अस्तीति सा विद्युत्पुञ्जवती वाला तस्या वैद्यसाद्दत्वात् । क्रिमि-
प्रतिभट क्रिमिशत्रु, विडङ्गमित्यर्थ ॥ ९४ ॥

इति रसरत्नसमुच्चयबोधिन्या त्रयोदशोऽध्याय ॥ १३ ॥

यक्ष्मरूपेषु कासस्वरभेदरक्तागमादिदर्शनात रक्तपित्तेऽपि तत्तल्लक्षणसद्भावेन उभयो साम्यात तथा दुरुपचरितरक्तपित्तात यक्ष्मोत्पत्तिसम्भावनया च रक्तपित्तादि-चिकित्सितानन्तर राजयक्ष्मादिचिकित्सित वक्तु चतुर्दशाध्यायमारभते, तत्रादौ यक्ष्मणो लक्षणमाह, अग्निमान्द्यमिति ।—सत्त्वहानि स्वभावविपर्य्यय । रोगराजस्य राजयक्ष्मण । क्वचित एतच्छ्लोकानन्तर "पञ्चामृतरस । रसस्य भस्मना युक्त लोह कृष्णाभ्रक स्तम् । शिलाजतुककैशोर समभागञ्च कल्पयेत ॥ एष पञ्चामृतो नाम रोगराजनिकृन्तन । पिप्पलीमधुसर्पिर्भि प्रयोज्यो भिषजा द्रुतम् ॥" इत्यधिक पाठ ॥ १ ॥

कनकसुन्दरे—"रसस्य तुल्यभागेन" इत्यत्र "रसस्य तुर्य्यभागेन" इति रसेन्द्रसारे पाठ । रसक खर्परम । शिला मन शिलाम् । रससाम्येन युञ्जीत इति छेद, तेन तालकादीना प्रत्येक रससमत्वम् । तुल्यादीना विशेषणोक्तमाह, तुल्यं

तालकं शोधयेदग्रे कुष्माण्डक्षीरपाचनात् ।
तैले पचेत्ततः सम्यक् चूर्णे वा परिशोधयेत् ॥ ५ ॥
गन्धकं शोधयेद्दुग्धे रसकं नरवारिणा ।
माक्षिकं सिन्धुसंयुक्तं वीजपूररसे पचेत् ॥ ६ ॥
जयन्तीद्रवसम्पिष्टा शिला तत्रैव पाचयेत् ।
एकीकृत्य ततः सर्वमर्कक्षीरेण मर्दयेत् ॥ ७ ॥
जयन्तीभृङ्गराजाभ्यां वासापाठाकृशानुभिः ।
अगस्तिलाङ्गलीभ्याञ्च प्रत्येकं दिवसं शनैः ॥ ८ ॥
ततस्तु गोलकं बद्ध्वा पचेत् पूर्ववदाहृतः ।
चूर्णयित्वा ततः सम्यक् भावयेदार्द्रकाम्बुना ॥ ९ ॥
सप्तधा व्योषनिर्य्यासे रसः कनकसुन्दरः ।
गुञ्जाद्वयं त्रयं वाऽस्य राजयक्ष्मापनुत्तये ॥ १० ॥
मधुना पिप्पलीभिश्च मरिचैर्वा घृतान्वितैः ।
लेहयेद्रोगिणं वैद्यो वयोबलविशेषवित् ॥ ११ ॥
जयपालरजोभिर्वा शुण्ठ्या गव्यघृताक्तया ।
दद्यात शूलिने प्राज्ञो गुल्मिने च विशेषतः ॥ १२ ॥
क्वादिवर्ज्यं चरेत् पथ्यं हृद्यं बल्यञ्च पूर्ववत् ।
सन्निपाते ददीतैनमार्द्रकद्रवसंयुतम् ॥
गुडूचीत्रिफलाक्वाथे संस्कृतो गुग्गुलुर्वरः ॥ १३ ॥

भस्मीकृतमिति।—मयूरकसतुल्यकं मयूरग्रीवाभं तुल्यकम्। मार्जारस्य विशा विडालपुरीषेण, मयूरग्रीवाभं तुत्थं तुल्येन विडालपुरीषेण टङ्कणपाटेन च सह मिश्रयित्वा दध्ना सह सम्मर्द्य प्रथमपुटं दद्यात, ततः पुनश्च ताभ्यां सह सम्मीय मधुना सम्मर्द्य द्वितीयपुटं दद्यात। हरितालशोधनमाह, तालकमिति।—कुष्माण्डक्षीरपाचनात कुष्माण्डसलिले पाकात, "नीरक्षीराम्बुशम्बरम" इत्यमरः। तैले तिलतैले। चूर्णे चूर्णोदके, वा-शब्दोऽत्र अप्यर्थे, चूर्णोदकेऽपीत्यर्थः, तालकं कुष्माण्डसलिलादिषु दोलायन्त्रे यामं पाचयेत। नरवारिणा नरमूत्रेण खर्परं सप्ताहं त्रिदिनं वा भावयित्वा ग्राह्यम्। तत्रैव जयन्तीद्रवे एव। कृशानु

अथ राजमृगाङ्कः।—

रसभस्म त्रयो भागा भागैकं हेमभस्मकम्।
मृततास्रस्य भागैकं शिलागन्धकतालकम्॥ १४॥
प्रतिभागद्वयं शुद्धमेकीकृत्य विचूर्णयेत्।
वराटान् पूरयेत्तेन अजाक्षीरेण टङ्कणम्॥ १५॥
पिष्ट्वा तेन मुखं रुद्ध्वा मृद्भाण्डे तान्निरोधयेत्।
शुष्कं गजपुटे पच्याच्चूर्णयेत् स्वाङ्गशीतलम्॥ १६॥
रसो राजमृगाङ्कोऽयं चतुर्गुञ्जः क्षयापहः।
दशपिप्पलिकाक्षौद्रैर्मरिचैकोनविंशतिः॥
सघृतैर्दापयेद्वाऽथ रोगराजप्रशान्तये॥ १७॥

अथ शङ्खेश्वरः।—

शङ्खस्य वलयान्निष्कं चतुर्निष्कं वराटकम्।
निष्कार्द्धं नीलतुत्थस्य सर्वतुल्यन्तु गन्धकम्॥ १८॥
गन्धतुल्यं मृतं नागं नागतुल्यं मृतं रसम्।
टङ्कणं मृततुल्यं स्यान्मर्द्यं पाच्यं मृगाङ्कवत्॥
राजयक्ष्महरः सोऽयं नाम्ना शङ्खेश्वरो मतः॥ १९॥

चित्रकः। अगस्ति वकपुष्पवृक्ष, तस्य पत्रं ग्राह्यम्। लाङ्गली "ईशलाङ्गला" इति ख्याता। गुडूचीति।—गुडूचीत्रिफलाक्वाथे दोलायन्त्रे शुद्ध गुग्गुलुरस्मिन् प्रयोगे हित॥ २—१३॥

राजमृगाङ्के—रसभस्म रससिन्दूरम्॥ १४—१७॥

शङ्खेश्वरे—शङ्ख वलयात् वलयाकारशङ्खात शङ्खस्य मुखदेशादित्यर्थः, तस्य आवर्त्तमयत्वेन वलयाकारतया परिदृश्यमानत्वात, "शाँकेर मूटी" इति भाषा। निष्कं शाण। नीलतुत्थस्य मयूरकण्ठाभतुत्थस्य। टङ्कण मृततुल्य मृतरसतुल्यमित्यर्थः, "मृततुल्यम्" इत्यत्र "रसतुल्यम्" इति पाठकल्पना साध्वी। गन्धकादिटङ्कणान्ताना चतुर्णा समभागो बोध्य॥ १८।१९॥

अथ मृगाङ्कपोटली ।—

शङ्खनाभिं गवां क्षीरे पेषयेन्निष्कषोडश ।
तेन मूषा प्रकर्त्तव्या तन्मध्ये भस्मसूतकम् ॥ २० ॥
निष्कार्द्धं गन्धकात्त्रीणि चूर्णीकृत्य विनिक्षिपेत् ।
रुद्ध्वा तद्वेष्टयेद्वस्त्रे मृत्तिका लेपयेद्बहिः ॥ २१ ॥
शोष्य गजपुटे पच्यान्मूषया सह चूर्णयेत् ।
गुञ्जैकमनुपानेन क्षयं हन्ति मृगाङ्कवत् ॥ २२ ॥

अथ मातुलुङ्गादियोग ।—

मातुलुङ्गस्य मूलानि लाजचूर्णं ससैन्धवम् ।
पिप्पलीमधुना युक्तं खादेद्वान्तिप्रशान्तये ॥ २३ ॥

अथ रजन्यादियोग ।—

रजनीशङ्खपूगञ्च निष्कैकं वान्तिनाशनम् ॥ २४ ॥

अथ सौभाग्ययोग ।—

निष्कार्द्धं टङ्कणं वाऽथ काकमाचीद्रवैः पिबेत् ॥ २५ ॥

अथ सुगन्धायोग ।—

सुगन्धां वा पिबेत् खादेत् सर्ववान्तिप्रशान्तये ॥ २६ ॥

मृगाङ्कपोटल्याम्—निष्कषोडश अष्टतोलकम् । गन्धकात् त्रीणि निष्काणि । मूषया सह चूर्णयेदिति शङ्खनाभिकृतमूषया सहैव औषधं चूर्णयेत् । मृगाङ्कवदनुपानेन इति राजमृगाङ्कस्य यदनुपानमुक्तं, तेनैवानुपानेन ॥ २०—२२ ॥

यक्ष्मणि कासवेगेन वान्तिर्जायते रक्तवान्तिश्च भवेत्, अत तत्प्रशमनार्थं कतिपयान् योगान् उपदिदिक्षुरादौ मातुलुङ्गादियोगमाह, मातुलुङ्गस्येति ।—मातुलुङ्गमूलादीनां चूर्णं प्रत्येकं समभागं गृहीत्वा मधुना सह लिह्यात् ॥ २३ ॥

रजन्यादियोगे—रजनी हरिद्रा । शङ्खं शङ्खभस्म । पूगं गुवाकं, रजन्यादित्रयाणां मिलित्वा निष्कमानम् ॥ २४ ॥

सौभाग्ययोगे—वा शब्दः पूर्वयोगापेक्षया बोध्यः ॥ २५ ॥

सुगन्धायोगे—सुगन्धा सुगन्धतुलसीभेदः । पिबेत् खादेद्वा इति सुगन्धायाः रसं पिबेत् पत्रं वा खादेत् ॥ २६ ॥

अथ रक्तवान्तिहरो योगः ।—

अलक्तकरसं क्षौद्रे रक्तवान्तिहरं पिबेत् ॥ २७ ॥

अथ मृगाङ्कपोटलीरसः ।—

द्विनिष्कं भस्मसूतस्य निष्कैकं स्वर्णभस्मकम् ।
शुद्धगन्धकनिष्कौ द्वौ चूर्णयित्वा चित्रकद्रवैः ॥ २८ ॥
द्वियामान्ते विशोष्याथ तेन पूर्य्या वराटिकाः ।
वराटान् मृन्मये भाण्डे रुद्ध्वा गजपुटे पचेत् ॥ २९ ॥
स्वाङ्गशीतं विचूर्ण्याथ पोटलीं हेमगर्भिताम् ।
मृगाङ्कवच्चतुर्गुञ्जं भक्षितं राजयक्ष्मनुत् ॥ ३० ॥

अथ यक्ष्मणि औषधविशेषस्सेवनोपदेशः ।—

स्वयमग्निरसं खादेत्त्रिनिष्कं राजयक्ष्मनुत् ॥ ३१ ॥

अथ पञ्चामृतरसः ।—

भस्म सूताभ्रलोहानां शिलाजतु विषं समम् ।
गुडूचीत्रिफलाक्काथैः संस्कृतं गुग्गुलुं तथा ॥ ३२ ॥
मृतं नेपालताम्रञ्च सूतस्थाने नियोजयेत् ।
एकीकृत्य द्विगुञ्जं तद्भक्षयेद्राजयक्ष्मनुत् ॥
पञ्चामृतरसो नाम ह्यनुपानञ्च पूर्ववत् ॥ ३३ ॥

रक्तवान्तिहरयोगे—अलक्तकरसः लाक्षाद्रवम् ॥ २७ ॥

मृगाङ्कपोटलीरसे—सर्वं सुगमम् ॥ २८—३० ॥

यक्ष्मणि अधिकारान्तरोक्तमौषधविशेषमुपदिशति, स्वयमिति ।—स्वयमग्निरसः कामाधिकारोक्तः । त्रिनिष्कमिति पूर्वयुगीयमात्रा, आधुनिकी तु माषकमाषकद्वयम् वा ॥ ३१ ॥

पञ्चामृतरसे—नेपालताम्रं सूतस्थाने नियोजयेदित्यत्र इति केचिद्वदन्तीति शेषः ॥ ३२।३३ ॥

अथ जयन्तीयोगः ।—

हरेत् चौराजगन्धाभ्यां जयन्ती वा क्षयापहा ॥ ३४ ॥

अथ लोकनाथरसः ।—

तुल्यं पारदगन्धकं त्रिकटुकं ताभ्यां रजः कम्बुजं
तैस्तुल्यञ्च भवेत् कपर्दभसितं स्यात् पारदाट्टङ्कणम् ।
पादांशं सकलैः समानमरिचं लिह्यात् क्रमात् साज्यकं
यावन्निष्कमितं भवेत् प्रतिदिनं मासात् क्षयः शाम्यति ॥३५॥

अथ लोकेश्वररसः ।—

रसस्य भस्मना हेम पादांशेन प्रकल्पयेत् ।
गन्धकं द्विगुणं दत्त्वा मर्दयेच्चित्रकाम्बुना ॥ ३६ ॥
चराचरास्ये सम्पूर्य टङ्कणेन निरुध्य च ।
भाण्डे चूर्णप्रलिप्तेऽथ क्षिप्त्वा रुन्धीत मृत्स्नया ॥ ३७ ॥
शोषयित्वा पुटेद्गर्त्तेऽरत्निमात्रेऽपराह्णके ।
स्वाङ्गशीतलमुद्धृत्य चूर्णयित्वाऽथ विन्यसेत् ॥ ३८ ॥
एष लोकेश्वरो नाम पुष्टिवीर्य्यविवर्द्धनः ।
गुञ्जाचतुष्टयञ्चाऽऽज्यं मरिचैश्च समन्वितम् ॥ ३९ ॥

जयन्तीयोगे—जयन्तीपत्ररसम् अजगन्धाचूर्णेन दध्ना च सम्मिश्र्य पाययेत् । क्षयापहा जयन्ती चौराजगन्धाभ्यां हरेत्, क्षयमिति शेषः ॥ ३४ ॥

लोकनाथरसे—तुल्यं पारदगन्धकं त्रिकटुकमिति पारदगन्धकयोः मिलितत्रिकटोश्च समभागः । ताभ्यामिति ।—समाहारद्वन्द्वेन पारदगन्धकमित्यस्य एकत्वात् ताभ्यामिति द्विवचनेन मिलितरसगन्धकत्रिकटुभ्यामित्यर्थो बोध्यः । ताभ्यामित्यनन्तरं तुल्यमिति शेषः, कम्बुजं रजः इत्यनेनान्वयः । कम्बुजं रजः शङ्खभस्म । तैस्तुल्यं पारदादि-शङ्खान्तैस्तुल्यं कपर्दभसितं वराटिकाभस्म । पादांशमित्यस्य पारदात् टङ्कणमित्यनेन सम्बन्धः । सकलैः पारदादिटङ्कणान्तैः सकलैः । यावदिति ।—सपादरक्तिकामारभ्य प्रतिदिनं तावन्मानेन वर्द्धयित्वा मासेन निष्कमितं स्यादत् इति । अस्य पत्री यथा—पारद मा २, गन्धक मा २, त्रिकटुचूर्ण मिलित मा ४, शङ्खभस्म मा ८, वराटिकाभस्म मा १६, टङ्कण र ५, मरिच कष २ र ५ इति ॥ ३५ ॥

लोकेश्वररसे—पादांशेन रसभस्मभागमपेक्ष्य चतुर्थांशेन उपलक्षितं हेम इति

खादेत् परमया भक्त्या लोकेशे सर्वदर्शिनि ।
अङ्गकार्श्येऽग्निमान्द्ये च कासहिक्के रसो ह्ययम् ॥ ४० ॥
मरिचैर्घृतसंयुक्तो प्रदातव्यो दिनत्रयम् ।
लवणं वर्जयेत्तत्र साज्यं सदधि भोजनम् ॥ ४१ ॥
एकविंशद्दिनं यावन्मरिचं सघृतं पिबेत् ।
पथ्यं मृगाङ्कवद्देयं शयीतोत्तानपादतः ॥ ४२ ॥
वमने सम्प्रवृत्ते तु गुडूचीद्रवमाहरेत् ।
मधुना पाययेत् सार्द्धं दग्धवृन्ताकमाशयेत् ॥ ४३ ॥
स्नानं शीतलतोयेन मूर्ध्नि धारां विनिक्षिपेत् ।
जाते श्लेष्मविकारे तु कदलीफलमाहरेत् ॥ ४४ ॥
भृष्ट्वा तन्मरिचैः सार्द्धं भोजयेत् श्लेष्मनुत्तये ।
आर्द्रकं मधुमिश्रं वा गुडार्द्रकमथापि वा ॥ ४५ ॥
भृष्ट्वा कुस्तुम्बरीमाषान् निस्तुषांश्चूर्णयेत्ततः ।
शर्कराघृतमिश्रं तद्दद्यातारुचिशान्तये ॥ ४६ ॥
भृष्ट्वा कुस्तुम्बरीं सम्यक् घृतं शर्करया पिबेत् ।
एला मरिचसंयुक्ता यावद्भ्रान्तिं प्रशाम्यति ॥ ४७ ॥
अजमोदं विडङ्गञ्च पिष्ट्वा तक्रेण पाययेत् ।
कृमिकोपप्रशान्त्यर्थं क्वाथं वातघ्नमुस्तयोः ॥ ४८ ॥
संस्कृत्य दुग्धिकां वह्नौ विरेके च प्रयोजयेत् ।
ईषद्भृष्टां जयाचूर्णं मधुना खादयेन्निशि ॥ ४९ ॥

योजनीयम् । चराचरास्ये कपर्दकमुखे । चरदिमाने निर्गतकनिष्ठाङ्गुलिक-मुष्टिपरिमिते गर्त्ते, वाराहपुटे इत्यर्थः । रसेन्द्रसारसङ्ग्रहे तु गजपटे इत्युक्तम् । शयीतोत्तानपादतः पादावुत्तानीकृत्य शयीत । वमने इति ।—रसस्यास्य सेवनात् यदि वमनं जायते तदा समधु गुडूचीरसं पाययेत् दग्धवार्त्ताकुञ्च भोजयेत् । वमननिवारणार्थं शीतक्रियया यदि श्लेष्मविकारो जायते तदा किं कर्त्तव्यमित्याह, जाते इति ।—कदलीफलम् अपक्वकदलीफलम् । औषधसेवनेन श्लेष्मवृद्धौ । हा

अङ्गतोदे घृतेनाङ्गं मर्दयित्वोष्णवारिणा ।
स्नापयेद्रोगिणं वैद्यो लोकनाथञ्च संस्मरेत् ॥ ५० ॥

अथ वैद्यनाथरसः ।—

शङ्खस्य वलयं निष्कं चतुर्निष्कं वराटिकाः ।
कर्षांशं नीलतुत्थञ्च तालं गन्धाश्मटङ्कणम् ॥ ५१ ॥
तुत्थं नागं रसश्चार्द्धं निष्कांशं पूर्ववत् पुटेत् ।
वराटचूर्णं मण्डूरकल्पितालेपने पचेत् ॥ ५२ ॥
अस्यार्द्धमाषं मरिचार्द्धमाषं ताम्बूलवल्लीरसभावितञ्च ।
तत्पत्रलिप्तं मधुनाऽवलिह्यादैयङ्गवीनेन घृतेन वाऽपि ॥ ५३ ॥
नाडीमार्गे निर्गते चाल्पमल्पं पथ्यं भोज्यं लोकनाथोपदिष्टम् ।
यामे यामे चैवमामण्डलान्तात् सिद्धं सद्यः शोषजिद्वैद्यनाथः ॥५४॥

यद्यरुचिर्जायते, तदा किं कर्त्तव्यमित्याह, भृष्टेति ।—कुस्तुम्बरी धन्याकं, सा च भावमिता ग्राह्या । पुनरपि वमनशान्तये योगान्तरमाह,—भृष्टेति । क्रिम्युपद्रवो दृश्यते चेत् तदा कर्त्तव्यमाह, अजमोदमिति ।—अजमोदं वनयमानी । वातघ्न एरण्डमूलम् । अतीसारापद्रवे कर्त्तव्यमाह, सक्त्वयेति ।—टुण्टुका चौरिका, "खिरुइ" इति वङ्गीयैराख्याता, तां वह्नौ संस्थाप्य क्वाथयित्वा इत्यर्थः । जयाचूर्णं त्रैलोक्यविजयापत्रचूर्णम् । अङ्गमर्दे कार्य्यमाह, अङ्गतोदे इति ।—अङ्गतोदे अङ्गपार्श्वादिशूले ॥ ३६—५० ॥

वैद्यनाथरसे—शङ्खस्य वलयं शङ्खस्य मुखदेशः, तस्य आवर्त्तमयत्वेन वलयाकारतया परिदृश्यमानत्वात्, "शाँखेर मुटो" इति वङ्गदेशे प्रसिद्धम् । वराटिका 'पीताभा ग्रन्थिला पृष्ठे' इत्यादिभिरुक्तलक्षणा कपर्दभेदाः "गेँटे कडि" "घेँटेच काड" इति वा वङ्गदेशप्रसिद्धा । नीलतुत्थं मयूरग्रीवासन्निभं तुत्थमित्यर्थः । नीलतुत्थादीनां चतुर्णां प्रत्येकं कर्षमानम् । तुत्थं खर्परीतुत्थम् । तुत्थादीनां रसान्तानां त्रयाणां प्रत्येकम् अर्द्धं शङ्खवलयभागापेक्षया अर्द्धमित्यर्थः । "तुत्थं नागम्" इत्यत्र "तुत्थभागम्" इति पाठे—रसम् अर्द्धं तुत्थभागं कर्षार्द्धमित्यर्थः । वराटचूर्णं वराटिकालक्षणादितरकपर्दचूर्णं, निष्कांशं निष्कचतुर्थभागं, माषमानमिति यावत् । मण्डूरेति ।—मण्डूरेण कल्पितम् आलेपनं यत्र तस्मिन्, भाजने इति शेषः, मूषामध्ये औषधं संस्थाप्य चूर्णितमण्डूरपङ्केन आलेपयेत् । हैयङ्गवीनेन घृतेन गोदोहोद्भवेन,

अथ लोकनाथः ।—

अध्यर्द्धनिष्कौ रसतुल्यभागौ पृथक् पृथग्गन्धकटङ्ककार्षम् ।
शङ्खस्य कर्षं मृततास्रतो द्वौ वराटिकानां नव सम्पुटस्थान् ॥५५॥
पक्त्वा पचेदर्कदलद्रवार्द्रान् भूयोऽर्द्धभागेन करीषकाणाम् ।
अस्यार्द्धपादं मरिचार्द्धभागं गन्धाश्मनिष्कञ्च घृतेन लिह्यात् ॥५६॥
अश्नीयात् पूर्ववत् पथ्यं वासरांश्चैकविंशतिं ।
लोकनाथो रसो नाम्ना रोगराजनिकृन्तनः ॥ ५७ ॥

अथ प्राणनाथः ।—

अयोरजो विंशतिनिष्कमानं विभावितं भृङ्गरसाढकेन ।
धत्तूरभार्ङ्गीत्रिफलारसार्द्धं तुल्याशताप्य विपचेत् पुटेषु ॥ ५८ ॥
सूतञ्च निष्कं समभागतुल्यं गन्धोपलौ द्वौ चतुरो वराटान् ।
पक्त्वा पुटाग्नौ समलोहचूर्णान् पचेत्तथा पूर्वरसेन मिश्रान् ॥५९॥

चर्व्यस्तेनेत्यर्थः । आमण्डलान्तादित्यत्र मण्डलशब्दो अष्टचत्वारिंशद्दिनवाची "सम्प्राप्य मण्डलं पश्चादर्कं निष्काशयेत्ततः" इत्यर्काचार्कस्मायां मण्डलशब्देन तावत्सङ्ख्यक-दिनग्रहणात् । एवं सिद्धस्य अस्य चूर्णस्य माषार्द्धं मरिचचूर्णस्य च माषार्द्ध-मेकीकृत्य पर्णपत्ररसेन मर्दयित्वा तस्यैव पत्रे लिप्त्वा च मधुना हैयङ्गवीनेन घृतेन वा अष्टचत्वारिंशद्दिनं यावत् लिह्यात् । प्रतिप्रहरञ्च स्तोकं स्तोकं लोकेश्वरोपदिष्टं पथ्यं कार्य्यम्, लोकनाथशब्देनात्र लोकेश्वरो बोध्यः, लोकनाथे पथ्यविधेर-दृष्टत्वात् ॥ ५१—५४ ॥

लोकनाथे—अध्यर्द्धनिष्कौ सार्द्धशाणौ । मृततास्रतो द्वौ मृततास्रस्य कर्षद्वयम् । वराटिकानाञ्च नव इत्यत्र कर्षाणि इति शेषः । करीषकाणाम् अर्द्धभागेनेति प्रथम-पुटापेक्षया अर्द्धभागः । अस्य सिद्धस्य औषधस्य । अर्द्धपादं पादार्द्धं, समुदितौषधात् अष्टमांशमिति यावत् । मरिचार्द्धभागमिति षोडशांशं मरिचचूर्णम् । रसादि-वराटिकान्तान् औषधजातान् अर्कपत्राम्बुपिष्टान् पुटे पक्त्वा स्वाङ्गशीतान् बहिष्कृत्य पुनरपि अर्कपत्ररसपिष्टान् कृत्वा प्रथमपुटमपेक्ष्य अर्द्धपुटे पचेत् इति ॥ ५५—५७ ॥

प्राणनाथे—भृङ्गरसाढकेन षोडशशरावमितभृङ्गराजरसेन । धत्तूरेति ।—धुस्तू-रादीनां रसं भृङ्गराजरसादर्द्धं ग्राह्यं इति । पूर्वरसेन भृङ्गादीनां रसेन । सप्त दश

चूर्णेऽस्मिन् मरिचाः सप्त तुल्यटङ्कणयोर्दश ।
सम्र्जेत्तत् पृथङ्निष्कान् प्राणनाथाह्वयोदितः ॥ ६० ॥
अर्द्धपादो रसाङ्गस्य केवलाद्राजयक्ष्मभिः ।
शोषोदरार्शोग्रहणी-ज्वरगुल्माद्युपद्रुतैः ॥ ६१ ॥

अथ वज्ररसः ।—

कर्षं खर्परसत्त्वस्य षण्मासे हेम्नि विद्रुते ।
षण्निष्कसूतं गन्धाश्मन्यष्टनिष्कं प्रवेशितम् ॥ ६२ ॥
प्रवालमुक्ताफलयोश्चूर्णं हेमसमांशयोः ।
क्रमाद्दित्रिचतुर्निष्कं मृतायः सीसभास्करम् ॥ ६३ ॥
चाङ्गेर्यम्लेन यामांस्त्रीन् मर्दितं चूर्णितं पृथक् ।
द्वौ निष्कौ नीलवटक-व्योमायस्कान्ततालकात् ॥ ६४ ॥
अङ्कोल्लकङ्गुणीवीज-तुल्येभ्यश्चतुरः पृथक् ।
अष्टौ च टङ्कणक्षाराद्वराटानाञ्च विंशतिः ॥ ६५ ॥
महाजम्बीरनीरस्य प्रस्थद्वन्द्वेन पेषयेत् ।
एतदष्टशरावस्थं शुष्कं खार्य्यास्तुषस्य च ॥ ६६ ॥
करीषभारे च पचेदथ माषद्वयं ततः ।
एतावद्गन्धकात् पादं मरिचाद्भावितादपि ॥ ६७ ॥

त्वनयोः निष्कानित्यनेनान्वयः, तेन मरिचस्य सप्त निष्कान् तुल्यटङ्कणयोर्भिलितयोर्दश निष्कानित्यर्थः । रसात् सूतात् । अर्द्धपादः पादार्द्ध, निष्कमानात् सूतात् अष्टमांशः, माषार्द्धमिति यावत् । प्राणनाथो भक्ष्य इत्यन्वयः । आदौ लौहचूर्णं माक्षिकञ्च षोडशशरावमितेन भृङ्गराजरसेन अष्टशरावमितेन च धुस्तूरादीनां रसेन भावयित्वा पुटे पचेत् । ततो निष्काश्य सूतादिकं यथोक्तमानं तत्र दत्त्वा पुनश्च पुटे पचेत् । ततश्च पुनरपि औषधं निःसार्य्य सर्वतुल्यं लौहचूर्णं मिश्रयित्वा पूर्वोक्तद्रवेण सम्मर्द्य च पुटाग्नौ पुनः पचेत् । ततो निष्काश्य मरिचादिचूर्णं यथोक्तमानं दत्त्वा मिश्रयित्वा च यथोक्तमानेन भक्षयेदिति ॥ ५८—६१ ॥

वज्ररसे—विद्रुते गालितस्वर्णे, स्वर्णसत्त्वे इत्यर्थः, विद्रुते हेम्नि खर्परसत्त्वस्य कर्षं

मधुनाऽऽलोडितं लिह्यात्ताम्बूलीपत्रलेपितम् ।
गतेऽस्य घटिकामात्रे प्रतियामञ्च पथ्यभुक् ॥ ६८ ॥
नो चेदुद्दीपितो वह्निः क्षणाद्धातून् पचत्यतः ।
दिनमेकं निषेव्यैनं त्याज्यान्यामण्डलात्त्यजेत् ॥ ६९ ॥
ततः परं यथेष्टाशो द्वादशाब्दं सुखी भवेत् ।
एकमेकं दिनं भुक्त्वा वर्षे वर्षे महारसम् ॥ ७० ॥
वर्षादौ च त्यजेत्त्याज्यं द्वादशाब्दं जरां जयेत् ।
एष वज्ररसो नाम क्षयपर्वतभेदनः ॥ ७१ ॥

अथ महावीरः ।—

निष्कौ द्वौ तुल्यभागस्य रसादेकं सुसंस्कृतात् ।
निष्कं विषस्य द्वौ तीक्ष्णात् कर्षांशं गन्धमौक्तिकात् ॥ ७२ ॥
अग्निपर्णीहरिल्लता-भृङ्गार्द्रसुरमारसैः ।
मर्दितं लाङ्गलीकन्द-प्रलिप्ते सम्पुटे पचेत् ॥ ७३ ॥

गन्धाश्मनि च षण्निष्कसूतं प्रवेशितं कृत्वा इत्यन्वयः । भास्करं ताम्रम् । चाङ्गेर्य्यम्लेन अम्ललोणीरसेन । नीलवटकः "नीलवडी" इति प्रसिद्धः । व्योम अभ्रम् । अङ्कोल्लः "आँकोड" इति ख्यातः, कङ्गुणी तृणधान्यविशेषः, तयोर्बीजम । चतुरः अष्टौ विंशतिः इत्येतेषु निष्कानिति शेषः । महाजम्बीरनीरस्य बृहज्जम्बीररसस्य । एतदष्टशरावस्थम् अष्टसङ्ख्याके शरावपात्रे अवस्थितमेतच्चूर्णम् । तुषस्य खार्य्या अष्टाविंशत्यधिकशतशरावेण । करीषभारे द्विसहस्रपलमाने आरण्यगोमये । ततः औषधात् माषद्वयम् । गन्धकात् एतावत् माषद्वयमित्यर्थः । भावितात् संस्कृतात् कीटाद्यभक्षितात् मरिचात् पादः माषद्वयमपेक्ष्य चतुर्थांशः, तेन च मरिचस्य माषार्द्धं ग्राह्यम् । दिनमेकमिति ।—रसमिममेकं दिनं सेवित्वा अष्टा-चत्वारिंशद्दिनं यावत् अपथ्यानि परिहरेत्, अष्टचत्वारिंशद्दिनानन्तरं यथेप्सिता-हारविहारी स्यात्, एवं द्वादशवर्षं व्याप्य नीरुक् तिष्ठेत् । प्रतिवर्षादौ च एक-दिनमात्रं सेवित्वा पूर्वकल्पेन निषिद्धाहारं त्यजेत्, तेन च द्वादशवर्षं व्याप्य जरा आक्रमितुं न शक्नुयात् ॥ ६२—७१ ॥

महावीरे—तीक्ष्णात् तीक्ष्णलौहात, द्वौ निष्कौ । गन्धमौक्तिकात गन्धकात् मौक्तिकाच्च, कर्षांशमिति प्रत्येकम् । अग्निपर्णी "आगिया" इति लोके । हरिल्लता

अर्द्धपादञ्च पोटल्या, काकिन्यौ द्वे विषस्य च।
लिङ्गमरिचचूर्णञ्च मधुना पोटलीसमम् ॥ ७४ ॥
क्षयग्रहण्यतीसार-वह्निदौर्बल्यकासिनाम्।
पाण्डुगुल्मवतां श्रेष्ठो महावीरो हितो रसः ॥ ७५ ॥
अतिस्थूलस्य पूयास्रकफानुद्गमतः क्षये।
न योजयेत् क्षीररसान् विरुद्धोपक्रमत्वतः ॥ ७६ ॥

अथ पञ्चामृतपर्पटी।—

सुवर्णं रजतं ताम्रं सत्त्वाभ्रं कान्तलोहकम्।
क्रमवृद्धमिदं सर्वं ग्राणेयौ नागवङ्गकौ ॥ ७७ ॥
द्रावयित्वैकतः सर्वं रेतयित्वा ततश्चरेत्।
पृथक् पलमितं गन्धं शिलालं विनिधाय च ॥ ७८ ॥
सर्वं खल्ले विनिक्षिप्य मर्दयेदम्लवर्गतः।
ताप्यं नीलाञ्जनं तालं शिलागन्धञ्च चूर्णितम् ॥ ७९ ॥
दत्त्वा दत्त्वा पुटेत्तावद्यावद्विंशतिवारकम्।
लोहाद्द्विगुणसूतेन ततो द्विगुणगन्धतः ॥ ८० ॥
विधाय कज्जलीं श्लक्ष्णां क्षिप्त्वा तां लोहपात्रके।
द्रावयेद्बदराङ्गारैर्मृदुभिश्चाथ निक्षिपेत् ॥ ८१ ॥
हेमादिपञ्चलोहानां भस्म चाथ विलोडयेत्।
अथ तत् कदलीपत्रे गोमयस्थे विनिक्षिपेत् ॥ ८२ ॥
पत्रेणान्येन सञ्छाद्य चिपिटीं कुरु यत्नतः।
तस्योपरि क्षिपेत् सद्यो गोमयं स्तोकमेव च ॥ ८३ ॥

ब्राह्मी। सुरसा तुलसी। अर्द्धपादमिति काकिणीद्वयापेक्षया पादार्द्धमित्यर्थः। पोटलीति अस्य योगस्य सञ्ज्ञान्तरं, तेन औषधस्यास्य सार्द्धसर्षपचतुष्टयं ग्राह्यम्। काकिण्यौ द्वे रक्तिकाद्वयम्। एतदौषधसेवनकाले दुग्धं मांसरसञ्च परित्यजेत ॥ ७२—७६ ॥

पञ्चामृतपर्पट्याः—सत्त्वाभ्रम् अभ्रसत्त्वमित्यर्थः। क्रमवृद्धमिति सुवर्णादिलोहान्त-

स्वतः शीता समाहृत्य पटचूर्णं विधाय च।
निक्षिपेदूर्ध्वखण्डाया पलिकाया ततः परम् ॥ ८४ ॥
पूर्ववद्बदराङ्गारैर्मृदुभिर्द्रावयेच्छनैः।
तुल्याऽऽलकशिलागन्धं पलार्द्धं विषभावितम् ॥ ८५ ॥
पूर्वपर्पटिकातुल्यं तस्मादल्पं मुहुर्मुहुः।
जारयेत् पलिकामध्ये यथा दह्येत पर्पटी ॥ ८६ ॥
पलिकेति विनिर्दिष्टा स्नेहक्षेपणयन्त्रिका।
जीर्णे तालादिके चूर्णं पटचूर्णं विधीयताम् ॥ ८७ ॥
पूतीकरञ्जषट्कोल-व्याघ्रीशोभाञ्जनाङ्घ्रिभिः।
एतैः पञ्चपलैः क्वाथ षोडशांशावशेषितम् ॥ ८८ ॥
तेन क्वाथेन सस्वेद्य शोषयेत् सप्तधा हि ताम्।
विषतिन्दुफलोद्भूतै रसैर्निर्गुण्डिकारसैः ॥ ८९ ॥
विभाव्य पलिकामध्ये क्षिप्त्वा बदरवह्निना।
ईषत् प्रस्वेदनं कृत्वा स्थापयेदतियत्नतः ॥ ९० ॥
उक्ता भैरवनाथेन स्यात् पञ्चामृतपर्पटी।
व्योषाज्यसहिता लीढा गुञ्जावीजेन सम्मिता ॥ ९१ ॥
सर्वलक्षणसम्पूर्णं विनिहन्ति क्षयामयम्।
श्वास कासं विसूचीञ्च प्रमेहमुदरामयम् ॥ ९२ ॥
अरोचकञ्च दुःसाध्य प्रसेकं छर्दिमुद्भवम्।
अधिकं गुदरोगञ्च शूलकुष्ठान्यशेषतः ॥ ९३ ॥
वातज्वरञ्च विड्बन्धं ग्रहणीं कफजान् गदान्।
एकद्वन्द्वत्रिदोषोत्थान रोगानन्यान् महागदान् ॥ ९४ ॥

ऊर्ध्वपञ्चकम् उत्तरोत्तरम् एकैकभागवृद्धम्। शाणेयौ शाणभागिकौ। रेतयित्वा आलोडयित्वेत्यर्थः। ताप्यं माक्षिकम्। हेमादिपञ्चलोहानां सुवर्णादिकान्तलौहान्तानां पञ्चानामित्यर्थः। ऊर्ध्वखण्डायां पलिकायां "पला" इति प्रसिद्धे भाण्डात् तैलाद्युत्क्षेप-णाय यन्त्रविशेषे। कः। तामेत् पलिका इति वक्तुमाह, पलिकेतीति।—स्नेहक्षेपण

अग्निमान्द्यं विशेषेण रसोऽयं परमो मतः ।
एवं सम्पूज्य दातव्यो रसोऽयं भिषगुत्तमैः ॥ ९५ ॥
तत्तद्रोगहरैर्योगैस्तत्तद्रोगानुपानतः ।
क्षयादिसर्वरोगघ्नी स्यात् पञ्चामृतपर्पटी ॥ ९६ ॥
तिलसर्षपबिल्वाम्ल-कारवेल्लकुसुम्भकम् ।
त्यजेत् पारावतं मांसं वृन्ताकं कुक्कुटं तथा ॥ ९७ ॥

अथ गन्धकपिष्ट्यादियोगः ।—

युक्तं गन्धकपिष्ट्याऽयस्तालकं गन्धमाक्षिकम् ।
युक्त्या तद्भस्मना नीतं तृष्णाच्छर्दिनिवारणम् ॥ ९८ ॥

यन्त्रिका तैलाद्युत्क्षेपणार्थयन्त्रविशेषः । पटचूर्णं वस्त्रगालितचूर्णम् । तुल्येति ।— विषभावितं विषमिश्रितमित्यर्थः, तालकशिलागन्धं पलाङ्गमिति मिलित्वा पलार्द्धमित्यर्थः तेन चतुर्णां प्रत्येकं कोलभागः । पूतीकरञ्जं नाटाकरञ्जः । षट्कोलं षड्षणम्। पञ्चरवैरिति मिलित्वा। औषधसेवनकाले वर्जनीयान्याह,—तिलेति । अस्य पर्पटी यथा—शोधितसुवर्णं तो १, शोधितरौप्यं तो २ शोधितताम्रं तो ३, अभ्रसत्त्वं तो ४, शोधितमारितकान्तलौहं तो ५ सीसकं तो ॥, वङ्गं तो ॥, सर्वमग्नौ द्रावयित्वा आलोड्य च तत्र शुद्धगन्धकमनःशिलाहरितालानां प्रत्येकं पलमानं प्रक्षिप्य खल्ले संस्थाप्य च अम्लवर्गरसेन मर्दयेत्। ततो मूषायां संस्थाप्य ऊर्द्धाधः ताप्यादिचूर्णम् अनुरूपं दत्त्वा पुटेत्, एवं विंशतिवारं कुर्यात्। ततः सुवर्णादिलोहभागमपेक्ष्य द्विगुणसूतेन सूताद्विगुणगन्धकेन च कज्जलीं विधाय लोहपात्रे बादराङ्गारैर्द्रावयित्वा च पूर्वोक्तसुवर्णादीनां भस्म तत्र प्रक्षिप्य रसपर्पटीवत् कुर्यात् । अनन्तरं शीतीभूतां तां चूर्णयित्वा वस्त्रेण गालयेत्। ततः ऊर्द्धदण्डायां पलिकायां निक्षिप्य पूर्ववत् बदराङ्गारे द्रवीकृत्य च तत्र हरितालादिविषान्तं द्रव्यचतुष्टयं प्रत्येकं कोलमानं मुहुर्मुहुरल्पमल्पं दत्त्वा पूर्ववत् पर्पटिकां कुर्यात् । ततः पुनरपि शीतां तां विचूर्ण्य वस्त्रेण गालयित्वा च पूतिकरञ्जादीनां पञ्चपलानां चत्वारिंशत्पलतोयक्वथितानां षोडशांशावशिष्टेन क्वाथेन तथा विषतिन्दुकफलरसेन निर्गुण्डीरसेन च प्रत्येकं सप्तधा भावयेत् । पुनरपि तां पलिकायां निक्षिप्य बादरवह्निना ईषत् प्रस्वेद्य सुगुप्तं स्थापयेत् ॥ ७७—९७ ॥

गन्धकपिष्ट्यादियोगे—गन्धकपिष्ट्या "खल्ले विमर्द्य गन्धेन दुग्धेन सह पारदम्" इत्याद्युक्तपिष्टीभूतगन्धकेन । गन्धमाक्षिकं गन्धकं माक्षिकञ्च ॥ ९८ ॥

अथ राजावर्त्तरस ।—

राजावर्त्तो रसः शुल्वं मधुकं घृतपाचितम् ।
मध्वाज्यशर्करायुक्तं हन्ति सर्वान् मदात्ययान् ॥ ९९ ॥

अथ द्वितीयराजावर्त्तरस ।—

राजावर्त्तरसः शुल्व सूतगर्भे नियोजितम् ।
यष्टीमधुरसैर्घृष्ट घृतमध्ये विपाचितम् ॥
मध्वाज्यशर्करायुक्त हन्ति सर्वान् मदात्ययान् ॥ १०० ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये राजयक्ष्मारुचि-
प्रसेकवान्तिहृद्रोगतृष्णामदात्ययप्रकरणं नाम चतुर्दशोऽध्याय ॥ १४॥

अथ पञ्चदशोऽध्यायः ।

अथार्शसां चिकित्सनम् ।—

अथ अर्शसां स्वरूपलक्षणम् ।—

गुदस्य वहिरन्तर्वा जायन्ते चर्मकीलका' ।
सर्वरोगकराः पुंसामर्शांसीति हि विश्रुता. ॥ १ ॥

राजावर्त्तरसे—राजावर्त्तं कान्तपाषाण । रस रससिन्दूरम् । घृतपाचित घृतेन यथाविधि भावितमित्यर्थ, उत्तप्तघृतमध्ये स्थापितमित्यर्थो वा ॥ ९९ ॥

द्वितीयराजावर्त्तरसे—राजावर्त्तरस पूर्वोक्तप्रकारेण कल्पित रस । पूर्वोक्त-राजावर्त्तरस ताम्रञ्च द्वय यष्टीमधुरसघृष्ट पिष्टसूतभस्मान्त स्थाप्य शोषयित्वा च उत्तप्तघृतमध्ये स्थापयेत्, तत शीतीभूते घृते तदुत्तोल्य स्थापयेत, ततो मात्रा गृहीत्वा मध्वादिभि पाययेदिति ॥ १०० ॥

इति रसरत्नसमुच्चयबोधिन्या चतुर्दशोऽध्याय ॥ १४ ॥

त्रिदोषजत्वसाधर्म्यात् दोषाणां सर्वदेहव्यापित्वसाधर्म्याच्च राजयक्ष्माद्यनन्तरम् अर्शश्चिकित्सित वक्तु पञ्चदशाध्यायमारभते, तत्रादौ अर्शसां स्वरूपमाह, गुदस्येति ।—चर्मकीलका. चर्ममयकीलाकारा, अङ्कुरा इति शेष ॥ १ ॥

अथ पित्तार्शोलक्षणम् ।—

रुधिरस्राविणस्तेषां पित्तजाः परिकीर्त्तिताः ॥ २ ॥

अथ वातार्शोलक्षणम् ।—

वातजा निःसह्योत्थाना उदावर्त्तं प्रकुर्वते ॥ ३ ॥

अथ श्लेष्मार्शोलक्षणम् ।—

श्वयथुं श्लेष्मजाः कुर्य्युः—"

अथ त्रिदोषजार्शोलक्षणम् ।—

"—सर्वं कुर्य्युस्त्रिदोषजाः ॥ ४ ॥

अथ अर्शःकुठारः ।—

शुद्धसूतं पलैकन्तु द्विपलं शुद्धगन्धकम् ।
मृतं ताम्रं मृतं लोहं प्रत्येकन्तु पलत्रयम् ॥ ५ ॥
त्र्यूषणं लाङ्गली दन्ती पीलुकं चित्रकं तथा ।
प्रत्येकं द्विपलं योज्यं यवक्षारञ्च टङ्कणम् ॥ ६ ॥
उभौ पञ्चपलौ योज्यौ सैन्धवं पलपञ्चकम् ।
द्वात्रिंशत्पलगोमूत्रं स्नुहीक्षीरञ्च तत्समम् ॥ ७ ॥
मृद्वग्निना पचेत् स्थाल्यां सर्वं यावत् सुपिण्डितम् ।
माषद्वयं सदा खादेद्रसो ह्यर्शःकुठारकः ॥
तक्रेण दाडिमाम्भोभिः पक्वकन्देन वाऽथ तत् ॥ ८ ॥

पित्तार्शसां लक्षणमाह, रुधिरस्राविण इति ।—पित्तार्शःसु रक्तस्रावस्तु पित्तस्य विशेषेण रक्तदूषकत्वादिति ॥ २ ॥

वातार्शोलक्षणमाह, वातजा इति ।—निःसह्योत्थाना कठिनमला ॥ ३ ॥

श्लेष्मार्शसां सन्निपातार्शसाञ्च लक्षणमाह, श्वयथुमिति ।—सर्वं वातजादीनां त्रयाणां मिश्रितलक्षणमित्यर्थः ॥ ४ ॥

अर्शःकुठारे—पीलुकम् औत्तरापथिकं फलविशेषं, "आखरोट्" इति लोके । पक्वकन्देन पुटपक्वशूरणरसेन ॥ ५—८ ॥

अथ वचादिमोदकः ।—

वचाहिङ्गुविडङ्गानि सैन्धवं जीरनागरम् ।
मरिचं पिप्पली कुष्ठं पथ्या वह्न्यजमोदकम् ॥ ९ ॥
क्रमोत्तरगुणं चूर्णं सर्वेषां द्विगुणं गुडम् ।
कर्षञ्चोष्णजलेनानुपिबेद्दाताऽर्शसां जये ॥ १० ॥

अथ तीक्ष्णमुखो रसः ।—

मृतसूताभ्रहेमार्क-तीक्ष्णमुण्डं सगन्धकम् ।
मण्डूरं माक्षिकं तुल्यं मर्द्यं कन्याद्रवैर्दिनम् ॥ ११ ॥
अन्धमूषागतं पाच्यं त्रिदिनं तुषवह्निना ।
चूर्णितं सितया माषं खादेत् पित्तार्शसां जये ॥ १२ ॥

अथ लौहाष्टकम् ।—

मृत लौहञ्चेन्द्रयव शुण्ठी भल्लातचित्रकम् ।
विल्वमज्जाविडङ्गानि पथ्या तुल्यं विचूर्णयेत् ॥
सर्वतुल्यं गुडं योज्यं कर्षं भुक्त्वाऽर्शसां जयेत् ॥ १३ ॥

अथ श्लेष्मार्शसि औषधविशेषनिर्देशः ।—

श्लेष्मार्शसः प्रशान्त्यर्थं देयमानन्दभैरवम् ।
मृतताम्रेण सन्तुल्यं देयं गुञ्जात्रयं हि तत् ॥ १४ ॥

वचादिमोदके—वह्निः चित्रकः । क्रमोत्तरगुणमुत्तरोत्तरमेकैकभागवृद्धम् ॥९।१०॥

तीक्ष्णमुखरसे—तीक्ष्णं तीक्ष्णलौहम् । मुण्डं मुण्डलौहं, बोलनामा सुगन्धिद्रव्यविशेषो वा । क्वचिदेतदनन्तरं—"भल्लातकं तिलं पथ्याचूर्णं गुडसमायुतम् । मोदकं भक्षयेन्मासात् पित्तरक्तार्शसां जयेत् ॥" इत्यधिकः पाठः ॥ ११।१२ ॥

लौहाष्टके—विल्वमज्जा विल्वपेषिका ॥ १३ ॥

श्लेष्मार्शसि अधिकारान्तरोक्तमौषधविशेषमुपदिशति, श्लेष्मार्शस इति ।—आनन्दभैरवं वक्ष्यमाणातिसारचिकित्सोक्तं, अस्य गुञ्जात्रयं मृतताम्रञ्च गुञ्जात्रयं निजानुपानेन प्रयोज्यम् ॥ १४ ॥

अथ सर्वलोकाश्रयो रसः ।—

शुद्धं सूतं पलं गन्धं गन्धार्द्धं तालताप्यकम् ।
अमृतं रसकञ्चैव तालकार्द्धविभागिकम् ॥ १५ ॥
एतेषां कज्जलीं कुर्य्याद्दृढं सम्मर्द्य वासरम् ।
त्रिदिनं मर्दयेच्चाथ दत्त्वा निम्बुजलं खलु ॥ १६ ॥
वटीकृत्य विशोष्याथ काचकूप्यां निधापयेत् ।
निष्कतुल्यार्कपत्रेण पिधायाऽऽस्यं प्रयत्नतः ॥ १७ ॥
मार्दाङ्गुलमितोत्सेधं मृत्स्नया तां विलिप्य च ।
ततो भाण्डतृतीयांशे सिकतापरिपूरिते ॥ १८ ॥
निधाय सिकतामूर्द्ध्नि सिकताभिः प्रपूरयेत् ।
रुद्ध्वाऽऽस्य तदधो वह्निं ज्वालयेत् सार्द्धवासरम् ॥ १९ ॥
स्वाङ्गशीतलितं काच-घटादाकृष्य तं रसम् ।
घटचूर्णं विधायाथ ताम्रमभ्रं पलद्वयम् ॥ २० ॥
पलार्द्धममृतञ्चैव मरिचञ्च चतुष्पलम् ।
एकीकृत्य क्षिपेत् सर्वं नारिकेलकरण्डके ॥ २१ ॥

साज्यो गुञ्जादिमानो हरति रसवरः सर्वलोकाश्रयोऽयं
वातश्लेष्मोत्थरोगान् गुदजनितगदं शोषपाण्ड्वामयञ्च ।
यक्ष्माणं वातशूलं ज्वरमपि निखिलं वह्निमान्द्यञ्च गुल्मं
तत्तद्रोगघ्नयोगैः सकलगदचयं दीपनं तत्क्षणेन ॥ २२ ॥

अथ अर्शोघ्नं वटकः ।—

अर्शोघ्नं वटकं वक्ष्ये पुत्रक ! शृणु भद्रक ! ।
पिप्पली पिप्पलीमूलं वनशूरणचित्रकम् ॥ २३ ॥

सर्वलोकाश्रयरसे—गन्धमपि पलं ग्राह्यम् । गन्धार्द्धं तालताप्यकमिति माक्षिक-हरितालयो मिलित्वा गन्धकार्द्धत्वम् । रसकः खर्परम्, अमृतरसकयोः प्रत्येकं तालार्द्धमानता ज्ञेया । निष्कतुल्यार्कपत्रेण शाणमितताम्रपत्रेण । मृत्स्नया मृत्तिकया । तां काचकूपीम् । नारिकेलकरण्डके नारिकेलकपाले, एतच्च गुण-विशेषाधानार्थं बोद्धव्यम् ॥ १५—२२ ॥

मरिच कण्टकारी च रक्तपुष्पी समाशका।
पलमेकं पृथक् सर्वं श्लक्ष्णं दृषदि पेषयेत् ॥ २४ ॥
गजाजपशुमूत्रेषु शुभे भाण्डे विनिक्षिपेत्।
मृदग्निना पचेत् सर्वं चूर्णशेषं यथा भवेत् ॥ २५ ॥
लावणत्रयञ्च तत्रैव पलमेकन्तु निक्षिपेत्।
अक्षप्रमाणवटकान् कुर्य्यादेवं पृथक् पृथक् ॥ २६ ॥
त्रिंशद्दिनानि मतिमानर्शोघ्नं दीपनं परम्।
घृततक्रसमायुक्तं भोजनं सम्प्रदापयेत् ॥ २७ ॥

अथ अर्शोघ्नी वटिका।—

गन्धकं तारताम्रञ्च कृत्वा चैकत्र पिष्टिकाम्।
तत्समञ्चाभ्रकं तीक्ष्णं गन्धकं पञ्चमांशकम् ॥ २८ ॥
विषञ्च षोडशांशेन द्वौ भागौ सूतकस्य च।
एकीकृत्य प्रयत्नेन जम्बीरद्रवमर्दितम् ॥ २९ ॥
भाजने मृन्मये स्थाप्य वराक्काथेन भावयेत्।
दशमूलशतावर्य्योः क्वाथे पाच्यं क्रमेण हि ॥ ३० ॥
अथोत्तार्य्य प्रयत्नेन वटिका कारयेद्बुधः।
गुञ्जात्रयप्रमाणेन गुदव्याधिञ्च शूलनुत् ॥ ३१ ॥

अथ मूलकुठार।—

वरनागं तथा व्योम-सत्त्वं शुल्वञ्च तीक्ष्णकम्।
सर्वमेकत्र विद्राव्य क्षिप्राऽऽलञ्चाल्पमल्पकम् ॥ ३२ ॥

अर्शोघ्नवटके—रक्तपुष्पी रक्तार्कमूलम् अर्शोहन्तृत्वात्। गजाजपशुमूत्रेषु गजा-लादीनां पशूनां मूत्रेषु, अष्टविधमूत्रेषु इत्यर्थः। लावणत्रयं लवणत्रयं, विडसैन्धव-सौवर्चलभेदात्। पलमेकमिति प्रत्येकम् ॥ २३—२७ ॥

अर्शोघ्नीवटिकायां—तत्सममिति गन्धकादीनां त्रयाणां समम्। तीक्ष्णं तीक्ष्ण-लौहमपि अभ्रसमम्। पञ्चमांशकमिति प्रथमभागापेक्षया पञ्चमो भागः, एवं षोडशांशोऽपि। सूतस्य द्वौ भागौ इति प्रथमगन्धकभागापेक्षया बोध्यौ। वराक्काथेन त्रिफलाक्काथेन। भावयेत् इति सप्ताहम् ॥ २८—३१ ॥

चालयेदनिशं यावत्तालकं त्रिगुणं खलु ।
ततस्तेन विमर्द्याथ पिष्टीं कुर्य्याद्रसेन हि ॥ ३३ ॥
ततो भल्लातकीवृक्ष-मूलान्तःस्थां खनेच्च ताम् ।
मासादाकृष्य तां पिष्टिं गव्यदुग्धे विनिक्षिपेत् ॥ ३४ ॥
ततो भल्लातकीतैलं हृतं पातालयन्त्रतः ।
आयसे भाजने स्निग्धे पिष्टिकां तां निवेश्य च ॥ ३५ ॥
प्रस्थमात्रं हि तत्तैलं जारयेदतियत्नतः ।
तत्तैलभावितैर्गन्धैः पुटित्वा भस्मतां व्रजेत् ॥ ३६ ॥
ततः कार्त्तिकमासोत्थ-कौरण्टदलजै रसैः ।
रसं सम्मर्द्य सम्मर्द्य घर्मे संस्थाप्य मारयेत् ॥ ३७ ॥
तद्भस्म मेलयेत् पूर्व-भस्मना समभागिकम् ।
वनशूरणनिर्गुण्डी महाराष्ट्रीभकण्टिका ॥ ३८ ॥
वज्रवल्ली शिखी चैषां रसैः पिष्ट्वा विशोषयेत् ।
त्रिवारं मार्कवद्रावैर्द्रावयित्वा विशोषयेत् ॥
चूर्णीकृत्य प्रयत्नेन क्षिपेत् क्वापि करण्डके ॥ ३९ ॥
सोऽयं मूलकुठारको रसवरो दीप्याग्निवल्लोत्तमा-
मयुक्तं सघृतश्च वल्लतुलितः संसेवितो नाशयेत् ।

मूलकुठारे—वरनाग 'तीक्ष्णं नीलाञ्जनोपेतम्" इत्यादिना षष्ठाध्यायोक्तं सीसकम् । व्योमसत्त्व सत्त्वपातनविधिना गृहीतमभ्रसत्त्वम् । शुल्वं ताम्रम् । चिक्षेति ।—आलं हरितालम्, अल्पाल्पं हरितालं क्षिपेत निरन्तरं चालयेच्च । कियन्मानं हरितालं तत्र क्षेतव्यमित्याह, यावदिति ।—त्रिगुणमिति एकभागापेक्षया त्रैगुण्यम् । तत इति ।—सर्वतुल्येन पारदेन सह विमर्द्य पिष्टिका कार्य्येति । जारयेदिति भल्लातकतैलमध्ये तावत् स्थापयेत, यावता सा पिष्टिका जीर्णीभवति । तत्तैलभावितै भल्लातकतैलभावितै । कौरण्टदलजै पीतपुष्पझिण्टीपत्रजै । घर्मे आतपे । महाराष्ट्री जलपिप्पली "काँच्डा" इति लोके । इभ नागकेशर । कण्टिका अतिबला । "इभकण्टिका" इत्यत्र "इभकर्णिका" इति पाठे—करिकर्णिका हस्तिकर्णवत् पत्रविशिष्ट कन्दशाकविशेष, गोरक्षकर्कटी वा । वज्रवल्ली अस्थि-

अर्शांस्याननासिकाक्षिगुदजान्यत्युग्रपीडानि च
प्लीहान ग्रहणीञ्च गुल्मयकृतौ मान्द्यञ्च कुष्ठामयान् ॥४०॥

अथ महोदयप्रत्ययसार ।—

रसग्रस्तसमुद्गीर्ण-गन्धकस्य पलत्रयम् ।
मृतसूताभ्रताम्राय: कर्षं कर्षं पृथक् पृथक् ॥ ४१ ॥
पल हिङ्गुलचूर्णस्य माक्षिकस्य पलत्रयम ।
पल कम्पिल्लकस्यापि विषस्यार्द्धपलं तथा ॥ ४२ ॥
सप्ताहं मर्दयेत् सर्व दत्त्वा चूर्णोदक मुहु: ।
ततस्तद्गोलक कृत्वा सप्ताहञ्चाऽऽतपे क्षिपेत् ॥ ४३ ॥
गुडचूर्णं शिलाचूर्णं लिम्पेदङ्गुलिकाघनम् ।
त्रिपलं गन्धकं दत्त्वा क्रौञ्चग्रामथ च गोलकम् ॥ ४४ ॥

संहार । शिखी चित्रक । दीप्य यमानिका । वेल्ल विडङ्गम् । त्रफला त्रिफला आमलकी वा । अस्य क्रमो यथा—नागादिक सर्व द्रावयित्वा उक्तमान किञ्चित किञ्चित् हरिताल तत्र प्रक्षिपन् प्रक्षिपन् दर्व्या चालयेत, तत अवतार्य्य सर्वतुल्यपारदेन सह मर्दयित्वा पिष्टिका कुर्य्यात । अनन्तर भल्लातकतरुमूल-काष्ठ खनित्वा तन्मूलान्त ता पिष्टिका मास स्थापयेत्, मासादूर्द्ध पिष्टिका तालाक्रष्य गव्यदुग्धमध्ये निक्षिपेत, मासानन्तरञ्च पातालयन्त्रनि सारिते भल्लातकतैले लौह पात्रस्थे प्रज्वलिते यावत् जीर्णीभावात ता पिष्टिका न्यसेत। अनन्तर जीर्णीभूता ता पिष्टि भल्लाततैलभावितेन गन्धकेन मर्दयित्वा पुटेत भस्मताञ्च नयेत। अनन्तर कार्त्तिकमासजभिण्टीरसै पारद पुन पुन सम्मर्द्य आ भस्मीभावात् आतपे रक्षेत्। अथ एतत् रसभस्म पूर्वोक्तभस्मना तुल्यभागेन मिश्रयित्वा वन्य-शूरणादिरसै एकैकवार मर्दयित्वा शोषयेत, भृङ्गराजरसेन च एव त्रिधा भावयेत् शोषयेच्च ॥ ३२—४० ॥

महोदयप्रत्ययसारे—रसग्रस्तसमुद्गीर्णगन्धकस्य आदौ रसेन ग्रस्तस्य मूर्च्छनकर्मणा कवलितस्य पश्चात समुद्गीर्णस्य उत्थापनकर्मणा उद्वान्तस्य गन्धकस्य, तादृशञ्च गन्धक ऊर्द्धपातनायन्त्रेण कज्जल्या पातनात रसो ऊर्द्धलग्नो य अध अधस्तिष्ठति स एवेति। मृतसूत रससिन्दूरम्। गुडचूर्ण गुडं चूर्णञ्च, चूर्ण सुधा। शिलाचूर्णं

गोलकस्योपरिष्टाच्च क्षिपेत्तालपलत्रयम् ।
संरुध्यातिप्रयत्नेन दद्याद्गजपुटं खलु ॥ ४५ ॥
स्वाङ्गशीतलमाहृत्य गोलकं लेपनैः सह ।
विचूर्ण्य सप्तवारं हि विषतिन्दुफलोद्भवैः ॥ ४६ ॥
द्रवैरथाऽऽतपे शुष्कं क्षिपेद्रम्ये करण्डके ।
त्रिंशदंशेन वैक्रान्त-भस्म तस्मिन् विनिक्षिपेत् ॥ ४७ ॥
अयं हि नन्दीश्वरसम्प्रदिष्टो रसो विशिष्टः खलु रोगहन्ता ।
निःशेषरोगेष्वहतप्रतापो महोदयप्रत्ययसारनामा ॥ ४८ ॥
हन्यात् सर्वगुदामयान् क्षयगदं कुष्ठञ्च मन्दाग्निता
शूलाध्मानगदं कफं श्वसनतामुन्मादकापस्मृती ।
सर्वा वातरुजो महाज्वरगदान्नानाप्रकारास्तथा
वातश्लेष्मभवं महामयचयं दुष्टग्रहण्यामयम् ॥ ४९ ॥

अथ कनकसुन्दरः ।—

स्याद्रसं धौतमाक्षीकं कान्ताभ्रं नागहाटकम् ।
पृथ्वीभटेन सन्तुल्यं सर्वतुल्यञ्च गन्धकम् ॥ ५० ॥
दत्त्वा विद्याधरे यन्त्रे पुटेदारण्यकोत्पलैः ।
स्वाङ्गशीतलमुद्धृत्य त्र्यूषणेन विमिश्रयेत् ॥ ५१ ॥
अर्शोव्याधौ कटीशूले चक्षुःशूले च दारुणे ।
सन्निपाते क्षये श्वासे कासे मन्दानले ज्वरे ॥ ५२ ॥
कर्णशूले शिरःशूले दन्तशूले प्रयोजयेत् ।
पीनसे प्लीह्नि हृच्छूले ग्रन्थिवाते च दारुणे ॥ ५३ ॥

मनःशिलाचूर्णम् । लिम्पेदिति ।—एतत्त्रय सम्मर्द्य तैः अङ्गुलिमात्रोत्सेधं यथा तथा गोलकं लिम्पेदित्यर्थः । क्रौञ्च्या मूषायाम् । विषतिन्दुफलं "कुँचिला" इति ख्यातम् । त्रिंशदंशेन इति समुदितभेषजापेक्षया बोद्धव्यम् ॥ ४१—४९ ॥

कनकसुन्दरे—धौतमाक्षिकं रौप्य सुवर्णमाक्षिकञ्च, रौप्यमाक्षिकमित्यर्थो वा । कान्ताभ्रं कान्तलौहम् अभ्रञ्च । नागहाटकं सीसकं सुवर्णञ्च । पृथ्वीभटेन मृद्दारेण,

एकाङ्गे वा धनुर्वाते कम्पवाते च मूर्च्छिते।
ज्वरांश्च विषमान् सर्वान् हन्ति रोगाननेकधा॥ ५४॥
सेवितः पथ्ययोगेन रसः कनकसुन्दरः।
गुञ्जामात्रं ददीतास्य यथायुक्तानुपानतः॥ ५५॥
घृतेन सयुतो वाते मधुना पैत्तिके ज्वरे।
पिप्पल्या श्लैष्मिके देयः पित्तोद्भूते सचन्दनः॥ ५६॥
तक्रेण श्लेष्मवातोत्थे वातपित्ते घृतान्वितः।
श्लेष्मपित्ते चाऽऽर्द्रकेण निर्गुण्ड्या सान्निपातिके॥ ५७॥
फलत्रयेण शूलेषु विषमेषु ज्वरेष्वथ।
आर्द्रकेणाथवा दद्याद्वह्निमान्द्ये विशेषतः॥ ५८॥
अभिष्यन्दे शिरःशूले गायत्रीबोलसंयुतम्।
पक्षिमाससमायुक्तं कफवाते च मूर्च्छिते॥ ५९॥
एकाङ्गे च धनुर्वाते क्षीरयुक्तश्च पीनसे।
पाण्डुरोगे क्षये कासे मरिचाद्यैश्च कामले॥ ६०॥
अजमोदाविडङ्गैश्च नाभिशूलेऽग्निमान्द्यजित्।
रूक्षज्वरेऽरुचौ देयः कदलीफलसंयुतः॥
बोलेनार्द्रकटीशूले भाषितं नागबोधिना॥ ६१॥

अथ अर्केशः।—

नागं पारदगन्धकं त्रिलवणं वार्य्यर्कजं मेलये-
देकैकञ्च पलं पलं त्रयमतः पञ्च क्रमान्मर्दयेत्।

वराहेणेत्यर्थः, कोलमानेन इति यावत्, रसादिहाटकान्तं सर्वं तोलकमानमित्यर्थः। त्र्यूषणेनेति मिलितत्रिकटुचूर्णेन सर्वतुल्येनेत्यर्थः। पैत्तिके ज्वरे मधुना दद्यात्। पित्तोद्भूते प्रवृद्धपित्ते अन्यस्मिन् रोगे चन्दनेन सह देयः। गायत्री खदिरः। बोलः स्वनामख्यातः वणिग्द्रव्यविशेषः। कफवाते च मूर्च्छिते प्रवृद्धकफवाते इत्यर्थः॥ ५०—६१॥

अर्केशे—त्रिलवणं सैन्धवं सौवर्चलं विडञ्च। वार्य्यर्कजं वारिजम् अर्कजञ्च,

सर्वं तद्दिवसत्रय तदनु तद्द्रवा पुटं भावनाः
कुर्य्यात् सत्रिफलाग्निवेतसरसैः पञ्चाधिका विंशतिः ॥६२॥
पश्चैतत् क्रमशस्ततो गुडभवैर्दत्तोऽस्य वल्लो जले-
र्हन्त्यर्शांस्यखिलानि शूरणघृतैस्तस्यान्नमस्मिन् हितम् ।
अर्कांशः परिवर्ज्यतामिति मुनि श्रीवासुदेवोऽवदत्
कुष्माण्डीफलमाषपायसमतिव्यायाममर्कातपम् ॥ ६३ ॥

अथ तीक्ष्णमुख ।—

रसेन्द्रहेमार्कविडालगोला-सुरायसं लोहमलाभ्रगन्धाः ।
ताप्यञ्च कन्यारसमर्दितोऽय पक्व पुटेत्तीक्ष्णमुखोऽर्शसां स्यात् ॥६४॥

अथार्श कुठार ।—

श्रेष्ठादन्त्यग्नियुग्मत्रिकटुकहलिनीपीलुकुम्भं विपक्वं
प्रस्थे मूत्रस्य सस्नुक्पयसि रसपलं द्वे पले गन्धकस्य ।
लोहस्य त्रीणि ताम्रात् कुडवमथ रजश्चारयोश्चापि पञ्च
चिप्त्वा स्थाल्या पचेत्तु ज्वलति दहनतश्चूर्णमर्शःकुठारः ॥६५॥

तत्र वारिज शङ्खम् अर्कज तुल्य, तस्य ताम्रसम्भवत्वात्, तथा च —"तुल्य ताम्रोपधातुर्हि किञ्चित्ताम्रेण तद्भवेत्" इति । एकैकमिति ।—नागादीना त्रयाणा प्रत्येक पल पलम् ; अत एभ्योऽन्यानि पञ्च लवणत्रयशङ्खतुल्यानि प्रत्येक पलत्रयमितानि ग्राह्याणि । कुर्य्यादिति ।—त्रिफलया व्यस्तया भाव्या, न तु मिलितया । वेतस अम्लवेतस । गुडभवैर्जले गुडोदके ॥ ६२।६३ ॥

द्वितीयतीक्ष्णमुखे—रसेन्द्र रसमिन्दूर, तथा च रसरत्नाकर,—"मृतसूताभ्र-हेमार्क" इति । रसेन्द्रसारसङ्ग्रहेऽपि—"मृतसूतार्कहेमाभ्रम" इति । विडाल हरितालम् । गोला मन शिला । सुरायस तीक्ष्णलौहम् । रसेन्द्रादय ताप्यान्ता सर्वे समाना । पुटेत इति अन्धमूषाया पुटेत, तथा च रसेन्द्रसारसङ्ग्रहे—"अन्धमूषागत सर्वं तत पाच्य हठाग्निना" इति । रसरत्नाकरेऽप्युक्तम्,—"अन्धमूषागत पश्चात विदिनन्तु तुषाग्निना" इति ॥ ६४ ॥

अर्श कुठारे—श्रेष्ठा मेदा, अर्शोहरत्वात । अग्नियुग्मं चित्रकमूल भल्लातकास्थि च । हलिनी लाङ्गलिका । कुम्भ त्रिवृत् । प्रस्थे इति सुधाक्षीरसहिते गोमूत्र-

अथ त्रैलोक्यतिलकः ।—

वज्रकृष्णाभ्रजं सत्त्वं शोधितं काचटङ्कणम् ।
रेतयित्वा रजः कृत्वा भर्जयित्वा घृतेन तत् ॥ ६६ ॥
अष्टांशसस्यकोपेतं पुटेद्वारत्रयं ततः ।
त्रिवारं नृपवर्त्तेन लुङ्गस्वरसयोगिना ॥ ६७ ॥
चतुर्वारञ्च वर्षाभू-वासामत्स्याक्षिकारसैः ।
गुग्गुलुत्रिफलाक्वाथैस्त्रिशद्वाराणि यत्नतः ॥ ६८ ॥
तुल्यांशरसगन्धोत्थ-कज्जल्याऽष्टांशभागया ।
पुटेत् पञ्चाशत वारान्मर्दयेच्च पुटे पुटे ॥ ६९ ॥
शोधितं रेतितं कान्तसत्त्वञ्च घृतमर्दितम् ।
पुटेदष्टाशदरदैः संयुतं लकुचाम्बुना ॥ ७० ॥
दशवारं तथा सम्यक् तार शुद्ध मनोह्वया ।
तथा विंशतिवाराणि बलिना मीनदृग्रसैः ॥ ७१ ॥
दशवाराणि ताप्येन कृष्णगोघृतयोगिना ।
उभयं समभाग तत् पुटेन्निर्गुण्डिकारसैः ॥ ७२ ॥
रसगन्धोत्थकज्जल्या दशवार पुटेत् पुनः ।
तस्मिन्नष्टांशभागेन क्षिपेद्वैक्रान्तभस्मकम् ॥ ७३ ॥

पक्षे, अत्र स्नुहीक्षीरस्यापि मात्रा प्रस्थमिता ग्राह्या "द्वाविंशत्पलगोमूत्र स्नुहीक्षीरञ्च तत्समम्" इति रसरत्नाकरसंवादात्, सस्नुक्पयसि इति सहार्थबलाच्च । ताम्रात् रज कुडवम् इति योजनीयम् । क्षारयो यवक्षारटङ्कणक्षारयो "यवक्षारञ्च टङ्कणम् । उभे पञ्चपले योज्ये" इति रसरत्नाकरसंवादात् ॥ ६५ ॥

त्रैलोक्यतिलके—वज्रकृष्णाभ्रज सत्त्व वज्राऽऽख्यकृष्णवर्णाभ्रसत्त्व, सत्त्वपातनविधिश्च प्रागेव प्रदर्शित । काचटङ्कण काचाख्यलवण टङ्कणञ्च । रेतयित्वा निशयित्वा इत्यर्थ शोधिताभ्रसत्त्वचूर्णं काचचूर्णं टङ्कणचूर्णञ्च एकत्र सम्मर्द्य इति समुदितार्थ । सस्यक तुत्थकविशेष । अष्टांशमिति अभ्रसत्त्वापेक्षया बोध्यम् । नृपवर्त्तेन राजावर्त्तेन । लुङ्गस्वरसयोगिना मातुलुङ्गरसयुक्तेन । मत्स्याक्षिका शालिञ्च । "चतुर्वारञ्च वर्षाभूवासामत्स्याक्षिकारसै" इत्यत्र "चतुर्वारञ्च ताप्येन वातारिस्नेहयोगिना ।

राजावर्त्तकलाशेन समभागेन पर्पटी ।
तत् सर्वं परिमर्द्याथ भावयित्वाऽऽर्द्रकाम्बुना ॥ ७४ ॥
गुडूच्याः स्वरसेनापि भूकदम्बरसेन वा ।
भृङ्गराजरसेनापि चित्रमूलरसेन च ॥ ७५ ॥
व्योषगञ्जाकिनीकन्दैर्भूयोऽप्यार्द्रद्रवेण च ।
पटचूर्णमतः कृत्वा क्षिपेच्छुद्धकरण्डके ॥ ७६ ॥
त्रैलोक्यतिलकः सोऽयं ख्यातः सर्वरसोत्तमः ।
सर्वव्याधिहरः श्रीमान् शम्भुना परिकीर्त्तितः ॥ ७७ ॥
उदावर्त्तञ्च विड्बन्धं व्यथाञ्च जठरोद्भवाम् ।
लोहलं मन्दबुद्धित्वं शूलित्वमपि वन्ध्यताम् ॥ ७८ ॥
सूतिरोगानशेषांश्च शूलं नानाविधं तथा ।
परिणामाख्यशूलञ्च तथा भिन्द्यात् समुत्कटम् ॥ ७९ ॥
रक्तगुल्मञ्च नारीणां रजःशूलञ्च दुःसहम् ।
अनुपानञ्च पथ्यञ्च तत्तद्रोगानुरूपतः ॥ ८० ॥

अथ अर्शोहरयोगः ।—

कुसुम्भमृदुपत्राणि काञ्जिकेनैव पाचयेत् ।
शाकवद्भक्षयेन्नित्यमर्शोरोगप्रशान्तये ॥ ८१ ॥

दशवारञ्च वषाभुवासामत्स्याक्षिकारसे” इति क्वचित् पाठः । तारं रौप्यम् । मनोह्वा मनःशिला । बलिना गन्धकेन । मीनदृक् मत्स्याक्षी । समभागेन इति तारकान्तसत्त्वयोः समभागेन । पर्पटी पङ्कपर्पटी । गञ्जा सर्वदा “गाँजा” इति ख्याता । किनी बृहतीभेदः । कन्दः शूरणः । लोहलं दुष्टरक्तज-व्याधिम् । क्वचिदेतदनन्तरं—“कान्तवैक्रान्तशुल्वाभ्ररसगन्धकभस्मना । मेघा वर्त्तिर्गुडे आर्य्या सस्नुक्क्षीरेण सोषणा ॥ शूरणं कासमर्दन्तु शिग्रुवार्त्ताक-वास्तुकम् । सुपक्वं योजयेच्छाकं पथ्यं गोधूमतण्डुलैः ॥” इत्यधिकः पाठः ॥ ६६—८०

अर्शोहरयोगे—कुसुम्भमृदुपत्राणि कुसुम्भस्य कोमलपत्राणि ॥ ८१ ॥

अथ देवदाल्यादिलेप ।—

देवदाल्याश्च बीजानि सैन्धवेन सुचूर्णित: ।
आरनालेन लेपोऽयं मूलरोगनिकृन्तन. ॥ ८२ ॥

अथार्श कुठारलेप ।—

काञ्चनीकुसुम चूर्णं शङ्खचूर्णं मन:शिलाम् ।
गजपिप्पलिकातोयैर्लेपो ह्यर्श:कुठारक: ॥ ८३ ॥

अथ अर्शोघ्नशौच ।—

देवदाल्या: कषायेण ह्यर्शोघ्न शौचमाचरेत् ।
गुदनि:सरणञ्चाथ शान्तिमायाति नान्यथा ॥ ८४ ॥

अथ दुर्नामहरलेप ।—

आरनालेन सम्पिष्टा सबीजा कटुतुम्बिका ।
सगुडा हन्ति लेपेन दुर्नामानि समूलत: ॥ ८५ ॥

अथ अर्शोघ्नी वर्त्ति ।—

पीलुतैलेन संलिप्ता वर्त्तिका गुदमध्यगा ।
पातयत्यर्शसा शीघ्रं सकला वेदना क्वचित् ॥ ८६ ॥

अथ अर्कक्षीरादिलेप ।—

अर्कक्षीर स्नुहीकाण्डं कटुकालावुपल्लवकम् ।
करञ्ज छागमूत्रेण लेप. स्यादर्शसा हित: ॥ ८७ ॥

देवदाल्यादिलेपे—देवदाली हस्तिघोषक । मूलरोगनिकृन्तन अर्शोरोगविनाशन',
कुलवद्द्बगाढमूलत्वात ॥ ८२ ॥

अर्श कुठारलेपे—काञ्चनीकुसुम हरिद्रापुष्पम् ॥ ८३ ॥

अर्शोघ्नशौचे—देवदाल्या कषायेण षडङ्गपरिभाषया श्रर्द्धशृतेन क्वाथेनेत्यर्थ ॥८४॥

दुर्नामहरलेपे—सबीजा कटुतुम्बिका बीजसहितकटुतुम्बीशस्यम् ॥ ८५ ॥

अर्शोघ्नवर्त्त्यां—वर्त्तिका पीषाफलादिकृतवर्त्तिका ॥ ८६ ॥

अर्कक्षीरादिलेपे—"स्नुहीकाण्डम्" इत्यत्र "स्नुहीक्षीरम्" इति चरकादि-
सम्मत पाठ ॥ ८७ ॥

अथ शिग्रुमूलादिलेप ।—

शिग्रुमूलार्कजैः पत्रैर्लेपनं हितमर्शसाम् ॥ ८८ ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये

अर्शोऽधिकारो नाम पञ्चदशोऽध्याय ॥ १५ ॥

अथ षोड़शोऽध्यायः ।

अथोदावर्त्तादिचिकित्सनम् ।—

अथोदावर्त्तनिदानम ।—

रूक्षैः कोद्रवजीर्णमुद्गचणकैः क्रुद्धोऽनिलोऽधो वहन्

रुद्ध्वा वर्त्म मलं विशोष्य कुरुते विश्मन्नमङ्ग तत ।

हृत्पृष्ठोदरवस्तिमस्तकरुजः सश्वासकास ज्वरं

गच्छन्नूर्द्ध्वमसौ हि नूनमनिशं कोपादुदावर्त्तयेत् ॥ १ ॥

अथोदावर्त्तहर घृतम ।—

कुष्ठहिङ्गुसिन्धूत्थ-विड्ढन्तीवचाभयाः ।

चित्रकस्य तु मूलञ्च कल्कीकृत्य पचेद्घृतम् ॥ २ ॥

चतुर्गुणे गवां क्षीरे युक्तं स्नुक्क्षीरमात्रया ।

उदावर्त्तादिरानाहान् हन्ति पानेन सर्वथा ॥ ३ ॥

शिग्रुमूलादिलेपे—शिग्रुपत्र मूलकपत्रमर्कपत्रञ्चेत्यर्थ ॥ ८८ ॥

इति रसरत्नसमुच्चयबोधिन्यां पञ्चदशोऽध्याय ॥ १५ ॥

मलविबद्धतादिलक्षणसाधर्म्यात अर्शसामनन्तरम् उदावर्त्तादिचिकित्सित वक्तुं षोडशाध्यायमारभते, तत्रादौ उदावर्त्तस्य निदानादिकमाह, रूक्षैरिति ।—वर्त्म मलवाहिस्रोत । उदावर्त्तयेत ऊर्द्ध्वमानयेत, मलादिकमित्यर्थ ॥ १ ॥

उदावर्त्तहरे घृते—युक्तं स्नुक्क्षीरमात्रया इति कुष्ठादिकं विविच्य अनुरूप मात्रया स्नुक्क्षीरं प्रक्षिप्य ॥ २।३ ॥

अथातिसारचिकित्सा ।—

अथातीसारनिदानम् ।—

अत्यम्बुपानतिलपिष्ट-विरूढरूक्ष-
शुष्कामिषाध्यशन-वङ्ममलग्रहाद्यैः ।
क्रुद्धोऽनिलोऽतिसरणाय च कल्पतेऽग्निं
हत्वा मलं शिथिलयन्नपि तोयधातून् ॥ ४ ॥

अथ दर्दुररसः ।—

सुश्लक्ष्णतीक्ष्णचूर्णन्तु रसेन्द्रसमभागिकम् ।
काञ्चनाररसैर्घृष्टं सर्वातीसारनाशनम् ॥ ५ ॥

अथ द्वितीयदर्दुररसः ।—

पिष्टः समेन तीक्ष्णेन काञ्चनाराम्बुमर्दितः ।
पुटपक्वोऽतिसारघ्नः सूतोऽयं दर्दुराह्वयः ॥ ६ ॥

अथाऽऽनन्दभैरवः ।—

हिङ्गुलं वत्सनाभञ्च मरिचं टङ्कणं कणा ।
मर्दयेत् समभागञ्च रसो ह्यानन्दभैरवः ॥ ७ ॥
गुञ्जैका वाऽर्द्धगुञ्जा वा बलं ज्ञात्वा प्रदापयेत् ।
मधुना लेहयेच्चानु कुटजस्य फलं त्वचम् ॥ ८ ॥
चूर्णितं कर्षमात्रन्तु त्रिदोषोत्थातिसारजित् ।
दध्यन्नं दापयेत् पथ्यं गवाज्यं तक्रमेव वा ॥
पिपासायां जलं शीतं विजया च हिता निशि ॥ ९ ॥

अतीसारपूर्वरूपे विट्सङ्गो भवति, अत उदावर्त्तानन्तरम् अतीसारचिकित्सितं विवक्षुः प्राक् तस्य निदानादिकमाह, अत्यम्बुपानेति ।—विरूढम् अङ्कुरितधान्यम् । अध्यशनं "भुक्तं पूर्वान्नशेषे तु पुनरध्यशनं मतम्" इत्युक्तलक्षणकम् । मलग्रहः पुरीषवेगविधारणम् । अतिसरणाय अतीसाराय । तोयधातून् स्वेदमूत्रादीन् ॥४॥

दर्दुररसे—रसेन्द्रसमभागिकं रससिन्दूरतुल्यम् । काञ्चनाररसैः रक्तकाञ्चनपुष्पद्रवैः ॥ ५ ॥

द्वितीयदर्दुररसे—सूत इत्यस्य समेन तीक्ष्णेन पिष्ट इत्यनेनान्वयः । पूर्वः दर्दुरः अपाकनिष्पन्नः, द्वितीयः पाकनिष्पन्न इत्युभयोर्भेदः ॥ ६ ॥

अथ सुधासाररसः।—

पृथक् पलिकगन्धाश्म-सूतसञ्जातकज्जलीम्।
प्रद्राव्य निक्षिपेत् व्योम पलैकं गतचन्द्रिकम्॥ १०॥
काष्ठेनाऽऽलोड्य तत् सर्वं क्षिपेत् कुटजपत्रके।
पुनः सञ्चूर्ण्य यत्नेन भावयेत्तदनन्तरम्॥ ११॥
बालतिन्दुफलद्रावैः क्षीरकौडुम्बरैस्तथा।
अरलुत्वग्रसैश्चापि दुग्धिनीस्वरसैस्तथा॥ १२॥
पुटपक्वस्य बालस्य दाडिमस्य रसैः शुभैः।
कृष्णाकाम्बोजिकामूल-रसैः कुटजवल्कजैः॥ १३॥
तुल्यांशविश्वगान्धारी-चूर्णं द्विपलिकं क्षिपेत्।
मुस्तावत्सकदीप्याग्नि-मोचसारं सजीरकम्॥ १४॥
वत्सनाभञ्च कर्षांशं प्रत्येकं तत्र निक्षिपेत्।
विचूर्ण्य भावयेद्भूयः शुण्ठीक्वाथेन सप्तधा॥ १५॥
इत्थं सिद्धो रसः पिष्टः करण्डे विनिवेशयेत्।
सुधासार इति ख्यातः सुधारससमद्युतिः॥ १६॥
दीपनः पाचनो ग्राही हृद्यो रुचिकरस्तथा।
दोषत्रयातिसारञ्च दुर्जयं भेषजान्तरैः॥ १७॥
आमञ्चैवाऽऽमरक्तञ्च ज्वरातीसारमेव च।

आनन्दभैरवे—वत्सनाभ विषम्। विजया भङ्गा॥ ७—९॥

सुधासारे—गन्धाश्म गन्धकम्। गतचन्द्रिक व्योम निश्चन्द्रमभ्रम्। क्षीरकौडुम्बरे राजादनफलरसे उडुम्बरफलरसेश्च। अरलु श्योनाक। दुग्धिनी स्वनामख्याता "क्षीट खिरुइ" इति वङ्गभाषा। कृष्णाकाम्बोजिकामूलरसे कृष्णा, करमर्द अस्य फलं, तथा काम्बोजिका रक्तगुञ्जा अस्या मूल तयो रसे। गान्धारी कण्टकारी। वत्सक इन्द्रयव। दीप्य यमानिका। अग्नि चित्रक। मोचसार मोचरस। वत्सनाभ विषम्। "दुर्जय भेषजान्तरै" इत्यनन्तर क्वचित्—"प्रवाहिकाञ्च निर्वाहो विष्विग्नी गुदशूलकम्" इत्यधिकः पाठो विद्यते।

सातिसारा विसूचीञ्च प्रतिबध्नाति तत्क्षणात् ॥
मान्यमानव्यतिक्रान्तिरिव पुण्यफलोदयम् ॥ १८ ॥

अथ रसोत्तम ।—

पिष्टविम्बाब्दकल्केन विधाय खलु चक्रिकाम् ।
निक्षिपेत् स्वेदनीयन्त्रे पक्काऽर्द्धघटिकावधि ॥ १९ ॥
आकृष्य तज्जलेरेव सम्प्रमर्द्याहरेद्रसम् ।
सुधासाररस तत्र क्षिप्ता धान्यकसम्मितम् ॥ २० ॥
पूर्वोदितेषु रोगेषु प्रदद्यीत भिषग्वर ।
शीतक्षेणाजदध्ना वा पथ्य देय हित मितम् ॥ २१ ॥
बालरम्भाफलं गुर्वी-फल विल्वफलं तथा ।
आम्रपेशी च मधुक वृन्ताकञ्च प्रशस्यते ॥ २२ ।
सर्वातिसारं ग्रहणीञ्च हिक्का मन्दाग्निमानाहमरोचकञ्च ।
निहन्ति सद्यो विहितामपाके हिविप्रयोगेण रसोत्तमोऽयम् ॥२३॥

अथ स्वेदनीयन्त्रलक्षणम् ।—

साम्बुस्थालीमुखाबद्धे वस्त्रे पाक्य निधाय च ।
पिधाय पच्यते यत्र स्वेदनीयन्त्रमुच्यते ॥ २४ ॥
इदमेव तिन्दुकयन्त्रम् ।

मान्येति ।—मान्यस्य मानव्यतिक्रान्ति पूज्यपूजाव्यतिक्रम । अस्यार्थ,—रसपर्पटी प्रस्तुतक्रमेण कज्जली विद्राव्य तत्र अभ्रकञ्च प्रक्षिप्य काष्ठदण्डेनालोडयेत, एकीभूतञ्च तत सर्वं कुटजपत्रके ढालयित्वा पर्पटिकाकार कुर्यात् । तत सञ्चूर्ण्य भावनादिक दद्यादिति ॥ १०—१८ ॥

रसोत्तमे—अर्द्धघटिकावधि दण्ड यावत् । तज्जलै यन्त्रस्थजले । पूर्वोदितेषु रोगेषु सुधासारोक्तरोगेषु । गुर्वीफल गुवाकफल, तच्च बालमेव ग्राह्यम् । अयमर्थ,—विम्बाब्दे समपरिमिते पिष्टा चक्रिका कुर्यात, तत ता स्वेदनीयन्त्र दण्डमेक पक्का स्थालीमुखादानीय च यन्त्रस्थैरेव जलै सम्पेषयेत्, वस्त्रगालिते च तस्मिन् जले पूर्वोक्त सुधासाररस धान्यप्रमाण मिश्रयित्वा प्रयुञ्जीत इति ॥ १९—२३ ॥

अल्पमेधस्त्वविद्यार्थिना सूत्रबोधनार्थमुक्तमपि स्वेदनीयन्त्रलक्षण पुनराह, साम्बुस्थालीति ।—व्याख्यातपूर्वम् । तिन्दुकयन्त्रमित्यस्य नामान्तरम् ॥ २४ ॥

अथ लोकेश्वर ।—

द्वौ भागौ गन्धकस्याष्टौ शङ्खचूर्णस्य योजयेत् ।
एकमेव रसस्याग्रमर्कक्षीरेण मर्दयेत् ॥ २५ ॥
चित्रकस्य द्रवेणैव शोषयित्वा पुनः पुनः ।
एकीकृत्य रसेनाथ क्षार दत्त्वा तदर्द्धकम् ॥ २६ ॥
अर्कक्षीरेण कुर्वीत गोलकानथ शोषयेत् ।
निरुध्य चूर्णलिप्तेऽथ भाण्डे दद्यात् पुट ततः ॥ २७ ॥
लोकेश्वररसो ह्येष ग्रहणीरोगकृन्तनः ।
गुञ्जाचतुष्टयञ्चास्य मरीचाज्यसमन्वितम् ॥
दद्यीत दधिभक्तञ्च पथ्यं लोकेश्वरे तथा ॥ २८ ॥

अथ लोकनाथ ।—

मृतपारदभागैक चत्वारः शुद्धगन्धकात् ।
यामञ्च मर्दयेत् खल्ले तेन पूर्य्या वराटकाः ॥ २९ ॥
टङ्कणन्तु गवा क्षीरैः पिष्ट्वा तेन मुखं लिपेत् ।
वराटाना प्रयत्नेन रुद्ध्वा भाण्डे पुटे पचेत् ॥ ३० ॥
स्वाङ्गशीतं समुद्धृत्य ततश्चूर्ण्या वराटकाः ।
लोकनाथरसो नाम्ना क्षौद्रैर्गुञ्जाचतुष्टयम् ॥ ३१ ॥
नागरातिविषामुस्ता-देवदारुवचान्वितम् ।
कषायमनुपानं स्याद्वातातीसारनाशनः ॥ ३२ ॥

अथ षण्णिष्कतैलम् ।—

षण्णिष्कं तिलतैलस्य निष्क जम्बीरजं रसम् ।

लोकेश्वरे—अर्कक्षीरेण मर्दयेत इत्यत्र सप्तवारमिति शेष । चित्रकस्य द्रवेणापि एव सप्तवार मर्दयेत् । तत पुन पुन शोषयित्वा रसेन द्रवेण एकीकृत्य च सप्तवारान् भावना दत्त्वा शोषयेत् । तदर्द्धक मिलितौषधार्द्धभागम् ॥ २५—२८ ॥

लोकनाथे—सर्वं सुगमम् ॥ २९—३२ ॥

लवणं पञ्चगुञ्जञ्च अङ्गुल्या मर्दयेत् दृढम्॥
आमवातातिसारघ्नं लिहेत् पथ्यञ्च पूर्ववत्॥ ३३॥

अथ नागसुन्दर।—

नागभस्मरसव्योम-गन्धैरर्द्धपलोन्मितैः।
कुर्वीत कज्जलीं श्लक्ष्णां प्रक्षिपेत्तदनन्तरम्॥ ३४॥
द्विपलोन्मितरालाया द्रुताया परिमिश्रिताम्।
भृष्टैर्यक्षाक्षसिन्धूत्थ-वचाव्योषहिजीरकैः॥ ३५॥
सपथ्याविजयादीप्यैस्तुल्यांशैरवचूर्णितैः।
मेलयेत् प्राक्तनं कल्कं भावयेत्तदनन्तरम्॥ ३६॥
महानिम्बत्वचासारैः काम्बोजीमूलजद्रवैः।
रसैर्नागबलायाश्च गुडूच्याश्च त्रिधा त्रिधा॥
ततश्च गुटिका कार्य्या बदरास्थिप्रमाणतः॥ ३७॥
हन्यादेव हि नागसुन्दररसो वल्लोन्मित सेवितो
नानातीसरणामयं गुदपरिभ्रंशं तथा विम्बिशिम्॥ ३८॥

षस्पिकतैले—षस्पिक तोलकत्रयम्॥ ३३॥

नागसुन्दरे—द्विपलोन्मितरालाया द्रुताया द्रवीभूतपलद्वयमितसर्ज्जरसे। यक्ष न्यग्रोध। अक्ष, विभीतक। विजया भङ्गा। दीप्य यमानिका। प्राक्तन कल्क नागादिभि कृतां कज्जलीम्। महानिम्ब पर्वतनिम्ब तस्य त्वचासारै, वल्कलरसै। काम्बोजीमूलजद्रवै माषपर्णीमूलरसै, सङ्ग्राहित्वात् काम्बोजीशब्देनात्र माषपर्णी एव ग्राह्या। विम्बिशि प्रवाहिकाम्। एवं कार्य्यं—नागादिभि कज्जली कृत्वा द्रवीभूतसर्ज्जरसे तां प्रक्षिप्य मिश्रयेत्। अनन्तर मृत्कटाहे यक्षादिकमीषद्भर्जयित्वा चूर्णीकृत्य च द्विपलमित तच्चूर्णं सर्जरसमिश्रितेन नागादिना मेलयेत् महानिम्बरसादिभि प्रत्येक वारत्रय भावयेच्च। "गुदपरिभ्रंश तथा विम्बिशिम" इत्यनन्तर क्वचित्—"दुर्नामग्रहणीविकारगुदजान् ये चापि मूलोद्भवा। सर्वे ते विलय प्रयान्ति मनुजे श्रीशम्भुनोक्त पुरा॥" इत्यधिकः पाठ.॥ ३४—३८॥

अथ ग्रहणीचिकित्सा ।—

अथ ग्रहणीलक्षणम् ।—

मलं सङ्गृह्य सङ्गृह्य कदाचिद्यदि रेचयेत् ।
अरुचिः श्वयथुर्मान्द्यं ग्रहणीरोगलक्षणम् ॥ ३९ ॥

अथ ग्रहणीवज्रकपाट ।—

मृतसूताभ्रकं गन्धं यवक्षार सटङ्कणम् ।
वचा जया सम सर्वं जयन्तीभृङ्गजद्रवैः ॥ ४० ॥
सजम्बीरैस्त्र्यहं मर्द्यं शोषयेत्तच्च गोलकम् ।
मन्दवह्नौ शनैः स्वेद्य यामार्द्धं लोहपात्रके ॥ ४१ ॥
रससाम्ये प्रतिविषा देया मोचरसस्तथा ।
भावयेद्विजयाद्रावैः शोष्य पेष्यञ्च सप्तधा ॥
रसो वज्रकपाटोऽयं निष्कार्द्धं मधुना लिहेत् ॥ ४२ ॥
वह्निशुण्ठी विड बिल्वं लवणं पेषयेत् समम् ।
पिबेदुष्णाम्भसा चानु वातोत्था ग्रहणीं जयेत् ॥ ४३ ॥

अथ अग्निकुमार ।—

दग्धा कपर्दिका पिष्टा त्र्यूषण टङ्कणं विषम् ।
गन्धक शुद्धसूतञ्च तुल्यं जम्बीरजैर्द्रवैः ॥ ४४ ॥
मर्दयेद्भक्षयेन्माषं मरिचाज्यं लिहेदनु ।
निहन्ति ग्रहणीरोग पथ्य तक्रौदन हितम् ॥ ४५ ॥

द्रवनिःसरणसाधर्म्यात् अन्योऽन्यसम्भवत्वाच्च अतीसारानन्तरं ग्रहणीचिकित्सितं विवक्षुरादौ तल्लक्षणमाह, मलमिति।—मलमित्यादौ दोष इति कर्तृपदमध्याहरणीयम्। सङ्गृह्य सरुध्य। मान्द्य मन्दाग्निता ॥ ३९ ॥

ग्रहणीवज्रकपाटे—जया त्रैलोक्यविजया। भृङ्गजद्रवे भृङ्गराजरसे। जयन्त्यादीनां प्रत्येकं द्रवेण एकैकं दिनं मर्दयेत्। लोहपात्रके शरावाच्छादितमुखे लौहभाजने, उक्तञ्च रसेन्द्रचिन्तामणौ—"लौहपात्रे शरावञ्च दत्त्वोपरि विमर्दयेत्" इति। प्रतिविषा अतिविषा ॥ ४०—४३ ॥

अग्निकुमारे—सर्वं स्पष्टम् ॥ ४४ ४५ ॥

अथ शम्बूकादिचूर्णम् ।—

दग्धशम्बूकसिन्धूत्थं तुल्यं क्षौद्रेण लेहयेत् ।
निष्कैकैकं निहन्त्याशु ग्रहणीरोगमुत्कटम् ॥ ४६ ॥

अथ कनकसुन्दरः ।—

हिङ्गुलं मरिचं गन्धं पिप्पली टङ्कणं विषम् ।
कनकस्य च वीजानि समांशं विजयाद्रवैः ॥ ४७ ॥
मर्दयेद्यामपात्रन्तु चणमात्रं वटीकृतम् ।
भक्षयेद्ग्रहणीं हन्ति रसः कनकसुन्दरः ॥ ४८ ॥
अग्निमान्द्यं ज्वरं तीव्रमतिसारञ्च नाशयेत् ।
दध्यन्नं दापयेत् पथ्यं गव्याजं तक्रमेव वा ॥ ४९ ॥

अथ ग्रहणीकपाटः ।—

रसाभ्रगन्धाः क्रमवृद्धभागा जयारसेन त्रिदिनं विमर्द्याः ।
गद्याणकार्द्धं मधुना समेतं ददीत पथ्यं दधिभक्तकञ्च ॥ ५० ॥
सौवर्चलं जीरकयुग्मधान्य-जयायवानीकणनागरञ्च ।
कपित्थसारेण समं प्रगृह्य ददीत चूर्णं निशि तीव्रपित्ते ॥ ५१ ॥
गद्याणमात्रं मधुखण्डयुक्तं तक्रेण युक्तं त्वरुचिप्रशान्त्यै ।
वातप्रधाने च कफप्रधाने रात्रौ कषायं कुटजस्य दद्यात् ॥ ५२ ॥
कृशान्वजाजीद्वयमाक्षिकेण कटुत्रयेणापि युतं त्वनुष्णम् ।
चाङ्गेरिकाजीरकयुग्मधान्यं दुग्धेन्दुशाकाय ददीत दध्ना ॥ ५३ ॥

शम्बूकादिचूर्णे—दग्धशम्बूकं शम्बूकमुखभस्म ॥ ४६ ॥

कनकसुन्दरे—कनकस्य वीजानि धुस्तूरवीजानि ॥ ४७—४९ ॥

ग्रहणीकपाटे—गद्याणकार्द्धं माषद्वयम् । कपित्थसारेण कपित्थमज्जना । तीव्रपित्ते पित्ताधिके ग्रहणीरोगे सौवर्चलादिचूर्णं कपित्थफलमध्यतुल्यं गृहीत्वा रात्रौ रसस्यास्य अनुपानं दद्यात् । गद्याणमात्रम् इत्यत्र भेषजमिति अहनीयम् । वातप्रधाने इति छेदः, तेन च वातप्रधाने अरुचिप्रशान्त्यै गद्याणमात्रं भेषजं मध्वादिभिः संयोज्य देयम् । कृशानु चित्रकः । कफाधिके कृशान्वादियुतम् ईषदुष्णं कुटजकषायमनुपाययेत् । चाङ्गेरी अम्ललोनिका ॥ ५०—५३ ॥

अथ चण्डसङ्ग्रहगदैककपाट ।—

हिङ्गुलोत्थितमहेश्वरबीज पातनन्त्रविधिना हरणीयम् ।
गन्धटङ्कणमृताभ्रकतुल्य कोकिलाक्षमथ चाऽऽयसखल्ले ॥ ५४ ॥
मर्दनीयमभिधारणयुक्ते धूमहीनदहनोपरिसंस्थे ।
यावदेष जलशोषणदक्षो जीरकार्द्रकयुतेन स वल्लं ॥ ५५ ॥
सङ्ग्रहज्वरमतिस्रुतिगुल्मानर्शसाञ्च विनिहन्ति समूहम् ।
वासुदेवकथितो रसराजश्चण्डसङ्ग्रहगदैककपाटः ॥ ५६ ॥

अथ लघुसिद्धाभ्रक ।—

समांशं रसगन्धाभ्र-दरदञ्च विशोधितम् ।
लोहखल्ले विनिक्षिप्य गवाज्येन समन्वितम् ॥ ५७ ॥
मर्दकेनापि लौहेन मर्दयेद्दिवसद्वयम् ।
द्रोणीचुल्ल्यां न्यसेत् खल्लं साङ्गारायां प्रयत्नतः ॥ ५८ ॥
इति सिद्धो रसेन्द्रोऽयं लघुसिद्धाभ्रको मतः ।
वल्लतुल्यो रसो जीर-वारिणा सहितं प्रगे ॥ ५९ ॥
पीतो हरति वेगेन ग्रहणीमतिदुर्द्धराम् ।
अतिसारं महाघोरं सातिसारं ज्वरं तथा ॥ ६० ॥
पाचनो दीपनो हृद्यो गात्रे लाघवकारकः ।
नागार्जुनेन कथितः सद्यः प्रत्ययकारकः ॥ ६१ ॥

चण्डसङ्ग्रहगदैककपाटे—हिङ्गुलोत्थितमहेश्वरबीज हिङ्गुलाकृष्टरसम् । पातनन्त्र विधिना ऊर्द्धपातनयन्त्रेण । आयसखल्ले लौहखल्ले । अभिधारणयुक्ते अभि समन्तात् धार्य्यते अनेन इति अभिधारण दण्डविशेष तद्युक्ते मर्दनीयुक्ते इत्यर्थ । यावदेष इति ।—अङ्गारोपरिस्थापनात् यावत् जलादिकं सर्वमेव शुष्यति तावत् अवतार्य्य जीरकादिभिः सह दातव्य । सङ्ग्रह सङ्ग्रहग्रहणी । अतिस्रुति-रतीसार । चण्डेति ।—चण्ड प्रबलः य सङ्ग्रहगद, सङ्ग्रहग्रहणीरोग तस्य एक मुख्य कपाट कपाटतुल्य ॥ ५४—५६ ॥

लघुसिद्धाभ्रके—दरद हिङ्गुल । मर्दकेन मर्दनसाधनेन दण्डेन इत्यर्थः । "द्विवसद्वयम्" इत्यत्र "दिवसत्रयम्" इति पाठान्तरम् । द्रोणीचुल्ल्यां द्रोणी आस्य-

अथ सर्वारोग्यवटी।—

रस पलमितं तुल्यं शुद्धनागेन सयुतम्।
द्रावयित्वाऽऽयसे पात्रे सतैले निक्षिपेत् क्षितौ॥ ६२॥
ततो द्रुते विनिक्षिप्य गन्धके तत् विलोड्य च।
पुनरायसपात्रे तत् क्षिप्त्वा प्रद्राव्य निक्षिपेत्॥ ६३॥
तत्तुल्य जारयेत्तालं पुनः सञ्चूर्ण्य पूर्ववत्।
तत्तुल्या जारयेत् सम्यक्कुनटीं परिशोधिताम्॥ ६४॥
तत्तुल्यं चूर्णिते तस्मिन् क्षिपेन्नागं निरुत्थकम्।
तावदेव मृतं ताप्यं सर्वमन्यच्च तत्समम्॥ ६५॥
तीक्ष्णाय' खर्परं व्योम हिङ्गुलञ्च शिलाजतु।
पृथक्कर्षांशमानेन षट्कोलं कट्फलं मिषीम्॥ ६६॥
दीप्यकञ्च चतुर्जात रेणुकोशीरवेल्लकम्।
तुम्बुरुं भार्ङ्गिकां रास्ना कङ्कोलं चोरपुष्करम्॥ ६७॥
रिङ्गणीं चिरतिक्तञ्च वीजान्युन्मत्तकस्य च।
पलद्वयञ्च लाङ्गल्या. सर्वेषा द्वादशांशकम्॥ ६८॥
वत्सनाभं सितं भूरि विनिक्षिप्य ततः परम्।
त्रिफलानां दशाङ्घ्रीणा कषायेण तत' परम्॥ ६९॥
जयन्त्यार्द्रकवासाना मार्कवस्य रसैस्तथा।
भावयित्वा च कर्त्तव्या वटकाश्चणकोन्मिताः॥ ७०॥

त्रेते जलसिञ्चनार्थं काष्ठनिर्मिताधारविशेष, तदाकाराया चुल्ल्याम्। साङ्गाराया निर्धूमाङ्गारपूर्णायाम्। जीरवारिणा जीरकक्वाथेन। प्रगे प्रभाते॥ ५७—६१॥

सर्वारोग्यवट्या—द्रुते गलिते। तत्तुल्य रसतुल्य, पलमितमिति यावत। ताल हरितालम्। कुनटी मनःशिलाम्। ताप्य स्वर्णमाक्षिकम्। षट्कोलं षडूषणम्। मिषी मधुरिका। वेल्लक विडङ्गम्। तुम्बुरु स्वनामख्यातम्। भार्ङ्गिका भार्गी। चोरपुष्कर चोर चोरक. ग्रन्थिपर्णं इत्यर्थ, पुष्कर कुष्ठम्, चोरपुष्कर चोरपुष्पीति केचित्, तथात्वे तु चोरपुष्पिका इति पाठ. साधु.। रिङ्गणी

एकैका वटिका सेव्या कुर्य्यात्तीव्रतरां क्षुधाम् ।
रुचिञ्च सर्वतो वह्निं सैर्व्यं स्वादु च शीतलम् ॥ ७१ ॥
आमाञ्च ग्रहणीं सदाऽङ्गतुदनं शोषोत्कटं पाण्डुता-
मार्त्तिं वातकफत्रिदोषजनितां शूलञ्च गुल्मामयम् ।
हिक्काऽऽध्मानविसूचिकाञ्च कसनं श्वासार्शसां विद्रधिं
सर्वारोग्यवटी क्षणाद्विजयते रोगांस्तथाऽन्यानपि ॥ ७२ ॥

अथ ग्रहणीगजकेशरी ।—

रसगन्धकयोः कृत्वा कज्जलीं तुल्यभागयोः ।
द्रावयित्वाऽऽयसे पात्रे रसतुल्यं विनिक्षिपेत् ॥ ७३ ॥
ज्वराचरभवं भस्म तत्र माक्षिकसम्भवम् ।
गन्धपाषाणसहितं पात्रे लौहमये क्षिपेत् ॥ ७४ ॥
तत् काष्ठेन विलोड्याथ निक्षिपेत् कदलीदले ।
तत आच्छाद्य सञ्चूर्ण्य निधायाऽऽयसभाजने ॥ ७५ ॥
अक्षमात्रं क्षिपेद्भस्म तत्र माक्षिकसम्भवम् ।
सम्यङ्निश्चन्द्रतां नीतं व्योमभस्म पलोन्मितम् ॥ ७६ ॥

मुद्गपर्णी मुस्ता वा । चिरतिक्तं किराततिक्तकम् । उन्मत्तकस्य धुस्तूरस्य । सितं रजतम् । भूरि सुवर्णम् । एतद्द्वयमपि शोधितं वत्सनाभसमञ्च ग्राह्यम् । दशाङ्गीणां दशमूलानाम् । अयमर्थः,—शुद्धरसं शुद्धगन्धकञ्च प्रत्येकं पलमानं गृहीत्वा तैल-लिप्तोदरे लौहपात्रे द्रावयित्वा अनन्तरं भूमौ निक्षिपेत । ततः शीतीभूतं तं भूमेरुत्तोल्य रससमे द्रुते गन्धके क्षिप्त्वा आलोड्य च सगन्धकं तं पूर्ववत् तैललिप्ते लौहपात्रे द्रवीकृत्य पुनर्भूमौ निक्षिपेत् । एवम् आलादिकं शिलाजत्वन्तं सर्वमेव पूर्ववत् पृथक् पृथक् द्रावयित्वा भूमौ निक्षिपेत् । अनन्तरमेकीभूते तस्मिन् षट-कोलादीनां पञ्चविंशतिद्रव्याणां प्रत्येकं कर्षं लाङ्गल्याश्च पलद्वयं चूर्णं मिश्रयेत । अनन्तरं सवर्षा द्वादशांशकं वत्सनाभं सुवर्णं रौप्यञ्च पृथक् पृथक् दत्त्वा त्रिफलादिभिः षड्भिः प्रत्येकं सप्तधा भावयेदिति ॥ ६२—७२ ॥

ग्रहणीगजकेशरिणि—रसगन्धकयोः. मानेऽनुक्तेऽपि पूर्वयोगात् पलमानत्व

विषं विषाञ्च गन्धारीं मोचसारं सजीरकम् ।
सर्वं समांशकं कृत्वा रसे चार्द्धांशतः क्षिपेत् ॥ ७७ ॥
सर्वमेतन्मर्दयित्वा भावयेदतियत्नतः ।
जयन्त्या च महाराष्ट्र्या गजाङ्किन्याऽश्वगन्धया ॥ ७८ ॥
पञ्चकोलकषायैश्च कुर्य्याच्चूर्णं ततः परम् ।
इति सिद्धो रसः सोऽयं ग्रहणीगजकेशरी ॥ ७९ ॥
नामतो नन्दिना प्रोक्तः कर्मतश्च सुधानिधिः ।
वल्लेन प्रमितश्चायं रसः शुण्ठ्या घृताक्तया ॥ ८० ॥
सेवितो ग्रहणीं हन्ति सत्सङ्ग इव विग्रहम् ।
पथ्यमत्र प्रदातव्यं खल्वाज्यं दधितक्रयुक् ॥८१॥
हितं मितञ्च विशदं लघु ग्राहि रुचिप्रदम् ।
पाचनो दीपनोऽत्यर्थमामघ्नो रुचिकारकः ॥८२॥
तत्तदौषधयोगेन सर्वातीसारनाशनः ।
बध्नन्नपि मलं शीघ्रं नाऽऽध्मानं कुरुते नृणाम् ॥ ८३ ॥

प्रत्येकशो बोद्धव्यम् । चराचरभव भस्म कपर्दकभस्म । आच्छाद्य इति ओमयगर्भेण कदलीदलान्तरेण रसपर्पटीवत् निपीड्येत्यर्थः । विषा अतिविषा । गन्धारी दुरालभा । मोचसारः शाल्मलीवेष्टकम् । भावयेदित्यस्य जयन्त्या इत्यारभ्य पञ्चकोलकषायैः इत्यन्तेन सम्बन्धः । सर्वमिति ।—विषादिकं द्रव्यपञ्चकं प्रत्येकं समांशं गृहीत्वा व्योमभस्मान्तात् मिलितरसात् अर्द्धांशमानेन रसे क्षिपेत् इत्यर्थः, ततश्च रसादीनां प्रत्येकं पलमानेन कर्षाधिकपलषट्कमानं विषादीनाञ्च प्रत्येकं सार्द्धकर्षद्वयमानेन ग्रहणात् रसमानात् अर्द्धांशं तोलाधिकपलत्रयमानं भवति । महाराष्ट्री जलपिप्पली । गजाङ्किनी गजाङ्कं गजचिह्नं शुण्डारूपमस्यामस्तीति सा श्रीहस्तिनी, "हातिशुँडा" इति वङ्गभाषा । "गजाङ्किनी" इत्यत्र "गञ्जा कन्या" इति पाठे—गञ्जा विजया, कन्या कुमारिका, "घृतकुमारी" इति वङ्गभाषा, पक्षेऽस्मिन्—गञ्जया कन्यया अश्वगन्धया च भावयेत् । तत्तदौषधयोगेन तत्तद्दोषनाशकानुपानयोगेन ॥ ७३—८२ ॥

अथ शीघ्रप्रभावः।—

पारदं गन्धकं व्योम तीक्ष्णं तालं मनःशिला।
सौवीरमञ्जनं शुद्धं विमलञ्च समांशकम् ॥ ८४ ॥
एभिः कज्जलिकां कृत्वा स्वल्पतैलेन भर्जयेत्।
ग्रन्थिकं जीरकं चित्रं दीप्यकं मुस्तकं विषम् ॥ ८५ ॥
बालाम्रं बालबिल्वञ्च मोचसारं समांशकम्।
विचूर्ण्य पूर्ववत् कल्कं तदर्द्धेन विनिक्षिपेत् ॥ ८६ ॥
पुनर्विमर्दयेद्‌यद्वदेकरूपं भवेद्‌यथा।
भावयेत् सप्त वाराणि पञ्चकोलकषायतः ॥८७॥
अरलुत्वग्रसेनापि दश वाराणि भावयेत्।
अनेन क्रमयोगेन रसो निष्पद्यते ह्ययम् ॥ ८८ ॥

जग्धो विश्वघनाम्बुना स हि रसः शीघ्रप्रभावाभिधो
निष्कार्द्धप्रमितो महाग्रहणिकारोगेऽतिसारामये।
आध्माने ग्रहणीभवे रुचिहृते वाते च मन्दानले
मुक्ते चापि मले पुनस्तलमलाशङ्कासु हिक्कासु च ॥ ८९ ॥

शीघ्रप्रभावे—तीक्ष्णं तीक्ष्णलौहम्। सौवीरमञ्जनं स्रोतोऽञ्जनम्। विमलं रौप्यमाक्षिकम्। ग्रन्थिकं पिप्पलीमूलम्। दीप्यकं यवानी। बालाम्रं तरुणाम्रं, तस्य फलास्थिमज्जा ग्राह्या। मोचसारं मोचरसः। पूर्ववत् ग्रहणीगज-केशरीवत्। तदर्द्धेन पारदादीनां मिलितानामर्द्धेन, ततश्च ग्रन्थिकादीनां प्रत्येकं व्यवहारिकमानेन यवद्वयाधिकरक्तिचतुष्टयसमन्वितं माषकत्रयं (।≠० आना, ४ रति, २ यव) भवतीति बोध्यम्। अरलुत्वक् श्योनाकवल्कलम्। विश्व-घनाम्बुना शुण्ठीमुस्तयोः क्वाथेन। रुचिहृते अरुचौ। पारदादिकं सर्वमेकत्र मर्दयित्वा किञ्चित्तैलेन मनाक् भर्जयेत्, ततः ग्रन्थिकादीनां प्रत्येकं समांशानां चूर्णं मिलित्वा पारदादीनां सर्वेषामर्द्धभागं तत्र दत्त्वा गाढं विमर्दयेत्, अनन्तरं पञ्चकोलक्वाथेन सप्त श्योनाकत्वग्रसेन च दश भावना दद्यादिति निष्कर्षः ॥८४—८९॥

अथ पोटली।—

कपर्दतुल्यं रसगन्धकल्कं लोहं मृतं टङ्कणकञ्च तुल्यम्।
जयारसैनैकदिनं विमर्द्य चूर्णेन सम्पिष्य पुटेत् भाण्डे ॥९०॥
ददीत तां पोटलिकाञ्च दोष-त्रयप्रधानग्रहणीनिवृत्त्यै ॥९१॥

अथ वह्निज्वाला वटी।—

नष्टपिष्टौ चतुर्माषौ प्रत्येकं रसगन्धकौ।
अभ्रकं माषमानञ्च मातुलुङ्गाम्लमर्दितम् ॥ ९२ ॥
शोधितं सप्तधा चैव द्विमाषं भूषणं पृथक्।
त्रिशूली भृङ्गचाङ्गेरी सातला तीक्ष्णपर्णिका ॥ ९३ ॥
श्वेतापराजिता कन्या मत्स्याक्षी ग्रीष्मसुन्दरा।
करिणी कर्णमोटी च रुदन्ती चित्रकार्द्रकात् ॥ ९४ ॥
धुस्तूरकाकमाचीभ्यां मुषल्याश्च पृथग्रसै.।
मर्दितं द्विपलैः कुर्य्याद्वटिका माषसम्मिता ॥ ९५ ॥
ग्रहण्यां पर्णखण्डेन व्योषयुक्ता निषेविता।
अरुचिं राजयक्ष्माणं मन्दाग्निं सूतिकागदान् ॥
शमयेद्वटिका नाम्ना वह्निज्वालेति गीयते ॥ ९६ ॥

पोटल्याम्—रसगन्धकल्कं कज्जली। जयाशब्देनात्र विजया इष्यते ग्रहणी-हन्तृत्वात्, न तु जयन्ती। चूर्णेन चूर्णोदकेन। "चूर्णेन सम्पिष्य" इत्यत्र "चर्मेण सवेष्ट्य" इति रसेन्द्रसारसङ्ग्रहधृतपाठः, तत्र—अर्द्धाधो शङ्खशुक्त्यादिकृत चूर्णं दत्त्वा मध्ये औषधं संस्थाप्य पुटेत्। तत्र चास्य "ग्रहणीकपर्दपोट्टली" इति संज्ञा ॥९०।९१॥

वह्निज्वालायाम्—नष्टपिष्टौ इति पूर्वोक्तप्रकारेण नवनीतादिभिः सह मर्दित-पिष्टीकृतौ। अभ्रकमिति।—सप्तधा मातुलुङ्गाम्लमर्दितं शोधितं माषमानमभ्रकमिति योजनीयम्। त्रिशूलीशब्देनात्र शिवलिङ्गी इष्टा, तस्य पत्ररसेन, यद्वा—त्रिशूली शिव धुस्तूर इति यावत्। सातला चर्मकषा, "घेँटकोल" इति प्रसिद्धम्। तीक्ष्णपर्णिका रक्तेक्षु। कन्या कुमारी। मत्स्याक्षी शालिञ्च। ग्रीष्मसुन्दरा "गिमा" इति प्रसिद्धम्। करिणी श्रीहस्तिनी, "हातिशुँडा" इति भाषा। कर्णमोटी वर्व्वुरः, अस्य त्वक् ग्राह्यम्। रुदन्ती स्वनामख्यातक्षुप-

अथ वज्रधरः।—

रसगन्धकताम्राभ्रं क्षारास्त्रीन् वरुणो वृषम्।
अपामार्गस्य च क्षारं लवणं हिङ्गुमाषकम्॥ ९७॥
चाङ्गेर्या हस्तिशुण्ड्याश्च रसैः पिष्टं पचेत् पुटे।
भक्षयित्वा ततो गुञ्जां ग्रहण्यां काञ्जिकं पिबेत्॥ ९८॥
पक्तिशूले च कासे च मन्दाग्नावार्द्रकद्रवम्।
अम्लपित्ते च धारोष्णं क्षीरं वज्रधरो ह्ययम्॥ ९९॥

अथ ग्रहणीकपाटः।—

रसेन्द्रगन्धातिविषाऽभयाभ्रं
क्षारद्वयं मोचरसो वचा च।
जया च जम्बीररसेन पिष्टं
पिण्डीकृतं स्याद्ग्रहणीकपाटः॥१००॥
तस्यार्द्धमाषं मधुना प्रभाते
शम्बूकभस्माज्यमधूनि लिह्यात्।
सचौरिणीजीरकमाणिमन्थ-
तीक्ष्णानि चादौ दधिभोजनञ्च॥१०१॥

अथ मुस्तादिचूर्णम्।—

मुस्तावत्सकपाठाग्नि-व्योषप्रतिविषाविषम्।
धातकीमोचनिर्य्यासचूताास्थि ग्रहणीहरम्॥ १०२॥

विशेषं तल्लक्षणं यथा राजनिघण्टौ—"क्षुपवत्सम पत्रं क्षुपस्यैव तथाविधः। शिशिरे जलबिन्दूनास्रवन्तीति रुदन्तिका॥" इति। मुषली तालमूली॥ ९२—९६॥

वज्रधरे—क्षारास्त्रीन् "स्वर्जिका टङ्कणश्चैव यवक्षार उदाहृतः" इत्युक्तक्षारत्रयम्। वरुणः स्वनामख्यातः। वृषः वासकम्। लवणं सैन्धवम्॥ ९७—९९॥

ग्रहणीकपाटे—क्षारद्वयमिति सर्जिकाक्षारयवक्षाररूपम्। जया विजया। सचौरिणी चोरिका। माणिमन्थं सैन्धवम्। तीक्ष्णानि तीक्ष्णवीर्य्यद्रव्याणि सर्षपान् वा। आदाविति।—आदौ औषधसेवनात् प्राक् दधिभोजनं कर्त्तव्यम्॥१००।१०१॥

मुस्तादिचूर्णे—चूतास्थि आम्रास्थिमज्जा। सर्वं चूर्णीकृत्य उपयोज्यम्॥ १०२॥

अथाजीर्णचिकित्सा।—

अथ अजीर्णलक्षणम्।—

विरेको जठरे शूलो वमनञ्च मुहुर्मुहुः।
हस्तपादादिसङ्कोचः सर्वाजीर्णस्य लक्षणम्॥ १०३॥

अथाजीर्णकण्टकः।—

शुद्धसूतं विषं गन्धं सर्वं समविचूर्णितम्।
मरिचं सर्वतुल्यांश्च कण्टकार्य्याः फलद्रवैः॥१०४॥
मर्दयेद्भावयेत् सर्वमेकविंशतिवारकम्।
वटीं गुञ्जात्रयं खादेत् सर्वाजीर्णप्रशान्तये॥ १०५॥
अजीर्णकण्टकः सोऽयं रसो हन्ति विसूचिकाम्।
वारिणा तिलपर्ण्युत्थ-मूलं पिष्ट्वा पिबेदनु॥ १०६॥

अथ विध्वंसनामा रसः।—

विमर्द्य गन्धोपलटङ्कणेन
सम्भाव्य वारानथ सप्त जात्याः।
तोये फलानामथ चैव सिद्धो
विध्वंसनामा शमनो विसूच्याः॥१०७॥
अमुष्य गुञ्जा नव दापनीया
हन्तुं विसूचीं सितया समेताः।
तक्रौदनं स्यादिह भोजनाय
पथ्यञ्च शाकं किल वास्तुकस्य॥१०८॥

ग्रहणीविकृत्या अजीर्णं सम्भवतीति ग्रहण्यनन्तरमजीर्णचिकित्सितं विवक्षुरादौ तस्य लक्षणमाह, विरेक इति।—स्पष्टम्॥ १०३॥

अजीर्णकण्टके—तिलपर्ण्युत्थमूलं तिलपर्णी रक्तचन्दनं, तिलौनीति प्रसिद्धः शाकभेदो वा, तस्या मूलम्॥ १०४—१०६॥

विध्वंसनाम्नि रसे—गन्धोपलं गन्धकः। जात्याः फलानां नारिकेलफलानां तोये क्वाथे, सप्तवारान् सम्भाव्य इत्यन्वययुक्तिः॥ १०७।१०८॥

अथ कृहद्विध्वंसनामा रसः ।—

रसगन्धटङ्कभसितं समांशकं
परिमर्द्य जातिफलसप्तभावितम् ।
सितयोपयुज्य नवरक्तिकोन्मितं
मथितान्नभुग्विजयते विसूचिकाम् ॥१०९॥

अथाग्निकुमारः ।—

हंसपादीरसैः सिद्धं रसगन्धकयोः पलम् ।
कोलञ्च विषचूर्णस्य बालुकायन्त्रपाचितम् ॥११०॥
शाणं विषस्यार्द्धपलं मरिचस्य विमिश्रयेत् ।
दीपनोऽग्निकुमारोऽयं ग्रहण्याञ्च विशेषतः ॥१११॥
स वातश्लेष्मजान् रोगान् चणार्द्धेवापकर्षति ।
सन्निपातज्वरश्वास-क्षयकासांश्च नाशयेत् ॥ ११२ ॥

अथ वडवाग्निरसः ।—

टङ्कणं मरिचं तुल्यं पृथक्कर्षत्रयं भवेत् ।
सुन्दरं द्वादशं निष्कं त्रिंशन्निष्कमयोमलम् ॥११३॥
कान्तं पद्मरसे घृष्टं पुटपक्वं वरारसे ।
मार्कवस्वरसे घृष्टं समकान्तस्त्वयोमलम् ॥ ११४ ॥

कृहद्विध्वंसनाम्नि रसे—टङ्कभसितं शोधितटङ्कणम् । मथितान्नभुक् मथितेन उद्धृतस्नेहेन निर्जलेन च तक्रेण, "मथितन्त्वसरोदकम्" इति वचनात्, सह अन्नभुक् तक्रौदनाशी ॥ १०९ ॥

अग्निकुमारे—हंसपादी गोधापदी, "गोहालिया" इति ख्यातम् । रसगन्धकयोरिति मिलितयोः पलमानं बोध्यम् । अयमर्थः,—यथाविधिशुद्धयो रसगन्धकयोः पलं गृहीत्वा हंसपादीरसैः मर्दयेत्, तदनु कोलमानं विषचूर्णं तेन सह मिश्रयित्वा कटोरिकायां सस्थाप्य च बालुकायन्त्रे यामचतुष्टयं पचेत् । स्वाङ्गशीतञ्च तत् समुद्धृत्य शाणमानेन विषेण मरिचस्य चार्द्धपलेन योजयेदिति ॥ ११०—११२ ॥

वडवाग्निरसे—सुन्दरं कान्तं कान्तलौहमित्यर्थः । द्वादशं निष्कं कर्षत्रयम् ।

चूर्णान्येतानि संयोज्य स्थापयेच्छुद्धभाजने ।
शुद्धदेहो नरस्तस्य पानं यद्भोजनोत्तरम् ॥ ११५ ॥
अद्यात् पथ्यं ततः स्वल्पं ततस्ताम्बूलभाग्भवेत् ।
उदराग्निर्नरस्यास्य वडवाग्निसमो भवेत् ॥
बहुनाऽत्र किमुक्तेन रसायनमयं नृणाम् ॥ ११६ ॥

अथ वराटीलक्षणम् ।—

पीतवर्णा गुरुस्निग्धा पृष्ठतो ग्रन्थिलाऽमला ।
चराचरेति सा प्रोक्ता वराटी नन्दिना खलु ॥ ११७ ॥

अथ श्रेष्ठमध्यमाधमवराटिकाया लक्षणम् ।—

सार्द्धनिष्कमिता श्रेष्ठा मध्यमा निष्कमानिका ।
पादोननिष्कमाना च कनिष्ठाऽत्र वराटिका ॥ ११८ ॥

अथ वराटलक्षणम् ।—

निष्फलाश्च ततो न्यूनाः पुंवराटाश्च पित्तलाः ।
दत्त्वा दत्त्वा गुणान् भूयो विकारान् कुर्वते हि ते ॥ ११९ ॥

त्रिंशन्निष्का पञ्चदशतोलकम् । अयोमल मण्डूरम् । कान्त कान्तलौहम् । पद्मरसे पद्मपुष्पस्वरसे । मार्कवरसे भृङ्गराजरसे । मारितपुटितकान्तलौहचूर्णं पद्मपुष्पस्वरसेन त्रिफलाक्काथेन च प्रत्येकं सप्तवार मर्दयित्वा पुटपाकेन साधयेत । मण्डूरमपि शोधितं भृङ्गस्वरसेन सम्मर्द्य पुटपाक कुर्य्यात् । अनन्तर टङ्कणादिक सर्वं यथोक्तमान गृहीत्वा एकीकृत्य स्थापयेत् । भोत्तरभक्तिकमस्य प्रयोग कर्त्तव्य । प्रयोगकाले हितमितभोजिना च भाव्यम् , अनन्तर ताम्बूलसेवी च स्यात् ॥ ११३—११६ ॥

वक्ष्यमाणवैश्वानरपोटल्या वराटिकाया ग्रहणोपदेशात वराटीवराटभेदेन द्विविधयोस्तयो वराटीलक्षणमाह, पीतवर्णेति ।—सुगमम् ॥ ११७ ॥

उत्तमादिभेदेन त्रिविधाया वराटिकाया लक्षणमाह, सार्द्धेति ।—सार्द्धनिष्कमिता षण्माषका । पादोननिष्कमाना माषत्रयमिता ॥ ११८ ॥

वराटलक्षणमाह, निष्फला इति ।—ततो न्यूना वराटीमानात् स्वल्पमाना, पुंवराटा, वराट इति सञ्ज्ञाविशिष्टा, न तु वराटिका, ते निष्फला, न्यूनत्वात्

अथ वैश्वानरपोटली ।—

शुद्धौ सूतबली चराचररजः कर्षांशतः कज्जलीं
कृत्वा गोपयसा विमर्द्य दिवसं रुद्ध्वा च मूषोदरे ।
सिद्धा कुक्कुटपुटे स्वतश्च शिशिरा पिष्टा करण्डे स्थिता
स्याद्वैश्वानरपोटलीति कथिता तीव्राग्निदीप्तिप्रदा ॥१२०॥

एकोनविंशतिश्चूर्णैर्मरिचानां घृतान्वितैः ।
देयेयं वल्लमानेन वयोबलमवेक्ष्य ताम् ॥ १२१ ॥
गिलेद्गलविशुद्ध्यर्थं दधिभक्तमनुत्तमम् ।
कवलत्रयमानेन दुर्गन्धोद्गारशान्तये ॥ १२२ ॥
मध्यन्दिने ततो भोज्यं घृततक्रोपदंशयुक् ।
रात्रौ च पयसा सार्द्धं यद्वा रोगानुसारतः ॥ १२३ ॥
विदाहि विदलं भूरि-लवणं तैलपाचितम् ।
बिल्वञ्च कारवेल्लञ्च वृन्ताकं काञ्जिकं त्यजेत् ॥१२४॥
इयं हि पोटली प्रोक्ता सिंहलेन महीभृता ।
मन्दाग्निप्रभवाशेष-रोगसङ्घातघातिनी ॥ १२५ ॥
सिंहलस्यापि निर्दिष्टा भैरवानन्दयोगिना ।
लोकनाथोक्तपोटल्या उपचारा इह स्मृताः ॥
पोटल्यो दीपनाः स्निग्धा मन्दाग्नौ नितरां हिताः ॥१२६॥

स्वल्पगुणा तथा पित्तलाश्च, यतः गुणान् दत्त्वा दत्त्वाऽपि भूयः पुनरपि विकारान् कुर्वते स्वल्पगुणवत्त्वात् न स्थायिगुणभाजो भवन्तीत्यर्थः ॥ ११९ ॥

वैश्वानरपोटल्या—सूतबली रसगन्धकौ । चराचररजः शोधितवराटीभस्म । कुक्कुटपुटम्तु गजपुट इति प्रसिद्धं । स्वतश्च शिशिरा स्वाङ्गशीता । करण्डे भाजने । गिलेदिति ।—औषधसेवनजनितमुखविकृतिनाशनार्थं तथा दुर्गन्धोद्गारनाशनार्थञ्च दधिभक्त कवलत्रय भोक्तव्यम् । घृततक्रोपदंशयुक् घृततक्रे एव उपदंशौ व्यञ्जने, भोजनोपकरणे इत्यर्थः, यद्वा—उपदंशो चर्वणे "चाट्" इति प्रसिद्धं, तद्युक् तद्युक्तमित्यर्थः । रोगानुसारतः व्याधेरवस्था विविच्य भोज्य कल्पनीयमित्यर्थः ॥ १२०—१२६ ॥

अथ वडवामुखी गुटिका ।—

शुल्वायोघनभस्म वेल्लहलिनी-व्योषाम्बुनिम्बच्छदैः
संयुक्तैश्च हरिद्रया समलवैः सार्द्धं सशुभ्रामृते ।
भृङ्गाम्भोविषतिन्दुकार्द्रकरसैः सम्पिष्य गुञ्जामिता
संशुष्का वडवामुखीति गुटिका नाम्नोदिता तारया ॥१२७॥
क्षिप्रं क्षुत्प्रतिबोधिनी खलु मता सर्वामयध्वंसिनी
श्लेष्मव्याधिविधूननी कसनहृच्छ्वासापहा शूलनुत् ।
सुर्द्दैषम्यहरा च गुल्मशमनी मूलार्त्तिमूलङ्कषा
शोफव्याधिहराऽत्र किं बहुगिरा सर्वामयोत्सादनी ॥१२८॥

अथ क्रव्यादनामा रसः ।—

द्विपलं गन्धकं शुद्धं द्रावयित्वा विनिक्षिपेत् ।
पारदं पलमानेन मृतशुल्वायसं पुनः ॥ १२९ ॥
तोलमानेन सङ्क्षिप्य पञ्चाङ्गुलदले क्षिपेत् ।
ततो विचूर्ण्य यत्नेन निक्षिप्याऽऽयसभाजने ॥१३०॥
चुल्ल्यां निवेश्य यत्नेन ज्वालयेन्मृदुवह्निना ।
पात्रमात्रं हि जम्बीर-रसं सम्यक् विजारयेत् ॥ १३१ ॥
सञ्चूर्ण्य पञ्चकोलोत्थैः कषायैः साम्लवेतसैः ।
भावनाः खलु कर्त्तव्याः पञ्चाशत्प्रमितास्ततः ॥ १३२ ॥

वडवामुख्याः—शुल्वं ताम्रम् । वेल्लं विडङ्गम् । हलिनी लाङ्गली । अम्बु बालकम् । निम्बच्छदं निम्बपत्रम् । समलवैः समांशैः । सशुभ्रामृते शुभ्रा सैन्धवलवणम् अमृतं विषं ताभ्यां सहिते । भृङ्गः भृङ्गराजः । अम्भो बालकम् । विषतिन्दुकः "कुचिला" इति प्रसिद्धः । मूलार्त्तिमूलङ्कषा मूलार्त्तेः अर्शोव्याधेः मूलङ्कषा मूलनाशिनी ॥ १२७।१२८ ॥

क्रव्यादरसे—"मृतशुल्वायसं पुनः तोलमानेन" इत्यत्र "शुल्वायसी चार्द्धपलप्रमाणे" तथा "पात्रमात्रं हि जम्बीररसम्" इत्यत्र "जम्बीरजं पक्करसं पलानां शतम्" इति रसेन्द्रसारसङ्ग्रहोक्तः पाठः । पञ्चाङ्गुलदले एरण्डपत्रे । पात्रमात्रम् आढकमानम् । विजारयेत् विशोषयेदित्यर्थः । सञ्चूर्ण्येत्यादि ।—पञ्चकोलाम्लवेतसयोः

भृष्टटङ्कणचूर्णेन तुल्येन सह मर्दयेत् ।
तदर्द्धं कृष्णलवणं सर्वतुल्यं मरीचकम् ॥ १३३ ॥
सप्तधा भावयेत् पश्चाच्चणकक्षारवारिणा ।
ततः संशोष्य सम्पेष्य कूपिकाजठरे क्षिपेत् ॥१३४॥
अत्यर्थं गुरुमांसानि गुरुभोज्यान्यनेकशः ।
भुक्त्वा च कण्ठपर्य्यन्तं चतुर्वल्लमितं रसम् ॥ १३५ ॥
पट्वम्लतक्रसंहितं पिबेत्तदनुपानतः ।
क्षिप्रं तज्जीर्य्यते भुक्तं जायते दीपनं पुनः ॥१३६॥
रसः क्रव्यादनामाऽयं प्रोक्तो मन्थानभैरवैः ।
सिंहलक्षोणिपालस्य भूरिमांसप्रियस्य च ॥
दिष्टो ग्रामं समासाद्य भैरवानन्दयोगिना ॥ १३७ ॥

कुर्य्याद्दीपनमुद्धतञ्च पचनं दुष्टामसंशोषणं
तुन्दस्थौल्यनिवर्हणं गरहरं मूलार्त्तिशूलापहम् ।
गुल्मप्लीहविनाशनं ग्रहणिकाविध्वंसनं स्रंसनं
वातग्रन्थिमहोदरापहरणं क्रव्यादनामा रसः ॥ १३८ ॥

प्रत्येक क्वाथै पञ्चाशद्भावना देया, तथा च रसेन्द्रसारसङ्ग्रहे—"सुपक्वकोलोद्भव-वारिपूरै। सवेतसाम्लै शतमत्र योज्यम्" इति। अत्र शतमिति प्रत्येकक्वाथेन पञ्चाशत् पञ्चाशत कृत्वा बोद्धव्यम। कृष्णलवण विड्लवणम्। चणकक्षारवारिणा चणकक्षुप दग्ध्वा तद्भस्मकृतक्षारोदकेन। "चणकक्षारवारिणा" इत्यत्र "चणकाम्लकेन" इति रसेन्द्रसारसङ्ग्रहे तथा "चणकपुष्परसेन" इति रसकौमुद्याञ्च पाठ। द्विपल गन्धकम् अग्नौ द्रवीकृत्य पलप्रमाण शुद्धपारद तथा मृत ताम्र मृत लौहञ्च प्रत्येक तोलकमित तत्र प्रक्षिप्य एरण्डपत्रे पातयित्वा पर्पटिकाकार कुर्य्यात, ततो विचूर्ण्य लौहभाजने संस्थाप्य आढकमान जम्बीररस दत्त्वा मृदुवह्निना पाचयेत। रसे सम्यक् शुष्के अवतार्य्य पुन सञ्चूर्ण्य अम्लवेतसपक्वकोलयो क्वाथै: प्रत्येक पञ्चाशत भावना दापयेत। तत सर्वतुल्य टङ्कण टङ्कणार्द्ध कृष्णलवण मरिचञ्च गन्धकादिभि सर्वै तुल्य तत्र दत्त्वा चणकक्षारोदकेन सप्तवारान् भावयित्वा शुष्कीकुर्य्यात्, तत सञ्चूर्ण्य काचकूप्या स्थापयेदिति ॥ १२९—१३८ ॥

अथ राजशेखरवटी।—

भागो मृतरसस्यैको वत्सनाभांशकद्वयम्।
रसतुल्यं शिवाचूर्णं गन्धकं त्रूषणं तथा॥ १३९॥
विचूर्ण्यातिप्रयत्नेन भावयेत् सप्तवारकम्।
ताम्बूलीपत्रतोयेन स्वर्णधुस्तूरजद्रवे' ॥
पिष्ट्वा चणमिता' कुर्य्याच्छायाशुष्कास्तु गोलिकाः॥१४०॥
उष्णाम्भोयुतराजशेखरवटी मन्दाग्निनिर्नाशिनी
नानाकारमहाज्वरार्त्तिशमनी निःशेषशूलापहा।
पाण्डुव्याधिमहोदरार्त्तिशमनी शूलान्तकृत् पाचनी
शोफघ्नी पवनार्त्तिनाशनपटुः श्लेष्मामयध्वंसिनी॥१४१॥

अथ द्वितीयाग्निकुमार।—

शुद्धं सूतं विषं गन्धं त्रिक्षार पटुपञ्चकम्।
दशकं तुल्यतुल्यांशं भर्जिता विजया नवा॥ १४२॥
दशानां तुल्यभागा च तस्यार्द्धं शिग्रुमूलकम्।
तत् सर्वं विजयाद्रावैः शिग्रुचित्रकभृङ्गजैः॥ १४३॥
द्रावैर्दिनत्रयं मर्द्यं कृत्वा भाण्डे पचेल्लघु।
दीपाग्निना तु यामैकं शुष्कं यावत् समुद्धरेत्॥१४४॥

राजशेखरे—वत्सनाभ विषम। शिवाचूर्णं हरीतकीचूर्णम। त्रूषण तथेति त्रूषणचूर्णं प्रत्येक रससमम्। स्वर्णधुस्तूरजद्रवे पीतपुष्पधुस्तूरमूलरसे॥१३९—१४१॥

अग्निकुमारे—"शुद्ध सूत विष गन्धम" इत्यत्र "विषम्" इति प्रामादिक पाठ, "दशक तुल्यतुल्यांशम्" "दशाना तुल्यभागा च" इत्याद्युत्तरवचनविरोधात विषेण सह गणनया सूतादीनामेकादशत्वप्रसङ्गाच्च। यत्तु केनचित "शुद्ध सूत विष गन्ध द्विक्षार पटुपञ्चकम्" इति पाठ प्रकल्प्य दशसङ्ख्यावत्त्व समञ्जसीकृत, तदपि न समीचीन, "शुद्धसूत मृत गन्ध त्रिक्षार पटुपञ्चकम्" इति रसरत्नाकरवचनविरोधात्। त्रिक्षार "क्षारद्वय टङ्गणञ्च क्षारत्रयमुदाहृतम्" इत्युक्तरूपम्। पटुपञ्चक पञ्चलवणम। तस्यार्द्धं तस्य सर्वतुल्यस्य भृष्टविजयाचूर्णस्य अर्द्धम्। दीपाग्निना दीपशिखया, "दीपाग्निना"

सप्तधा चाऽऽर्द्रकद्रावैर्भावयेच्चूर्णयेद्भिषक् ।
दीपकोऽग्निकुमारोऽय निष्कैक मधुना लिहेत् ॥
प्रतिकर्षं गुड शुण्ठी अनुपानञ्च दीपनम् ॥ १४५ ॥

अथामृतवटी ।—

कुष्ठगन्धविषव्योम-त्रिफलापारदैः समैः ।
भृङ्गाम्बुमर्दितैर्मुद्ग-मानाऽमृतवटी शुभा ॥
अजीर्णश्लेष्मवातघ्नी दीपनी रुचिवर्द्धनी ॥ १४६ ॥

अथ राक्षसनामा रस ।—

ताम्रं पारदगन्धकौ त्रिकटुक तीक्ष्णञ्च सौवर्चलं
खल्ले मर्द्य दृढ विधाय सिकताकुम्भेऽष्टयाम ततः ।
स्विन्न तस्य च रक्तशाकिनिभवं क्षार सम मेलयेत्
सर्वं भावितमातुलुङ्गजरसैर्नाम्ना रसो राक्षस ॥१४७॥
मन्दाग्नौ सतत ददौत मुनये प्रात पुरा शङ्करः
सख्येऽस्मै च्यवनाय मन्दहुतभुग्वर्य्याय नष्टौजसे ।
तेनादाय समस्तलोकगुरवे सूर्य्याय तस्मै नमो
मर्त्यानामपि चास्य दानसमये गुञ्जाष्टक वर्जयेत् ॥१४८॥

क्वचित् "दीप्ताग्निना" तथा "आर्द्रकद्रावैर्भावयेच्चूर्णयेत भिषक्" क्वचित् "आर्द्रकद्रावे-स्त्रिवर्कैर्भावयेद्भिषक्" इति रसरत्नाकरे पाठद्वयम् । प्रतिकर्षमिति गुडशुण्ठ्यौ प्रत्येक कर्षमानमनुपान कार्य्यम् ॥ १४२—१४५ ॥

अमृतवट्या—व्योम अभ्रम् , "व्योम" क्वचित् "व्योष" इति रसेन्द्रचिन्तामणिधृत-पाठ । समै समभागै ॥ १४६ ॥

राक्षसनाम्नि रसे—तीक्ष्ण तीक्ष्णलौहम् । सिकताकुम्भे वालुकापूर्णभाण्डे । तस्य ताम्रादिसर्वचूर्णस्य, सममित्यनेन अन्वय , सम तुल्यम् । रक्तशाकिनी रक्त-पुनर्नवा । वर्जयेत् त्यजेत्, दापयेदित्यर्थ, मर्त्येभ्य, अष्टगुञ्जापरिमितम् एतस्य दापयेदिति ॥ १४७।१४८ ॥

अथ जीवननामा रस ।—

रसगन्धौ सिन्धुकणाटङ्कणमभयाऽग्निहियावलीकतकफलम्।
क्रमशोत्तरञ्च विचूर्णितया बृहतीरससयुतभावनया ॥१४९॥
आर्द्रकहिङ्गुपुनर्नवपूतिच्छिन्नरसैः क्रमशस्तु भावनया।
तस्य कलांशविशञ्च विमिश्रं तद्रसमानं मानवधिया ॥१५०॥
सर्वमजीर्णं कफमारुतपाण्डुशोफहलीमककामलाशूलम्।
नाशयते क्षुदग्निकरोऽयं दीपनञ्च जीवननामरसेन्द्रः ॥१५१॥

अथ वडवानल ।—

शुल्वं तालकगन्धकौ जलनिधेः फेनोऽग्निगर्भांशयः
कान्तायो लवणानि हेमपवयौ नीलाञ्जनं तुल्यकम्।
भागो द्वादशको रसस्य तु दिन वल्लाम्बुघृष्टं शनैः
सिद्धोऽयं वडवानलो गजपुटे रोगानशेषान् जयेत् ॥१५२॥

जीवनरसे—अग्नि चित्रक । हियावली देशान्तरे स्वनामप्रसिद्धा। "हियावली" इत्यत्र "हिमावली" इति पाठ समीचीन, राजनिघण्टौ हिमावलीति नाम-दर्शनात्, हियावल्याश्च कोषग्रन्थादौ कुत्राप्युल्लेखाभावादिति। कतकफल जल-प्रसादनफलम्। क्रमशोत्तर भागविवृद्धम्। पूति नाटाकरञ्ज। छिन्न गुडूची। तस्य मिलितरसगन्धादिचूर्णसमुदायस्य, कलांशविश षोडशभागरौप्यभस्म। तद्रसमान मिति।—मानवधिया मनुष्यबुद्ध्या, युक्त्यनुसारेणेत्यर्थ, तद्रसमान पाकरसस्य परिमाण, योज्यमिति शेष, रौप्यभस्ममिश्रणानन्तर सिद्धस्यास्य रसस्य योग्यमात्रा प्रयोज्या इत्यर्थ। "तद्रसमान मानवधिया" इत्यत्र "तद्रसमाषसमानवटी या" इति पाठे—तस्य रसस्य माषसमाना वटी कार्य्या, या वटी, सर्वमजीर्णं नाशयते इत्याद्युत्तरेणान्वय ॥ १४९—१५१ ॥

वडवानले—जलनिधे फेन समुद्रफेन। अग्निगर्भांशय अग्नि गर्भांशये यस्य स शमी इत्यर्थ, अस्य वल्कल ग्राह्यम। लवणानीति पञ्चाना लवणाना मिलितानामेको भाग। हेम स्वर्णम्। पवय हीरकाणि। भागो द्वादशको रसस्य इति रसभाग द्वादश, शुल्वादीनामेकादशभाग रसेन सह द्वादशभागश्च, तेन रसस्य एकभ.गसमता इत्यर्थ। वल्लाम्बुघृष्टं चविकाक्वाथमर्दितम्। "वल्लाम्बुघृष्टम्' इत्यत्र "वज्राम्बुघृष्टम्" इति पाठे—वज्राम्बु स्नुहीपत्ररस ॥ १५२ ॥

अथाग्निजननी वटी ।—

कणनागरगन्धकपारदकं गरलं मरिचं समभागयुतम् ।
लकुचस्य रसैश्चणकप्रमिता गुटिका जनयत्यचिरादनलम् ॥१५३॥

अथ सर्वरोगान्तका वटी ।—

शुद्धसूतं विषं गन्धमजमोदं फलत्रयम् ।
सर्जिक्षारं यवक्षारं वह्निसैन्धवजीरकम् ॥१५४॥
सौवर्चलं विडङ्गानि सामुद्रं त्र्यूषणं समम् ।
विषमुष्टिः सर्वतुल्या जम्बीराम्लेन मर्दितम् ॥१५५॥
मरिचाभा वटीं खादेद्वह्निमान्द्यप्रशान्तये ।
पथ्या शुण्ठी गुडश्चानु पलार्द्धं भक्षयेत् सदा ॥
अग्निमान्द्ये वटी ख्याता सर्वरोगकुलान्तका ॥१५६॥

अथाग्निकरम् ।—

सूतं ताम्रं कणातुल्यं चूर्णं क्षौद्रविमिश्रितम् ।
निष्कार्द्धं भक्षयेन्नित्यं नष्टवह्निप्रदीपनम् ॥ १५७ ॥
आर्द्रकस्वरसं क्षौद्रं पलमात्रं पिबेदनु ।
यथेष्टं घृतमांसाशी शक्तो भवति पावकः ॥ १५८ ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्यस्य कृतौ रसरत्नसमुच्चये उदावर्त्तादि-
सारग्रहणीविसूचीवह्निमान्द्यचिकित्सितं नाम षोडशोऽध्यायः ॥ १६ ॥

अग्निजनन्या—लकुच डहु ॥ १५३ ॥

सर्वरोगान्तकायाम्—अजमोदं चेवयमानी । वह्निः चित्रकः । सामुद्रं "करकच" इति प्रसिद्धम् । सूतादीनां त्र्यूषणान्तानां प्रत्येकं समभागः । विषमुष्टिः "कुचिला" इति प्रसिद्धः, सा च सर्वचूर्णसमाना । रसेन्द्रसारे योगोऽयम् अग्नितुण्डीति नाम्ना ख्यातम् ॥ १५४—१५६ ॥

अग्निकरे—चूर्णं चूर्णीकृतं सूतं ताम्रम् ॥ १५७।१५८ ॥

इति रसरत्नसमुच्चयबोधिन्यां षोडशोऽध्यायः ॥ १६ ॥

अथ सप्तदशोऽध्यायः ।

अथ मूत्रकृच्छ्राश्मर्य्यादिचिकित्सनम् ।—

अथाश्मरीनिदानम् ।—

कटौ कुक्षिप्रदेशे च शूलं प्रथमतो भवेत् ।
पश्चाद्रोधो ज्वलन्मूत्रमश्मरीरोगलक्षणम् ॥ १ ॥

अथाश्मरीमूत्रकृच्छ्रचिकित्सा ।—

अथ पाषाणभेदी रसः ।—

रसं द्विगुणगन्धेन मर्दयित्वा प्रयत्नतः ।
वसु पुनर्नवा वासा श्वेता ग्राह्या प्रयत्नतः ॥ २ ॥

मूत्रशुक्रादिवेगधारणजादुदावर्त्तात् अश्मरीमूत्रकृच्छ्रादिकं जायते, अत उदावर्त्ता-ख्यनन्तरं मूत्रकृच्छ्रादीनां चिकित्सितं विवर्णिषु सप्तदशाध्यायप्रारम्भे अश्मरी-निदानमाह, कटाविति ।—रोध इत्यत्र मूत्रस्येति शेषः । ज्वलन्मूत्रमिति मूत्रत्याग-काले लिङ्गस्रोतसि दाहो भवति । क्वचिदेतच्छ्लोकानन्तरं—"मातापितृजदोषेण अथवा मूत्ररोधनात् । अपथ्यादभिचाराच्च जायते चाश्मरीगदः ॥ मूत्राविष्टौ च पितरौ सुरतं क्रियते यदि । मूत्रेण सहितं शुक्रं च्यवते गर्भसम्भवे ॥ यत्र यस्य च देहस्य तत्र तस्य च जायते । मूत्रं मूत्रस्य सस्थाने करोति बन्धनं नृषु । सोऽप्यसाध्यो मूत्रगदो बाल्ये द्रवति मानुषम् । तारुण्येऽप्यपचारेण जायते मूत्र-शर्करा ॥ विपरीतरतेनापि उत्तानपुरुषेण वा । शुक्रं प्रच्यवते तस्य स्त्री शुक्रञ्च प्रमुञ्चति ॥ पुनश्च मेहनस्थञ्च ततो वातेन शोषितम् । दृषदत्वं प्रपद्येत मूत्रद्वारं प्ररुध्य च ॥ तेन मूत्रनिरुद्धत्वं जायते तीव्रवेदना । अण्डसन्धौ स्थिता याति शर्करा शस्त्रसाध्यताम् ॥ अथवा चतुरा नारी मैथुनं विदधाति च । तत्सौख्येन भवेत् सौख्यं स्त्रीणां योनिविमर्दनम् ॥ अथ मूत्रदोषाङ्कुशो रसः । अभ्रकं पारदं रुक्मं लौहं वङ्गं शिलाजतु । समभागानि चैतानि वसुनीरैर्विमर्दयेत ॥ त्रिदिनं मुषलीतोयैस्त्रिकण्टकरसेन च । मूत्रदोषाङ्कुशस्यास्य वल्लयुग्मं प्रदापयेत् ॥ वात-कुण्डलिकाऽऽनाहमूत्रसङ्गाश्मरीगदान् । वातोल्बणान् जयेद्दोषान् वह्निसन्दीपनं परं ॥ शैवसिद्धान्तशास्त्रान्तात् मूत्रदोषाङ्कुशो रसः ॥" इत्यधिकः पाठः ॥१॥

तद्द्रवैर्भावयेदेनं प्रत्येकन्तु दिनत्रयम् ।
पश्चात् मूषागतं शुष्कं स्वेदयेज्जलयन्त्रत: ॥३॥
पाषाणभेदी नामाय नियुञ्जीताश्च वल्लयुक् ।
गोपालकर्कटीदुग्धं भूम्यामलकमूलिका ॥
कुलत्थक्वाथतोयेन पिष्ट्वा तदनुपाययेत् ॥ ४ ॥

अथ गोक्षुरप्रयोग ।—

गोक्षुरस्य कषायञ्च सघृतं पाययेन्निशि ॥ ५ ॥

अथ पाण्ड्वादियोग ।—

पाण्डुरफलमूलञ्च भूम्यामलकमूलिका ।
वशस्य पेटकार्य्याश्च मूलं पिष्ट्वा जलं पिबेत् ॥ ६ ॥

अथ शुक्लपिण्याकादियोग ।—

शुक्लपिण्याकपिच्छिल्ली-चूर्णमुष्णेन वारिणा ।
पिबन् विमुच्यते रोगान्मूत्रकृच्छ्रात् सुदारुणात् ॥७॥

अथ मूत्रकृच्छ्रान्तको रस ।—

शतावरीरसे पिष्ट्वा तुल्यसूतार्कपिष्टिका ।
पाचिता कटुतैलेन मूत्रकृच्छ्रे प्रशस्यते ॥ ८ ॥

पाषाणभेदिरसे—वसु वसुहट्ट "वकफुल" इति प्रसिद्ध, तस्य पत्र ग्राह्यम् । श्वेता श्वेतापराजिता । जलयन्त्रत दोलायन्त्रत, "स्वेदयेद्दोलिकायन्त्रे दिनैक तं विचूर्णयेत" इति रसरत्नाकरदर्शनात् । वल्लयुक् वल्लद्वयम । गोपालकर्कटीदुग्धं गोपालकर्कटी आरण्यकर्कटीविशेष, "कुन्दरुकी" "केहुडा" इति वा प्रसिद्ध, गोरक्षकर्कटी वा, तस्या दुग्ध क्षीरम् । औषधसेवनानन्तर कुलत्थक्वाथेन भूम्यामलकमूल गोपालकर्कटीक्षीरञ्च पिष्ट्वा अनुपान कुर्य्यात ॥ २—४ ॥

गोक्षुरप्रयोगे—घृत प्रक्षेप्यम् ॥ ५ ॥

, पाण्ड्वादियोगे—पाण्डुरफलमूल पाण्डुर धव तस्य फल मूलञ्च । पेटकारी ज्योतिष्मती "टेपारी" इति भाषा ॥ ६ ॥

शुक्लपिण्याकादियोगे—शुक्लपिण्याकपिच्छिल्लीचूर्णं शुक्लपिण्याक शुक्लतिलकल्क, पिच्छिल्ली अतसी, "मसिना" "तिसि" इति लोके, तयो चूर्णम ॥७॥

मूत्रकृच्छ्रान्तकरसे—तुल्यपारदताम्राणि शतावरीरसेन पिष्ट्वा पिष्टिका कुर्य्यात, ततः

अथ द्वितीयपाषाणभेदी रसः ।—

रसेन सितवर्षाभ्वा रसं द्विगुणगन्धकम् ।
घृष्टं पचेच्च मूषायां द्वौ माषौ तस्य भक्षयेत् ॥९॥
पातालकर्कटीमूलं कुलत्थोदे पिबेदनु ।
गोकण्टकसदाभद्रा-मूलक्वाथं पिबेन्निशि ॥
अयं पाषाणभिन्नाम्ना रसः पाषाणभेदकः ॥१०॥

अथ गोक्षुरादिचूर्णम् ।—

गोक्षुरबीजसमुत्थं चूर्णमविक्षीरसमायुक्तम् ।
रसवरमिश्रं पिबतश्चूर्णीभूत्वाऽश्मरी पतति ॥ ११ ॥

अथ त्रिविक्रमः ।—

मृतताम्रमजाक्षीरे पाच्यं तुल्यं गते द्रवे ।
तत्ताम्रं शुद्धसूतञ्च गन्धकञ्च समं समम् ॥१२॥
निर्गुण्ड्युत्थद्रवैर्मर्द्यं दिनं तद्गोलमन्धयेत् ।
यामैकं वालुकायन्त्रे पाच्यं योज्यं द्विगुञ्जकम् ॥१३॥

कटुतैले यामं पक्त्वा चूर्णीकृत्य च गुञ्जाचतुष्टयं प्रयोजयेत् । रसेन्द्रसारे अर्कस्थाने "तालकम्" इति पाठः, किन्तु उक्तग्रन्थे रसरत्नाकरे च अस्य मात्रामनुपानञ्च उक्तवान्, तद्यथा—"मूषकञ्चालकस्यास्य चौटैर्गुञ्जाचतुष्टयम् । । तुलसी तिलपिण्याक बिल्वमूलं तुषाम्बुना । कर्षैकं वाऽनुपानेन सुरया वा सुवर्चले ॥" इति ॥ ८ ॥

द्वितीयपाषाणभेदिरसे—सितवर्षाभ्वा श्वेतपुनर्नवाया । पातालकर्कटीमूलम् इन्द्रवारुणीमूलम् । गोकण्टकः गोक्षुरबीजम् । सदाभद्रा गाम्भारी । अस्यौषधस्य उपयोगसमये निशि गोकण्टकादिरयं योगः पातव्यः । रसेन्द्रसारे 'पाषाणवज्रक" इति ख्यातस्यास्य भूधरयन्त्रे पाकः पाकानन्तरं गुडेन मर्दनञ्च विहितम् इति । "सदाभद्रा" इत्यत्र "शुभा भद्रा" इति रसरत्नाकरोक्तपाठे—शुभा वंशरोचना भद्रा गाम्भारी ॥९।१०॥

गोक्षुरादिचूर्णे—अविक्षीरसमायुक्तं मेषीदुग्धसहितम् । रसवरमिश्रमित्यत्र रसः कुसुमरसः, मधु इत्यर्थः, चक्रसङ्ग्रह-रसरत्नाकरसंवादात्, यदुक्तं—"त्रिकण्टकस्य बीजानां चूर्णं माक्षिकसंयुतम् । अविक्षीरेण सप्ताहं पिबेदश्मरीनाशनम् ॥" इति । एतत्र उत्कृष्टमाक्षिकसंयुक्तमित्यर्थः, रसवरः रससिन्दूरो वा ॥ ११ ॥

वीजपूरस्य मूलन्तु सजलञ्चानुपाययेत् ।
रसास्त्रिविक्रमो नाम्ना मासैकेनाश्मरीप्रणुत् ॥१४॥

अथानन्दभैरवी वटी ।—

तिलापामार्गकाण्डञ्च कारवेल्ल्या यवस्य च ।
पलाशकाष्ठसंयुक्तं सर्वं तुल्यं दहेत् पुटे ॥ १५ ॥
तन्निष्कैकमजामूत्रैर्वटीञ्चानन्दभैरवीम् ।
पाययेदश्मरीं हन्ति सप्तरात्रान्न संशय. ॥१६॥

अथ अश्मरीहरयोग ।—

पाण्डुरं फलिकामूलं जलेनैवाश्मरीहरम् ॥ १७ ॥

अथ यवक्षारप्रयोग ।—

मधुना च यवक्षारं लीढं स्यादश्मरीहरम् ॥ १८ ॥

अथ लघुलोकेश्वर ।—

मृतसूतस्य भागैकं चत्वार: शुद्धगन्धकात् ।
पिष्ट्वा वराटिकास्तेन रसपादञ्च टङ्कणम् ॥ १९ ॥
क्षीरै. पिष्ट्वा मुखं रुद्ध्वा तासां ताश्चान्धयेत् पुटेत् ।
स्वाङ्गशीतं विचूर्ण्याथ लघुलोकेश्वरो रस: ॥२०॥
चतुर्गुञ्जा रसश्चाय मरिचैकोनविंशति. ।
जातीमूलपलैकन्तु अजाक्षीरेण पेषयेत् ॥
शर्कराभावितञ्चानु पीत्वा कृच्छ्रहरं ध्रुवम् ॥ २१ ॥

त्रिविक्रमे—मृतताम्रमजाक्षीरञ्च तुल्यमानं गृहीत्वा तावत् पचेत यावत् क्षीरं न शुष्यति । अन्धयेत् रुन्ध्यादित्यर्थ । वीजपूरस्य मूलं मातुलुङ्गमूलम् ॥१२—१४॥

आनन्दभैरवीवटिकायां—कारवेल्ली-यवयोरपि काण्ड ग्राह्यम् ॥ १५।१६ ॥

अश्मरीहरयोगे—पाण्डुरं धवलम् । फलिकामूलं फलिका अम्लवृक्षविशेष "पलाश-पिपुल" इति प्रसिद्ध, तस्या मूलम् । "पाण्डुरफलिकामूलम्" इति समस्तपाठे—पाण्डुरफलिका स्वनामख्यातक्षुपविशेष, "पीटरफलम्" इति प्रसिद्धम् ॥ १७ ॥

यवक्षारप्रयोगे—यवक्षारस्य मात्रा माषमिता ग्राह्या ॥ १८ ॥

लघुलोकेश्वरे—तेन सूतगन्धककल्केन वराटिका., पूर्या इति शेष. । तासां

अथ विदार्य्यादि कषाय ।—

विदारीं गोक्षुर यष्टिं कसेरुञ्च समं पचेत् ।
तं कषायं पिबेत् क्षौद्रं रसभस्मयुत तथा ॥
मूत्रकृच्छ्रहर ख्यात समाहात् पित्तसम्भवम् ॥२२॥

अथ क्षारप्रयोग ।—

तिलापामार्गकदली-पलाशयवकाण्डकान् ।
दग्ध्वा तद्भस्म तोयेन वस्त्रपूतञ्च कारयेत् ॥२३॥
तं पचेत्तोयशोषान्त ततश्चूर्णं द्विगुञ्जकम् ।
दापयेदविमूत्रेण शर्कराकृच्छ्रहृद्भवेत् ॥२४॥

अथ हारिद्रप्रयोग ।—

हरिद्रागुडकर्षैकञ्चारनालेन वा पिबेत् ॥२५॥

वराटिकानाम् । ता वराटिका । अन्वयेत मूषाया रूध्यात । जातीमूलपलैकमित्यत्र जाती आमलकी, रसरत्नाकरे "धात्रीमूलफलै कल्कम्" इति पाठदर्शनात, यद्यपि तत्र पाठभेद, तथाऽपि साहचर्य्यात मूत्रकृच्छ्रहरत्वाच्च जातीशब्देन धात्री एव ग्राह्या, तस्या मूलस्य पलमेकम् । रसेन्द्रसारे तु "जातीमूलफलैर्युक्तम्" इति पाठान्तरम् । शकराभावित शर्करामिश्रितम् । चतुर्गुञ्जामितोऽय रस एकोनविंशतिभि मरिचै सह सेव्य, पश्चात् जातीमूलपलकल्कम् अजाक्षीरपिष्ट शकरायुत पिबेदिति । रसरत्नाकरे तु घृतैर्मरिचैश्च योगोऽय दातव्य इति पठितम् । केचित्तु—"अजाक्षीरेण सह औषध पीत्वा पश्चात् सशर्करम् अजाक्षीर पेयम् इत्यथ" इति व्याचक्षते ॥ १९—२१ ॥

विदार्य्यादिकषाये—यष्टि यष्टिमधु । कसेरु "केशुर" इति प्रसिद्धम् । रसभस्मयुत रससिन्दूरविमिश्रम् ॥ २२ ॥

क्षारप्रयोगे—तिलादिकाण्डान् भस्मीकृत्य तत क्षार षड्गुणतोये एकविंशतिवार वस्त्रपरिस्रुत कृत्वा क्षारपाकविधिना जलशोषण यावत् पचेदिति । अविमूत्रेण मेषीमूत्रेण । शर्कराकृच्छ्रहृत् शर्कराजमूत्रकृच्छ्रनाशनम् ॥ २३।२४ ॥

हारिद्रप्रयोगे—हरिद्रागुडयोर्मिलितयो कर्षमानता बोद्धव्या । वा शब्दोऽत्र पूर्वयोगापेक्षया, तेन च तिलादिक्षार हरिद्रागुड वा शर्कराकृच्छ्रहृदित्यर्थ, ॥२५॥

अथ शैवयोगः ।—

वन्ध्याकर्कोटकीकन्दं भक्ष्यं क्षौद्रसितायुतम् ।
अश्मरीं हन्ति नो चित्रं कर्षमात्रं शिवोदितम् ॥ २६ ॥

अथ प्रमेहनिदानम् ।—

शोषस्तापोऽङ्गकार्श्यञ्च बहुमूत्रत्वमेव च ।
अस्वास्थ्यं सर्वगात्रेषु मूत्रमेहस्य लक्षणम् ॥ २७ ॥

अथ प्रमेहचिकित्सा ।—

अथ वङ्गेश्वरो रसः ।—

रसस्य भस्मना तुल्यं वङ्गभस्म समाहरेत् ।
मधुना लेहयेत् प्राज्ञो वातमेहप्रशान्तये ॥२८॥
मुद्गामलकयूषेण पथ्यं देयं सतक्रकम् ।
तिलपिण्डीञ्च तक्रेण पक्त्वा दद्यान्न हिङ्गुकम् ॥
घृतं बहु न दद्याच्च तिलतैलेन भोजयेत् ॥ २९ ॥

अथ गुडमार्कण्डी ।—

मार्कण्डीचूर्णमादाय सगुडं खादयेन्निशि ॥ ३० ॥

शैवयोगे—वन्ध्याकर्कोटकी तिक्तकर्कोटकी, "तित्-कॉक्डी" "तित काक्रोल" इति वा भाषा ॥ २६ ॥

वस्तिविकृतिसाधर्म्यात् अश्मर्य्यनन्तरं प्रमेहचिकित्सितं विवक्षुरादौ तस्य निदानमाह, शोष इति ।—सुगमम् ॥ २७ ॥

वङ्गेश्वरे—वातमेहप्रशान्तये इत्यस्य मेहेषु अतिकर्षणात् कुपितवातानुबन्धयुक्तमेहशान्तये इत्यर्थं, न तु स्वकारणकुपितवातमेहशान्तये, तस्य असाध्यत्वात्, यदुक्तं चरके—"या वातमेहान् प्रति पूर्वमुक्ता वातोल्बणानां विहिता क्रिया सा। वायुर्हि मेहेष्वतिकर्षितानां कुप्यत्यसाध्यान् प्रति नास्ति चिन्ता ॥" इति। रसेन्द्रसारसङ्ग्रहे इत्युमेहे अस्य माषद्वयं प्रयोज्यमिति पठितम्। वङ्गेश्वररससेवनकाले उपचारविशेषमाह, मुद्गेति।—तिलपिण्डी तिलपिष्टम्। न हिङ्गुकम् अल्पहिङ्गुसंयुतम्, नञत्र ईषदर्थवाची। "दद्यादहिङ्गुकम्" इति पाठेऽपि स एवार्थः। घृतं बहु न दद्याच्च इत्यनेन अल्पमितं घृतं दद्यादित्यवगम्यते ॥ २८।२९ ॥

गुडमार्कण्ड्यां—मार्कण्डी कर्कोटकम् ॥ ३० ॥

अथ ताम्रयोग।—

ताम्रेण तुर्य्यभागेण कुर्वीत रसपिष्टिकाम्।
गोक्षुरस्य द्रवे चैव निक्षिपेत् सप्तकद्वयम॥३१॥
निम्बुमध्ये विनिक्षिप्य स्वेदयेत् काञ्जिकेऽहनि।
निम्बुन्तरे विनिक्षिप्य वक्त्रे सन्धारयेन्निशि॥ ३२॥

अथ रक्तमेहे वङ्गप्रयोग।—

रक्तमेहेऽपि भस्मैव वङ्गस्य मधुना चरेत्॥ ३३॥

अथ शुक्लमेहे वङ्गप्रयोग।—

शुक्लमेहप्रशान्त्यर्थं हरिद्राचूर्णसंयुतम्॥ ३४॥

अथ मधुमेहे वङ्गप्रयोग।—

मधुमेहापनुत्त्यर्थं समालार्जुनचूर्णकम्।
वङ्गभस्मसमायुक्तं खादयेच्छर्करान्वितम्॥ ३५॥

अथ शाल्मलीप्रयोग।—

शाल्मलीद्रुतिमादाय पाययेन्मधुना सह॥ ३६॥

अथ रक्तमेहे बोलवद्धरसस्य प्रयोगोपदेश।—

बोलबद्ध रस जग्ध्वा रक्तमेहाद्विमुच्यते।
बीजकस्य कषायञ्च पिबेदनु सबोलकम्॥ ३७॥

ताम्रयोगे—पादिकेन ताम्रेण सह रसस्य पिष्टिका कृत्वा अग्नौ प्रताप्य प्रताप्य चतुर्दशवार गोक्षुरक्वाथे निक्षिपेत्, ततो निम्बुमध्ये संस्थाप्य दिवा काञ्जिकेन दोलायन्त्रे स्वेदयेत्, रात्रौ च निम्बुकात् तां पिष्टिका बहिष्कृत्य निम्बुकान्तरे संस्थाप्य च मुखे धारयेत इति॥ ३१।३२॥

रक्तमेहे वङ्गप्रयोगे—सर्वं स्पष्टम्॥ ३३॥

शुक्लमेहे वङ्गप्रयोगे।—हरिद्राचूर्णसंयुत वङ्गभस्म मधुना चरेत इति पूर्वेण योजनीयम्। शुक्लमेह पिष्टमेह.॥ ३४॥

मधुमेहे वङ्गप्रयोगे—समालार्जुनचूर्णकमित्यत्र माला भूम्यामलकी॥ ३५॥

शाल्मलीप्रयोगे—शाल्मलीद्रुति शाल्मलीमूलरसम्॥ ३६॥

रक्तमेह अधिकाराल्लरोक्तबोलवद्धरसस्य प्रयोगमुपदिशति, बोलबद्धमिति।—

अथ श्लेष्मातकक्काथ ।—

श्लेष्मातमूलजक्काथं सघृतं निशि पाययेत् ॥ ३८ ॥

अथ कुष्माण्डस्वरसप्रयोग ।—

कुष्माण्डस्य रसं वेल्ल-खण्डयुक्तन्तु पाययेत् ॥ ३९ ॥

अथ स्त्रीणा रक्तस्रावे तौवरयोग ।—

स्त्रियं वा रुधिरस्रावामामदुग्धेन पाययेत् ।
तुवरीमूलमुद्घृष्ट सम्यक् शर्करयाऽन्वितम् ॥ ४० ॥

अथ चन्द्रप्रभा गुटिका ।—

बोलं जातिफलं मधूकयुगलं सारं तथा खादिरं
कर्पूरामलकी-शटी-बहुसुता-घोण्टाम्लसार-स्थिराः ।
कासीसं भववीज-दाडिम-सहा सर्वं समं कल्पितं
प्रत्येकं दधिदुग्धलाङ्गलिरसैस्तुम्बस्य मुद्गस्य च ॥४१॥
रसेन भावितं तस्य गुटिका सम्प्रकल्पिता ।
जयेच्चन्द्रप्रभा नाम तीव्रान् मेहादिकान् गदान् ॥४२॥

बोलबद्धं रस कासाधिकारोक्तम् । बीजकस्य असनस्य । सबीलक गन्धबोलचूर्णप्रक्षेप-युक्तम, बोलबद्धरस जग्ध्वा सबोलक बीजकक्काथमनुपान कुर्य्यात् ॥ ३७ ॥

श्लेष्मातकक्काथे—श्लेष्मातमूलजक्काथ बहुवारमूलक्काथम् । अयमपि योग रक्तमेहे प्रयोज्य ॥ ३८ ॥

कुष्माण्डस्वरसप्रयोगे—वेल्लखण्डयुक्त विडङ्गशर्कराभ्या युक्तं विडङ्गतण्डुलयुक्त वा । अयमपि रक्तमेहे ॥ ३९ ॥

तौवरयोगे—रुधिरस्रावा स्रुतरुधिरा, रक्तमेहवती प्रदरव्याधिमती वा । तुवरीमूलमुद्घृष्टं घृष्टमाढकीमूलम्, रक्तमेहार्त्ता प्रदररोगार्त्ता वा अपक्वदुग्धेन आढकीमूल घृष्ट्वा सशर्कर पाययेदिति योज्यम् ॥ ४० ॥

चन्द्रप्रभायां—मधूकयुगल मधूक गुडपुष्प, "महुया" इति ख्यातम्; तच्च जलजस्थलजभेदात द्विविधम् । बहुसुता शतावरी । घोण्टा आरण्यबदर पूगफल वा । अम्लसार, अम्लवेतस, । स्थिरा शालपर्णी । भववीज शिवलिङ्गीवीजं

अथ प्रमेहगजसिंहः ।—

चाण्डालीराक्षसीपुष्प-रसमध्वाज्यटङ्कणम् ।
रसं समांशोपरस सम हेम्ना विमर्दितम् ॥४३॥
समांश पूतिलोहं वा मूषाया विपचेत् क्रमात् ।
प्रमेहगजसिंहोऽयं रसः क्षौद्रैर्द्विमाषकम् ॥४४॥

अथ महाविद्या गुटिका ।—

मर्दित किंशुकरसैः कान्तनागाभ्रपारदम् ।
कषायैः छिन्ननाकुल्या वालुकायन्त्रपाचितम् ॥४५॥
राजावर्त्तशिलाधातु-ताप्यमण्डूरमाक्षिकैः ।
तुल्यवैक्रान्तकासीसैः समैः सर्वैरिमैः समम् ॥४६॥
आधारी कृष्णमूला तु कपित्थश्रावणी हिमम् ।
नारिकेलस्य मूलानां मुस्ताचन्दनसारयोः ॥ ४७ ॥

मधुवारवीज वा । सहा माषपर्णी । लाङ्गली कलिकारिका । तुम्बस्य तिक्तालाब्वाः, एषां प्रत्येकं रसेन सप्त सप्त वारान् भावना दातव्या ॥ ४१।४२ ॥

प्रमेहगजसिंहे—चाण्डाली लिङ्गिनी "पञ्चगुरिया" इति ख्यात, तस्या बीज, राक्षसीपुष्प राक्षसी चण्डा तस्या पुष्पम्, एतयो रस । रस रससिन्दूरम् । समांशोपरस तुल्याभ्रकम्, अत्र रसोपरसशब्दाभ्यां रससिन्दूराभ्रे ग्राह्ये, "पारदाभ्रकयोर्भस्म" इति रसरत्नाकरदर्शनात । रसरत्नाकरे "सम हेम्ना" इति पाठो न दृश्यते, दृश्यते च "मृतलौहाष्टक समम्" इति पाठ । पूतिलोह "पूतिलोह द्वितयमुदित नागवङ्गाभिधानम्" इत्युक्त्या नाग वङ्गञ्चेत्यर्थ । पूतिलोह वा इत्यत्र वा शब्द समांशोपरसमित्यपेक्षया बोध्य, समांशोपरस समांश पूतिलोह वा । योगोऽय गजपुटे पक्तव्य शुक्रमेहे च प्रयोज्य । रसरत्नाकरे अस्यानुपानमप्युक्त यथा—"लिहेच्चानुपिबेत्तक्रैर्निष्कैक टङ्कण सदा" इति । तत्रास्य "मेहद्विरदसिंह" इति नाम ॥ ४३।४४ ॥

महाविद्यागुटिकायां—किंशुकरसै पलाशपुष्पस्वरसै । कान्त कान्तलौहम् । नाग सीसकम् । छिन्ननाकुल्या क्वथितरास्नाया । शिलाधातु सुवर्णगैरिकम् । ताप्य स्वर्णमाक्षिकम् । माक्षिक रौप्यमाक्षिकम् । आधारी देशान्तरे प्रसिद्धा ।

काकजम्बूप्रसूनानां रसैः सह विमर्दयेत् ।
गुटिकां भक्षयेत्तस्य माषद्वितयसम्मिताम् ॥४८॥
धात्रीरसञ्चानुपिबेन्नाकुलीचूर्णमात्रया ।
रात्रौ धात्रीरसो देयो महाविद्या प्रमेहजित् ॥ ४९ ॥

अथ बहुभावितप्रमेहादि ।—

वीर्यं पुरारेर्बलिमल्लसत्त्व जम्बीरनीरेण विमर्द्य भस्म ।
रसाङ्कजातेन दलेन युक्तं सर्वं ततो गोपयसा विमर्द्य ॥५०॥
खर्जूरमत्स्यण्डिकहंसपादी-द्राक्षेण रसेन गुडूचिकायाः ।
माषाद्रिकाकर्कटकश्चदन्ती-बीजैस्तदीयैः सलिलैर्विभाव्य ॥५१॥
ततो रसः सिध्यति वल्लमस्य युक्तः प्रमेहे सति शाल्मलीनाम् ।
मूलाम्बुना वा कुसुमाम्बुना वा दद्यात् पयोभक्तमतन्द्र योज्यम् ॥५२॥
क्षौद्रेण दुर्नाम्नि तथाऽश्मरीषु गवां पयोभिर्निखिलप्रमेहे ॥५३॥

कृष्णमूला कृष्णशारिवा । आखणी मुण्डिरी । हिमम् उशीरम् । काकजम्बूप्रसूनानां भूमिजम्बूपुष्पाणाम् । अत्र क्रमः,—कान्तादिचतुष्टयं किंशुकरसेन नाकुलीकषायेण च मर्दयित्वा मूषायां संस्थाप्य च वालुकायन्त्रे पचेत्, स्वाङ्गशीतञ्च तं समुद्धृत्य वातावर्तादिचूर्णं प्रत्येकं कान्तादिसमं तत्र मिश्रयित्वा काश्मर्यादीनां प्रत्येकं रसेन दिनमेकं विमर्द्य च माषद्वयमितां गुटिकां कुर्यात् । औषधसेवनानन्तरं नाकुलीचूर्ण-माषमात्रमनु धात्रीरसेनानुपिबेत् रात्रौ च केवलं धात्रीरसं पिबेदिति ॥ ४५—४९ ॥

बहुभावितप्रमेहारी—पुरारेर्वीर्यं पारदम् । बलिमल्लसत्त्वं नवनीताख्यं गन्धकम्, "आमलासार गन्धक" इति प्रसिद्धम् । "बल्लमल्लम्" इत्यत्र "अभ्रगल्लम्" इति पाठे—अभ्रसत्त्वकोऽत्र ग्राह्यः । भस्म इत्यस्य गन्धमित्यनेन सम्बन्धः । गोपयसा गव्यदुग्धेन । मत्स्यण्डिका "खण्डो रसो यः सम्पक्वो घनः किञ्चिद्द्रवान्वितः । मन्दं स्रवेत् स्यन्दते तस्मात् मत्स्यण्डी निगद्यते ॥" इत्युक्तलक्षणक फाणित "मात गुड" इति भाषा, कृष्णमत्र ग्राह्यम् । हंसपादी गोधापदी "गोयालिया" इति ख्यातम् । कर्कट-कर्कोटकः 'कांकरोल' इति भाषा । कच्छ जलकफलम् । खर्जूरादीनां यथायोग्यं रसेन क्वाथेन वा प्रत्येकं सप्त भावना देया इति । कुसुमाम्बुना इत्यस्यापि शाल्मलीनामित्यनेनैव सम्बन्धः । पयोभक्तकं वारिरहितमन्नम् ॥ ५०—५३ ॥

अथ उमाशम्भु ।—

रसाभ्रकौ तुल्यसमानभागौ जम्बीरनीरैस्त्रिदिनं विमर्द्य ।
कुर्वीत मूषां कुहरे निवेश्य वह्नौ ततस्तस्य पुटानि सप्त ॥५४॥
बीजाह्वमुष्काक्षयुगैश्चतस्रः स्युर्भावना द्वे ककुभा त्रिवारम् ।
यष्टीसिताकेतकजीररम्भा-खर्जूरिकाजातिदलैः प्रतिस्वम् ॥५५॥
एव हि सिद्धस्य रसस्य वल्लो मधुप्रयुक्त सहसा शिशूनाम् ।
सन्तापशोषौ बलहीनताञ्च तृषाञ्च वामासलिलैः प्रमेहान् ॥५६॥
निवर्त्तयेद्वासरसप्तकेन दुग्धौदन स्यादिह भोजनाय ।
नीरेण बब्बूलनवप्रवालान्निषेव्य तैः शर्करया समन्वितैः ॥५७॥
सर्वप्रमेहान् विनिहन्ति दत्तो दिनत्रयं विंशतिवत्सरस्य ।
अन्नं ससर्पिः ससित प्रयोज्य दिनानि सप्त त्रिगुणानि चात्र ॥५८॥
वरामधुभ्यां सहितस्य यस्य पञ्चाधिका वत्सरविंशतिः स्यात् ।
हैयङ्गवीनेन गवाञ्च पथ्यं त्रिःसप्तसङ्ख्यानि दिनानि कार्य्यम् ॥५९॥
प्रस्विन्नगोधूमरसेन हन्ति स त्रिंशदब्दस्य दिनत्रयेण ।
अन्नं ससर्पिः सगुडं हि देयं मध्विक्षुखण्डैस्त्रिदिन विधातुम् ॥६०॥

उमाशम्भौ—मूषा कुर्वीत मूषाबद्ध कुर्य्यादित्यर्थ । कुहरे गर्त्ते । बीजाह्व मातुलुङ्ग तस्य मूलम् । मुष्क मुष्कक, घण्टापाटला, "मुष्क" इत्यत्र "मुक्त" इति पाठान्तरम् । अक्षयुग अक्षद्वय, विभीतकबीज रुद्राक्षबीजञ्च ; यद्वा—अक्ष विभीतकबीज, युगम् ऋद्धिनामौषधम् । चतस्र इति एषा चतुर्णां पृथक् पृथक् क्वाथेन एकैकवार भावना दातव्या । ककुभा अर्जुनत्वचा द्वे, भावने दातव्ये इति योज्यम् । सिता दूर्वा । जातिदलै जातिपत्रै । प्रतिस्व स्व स्वमिति वाक्येन प्रत्येकमित्यर्थ त्रिवारमित्यनेन योज्यम । नीरेणेति ।—बब्बूलनवपल्लवान् बब्बोलस्य कोमलपत्राणि, आदौ बब्बूलकोमल-पत्राणि जलेन निषेव्य पश्चात शर्करायुक्तै तत्पत्ररसै सह दिनत्रय दत्त इत्यन्वय । विंशतिवत्सरस्य विंशतिवर्षवयस्कस्य पुस इत्यर्थ, विंशतिवत्सरोत्थि-तान् प्रमेहानिति वा अर्थ , एव पञ्चविंशतिवर्षादावपि बोध्यम् । दिनानि सप्त त्रिगुणानि एकविंशतिदिनानीत्यर्थ,, अन्न प्रयोज्यमित्यनेनान्वय. । वरा त्रिफला ।

अङ्गानि सम्यग्विनिदाघसङ्ग-गतानि खानि स्फुटन ददीत ।
चिञ्चागुडाभ्या युतमन्नमस्मिन् द्राक्षादिनीरेण विमिश्रित' सन्॥६१॥
दिनत्रय लङ्घनज विशोष विनाशयेद्गोस्तनिकासिताभ्याम्॥६२॥
पथ्यं देयमुमाशम्भौ वासुदेवेन निर्मिते ।
पातु जगन्ति कृपया मेहध्वान्तविवस्वति ॥ ६३ ॥

अथ नागसूतयोग ।—

नाग कपालमध्ये क्षिप्त्वा चाग्निं विशोधयेत् क्रमशः ।
चिञ्चाकवचक्षारं स्वल्पं स्वल्पं विकीर्य्य कुन्तलेन ॥६४॥
भागं पारदसीस घृष्ट्वा घृष्ट्वा विचूर्णितं सम्यक् ।
तिलमानमादिमधुना तरवटबीजेन मिश्रित क्रमशः ॥
मेहगणार्त्तिविनाश सपिटकं कुष्ठमनिलञ्च ॥ ६५ ॥

हैयङ्गवीनेन सद्य कृतेन घृतेन । प्रस्विन्नगोधूमरसेन गोधूमक्वाथेन । मध्वित्यादि ।— विनिदाघसङ्गगतानि प्रबलग्रीष्मपीडितानि अङ्गानि तथा खानि स्रोतांसि च सम्यक् विधातु स्वस्थानि कर्त्तुमित्यर्थ', तथा स्फुटन दोषरुद्धस्रोतसा विकासन, विधातुमिति शेष, मध्विच्छुखण्डे विदिन ददीत इत्यन्वय । चिञ्चा तिन्तिडी । अस्मिन् एतदौषधसेवनकाले । द्राक्षादिनीरेण इत्यत्र आदिपदेन खर्ज्जूरपरूषकादीना ग्रहणम्, द्राक्षादिक्वाथेन विमिश्रित, एष योग इति शेष, दिनत्रय दत्त सन् लङ्घनज विशोष विनाशयेदित्यन्वय । वासुदेवेन कृपया जगन्ति पातु निर्मिते मेहध्वान्तविवस्वति मेहरोगतिमिरनाशनसूर्य्यस्वरूपे उमाशम्भौ तदाख्ये अस्मिन् योगे गोस्तनिकासिताभ्या पथ्य देयमिति ॥ ५४—६३ ॥

नागसूतयोगे—कपालमध्ये खर्परमध्ये । चिञ्चाकवचक्षार चिञ्चा तिन्तिडी, कवच भूर्जत्वक् तयो क्षार, तिन्तिडीत्वक्कृत क्षार वा । कुन्तलेन दर्व्या इत्यर्थ । पारदसीस पारदेन सह सीसक, कथितप्रक्रियया भस्मीभूत सीसक पारदञ्च भाग समभाग गृहीत्वा कुन्तलेन सम्यक् घृष्ट्वा घृष्ट्वा विचूर्णितमित्यन्वय कार्य्य, अत्र खर्परमध्ये पारददानोक्त्यभावेऽपि "भाग पारदसीस कुन्तलेन घृष्ट्वा घृष्ट्वा विचूर्णित सम्यक्" इति वाक्यबलात नागभस्मकाले पारदमपि तत्सम खर्परे देयम् इति बोद्धव्यम् । तिलमानम् एव सिद्धस्यौषधस्य तिलप्रमाणम् । आदिमधुना पुराण-मधुना इत्यर्थ, तिलमानमादि तिलमानप्रभृति, तिलप्रमाणमारभ्येत्यर्थो वा ।

अथ कान्तादिगुडिका।—

कान्ताभ्रमण्डूरहरीतकीनां विचूर्णितानां क्रमशः शराशम्।
रसेन भूतांशमथो दशांशं द्वात्रिंशदष्टोत्तरमुत्तमायाः ॥६६॥
श्लक्ष्णं मर्द्दित्वा गुडिकां विधाय तक्रेण पीतं तलपोटकस्य।
वीजञ्च तेषां द्विगुणं प्रकल्प्य मेहामयानाशु जयेत् प्रमेही ॥६७॥

अथ कासीसादिमोदकम्।—

कासीसं कृष्णनागं क्षितिधररुधिरं नीलमभ्रं सुकान्तं
हैमाङ्गं भूमिसारं सलिलरिपुदलं मेहतिष्यारिवीजम्।
गोरेखा चारिमेदं क्षितिरुहसहितं श्वेतगुञ्जाङ्घ्रिवीजं
कापित्थास्त्ग्विमिश्रं क्षितिफलसहितं रोहिणी चाक्षमिश्रम् ॥६८॥
सर्वं सम्पिष्य तोये करिविजयभुवा मोदकानक्षमात्रान्
कुर्य्यात्तक्रेण देयं क्षपयति निखिलं मूत्ररोगं चिरात्तात्।

तरवटवीजेन आहुल्याख्यक्षुपविशेषस्य वीजेन। क्रमशः क्रमवर्द्धितमित्यर्थः। सपिटक पिडकासहितम् ॥ ६४।६५ ॥

कान्तादिगुडिकायां—कान्तादीनां क्रमशः शराश पञ्चांश, रसेन इत्यत्र मितमंश-मिति शेषः, षडंशमित्यर्थः, भूतांश पञ्चभागम्, एवं कान्तचूर्णस्य पञ्च भागाः, अभ्रस्य षड्भागाः मण्डूरस्य पञ्च भागाः हरीतक्याश्च दश भागा ग्राह्याः। द्वात्रिंशदिति।— उत्तमायाः त्रिफलायाः, मेहहन्तृत्वात् उत्तमाशब्देनात्र त्रिफला एव ग्राह्या, द्वात्रिंशदष्टोत्तरं चत्वारिंशत् भागाः। तलपोटकस्य तन्नाम्ना प्रसिद्धस्य। तेषां समुदितकान्तादिचूर्णानाम् ॥ ६६।६७ ॥

कासीसादिमोदके—कृष्णनागं कृष्णं नीलाञ्जनं तेन सह नागं सीसकम्। क्षितिधररुधिरं गैरिकम्। नीलमभ्रं कृष्णाभ्रम्। सुकान्तं कान्तलौहम्। हैमाङ्गं चम्पकः तस्य त्वक्। भूमिसारम् आस्फोता अतिमुक्तकलता वा। सलिलरिपुदलं कुम्भिकपत्रं "पाना" इति भाषा। मेहतिष्यारिवीजं मेहः अञ्जीरः "पेयारा" इति प्रसिद्धः, तिष्यः आमलकम्, अरिः खदिरविशेषः तेषां वीजम्। गोरेखा "गोजी" इति प्रसिद्धम्। अरिमेदं विट्खदिरः। क्षितिरुहसहितं श्वेतगुञ्जा-ङ्घ्रिवीजं सपवनालं श्वेतगुञ्जाया मूलं वीजञ्च। कापित्थास्त्क् कपित्थफलमज्जा। क्षितिफलसहितं भूमिजम्बूसहितम्। रोहिणी कटुका। अक्षमिश्रं विभीतकयुतम्।

सप्ताहात् कल्पनाशं त्वपमतिबहुला हन्ति पञ्चादिघन्ते
मासात् सर्वाङ्गवृद्धिं मुनिभिरभिहितो मेहिना गुह्ययोगः ॥६९॥

अथ भीमपराक्रमः ।—

तुल्याभ्यां रसगन्धाभ्यां कृत्वा कज्जलिकां त्र्यहम् ।
द्रावयित्वाऽऽयसे पात्रे मृदुना वदराग्निना ॥७०॥
निरुत्थमष्टमांशेन सीसभस्म विनिक्षिपेत् ।
सम्मिश्रं कदलीपत्रे निक्षिप्य तदनन्तरम् ॥७१॥
आकृष्य परिपिष्ट्वाऽथ सीसभस्मप्रमाणतः ।
कान्ताभ्रसत्त्वयोर्भस्म राजावर्त्तकभस्म च ॥७२॥
परिशुद्धञ्च गोमूत्रे शिलाधातुं निधाय च ।
खल्ले निक्षिप्य तत् सर्वं यत्नेन परिमर्दयेत् ॥७३॥
तुल्यगुञ्जाकुलीवीज-चूर्णकल्कोत्थवारिणा ।
कतकाङ्कुकषायेण निम्बपत्ररसेन च ॥७४॥
ततः संशोष्य सञ्चूर्ण्य क्षिप्त्वा लोहस्य भाजने ।
त्रिफलानां कषायेण सप्तधा परिभावयेत् ॥७५॥

करिविजयभुवा करिविजयः नागदमनाख्यः क्षुपः शिवलिङ्गी लता वा तद्भवा तदुत्थचूर्णेन । अत्र काशीशादीनां करिविजयान्तानां सर्वेषां समभागः, किञ्च शर्करायाः उल्लेखाभावेऽपि मोदकपदसामर्थ्यात् सर्वचूर्णात् द्विगुणशर्करया मोदकः कल्पनीयः । कल्पनाशं कल्पते अनेन इति व्युत्पत्त्या कल्पः मनः, मनोविकार इत्यर्थः, तस्य नाशं लिङ्गनाशमिति वा, "कल्कानाशम्" इति पाठे—पुरीषसङ्ग्रहमित्यर्थः ॥ ६८।६९ ॥

भीमपराक्रमे—निरुत्थं सम्यक् मृतम् । अष्टमांशेन इति कज्जलीभूतयोः रसगन्धयोरपेक्षया । शिलाधातुं शिलाजतु । अत्र कान्तादिशिलान्तानां चतुर्णां प्रत्येकं सीससाम्यं बोद्धव्यम् । तुल्येति ।—आकुलीवीजं देशान्तरे प्रसिद्धम्, कोकिलाक्षवीजमिति केचित्, तुल्ययोः गुञ्जाकुलीवीजयोः चूर्ण एव कल्कौ, "अत्यन्तशुष्कं यद्द्रव्यं सुपिष्टं वस्त्रगालितम् । तत् स्याच्चूर्णं रजः चोदस्तन्मात्रा कर्षसम्मिता" इत्युक्त्या चूर्णस्यापि कल्करूपत्वात्, न तु "द्रव्यमार्द्रं शिलापिष्टम्" इत्यादिरूपः, तत्तुल्यवारिणा

आकुलीबीजबर्बूर-निर्य्यासौ भृष्टचूर्णितौ ।
समौ रससमौ कृत्वा रसेन सह मर्दयेत् ॥७६॥
इति सिद्धरसः सोऽयं भवेद्भीमपराक्रमः ।
नामतः सर्वमेहघ्नो दृष्टप्रत्ययकारकः ॥७७॥
वल्लद्वयमितो ग्राह्यो जलैः पर्य्युषितैः सह ।
पथ्यं मेहोचितं देयं वर्ज्यं सर्वं विवर्जयेत् ॥ ७८ ॥

अथ सञ्जीवन ।—

पलमात्रं रसं शुद्धं वरनागसमन्वितम् ।
निक्षिप्य पातनायन्त्रे त्रिंशद्वाराणि पातयेत् ॥ ७९ ॥
समाहरेद्रसं सम्यक् पातनायन्त्रके मृतम् ।
मृते रसे क्षिपेत्तुल्यं भूपालावर्त्तभस्मकम् ॥ ८० ॥
निरुत्थं त्रपुभस्मापि निक्षिपेदष्टमांशतः ।
ततो निम्बदलद्रावैस्त्रिंशद्वारं हि भावयेत् ॥
ततः संशोष्य सञ्चूर्ण्य क्षिपेद्वरकरण्डके ॥८१॥
सञ्जीवनोऽयं खलु वल्लमानो निशाकुलीचूर्णयुतः सतक्रः ।
निहन्ति सर्वानपि मेहरोगान्नृणां नितान्तं कुरुते क्षुधाञ्च ॥८२॥

अथ मेहमर्दन ।—

शुद्धसीसोद्भवं भस्म निर्य्यूढं व्योम्नि सप्तधा ।
ततो विचूर्ण्य तन्मध्ये कान्तभस्म समं क्षिपेत् ॥८३॥

चूर्णालोडितजलेन । कतकं जलप्रसादनफलं तस्य अङ्कुरकषायेण मूलक्वाथेन । बर्बूरनिर्य्यास बब्बीलनिर्य्यास । समौ रससमौ इति उभयोर्मिलित्वा रससमौ तुल्यौ । पर्य्युषितैः निशोषितैः ॥ ७०—७८ ॥

सञ्जीवने—रसनागयोर्मिलित्वा पलमात्रम् । वरनागसमन्वितम् अष्टमाध्यायोक्त-लक्षणकान्तनागविशेषसहितम् । पातनायन्त्रे "अष्टाङ्गुलपरिणाहम" इत्यादिना नवमाध्यायोक्ते । तुल्यं मृतरससमानम् । भूपालावर्त्तभस्मकं राजावर्त्तभस्म । त्रपुभस्म वङ्गभस्म । अष्टमांशतः इति मृतरसापेक्षया बोध्यम् । वरकरण्डके उत्तम-भाजने ॥ ७९—८२ ॥

गोमूत्रकशिलाधातु-द्रवेण परिमर्दयेत् ।
शोषयित्वा विचूर्ण्याथ क्षिपेन्नागकरण्डके ॥८४॥
मेहमर्दननामाऽयं दिष्टो भालुकिना खलु ।
गुञ्जाद्वयमितो देयो निम्बामलकसंयुतः ॥८५॥
निहन्ति सकलान् मेहान् सर्वोपद्रवसंयुतान् ।
तत्तद्रोगहरैर्द्रव्यैः सर्वरोगनिवर्हणः ॥
रोगानुरूपं दातव्यं पथ्यमत्र यथोचितम् ॥ ८६ ॥

अथ रामबाणरसः ।—

त्रपुणा निहतं तारं स्वर्णं नागहतं तथा ।
मृतसूतं तयोस्तुल्यं मर्दयेद्दिवसत्रयम् ॥८७॥
आकुलीमूलजैः क्वाथैः शोषयित्वा मुहुर्मुहुः ।
ताप्यवैक्रान्तराड्वर्त्त-भस्म सर्वसमं क्षिपेत् ॥८८॥
विमर्द्य बलिना सर्वं षोढा तुषपुटैः पचेत् ।
आकुलीबीजबर्बूर-क्वथितैर्भावयेत्त्रिधा ॥८९॥

मेहमर्दने—निर्व्यूढं निक्षिप्तं, मिश्रितमित्यर्थः । व्योम्नि अभ्रे । सप्तधा इति पदं भस्म इत्यनेन सम्बध्यते, ततश्च सप्तकृत्वः कृतं शुद्धसीसोद्भवं भस्म इत्यन्वयः, शुद्धसीसकं सप्तवारान् भस्मीकृत्य अभ्रेण सह मिश्रयित्वा इत्यर्थः । गोमूत्रकशिलाधातुद्रवेण गोमूत्रगन्धिशिलाजतुक्वाथेन । नागकरण्डके सीसकभाजने, हस्तिदन्तनिर्मितभाजने वा । दिष्टः उपदिष्टः ॥ ८३—८६ ॥

रामबाणरसे—त्रपुणा निहतं तारं वङ्गेन सह मारितं रौप्यम् । नागहतं स्वर्णं सीसकेन सह पुटितं स्वर्णम् । मृतसूतं रससिन्दूरम् । ताप्यं स्वर्णमाक्षिकम् । राड्वर्त्तं राजावर्त्तं । सर्वसमं तारादीनां त्रयाणां तुल्यं मिलितताप्यादित्रयम्, तेन तारस्वर्णयोः प्रत्येकं माषषट्कं रससिन्दूरस्य सार्द्धतोलकं ताप्यादीनाञ्च प्रत्येकं तोलकमानम् इति । बलिना गन्धकेन, मृतसूततुल्येन इत्यर्थः, सह इति शेषः । षोढा षड्वारान् । तुषपुटैः तुषकृतैः पुटैः, "गोवरैर्वा तुषैर्वापि पुटं यत्र प्रदीयते । तद्गोवरपुटं प्रोक्तं रसभस्मप्रसिद्धये ॥" इति लक्षणे तुषपुटस्य विशेषत्वेन ग्रहणाभावेऽपि तुषैर्वाऽपि इति वा-शब्दप्रयोगसामर्थ्यात् यत्र गोवरेण पुटं दीयते तत्र

त रसं परिचूर्ण्याथ स्थापयेत् कूपिकोदरे ।
गुडूचीसत्त्वसंयुक्तो वल्लतुल्यो रसस्त्वयम् ॥९०॥
निहन्ति सकलं मेहं मोहं ध्यात इवेश्वरः ।
बाणवद्रामचन्द्रस्य सज्जनस्येव भाषितम् ॥
न याति जातु मेहित्वं रामबाणो रसोत्तमः ॥ ९१ ॥

अथ राजमृगाङ्क ।—

सुवर्णं रजतं कान्तं ताम्रं त्रपु समीसकम् ।
भस्मीकृत्वा च तत् सर्वं क्रमवृद्ध्या कृतांशकम् ॥९२॥
व्योमसत्त्वभवं भस्म सर्वैस्तुल्यं प्रकल्पयेत् ।
कज्जलीं सूतराजस्य सर्वैरेतैः समांशिकाम् ॥९३॥
प्रद्राव्य लौहभस्माथ पूर्वभस्म विनिक्षिपेत् ।
काष्ठेनाऽऽलोड्य तत् सर्वं सद्रवं हि समाहरेत् ॥९४॥

गोवरयोगात गोवरपुट, यत्र च तुषेण पुट दीयते तत्र तुषयोगात तुषपुटमिति मन्तव्यम्। गुडूचीसत्त्व गुडूचीसारम। मोहमिति।—ध्यात चिन्तित स्मृत ईश्वर मोहमिव, ईश्वरध्यानेन यथा मोहो नश्यति, तथा रसोऽय सकल मेह निहन्ति। "मोहध्वान्तमिवेश्वर" इति पाठे—ईश्वर शङ्कर मोहध्वान्तमिव अज्ञानान्धकार यथा निहन्ति तथा इत्यर्थ, "ज्ञानमिच्छेत्तु शङ्करात्" इति वचनेन शङ्करस्य ज्ञानप्रदत्वात अज्ञानान्धकारनाशकत्व बोद्धव्यम्। बाणवदिति।—रामचन्द्रस्य बाणो यथा महावीर्य्य सज्जनस्य भाषित वचन यथा नासत्य तथा महावीर्य्य सत्यप्रयोगश्च अय रसोत्तम रामबाण, सेवितश्चेदिति शेष, तदा स जन जातु मेहित्व न याति मेहरोग न प्राप्नोति॥ ८७—९१॥

राजमृगाङ्के—क्रमवृद्ध्या कृतांशकम् उत्तरोत्तर भागवृद्धियुतम, एवञ्च सुवर्णस्य एक रजतस्य द्वौ कान्तस्य त्रय इत्यादिरीत्या इत्यर्थ। व्योमेति।—अभ्रसत्त्वभस्मन एकविंशतिभागा ग्राह्या। कज्जली सूतराजस्य इत्यत्र गन्धकस्य उल्लेखाभावेऽपि कज्जलीपदप्रयोगसामर्थ्यात् तुल्याभ्या रसगन्धाभ्या कृता कज्जलीति मन्तव्यम्। सर्वैरेतै सुवर्णादिव्योमभस्मान्तै सर्वै, तेन कज्जल्या द्वाचत्वारिंशद्भागा बोद्धव्या। अयमर्थ,—रसपर्प्पटीविधानेन आदौ कज्जली द्रवीकृत्य तत्र पूर्व लौहभस्म निक्षिप्य काष्ठदण्डेन किञ्चिदालोडयेत्, अनन्तर सुवर्णादीना भस्म तत्र दत्त्वा द्रवीभूतमेव तत् सर्व पुनरपि काष्ठ-

ततो विचूर्ण्य तत् सर्वं सप्तवार विभावयेत् ।
आकुलीबीजसम्भूत-क्वाथलेहेन यत्नत ॥९५॥
रुद्धं तन्मल्लमूषाया सर्वं संस्वेदयेच्छनैः ।
इति सिद्धो रसेन्द्रोऽय चूर्णित पटगालितः ॥९६॥
कान्तपात्रस्थिते रात्रौ जलैस्त्रिफलसयुतैः ।
वल्लद्वयमितः प्रातर्दातव्यो मेहरोगिणाम् ॥९७॥
मृगचारिमुनीन्द्रेण मेहव्यूहविनाशनः ।
निर्दिष्टोऽयं रसो राज-मृगाङ्क इति कीर्त्तितः ॥९८॥
दीपनः पाचनो वृष्यो ग्रहणीपाण्डुनाशनः ।
तापघ्नो रुचिकृत् सर्व-रोगघ्नो योगसंवृतः ॥९९॥

अथ मेहहर ।—

राजावर्त्तस्य रत्नस्य भस्म गन्धकसाधितम् ।
हतश्च भस्मना तेन घनसत्त्वश्च कान्तकम् ॥१००॥
निहतं तेन सूतश्च तत्तन्मारणकैः सह ।
सत्त्वतुल्येन सूतेन तावता गन्धकेन च ॥१०१॥

दण्डेनालोड्य च कदलीपत्रोपरि सम्पात्य पर्पटीविधिना पचेत्, ततो विचूर्ण्य विभावयेदिति। आकुल्यत्र क्वाथलेहन लेहीभूतन क्वाथेन रसक्रियारूपेणेत्यर्थ । मल्लमूषाया "निर्दिष्टा मल्लमूषा या मल्लद्वितयसम्पुटात। पर्पट्यादिरसादीना स्वेदनाय प्रकीर्त्तिता॥" इत्युक्तलक्षणे शरावद्वयकृते मूषाविशेषे शनै. सस्वेदयेत् मृदुवह्निना पाचयेत् ॥ ९२—९९ ॥

मेहहरे—राजावर्त्तस्य भस्म इति गन्धकेन सह पिष्ट मारितस्य राजावर्त्त इत्यर्थ । तेन भस्मना राजावर्त्तभस्मना। तेन अभ्रसत्त्वभस्मना कान्तभस्मना च। तत्तन्मारणकैः पूर्वोक्तरसमारकै । सत्त्वतुल्येन अभ्रसत्त्वतुल्येन। तावता तत्परिमितेन। पञ्चाढकमितैः चत्वारिंशच्छरावपरिमितै । अयमर्थ ,—आदौ गन्धकेन सह राजावर्त्तं भस्मीकुर्यात्, तत भस्मीभूतेन तेनैव राजावर्त्तेन समम् अभ्रसत्त्वं कान्तलौहञ्च पृथक् पृथक् मर्दयित्वा भस्मीकृत्य च स्थापयेत। अथ तेनैव अभ्रसत्त्वभस्मना लौहभस्मना यथाप्राप्तेन रसमारकद्रव्यगणेन च पारद सम्मर्द्य भस्मीभूत कुर्यात्। तत. उक्तरीत्या हत सूतम्

कज्जल्या कृतया सार्द्धं पूर्वभस्म नियोजयेत्।
त्रिदिनं मर्दयित्वा तु मूषायां विनिरुध्य च ॥१०२॥
पश्चाढकमिते शालि-तुषैश्च पुटमाचरेत्।
स्वाङ्गशीतं समाहृत्य भावयेत्तदनन्तरम् ॥१०३॥
आकुलामूलबर्बूर-बीजगुञ्जाजटोद्भवैः।
कषायैरष्टवाराणि पटचूर्णं विधाय तत् ॥१०४॥
विनिक्षिपेत् करण्डान्ते यत्नेन स्थापयेत्ततः।
तन्मेहहरैर्द्रव्यैः संयुक्तो रसराडयम् ॥१०५॥
निहन्ति सकलान् रोगान् दुरात्मोपकृतीरिव।
अयं हि सर्वरोगघ्नो भेषजेषु प्रशस्यते ॥१०६॥
धार्मिकेष्विव सर्वेषु दयावानिव मानवः।
रसोऽयं नन्दिना दिष्टः प्रकृष्टो मेहहारिषु ॥ १०७ ॥

अथोदयभास्करः।—

पारदं भागमेकन्तु गन्धकं टङ्कणं तथा।
अभ्रकं लोहमेवन्तु भागमेकं पृथक् पृथक् ॥१०८॥
शिलाधातुस्तथा भागमम्लवेतसभागकम्।
कट्फलं भागमेकन्तु वङ्गेन सह योजयेत् ॥१०९॥
रसञ्च पञ्चमूत्रेण दिनानि त्रीणि मर्दयेत्।
सर्वमेकत्र संयोज्य जम्बीररससंयुतम् ॥११०॥

अभ्रसत्त्वतुल्यं गृहीत्वा समेन गन्धकेन कज्जलीं कुर्य्यात्, अनन्तरं तयाकृतं राजावर्त्तादीनां भस्म प्रत्येकं समभागं कज्जल्या सह दिवसत्रयमामर्द्य मूषाबद्धं कृत्वा च तुषपुटे पचेत्, स्वाङ्गशीतञ्च तं गृहीत्वा आकुलीमूलादीनां प्रत्येकं क्वाथेन अष्टौ वारान् भावयेत्, ततः संशोष्य सञ्चूर्ण्य च वस्त्रपूतं कृत्वा स्थापयेदिति ॥ १००—१०७ ॥

उदयभास्करे—वङ्गेन इत्यत्र भागेकेन इति शेषः। पारदादीनां मिश्रणक्रमः माह, रसमिति।—पञ्चमूत्रेण "गवामजानां मेषीणां महिषीणाञ्च स्त्रियम्।

मर्दयेद्दिनचत्वारि खल्लके बुद्धिमान् भिषक् ।
मूषिकालेपनं कुर्य्यात् मासीगोक्षुरसंयुतम् ॥१११॥
मर्दयेच्च यथायोग्यं दिनानामेकविंशतिं ।
पुटमध्ये परिस्थाप्य कुक्कुटीमात्रके दहेत् ॥११२॥
शीतलं तं समादाय भावयेच्च यथाक्रमम् ।
कुमारीचित्रकव्याघ्र-जातीफलह्रियावलीम् ॥११३॥
विषमुष्टिं नखञ्चाम्ल-वेतसं परिमर्दयेत् ।
शोषं कृत्वा यथायोग्यं दिनमेकं पृथक् पृथक् ॥११४॥
तं सिद्धं वल्लमात्रन्तु दापयेत् बुद्धिमान् भिषक् ।
मेहस्य मधुना युक्तः प्रयोज्यो भिषजां वरैः ॥११५॥
शर्करार्द्रकसंयुक्तं रक्तपित्ते प्रयोजयेत् ।
त्रिंशद्दिनानि दातव्यं शूले च त्रिफलाजलैः ॥११६॥
मधुना चातिसारस्य श्वासकासस्य शर्करा ।
क्षीरेण चाग्निमान्द्यस्य तैलकाञ्जिकसंयुतः ॥
सिद्धनाथेन सम्प्रोक्तो नाम्ना ह्युदयभास्करः ॥११७॥

मूत्रेण गर्दभीणाञ्च तन्मतं मूत्रपञ्चकम् ॥" इत्युक्तेन मूत्रपञ्चकेन । कुक्कुटीमात्रके पुटमध्ये "पुटं भूमितले यत्तु वितस्तिद्वितयोच्छ्रयम् । तावच्च तलविस्तीर्णं तत् स्यात् कुक्कुटकं पुटम् ॥" इत्युक्तलक्षणे कुक्कुटपुटे । ह्रियावलीम् अम्ल-वेतसञ्च इत्यनयोर्द्वन्द्वः इति शेषः, "ह्रियावलीम्" इत्यत्र "हिमावलीम्" इति पाठः साधुः, तच्च प्रागेव प्रदर्शितम् । शकराद्रकसंयुक्तं शर्करापानीयमिश्रितमित्यर्थः, नात्र आर्द्रकशब्देन आर्द्रकशृङ्गवेरं अभिहितं, रक्तपित्तविरोधित्वात् । श्वासकासस्य क्षीरेण सह शर्करा, अनुपानं दातव्यमिति योजनीयम् । अथ क्रमः,—रसं दिवसत्रयं पञ्चमूत्रेण मर्दयित्वा प्रत्येकं च गन्धकेन सह कज्जलीं कुर्य्यात्, ततः टङ्कणादिकं तत्र मेलयित्वा जम्बीररसेन दिनचतुष्टयं मर्दयेत्, अनन्तरं मासीगोक्षुरक्काथेन एकविंशतिदिनानि शनैर्मर्दयित्वा तेनौषधेन मूषोदरमालिप्य कुक्कुटपुटे पचेत्, ततः स्वाङ्गशीतं समुद्धृत्य कुमार्य्यादीनां पृथक् पृथक् रसैः क्काथैर्वा एकमेकं दिनं मर्दयित्वा वल्लमानां वटीं कुर्य्यात् ॥ १०८—११७ ॥

अथ मेहकुठार ।—

पिष्ट्वा कार्पासतक्रे रसधरणयुग्मा तुल्यनाग कपित्था-
न्निर्य्यास पञ्चनिष्क निहितशतजलारातिवीजञ्च पश्चात् ।
कृत्वा पिण्डानि तेन प्रतिदिनमथ तत् पिण्डमेकं कपित्था-
न्निर्य्यास पादनिष्क मथितमधुयुतं मेहजालं रुणद्धि ॥११८॥

अथ हिमांशु ।—

रसस्य कर्षमादाय खल्ले निक्षिप्य बुद्धिमान् ।
रक्तागस्त्यप्रसूनस्य स्वरसेन विमर्दयेत् ॥११९॥
सप्तवारं तथा साधु श्वेतदूर्वारसेन च ।
निष्कद्वय टङ्कणञ्च कर्षं खादिरसारतः ॥१२०॥
कर्पूरं रसतुल्यञ्च सर्वमेकत्र मर्दयेत ।
यावच्चिक्कणता याति युक्त्या चन्दनवारिणा ॥१२१॥
हरेणुमात्रान् वटकांश्छायाया परिशोषितान् ।
प्रात· प्रातश्च सेवेत मध्याह्ने च विशेषतः ॥१२२॥
निशायाञ्च विशेषेण सेवनीयाः प्रयत्नतः ।
एतद्धि मेहनुद्द्रव्यं मुखशोषहर परम् ॥
सोमरोगहर सर्व-पिटिकानाशन परम् ॥१२३॥

मेहकुठारे—कार्पासतक्रे कार्पासेन सहित तक्र तस्मिन् कार्पासपुष्पस्वरसे तक्रे चेत्यर्थ । रसधरणयुग्मा धरण शाण पलदशमांशो वा, रसस्य धरणद्वया धरणद्वयेण । कपित्थान्निर्य्यास कपित्थमज्जा, तच्च पञ्चनिष्कमितं ग्राह्यम् । निहितेति ।—निहित निक्षिप्त शत शतगुडक जलारातिवीज जडारातिवीज, डलयोरैक्यात् जडारातिवीज-मित्यर्थ, शतसङ्ख्यक कपिकच्छुवीजम् आमलक वा, रसायनत्वेन मेहनाशित्वेन च जाड्यापहत्वादित, यद्वा—जलाराति कुम्भीक “पाना” इति भाषा, तस्य वीजम् । पादनिष्क निष्कचतुर्थांश, पादनिष्क तत्पिण्डमेकम् इत्यन्वय । कापित्थनिर्य्यासस्यापि पादनिष्कत्व बोद्धव्यम् । मथितमधुयुत सतक्रमधुसंयुतम् ॥ ११८ ॥

हिमांशौ—रक्तागस्त्यप्रसूनस्य रक्तवर्णवकपुष्पस्य । चन्दनवारिणा घृष्टचन्दना

अथ वसन्तकुसुमाकरः।—

द्विभागौ हेमभूतेश्च गगनञ्चापि तत्समम्।
लोहस्य च त्रयो भागाश्चत्वारो रसभस्मनः ॥१२४॥
वङ्गभस्म त्रिभागं स्यात् सर्वमेकत्र कारयेत्।
प्रवालं मौक्तिकञ्चैव रससाम्येन योजयेत् ॥१२५॥
भावना गव्यदुग्धेन इक्षवामाररसेन च।
हरिद्रावारिजेनैव मोचाकन्दरसेन च ॥१२६॥
शतपत्ररसेनैव मालत्याः कुसुमेन च।
उशीरद्वयनीरेण सप्त सप्त च सङ्ख्यया ॥१२७॥
पश्चात् मृगमदा भाव्य सुसिद्धो रसराड् भवेत्।
कुसुमाकरविख्यातो वसन्तपदपूर्वकः ॥१२८॥
गुञ्जामात्रं ददीतास्य मधुना सर्वमेहजित्।
क्षयकासतृषाश्वास-रक्तपित्तविषार्त्तिजित् ॥
सिताचन्दनसंयुक्तश्चाम्लपित्तादिरोगनुत् ॥१२९॥

अथ मेहहरः।—

पारदभस्मशिलाजतुकृष्णा-लोहमलत्रिफलाकुलिबीजम्।
ताप्यनिशारजकोपलकान्त-व्योषरजः खपुरस्य कपित्थात् ॥१३०॥

लोडितोदकेन चन्दनचूर्णमिश्रितोदकेन वा चन्दनक्वाथेन वा। हरेणुमात्रान् कलायमानान् ॥ ११९—१२३ ॥

वसन्तकुसुमाकरे—हेमभूते स्वर्णभस्मनः। गगनम् अभ्रम्। रसभस्मनः रससिन्दूरस्य। रससाम्येन रससिन्दूरतुल्येन। हरिद्रावारिजेनैव हरिद्रारसेन तथा वारिजेन रसेन बालकक्वाथेन। मोचाकन्दरसेन कदलीमूलरसेन। शतपत्ररसेन पद्मपुष्परसेन। उशीरद्वयनीरेण उशीरद्वयं स्वल्पबृहत्त्वभेदात् द्विविधं वीरणमूलं तन्नीरेण तत्क्वाथेन ॥ १२४—१२९ ॥

मेहहरे—कृष्णा कृष्णजीरकम्। रजकं रञ्जकं काम्पिल्लकं इत्यर्थः। उपलं मनःशिला। कान्तं कान्तलौहम्, उपलकान्तं इति समस्तपदं वा, तथात्वे कान्तपाषाणं इत्यर्थः। खपुरं गुवाकं, अस्य वृक्षस्य मस्तकं ग्राह्यं, मेहहरत्वात्।

सर्वमिद परिचूर्ण्य समाश भावितभृङ्गरसं दिवसादौ ।
विंशतिवारमिदं मधुलेह विंशतिमेहहर हरिदृष्टम् ॥१३१॥

अथ मेहारि ।—

सूतं बाहुमित बलिं शशिमितं सम्मर्द्य तत् कज्जलीं
कृत्वा कृष्णहिरण्यतोयसहिता सम्मर्द्य घस्र पुन॰ ।
कूप्यामभ्रककालिका सुपिहिता मृत्स्नांशुकै सप्तभिः
संवेष्ट्य त्रिदिन विशोष्य लवणापूर्णे चिपेद्भाण्डके ॥१३२॥
दग्ध्वा यामचतुष्टये तु शिशिरा भित्त्वा च ता कूपिकां
त सूतं द्विलव लवञ्च गगन लोहं लव मर्दयेत् ।
सिद्धो वल्लमित मिता च मधुना वत्सादनीसत्त्वतो
नो चेत् चौद्रकषायुतश्च तरसा सर्वप्रमेहान् जयेत् ॥१३३॥
रोगाधीश्वरपाण्डुकामलहरिद्राभत्वपित्ताङ्गवान्
सर्वांश्च प्रदरामयान् विजयते मेहारिनामा रस ॥१३४॥

कपित्थात इत्यत्र मज्जा इति शेष । भावितभृङ्गरस भावित भृङ्गरसो यत्र तत्, इदमित्यस्य विशेषणम्, विंशतिवारमित्यस्य भावितभृङ्गरसमित्यनेन सम्बन्ध । दिवसादौ इति पद मधुलेहमित्यनेन सम्बध्यते, मधुलेह मधुना लिहन् लिहन्नित्यर्थ । "हरिदृष्टम्" इत्यत्र "परिदृष्टम्" इति युक्त पाठ । "हरदिष्टम्" इति पाठे— हरेण उपदिष्टमित्यर्थ ॥ १३०।१३१ ॥

मेहारौ—बाहुमित भागद्वयमित्यर्थ । शशिमितम् एकभागम । कृष्णहिरण्य तोयसहिता कृष्णधुस्तूररससहिताम् । घस्र दिनम । अभ्रककालिका कृष्णाभ्रखण्डम् । मृत्स्नांशुकै सप्तभि सप्तभि मृल्लिप्तवस्त्रखण्डे । यामचतुष्टये चतुष्प्रहराभ्यन्तरे । त सूतम् उक्तप्रकारेण भस्मीभूत सूत द्विलव लव चतुर्थोऽश तद्द्वयम्, उक्तप्रकारेण भस्म-सूतस्य अर्द्धमित्यर्थ । लवञ्च गगन सूताच्चतुर्थांशम् अभ्रकम । वल्लमित रक्तित्रयमितो रस । वत्सादनीसत्त्वत गुडूचीशर्करात गुडूचीरसतो वा । कज्जली कृष्णधुस्तूर-पत्ररसेन एकदिन मर्दयित्वा कूपिकाया सस्थाप्य च कृष्णाभ्रखण्डेन कूपिकामुख रुन्ध्यात, तत सप्तभि मृल्लिप्तवस्त्रखण्डै कूपिका ता सवेष्ट्य त्रिदिनम् आतपे शोषयित्वा च लवणयन्त्रे चतु.प्रहर पचेत् । तत स्वाङ्गशीता ता कूपिका भङ्क्त्वा

अथ मेहवद्ररसः ।—

भस्मसूतं मृतं कान्तं मुण्डभस्म शिलाजतु ।
तार्प्यं शुद्धं शिला व्योषं त्रिफलाऽङ्कोलबीजकम् ॥ १३५॥
कपित्थरजनीचूर्णं समं सम्भाव्य भृङ्गिणा ।
त्रिंशद्वारं विशोष्याथ मधुयुक्तं लिहेत् सदा ॥१३६॥
निष्कमात्रं हरेन्मेहान् मेहवद्रो रसो महान् ।
महानिम्बस्य बीजानि षण्निष्कं पेषितानि तु ॥१३७॥
पलतण्डुलतोयेन घृतनिष्कद्वयेन च ।
एकीकृत्य पिबेच्चानु हन्ति मेहं चिरन्तनम् ॥१३८॥

अथ हरिशङ्कररसः ।—

मृतं सूताभ्रकं तुल्यं धात्रीफलनिजद्रवैः ।
सप्ताहं भावयेत् खल्ले रसोऽयं हरिशङ्करः ॥१३९॥
माषमेकां वटीं खादेन्नीलमेहप्रशान्तये ।
पूर्वयोगानुपानं स्यादसाध्यं साधयेत् क्षणात् ॥ १४० ॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्यस्य कृतौ रसरत्नसमुच्चये मूत्रकृच्छ्राश्मरी-
मेहसोमरोगपिटिकाचिकित्सितं नाम सप्तदशोऽध्यायः ॥ १७ ॥

भस्मीभूतरसस्य भागद्वयं गगनस्य लौहस्य च एकैकभागं मिश्रयित्वा सिद्धात् रसात् रक्तिचयं सितादिभिः सह भक्षणीयम् ॥ १३२—१३४ ॥

मेहवद्ररसे—मृतं कान्तं कान्तलौहभस्म । मुण्डभस्म मुण्डलौहभस्म । रसेन्द्रसारे —"मृतं कान्तं मुण्डभस्म' इत्यत्र 'मृतं कान्तलौहभस्म" इति पाठान्तरम् । रसरत्नाकरे "मुण्डभस्म" इत्यत्र "तीक्ष्णभस्म" इति पाठः । अङ्कोलबीजकम् अङ्काठबीजम् । "अङ्कोलबीजकम्" इत्यत्र "बिल्वजीरकम्" इति रसेन्द्रसारसङ्ग्रहे पाठः । भृङ्गिणा भृङ्गराजरसेन । रसेन्द्रसारे मेहवज्राख्योऽयम् ॥ १३५—१३८ ॥

हरिशङ्कररसे—धात्रीफलनिजद्रवैः आमलकस्वरसैः । "धात्रीफलनिजद्रवैः" इत्यत्र "धात्रीफलनिशाद्रवैः" इति रसेन्द्रसारोक्तः पाठः । पूर्वयोगानुपानं "महानिम्बस्य" इत्यादिना मेहवद्रोक्तमनुपानम् ॥ १३९।१४० ॥

इति रसरत्नसमुच्चयबोधिन्यां सप्तदशोऽध्यायः ॥ १७ ॥

अथाष्टादशोऽध्यायः ।

अथ विद्रध्यादिचिकित्सनम् ।—

अथ विद्रधेर्निदान सम्प्राप्तिश्च ।—

अन्नैरध्युषितोष्णशुष्कपरुषैरन्यैरसृग्दूषणै-
र्वक्रैर्वा शयनादिभिस्तनुभृतामन्तर्बहिर्वोत्थितः ।
मेदस्त्वक्पलकण्डरास्थिरुधिरं गाढं प्रदूष्य क्षतो
वृत्त. स्यादथवायतोऽधिकरुज' शोथस्त्वसौ विद्रधि' ॥ १ ॥

अथ विद्रधिचिकित्सा ।—

अथ सर्वेश्वरपर्पटी ।—

रसोपरसलोहानि कार्षिकाणि पृथक् पृथक् ।
तेषु लोहानि सर्वाणि पाषाणा कठिनास्तथा ॥२॥

प्रमेहोपेक्षया पिडका जायते, विद्रधेश्च पिडकासामान्यात् दशविधपिडकाऽन्तर्गत- त्वाद्वा प्रमेहानन्तर विद्रध्यादिचिकित्सित विवक्षुः अष्टादशाध्यायमारभते, तत्र औषधप्रयोगस्य व्याधिनिर्णयापेक्षित्वात् आदौ विद्रधेर्निदान सम्प्राप्तिश्चाह, अन्नै- रिति ।—अध्युषितोष्णशुष्कपरुषै पर्य्युषिते उष्णवीर्य्यै उष्णस्पर्शैश्च तथा शुष्कै परुषै कठिनैश्च अन्नै, तथा असृग्दूषणै रक्तदूषकै अन्यै अन्यविधै भोज्यै, तथा वक्रै कुटिलै उच्चावचैरित्यर्थ, विषमैरिति यावत, शयनादिभि शयनासनस्थानादिभि कुपितेन दोषेणेति शेष, तनुभृता देहिना मेदस्त्वक् पल मास कण्डरा स्थूलशिरा अस्थि रुधिरञ्च गाढम् अत्यर्थं प्रदूष्य अन्त देहाभ्यन्तरे गुदवस्तिमुखादिदेशे, बहि क्वचित गात्रप्रदेशे वा उत्थित उत्थापित इत्यर्थ, वृत्त अथवा आयत दीर्घाकार. अधिकरुज अतिक्लेशप्रद य शोथ स्यात्, क्षत. दोषेणैव जनित इत्यर्थ, असौ शोथ विद्रधि ॥ १ ॥

सर्वेश्वरपर्पट्या—रसशब्देन रसमहारसयो तथा उपरसशब्देन च उपरस- साधारणरसयो ग्रहणम्, ततश्च रस पारद, तथा "अभ्र-वैक्रान्त माक्षीक विमला- ऽद्रिज सस्यकम् । चपलो रसकश्चेति ज्ञात्वाऽष्टौ सङ्ग्रहेत रसान् ॥" इत्यष्टमहारसाश्च, तथा उपरसा. "गन्धाश्म गैरि काशीश-काक्षी ताल-शिलाऽञ्जनम् । कङ्कुष्ठञ्चेत्युप-

घनसत्त्वञ्च तत् सर्वं भस्मीकृत्य प्रयोजयेत् ।
रत्नानि वज्रतुल्यानि भस्मीकृत्य च सर्वशः ॥३॥
एभ्यश्चतुर्गुणः सूतो गन्धस्तस्माच्चतुर्गुणः ।
कृत्वा कज्जलिकां ताभ्यां क्षिपेल्लोहस्य भाजने ॥४॥
प्रद्राव्य बदराङ्गारैर्निक्षिपेत्तदनन्तरम् ।
रसोपरसलोहानां रत्नानामपि सर्वशः ॥५॥
चूर्णं भस्म च निक्षिप्य काष्ठेनाऽऽलोड्य मेलयेत् ।
ततश्च षोडशांशेन मिश्रयित्वाऽमृतं विषम् ॥६॥
गोमयोपरि निक्षिप्य निक्षिपेत् कदलीदले ।
पत्रेणान्येन रम्भायाः समाच्छाद्य प्रयत्नतः ॥७॥
कराभ्यां चिपिटीकृत्य क्षिपेदुपरि गोमयम् ।
ततः शीतं समाकृष्य चूर्णयित्वा च पर्पटीम् ॥८॥
विनिक्षिपेत् करण्डान्तः सम्पूज्य रसभेषजम् ।
सर्वेश्वराभिधानेयं पर्पटी परिकीर्त्तिता ॥९॥
सर्वलोकहितार्थाय नन्दिनेयं प्रकीर्त्तिता ।
रक्तियुक्तसमानेयं मरिचार्द्रसमन्विता ॥१०॥

रसाश्चाष्टौ पारदकर्मणि ॥" इत्यष्टौ तथा "कम्पिल्लश्च परो गौरी पाषाणो नरसारकः ।
कपर्दो वह्निजारश्च गिरिसिन्दूरहिङ्गुलौ ॥ मृद्दारशृङ्गमित्यष्टौ साधारणरसाः स्मृताः ।
रससिद्धिकराः प्रोक्ता नागार्जुनपुरःसरैः ॥" इत्यष्टौ साधारणरसाश्च, तथा लोहानि
"शुद्ध लोह कनकरजतम्" इत्यादिना पञ्चमाध्यायोक्तानि स्वर्ण रौप्य ताम्र कान्त मुण्ड-
तीक्ष्ण नाग वङ्ग कांस्य पित्तल वर्त्तलौहाख्यानि पृथक् पृथक् कार्षिकाणि, ग्राह्याणि
इति शेषः । तेषु रसोपरसलोहेषु मध्ये सर्वाणि लोहानि, तथा कठिनाः
पाषाणाः रसोपरसयोर्मध्ये ये पाषाणाकाराः दृढाः माक्षिकादयः, तथा घनसत्त्वञ्च
सर्वं भस्मीकृत्य प्रयोजयेत, एतेन रसोपरसयोः ये मृदवः तान् संशोध्य चूर्णीकृत्यैव
प्रयोजयेत, न तु भस्मीकृत्येति मन्तव्यम् , अयमेवार्थः "चूर्णं भस्म च निक्षिप्य"
इत्यादिना स्फुटीकृत आचार्य्येणैवोपरिष्टात् । रत्नानि "वैक्रान्त सूर्य्यकान्तश्च"
इत्यादिना चतुर्थाध्यायोक्तानि । एभ्यः रसादिसमुदायेभ्यः । गन्धस्तस्माच्चतुर्गुणः

विद्रधौ षट्प्रकारे स्याद्वैया बर्ध्मसु सप्तसु ।
क्षयरोगेषु सर्व्वेषु पाण्डुरोगे विशेषत. ॥११॥
ग्रहणीरोगभेदेषु गुल्मेष्वष्टविधेषु च ।
मूत्ररोगेष्वशेषेषु प्लीहार्थे यकृदामये ॥१२॥
प्रमेहे सोमरोगे च प्रदरे जठरात्तिषु ।
विशेषेण च मन्दाग्नौ सर्व्वेष्वावर्त्तकेषु च ॥१३॥
अनुक्तेष्वपि रोगेषु तत्तदौचित्ययोगत' ।
रसोऽय खलु दातव्य: शिवतुल्यपराक्रम ॥१४॥
यद्यद्द्रव्यमसात्म्य हि जनानामुपजायते ।
तत् सर्वं सात्म्यमायाति रसस्यास्य निषेवणात् ॥१५॥
पीत हालाहल तोयं पर्वताग्रे वरोद्भतम् ।
सलिल तैलतत्तुल्य तज्जल स्यात् सुधोपमम् ॥
दु'साध्यो विद्रधिर्मांसाच्छ्वासिम।प्नोति निश्चितम् ॥ १६ ॥

सूताच्चतुर्गुणो गन्धक । अरुण विषम् अहिफेन दारुमोष वा। रक्तियुक्तसमाना रक्तिमाना इय पर्पटी। बर्ध्मसु सप्तसु सप्तविधेषु वृद्धिरोगेषु , बर्ध्मशब्देनात्र वृद्धिरोग एवाभिप्रेत' न तु ब्रध्न, तस्य सप्तविधत्वादर्शनात वृद्धेस्य सप्तविधत्वादिति । गुल्मेषु अष्टविधेषु वातपित्तकफद्वन्द्वसन्निपातरक्तजेषु अष्टविधेषु गुल्मेषु । आवर्त्तकेषु पुन प्रत्यावर्त्तनशीलेषु, ये रोगा एकवार प्रशान्ता पुन प्रत्यावर्त्तन्ते ते आवर्त्तका ज्ञेया । पीतमिति ।—वरोद्भत सुतीव्र हालाहल गरलमपि पीत, चेदिति शेष , तत पर्वताग्रे यत तोय निर्झरोदक तत्तुल्य, भवेदिति शेष, अस्मिन् औषधे सेविते असात्म्य सुतीव्र हालाहल पीतमपि तत निर्झरोदकवत सात्म्यमदोषञ्च सम्पद्यते इत्यर्थ । तथा तैलतत्तुल्य तैलवर्णं विवर्णमित्यर्थ, यत सलिलं तज्जलमपि सुधोपम सुधावत् गुणकारि स्यात, अस्यौषधस्य सेवनात असात्म्यम् अतीवविकृत जलमपि पीतम् अमृतवत सात्म्यमदोषञ्च सम्पद्यते इत्यर्थ । क्वचिदेतच्छ्लोकानन्तर "भुक्ता अपि च पाषाणा जीर्य्यन्ते चणमात्रत । नैतस्मिन्नियत क्वापि विहाराहारकर्मणि ॥ लोकनाथरसोऽप्यत्र चौद्रैर्गुञ्जाचतुष्टयम् । पाठामूलस्य कर्षैकं पिबेत्तण्डुलवारिणा ॥ इत्यधिक पाठो दृश्यते ॥ २—१६ ॥

अथ वरुणकषायः ।—

वरुणावल्कलक्वाथे हिङ्गुकासीससैन्धवम् ।
शिलाजतुसमायुक्तमसाध्यं विद्रधिं जयेत् ॥ १७॥

अथ शोभाञ्जनादिक्वाथः ।—

क्वाथः शिग्रुवचाश्वत्थं हिङ्गुसैन्धवचूर्णितैः ।
संयुक्तं पाययेच्छान्त्यै विद्रधीरोगपीडितम् ॥ १८॥

अथ सर्वामयहरो रसः ।—

हरिद्राकन्दमङ्कोल-तण्डुलं गन्धकं गुडम् ।
मूलानि च महाभर्य्या पृथगर्द्धपलान्वितम् ॥ १९॥
तुल्यञ्च पञ्चपलिकं नारीस्तन्येन पेषितम् ।
लिप्तं नालान्ध्रमूषासु धमनात् सत्त्वमाहरेत् ॥ २०॥
शस्तं चार रसेष्वेतत् पोटल्या पचनादनु ।
घृतेनाऽऽवर्त्तिते तस्मिन्निष्कद्वितयसम्मिते ॥ २१॥

वरुणकषाये—वरुणावल्कलक्वाथे वरुणत्वक्क्वाथे, प्रयोगदर्शनात् वरुणशब्द आदन्तोऽप्यस्तीति मन्तव्यम, यद्वा—वरुणस्य आवल्कलम् आ सम्यक् पुष्टं, घनमित्यर्थः, वल्कलम् । हिङ्ग्वादीनामत्र प्रक्षेपः बोध्यः, तेन हिङ्गु र २ सैन्धव र ६ काशीश र २ शिलाजतु र ६ अत्र देयं इत्याहुर्वृद्धाः । योगोऽयमाभ्यन्तरविद्रधौ प्रयोज्यः ॥ १७ ॥

शोभाञ्जनादिक्वाथे—शिग्रुवचाश्वत्थं शिग्रुवचाश्वत्थकृतमित्यर्थः । "शिग्रुवचाश्वत्थम्" इत्यत्र "शिग्रुत्वचीत्यत्र" इति पाठान्तरम् ॥ १८ ॥

सर्वामयहररसे—अङ्कोलतण्डुलम् अङ्कोलमूलं विडङ्गतण्डुलञ्चेत्यर्थः, अङ्कोलबीजमित्यर्थो वा । मूलानि च महाभर्य्याः "महाभरी" इति प्रसिद्धाया वचाया मूलानि । नालान्ध्रमूषासु नालयुक्तासु गोस्तनाकारासु अन्धमूषासु, तल्लक्षणञ्च "मूषा या गोस्तनाकारा" इत्यादिना दशमाध्याये प्रदर्शितम् । शस्तमिति ।—एतत् चार हरिद्राकन्दादीनां चार रसेषु रसकर्मसु शस्तं प्रशस्तम् । एवं सत्त्वसङ्ग्रहविधिमुक्त्वा अनन्तरकर्त्तव्यमाह, पोटल्या इति ।—पोटल्या मूषया इति यावत्, पचनादनु पाकानन्तरं निष्कद्वितयसम्मिते तोलकपरिमिते तथा घृतेनावर्त्तिते आलोडिते तस्मिन् सत्त्वे

प्रवेशितं निष्करस महाजम्बीरनीरत.।
अम्लपिष्टं शरावान्तर्लिप्त मृद्वस्त्रमुद्रितम् ॥२२॥
अधरोत्तरदत्ताना भ्रष्टानामाढके स्थितम्।
वालुकाना तथाभूते खारीपरिमितैस्तुषै ॥२३॥
पक्कं शीतं कृतं चुस्समष्टौ निष्काणि खर्परात्।
चत्वारि सुरभि स्थूल-घनवर्त्तुलनीरुजाम् ॥२४॥
पीताभाना सगर्भत्वाद्वराटानाञ्च षोडश।
अम्लस्य सार्द्धप्रस्थेन श्लक्ष्णपिष्टानि पात्रयो: ॥२५॥
जम्बीरमूलिकाकल्केनान्तर्लिप्तानि लिप्तयो'।
पचेच्छुष्ककरीषाणामर्द्धभारेण यत्नत. ॥२६॥
कृष्णवर्णोऽनुपक्कोऽसौ सुपक्क: शङ्खपाण्डुर.।

निष्करस निष्कमान पारद प्रवेशितं मिश्रित, कृत्वेति शेष महाजम्बीरनीरत: बृहज्जम्बीररसात् अम्लपिष्ट शरावान्तर्लिप्त तथा मृद्वस्त्रमुद्रित मृल्लिप्तवस्त्रवेष्टित, तत् सत्त्वं भ्रष्टाना स्थालीमध्ये निक्षिप्तानाम् अधरोत्तरदत्ताना शरावस्य ऊर्द्धाधोदत्ताना वालुकानामाढके आढकपरिमितायां वालुकायां स्थित रक्षितं कृत्वा तथाभूते स्थाल्या अधरोत्तरदत्तैरित्यर्थ, खारीपरिमितै द्वादशशरावाधिकै शरावशतपञ्चमितै तुषै पक्क शीत कृतं शीतीभूत चुस्स चूर्णीकृत तद्भेषज, तथा खर्परात अष्टौ निष्काणि, सुरभि गन्धक चत्वारि, निष्काणीति शेष, अम्लस्य काञ्जिकस्य सार्द्धप्रस्थेन श्लक्ष्णपिष्टानि, कृत्वेति शेष, सगर्भत्वात मध्ये औषधपूरणार्थं रन्ध्रवत्त्वात स्थूलघनवर्त्तुलनीरुजा स्थूलाना घनाना मासलाना वर्त्तुलाना गोलाना नीरुजाम् अखण्डिताना पीताभाना वराटाना षोडश, गृहीत्वा इति शेष', अन्तर्लिप्तानि वराटोदरप्रवेशितानि तानि हरिद्राकन्दसत्त्वादिसुरभ्यन्तानि औषधानि जम्बीरमूलिकाकल्केन लिप्तयो पात्रयो. पिष्टजम्बीरमूलेन लिप्तोदरयो शरावयो, स्थापितानि कृत्वा इति शेष, लिप्तयो. पात्रयो रुद्धसन्धिकयो पात्रयो, स्थितानीति शेष, पात्रमध्ये औषध सस्थाप्य सन्धि निरुध्य च, "सुरभिस्थूलघनवर्त्तुलनीरुजाम्" इति समस्तपाठे—नीरुक् कुष्ठ, सुगन्धिस्थूलघनवर्त्तुलकुष्ठाना चत्वारि निष्काणीत्यर्थं। शुष्ककरीषाणाम् अर्द्ध- भारेण सहस्रपलेन, "पलाना द्विसहस्रञ्च भार एक. प्रकीर्त्तित." इति लक्षणात्,

काचशङ्खमये पात्रे धारणीयः सुरक्षित ॥
पटचूर्णवशात् सर्वानामयान् विनियच्छति ॥२७॥

अथ वृद्धिचिकित्सा ।—

अथ दार्वीप्रयोग ।—

चूर्णं दारुहरिद्राया गवां मूत्रैस्त्रिनिष्ककम् ।
पिबेत् चिरोत्थिता हन्ति अन्त्रवृद्धिं न संशयः ॥२८॥

अथ वातारिरसस्य प्रयोगोपदेश ।—

रसो वातारिनामा यः सोऽत्र देयः पिबेदनु ।
एरण्डतैलकर्षैकं गवां क्षीरं पलद्वयम् ॥
अण्डवृद्धिहरः स्यात् मासमात्रान्न संशयः ॥ २९ ॥

अथ वातारि ।—

रसभागो भवेदेको द्विगुणो गन्धको मतः ।
त्रिभागा त्रिफला ग्राह्या चतुर्भागश्च चित्रकः ॥३०॥
गुग्गुलु पञ्चभागः स्यादेरण्डस्नेहमर्दितः ।
क्षिप्त्वाऽत्र पूर्वकं चूर्णं पुनस्तेनैव मर्दयेत् ॥३१॥
गुटिकां कर्षमात्रान्तु भक्षयेत् प्रातरेव हि ।
नागरैरण्डमूलानां क्वाथं तदनु पाययेत् ॥३२॥

यन्त्रत पचेत। असौ भस्मीभूत रस कृष्णवर्णश्चेत अनुपक्व हीनपक्व "अनु हीने सहार्थे च" इति विश्ववचनादनुशब्दोऽत्र हीनार्थकः। सुपक्वश्चेत शङ्खपाण्डुर, भवेदिति शेष ॥ १९—२७ ॥

शीतलसामान्यात् विद्रध्यनन्तर वृद्धिचिकित्सित विवक्षन् आदौ अन्त्रवृद्धिनाशन दार्वीप्रयोगमाह, चूर्णमिति।—सुगमम ॥ २८ ॥

वातारिरसस्य अनुपानं निर्दिशति, रस इति।—अत्र अन्त्रवृद्धिरोगे वातारिनामा यो रस वक्ष्यमाण स देय। एरण्डेति।—गोक्षीरे एरण्डतैल प्रक्षिप्य पिबेत ॥ २९ ॥

प्राक् वातारिरस इत्युक्त, तमेव वातारिरसमाह, रसभाग इति।—त्रिभागा त्रिफला इति मिलितायास्त्रिफलाया भागत्रय, तेन प्रत्येकं रससमो भाग। अत्र एरण्ड-स्नेहमर्दिते गुग्गुलौ। पूर्वकं चूर्णं रसादि चित्रकान्तचूर्णम्। तेनैव एरण्डस्नेहेनैव।

अभ्यज्यैरण्डतैलेन स्वेदयेत् पृष्ठदेशकम् ।
विरिक्ते तेन सञ्जाते स्निग्धमुष्णञ्च भोजयेत् ॥३३॥
वातारिसंज्ञको ह्येष: रसो निवातसेवित: ।
मासेन सुखयत्येव ब्रह्मचर्य्यपुर:सर: ॥
विजयागुटिका रात्रौ स्वल्पमात्राञ्च भक्षयेत् ॥३४॥

अथ तैलार्द्रकप्रयोग ।—

कर्षैक तिलतैलन्तु पलैकञ्चाऽऽर्द्रकद्रवम् ।
य: पिबेत् प्रातरुत्थाय तस्यान्त्रवृद्धिर्हृद्भवेत् ॥३५॥

अथ अन्त्रवृद्धौ पानीयतैलम् ।—

गोमूत्रैरण्डतैलञ्च छागमांसरसं तथा ।
त्रिफलाक्काथतुल्यांशं तैलशेषं विपाचयेत् ॥
तत्तैलन्तु पिबेत् कर्षमन्त्रवृद्धिप्रशान्तये ॥ ३६ ॥

अथ अन्त्रवृद्धौ पानीयतैलान्तर घृतञ्च ।—

दध्यारनालमदिरा-मातुलुङ्गरसै: समै: ।
ताम्रचूडरसैस्तुल्य तैल वा घृतमेव वा ॥
स्नेहशेषं पचेत् सर्वं तत् पिबेदन्त्रवृद्धिजित् ॥ ३७ ॥

निवातसेवित प्रवातरहिते देशे अवस्थित । ब्रह्मचर्य्यपुर सर उपस्थसयमपूर्वक । विजयागुटिका पिष्टविजयया कृता गुडिकाम् । पञ्चभाग विशोधित गन्धकमादौ एरण्डतैलेन मर्दयित्वा पश्चात् तत्र रसादिक मिश्रयित्वा पुन एरण्डतैलेन मर्दयेत ॥ ३०—३४ ॥

तैलार्द्रकप्रयोगे—अन्त्रवृद्धिहृत, योगोऽयमिति शेष ॥ ३५ ॥

अन्त्रवृद्धौ पानीयतैले—त्रिफलाक्काथतुल्यांश त्रिफलाक्काथ तुल्यांश समो यत्र तादृशम् एरण्डतैलम्, एतेन एरण्डतैलादीना त्रयाणा तुल्यत्व गोमूत्रस्य च चातुर्गुण्यं बोद्धव्यम् ॥ ३६ ॥

अन्त्रवृद्धिहरपानीयतैलघृतयो —समै समपरिमितै, दध्यादिभि । ताम्रचूडरसै: कुक्कुटमांसरसै । अकल्कमिदम् ॥ ३७ ॥

अथ अन्त्रवृद्धौ मासरस ।—

अन्त्रवृद्धिहरं पाने मयूरात्तित्तिराद्रसः ॥ ३८ ॥

अथ अन्त्रवृद्धौ द्वितीयमासरस ।—

वार्त्ताक कुक्कुट पक्त्वा तद्रसं पानभोजने ।
योजयेदन्त्रवृद्ध्यार्त्तं शममाप्नोति नान्यथा ॥ ३९ ॥

अथ गुल्मपूर्वरूपम ।—

उद्गारबाहुल्यपुरीषबन्ध-तृप्त्यक्षमत्वान्त्रविकूजनानि ।
आटोपमाध्मानमपक्तिशक्तिरासन्नगुल्मस्य वदन्ति चिह्नम् ॥ ४० ॥

अथ गुल्मचिकित्सा ।—

अथ गन्धकादिपोटलीरस ।—

गन्धकं तालकं ताप्य शिलाह्वं पिप्पलीकृते ।
कषाये भावयेत् स्नुह्या क्षीरे मूत्रे च सप्तशः ॥ ४१ ॥
निष्कार्द्धमस्याः पोटल्या स्यादर्द्धं साज्यमाक्षिकम् ।
प्रयोज्य सयकृत्प्लीह्नि पञ्चकोलपशालिना ॥ ४२ ॥

अन्त्रवृद्धिहरमासरसे—मयूरतित्तिरयो मिलितयो रस. पक्तव्य ॥ ३८ ॥

अन्त्रवृद्धिहरे द्वितीयमासरसे—वार्त्ताक तित्तिरम् । अत्रापि वार्त्ताककुक्कुटयोः मिलितयो रस ज्ञेय ॥ ३९ ॥

अथ वायोरव्यभिचरितत्वसाधर्म्यात् वृद्ध्यनन्तरं गुल्मचिकित्सित विवक्षुरादौ तस्य पूर्वरूपमाह, उद्गारेति ।—तृप्ति सौहित्य गतस्येव अनन्नाकाङ्क्षा । अक्षमत्व कर्मस्व सामर्थ्यम् । आटोप सरुजमुदरक्षोभ तलतलं वा, न तु गुडगुडाध्वनि, "अन्त्र-विकूजनानि" इत्यनेनैव तस्य गतार्थत्वात ॥ ४० ॥

गन्धकादिपोटल्या—मूत्रे गोमूत्रे, "मूत्रे गोमूत्रमादेयम्" इति परिभाषाबलात । सप्तश पिप्पलीकषायादिना प्रत्येकं सप्तवारान् । स्यादर्द्धमिति ।—घृतमधुनोः मिलित्वा पोटलीमानादर्द्धं ग्राह्यम् । पञ्चकोलप-शालिना पञ्चकोलक्वाथपायिना, "पञ्चकोलपशालिना" इत्यत्र "पञ्चकोलपलाशिना" इति पाठे—पलमितपञ्चकोलक्वाथ-पायिनेत्यर्थ ॥ ४१।४२ ॥

अथ गन्धकादिपोटल्या प्रयोगान्तरम् ।—

वर्षाभूः कारवी शौण्डी सूची वचफलासनम् ।
तिलाच्छियुगमावाणा-निशाकर्कन्धुसूरिका ॥४३॥
रक्तागस्त्येन्दुरेखाब्द-नीलज्योतिरयो मृतम् ।
वल्कल बहुवल्लर्य्याः कृष्णः काम्बोजिकाफलम् ॥४४॥
गवाक्षीरजनीकृष्णा-निम्बवेल्लकठिल्लकम् ।
मानिकांशं पृथक् चुर्ण तुल्यं भूशर्करा घृतम् ॥४५॥
त्रिफलावीजतैलेन भावितं कर्षसम्मितम् ।
प्राह्णे घृतेन मध्याह्ने गुडेन मधुना निशि ॥४६॥
पादं पादार्द्धमात्रं वा पोटल्याश्च रजो भवेत् ।
हैयङ्गवीनशाल्यन्न-कृष्णागोक्षीरवर्त्तिनः ॥४७॥

गन्धकादिपोटल्या प्रयोगान्तरे—कारवी कृष्णजीरकम् । शौण्डी पिप्पली । सूची कुश । वच वचा । फल त्रिफला । असन स्वनामख्यातम्, "फलासनम्" इत्यत्र "किलासनम्" इति पाठे—किल किलपादिका, क्षुद्रलज्जालुलता इत्यर्थ । तिलाच्छि तिलनेत्र, तिलनालमूलमित्यर्थ । युग ऋद्धि, तदभावे बला ग्राह्या । मावाणा शरपुङ्खाभेद, "तिलाच्छियुगमावाणा" इत्यत्र "तिलाच्छिद्वषावाणा" इति पाठान्तरम् । निशा हरिद्रा । कर्कन्धु आरण्यवदरम् । सूरिका राजिका । रक्तागस्त्य रक्तवक । इन्दुरेखा सोमराजी । अब्द मुस्तकम् । नीलज्योति रसाञ्जनम्, नील-नीलीवृक्ष, ज्योति चित्रक इत्यर्थो वा । अयो मृत मृतलौहम । वल्कल बहु-वल्लर्य्या शोभाञ्जनत्वक् । कृष्ण मरिचम । काम्बोजिकाफल गुञ्जावीजम्, "कृष्ण काम्बोजिकाफलम" इति समस्तपाठे—कृष्णवर्णगुञ्जाफलम । गवाक्षी गोरक्षकर्कटी । रजनी दार्वी । कृष्णा गान्धारी पिप्पली वा । वेल्ल विडङ्गम् । कठिल्लक पुनर्नवा । मानिकांश शरावमितम । भूशर्करा इक्षुविकारजा शर्करा, न तु पुष्परसादिभ्यो जाता शर्करा इति विशेषेण ज्ञापनार्थं भूपदोपादान बोद्धव्यम्, शर्करकन्दाख्य आलुक-विशेष इत्यर्थो वा । अत्र शर्कराघृतयोर्मिलितयो सर्वचूर्णसमानत्व बोद्धव्यम् । त्रिफलावीजतैलेन त्रिफलावीजभवतैलेन । भावितमिति सप्ताहम । पादमिति ।—वर्षाभ्वाद्योगस्य कर्षमात्रापेक्षया पाद पादार्द्धमात्र वा पोटल्या रज गन्धकादि-पोटलीचूर्णम्, योगमिम कर्षमाण पोटल्या माषद्वयेन माषचतुष्टयेन वा सह पिबेत ।

एवं वर्षत्रयं कुर्य्यात् स्याद्वलीपलितोज्झितः ।
प्रत्यह मण्डल खादेत् पथ्यं त्यक्त्वा ततःपरम् ॥
इष्टाहारविहारी च सहस्रायुर्भवेद्ध्रुवम् ॥४८॥

अथ वङ्गेश्वर ।—

भस्मसूत वङ्गभस्म पलैकैक प्रकल्पयेत् ।
गन्धक मृतताम्रञ्च प्रत्येकञ्च पल पलम् ॥४९॥
अर्कक्षीरैर्दिनं मर्द्यं सर्वं तत् गोलकीकृतम् ।
रुद्ध्वा तद्भूधरे पश्चात् पुटैकेन समुद्धरेत् ॥५०॥
एष वङ्गेश्वरो नाम प्लीहगुल्मोदरापहः ।
घृतैर्गुञ्जाद्वय लेह्यं निष्क श्वेतपुनर्नवा ॥
गवा मूत्रैः पिबेच्चानु रजनीं वा गवा जलैः ॥ ५१ ॥

अथ देवदालीपञ्चाङ्गचूर्णम् ।—

पञ्चाङ्गदेवदाल्यास्तु चूर्णकर्षं शिवाम्बुना ।
मासमात्रं पिबेद्यस्तु प्लीहा तस्य करोति किम् ? ॥५२॥

अथ तक्रासव ।—

लवणं रजनी राजी प्रत्येक पलपञ्चकम् ।
चूर्णित निक्षिपेद्भाण्डे शततक्रपलान्विते ॥५३॥

हैयङ्गवीन सद्योजात घृतम् , हैयङ्गवादिना वर्त्तते जीवति इति तस्य हैयङ्गवादि-सेविन इत्यर्थ । प्रत्यहमिति वर्षत्रयमित्यनेन सम्बध्यते , एवञ्च वर्षत्रय यावत प्रतिदिन खादेदित्यर्थ । मण्डल खादेत् पथ्य मण्डलम् अष्टचत्वारिंशद्दिन यावत् पथ्य खादेत् पथ्यभुक् स्यात्, तत परम् अष्टचत्वारिंशद्दिनानन्तर, त्यक्त्वा, पथ्यमिति शेष, इष्टाहार-विहारी भवेत यथाकामाहारविहार कुर्य्यादित्यर्थ ॥ ४३—४८ ॥

वङ्गेश्वरे—गवा जलै गोमूत्रै ॥ ४९—५१ ॥

देवदालीपञ्चाङ्गचूर्णे—देवदाली हस्तिघोषक तस्या पञ्चाङ्ग पत्रपुष्पफलमूल-त्वग्रूपम् । शिवाम्बुना हरीतकीक्वाथेन ॥ ५२ ॥

तक्रासवे—लवण सैन्धवम् । राजी राजिका, "राइसरिषा" इति

त्रिदिन मुद्रितं रक्षेत् पश्चात् पञ्चपल सदा।
पीत्वा विनाशयेत् प्लीह त्रिःसप्ताहान्न संशयः ॥५४॥

अथ एरण्डक्षारम।—

समूलपत्रमेरण्डं दग्ध्वा भाण्डे पुटे पचेत्।
तत्कर्षं पलगोमूत्रैः पीतं प्लीहविनाशनम् ॥५५॥

अथ शरपुङ्खादियोग।—

शरपुङ्खार्कयोर्मूल चिर दन्तैश्च चर्वितम्।
गिलितं नाशयेत् प्लीहं यवागूपानमाचरेत् ॥ ५६ ॥

अथ वज्रक्षारप्रयोगोपदेश।—

वज्रक्षारन्तु कर्षैकं भक्ष्य प्लीहविनाशनम् ॥ ५७ ॥

अथ काञ्चनीप्रयोग।—

काञ्चनीमूलचूर्णन्तु निष्कमात्र सदा पिबेत्।
सुरया काञ्जिकैर्वाऽथ हन्ति प्लीहं चिरन्तनम् ॥ ५८ ॥

अथ प्लीह्नि रक्तमोक्षणोपदेश।—

प्लीहानां पृष्ठदेशे तु रक्तस्रावञ्च कारयेत्।
अर्कक्षीर ससिन्धूत्थं क्षिपेत्तत्र रुजापहम् ॥ ५९ ॥

व्यातम्। शततक्रपलान्विते शतपलतक्रान्विते। प्लीहमिति अकारान्तप्लीहशब्दस्य रूपम् ॥ ५३।५४ ॥

एरण्डक्षारे—तत्कर्षम् एरण्डक्षारकर्षम् ॥ ५५ ॥

शरपुङ्खादियोगे—शरपुङ्खाकमूल दन्तै चर्वित्वा गिलेत न तु जलादिना कल्कीकृत्य ॥ ५६ ॥

वज्रक्षारप्रयोगोपदेशे—वज्रक्षारम् उदरचिकित्सिते वक्ष्यमाणम् ॥ ५७ ॥

काञ्चनीप्रयोगे—काञ्चनीमूलचूर्णं स्वर्णक्षीरीमूलचूर्णं हरिद्राकन्दचूर्णं वा ॥५८॥

प्लीह्नि रक्तमोक्षणस्य कर्त्तव्यतामाह, प्लीहानामिति।—प्लीहानां प्लीहरोगिणा मित्यर्थ, प्लीह अस्ति एषामिति अर्श आदिभ्य अच्, "प्लीहनाम" इति पाठान्तरेऽपि स एवार्थ। तत्र रक्तस्रावणार्थम् उत्पादिते व्रणे। रुजापह वेदनापहम ॥ ५९ ॥

अथ शिखिवाडव ।—

मारितं सूततास्राभ्रं गन्धकं माक्षिकं समम् ।
मर्दयित्वाऽऽर्द्रकद्रावैर्यवक्षारयुतैर्दिनम् ॥ ६० ॥
त्रिगुञ्जं भक्षयेन्नित्यं नागवल्लीदलेन च ।
वातगुल्महरः ख्यातो रसोऽयं शिखिवाडवः ॥ ६१ ॥
विडङ्गं दाडिमं हिङ्गु सैन्धवैलासुवर्चलम् ।
मातुलुङ्गरसैः पिष्ट्वा कर्षैकं सुरया सह ॥
वातगुल्महरं देयमनुपानं सुखावहम् ॥ ६२ ॥

अथ दीप्तामर ।—

शुद्धं सूतं समं गन्धं सूताभ्रं सूततास्रकम् ।
शाकवृक्षोत्थपञ्चाङ्ग-द्रवैर्मर्द्यं दिनत्रयम् ॥ ६३ ॥
दिनं सर्पाक्षिजैर्द्रावैः रुद्ध्वा गजपुटे पचेत् ।
पञ्चधा भूधरे चाथ चूर्णं जैपालतुल्यकम् ॥ ६४ ॥
द्विगुञ्जं भक्षयेच्चाऽऽज्यैः पित्तगुल्मप्रशान्तये ।
द्राक्षाहरीतकीक्काथमनुपानं प्रकल्पयेत् ॥
रसो दीप्तामरो नाम पित्तगुल्मं नियच्छति ॥ ६५ ॥

शिखिवाडवे—मर्दयित्वाऽऽर्द्रकद्रावैर्यवक्षारयुतैर्दिनमित्यस्य आर्द्रकरसेन यवक्षारोदकेन च एकैकं दिनं मर्दयित्वा इत्यर्थः, "यवक्षारयुतैः" इत्यत्र "यवक्षारयुतम्" इति पाठे—यवक्षारयुतं सूततास्राभ्रमिति योजनीयम्। 'आर्द्रकद्रावैः" इत्यत्र "चित्रकद्रावैः" इति रसरत्नाकरे पाठः । अस्यानुपानमाह, विडङ्गमिति ।—सुवर्चलं सौवर्चललवणम् आदित्यभक्ता वा। रसेन्द्रसारेऽस्य "वडवानल" इति संज्ञा दृश्यते ॥ ६०—६२ ॥

दीप्तामरे—सूताभ्रं सूतभागः, तेन त्रयाणामपि समभागता ज्ञातव्या। शाकेति ।—शाकः महज्जद्रुमविशेषः, "सेगुन" इति भाषा, तस्य पञ्चाङ्गद्रवे त्वक्पत्रपुष्पफलमूलरसे । सर्पाक्षी गन्धनाकुली, रास्नाभेदः । भूधरे भूधरयन्त्रे। चूर्णं जैपालतुल्यकमिति शोधितजयपालबीजचूर्णं यत्औषधतुल्यम् । रसरत्नाकरेऽस्य "उड्डामर." इति संज्ञा ॥६३—६५॥

अथ विद्याधर ।—

गन्धकं तालक तार्क्ष्यं मृततास्रं मन शिलाम् ।
शुद्ध सूतञ्च तुल्यांश मर्दयेद्भावयेदिनम् ॥६६॥
पिप्पल्यास्तु कषायेण भावयेत् स्नुग्भवेन च ।
निष्कार्द्धं भक्षयेत् क्षौद्रैर्गुल्मं प्लीह विनाशयेत् ॥
रसो विद्याधरो नाम गोमूत्रञ्च पिबेदनु ॥ ६७ ॥

अथ व्योषादिचूर्णम ।—

तिलक्वाथो गुडञ्चाऽऽज्य व्योषभार्गीरजोऽन्वितम् ।
पानं रक्तभवे गुल्मे नष्टे पुष्पे तु योषितः ॥ ६८ ॥

अथ देवदार्वादिचूर्णम् ।—

देवदारु कणा भार्गी शुण्ठी करञ्जवल्कलम् ।
चूर्णं तिलाना क्वाथेन रक्तगुल्महरं भवेत् ॥ ६९ ॥

अथ रक्तोदरकुठार ।—

पारदं शिखितुल्यञ्च जैपाल पिप्पली समम् ।
आरग्वधफलान्मज्जा वज्रीदुग्धेन भावयेत् ॥७०॥
सूक्ष्ममात्रा वटीं खादेत् स्त्रीणा हन्याज्जलोदरम् ।
चिञ्चाफलरसञ्चानु पथ्य दध्योदन हितम् ॥
रक्तोदरं हरेत् सैव कठिनं रेचयेदनु ॥ ७१ ॥

विद्याधरे—"मृततास्रम्" इत्यत्र "स्वर्णम्" इति तथा "गोमूत्रम्" इत्यत्र "गोदुग्धम्" इति च रसेन्द्रसारसङ्ग्रहे पाठान्तरम् । स्नीषोत्तरेऽय योग ॥ ६६।६७ ॥

व्योषादिचूर्णे—गुडादिक प्रक्षेपविषया योज्यम् । "गुडञ्चाज्य व्योषभार्गीरजोऽन्वितम्" इत्यत्र "गुडव्योषहिङ्गुभार्गीयुतो भवेत्" इति चक्रसङ्ग्रहोक्तपाठान्तरम् ॥६८॥

देवदार्वादिचूर्णे—सर्वं स्पष्टम ॥ ६९ ॥

रक्तोदरकुठारे—शिखितुल्य मयूरग्रीवाभ तुल्यम् । "जैपाल पिप्पली समम्" इत्यत्र "जैपाल गन्धक समम्" इति रसरत्नाकरे पाठ । वज्रीदुग्धेन स्नुहीक्षीरेण । "सूक्ष्ममात्रा वटी खादेत् स्त्रीणा हन्यात् जलोदरम्" इत्यत्र "धात्रीफलरसे खादेत् स्त्रीणा रक्तोदर हरेत्" इति रसरत्नाकरोक्त पाठ. युक्त, "स्त्रीणा हन्यात् जलोदरम्"

अथ वैश्वानररसः ।—

विष्णुक्रान्ता च जैपालं लाङ्गली सुरदारिका ।
यवचिञ्चाऽम्बुसारेण तासां द्विगुणगन्धकम् ॥७२॥
पक्वं विमर्दितं सूतं स्वेदयेन्मृदुनाऽग्निना ।
गुल्मे गुञ्जात्रयञ्चास्य सोष्णाम्बुघृतसैन्धवम् ॥७३॥
वातजे कफजे लिह्यान्मध्वार्द्रकसमन्वितम् ।
ससितामाक्षिकं पैत्ते सोऽयं वैश्वानरो रसः ॥ ७४ ॥

अथ अग्निकुमारः ।—

नेपालवैगन्धरसत्रयाणां फलत्रयस्यापि कटत्रयस्य ।
मूत्रे गवां षोडशभागमाने भागान्नवैकत्र दिनत्रयञ्च ॥७५॥
विमर्द्य तेषां बदरप्रमाणां बद्ध्वा वटीमुष्णजलानुपानात् ।
एकत्र युक्ता सहसा निहन्ति सा रेचयित्वा मलजालमादौ ॥७६॥
गुल्मं यकृत् पाण्डुविबन्धशूलं मान्द्यं ज्वरञ्चाथ जलोदरञ्च ।
अग्नेः कुमारः सहसा निहन्याद्दुद्दीपितो दीप इवान्धकारम् ॥७७॥

इत्यस्य असङ्गतत्वात् । रक्तोदरं रक्तगुल्मम् इति यावत् । सा एव सा वटी एव । कठिनमिति रक्तोदरमित्यस्य विशेषणम् । रेचयेदनु इति वटीभक्षणात पश्चात् रक्तं स्रावयेत् इत्यर्थः । "रेचयेदनु" इत्यत्र "लेपनेन तु" इति रसरत्नाकरोक्तपाठः सुगमः युक्तश्च । रसेन्द्रसारसङ्ग्रहे अस्य "उदरारिरसः" रसरत्नाकरे च "नाराचको रसः" इति सञ्ज्ञा ॥ ७०।७१ ॥

वैश्वानररसे—विष्णुक्रान्ता अपराजिता । सुरदारिका सृक्का । "सुरदारिका" इत्यत्र "सुरदालिका" इति पाठे—देवदालिका, पीतघोषकः इत्यर्थः । यवचिञ्चाम्बु-सारेण यवचिञ्चा चिरिणी तस्याः अम्बुसारेण क्वाथोदकेनेत्यर्थः, यवचिञ्चा चीरिणी अम्बु वालकं तयोः सारेण क्वाथेन इत्यर्थो वा, मर्दयेदिति शेषः । तासां विष्णुक्रान्तादीनां सुरदारिकान्तानां मिलितानामित्यर्थः । सूतमपि गन्धकतुल्यं ग्राह्यम् । अयमर्थः,—विष्णुक्रान्तादीनां द्विगुणेन गन्धकेन समं पारदं गृहीत्वा कज्जलीं कुर्य्यात्, ततः चूर्णसमूहं तत्र निक्षिप्य यवचिञ्चाक्वाथेन पक्वं विमर्द्य च लघुपुटे पचेत । वातजे इति सोष्णाम्बुघृतसैन्धवमित्यनेन सम्बध्यते ॥ ७२—७४ ॥

अग्निकुमारे—नेपालं ताम्रम् । वैगन्धः गन्धकः । षोडशभागमाने प्रत्येकं-

अथ सर्वाङ्गसुन्दर प्राणेश्वरो रस ।—

शुद्धमभ्रं रसं गन्धं मेलयित्वा समांशकम् ।
तालमूलीरसैर्मर्द्यं कल्कं सम्पादयेच्छुभम् ॥७८॥
तत् कल्कं कूपिकामध्ये कृत्वा वक्त्रं निरुन्धयेत् ।
खटिन्या मुखमाच्छाद्य मृदा खर्परसञ्ज्ञया ॥७९॥
कूपिकां लेपयेत् सर्वां शोषयेदातपे खरे ।
कूपिकां भूगतायाञ्च कृत्वा तां पुटयेत्ततः ॥८०॥
कूपिकां मर्दयेत् कृत्स्नां खटिन्या सह संयुताम् ।
त्रिभिः क्षारैस्तु तच्चूर्णं पञ्चभिर्लवणैस्तथा ॥८१॥
त्र्यूषणं त्रिफला हिङ्गु पुरमिन्द्रयवास्तथा ।
गुञ्जाकिनी तथा चित्रमजमोदा यमानिका ॥८२॥
एतानि समभागानि समादाय विचूर्णयेत् ।
योजयेत् सह सूतेन ततः सिध्यति सूतकः ॥८३॥
सिद्धसूतस्य चूर्णेन माषं सर्वरुजापहम् ।
भक्षयेत् प्रातरुत्थाय रसं सर्वाङ्गसुन्दरः ॥८४॥
उष्णोदकानुपानन्तु पाययेच्चुलुकद्वयम् ।
भक्षयेदेकवारन्तु द्विवारं न कथञ्चन ॥८५॥

भागापेक्षया षोडशगुणगोमूत्रे। भागान् नव इति नेपालादीनां कटुत्रयान्तानां नवानां प्रत्येकमेकैकभाग इत्यर्थः ॥ ७५—७७ ॥

सर्वाङ्गसुन्दरप्राणेश्वरे—मृदा खर्परसञ्ज्ञया कङ्करमृत्तिकया भग्नस्थाल्यादिचूर्णेन वा। "कूपिकां भूगतायाञ्च कृत्वा तां पुटयेत्ततः" इत्यत्र "कूपिकां भूगतां कृत्वा तां सम्यक् पुटयेत्ततः" इति पाठकल्पना समीचीना। पुरम् अगुरु गुग्गुलुर्वा। गुञ्जाकिनी गुञ्जा, तस्याः फलं ग्राह्यम्। अजमोदा यमानी, अन्तःपरिमार्जकत्वात्, बहिः-परिमार्जने तु अजमोदायाम् आरण्ययमानी गृह्यते इति वृद्धवैद्याः, तथा च—"अन्तःसम्मार्जने प्रायोऽजमोदा च यमानिका। बहिःसम्मार्जने ज्ञेया वाजमोदाऽजमोदिका॥" इति, एवञ्च यमान्या भागद्वयम्। सिद्धसूतस्य सम्यक् पक्वस्य अस्य रसस्य इत्यर्थः। चूर्णेन त्रिक्षारादिचूर्णेन सह, सिद्धसूतस्य

दिनमध्ये वारमेकं दातव्यो भिषजा रसः ।
शीतोदकं सकृद्देयं तद्भावेऽप्यहर्निशम् ॥८६॥
भोजने वर्जयेत्तत्र शाकाम्लं द्विदलं तथा ।
तैलाभ्यङ्गं ब्रह्मचर्य्यं वर्जयेच्छयनं दिवा ॥८७॥
हितं तत् सेवयेत् पथ्यमहितञ्च विवर्जयेत् ।
अनेनैव प्रकारेण योजयेत् प्रतिवासरम् ॥८८॥
यस्त्वचेतनतां याति सन्निपाती कथञ्चन ।
तस्य नातिप्रयोक्तव्यो रसो यत्नाद्भिषग्वरैः ॥८९॥
देवाग्निऋषिविप्रांश्च कुमारीर्योगिनीगणान् ।
पूजयित्वा यथाशक्त्या सेव्यः प्राणेश्वरो रसः ॥९०॥
गुल्मञ्चाष्टविधं वातं शूलञ्च परिणामजम् ।
सन्निपातज्वरञ्चैव प्लीहानमपकर्षति ॥९१॥
कामलां पाण्डुरोगञ्च मन्दाग्निं ग्रहणीं तथा ।
शिववत् सेवितो हन्ति रसः प्राणेश्वरस्त्वयम् ॥९२॥

अथ गुल्मनाशनः ।—

गन्धकं रसतुल्यञ्च द्विभागं सैन्धवस्य च ।
त्रिभागं टङ्कणं प्रोक्तं चतुर्भागञ्च तुत्थकम् ॥९३॥

इति योजना। "चूर्णेन" इत्यत्र "पर्णेन" इति पाठः साधुः। माषः माषकमानम्। उष्णोदकानुपानमिति भक्षयेदित्यनेन सम्बध्यते, न तु पाययेदित्यनेन, तस्य च चुलुकद्वयमित्यनेन सम्बन्धः। कियन्मानमुष्णोदकमनुपिबेदित्याकाङ्क्षायामाह, पाययेत् चुलुकद्वयमिति।—चुलुकद्वयं गण्डूषद्वयम्। शीतोदकमित्यादौ अहर्निशं सकृद्देयमिति योजना कार्य्या, दिवारात्रिमध्ये एकवारं शीतलजलमवश्यमेव दातव्यमित्यर्थः। ब्रह्मचर्य्यम् उपस्थनिग्रहः, प्रायेण सर्वत्रैव रोगे तस्य विहितत्वेऽपि योगप्रभावादत्र तस्य वर्जनीयता ज्ञातव्या। पथ्यं पादाहारं, मितमित्यर्थः, "पादाहारं पथ्यमाहुः" इति राजनिघण्टुस्मरणात्, यद्धितं तत् पथ्यं सेवयेत् हितमपि न त्वमितं सेवितव्यम्। नातिप्रयोक्तव्यः अल्पमात्रया देय इत्यर्थः, यद्वा—नातिप्रयोक्तव्यः अनतिचिरेणैव प्रयोक्तव्य, इत्यर्थः ॥ ७८—९२ ॥

पञ्चमन्तु वराटं स्यात् षड्भागं शङ्खमेव च ।
वह्निमूलकषायेण चिरविल्वरसेन च ॥९४॥
आर्द्रकस्य रसेनात्र प्रत्येकन्तु पुटत्रयम् ।
तत्समं मारिच चूर्णं शाणार्द्धं भक्षयेन्नरः ॥
पञ्चगुल्म क्षयं श्वास मन्दाग्निञ्चाशु नाशयेत् ॥ ९५ ॥

अथ शूलचिकित्सा ।—

अथ अग्निमुख ।—

मृतसूताभ्रक ताम्र गन्धकञ्चाम्लवेतसम् ।
विष फलत्रयं तुल्यं सर्वं मर्द्यं दिनावधि ॥९६॥
विषमुष्टिर्जया वासा विजया रक्तशाकिनी ।
बृहती च महाराष्ट्री धुस्तूरः पञ्चपत्रक. ॥९७॥
नागवल्ली शमी जम्बू भाव्यमेभिर्द्रवैस्त्र्यहम् ।
समांश पञ्चलवणं दत्त्वाऽऽर्द्रकरसेन च ॥९८॥

गुल्मनाशने—चिरविल्वरसेन करञ्जत्वग्रसेन। प्रत्येकन्तु पुटत्रयमिति प्रत्येकद्रवेण एकैकदिन मर्दयित्वा पुटो दातव्य एव दिनत्रय कार्य्यम्। तत्सममिति।—तेन सिद्धेनौषधेन सम तुल्य मरिचचूर्णं गृहीत्वा मिश्रयेत्, तत्र अस्य शाणार्द्धं भक्षयेदित्यर्थ ॥ ९३—९५ ॥

कुक्षिगतात्वसाधर्म्यात् गुल्मानन्तरं शूलचिकित्सित विवरीतु प्रक्रमते, तत्राग्निमुखे—विषमुष्टि कुपीलु, "कुचिला" इति ख्यातम्। जया जयन्ती। रक्तशाकिनी रक्ततण्डुलीयक रक्तपुनर्नवा वा। महाराष्ट्री जलपिप्पली। भाव्यमेभिर्द्रवैस्त्र्यहमिति विषमुष्ट्यादीना प्रत्येक क्वाथेन स्वरसेन वा दिनत्रय भावना दातव्या इत्यर्थ। "विषमुष्टि" इत्यादि "जम्बू" इत्यन्तस्थले रसेन्द्रसारसङ्ग्रहे "कनककभुजगवल्ली-कण्टकारीजयाद्भि। कमलसलिलवासा मुष्टिवज्राम्बुपूरै ॥ अरुणसहशपाकैर्मातुलुङ्गैश्च योज्य" इति तथा रसरत्नाकरे "विषमुष्टिनिका वासा विजया रक्तशालिनी। बृहती च महाराष्ट्री धुस्तूर पञ्चपत्रकम् ॥ अश्वावर्त्त्यमृता जम्बुर्भव्य नीलोत्पलद्रवै" इति पाठ.। समांशमिति।—भावनानन्तर मिलितपञ्चलवण सर्वचूर्णसम दत्त्वा

दिनं पेष्यं ततः कुर्य्याद्वटिकाश्चणमात्रकाः ।
भक्षयेद्वातशूलार्त्तः सोऽयमग्निमुखो रसः ॥९९॥
हरीतकी प्रतिविषा हिङ्गु सौवर्चलं वचा ।
कलिङ्गेन्द्रयवास्तुल्यं पाययेदुष्णवारिणा ॥
कर्षैकमनुपानं स्याद्वातशूलहरं परम् ॥१००॥

अथ क्षारप्रयोगः ।—

चिञ्चाक्षारं जलैः पीतं शूलं शान्तिमवाप्नुयात् ॥ १०१ ॥

अथ विनेत्रः ।—

खण्डितं हारिणं शृङ्गं स्वर्णं शुल्वं मृतं रसम् ।
दिनैकमाऽऽर्द्रकद्रावैर्मर्द्यं रुद्ध्वा पचेत् पुटे ॥१०२॥
विनेत्राख्यो रसः सोऽयं माषं मध्वाज्यकैर्लिहेत् ।
सैन्धवं जीरकं हिङ्गु मध्वाज्याभ्यां लिहेदनु ॥
पक्तिशूलहरं ख्यातं मासमात्रान्न संशयः ॥१०३॥

अथ सौभाग्ययोगः ।—

टङ्कणं मूर्च्छितं सूतं यवक्षारं समं समम् ।
चूर्णितं भक्षयेन्माषं मधुना पक्तिशूलनुत् ॥
जम्बूमासाज्ययोर्यूषमनुपानं पिबेत् सदा ॥१०४॥

दिनं यावत् आर्द्रकरसेन मर्दयेत् इति । प्रतिविषा अतिविषा । अग्निमुखरसस्य अनुपानत्वेन कल्पनीयोऽयं योगः ॥ ९९—१०० ॥

क्षारप्रयोगे—चिञ्चाक्षारं तिन्तिडीत्वक्कृतं क्षारम् ॥ १०१ ॥

विनेत्रे—खण्डितं त्रुटितम्, अणूकृतमित्यर्थः, "खण्डितम्" इत्यत्र "टङ्कणम्" इति रसेन्द्रसारसङ्ग्रहे रसरत्नाकरे च पाठः । मृतं रसं रससिन्दूरं । "शुल्वम्" इत्यत्र "गन्धं" इति रसेन्द्रसारसङ्ग्रहे तथा "शुद्धम्" इति च रसरत्नाकरे पाठः । रसेन्द्रेऽस्य "त्रिगुणाख्यो रसः" इति संज्ञान्तरम् ॥ १०२।१०३ ॥

सौभाग्ययोगे—मूर्च्छितं सूतं रससिन्दूरं । जम्बूमासाज्ययोः यूषः शृगाल-मांसच्छागमांसयोः रसम् । अजाया इदमिति आज्यं छागमांसम् ॥ १०४ ॥

अथ चिन्तामणिः।—

सूतेन गन्धं द्विगुणं विमर्द्य कोरण्टनिम्बूत्थरसैर्दिनं तत्।
चिञ्चोद्भवच्छिन्निरसेन चैकं दिनञ्च गोलं रविसम्पुटस्थम्॥१०५॥
लिप्त्वा मृदा शुष्कमतीव कृत्वा सामुद्रयन्त्रेण पुटं ददीत।
उद्धृत्य शीतं रसपादभागं प्रक्षिप्य गन्धं विपचेन्मनाक् च॥१०६॥
विषञ्च दत्त्वा रसपादभागं लौहस्य पात्रे तु कृशानुतोयैः।
रसस्तु चिन्तामणिरेष उक्तो वातारितैलेन समाक्षिकेण॥१०७॥
वल्लेन मानं प्रददीत चाम्लं तैलञ्च शीतं परिवर्जयेच्च॥१०८॥
हन्ति गुल्मं महाध्मानं तूनीं प्रतितुनीमपि॥१०९॥

अथ शूलकेशरी।—

शुद्धं सूतं द्विधा गन्धं यामैकं मर्दयेद्दृढम्।
द्वयोस्तुल्यं शुद्धताम्रं सम्पुटे तन्निरोधयेत्॥११०॥
ऊर्द्ध्वाधो लवणं दत्त्वा मृद्भाण्डे धारयेद्भिषक्।
रुद्ध्वा गजपुटे पाच्यं स्वाङ्गशीतं समुद्धरेत्॥१११॥
सम्पुटं चूर्णयेत् सूक्ष्मं पर्णखण्डे द्विगुञ्जकम्।
भक्षयेत् सर्वशूलार्त्तो हिङ्गु शुण्ठी च जीरकम्॥११२॥
वचामरिचसञ्चूर्णं कर्षमुष्णजलैः पिबेत्।
असाध्यं नाशयेच्छूलं रसः स्याच्छूलकेसरी॥११३॥

चिन्तामणौ—कोरण्टानिम्बूत्थरसैः कोरण्ट वदरं, कोरण्टरसेन निम्बुकरसेन च। चिञ्चोद्भवच्छिन्निरसेन तिन्तिडीत्वग्रसेन। रविसम्पुटस्थं ताम्रपात्रनिहितम्। सामुद्रयन्त्रेण यन्त्रविशेषेण, तदशक्ये लवणयन्त्रेणापि पाकमर्हत्यय रसः, तत्र ताम्रपात्रान्तः रसादिकं संस्थाप्य पुटनोपदेशात्। कृशानुतोयैः मनाक् विपचेत् इति सम्बन्धः, कृशानुतोयैः चित्रककाथैः। तूनीप्रतितून्यौ वातव्याधि-कथिते। प्रतितुनीमित्यत्र ह्रस्वश्छान्दसः॥१०५—१०९॥

शूलकेशरिणि—सम्पुटे इति ताम्रसम्पुटे, पूर्वयोगसत्त्वादात्। अत्र हिङ्ग्वादिक-मनुपेयम्॥११०—११३॥

अथ वन्ध्यादिचार ।—

वन्ध्याला्ङ्गलिकामूलं ग्रहन्तु द्विगुण तयोः ।
वयाणा भावयेच्चूर्णं त्र्यह जम्बीरजद्रवैः ॥११४॥
कृत्वा गजपुटे पश्चात् तत् चार मरिचैर्घृतैः ।
कर्षमात्र पिवेच्छूली तत्क्षणात् सुखमाप्नुयात् ॥११५॥

अथ मृतोत्थापन ।—

अभ्रं ताम्रं तथा लोहं प्रत्येकं संस्कृत पलम् ।
सर्वमेतत् समाहृत्य गृह्णीयात् कुशलो भिषक् ॥११६॥
आज्ये पलद्वादशके दुग्धे तत्स्वरसङ्ख्यके ।
पक्त्वा तत्र क्षिपेच्चूर्णं सुपूतं घनतन्तुना ॥११७॥
विडङ्गत्रिफलावह्नि-त्रिकटूना तथैव च ।
पिष्ट्वा पलोन्मितानेतान् यथा सम्मिश्रता नयेत् ॥११८॥
ततः पिष्ट्वा शुभे भाण्डे स्थापयेत्तद्विचक्षणः ।
आत्मनः शोभने चाह्नि पूजयित्वा गुरु रविम् ॥११९॥

वन्ध्यादिचारे—वन्ध्या वन्ध्याककोंटकी, तस्या मूलम् ॥ ११४।११५ ॥

मृतोत्थापने—संस्कृत मारणपुटनादिभि कृतसंस्कारम् । "अभ्र ताम्र तथा लोहम्" इत्यत्र रसेन्द्रचिन्तामणिरसरत्नाकरकृद्याम् "अभ्र ताम्र रस लोहम्" इति पठित्वा योगस्यास्य चतु समलौहम् इति सज्ञा कृता । रसेन्द्रसारव्याख्याकारस्तु "अभ्र ताम्र रस गन्ध लौह प्रत्येकश पलम" इति रामसेनधृतपाठमङ्गीकृत्य तत्कृतं व्याख्यानमेव "अप्रतिषिद्ध परमतमनुमतमेव" इति न्यायात स्वीकृतवान्, तत्र खलु एषा व्याख्या यत "अभ्रादिगन्धान्ताना मिलिताना चतुर्णां द्रव्याणा तुल्य लौह गृह्णाति, अतश्चास्य चतु समलौहमिति सज्ञा इति वदति" इति । एतत्तु न मनोरम, यत प्रत्येकश' पलम इति अन्त्यस्थितेन प्रत्येकश इति पदेन पञ्चानामेव पलमानता स्वीकर्त्तव्या, न तु लौहस्य सर्वतुल्यमानता इति । दुग्धे तत्स्वरसङ्ख्यके तच्छब्दसङ्ख्यक माने, पलद्वादशमाने इत्यर्थ , "दुग्धे वत्सरसङ्ख्यके" इति रसेन्द्रसारसङ्ग्रह रसेन्द्र-चिन्तामणिसंवादात, "दुग्धेऽपि घृतसङ्ख्यके" इति रसरत्नाकरदर्शनाच्च । घनतन्तुना स्थूलवस्त्रेण । पलोन्मितानिति विडङ्गादीना मिलित्वा पलमानत्वं द्रव्यप्रधाननिर्देशात्

घृतेन मधुना सार्द्धं पाययेन्माषकादिकम्।
अष्टौ माषान् क्रमेणैव वर्द्धयेत्तत् समाहितः॥१२०॥
अनुपानञ्च दुग्धेन नारिकेलोदकेन वा।
जीर्णे शर्करशाल्यन्न-मुद्गमांसरसादयः॥१२१॥
रसपानाविरुद्धानि द्रव्याण्यन्यानि योजयेत्।
हृच्छूलं पार्श्वशूलञ्च आमवातं कटिग्रहम्॥१२२॥
गुल्मशूलं शिरःशूलं यकृत्प्लीहानमेव च।
अग्निमान्द्यं क्षयं कुष्ठं कासं श्वासं विचर्चिकाम्॥
अश्मरीं मूत्रकृच्छ्रञ्च योगेनानेन साधयेत्॥१२३॥

अथ क्षारताम्रम्।—

रसेन ताम्रस्य दलानि लिप्त्वा गन्धेन ताम्राद्द्विगुणेन पश्चात्।
वस्त्रेण बद्ध्वाऽथ समुद्रजेन क्षारत्रयेणापि च वेष्टयित्वा॥१२४॥
मृदा च संलिप्य पुटं ददीत दलानि ताम्रस्य विचूर्णयेत।
धुस्तूरचित्रार्द्र-कटुत्रयैश्च विमर्दयेत्तत् त्रिदिनप्रमाणम्॥१२५॥
कलाप्रमाणेन विषञ्च दत्त्वा वल्लं ददीतास्य च वातशूले॥१२६॥

"विडङ्गादीनामष्टानां मिलित्वा पलमानत्वम्" इति त्रिविक्रमसंवादाच्च। आत्मनः शोभने चाह्नि स्वस्य शोभनचन्द्रताराादिसमन्विते दिवसे। पाययेदिति।—प्रथमेऽह्नि माषमितं भक्षयित्वा क्रमशः नावाह्वृद्धिं कृत्वा अष्टौ माषकान् यावत् वर्द्धयेत्। "शर्करशाल्यन्न" इत्यत्र "लोहितशाल्यन्न" इति रसेन्द्रसारसङ्ग्रह रसरत्नाकरादौ पाठान्तरम्। रसपानाविरुद्धानि रसप्रयोगे अनिषिद्धानि॥ ११९—१२३॥

क्षारताम्रे—समुद्रजेन सामुद्रलवणेन। क्षारत्रयेण स्वर्जिकायावशूकटङ्कणेन। कलाप्रमाणेन ताम्रापेक्षया षोडशांशेन। आदौ द्विगुणेन गन्धेन पारदं कज्जलीकृत्य पश्चात् तया सूततुल्यानि ताम्रपत्राणि लिम्पेत् तानि च ताम्रदलानि समुद्रजादिना आलिप्य वस्त्रखण्डेन बध्नीयात्, ततस्तदुपरि मृदा आलिप्य पुटेत्, अथ तानि ताम्रदलानि विचूर्ण्य धुस्तूरादीनां प्रत्येकद्रवेण त्रिदिनं मर्दयित्वा तत्र ताम्रषोडशांशं विषं मिश्रयेदिति॥ १२४—१२६॥

अथ शूलान्तकः ।—

भस्मसूतस्य खस्यापि पलमेकं पृथक् पृथक् ।
ताम्रभस्मपले तु द्वे गन्धकस्य पलत्रयम् ॥१२७॥
हरितालस्य कर्षांशं विमलं हेममाक्षिकम् ।
पलार्द्धं हलिनीकन्दं नागवल्ली पलार्द्धकौ ॥१२८॥
चतुष्पलन्तु विव्रतमेतत् सर्वं विचूर्णयेत् ।
भूधात्रीस्वरसेनैव भावयेत् सप्तधा भिषक् ॥१२९॥
तथा दन्तीरसैर्वल्लं दद्यादार्द्रकवारिणा ।
तेन कोष्ठे विशुद्धे तु दधिभक्तन्तु भोजयेत् ॥
हरेच्छूलानि सर्वाणि रसः शूलान्तको मतः ॥१३०॥

अथ द्वितीयोऽग्निमुखः ।—

पारदं माक्षिकं ताम्रं कृष्णाभ्रं गन्धकत्रयम् ।
मणिमन्थं विषं हिङ्गु त्वग्निशाकन्धकाञ्चनान् ॥१३१॥
रक्तमारीषनिर्गुण्डी महाराष्ट्राटरूषकम् ।
जयाजयन्तीन्द्र्याभिस्तुणा च विषतिन्दुकान् ॥१३२॥
मर्द्दितं कुक्कटपुटे पचेदग्निमुखाह्वयः ।
अष्टगुञ्जामितः सोऽयं प्रयोज्यः साज्यनागरः ॥
हिङ्गुसौवर्चलोष्णाम्बु-युतो वा गुल्मशूलजित् ॥१३३॥

शूलान्तके—भस्मसूतस्य रससिन्दूरस्य । खस्य अभ्रभस्मन । विमलं रौप्यमाक्षिकं, विमलहेममाक्षिकयोरपि प्रत्येकं कर्षांशं ग्राह्यं । हलिनीकन्दः लाङ्गलीमूलम । नागवल्ली पलार्द्धकौ इति प्रत्येकम । भूधात्री तामलकी ॥ १२७—१३० ॥

द्वितीयाग्निमुखे—गन्धकत्रयं गन्धकस्य त्रयो भागा इत्यर्थः, श्वेतरक्तपीतभेदेन त्रिविधगन्धकानित्यर्थो वा । "गन्धकत्रयम" इत्यत्र "गन्धकं समम" इति पाठः युक्तः, समानतन्त्रे एतत्सदृशयोगान्तरदर्शनात । मणिमन्थं सैन्धवम । अग्निः चित्रकः शाकन्धः स्वर्णविशेषः काञ्चनः धस्तूरः तान् । "त्वग्निशाकन्धकाञ्चनान्" इत्यत्र "त्वङ्गिशाकन्द-काञ्चनान" इति पाठकल्पना साधीयसी स्वधा च । "त्वग्निशाकाम्लकाञ्चनान्" इति कस्यचित पाठः । रक्तमारीषः रक्ततण्डुलीयः । महाराष्ट्री जलपिप्पली । जया विजया । विषतिन्दुकान् कुचेलकान् । पारदादीनां विषतिन्दुकान्तानां प्रत्येकमेकौ

अथ द्वितीयत्रिनेत्र।—

रसताम्रगन्धकानां त्रिगुणोत्तरवर्द्धिताशानाम्।
अम्लेन मर्दितानां पुटपक्वाना निषेवितं भस्म॥१३४॥
गुञ्जाप्रमाणमार्द्रक-सिन्धूत्थचूर्णसंयुक्तम्।
एरण्डतैलमाक्षिकमथ वा पटुहिङ्गुजीरकोपेतम्॥१३५॥
शमयति शूलमशेषं तत्तद्रसभावितं बहुशः।
उपचूर्णैरनुपानैस्तैस्तैः सहितं कफानिलार्त्तिहरम्॥१३६॥
एतच्च हरिणशृङ्ग-मृतकाञ्चनटङ्कणोपेतम्।
सघृतमधु पक्तिशूलं शमयति शूल त्रिनेत्ररसः॥१३७॥

अथ उदयभास्कर।—

तोलतुल्यं रसं शुद्धं गन्धकं तच्चतुर्गुणम्।
विधाय कज्जलीं श्लक्ष्णा ततो निम्बुकवारिणा॥१३८॥
कल्कं कुर्वीत सखल्ले यावद्यामचतुष्टयम्।
द्वितोलमथ ताम्रस्य तनुपत्राणि सर्वशः॥१३९॥
कल्केन तेन निम्बूक-रसेनाप्लाव्य खल्लके।
स्थापयेदातपे तीव्रे पिण्डीकृत्य ततः परम्॥१४०॥
मूषामध्ये निरुध्याथ कुक्कुटाख्यैस्त्रिभिः पुटैः।
पचेच्चुल्ल्यां विनिक्षिप्य चुल्लोपरिमितोपलैः॥१४१॥

भाग, गन्धकस्य च भागत्रयम् एकत्र सम्मर्द्य जयाजयन्त्यो रसेन एकैकदिन मर्दयित्वा कुक्कुटपुटे पचेत॥१३१—१३३॥

द्वितीयत्रिनेत्रे—त्रिगुणोत्तरवर्द्धिताशानाम् उत्तरोत्तरत्रिगुणवृद्धानाम्, तेन रसस्य एको भाग ताम्रस्य भागत्रय गन्धकस्य च नव भागा ग्राह्या। अम्लेन काञ्जिकेन। पटु लवण, शूलहरत्वात् सौवर्चलमेवात्र ग्राह्यम्। तत्तदिति।—कफवातनाशन-द्रव्याणा रसे सप्तवार भावित रसादिभस्म सुचूर्णिततत्तद्द्रव्यानुपाने सह प्रयुक्त कफवातजगदापह भवेत। एतत त्रिनेत्रम। पक्तिशूल परिणामशूलम॥१३४—१३७॥

उदयभास्करे—कल्कमिति।—यावद्यामचतुष्टय प्रहरचतुष्टय यावत् निम्बुक-रसेन मर्दयित्वा कल्क कुर्य्यात्। तेन कल्केन निम्बुकरसपिष्टकज्जलीकल्केन।

तत आकृष्य सम्मर्द्य करण्डे तं विनिक्षिपेत् ।
रसोऽयं सर्वरोगघ्नो नृणामुदयभास्करः ॥१४२॥
हन्ति शूलानि सर्वाणि तमांसीव दिवाकरः ।
पर्णखण्डिकया सार्द्धं देयश्चेत्यपरे जगुः ॥
पथ्यं रोगोचितं देयं रसस्यानुचितं त्यजेत् ॥१४३॥

अथ शूलगजकेशरी ।—

पलप्रमाणसूतेन बलिना द्विगुणेन च ।
शुद्धद्विपलताम्रेण कृत्वा कज्जलिकां ब्यहम् ॥१४४॥
पलमानेन कर्त्तव्यं शुद्धताम्रस्य सम्पुटं ।
पिधानपात्रसङ्कुल-तलपात्रास्यवान् खलु ॥१४५॥
कज्जलीं सम्पुटस्यान्तर्निदध्यात्तदनन्तरम् ।
अधस्तादुपरिष्टाच्च सम्पुटस्य क्षिपेत् खलु ॥१४६॥
आकण्ठं पटुचूर्णं त पिधाय च निरुध्य च ।
विशोष्य गजसञ्ज्ञेन पुटेन पुटयेत्ततः ॥१४७॥
पटचूर्णं विधायाथ सिन्धुमध्ये विनिक्षिपेत् ।
पथ्याऽऽर्द्रकरसोपेतो वल्लमानेन सेवितः ॥
रसो निःशेषशूलघ्नः स्याच्छूलगजकेशरी ॥ १४८ ॥

चुल्लीपरिमितोपलैः यावता उपलेन चुल्ली परिपूर्णा भवेत, तावता उपलेन पचेदित्यर्थः ॥ १३८—१४२ ॥

शूलगजकेशरिणि—बलिना गन्धकेन । पिधानेति ।—पिधानपात्रेण आच्छादनपात्रेण, सङ्कुलं संयुक्तमित्यर्थः तलपात्रम् अधःस्थभाजनम्, आधारभूतपात्रमित्यर्थः, तस्य तत्, तच्च तत आस्यनश्चेति विग्रहः, आस्यवान् मुखवान्, उपरि छिद्रविशिष्ट-सम्पुट इत्यर्थः, पलमानताम्रेण एवं सम्पुटं कुर्यात, यस्य उपरि द्वारं स्यात इति । गजसञ्ज्ञेन पुटेन गजपुटेन । पटचूर्णं वस्त्रपूतं चूर्णमित्यर्थः, "पटुचूर्णम" इति पाठे—लवणचूर्णमित्यर्थः । सिन्धुमध्ये सैन्धवाभ्यन्तरे, तच्च शैत्यरक्षणार्थं कर्त्तव्यम । अयं विधिः,—सूतादित्रयं कज्जलीकृत्य सच्छिद्रताम्रपुटाभ्यन्तरे निधाय च ताम्र-निरुन्ध्यात्, ततः स्थाल्यां तं पुटं निधाय पुटस्य उपर्यधः लवणं निदध्यात्, अन्त

अथ द्वितीयक्षारताम्रम्।—

पलमितमृतशुल्वं तन्मितं गन्धचूर्णं
वसुमितपलमानं तिन्तिडीक्षारचूर्णम्।
त्रयमिदमभिदिष्टं क्षारताम्राख्यमेतत्
हरति सकलशूलं पीतमुष्णोदकेन ॥ १४९ ॥

अथ ताम्राष्टकम्।—

हिङ्गु व्योषं मधुकरुचकं तिन्तिडीक्षारताम्रं
सर्वञ्चैतन्मसृणमृदितं पीतमुष्णोदकेन।
क्षिप्रं शूलं क्षपयति नृणां तीव्रपीडासमेतं
ध्वान्तं भानोरिव समुदयः साधु ताम्राष्टकं हि ॥१५०॥

अथ वडवानलगुटिका।—

तालं ताप्यं कनककुनटी-कान्तगन्धार्कसूतै-
स्तुल्यांशैस्तैररुणमधुरं दीप्यकं सर्वतुल्यम्।

शरावेण स्थालीमुखं पिधाय मृद्वस्त्रेणालिप्य च गजपुटं दद्यात्। अनन्तरं स्वाङ्गशीतं समुद्धृत्य ताम्रपुटसहितमौषधं चूर्णयित्वा कूपिकायां संस्थाप्य च सैन्धवचूर्णमध्ये स्थापयेदिति ॥१४४—१४८॥

द्वितीयक्षारताम्रे—वसुमितपलमानम् अष्टपलमानम्। तिन्तिडीक्षारचूर्णं तिन्तिडी-त्वक्क्षारम् ॥ १४९ ॥

ताम्राष्टके—मधुकरुचकं मधुकेन यष्टिमधुना सह रुचकं सौवर्चललवणम्। मसृणमृदितं सूक्ष्मपिष्टम्। ध्वान्तमिति।—भानोः सूर्य्यस्य समुदयः प्रकाशः ध्वान्तं तिमिरमिवेति योजना ॥ १५० ॥

वडवानलगुटिकायां—कुनटी मनःशिला। तुल्यांशैरिति कनकादिभिः सम्बध्यते। अत्र तालताप्ययोः पृथङ्निर्देशेऽपि कनकाद्येकभागसमता बोद्धव्या विशेषानिर्देशात्। तैः कनकादिभिः सूतान्तैः, न तु तालादिभिः, तालताप्ययोर-समासनिर्देशात्, अरुणमधुरं, तुल्यमिति शेषः, अरुणम् अरुणमूला त्रिवृत्, मधुरं मधुरिका, अरुणेन सह मधुरमिति विग्रहः, तेन च अरुणमधुरयोर्मिलितयोः कनकादितुल्यता। दीप्यकं सर्वतुल्यमिति तालादिमधुरान्तानां चूर्णानां तुल्यं

एतैः सर्वैस्त्रिकटु च समं कज्जलीकृत्य सर्वं
हिङ्ग्वम्भोभिर्मुनिमितदिनैर्भावयेत् मसृणत्वं ॥१५१॥

जयन्त्याः काकमाच्याश्च निर्गुण्ड्याश्चाऽऽर्द्रकस्य च ।
स्वरसैर्भावयेत् पिष्ट्वा सकृदेव दिने दिने ॥
कर्त्तव्या मरिचैस्तुल्याश्छायाशुष्काश्च गोलिकाः ॥१५२॥

हन्त्येषा बडवानलाख्यगुटिका संसेवितोष्णाम्बुना
सर्वं शूलगदं कृमिञ्च सकलं वैषम्यवृत्तिं क्षुधः ।
मन्दाग्निं ग्रहणीगदं श्वयथुरुक्पाण्डुञ्च गुल्मार्शसी
वातश्लेष्मगदं तथोदररुजं श्वासञ्च कासं ज्वरम् ॥१५३॥

अथ अग्निकुमारः ।—

रसगन्धकयोः कृत्वा कज्जलीं तुल्यभागयोः ।
पादांशममृतं दत्त्वा शुक्तिभस्म कलांशकम् ॥१५४॥
हंसपादीरसैः सम्यङ्मर्दयित्वा दिनत्रयम् ।
स्थूलगोलं ततः कृत्वा परिशोष्य खरातपे ॥१५५॥
निरुध्य वालुकायन्त्रे क्रमपुष्टेन वह्निना ।
पचेदेकमहोरात्रं स्वतः शीतं विचूर्ण्य च ॥१५६॥
तुल्यांशममृतं दत्त्वा मर्दयेदार्द्रकद्रवैः ।
विलिप्य स्थालिकामध्ये ततोऽन्यस्थालिकोदरे ॥१५७॥
पलाशभस्मतं चिप्त्वा रसस्थालीञ्च तन्मुखे ।
न्युब्जां दत्त्वा दृढं रुद्ध्वा चुल्ल्यामारोप्य यत्नतः ॥१५८॥

यमानीचूर्णम् । एतैः सर्वैः त्रिकटु च समामिति मिलितत्रिकटुचूर्णं सर्वचूर्णसमानम् । कज्जलीकृत्य इत्यत्र कज्जलीशब्दः सुष्ठु मर्दनस्योपलक्षणं, कज्जली यथा दृढं मर्दयित्वा क्रियते, तथा सम्मर्द्य इत्यर्थः, अथवा—योगेऽस्मिन् सूतगन्धकसद्भावात् कज्जलीकृत्येति पदम् । हिङ्ग्वम्भोभिः हिङ्गुनः शीतकषायैः फाण्टकषायैर्वा । मुनिमितदिनैः सप्तभिर्दिनैः ॥ १५१—१५३ ॥

अग्निकुमारे—पादांशममृतमिति कज्जलीभागमपेक्ष्य विषस्य तुर्य्यांशम् । एवं

यामं प्रज्वालयेदग्निं विचूर्ण्य तदनन्तरम् ।
करण्डके विनिक्षिप्य स्थापयेदतियत्नतः ॥
रसो ह्यग्निकुमाराख्यो दिष्टो मन्थानभैरवैः ॥१५९॥
हन्यादत्यग्निमान्द्यं ज्वरहरमखिलं वातजातं चयार्त्तिं
शोफाढ्यं पाण्डुरोगं कफजनितगदान् प्लीहगुल्मं गुदार्त्तिम् ।
सर्वाङ्गीणञ्च शूलं जठरभवरुजं खञ्जतां पङ्गुलत्वं
सर्वांश्चासाध्यरोगान् हरिरिव दुरितं रक्तगुल्मं वधूनाम् ॥१६०॥

अथ शम्बूकादिलौहम् ।—

शम्बूकं त्र्यूषणं पञ्च लवणानि मृतायसम् ।
समांशं पेषयेन्मूत्रैः कृष्णाजस्य दिनावधि ॥
भक्षयेत् कर्षमात्रन्तु परिणामाख्यशूलनुत् ॥१६१॥

अथेन्द्रवारुणिकादिचूर्णम् ।—

इन्द्रवारुणिकामूलं कटुत्रयसमायुतम् ।
पिबेदुष्णाम्बुना हन्ति शूलमत्यन्तदुःसहम् ॥१६२॥

अथ भूदार्वादियोगः ।—

भूदारुवटमूलञ्च शूलजित् सोष्णवारिणा ॥१६३॥

अथ सद्यः शूलहरो योगः ।—

सद्योभवं हरेच्छूलं लवणं वाऽऽरनालकैः ॥१६४॥

कलाशकमपि कज्जलीभागापेक्षया षोडशांशम् । हंसपादी मण्डूकपर्णी । क्रमपुटेन क्रमवर्द्धितेन । रसस्थालीम् औषधलिप्तभाण्डम् । न्युब्जाम् अधोमुखीम् ॥१५४—१६० ॥

शम्बूकादिलौहे—शम्बूकं शम्बूकभस्म । कृष्णाजस्य कृष्णवर्णच्छागस्य । "कृष्णाजस्य" इत्यत्र "कृष्णाजायाः" इत्येव युक्तः पाठः, गोऽजादीनां स्त्रीणामेव मूत्रस्य ग्रहणानुशासनात् ॥ १६१ ॥

इन्द्रवारुणिकादिचूर्णे—इन्द्रवारुणिकादीनां चतुर्णां समत्वम् ॥ १६२ ॥

भूदार्वादियोगे—भूदारु काष्ठदारु, देवदारुभेद इति यावत्, "भूदारु" इत्यत्र "भूदार" इति पाठे—भूदारं भूमिस्फोटं भुवं दारयति इति विग्रहे भूच्छत्राक इत्यर्थः ॥ १६३ ॥

सद्यःशूलहरयोगे—लवणं सैन्धवं सौवर्चलं वा ॥ १६४ ॥

अथ सद्य शूलहरयोगद्वयम ।—

घृतेन सैन्धव वाऽथ उष्णतोयैः सुवर्चलम् ॥ १६५॥

अथ चारवटी ।—

अमृतं हेमभस्माथ शङ्खं चिञ्चा सुभास्करम् ।
क्रमाद्द्विगुणितं कृत्वा तत्तुल्यञ्च कटुत्रिकम् ॥१६६॥
तुलसी भृङ्गराजश्च मातुलुङ्गार्द्रकद्रवैः ।
भावित बहुशश्चूर्णं रजो वा गुलिकाऽपि वा ॥१६७॥
गुञ्जामात्रन्तु सेवेत गुल्माष्ठीला विनाशयेत् ।
मन्दाग्निं ग्रहणीमर्शो शूलरोगमरोचकम् ॥
एषा चारवटी नाम कृशदेहेषु युज्यते ॥१६८॥

सद्य शूलहरयोगद्वये—घृतेन इत्यादिना एक उष्णतोयैरित्यादिना च द्वितीयो योग । क्वचिदेतच्छ्लोकानन्तर "नाग वङ्ग सुताम्र दरदमन शिला तुल्य-ताप्याभ्रगन्ध भस्म स्वर्णेन तुल्य रसकमपि रविचीरघृष्ट सुगोलम । कृत्वा पक्वा च यन्त्रे लवणविरचिते भावयेदार्द्रकाभिर्वारान् सप्त द्विवल्ल समधुमगधया योजित, सेवनीय ॥ कार्श्ये शूलेऽग्निमान्द्ये विविधसमुचितैरौषधै सन्निपाते हृद्रोगे गुल्म-मेहे कफपवनभवे सर्ववातज्वरेऽपि । देयो युक्त्या रसेन्द्रस्त्रिभुवनविदितो भोगि-लोके प्रसिद्धो नागाना वल्लभो यो गरगदगलना रक्तपित्तप्रहन्ता ॥ इति नागवल्लभो रस । अथ द्वितीय,—नाग सुवङ्ग रसभस्म ताम्र सार शिलाहिङ्गुलमाक्षिकञ्च । घन सुगन्ध मृतहेम खर्पर सर्वं सम खल्लतले विघृष्टम् ॥ अर्केण ताम्रेण विधाय गोल मृत्स्नायुक्ते सप्तमिते सुघर्मे । भाण्डे त्रिभागलवणोपरि सन्निवेश्य सम्पूर्णयेच्च लवणेन निरुध्य यत्नात ॥ सिद्ध भवेत भानुमितैस्तु यामकैश्चुल्ल्योपरिस्थ मृदुमध्य-तीव्रके । शीत समाकृष्य विचूर्ण्य सप्तधा चण्डांशुसशोषितशृङ्गबेरकै । नाग-वल्लभरसो द्विवल्लको मागधीमधुयुतश्च सर्वजित् ॥ इति द्वितीयो नागवल्लभरस. ।" इत्यधिक पाठो दृश्यते ॥ १६५ ॥

चारवट्या—चिञ्चा तिन्तिडीत्वग्भस्म । सुभास्कर प्रशस्तताम्र, तच्च मारितपुटित ग्राह्यम् । तत्तुल्यञ्च कटुत्रिक सर्वचूर्णसमान त्रिकटुचूर्णं ग्राह्यम् । भावित बहुशश्चूर्णमिति तुलस्यादीना प्रत्येकद्रवेण सप्तवारान् भावितम् ॥१६६—१६८॥

अथ कार्श्यचिकित्सा ।—

अथामृतार्णवः ।—

रसभस्म त्रयो भागा भागैकं हेमभस्मकम् ।
सर्वांशममृतासत्त्वं सितामध्वाज्यमिश्रितम् ॥१६९॥
दिनैकं मर्दयेत् खल्ले माषैकं भक्षयेत् सदा ।
कृशानां कुरुते पुष्टिं रसोऽयममृतार्णवः ॥
अश्वगन्धापलार्द्धञ्च गवां क्षीरैः पिबेदनु ॥१७०॥

अथ पूर्णचन्द्रः ।—

मृतसूताभ्रलोहं वै शिलाजतु विडङ्गकम् ।
ताप्यं क्षौद्रं घृतं तुल्यमेकीकृत्य विमर्दयेत् ॥१७१॥
पूर्णचन्द्ररसो नाम्ना माषैकं भक्षयेत् सदा ।
शाल्मलीपुष्पचूर्णञ्च क्षौद्रैः कर्षं पिबेदनु ॥१७२॥
दुर्बलो बलमाप्नोति मासैकेन यथा शशी ।
कृशानां बृंहणं देयं सर्वं पानान्नभेषजम् ॥
निद्रा चैव दिवा रात्रौ छागमांसाशनं तथा ॥१७३॥

अथ स्थौल्यचिकित्सा ।—

अथ वडवाग्निमुखः ।—

शुद्धसूतं मृतं ताम्रं तालं बोलं समं समम् ।
अर्कक्षीरैर्दिनं मर्द्यं क्षौद्रैर्लेह्यं द्विगुञ्जकम् ॥१७४॥

रूक्षान्नपानादिनिदानसाधर्म्यात् वातजन्यत्वसाधर्म्याच्च शूलानन्तरं कार्श्य-चिकित्सितमाह । तत्र अमृतार्णवे—सर्वांशममृतासत्त्वम् अमृतासत्त्वं गुडूचीसारः, तस्य च चत्वारो भागाः ॥ १६९।१७० ॥

पूर्णचन्द्रे—मृतसूतं रससिन्दूरं । ताप्यं सुवर्णमाक्षिकम् । बृंहणं पुष्टि-जननम् ॥ १७१—१७३ ॥

कार्श्यप्रतियोगित्वात् तथा "स्थौल्यकार्श्ये वरं कार्श्यम्" इत्यत्र "स्थौल्य-

बडवाग्निमुखो नाम स्थौल्य तुन्दं नियच्छति ।
पलं चौद्रं पलं तोयमनुपानं पिबेत् सदा ॥१७५॥

अथ स्थौल्ये पूर्वकृत्यनिर्देश ।—

तत्राऽऽदौ पञ्चकर्माणि लङ्घनाद्यैरुपाचरेत् ॥१७६॥

अथ मध्वार्द्रकप्रयोग ।—

आर्द्रकं मधुना खादेन्मेदोऽनिलकफान् जयेत् ॥१७७॥

अथ अग्निकुमार ।—

गन्धकेन द्विकर्षेण शुद्धसूतेन तावता ।
विधाय कज्जलीं सूक्ष्मामेकवासरमर्दनात ॥१७८॥
कर्षमात्रं विषं दत्त्वा मर्दयित्वा दृढ पुनः ।
हंसपादीरसैस्तैर्वा स्तोकं स्तोकं मुहुर्मुहुः ॥१७९॥
कुडवार्द्धमितैः पश्चाद्गोलं कृत्वा विशोष्य च ।
काचकूप्या विनिक्षिप्य शुल्वे नाडीं विधाय च ॥१८०॥
देवीशास्त्रे पुनः प्रोक्तं विषं कर्षविचूर्णितम् ।
ऊर्द्ध्वाधो गोलकाना हि काचकूप्या विनिक्षिपेत् ॥१८१॥

पदीपादानाच्च कार्य्यानन्तर स्थौल्यचिकित्सितमुच्यते । तत्र बडवाग्निमुखे—बोल गन्धरस । तुन्द स्थूलोदरताम् ॥ १७४।१७५ ॥

स्थौल्यचिकित्साया प्रथमकृत्यमुपदिशति, तत्रेति ।—पञ्चकर्माणि वमनविरेचनादीनि, कुर्य्यादिति शेष । लङ्घनाद्यैरित्यत्रादिपदेन विरूक्षणादीना परिग्रह. ॥१७६॥

मध्वार्द्रकप्रयोगे—सर्व स्पष्टम् ॥ १७७ ॥

अग्निकुमारे—सूक्ष्मा श्लक्ष्णामित्यर्थ । हंसपादीति ।—कुडवार्द्धमितै पलद्वयप्रमाणैः हंसपादीरसै मण्डूकपर्णीरसै , कुडवार्द्धमित रस कृत्स्नमेव युगपद्दत्त्वा मर्दयेत्. अथवा मुहुर्मुहु स्तोकं स्तोक दत्त्वा मर्दयेदित्यर्थ । शुल्वे नाडी विधाय च नाडी कूपिकाया नाल, नालवत् ऊर्द्ध्वीभूताग्रविशेषमित्यर्थ, शुल्वे ताम्रपत्रे विधाय स्थापयित्वा, कूपिकाया मुख ताम्रपत्रेणाच्छाद्य इत्यर्थ । एव स्वमतमभिधाय इदानी देवीशास्त्रोक्तमत दर्शयितुमाह, देवीति ।—देवीशास्त्रे पार्वतीप्रोक्ततन्त्रे । स्वमते सविषमेव कज्जलीगोलक काचकूप्या स्थापयेत्, देवीशास्त्रे तु मर्दनकाले

निक्षिपेत् कज्जलीं मध्ये यतस्वाग्र्यं प्रजायते।
ततश्च द्व्यङ्गुलोत्सेध-मृदा कूपीं विलिप्यताम् ॥१८२॥
विशोष्य बालुकायन्त्रे यन्त्रवर्गप्रकाशिते।
अधोमुखीं घटीं क्षिप्त्वा क्षिपेदुपरि बालुकाम् ॥१८३॥
निरुध्य भाण्डवक्त्रञ्च चुल्ल्यामारोप्य यत्नतः।
वह्निं प्रज्वालयेत् सार्द्धं दिनं क्रमविवर्द्धितम् ॥१८४॥
स्वाङ्गशीतलमाकृष्य सह ताम्रेण मर्दयेत्।
पलार्द्धं मरिचं सूक्ष्मं कर्षार्द्धं वत्सनाभकम् ॥१८५॥
विनिक्षिप्य विमर्द्याथ क्षिपेद्रम्यकरण्डके।
नन्दिना तु समुद्दिष्टं रसतुल्यं मरीचकम् ॥
वत्सनाभन्तु कर्षांशं मिश्रयेत विचूर्ण्य तत् ॥१८६॥

निर्दिष्टोऽग्निकुमारको रसवरो देव्या तथा नन्दिना
सेव्यो वैद्यवरैः प्रभूतफलदश्चाऽऽनाहविध्वंसनः।
सद्यः पाचनदीपनो रुचिकरः शीघ्रं तथाऽष्ठीलिका
सामाञ्च ग्रहणीं हरेत् कफरुजः कण्ठामयध्वंसनः ॥१८७॥
बल्यो भोजनतोयभक्ष्यसुखदः श्रेष्ठो रसानां प्रभु-
र्मन्दाग्निं कफवातजं क्षयगदं निःशेषशूलामयान्।
श्वासं कासगदं तथा गुदरुजं स्थौल्यञ्च पाण्डुं तथा
शोफं वातगदं तथा खलु रतीतुल्योऽर्द्धपर्णान्वितः ॥१८८॥

कज्जल्या सह विषचूर्णकर्षमदत्त्वा केवलरसगन्धककृतकज्जलीगोलकस्य ऊर्द्धोभ्यं तत् दत्त्वा कूप्यां स्थापयेदिति। अग्र्यं गुणोत्कर्षम्। यन्त्रवर्गप्रकाशिते यन्त्राध्यायोक्ते। अधोमुखीं घटीं क्षिप्त्वा बालुकायन्त्रस्थकूपिकाया मुखोपरि स्वल्पघटमेकमधोमुखं दत्त्वा, कूपिकामुखं घटान्तरेणाच्छाद्य इत्यर्थः। सार्द्धमित्यस्य दिनमित्यनेनान्वयः, सार्द्धं दिनमित्यर्थः। क्रमविवर्द्धितं मृदुमध्यतीव्रक्रमेण विवर्द्धितम्। सह ताम्रेण कूपिकामुखस्थताम्रपत्रेण सह। मरिचवत्सनाभमिश्रणे नन्दिमतमाह,—नन्दिनेति। रतीति।—रत्तिमितः रसः ताम्बूलदलार्द्धेन सहितः

कणया सितयाऽऽज्येन दातव्योऽसौ महारसः ।
प्रत्यष्ठीलादिरोगेषु जलकूर्मगदेषु च ॥१८९॥
नन्दिना तु पुनः प्रोक्तस्तत्तद्रोगहरौषधैः ।
निहन्ति सकलान् रोगान् दुष्पल्लीव मनोरथान् ॥१९०॥

रसजनितविदाहे शीततोयाभिषेको
मलयजघनसारालेपनं मन्दवातः ।
तरुणदधि सिताक्तं नारिकेलीफलाम्भो
मधुरशिशिरपानं शीतमन्यच्च शस्तम् ॥१९१॥

सौभाग्यं मेघनादाङ्घ्रि-सितामधुकचन्दनम् ।
तुषोदकेन दातव्यं सर्वस्मिन् रसवैकृते ॥१९२॥
छर्द्यां तृष्णासु दातव्यं कपित्थं वा सिताऽन्वितम् ।
कुमारीशीतलेपश्च सर्वाङ्गीणः प्रशस्यते ॥१९३॥
क्षीरं मधुसितापीतं क्वाथो वाऽमृतबन्धुकः ।
उपचारा अमी सर्वे प्रशस्ता रसतापिनाम् ॥१९४॥
रसस्याग्निकुमारस्य प्रभावं वेत्ति तत्त्वतः ।
गिरिजा नन्दिकेशो वा यद्वा नारायणः प्रभुः ॥१९५॥

इत्यर्थः । प्रत्यष्ठीला वातव्याधिर्निर्दिष्टा । जलकूर्मगदेषु कमठाख्यरोगेषु । रस-व्यापत्तौ प्रतीकारमाह, रसेति ।—रसजनितविदाहे एतदौषधसेवनात् दाहसन्तापा-दिकं जायते चेत् तदा इत्यर्थः । मलयजं श्वेतचन्दनं घनसारं कर्पूरं । तरुणदधि सप्तरात्रपर्युषितं दधि, "सप्तरात्रव्यतीते तु दधि तरुणमुच्यते" इति लक्षणात् । सौभाग्यं टङ्कणम् । मेघनादाङ्घ्रि रक्ततण्डुलीयमूलम् । तुषोदकेन सतुषयवकृत-काञ्जिकेन । रसवैकृते रससेवनजातविदाहादिषु । कुमारीशीतलेपः घृतकुमार्याः शीतलप्रलेपः । क्वाथो वाऽमृतबन्धुकः अमृता गुडूची, छन्दोऽनुरोधादत्र ह्रस्वः, "अमृतवृषपटोलम्" इत्यादावपि गुडूच्यर्थकः अमृतशब्दो दृश्यते, बन्धुकः बन्धुजीवाख्यः, तौ स्तः यत्र क्वाथे सः अमृताबन्धुककृतक्वाथ इत्यर्थः. ॥ १७८—१९५ ॥

अथाम्लपित्तनिदानम् ।—

अम्लोद्गारवमी हस्त-पादहृत्कुक्षिदाहता ।
अम्लपित्ते मुखं तिक्तं भवेच्छूलमरोचकम् ॥१९६॥

अथ अम्लपित्तचिकित्सा ।—

अथाम्लपित्तोपचाराः ।—

अम्लपित्ते तु वमनं तदन्ते मृदुरेचनम् ।
ऊर्द्धगं वमनैर्हन्यादधोगं रेचनैर्जयेत् ॥
तिक्तभूयिष्ठमाहारं पानञ्चापि प्रकल्पयेत् ॥१९७॥

अथ वमनयोगः ।—

अम्लपित्ते च वमनं पटोलारिष्टवारिभिः ॥१९८॥

अथ विरेचनयोगः ।—

विरेचनं त्रिवृच्चूर्णं मधुधात्रीफलैर्भवेत् ॥१९९॥

अथ लीलाविलासः ।—

शुद्धसूतं शुद्धगन्धं मृतं ताम्राभ्ररौप्यकम् ।
तुल्यांशं मर्दयेद्यामं रुद्ध्वा लघुपुटे पचेत् ॥२००॥
अक्षधात्रीहरीतक्याः क्रमवृद्ध्या विपाचयेत् ।
जलेनाष्टगुणेनैव ग्राह्यमष्टावशेषितम् ॥२०१॥

तृषामोहस्वप्नस्वेदादिलक्षणे स्थौल्याम्लपित्तयोः लक्षणसाधर्म्यात् स्थौल्यचिकित्सानन्तरम् अम्लपित्तचिकित्सां विवक्षुरादौ तल्लक्षणमाह, अम्लोद्गारेति ।—सुगमम् ॥१९६॥

अम्लपित्तस्य क्रियासूत्रमाह, अम्लेति ।—तदन्ते वमनान्ते । ऊर्द्धगमिति ।—ऊर्द्धगस्य कफसंसृष्टत्वात् तत्र कफहरं वमनं विहितम् । अधोगमिति ।—अधोगस्य वातसंसृष्टत्वेऽपि विरेकविधानं योगवाहस्य वायोः पित्तप्रशमनेनैव प्रशमाभिप्रायात्, विरेचनस्याग्र्यं पित्तहरेषु ॥ १९७ ॥

"ऊर्द्धगम्" इत्यादिना वमनविरेचनयोः विधानमुक्त्वा आदौ वमनयोगमाह, अम्लपित्ते इति ।—सुगमम् ॥ १९८ ॥

विरेचनयोगमाह, विरेचनमिति ।—त्रिवृच्चूर्णस्य माषकत्रयं माषकचतुष्टयं वा प्रयोज्यम् । धात्रीफलैः आमलकस्वरसैः तत्क्वाथैर्वा ॥१९९॥

लीलाविलासे—अक्षेति ।—क्रमवृद्ध्या उत्तरोत्तरभागवृद्ध्या अक्षधात्रीहरीतक्या, भागमिति शेषः, अष्टगुणेन जलेन विपाचयेदिति योजना । अक्षादीनाञ्च "भाव्यद्रव्य

अनेन भावयेत् सर्वं पूर्वं सूतं पुनः पुनः।
पञ्चविंशतिवारञ्च तावद्भिर्भृङ्गजैर्द्रवैः ॥२०२॥
शुष्कं तच्चूर्णितं खादेत् पञ्चगुञ्जं मधुप्लुतम्।
रसो लीलाविलासोऽयमम्लपित्तं नियच्छति ॥२०३॥

अथ कुष्माण्डखण्डम्।—

कुष्माण्डस्य रसस्य सत्पलशतं तुल्यं गवां क्षीरकं
धात्रीचूर्णपलाष्टकं लघु पचेद्यावत् कृतं पिण्डितम्।
धात्रीतुल्यसितं पलार्द्धममृतं तल्लेहकं लेहयेत्
ख्यातं कुष्माण्डखण्डं क्षपयति नितरामम्लपित्तं न चान्यत् ॥२०४॥

अथ ताम्रद्रुतिः।—

पलं नेपालशुल्बस्य पत्राणि सुतनूनि च।
कृत्वा कण्टकवेध्यानि कारयेत्तदनन्तरम् ॥२०५॥
कर्षैकं द्विगुणं ग्राह्यं क्रमात् सूतकगन्धयोः।
मर्दितव्यं शिलाखल्ले रसैर्दन्तशठस्य वै ॥२०६॥
तत् कल्कं पङ्कवत् कृत्वा तेन पर्णानि सर्वशः।
लेपयित्वा शिलाखल्ले स्थापयेदातपे खरे ॥२०७॥

सम कार्यम" इत्यादिपरिभाषानुसारेण सूतादिभि पञ्चभि सह समभागता ज्ञातव्या। पूर्वं सूत लघुपुटे पक्व सूतादिकम्। पुन पुन पञ्चविंशतिवारमित्यर्थ, अनन्तरोक्त-भृङ्गजद्रवेण पञ्चविंशतिवारभावनादर्शनात। तावद्भिर्भृङ्गजैर्द्रवै यावद्भि त्रिफला-क्वाथे भावना कृता तावत्परिमितै भृङ्गराजरसैरित्यर्थ ॥ २००—२०३ ॥

कुष्माण्डखण्डे—सत्पलशत यथाविधि गृहीत पलशतमित्यर्थ, एतेन "स्विन्न-पीडितकुष्माण्डात" इत्यादिना तन्त्रान्तरोक्त रसग्रहणविधानमुक्त भवति। तुल्य कुष्माण्डरसतुल्यम्। लघु पचेत मृदुवह्निना पचेत, यद्वा—मृदुपाक कुर्यात न तु खरमित्यर्थ। धात्रीतुल्यसित धात्रीतुल्या सिता यत्र रसपलशते तदिति विग्रहे सितायाः पलाष्टकमित्यर्थ। अमृतम् अमृता, गुडूचीत्यर्थ। गुडूच्यर्थक-स्यामृताशब्दस्य अकारान्तप्रयोगोऽपि दृश्यते तच्च प्रागेव प्रदर्शितम्। न चान्यत् अन्यत अन्यथेत्यर्थ, न च नैव, भवतीति शेष ॥ २०४ ॥

ताम्रद्रुतौ—नेपालशुल्बस्य नेपालदेशजताम्रस्य। कर्षैकमिति।—सूतस्य कर्षं

यामैकेन समुद्धृत्य द्रवीभवति नान्यथा ।
वान्ति विरेचनं कृत्वा शुद्धकायो यथाविधि ॥२०८॥
पूजयित्वा सुरान् वैद्यान् विप्रान् हेमाम्बरादिभिः ।
तां द्रुतिं मधुसर्पिर्भ्यां रक्तिकामाषकादिभिः ॥२०९॥
लीढ्वा तत्र पिबेत्तक्रं धान्याम्लकमथापि वा ।
जीर्णे सायं समश्नीयाच्छाल्यन्नन्तु पुरातनम् ॥२१०॥
सेव्यमानं निहन्त्येतदम्लपित्तं सुदारुणम ।
कास क्षय तथा शोषमर्शांसि ग्रहणीं तथा ॥२११॥
कामला पाण्डुरोगञ्च कुष्ठान्येकादशैव च ।
रक्तपित्तं सखालित्यं शूलञ्चैवोदराणि च ॥२१२॥
वातरोगं प्रतिश्याय विद्रधि विषमज्वरम् ।
सतताभ्यासयोगेन वलीपलितवर्जित ॥२१३॥
ताम्रवत् कुरुते देह सर्वव्याधिविवर्जितम् ।
जीवेद्वर्षशतं साग्र द्वितीय इव भास्करः ॥२१४॥

अथ पित्तरोगचिकित्सा ।—

अथ पित्तान्तकरस ।—

मृतसूताभ्रमुण्डार्क-तीक्ष्णमाक्षिकतालकम् ।
गन्धकञ्च भवेत्तुल्य यष्टीद्राक्षामृताद्रवैः ॥२१५॥
जलमण्डपिकावासा-द्रावैः क्षीरविदारिजैः ।
दिनैकं मर्दयेत् खल्ले सिताक्षौद्रयुता वटी ॥२१६॥

गन्धकस्य च कर्षद्वयम् । दन्तशठस्य चाङ्गेर्याः । पर्णानि कण्टकवेध्यानि ताम्रपत्राणि । रक्तिकामाषकादिभि दोषबलादिक विविच्य रक्तितो माषकपर्य्यन्तमादौ सेवेत इत्यर्थ । जीवेत् वर्षशत साग्र शतवर्षाधिक जीवेदित्यर्थ, तेन पञ्चदिनाधिकसविंशतिवर्षशत जीवेदिति निष्कर्ष , यदुक्त वराहेणायुर्निरूपणे,—"समा. षष्टिर्द्विगुणा मनुजकरिणा पञ्च च निशा." इति ॥२०५—२१४॥

अम्लपित्तस्य विदग्धपित्तजन्यत्वेन निर्देशात् तदनन्तर पित्तजानामन्येषा रोगाणा चिकित्सितमुच्यते । तत्र पित्तान्तकरसे—मुण्ड मुण्डलौहम् । तीक्ष्ण तीक्ष्णलौहम् ।

निष्कमात्रं निहन्त्याशु पित्तं पित्तज्वरं क्षयम् ।
दाहं तृष्णा भ्रम शोषं वेगात् पित्तान्तको रसः ॥२१७॥
सिताक्षीरं पिबेच्चानु यष्टीं सिताऽन्विता जलैः ।
पिबेद्वा पित्तशान्त्यर्थं शीततोयेन चन्दनम् ॥२१८॥

अथ दशसारम् ।—

यष्टी द्राक्षा फलं धात्रा एलाचन्दनबालकम् ।
मधूकपुष्पं खर्जूरं दाडिमं पेषयेत् समम् ॥२१९॥
सर्वतुल्या सिता योज्या पलार्द्धं भक्षयेत् सदा ।
दशसारमिदं ख्यातं सर्वपित्तविकारजित् ॥
मेहतृष्णाऽरतीश्चैव दाहं मूर्च्छां ज्वरं जयेत् ॥२२०॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये विद्रधिवृद्धि-
गुल्मयकृत्प्लीहशूलकार्श्यस्थौल्याष्ठीलाप्रत्यष्ठीलाजलकूर्मरसवैकृतानाह्वाम्ल
पित्त पित्तचिकित्सानामाष्टादशोऽध्यायः ॥ १८ ॥

अमृता आमलकी गुडूची वा । जलमण्डूपिका वारिपर्णी, "पाना" इति लोके ।
"जलमण्डूपिकावामाद्रावे" इत्यत्र "धात्रीशतावरीद्रावे" इति रसरत्नाकरे पाठः ।
क्षीरविदारीजे भूमिकुष्माण्डरसे । पिबेद्वा इत्यत्र अनु इति शेषः, पित्तान्तक-
रससेवनानन्तरं शीततोयेन चन्दनमनुपिबेदित्यर्थः । रसरत्नाकरे रसोऽयं वात-
पित्तान्तकरस इति नाम्ना पठितः । रसेन्द्रसारसङ्ग्रहे वातव्याध्युक्तगगनादिवटिकया
सह अस्य सर्वथा साम्यं दृश्यते, केवलं तालकामृताद्रवयोरत्रोक्तयो तत्राभावः
इति ॥२१५—२१८ ॥

दशसारे—फलं धात्र्या आमलकी । रसेन्द्रसारसङ्ग्रहे "यष्टी · बालकम्"
इत्यत्र "यष्टि वावी बला द्राक्षासिता चन्दनबालुकम्" इति पाठः । क्वचिदेत-
च्छ्लोकानन्तरं "हेमभस्मसमं तारसूतकं मौक्तिकञ्च विषगन्धकं कुरु । चित्रकार्द्रक-
रसेन पेषयेच्छोषयेच्च परिपेषयेन्मृदु ॥ भाजने च लवणोदरे क्षिपेदङ्गुलिवितयमायती
तथा ॥" इत्यधिकपाठः ॥ २१९।२२० ॥

इति रसरत्नसमुच्चयबोधिन्याम् अष्टादशोऽध्यायः ॥ १८ ॥

अथैकोनविंशोऽध्यायः ।

अथोदरादिचिकित्सनम् ।—

अथ जलोदरलक्षणम् ।—

उदरं सजलं यस्य सदोषं वलिवर्जितम् ।
श्वयथुः पादयोः शोफः स्याज्जलोदरलक्षणम् ॥ १ ॥

अथ वातोदरलक्षणम् ।—

उदरं वातसम्पूर्णं सव्यथञ्च कृशाङ्गता ।
मुहुर्मुहुः श्वसित्येव तत् वातोदरलक्षणम् ॥ २ ॥

अथात उदरपाण्डुशोफकामलाकुम्भकामलाहलीमकचिकित्सा ।—

अथ जीमूतकादिगुडिका ।—

जीमूतलोहरसगन्ध-शिलालताम्र-
व्योषाग्निकुष्ठमुषली-विषदीप्यचूर्णम् ।
निम्बूकनीरलुलितं गुटिकीकृतं तत्
भुक्तं निशासु मधुना सकलोदरघ्नम् ॥ ३ ॥

शोथत्वसामान्यात् कुक्षिगतरोगसामान्याच्च विद्रध्याद्यनन्तरम् उदरादिचिकित्सितं विवक्षुः एकोनविंशाध्यायमारभते, तत्रादौ जलोदरलक्षणमाह, उदरमिति ।—सदोषं दोषो मलः वातादिश्च तत्सहितं, विबद्धमलं दुष्टवातादिलक्षणसमन्वितञ्चेत्यर्थः । वलिवर्जितं वलिः उदररेखा त्रय त्रिवलीति ख्यातं तद्रहितम् । श्वयथुः शोथः सर्वाङ्ग एव, अत्र श्वयथुशब्देनैव सर्वाङ्गशोथे लब्धे पुनः पादयोः शोफ इति ग्रहणं पादयोर्विशेषेण शोफवत्त्वावबोधनार्थम् ॥ १ ॥

वातोदरलक्षणमाह, उदरं वातसम्पूर्णमिति ।—सुगमम् ॥ २ ॥

जीमूतकादिगुडिकायां—जीमूतम् अभ्रम् । शिला शिलाजतु । आलं हरितालम् । मुषली तालमूली । दीप्यं यमानी ॥ ३ ॥

अथ विनोदविद्याधर ।—

रसेन्द्रबलिटङ्कणैः सजयपालबीजैः समैः
रसः सुमर्दितो भवेत् खलु विनोदविद्याधरः ।
पयोगुडयुतो हरेत् सकलरेचनीयामयान्
ज्वरञ्च जठरामयान् गुदगदं सशूलं नृणाम् ॥४॥
सम्यग्विरेचनाभावे मुद्गक्वाथं पिबेदनु ।
भेदाधिक्ये पिबेत्तक्रं बब्बूराणां त्वचो रसम् ॥ ५ ॥

अथ दन्तिबीजादिरस ।—

अष्टौ निस्तुषदन्तिबीजमपि चेच्छुण्ठ्यास्त्रयो गन्धकात्
द्वौ च द्वौ मरिचस्य टङ्कणरसश्चैकैकभागं पृथक् ।
गुञ्जामात्रमिदं सुरेचनकरं देयञ्च शीताम्बुना
शोफं गुल्मजलोदरं प्रशमयेत् प्लीहामयघ्नं परम् ॥ ६ ॥

अथ मृत्युञ्जय ।—

द्विक्षारं त्र्यूषणं पञ्च-लवणं शतपुष्पिकाम् ।
समभागमिदं सर्वं पटचूर्णं समाचरेत् ॥७॥
तत्समौ रसगन्धौ च कृत्वा कज्जलिकां शुभाम् ।
सर्वमेकत्र सम्मेल्य मर्दयेत् दिवसत्रयम् ॥८॥

विनोदविद्याधरे—रस नरसार, शीघ्रादिहन्तृत्वात्, स च सर्वद्रव्यतुल्यः । सकलरेचनीयामयान् विरेचनसाध्यरोगान् । गुदगदम् अर्शोरोगम् । बब्बूराणां त्वच बब्बालवल्कलस्य ॥ ४।५ ॥

दन्तिबीजादिरसे—अष्टौ इत्यत्र भागा इति शेषः, एवं त्रयः द्वौ इत्यादिष्वपि । दन्तीबीजादिकं सर्वं यथोक्तमानं चूर्णं कुर्य्यात्, गुञ्जामात्रम् इदं चूर्णमपि शीताम्बुना देयं भवेत् चेत् तदा तत् सुरेचनकरं भवेत् इति "अपि चेत्" इत्यस्यार्थः, जयपालबीजसंयुक्तः योगस्तु विरेचक एव, दन्तीबीजसंयुक्तयोगोऽपि विरेचनकरः इत्यपि-शब्दस्याशयः ॥ ६ ॥

मृत्युञ्जये—द्विक्षारं स्वर्जिकाक्षारं यवक्षारञ्च । पटचूर्णं वस्त्रपूतचूर्णम्, "पटचूर्णम्" इत्यत्र "पटुचूर्णम्" इति पाठे—सूक्ष्मचूर्णमित्यर्थः । तत्समौ रसगन्धौ च इति

अथ मृत्युञ्जयो नाम्ना रसः शीघ्रफलप्रदः।
कथितो मर्थलार्य्येण सन्निपातहरः परम् ॥९॥
सन्निपाते प्रयोक्तव्य रक्तिकापञ्चमात्रिकः।
चित्रकार्द्रकसिन्धूत्थ-कटुभिर्वा समन्वितः ॥१०॥
पीततोयः त्रिदोषार्त्तं निर्वाते वासयेत्ततः।
पथ्य दध्योदनं देयं याचमानाय नान्यथा ॥
गुणो न जायते यस्य तस्य देयो रसः पुनः ॥११॥
हन्याद्वातगदं तथा कफगदं मन्दानलत्वं ज्वरं
शूलं सर्वमहामयान् जठरजा पीडा यकृत् पाण्डुताम्।
शोफं गुल्मरुजं तथा ग्रहणिका प्लीहामयं विड्ग्रहं
भ्रान्तिं गुल्मकृता सकासक्लमितः श्वासञ्च हिक्कामपि ॥१२॥

अथ उदरे विरेचनविधिः।—

आदौ सर्वोदराणाञ्च देयमुक्तं विरेचनम्।
गोमूत्रैर्वाऽथ गोक्षीरैर्योज्यमेरण्डतैलकम् ॥
कर्षमात्रं प्रयत्नेन शुद्धे देयो रसः पुनः ॥१३॥

अथ त्रैलोक्यसुन्दरः।—

शुद्धसूतं तथा गन्धं मृताभ्रं सैन्धवं विषम्।
कृष्णजीरं विडङ्गञ्च गुडूचीसत्त्वचित्रकम् ॥१४॥

मिलित्वा सर्वचूर्णसमौ रसगन्धकौ। कटुभिर्वा इत्यत्र वा-शब्देन रक्तिकापञ्चमात्रिकः रसः केवलमपि प्रयोक्तव्य इत्यथ प्रतीयते। पीततोयम् औषधसेवनानन्तरं जलं पाययित्वेत्यर्थः। याचमानाय नान्यथा भोजनं याचमानाय दध्योदनं देयम्, अन्यथा अयाचमानाय न देयमित्यर्थः ॥ ७—१२ ॥

उदररोगे रसप्रयोगात प्राक् उपक्रमं निर्दिशति, आदाविति।—कर्षमात्रमिति एरण्डतैलकमित्यनेन सम्बध्यते। शुद्धे देयो रसः पुनः विरेचनेन शुद्धकोष्ठे पुनः अनन्तरं मृत्युञ्जयरसादिः उदरहरो रसो देय इत्यर्थः ॥ १३ ॥

त्रैलोक्यसुन्दरे—तथा गन्धमिति सूततुल्यं गन्धमित्यर्थः। "तथा गन्धम्"

एला चैव यवक्षारं प्रत्येकं स्याद्रसार्द्धकम् ।
दिनं निर्गुण्डिकाद्रावैर्बीजपूररसैर्दिनम् ॥ १५ ॥
मर्दयेच्छोषयेत् सोऽयं रसस्त्रैलोक्यसुन्दरः ।
गुञ्जाद्वयं घृतैर्लेह्यो वातोदरकुलान्तकः ॥ १६ ॥
पलमेकं चित्रमूलं द्विर्गोमूत्रैश्चतुर्जलैः ।
पाच्यं यावद्भवेत् कल्कं घृतं कल्कञ्च योजयेत् ॥ १७ ॥
वल्लैकञ्च यवक्षारं क्षिप्त्वा पक्त्वाऽवतारयेत् ।
तत् कर्षैकं पिबेच्चानु स्निग्धमुष्णञ्च भोजयेत् ॥ १८ ॥

अथ महावह्निः ।—

चतुः सूतस्य गन्धोऽष्टौ रजनी त्रिफला शिवा ।
प्रत्येकञ्च द्विभागं स्याच्चूषजीरकदन्तिकाः ॥ १९ ॥
प्रत्येकमष्टभागं स्यादेकीकृत्य विचूर्णयेत् ।
जयन्तीस्नुक्पयोभृङ्ग-वह्निवातारितैलकैः ॥ २० ॥

इत्यत्र "द्विधा गन्धम्" इति रसेन्द्रसारसङ्ग्रह रसरत्नाकरादौ पाठः, "मृताभ्रम्" इत्यत्र रसेन्द्रसारे "ताम्राभ्रम्" इति पाठः। अभ्रादियवक्षारान्तं सर्वं रसाङ्ककम् । "एला" इत्यत्र रसरत्नाकरे "वचा" रसेन्द्रसारसङ्ग्रहे च "उग्रगन्धा" तथा "प्रत्येकं स्याद्रसार्द्धकम्" इत्यत्र "प्रत्येकं कर्षमात्रकम्" इति पाठान्तरम् । एतस्यौषधस्य अनुपानमाह, पलमेकमिति ।—चित्रकमूलपलकल्केन द्विगुण-गोमूत्रेण चतुर्गुणजलेन च घृतात् प्रस्थो विपक्तव्य, अवतार्य्य च वल्लमानं यवक्षारं प्रक्षिप्य स्थापयेदिति प्रचारः, अथवा—सङ्कुस चित्रकमूलपल पलद्वयगोमूत्रेण चतुःपलजलेन च द्रवत्रयं यावत् पचेत । तत तत कल्कं चतुर्गुणघृतेन घृताच्चतुर्गुणेन जलेन च पक्त्वा आसन्नपाके वल्लमितं यवक्षारं तत्र प्रक्षिप्य अवतारयेत् इति। "वल्लैकम्" इत्यत्र"पलैकम्" इति रसरत्नाकरे पाठः ॥ १४—१८ ॥

महावह्नौ—शिवा हरीतकी तस्याश्च चत्वारो भागाः, त्रिफलाया प्रत्येकं भागद्वयविधानात्। "शिवा" इत्यत्र "शिला" इति रसरत्नाकर रसेन्द्रसारसङ्ग्रहधृत पाठः। "प्रत्येकञ्च द्विभागं स्यात्" इत्यनन्तरं "त्रिवृज्जैपालचित्रकम् । प्रत्येकञ्च त्रिभागं स्यात्" इत्यधिकः पाठः, रसेन्द्रचिन्तामणि रसेन्द्रसारसङ्ग्रह रसरत्नाकरादिषु

प्रत्येकेन क्रमाद्भाव्य सप्तवार पृथक् पृथक्।
महावह्निरसो नाम निष्कमुष्णजलैः पिबेत् ॥२१॥
विरेचन भवेत्तेन तक्रभक्त ससैन्धवम्।
दिनान्ते भोजयेत् पथ्य वर्जयेत् शीतलं जलम् ॥
नाभ्युत्तरे जलस्रावं कुर्य्याद्धन्ति जलोदरम् ॥२२॥

अथ गुडनागरप्रयोग ।—

सर्वोदरहरं योज्य गुडनागरयो पलम् ॥२३॥

अथ वज्रक्षार ।—

सामुद्र सैन्धवं काचं यवक्षार सुवर्चलम्।
टङ्कणं सर्जिकाक्षारं तुल्यं चूर्णं विभावयेत् ॥२४॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे शोषयेत्त्र्यहम्।
अर्कपत्रं लिपेत्तेन रुद्ध्वा चान्त' पुटे पचेत् ॥२५॥
तत् क्षार चूर्णयित्वाऽथ त्र्यूषणं त्रिफलारज'।
जीरकं रजनीवह्नि-चव्यक स्यात् समं समम् ॥२६॥
क्षारमेव तदर्द्धञ्च एकीकृत्य प्रयोजयेत्।
अग्निमान्द्येष्वजीर्णेषु भक्ष्यं निष्कद्वयं द्वयम् ॥२७॥
वाताधिके जलैः कोष्णैर्घृतै. पित्ताधिके हितम्।
कफे गोमूत्रसंयुक्तमारनालैस्त्रिदोषजे ॥२८॥
वज्रक्षारमिद सिद्धं स्वय प्रोक्त पिनाकिना।
सर्वोदरेषु गुल्मेषु शोफशूलेषु योजयेत् ॥२९॥

दृश्यते। त्र्यूषणस्यापि प्रत्येक भागाष्टकम्। स्नुक्पय स्नुहीक्षीरम्। भृङ्ग भृङ्गराज। वह्नि चित्रक। वातारितैलम् एरण्डतैलम्। नाभ्युत्तरे जलस्राव कुर्य्यात नाभेरधोदेशे व्रीहिमुखेन शस्त्रेण जलं स्रावयेदित्यर्थ। रसरत्नाकरेऽय वह्निवीर्य्यरस इति प्रसिद्धम् ॥ १९—२२ ॥

गुडनागरप्रयोगे—गुडनागरयो मिलित्वा पलमानलम् ॥ २३ ॥

वज्रक्षारे—काच, लवणविशेष, "काल लवण" इति ख्यातम्। अर्कपर्ण

अथ खदिरादियोग ।—

खदिरं देवदारुञ्च कर्षं गोमूत्रत: पिबेत् ।
उदरं पाण्डुरोगञ्च हन्ति शूलञ्च प्लीहकम् ॥३०॥

अथ पिप्पलीप्रयोग ।—

दिनैक पिप्पलीचूर्णं स्नुहीक्षीरेण भावयेत् ।
निष्कं जलोदरं हन्ति महिषीमूत्रत: पिबेत् ॥३१॥

अथ वैश्वानर ।—

रसगन्धकताम्राणि शिलाजित् कान्तलोहकम् ।
त्रिकटु चित्रकं कुष्ठं निर्गुण्डी मुषली विषम् ॥३२॥
अजमोदञ्च सर्वेषां द्वौ द्वौ भागौ प्रकल्पयेत् ।
चूर्णीकृत्य तत: सर्वं निम्बक्काथेन भावयेत् ॥३३॥
एकविंशत्प्रकारेण भृङ्गराजेन सप्तधा ।
मधुना गुटिकां शुष्कां रजन्यान्तु प्रदापयेत् ॥
वैश्वानराभिधो योगो जलोदरविशोषण: ॥३४॥

स्नुतनुतासपलम् । चार पूर्वोक्त सामुद्रादिकल्कमिलितार्कपत्रचारम् । तदर्द्धमिति तेषां चूर्णानामर्द्धं, तेन सर्वचूर्णात् अर्द्धं चारमिति निष्कर्ष ॥ २४—२९ ॥

खदिरादियोगे—खदिरस्य सार ग्राह्य "सार स्यात् खदिरादीनाम्" इति वचनात ॥ ३० ॥

पिप्पलीप्रयोगे—महिषीमूत्रत पिबेत महिषीमूत्रेण सह स्नुहीक्षीरभाविता पिप्पलीं पिबेत ॥ ३१ ॥

वैश्वानरे—रसादीना लौहान्ताना प्रत्येकं समता, त्रिकट्वादीनाञ्च प्रत्येक भागद्वयम् , तथा च रसरत्नाकरे—"शुद्धसूत सम गन्ध मृताकाय शिलाजतु । रसमानं प्रदातव्य रसस्य द्विगुण विषम् । त्रिकटु चित्रक कुष्ठ निर्गुण्डी मुषलीरज । अजमोदा विषाग्निन प्रत्येकञ्च प्रकल्पयेत् ॥" इति । "विषाग्निन" इत्यत्र "दशाग्निन" इति मुद्रित रसरत्नाकरपाठस्तु लिपिकरप्रमादविजृम्भित, एतत्तन्त्रसंवादात रसेन्द्रसारसङ्ग्रहसंवादाच्च । रसेन्द्रसारसङ्ग्रहे तु "द्विधा गन्धम्" इति पाठ । "कुष्ठम्" इत्यत्र "वीरा" इति तत्रोक्तपाठस्तु न मनोरम, सर्वतन्त्रास्वरसात् । निम्बक्काथेन निम्बपञ्चाङ्ग-

अथ सूर्य्यप्रभा गुटिका ।—

भार्गीवह्निजयायुगाम्बुकदली पाठा वचा रोचना
चव्यं पत्रकचित्रकं त्रिकटुकं क्षारद्वयं गन्धकम् ।
त्रायन्तीहरबीजकेशरिविषद्वन्द्वं लवङ्गं कणा
कुष्ठं शल्लफलं फलत्रययुतं फेनं समुद्रादपि ॥३५॥
ब्राह्मी बीजं लताबीजं बालबिल्वं विरूढकम् ।
लवणानि तथा पञ्च जात्यादिकुसुमाष्टकम् ॥३६॥
वातारितैलेनैतेषां कल्पिता भिषजां वरैः ।
एषा सूर्य्यप्रभा नाम गुटिकाऽग्निप्रदीपनी ॥३७॥

अथ उदयमार्त्तण्डरस ।—

पलोन्मितस्य शुल्वस्य सूक्ष्मपत्राणि कारयेत् ।
तत्समं गन्धकं दत्त्वा खल्ले सर्वं विमर्दयेत् ॥३८॥
जम्बीररससंयुक्तं दिनं घर्मे निधापयेत् ।
ततः शुल्वे द्रवीभूते रसकर्षं नियोजयेत् ॥३९॥
तत् सिद्धमुदरे योज्यं शोफे चैव भगन्दरे ।
नाम्ना तूदयमार्त्तण्ड-रस एष प्रकीर्त्तितः ॥४०॥

क्वाथेन इत्यर्थः, "पञ्चाङ्गनिम्बक्वाथेन" इति रसरत्नाकरदर्शनात् । रसेन्द्रसारसङ्ग्रहे तु "निम्बपञ्चाङ्गुलक्वाथे" इति पाठः । श्लेष्मोदरे चायं योगः प्रयोज्यः । मात्रा च बदरास्थिमाना । वैश्वानरी वटीति नामान्तरमस्य रसेन्द्रे रसरत्नाकरे च दृश्यते ॥३२—३४॥

सूर्य्यप्रभायाम्—वह्निः भल्लातकः । जयायुगं जयन्ती हरीतकी च । कदली रम्भा, तस्या मूलम् । त्रायन्ती त्रायमाणा, "बला डुमुर" इति ख्यातम् । हरबीजं पारदम् । केशरी रक्तशोभाञ्जनः । विषद्वन्द्वं विषद्वयं, सर्पविषं मौलविषञ्चेत्यर्थः । शल्लफलं शल्लकीबीजम् । फेनं समुद्रादपीति समुद्रफेनं इत्यर्थः । बीजं पुष्करमूलम् । ब्राह्मीबीजमित्येकपदं वा, ब्राह्मीशाकबीजम् । लताबीजं लताकस्तूरीबीजम् । विरूढकम् अङ्कुरितधान्यम् । जात्यादिकुसुमाष्टकं "जाती यूथी राजवल्ली क्षुद्रयूथी द्विधा मता । चम्पको नागचम्पश्च वकुलश्च कदम्बकः ॥" इत्युक्ताष्टपुष्पम् । भार्ग्यादीनां जात्यादिकुसुमाष्टकान्तानां सर्वेषां तुल्यमानता ॥ ३५—३७ ॥

उदयमार्त्तण्डरसे—सर्वं सुगमम् ॥ ३८—४० ॥

अथ पाण्डुरोगस्य साङ्गलक्षणम् ।—

विवर्णता शरीरे स्याच्छ्रयथुः कार्श्यमेव हि ।
सत्त्वहानिरथाऽऽलस्यं पाण्डुरोगस्य लक्षणम् ॥४१॥

अथ पाण्डुरोगचिकित्सा ।—

अथ हसमण्डूर ।—

मण्डूरं मर्दयेच्छूक्ष्णं गोमूत्रेऽष्टगुणे पचेत् ।
त्र्यूषणं त्रिफला मुस्ता विडङ्गं चव्यचित्रकौ ॥४२॥
दार्वी ग्रन्थी देवदारु तुल्यं तुल्यं विचूर्णयेत् ।
घृतं मण्डूरतुल्यञ्च पाकान्ते मिश्रयेत्तत ॥४३॥
भक्षयेत् कर्षमात्रञ्च जीर्णान्ते तक्रभोजनम् ।
पाण्डुरोगं हलीमञ्च ऊरुस्तम्भञ्च कामलाम् ॥
अर्शांसि हन्ति नो चित्रं हसमण्डूरकाह्वयम् ॥४४॥

अथ कालविध्वंसन ।—

शुद्धसूत हेम तारं ताम्रं तुल्यञ्च मर्दयेत् ।
जम्बीरनीरसंयुक्तमातपे मर्दयेद्दिनम् ॥४५॥
सर्वतुल्यं पुनः सूतं क्षिप्त्वा पिष्टिं प्रकल्पयेत् ।
धुस्तूरफलमध्ये तु दोलायन्त्रे त्र्यहं पचेत् ॥४६॥

उदरवत् पाण्डुरोगेऽपि शोथ तथा पीताभत्वं भवति इति उदरानन्तरं पाण्डुरोगचिकित्सा । तत्रादौ तल्लक्षणमाह, विवर्णतेति ।—सत्त्वहानि बलहानि ॥४१॥

हसमण्डूरे—दार्वी दारुहरिद्राम् । ग्रन्थी पिप्पलीमूलम् । त्र्यूषणादीनां देवदार्वन्तानां मिलितानां मण्डूरतुल्यता, रसरत्नाकरसंवादात्, तथा च—"त्र्यूषणं त्रिफला मुस्तं विडङ्गं चव्यचित्रकम् । दार्वी ग्रन्थि देवदारु तुल्यं सर्वं विचूर्णयेत् ॥ चूर्णं मण्डूरतुल्यञ्च पाककाले विनिक्षिपेत् ॥" इति । तत्र च "घृतम्" इत्यत्र "चूर्णम्" तथा "पाकान्ते" इत्यत्र "पाककाले" इति पाठान्तरम्, एवञ्च तत्र घृतस्य अनुक्तत्वेऽपि सर्वत्र मण्डूरयोगे घृतं विना पाकासिद्धेः उत्सर्गसिद्धमेव घृतमित्यविरोध । पाककाले इति पाकान्तसमये आसन्नपाके इति व्याख्यानात् तुल्यार्थता बोद्धव्या । जीर्णान्ते सेवितौषधपरिपाकान्ते इत्यर्थः । रसेन्द्रसारसङ्ग्रहे अयं "त्र्यूषणादिमण्डूरम्" इति ख्यातः, परन्तु तत्र ग्रन्थ्या उल्लेखो नास्ति इति ॥४२—४४॥

धुस्तूरोत्यद्रवैरेव यन्त्र पूर्य्यं पुनः पुनः।
आदाय बन्धयेद्वस्त्र इष्टिकायन्त्रग पचेत् ॥४७॥
जम्बीरैर्गन्धकं पिष्ट्वा अधश्चोर्द्धञ्च दापयेत्।
तुल्य पुनः पुनर्देयं रुद्ध्वा लघुपुटे पचेत् ॥४८॥
षड्गुणे गन्धके जीर्णे तत्तुल्य मृतलौहकम्।
दत्त्वा मर्द्यं दिनैकञ्च कण्टकार्य्या द्रवैर्दिनम् ॥४९॥
रुद्ध्वाऽथ करिषाग्निस्थ-कपोताख्यपुटे पचेत्।
पुनर्मर्द्यं पुनः पाच्यं त्रिवार पूर्वजैर्द्रवे ॥५०॥
ब्रह्मत्युत्थरसैस्तद्वत्त्रिधाऽऽमर्द्य पुटेत्त्रिधा।
वह्न्यर्कनक्तमालाना पृथग्द्रावैर्द्विधा द्विधा ॥५१॥
मर्द्यं रुद्ध्वा पुटेत्तद्दशांश वत्सनाभकम्।
दत्त्वा तस्मिन् विचूर्ण्याथ गुञ्जामात्र प्रयोजयेत् ॥५२॥
कालविध्वसनो नाम रसः पाण्ड्वामयापहः।
अभयाऽथ गवा मूत्रैः पिष्ट्वा चानु प्रदापयेत् ॥५३॥

कालविध्वसने—तार रौप्यम्। इष्टिकायन्त्रग "विधाय वर्त्तुल गर्त्तम्" इत्यादिना नवमाध्याये प्रदर्शितयन्त्रमध्यगतम्। "षड्गुणे" इत्यत्र "शतधा" इति रसरत्नाकरे पाठ। तत्तुल्यम् औषधतुल्यम्। पूर्वजे द्रवे कण्टकारीद्रवे। वह्नीति।—वह्नि चित्रक। अर्क "आकन्द" इति प्रसिद्धम। नक्तमाल, "डहरकरञ्ज" इति प्रसिद्धम। अयमर्थ,—सूतादिचतुष्टय जम्बीररसेन दिनमेक मर्दयित्वा आतपे मनाक् सशोष्य च पुन सर्वतुल्येन रसेन सम्मर्द्य पिण्ड कुर्य्यात्। तत निर्बीजीकृतधुस्तूरफलमध्ये रुद्ध्वा बाह्य धुस्तूरपत्ररसेन दोलायन्त्रे पचेत्, शुष्कीभूते पूर्वरसे पुन पुन रसो दातव्यश्च। चतुर्थेऽहनि धुस्तूरफलादौषधपिण्ड गृहीत्वा वस्त्रे बद्ध्वा च इष्टकायन्त्रे पचेत। अनन्तर पिण्डतुल्य गन्धक जम्बीर-रसमर्दितम ऊर्द्धमधश्च दत्त्वा मृत्कर्पटादिना आलिप्य च लघुपुटे पचेत्, एव षड्वारान् कुर्य्यात। तत लौहं तुल्यमानमौषधेन मिश्रयित्वा कण्टकारीरसेन दिनमेक मर्दयेत्, रुद्ध्वा च कपोतपुटे गोमयाग्निना पुन, पचेत, एव वारत्रय

अथ पञ्चानन ।—

मृत कान्तं सुवर्णञ्च शुल्वताराभ्रभस्मकम् ।
पृथगक्षमितं सर्वं पटचूर्णं कृत मुहुः ॥५४॥
रसगन्धककज्जल्या तुल्यया सह मर्दितम् ।
सार्द्धद्विपलमानेन ताप्यचूर्णेन मर्दयेत् ॥५५॥
द्विपल मूषिकामध्ये विनिक्षिप्यालचूर्णकम् ।
ततस्तु कज्जलीं क्षिप्त्वा मनोह्वा तावतीं क्षिपेत् ॥५६॥
ततो निरुध्य यत्नेन परिशोष्य पुटेन्निशि ।
पुटेन गजसञ्ज्ञेन स्वतः शीत विचूर्णयेत् ॥५७॥
चतुर्गुणेन गन्धेन निर्मिता रसकज्जलीम् ।
क्षिप्त्वा पूर्वरसे लुङ्गवारिणा परिमर्दयेत् ॥५८॥
पचेत् क्रोडपुटेनैव दशवारमतः परम् ।
एव तालककज्जल्या दशवार पुटेत्ततः ॥५९॥
ततश्च मृतवैक्रान्त-भस्मना च कलाशत. ।
ततो विचूर्ण्य यत्नेन करण्डान्तर्विनिक्षिपेत् ॥६०॥

कुर्यात। अथ बृहतीरसेन त्रिवार मर्दयेत् पुटेच्च। पुन वङ्गादीना पृथक् पृथक् रसेन द्वौ द्वौ वारौ मर्दयित्वा विस्त्रि. पचेत्। अनन्तर दशमाश विष दत्त्वा विचूर्ण्य च स्थापयेदिति ॥ ४५—५३ ॥

पञ्चानने—पटचूर्णं वस्त्रपूत चूर्णम्। रसगन्धककज्जल्या तुल्यया कान्तादि-सर्वचूर्णतुल्यया कज्जल्या इत्यथ, तेन च रसगन्धकयो प्रत्येक सार्द्धकर्षद्वयम्। मूषिकामध्ये मूषामध्ये। आलचूर्णक हरितालचूर्णम्। कज्जलीमिति कान्तादिताप्यान्तै कृता कज्जलीमित्यर्थ। मूर्च्छितरसगन्धकयोरेव कज्जलीसञ्ज्ञाया रूढित्वेऽपि अत्र कज्जल्या सह कान्तादीना मिश्रणेन कृष्णवर्णभावात् कज्जलत्व बोद्धव्यम्। मनोह्वा मन शिलाम्। तावती द्विपलमित्यर्थ। पूर्वरसे पुटपाकेन निष्पन्ने औषधे। लुङ्गवारिणा मातुलुङ्गरसेन। क्रोडपुटेन "इत्थ वाराहिके" इत्यादिना दशमाध्यायोक्तवराहपुटेन। तालककज्जल्या तालकयुतया कज्जल्या, सा च समभागयो. कज्जलीतालकयो मिश्रणेन कार्य्या। कलाशत षोडशांशेन।

अथ पञ्चाननो नाम देवराजेन कीर्त्तितः ।
श्रेष्ठः सर्व्वरसेन्द्रेषु महारससमो गुणैः ॥६१॥
पथ्याशूरणशुण्ठीभिः सघृताभिर्निषेवितः ।
सर्व्वान् पाण्डुगदान् हन्ति कृतघ्न इव सत्कृतिम् ॥६२॥
यक्ष्माणं जठरं हलीमकरुजं वातार्त्तिविड्बन्धनं
कुष्ठञ्च ग्रहणीं ज्वरातिसरणं श्वासञ्च कासारुचौ ।
श्लेष्मव्याधिमशेषतो गलगदान् दुर्नाम मन्दाग्निता
मेहं गुल्मरुजञ्च किं बहुगिरा हन्याद्गदांश्चापरान् ॥६३॥
सेव्यमाने रसे चास्मिन् विल्वमेकञ्च वर्ज्जयेत् ।
स्वस्थः सर्व्वं समश्नीयाद्गदी पथ्यं गदापहम् ॥६४॥

अथ आरोग्यसागरः ।—

एकैकपलगन्धाश्म-रससम्भवकज्जलीम् ।
तस्या मध्ये द्विपलिकं तार्प्यं तालं पलोन्मितम् ॥६५॥
पलमात्रं मनोह्वाञ्च पलमभ्रकभस्मकम् ।
सुखस्पर्शस्य कर्षञ्च निक्षिप्य परिमर्द्य च ॥६६॥
मूषामध्ये विनिक्षिप्य पिनद्धान्तर्मुखीं ततः ।
पत्रेण शुद्धताम्रस्य निर्म्मलेन त्रिकार्षिणा ॥६७॥

सत्कृतिः शोभनं कर्म, उपकारमित्यर्थः । भवनाय विधिः —सुचूर्णितं कान्तादिपञ्चकं प्रत्येकमक्षमात्रं गृहीत्वा पञ्चकर्षमितया कज्जल्या सार्द्धद्विपलेन माक्षिकचूर्णेन च सह मर्दयेत् । ततो मूषायां द्विपलं हरितालचूर्णं तदुपरि औषधं तदुपरि च पलद्वयं मनःशिलाचूर्णं दत्त्वा मृद्वस्त्रेणालिप्य आतपे शोषयित्वा च निशि गजपुटे पचेत् । स्वाङ्गशीतमादाय चूर्णयित्वा च चतुर्गुणगन्धककृतया कज्जल्या औषधतुल्यया सह मातुलुङ्गरसेन मर्दयेत्, ततः पुनर्मूषायां संस्थाप्य वराहपुटेन पचेत्, एवं दशवारान् कुर्य्यात । ततः तालककज्जल्या अपि औषधतुल्यया मिश्रयित्वा मातुलुङ्ग-रसेन मर्दयेत् वराहपुटेन पचेच्च, एवं दशवारान् कुर्य्यात। ततः कान्तादिताम्रान्तानां मिलितानां षोडशांशेन वैक्रान्तभस्मना सह मर्दयित्वा स्थापयेत् इति ॥ ५४—६४ ॥

आरोग्यसागरे—सुखस्पर्शस्य सुभगस्य, टङ्कणस्येत्यर्थः । पिनद्धम् आवद्धम्

मूषा मृद्भिः सवस्त्राभिः परिरुध्य यथा दृढम् ।
परिशोष्य गिरण्डैश्च पुटेत् गजपुटेन हि ॥६८॥
स्वाङ्गशीतं समुद्धृत्य खोटीभूतं विचूर्णयेत् ।
गन्धतालशिलाचूर्णैः सहितं खल्लचूर्णकम् ॥६९॥
पुटेत् क्रोडपुटे चैव दशवारं ततः परम् ।
क्षिपेद्विंशतिभागेन वैक्रान्तं भस्मतां गतम् ॥७०॥
विमर्द्य गालितं कृत्वा क्षिपेत् रौप्यकरण्डके ।
आरोग्यसागरो नाम रसोऽतिगुणवत्तरः ॥७१॥
हन्यात् पाण्डुमरोचकं गुदगदं वातञ्च पित्तं कफं
गुल्माध्मानकशोफरोगमथ च श्वासं शिरोऽर्त्तिं वमिम् ।
अत्यर्थानलमन्दतां गुरुमुदावर्त्तं विचित्रज्वरान्
रोगानप्यपरान् रतिद्वयमितः सूतौ मरीचाज्यवान् ॥७२॥

अथ पाण्डुघ्नानिलरसः ।—

ताम्रभस्म रसभस्म गन्धकं वत्सनाभमथ तुल्यभागतः ।

अन्तर्मुखम् अधःस्थमूषायाः उपरिभागमित्यर्थः, यस्याः ताम्, मूषामित्यस्य विशेषणम् । त्रिकर्षिणा कर्षत्रयमितेन, कर्षत्रयमितेन निर्मलेन ताम्रपत्रेण आधारमूषायाः मुखमाच्छाद्य तदुपरि आवरणञ्च दत्त्वा मृद्वस्त्रादिभिर्मूषां लिम्पेत इति निष्कर्षः । गिरण्डैः आरण्यगोमयैः । खोटीभूतं गन्धाश्मादिद्रव्यजातमेकीभूय कठिनीभूतमित्यर्थः । गन्धेति ।—शिला मनःशिला, गन्धादयः प्रत्येकं रसभागा ग्राह्याः । खल्लचूर्णकं खल्ले चूर्णं कृत्वेत्यर्थः । सूतौ सूतिकारोगे, प्रसवकाले इत्यर्थो वा, प्रसवे क्लेशः चेत् तदा मरीचाज्यवान् घृतमरिचाभ्यां रक्तिद्वयमितः अयं रसः प्रयोक्तव्यः । अथ विधिः,—गन्धादिकं यथोक्तमानं मर्दयित्वा मूषायां सस्थापयेत्, ततः ताम्रपत्रेण मूषामुखं वेष्टयित्वा मूषान्तरेणाच्छाद्य च मृत्कर्पटेन लेपयेत । अथ आतपे संशोष्य गजपुटं दद्यात । ततः स्वाङ्गशीतं समुद्धृत्य रससमानैः गन्धादिभिः सह खल्ले चूर्णयित्वा वराहाख्यपुटे पचेत्, एवं दशवारान् कुर्य्यात । ततः औषधात् विंशत्यंशेन वैक्रान्तभस्मना विमर्द्य वस्त्रपूतञ्च कृत्वा रौप्यभाजने स्थापयेत । पाण्ड्वादिरोगे रक्तिद्वयमानं तत् यथायथ्यानुपानेन प्रयुञ्ज्यात् । सूतिकारोगे तु मरिचाज्याभ्यां दापयेदिति ॥६५—७२॥

वह्नितोयपरिमर्दितं पचेत् यामपादमथ मन्दवह्निना ॥७३॥
रक्तिकायुगलमानतो भवेच्छोफपाण्डुघनपङ्कशोषणः ॥७४॥

अथ पाण्डुहारिहरीतकी।—

कौरण्टो भृङ्गराजश्च शतावरिपुनर्नवौ।
एते सप्तपला ग्राह्याः प्रत्येकं सूक्ष्मचूर्णिताः॥७५॥
एतत्क्वाथे पचेत् सम्यक् हरीतक्याः शतत्रयम्।
षष्ट्याऽधिकं ततः शुष्कं गव्यदुग्धेन पाचयेत्॥७६॥
शोषयित्वा शनैर्हृत्वा वटिकाभिः प्रपूरयेत्।
रसस्य त्रिपलं दत्त्वा गन्धके त्रिपलात्मके॥७७॥
पक्त्वाऽथ पातयेत् पत्रे चूर्णयित्वा ततः पुनः।
गुडूचीसत्त्वमादाय शुष्कं सत्त्वं पलाष्टकम्॥७८॥
चूर्णयित्वा ततः सर्वं मधुना गुटिकाः किरेत्।
तासु सूत्रे समाबद्धा मधुभाण्डे विनिक्षिपेत्॥
एकैकां भक्षयेन्नित्यं शुष्कपाण्डुविनाशिनीम्॥७९॥

पाण्डुघनानिलरसे—वह्नितोयपरिमर्दितं चित्रकमूलक्वाथमर्दितम्। यामपादं प्रहरस्य चतुर्थांशपरिमितकालम्। शोफेति।—शोफपाण्डु सशोथपाण्डु घनपङ्कः गाढकर्दम इव, तस्य शोषणः॥७३।७४॥

पाण्डुहारिहरीतक्याः—कुरण्टः सितपुष्पा झिण्टी, तस्यायमिति कौरण्टः कुरण्टमूलमित्यर्थः। कौरण्टमिति भवितुमुचितत्वेऽपि यत् कौरण्ट इति पुंलिङ्ग-निर्देशः कृतः सतः लिङ्गमशिष्टमिति लिङ्गे अनादरात्, एवं पलाः इत्यत्रापि। हृत्वा आहृत्य इत्यर्थः। वटिकाभिः शुष्कीभूताभ्यां क्वाथदुग्धाभ्यां कृताभिरित्यर्थः। प्रपूरयेत, हरीतकीरिति शेषः। पक्त्वा रसपर्पटीवत् पक्त्वेत्यर्थः। पत्रे कदली-पत्रे, गोमयोपरि विन्यस्ते इति शेषः। किरेत् मिश्रयेदित्यर्थः। शुष्कपाण्डुविनाशिनी चिरोत्पन्नत्वात् खरीभूतपाण्डुनाशिनीमित्यर्थः। कौरण्टादीनां प्रत्येकं सप्तपलानि चूर्णानि अष्टगुणतोये पक्त्वा पादावशेषे तस्मिन् हरीतकीनां निरस्थ्नां षष्ट्यधिकं शतत्रयं पचेत, शुष्कीभूते च द्रवे क्वाथतुल्येन गव्यदुग्धेन पुनः पचेत् आदुग्ध-शोषात्, ततः घनीभूतं समाहृत्य खल्वा वटिकाः कृत्वा हरीतक्यन्तः ताः

अथ पित्तपाण्डुरिगुटिका ।—

रसस्य भागाश्चत्वारो लोहस्य द्वौ प्रकीर्त्तितौ ।
वह्निमुस्ताविडङ्गाना त्रिकटुत्रिफलस्य च ॥८०॥
भागास्त्वनेकशो ग्राह्या कुटजस्य तथाऽपरः ।
चूर्णयित्वा ततः सर्वं मधुना गुटिका' किरेत् ॥
एकैका भक्षयेत् प्रात. पित्तपाण्डुपनुत्तये ॥८१॥

अथ त्रैलोक्यसुन्दर ।—

रसगन्धकलोहाभ्र-गुडूचीसत्त्वसूकरः ।
त्रिफलाशिग्रुमूलानि भृङ्गसारेण भावयेत् ॥८२॥
त्रैलोक्यसुन्दर सोऽयं सघृतक्षौद्रशर्करः' ।
मृगाङ्कवत् पथ्यभुजः पाण्डुशोफं नियच्छति ॥८३॥

अथ पाण्डुशोथे विनेवरसस्य प्रयोगविधि ।—

युत किञ्चिद्घृतक्षौद्र-गुडतित्तिरिगुग्गुलैः ।
त्रिनेत्राख्यो रसो योज्यः शोफे तोयानुपानतः ॥८४॥

प्रपूरयेत। तत त्रिपलरसगन्धयो कज्जलीं कृत्वा रसपर्पटीवत पाक कुर्यात्। अनन्तर विचूर्णितया अष्टपलेन शुष्कगुडूचीसारेण मधुना च सह मर्दितया तया पर्पट्या ता हरीतकी लिप्त्वा सूत्रेण बद्ध्वा च मधुभाण्डे निक्षिप्य स्थापयेत् इति ॥ ७५—७९ ॥

पित्तपाण्डुरिगुटिकायां—रसस्य रससिन्दूरस्य। भागास्त्वनेकश वह्न्यादीना प्रत्येक द्वौ द्वौ भागौ इत्यर्थ, लौहभागसाहचर्यात्। कुटजस्य तथाऽपर द्वावेव भागावित्यर्थ। गुटिका किरेत कुर्यादित्यर्थ ॥ ८०।८१ ॥

त्रैलोक्यसुन्दरे—सूकर ग्रन्थिपर्ण। भृङ्गसारेण भृङ्गराजद्रवेण। मृगाङ्कवत् पथ्यभुज मृगाङ्करसे यानि पथ्यान्युक्तानि, तद्वत पथ्यभुजो जनस्येत्यर्थ ॥ ८२।८३ ॥

अनुपानविशेषेण त्रिनेत्ररसस्यापि पाण्डुशोफे प्रयोज्यतामाह, युत इति।— तित्तिरि जैपालबीजम्। त्रिनेत्राख्यो रस शूलाधिकारोक्त। शोफे पाण्डुशोथे। शूलाधिकारोक्तं त्रिनेत्ररस युक्त्या किञ्चित घृतादिभि. सह सेवित्वा तोयानुपानं कुर्यात इति ॥ ८४ ॥

अथ विजया गुटिका ।—

पलत्रयं हरीतक्याश्चित्रकस्य पलत्रयम् ।
एलात्वक्पत्रमुस्तानां भागोऽर्द्धपलिको मतः ॥८५॥
रेणुकार्द्धपलं प्रोक्तं तदर्द्धं नागकेशरम् ।
व्योषञ्च पिप्पलीमूलं विषञ्च पलमात्रकम् ॥८६॥
रसः पलो महागन्धः सूक्ष्मचूर्णानि कारयेत् ।
पुरातने गुडे पक्वे तुलार्द्धे तद्विनिक्षिपेत् ॥८७॥
हिमस्पर्शन्तु गृह्णीयात् घृतेनाक्ता करे बुधः ।
बदरास्थिप्रमाणेन विजया गुटिका मता ॥
निशायां खादयेदेनां शोफपाण्डुविनाशनीम् ॥८८॥

अथ टङ्कणादियोगः ।—

टङ्कणं मेघनादञ्च भक्षयेद्विषशान्तये ॥८९॥

अथ जयपालरसः ।—

रसं गन्धं मृतं ताम्रं जयपालञ्च गुग्गुलुम् ।
समांशमाज्यसंयुक्ता गुटिका कारयेन्मिताम् ॥
एकैकां खादयेद्वैद्यः शोफपाण्डूपनुत्तये ॥९०॥

अथ देवदालीपञ्चाङ्गप्रयोगः ।—

देवदाल्यास्तु पञ्चाङ्गं चूर्णं चोरैश्च वा जलैः ।
निष्कमात्रं पिबेन्नित्यं मासात् पाण्डुगदापहम् ॥९१॥

विजयागुटिकायां—भागोऽर्द्धपलिक इति प्रत्येकमर्द्धपलमानमित्यर्थः । तदर्द्धं नागकेशरं कर्षमात्रं नागकेशरम् । पलमात्रकमिति प्रत्येकं, व्योषादीनां पृथङ्‌निर्देशात् । महागन्धः नवनीताह्वगन्धकः । विनिक्षिपेदित्यत्र आसन्नपाके इति शेषः ॥८५—८८॥

टङ्कणादियोगे—मेघनादं तण्डुलीयमूलम् । विषशान्तये शत्रुप्रयुक्तगरदोषशान्तये इत्यर्थः, तस्य च पाण्डुशोथोदरादिहेतुत्वात् ॥ ८९ ॥

जयपालरसे—मिता वयोबलाद्यनुरूपा मात्रामित्यर्थः । प्रयोगेऽस्मिन् शीतलजल-मन्नञ्च वर्जनीयं, रसेन्द्रचिन्तामणि रसेन्द्रसारसङ्ग्रहसंवादात् । तत्र तत्र चास्य पाण्डु-सूदनरस इति संज्ञा ॥ ९० ॥

अथ कामलालक्षणम् ।—

दग्धमांसरुधिरास्रपित्ततः कामला भ्रमतृषाविदाहिनी ।
पीतनेत्रमलवत्युपेक्षया शोफयुग्भवति कुम्भकामला ॥९२॥

अथ अपामार्गादियोगः ।—

अपामार्गं शमीमूलं पिष्ट्वा तक्रेण पाययेत् ।
कामलां श्वयथुं पाण्डुं कर्षमात्रं नियच्छति ॥९३॥

अथ पञ्चास्यरसः ।—

तीक्ष्णमाक्षिककान्ताभ्र-शुल्बसूतकतालकम् ।
देवदालीरसैः पिष्टं वालुकायन्त्रमूर्च्छितम् ॥९४॥
अमृतोत्पलकह्लार-कन्दद्राक्षासमन्वितम् ।
पिष्टं यष्ट्यम्भसा क्षौद्र-सिताभ्यां कामलाप्रणुत् ॥९५॥

देवदालीपञ्चाङ्गप्रयोगे—देवदाल्या पीतघोषायाः पञ्चाङ्गं त्वक्पत्रपुष्पमूलफलरूपम्। क्षीरैश्च वा जलैरिति व्यत्ययेक्षया बहुत्वम् ॥ ९१ ॥

पाण्डुतोऽपि कामला जायते इति पाण्ड्वनन्तरं कामलाचिकित्सिते वक्तव्ये पूर्वं तस्या लक्षणमाह, दग्धेति।—दग्धात् पाण्डुरोगावस्थायामत्यर्थपित्तकरद्रव्यसेवनात् वर्द्धितपित्तेन दुष्टादित्यर्थः, मांसरुधिरास्रपित्ततः मांसात् रुधिरात् दुष्टात् केवलरक्तात् तथा अस्रपित्ततः दुष्टात् सपित्तात् रक्तादित्यर्थः। उपेक्षयेति कामलोपेक्षया कुम्भकामला भवति, सा च शोफयुक् शोथसमन्विता। कुम्भः कोष्ठ, अन्तश्छिद्रसाधर्म्यात्, तद्गता कामला कुम्भकामला कोष्ठाश्रयेत्यर्थः ॥ ९२ ॥

अपामार्गादियोगे—सर्वं सुगमम् ॥ ९३ ॥

पञ्चास्यरसे—तीक्ष्णं तीक्ष्णलौहम्। कान्तं कान्तलौहम्। वालुकायन्त्रमूर्च्छितं वालुकायन्त्रे पक्वमित्यर्थः, स च पाकः दिवसत्रयं कार्य्यः, तथा च रसरत्नाकरे—"पाचयेत् वालुकायन्त्रे त्रिदिनान्ते समुद्धरेत्" इति। अमृता गुडूची धात्री वा, कह्लारं कोकनदम्, उत्पलकह्लारयोः कन्दः, यद्वा—कन्दः कसेरु‍णम्। अत्र अमृतादीनां मिलित्वा पलमानता, रसरत्नाकरसंवादात्, यद्यपि तत्र "अमृतोत्पलकह्लारकन्दद्राक्षासमन्वितम्" इत्यत्र "अमृतोत्पलकन्दातिबलाचैवपलं युतम्" इति पाठभेदः, तथाऽपि अन्याङ्गसामान्यात् पलमानता ज्ञातव्या। वालुकायन्त्रे पक्वमौषधमुद्धृत्य अमृतादिभिः संयोज्य च यष्टिमधुक्वाथेन पिष्ट्वा क्षौद्रशर्कराभ्यामुपयोक्तव्यमित्याशयः ॥ ९४।९५ ॥

अथ त्रियोनि ।—

ताम्रस्य तुर्य्यभागेन रसेनोत्प्लुत्य लेपयेत् ।
निम्बुद्रावेण संयोज्य सूर्य्यतापे विनिक्षिपेत् ॥९६॥
ऊर्द्धाधो गन्धकं दत्त्वा पाचयेदतियत्नतः ।
मत्स्याक्षीमभितो दत्त्वा मृत्स्नया सन्निरुध्य च ॥९७॥
यामद्वयन्तु पक्वञ्च स्वाङ्गशीतं समुद्धरेत् ।
गुञ्जामात्रं ददीतास्य साभयं गुडसंयुतम् ॥
त्रियोन्याख्यो रसो ह्येष शोफपाण्डुपनोदनः ॥९८॥

अथ मुस्तादिचूर्णम् ।—

मुस्तामृताचित्रकयष्टिपिप्पली-विडङ्गशुण्ठीत्रिफलैर्यथोत्तरम् ।
चूर्णं सहायोरजसा च संयुतं समाक्षिकं पाण्डुगदापहं परम् ॥९९॥

अथ कामेश्वर ।—

पलं सूत पलं गन्ध वज्री पथ्या त्रयं त्रयम् ।
मुस्तैलापत्रकाणाञ्च प्रति सार्द्धपलं क्षिपेत् ॥१००॥

त्रियोनौ—तुर्य्यभागेन चतुर्थांशेन रसेन, रसशब्देनात्र रसगन्धकयोः कज्जली विवक्षिता केवलरसेन लेपासम्भवात्, ताम्रस्य, पत्राणीति शेषः, लेपयेत्, ततः निम्बुद्रवेण उत्प्लुत्य आप्लाव्येत्यर्थः, सूर्य्यतापे संयोज्य स्थापयित्वा, संशोष्य इत्यर्थः, विनिक्षिपेत्, मूषायामिति शेषः। मत्स्याक्षी हिलमोचिका काकमाची वा। चतुर्थांशकज्जलिकया ताम्रस्य पत्राणि आलिप्य जम्बीररसेनाप्लुत्य च आतपे शोषयेत्, ततो मूषायां संस्थाप्य ऊर्द्धाधो गन्धकं समन्तात् चूर्णं मत्स्याक्षीञ्च दत्त्वा मृत्कर्पटेनालिप्य च गजपुटे यामद्वयं पचेत्, अथ स्वाङ्गशीतमादाय गुडाभयाभ्यां गुञ्जामात्रमौषधं दद्यादिति। त्रीणि रसगन्धकताम्राणि योनयः उपादानकारणान्यस्य इति त्रियोनि ॥९६—९८॥

मुस्तादिचूर्णे—यथोत्तरं चूर्णमिति उत्तरोत्तरभागवृद्धं चूर्णम्। सहायोरजसा च संयुतं सर्वचूर्णतुल्यं लौहचूर्णमित्यर्थः, "सर्वांशं मृतलौहकम्" इति रसरत्नाकरदर्शनात्, तत्र च "यथोत्तरम्" इत्यत्र "समम्" इति पाठः "लौहामृतम्" इति संज्ञा च दृश्यते ॥९९॥

कामेश्वरे—वज्री स्नुही, तस्याः क्षीरं ग्राह्यम्। त्रयं त्रयमित्यस्य वज्रीपथ्ययोः प्रत्येकं

त्र्यूषणं पिप्पलीमूलं विषञ्चैव पलं पलम् ।
नागकेशरकर्षैकं रेणुकार्द्धपलं तथा ॥१०१॥
पुरातनगुडेनैव तुलार्द्धेन विपाचयेत् ।
मर्दयेत् कन्यकाद्रावैर्यामैकान्ते घृतेन च ॥१०२॥
गुटिका बदराभान्तु कारयेद्भक्षयेन्निशि ।
शोफपाण्डुहरः सोऽयं रसः कामेश्वरः स्वयम् ॥१०३॥

अथ पाण्डुघनानिलरसः ।—

ताम्रभस्म रसभस्म गन्धकं वत्सनाभमथ तुल्यभागतः ।
वह्नितोयपरिमर्दितं पचेद्यामपादमथ मन्दवह्निना ॥१०४॥
रक्तिकाद्वितयमानतोऽनिलान् शोफपाण्डुघनपङ्क्तिशोषणः ॥१०५॥

पलत्रयमित्यर्थः । "वज्री पथ्या त्रयं त्रयम" इत्यत्र "पथ्याचित्रकयोः पलम" इति रसेन्द्रसारसङ्ग्रहे पाठः । त्र्यूषणमिति ।—त्र्यूषणस्य प्रत्येकं पलमानता । कन्यकाद्रावैः कुमारीरसैः । यामैकान्ते कन्यकाद्रावैः प्रहरं मर्दयित्वा तदन्ते इत्यर्थः । "रेणुकार्द्धपलं तथा" इत्यत्र "एरण्डस्य पलं तथा" इति तथा "तुलार्द्धेन विपाचयेत • घृतेन च" इत्यत्र "तुल्येनैव विमिश्रयेत । मर्दयेत् कनकद्रावैर्यामैकं वा घृतान्वितम्" ("भावयेच्च घृतान्विताम") इति रसेन्द्रसारसङ्ग्रहरसरत्नाकरयोः पाठान्तरम । गुडपाकाभिज्ञो भिषक् सपादशरावषट्कं गुडमादाय किञ्चित् जलं दत्त्वा पचेत, घनीभूते च तस्मिन् आसन्नपाके सूतादिकं दत्त्वा अवतारयेत । अनन्तरं कुमारीरसेन यामं मर्दयित्वा तदन्ते घृतेन सह बदरास्थिनिभां वटीं कुर्य्यात इति ॥ १००—१०३ ॥

ताम्रभस्मेति ।—पाण्डुघनानिलरसनामाऽयं प्रागेव (७३।७४) श्लोके व्याख्यातः । पुनरुक्तोऽयम्, अथवा—वक्ष्यमाणकसादिपञ्चकेन सह प्रयुक्तोऽयं प्लीहकहृत् भवतीति ज्ञापनार्थमस्य पुनरुल्लेखो न दोषाय इति मन्तव्यम् । अस्मिन् पक्षे कसादिपञ्चकेन सह एक एवायं योगः, तथा च कसेन मृतेन कांस्येन शिलया मनःशिलया च सहितः पिष्टः मर्दितः रसः अनिलरसः पाचितः पुनः पुटपाकेन पक्वः हताभ्यां तीक्ष्णताम्राभ्यां लौहताम्रभस्मभ्यां युतः प्लीहकं हन्ति ॥ १०४।१०५ ॥

अथ कंसादिपञ्चकम् ।—

कंसेन पिष्ट शिलया सहित पाचितो रसः ।
हताभ्यां तीक्ष्णताम्राभ्यां युतो हन्ति हलीमकम् ॥१०६॥

अथ सिन्दूरभूषण ।—

शुद्धसूतञ्च सिन्दूर पलैकैकं विमर्दयेत् ।
वासारसेन यामैक तेन कुर्य्याच्च चक्रिकाम् ॥१०७॥
सुपक्वा कारयेन्मूषामुत्ताना द्वादशाङ्गुलाम् ।
तन्मध्ये गन्धकं शुद्धं क्षिपेत् पलचतुष्टयम् ॥१०८॥
पूर्वोक्ता चक्रिका कृत्वा तत् क्षिप्ता प्रपुटेल्लघु ।
जीर्णे गन्धे समुद्धृत्य चक्रिका तां विचूर्णयेत् ॥१०९॥
चूर्णाद्दशगुण योज्यं मृतलोहञ्च मर्दयेत ।
लशुनेन दशांशेन चणमात्रा वटी' किरेत् ॥११०॥
वातपाण्डुहरः सिद्धो रसः सिन्दूरभूषणः ।
पिबेच्चानु ह्यपामार्गस्यैरण्डस्य च मूलिकाम् ॥
तक्रे' पिष्ट्वाऽथ कर्षकं हन्ति पाण्डु सकामलम् ॥१११॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये उदरपाण्डु-शोफकामलाकुम्भकामलाहलीमकचिकित्सित नामैकोनविंशोऽध्याय ॥१९॥

कंसादिपञ्चके—रस पारद एतत्तु अस्य स्वतन्त्रयोगत्वे एव बोद्धव्यम् । अन्यत्र पूर्वयोगे व्याख्यातमिति ॥ १०६ ॥

सिन्दूरभूषणे—सिन्दूर प्रसिद्धम् । "सुपक्काम" इत्यत्र "अपक्वाम" इति रसरत्नाकरोक्त पाठ । उत्तानाम उन्नता विस्तृता वा । जीर्णे भस्मीभूते ॥१०७—१११॥

इति रसरत्नसमुच्चयबोधिन्याम् एकोनविंशोऽध्याय ॥ १९ ॥

अथ विंशोऽध्यायः ।

अथ विसर्पादिचिकित्सनम् ।—

अथ विसर्पकुष्ठश्वित्रचिकित्सा ।—

अथ कालाग्निरुद्ररसः ।—

कान्तगन्धकतीक्ष्णाभ्र-विषताप्यसमन्वितः ।
वन्ध्याकर्कोटिकाकन्दे पक्वः सूतो विसर्पजित् ॥१॥

अथ एरण्डबीजादि तैलम् ।—

एरण्डतुम्बिनीनिम्ब-वाकुचीचक्रमर्दकम् ।
तिक्तकोशातकीबीजमङ्कोलश्चञ्चुबीजकम् ॥२॥

शीघ्रत्वसामान्यात् रक्तदुष्टिसामान्याच्च उदराद्यनन्तरं विसर्पादिचिकित्सितं वक्तुं विंशाध्यायमारभते। तत्र कालाग्निरुद्ररसे—वन्ध्याकर्कोटिकाकन्दे वन्ध्याकर्कोटकी तिक्तकर्कोटकी, "तित कॉक्‌डो" "तित काँक्‌रोल" इति लोके, तस्याः कन्दे कन्दोत्थकल्के इत्यर्थः। पक्व इति भूधराख्यपुटे पक्वः, तन्त्रान्तरेषु तथा दर्शनात्। अत्राय विधिः,—आदौ रसगन्धकयोः कज्जलीं कृत्वा कान्तादिकं तत्र दत्त्वा च सम्मर्दयेत्, ततः वन्ध्याकर्कोटिकाकन्दकल्कोदरे संस्थाप्य मृदा आलिप्य च भूधर-पुटे दिनैकं पक्त्वा उचितानुपानेन प्रयुञ्ज्यादिति। रसेन्द्रसारसङ्ग्रहादिषु चायं किञ्चित् वैषम्येण पठितः, तथा च "सूताभ्रकान्तलौहानां भस्म गन्धकमाक्षिकम्। वन्ध्याकर्कोटकाद्रावैस्तुल्यं मर्द्यं दिनावधि॥ वन्ध्याकर्कोटिकाकन्दे क्षिप्त्वा लिप्त्वा मृदा बहिः। भूधराख्ये पुटे पश्चाद्दिनैकं तद्विपाचयेत्॥ दशमांशं विषं योज्यं माषमात्रन्तु भक्षयेत्। रसः कालाग्निरुद्रोऽयं दशाहेन विसर्पनुत्॥ पिप्पलीमधु-संयुक्तमनुपानं प्रकल्पयेत्॥" इति। प्रचारस्तु इत्थमेव॥ १ ॥

एरण्डबीजादितैले—तुम्बिनी कटुतुम्बी। वाकुची सोमराजी। तिक्तकोषातकी तिक्तघोषकः। बीजमिति पदम् एरण्डादिभिः कोशातक्यन्तैः सर्वैः सम्बध्यते। अङ्कोलः अङ्कोठ, तस्य बीजम्। चञ्चुः क्षुद्रचुञ्चु, "चे॑च्‌को" इति प्रसिद्धः

गोमूत्रदधिदुग्धैस्तु भावयेत्तिलजेन च।
मूत्रेणाजाप्रसूतेन तैलं पातालयन्त्रजम्॥
विसर्पं नाशयत्याशु श्वेतकुष्ठञ्च तत्क्षणात्॥ ३॥

अथ द्वितीयैरण्डबीजादि तैलम्।—

एरण्डतुम्बीकटुबिम्बचक्र-मर्दास्थिबीजानि च सोमराजी।
अङ्कोलबीजानि समानि कृत्वा पातालयन्त्रेण सुतैलमेषाम्॥४॥
प्रगृह्य तेनाथ विमर्दयीत विसर्पकादीनि क्षतं प्रयान्ति॥५॥

अथ गलत्कुष्ठलक्षणम्।—

पादयोः श्वयथुस्तोदो गलन्त्यङ्गुलयो यदि।
नासिकास्वरयोर्भङ्गो गलत्कुष्ठस्य लक्षणम्॥६॥

अथ कुष्ठेषु क्रियासूचनम्।—

सर्वेषां कुष्ठिनामादौ पञ्चकर्माणि कारयेत्।
पक्षे पक्षे च वमनं मासि मासि विरेचनम्॥७॥

शाकविशेषः तस्याः बीजकम्। तिलजेन तिलतैलेन तिलक्वाथेन वा। मूत्रेणाजाप्रसूतेन छागीमूत्रेण। पातालयन्त्रजं पातालयन्त्रे निष्काशितम्। "तत्क्षणात्" इत्यत्र "क्षणात्" इति पाठान्तरम्। कल्पना चास्य एवंविधा—मनाक् क्षुण्णम् एरण्डादीनां बीजं प्रत्येकं तुल्यांशं गृहीत्वा गोमूत्रादिभिः सप्त सप्तवारान् भावयेत्। ततो भूम्यधोनिहितस्नेहभावितस्थालीमुखे बहुच्छिद्रां स्थालीमन्यां संस्थाप्य तन्मध्ये औषधं निदध्यात्, ततः शरावेण स्थालीमुखमाच्छाद्य मृत्स्नादिना सन्धिं निरुध्य च उपरिष्टात् पुटं दद्यात्। एवञ्च अग्निसन्तापेन तस्मादौषधात् तैलं निःसृत्य अधःस्थाल्यां निपतेदिति॥२।३॥

द्वितीयैरण्डबीजादितैले—तुम्बीकटु कटुतुम्बी, रोहिणीकटुका इत्यादिवत् परनिपातः, यद्वा—कटु इति पृथक् पदं, राजिका इत्यर्थः। बिम्बम् ओष्ठोपमाफलम्, "बिम्ब" इत्यत्र "निम्ब" इति पाठान्तरम्। विमर्दयीत इति मर्द्दनप्रयोगात् नासाधु मन्तव्यम्। "क्षतम्" इति "सुतैलम्" इत्यनेन सम्बध्यते, पातालयन्त्रेण क्षतं विहितं, न सारितमित्यर्थः। तैलनिष्कासनप्रकारस्तु पूर्ववदेव॥ ४।५॥

तुल्यदोषदूष्यत्वात् रक्तदुष्टिसाधर्म्याच्च विसर्पानन्तरं कुष्ठचिकित्सितं विवक्षुरादौ गलत्कुष्ठलक्षणमाह, पादयोरिति।—गलन्ति पतन्ति॥ ६॥

षष्ठे मासि शिरामोक्षो नस्य सप्तदिनान्तरे ।
इदं चिरस्थिते कार्य्यं कुष्ठे स्वल्पेऽल्पशः क्रिया ॥८॥

अथ वातकुष्ठारिः ।—

विपचेद्गन्धकमध्ये घनपिष्टीं शुल्वपिष्टीं वा ।
सङ्कोच्य कोलकोऽयं शमयति वातोत्थकुष्ठानि ॥९॥

अथ पित्तकुष्ठारिः ।—

कामलाऽभ्रकसङ्कोचो घृतगन्धकपाचितः ।
व्योषाग्निवेल्लत्वङ्मुस्ता-व्याधिघातविषैः समः ॥१०॥
त्रिगुणः प्राणदो रेणुः पञ्चाशन्मृतकाञ्चनः ।
बदरास्थिमितो मूत्रेणाजेन गुटिकीकृतः ।
नाशनः पित्तकुष्ठानामेकविंशतिवासरात् ॥११॥

क्रियासूत्रमाह, सर्वेषामिति ।—पञ्चकर्माणि वमनविरेचनास्थापनानुवासनशिरोविरेचनरूपाणि । शिरामोक्षः दुष्टरक्तस्रावणार्थं कार्य्यः । इदमिति ।—चिरस्थिते दीर्घकालोत्पन्ने अत एव बहुदोषे इत्यर्थः, इदं पक्षे पक्षे वमनमित्यादिरूपम् । यदुक्तं चरकेण—"बहुदोषः संशोध्यः कुष्ठी बहुशोऽनुरक्षता प्राणान्" इति । स्वल्पे अल्पदोषे क्षुद्रे च कुष्ठे अल्पशः क्रिया मासान्ते मासद्वयान्ते वा पूर्वोक्ता क्रिया कार्य्या ॥ ७।८ ॥

वातकुष्ठारौ—घनपिष्टीं मारकवर्गद्रवेण पिष्टं पिण्डीकृतमभ्रमित्यर्थः, शुल्वपिष्टीं वा पूर्वोक्तप्रकारेण सिद्धं ताम्रपिण्डं वेत्यर्थः, गन्धकमध्ये विपचेत मूषायाम् अधः गन्धकं संस्थाप्य तदुपरि औषधं निधाय पुनर्गन्धकं दत्त्वा च गजपुटे पचेत् । सङ्कोच्य दग्ध्वा इत्यर्थः, दग्धस्य अवयवसङ्कोचात्, सङ्कोच्य इति वातोत्थकुष्ठानि इत्यनेन सम्बध्यते वा, वातोत्थकुष्ठानि सङ्कोच्य अल्पीकृत्येत्यर्थः । कोलकोऽयं कोलकाख्यः अयं योगः, कोलप्रमाणः अयं योगः इति वा ॥ ९ ॥

पित्तकुष्ठारौ—कामलाभ्रकम् अभ्रकविशेषः, मरुदेशजमभ्रं वा, केचित्तु कामलाभ्रकशब्देन पीताभ्रं गृह्णन्ति, तस्य सङ्कोचः भस्म इत्यर्थः । व्याधिघातः आरग्वधः । प्राणदो रेणुः जीवकचूर्णम्, यद्वा—प्राणदः जीवकः, रेणुः रेणुकः, स च व्योषादीनामेकभागसमः । "पञ्चाशत्" इत्यत्र "पञ्चांशम्" इति पाठान्तरम् । घृतगन्धकाभ्यां पुटितस्य कामलाभ्रकस्य भस्म समं व्योषादिभिः त्रिगुणप्राणदेन

अथ श्लेष्मकुष्ठारिः ।—

कनकाभ्रकसङ्कोचस्तैलगन्धकपाचितः ।
विषव्योषाब्दवेल्लत्वक् तुल्यस्त्रिगुणचित्रकः ॥
गुञ्जामानोऽजमूत्रेण पिण्डितः श्लेष्मकुष्ठनुत् ॥१२॥

अथ त्रिदोषकुष्ठारिः ।—

तीक्ष्णाभ्रहेमसङ्कोचस्तैलगन्धकपाचितः ।
ताम्रताप्यविशालाग्नि-बोलपाठाजटाविषैः ॥१३॥
शृङ्गीटङ्कणयष्ट्याह्व-सिन्धुवारैः समन्वितः ।
रसेन भृङ्गवेरस्य बद्धो बदरसन्निभः ॥
छायाविशोषितः कुष्ठं निहन्यात् सन्निपातजम् ॥१४॥

अथ विजयवटिका ।—

रेणुका पिप्पलीमूलं बाकुची विषतिन्दुकम् ।
अश्वगन्धा पलाशास्थि व्योषादिनवकं वचा ॥१५॥
विशाला गन्धकं कुष्ठं सविषं रसभस्म च ।
गुडेन गुटिकां कुर्य्यात् समेन मधुमिश्रिताम् ॥१६॥

पश्चाद्भागस्वर्णभस्मना च संयोज्य छागमूत्रेण पेषयेत् ततः कोलास्थिमानां गुडिकां विधाय प्रयोजयेदिति ॥ १०।११ ॥

कफकुष्ठारौ—कनकाभ्रकयोः सुवर्णाभ्रयोः सङ्कोचः । केचित्तु कनकाभ्रक-शब्देन रक्ताभ्रं गृह्णन्ति । कल्पना तु पूर्ववदेव कार्य्या ॥१२॥

त्रिदोषकुष्ठारौ—तीक्ष्णं तीक्ष्णलौहम्, केचित्तु तीक्ष्णाभ्रशब्देन कृष्णवर्णवज्राभ्रं गृह्णन्ति। विशाला इन्द्रवारुणी । अग्निः भल्लातः, कुष्ठहरत्वात । बोलः गन्धरसः, गन्धबोल इति ख्यातः वणिग्द्रव्यविशेषः । जटा जटामांसी, पाठाजटा इत्येकपदं वा, तत्र पाठामूलमित्यर्थः ॥ १३।१४ ॥

विजयवटिकायां—रेणुका कौन्ती। बाकुची सोमराजी। विषतिन्दुकं विषमुष्टिः, "कुँचिला" इति ख्यातम्। पलाशास्थि पलाशबीजम्। व्योषादिनवकं त्रिकटुत्रिफलात्रिमदात्मकं त्रिकत्रयमित्यर्थः । समेन सर्वचूर्णतुल्येनेत्यर्थः, न त्वेकभाग-समेन, "गुडेन गुटिकां कुर्य्यात्" इत्युक्त्या एकभागतुल्यस्य गुडस्य गुटिकाकर-

तां भक्षयेत् सितासर्पिः-क्षीरशाल्यन्नभाग्भवेत् ।
जलौदनं वा भुञ्जानो ब्रह्मचर्य्यपरायणः ॥ १७ ॥
स्वादेत्तापे सिताधान्य-सर्पिर्नागबलारजः ।
वटिका विजयाख्येयं सप्तकुष्ठान्नियच्छति ॥ १८ ॥

अथ सर्वेश्वरः ।—

पालिकं ताम्रगन्धाभ्रं कर्षांशं लोहपारदम् ।
स्नुह्यर्कक्षीरवातारि-जम्बीरोत्थैश्च वारिभिः ॥ १९ ॥
मर्दितं बालुकायन्त्रे स्वेदयेत् दिवसत्रयम् ।
कर्षं कणाया निष्कञ्च विषस्यास्मिन् विनिक्षिपेत् ॥
एष सर्वेश्वरः सद्यो गुञ्जामात्रः प्रसुप्तिजित् ॥ २० ॥

अथ सुप्तिकुष्ठदलनो रसः ।—

गन्धो रसश्च कटुतैलमृतो मृतोऽर्को
व्योषाग्निवेल्लविषमेघभयावचाभिः ।
ज्वालामुखीरसविमर्दितमाक्षिकाढ्यः
पिण्डीकृतः शमयति स्थिरसुप्तकुष्ठम् ॥ २१ ॥

स्यानुपपत्तेः । जलौदनं जलधौतमन्नम् । "जलौदनम्" इत्यत्र "यवौदनम्" इति पाठः समीचीनः । तापे औषधसेवनजनितोष्मायाम् । नागबला गोरक्षतण्डुला । धान्यनागबलाचूर्णं शर्कराघृताभ्यामालोड्य लिह्यात । सप्तकुष्ठान् सप्तमहाकुष्ठानीत्यर्थः ॥ १५—१८ ॥

सर्वेश्वरः—पालिकमिति ताम्रादीनां त्रयाणां प्रत्येकं पलमानता । एवं लौहपारदयोरपि प्रत्येकं कर्षांशता । वातारिः एरण्डमूलम् । प्रसुप्तिजित् सुप्तिकुष्ठनाशनः ॥ १९।२० ॥

सुप्तिकुष्ठदलनरसे—कटुतैलमृतः कटुतैलपक्वः सार्षपतैले शोधित इत्यर्थः, अर्क इत्यस्य विशेषणम्, ताम्रपत्राणि अग्नौ प्रताप्य कटुतैले निषिञ्चेत्, एवञ्च कटुतैलमृतः अर्को निष्पद्यते । अग्निः चित्रकः भल्लातको वा । वेल्लं विडङ्गम् । मेघः मुस्तकम् । भया अभया इत्यर्थः, "नामैकदेशग्रहणेन नामसमुदायग्रहणम्"

अथ प्रतापलङ्केश्वरः ।—

विषादिकाग्नी रसगन्धटङ्कणं सताम्रकुष्ठायसपिप्पलीरजः ।
विमर्दितं काञ्चनपत्रवारिणा प्रतापलङ्केश्वरसञ्ज्ञितो रसः ॥२२॥

अथ किटिमारितैलम् ।—

स्नुह्याः कुडवं पयसः प्रस्थं दुग्धस्य नारिकेलस्य ।
गन्धकनिशयोः कर्षं पारदकर्षञ्च साधु संयोज्यम् ॥२३॥
खरतरकिरणातापात् पक्वं तैलं विलेपितं प्राज्ञैः ।
कुष्ठकिटिभेऽपहन्ति प्रबलञ्च समीरणं हन्यात् ॥ २४ ॥

अथ सिध्मे गन्धपाषाणलेपः ।—

मर्दितो मूलकक्षारस्याऽऽर्द्रकस्य च वारिणा ।
शमयेद्गन्धपाषाणः पिष्टः सिध्मं विलेपनात् ॥ २५ ॥

इति न्यायात् । "विषमिश्रभया" इत्यत्र "विषभेद्यभया" इति पाठे—भेदी अम्लवेतसः । ज्वालामुखी लाङ्गली, तस्याः रसः । पिण्डीकृतः गुडीकृतः इत्यर्थः ॥ २१ ॥

प्रतापलङ्केश्वरे—काञ्चनपत्रवारिणा धुस्तूरपत्ररसेन, तथा च रसरत्नाकरे—"भस्म सूतार्कलोहानां कृष्णा गन्धकटङ्कणम् । कुष्ठतुल्यकतुल्यांश मर्द्यं धुस्तूरजैर्द्रवैः ॥ दिनैकं तद्वटीं कुर्यात् माषमात्रञ्च भक्षयेत् । रसो लङ्केश्वरो नाम्ना प्रसुप्तमण्डलप्रणुत् ॥ गन्धकं त्रिफलाचूर्णं निर्विषी गुग्गुलुं समम् । लिह्याद्देरण्डतैलेन कर्षैकमनुपानकम् ॥" इति । तत्राय "लङ्केश्वररसः" इति ख्यातम् ॥ २२ ॥

किटिमारितैले—गन्धकनिशयोः प्रत्येकं कर्षः । खरतरकिरणातापात् खरतरकिरणः सूर्यः तस्य आतापात् सम्यक् तापात् । तैलं सार्षपं, कुष्ठहितत्वात्, तैलञ्चात्र प्रस्थमितं ग्राह्यम्, "अनिर्दिष्टप्रमाणानां स्नेहानां प्रस्थ इष्यते" इति परिभाषाबलात् । अस्य पर्वी—कटुतैलं १ प्र० स्नुहीक्षीरं ४ प० नारिकेलक्षीरं १ प्र० निशागन्धकपारदानां प्र० १ क० आद्रवक्षयात् रौद्रसन्तापे स्थापनीयम् इति ॥ २३।२४ ॥

गन्धपाषाणलेपे—वारिणा इति पदं मूलकक्षारस्य आर्द्रकस्य च इत्युभयत्रापि सम्बध्यते, मूलकभस्मकृतक्षारोदकेन आर्द्रकस्वरसेन च । गन्धपाषाणः गन्धकः ॥ २५ ॥

अथ श्विते वराटिकालेपः ।—

वराटपिष्टी जम्बीरनीरार्द्रा वाऽऽतपे धृता ॥ २६ ॥

अथ दद्रुकुष्ठे मयूरक्षारादिलेपः ।—

मयूरमोचकक्षारं मेषशृङ्गीरसो रसः ।

त्रिक्षारद्विनिशाव्योष-शुल्व लेपेन दद्रुजित् ॥२७॥

अथ चर्मकुष्ठे पर्पटीरसप्रयोगविधिः ।—

चतुर्थांशेन ताम्रस्य भस्मना सक्तुकेन च ।

कृतावापो हरेत् कुष्ठं चर्माख्यं पर्पटीरसः ॥ २८ ॥

अथ चर्मकुष्ठे मेघनादाद्युद्वर्त्तनम् ।—

मेघनादामृतानीली-गदा कृष्णतिला मधु ।

अश्वमेधामृतश्वेतैर्युक्ता गन्धककज्जली ॥

उद्वर्त्तनेन षण्मासाद्गजचर्मविनाशनी ॥ २९ ॥

अथ क्षतारुषि रसादिषट्कम् ।—

रसगन्धकताप्यार्क-शिलाजत्वम्लवेतसम् ।

अष्टमांशगुडं साज्य-माक्षिकं स्यात्क्षतारुषि ॥३०॥

वराटिकालेपे—जम्बीरनीरार्द्रा जम्बीररससिक्ता वराटपिष्टी वराटकचूर्णम् आतपे धृता, विलेपनात् श्वित्रं शमयेत इति पूर्वेणान्वयः । अत्र वा शब्दः पूर्वयोगापेक्षया ॥ २६ ॥

मयूरक्षारादिलेपे—मयूरः अपामार्गः मोचकः घण्टापाटला तयोः क्षारम् । रसः रसभस्म ॥ २७ ॥

पर्पटीरसप्रयोगविधौ—पर्पटीरसापेक्षया ताम्रभस्मनः चतुर्थांशता, एवं सक्तुकस्यापि । सक्तुकः विषभेदः, यवसक्तुको वा । कृतावापः कृतप्रक्षेपः मिश्रित इत्यर्थः । पर्पटीरसः "रसः द्विगुणगन्धेन" इत्यादिना रक्तपित्तादिचिकित्सितोक्तः । यथोक्तमानताम्रभस्मादिना मिश्रितः पर्पटीरसः चर्मकुष्ठे प्रयुञ्जीत इत्यर्थः ॥ २८ ॥

मेघनादाद्युद्वर्त्तने—मेघनादः स्वल्पमारिषः । अमृता गुडूची । नीली नीलवुह्रा । गदः कुष्ठम् । अश्वमेधः करवीरः । अमृतं विषम् । गन्धककज्जली द्विगुणगन्धककृता कज्जलीत्यर्थः । गजचर्मविनाशिनी चर्माख्यकुष्ठविनाशिनी ॥२९॥

रसादिषट्के—अष्टमांशगुडमिति मिलितरसादिचूर्णापेक्षया बोध्यम् । साज्य-

अथ कुष्ठविधूननो रसः ।—

हिममाक्षिकगन्धाश्म-तीक्ष्णकान्ताभ्रकं समम् ।
द्विगुणं हरवीर्य्यञ्च दशमाशञ्च सक्तुकम् ॥३१॥
मञ्जिष्ठादिकषायेण बालुकायन्त्रपाचितम् ।
कृष्णवर्णैकसङ्काशमिदं भस्मैव कुष्ठजित् ॥ ३२ ॥

अथ मञ्जिष्ठादिगणः ।—

मञ्जिष्ठाघनदारुकुष्ठखदिर-श्रेष्ठावचाबाकुची
पाठापर्पटराजवृक्षकटुका-यष्ट्याह्वमूर्वानिशा ।
त्रायन्तीकिटिमारवेल्लवृषक निम्बामृतावत्सकं
काकोली सदुरालभा च परमं कुष्ठक्षयघ्नो गणः ॥३३॥

अथ सिध्माडुम्बरघ्नी कङ्गुणीतैलम् ।—

आरग्वधरसो गुञ्जा-बाकुचीगन्धक त्रयैः ।
सरसैः कङ्गुणीतैलं जयेत् सिध्ममुडुम्बरम् ॥३४॥

अथ पामारि तैलम् ।—

विपक्वा कटुतैलेन पामाहृद्गन्धपिष्टिका ॥३५॥

माक्षिकं यावद्ग्रामाज्यमाक्षिकाख्या मर्दनार्हता जायते, तावन्मानमाज्यमाक्षिकमित्यर्थः । श्वतारुषि तदाख्यकुष्ठविशेषे । भक्षणविषया योज्योऽयम् ॥३०॥

कुष्ठविधूननरसे—दशमाशञ्च सक्तुकमिति एकभागापेक्षया दशमांशता । सक्तुकं विषभेदः यवशक्तु वा । मञ्जिष्ठादिकषायेण मञ्जिष्ठाघनेत्यादिना वक्ष्यमाण कषायेण । कृष्णवर्णैकसङ्काशं कृष्णवर्णमित्यर्थः । अयमपि भक्षणविषया प्रयोज्यः ॥३१।३२ ॥

मञ्जिष्ठादिगणे—श्रेष्ठा त्रिफला । राजवृक्ष आरग्वधः । त्रायन्ती त्रायमाणा । किटि वाराहीकन्द । मार धुस्तूर । वेल्ल विडङ्ग । वत्सकं इन्द्रयव ॥३३॥

कङ्गुणीतैले—आरग्वधरसः आरग्वधमूलक्वाथ, स च स्नेहचतुर्गुणः । गुञ्जा बाकुचीगन्धकरसानां चतुर्णां कल्कः स्नेहपादिकः । कङ्गुणी तृणधान्यविशेष, तस्य तैलं, तच्च प्रसिद्धम् । उडुम्बरं कुष्ठविशेषम् ॥ ३४ ॥

पामारितैले—विपक्वा आदित्यकिरणपक्वा इत्यर्थः, तथा च सिद्धयोगे—"पिबति सकटुतैलं गन्धपाषाणचूर्णं रविकिरणसुतप्तं पामको यः पलार्द्धम् । त्रिदिन-

अथ तालेश्वरः ।—

हरितालपले द्वे द्वे टङ्कणे रसगन्धयोः ।
कुर्कुटीपत्रसारेण पिष्टं ताम्रमयोरजः ॥३६॥
पञ्चशो मर्दितं धात्री-कुर्कुटीरसमाक्षिकैः ।
वर्षाभूचित्रपत्राढ्यं मूषागर्भे निवेशितम् ॥३७॥
पाचितं भूधरे संस्थं पर्णखण्डेन भक्षयेत् ।
हिङ्गुजम्बीरवातारि-तैलैः पवनपीडितैः ॥३८॥
माधूकसारसिन्धूत्थ-वचाव्योषैर्हृतौजसि ।
शोफे भक्ताम्बुना कुष्ठे घृतेन पयसाऽथवा ॥३९॥
धारोष्णेनाऽऽर्द्रकस्यास्तु कामलाया रसेन च ।
रसस्तालेश्वराख्योऽयं सर्वकुष्ठहरः परम् ॥४०॥

तदनुसिक्त क्षीरभोजी च शीघ्रं भवति कनकदीप्त्या कामयुक्तो मनुष्य ॥” इति । गन्धपिष्टिका गन्धपाषाणचूर्णम् । त्रिभिर्दिनैः पल्लाद्धं पातव्यमिति केचित्, व्यवहारस्तु शोधितगन्धकचूर्णस्य माषकचतुष्टयं कटुतैलस्य च कर्ष एक इति । एतेन गात्रं म्रक्षयित्वा प्रभूतदुग्धपायी भवेत् निवातातपे च तिष्ठेदित्युपदेश ॥ ३५ ॥

तालेश्वरे—द्वे टङ्कणे रसगन्धयोरिति मिलित्वा । टङ्कण कोल, एवञ्च रसगन्धयो प्रत्येकं तोलैकं ग्राह्यम् । कुक्कुटीपत्रसारेण कुर्कुटी कुकुन्दर, “कुक्शिमा” इति प्रसिद्ध, तस्या पत्ररसेन । ताम्रायोरजसोरपि रसगन्धसाहचर्य्यात द्वे टङ्कणे । पञ्चश पञ्च पञ्च वारान् । वर्षाभूचित्रपत्राढ्य वर्षाभू पुनर्नवा, चित्र चित्रक एरण्डो वा, तत्पत्राढ्य पत्रबहुलम् । पवनपीडितै वातरोगिभि । “पवनपीडितै” इत्यत्र “पवनपीडितै” इति पाठ समीचीन । आर्द्रकस्यास्तु इत्यत्र अस्तु क्रियापद, कामलायामार्द्रकरसेन प्रयुक्तो भवतु इत्यर्थं । हरितालपलद्वय रसगन्धकयो तथा कुर्कुटीपत्ररसेन पिष्टयो मारितयोश्च ताम्रायोरजसो प्रत्येक कर्षार्द्धं धात्र्यादिभि पञ्च पञ्च वारान् भावयित्वा गोलकं कुर्य्यात, तत प्रभूतवर्षाभूचित्रपत्राभ्या तमावेष्ट्य मूषाया निरुध्य च भूधरपुटे पचेदिति निष्कर्ष. ॥ ३६—४० ॥

अथ महातालेश्वर ।—

तालताप्यशिलाटङ्क-रसेन्द्रलवणं समम् ।
तालकाद्विगुणं ताम्रं मृतं तद्वच्च गन्धकम् ॥४१॥
अम्लेन पञ्चश: पिष्टं जम्बीरस्य पुटे पचेत् ।
मदनेन वमिं कुर्य्याद्विरेकं पथ्ययाऽपि च ॥४२॥
लोहचूर्णस्य चत्वारो भागा: सिद्धरसस्य षट् ।
अष्टौ नेपालताम्रस्य गन्धकेन हतस्य च ॥४३॥
जम्बीराम्लेन तत् सर्वं मर्दितं पुटपाचितम् ।
एकत्रिंशांशगरलं माषद्वितयसम्मितम् ॥४४॥
शुद्ध संशोधनं कुर्वन् मध्ये मध्ये च भक्षयेत् ।
सन्निपाते मधूकेन व्योषेण पवने हित: ॥४५॥
ग्रहणीकामलापाण्डु-गुल्मार्शांसि हलीमकम् ।
क्षयञ्च शमयत्येष महातालेश्वरो रस ॥४६॥

महातालेश्वरे—शिला मन शिला । लवण सैन्धवम । तद्वत ताम्रवदित्यर्थ । पुटे पचेत भूधराख्यपुटे षड्वार पचेत, प्रतिपुटावसरे जम्बीरद्रवैर्मर्दयेच्च, रसरत्नाकर-संवादात । मदनेन मदनफलभक्षणेन । कुर्य्यात, कुर्वीतेति शेष । एव विरेक पथ्यया इत्यत्रापि योजनीयम् । मदनेन इत्यादिग्रन्थ समानतन्त्रेषु न दृश्यते, न सुष्ठु सङ्गच्छते चायमत्र, औषधप्रस्तुतप्रकरणे प्रसङ्गान्तरापातात् , "मध्ये मध्ये च भक्षयेत" इत्यनन्तरमस्य निवेश युक्त । सिद्धरसस्य तालताप्येत्यादिना निष्पन्नस्य औषधस्य । "अष्टौ नेपालताम्रस्य" इत्यत्र "द्विपल मारित ताम्रम्" इति तथा "एकत्रिंशांश-गरलम्" इत्यत्र "त्रिंशदंश विषञ्चास्य" इति च रसरत्नाकरे पाठ । शुद्ध स्नेहा-दिभि कृतदोषानुलोमन । "शुद्ध" इत्यत्र "स्निग्ध" इति पाठकल्पना साधीयसी । संशोधन कुर्वन् मदनादिना वमनादिभिरात्मान शोधयन्नित्यर्थ , अथवा—आदौ शुद्ध सन् मध्ये मध्ये संशोधन कुर्वंश्च औषधसेवनस्य मध्ये मध्ये आत्मान वमना-दिभि पुन शोधयन्नित्यर्थ । अत्र मध्वाज्याभ्या वाकुचीचूर्णकषायानुपान तन्त्रान्तर-विहितमनुसर्त्तव्यम् । तथा च रसरत्नाकरे—"ताल ताप्य शिला सूत शुद्ध सैन्धव-टङ्कणम् । समाश चूर्णयेत् खल्ले सूताद्विगुणगन्धकम् ॥ गन्धतुल्य मृत ताम्र जम्बीरै-

अथ सर्वकुष्ठान्तकतैलम् ।—

कृष्णाभ्रकं बलिवसा नीलज्योतीरस रसम् ।
कङ्गुणीनिम्बकार्पास-तैलञ्चायसि मर्दयेत् ॥
तज्जयेत् सर्वकुष्ठानि वह्निरन्तश्च सेवितम् ॥४७॥

अथ कुष्ठविध्वसनो लेप ।—

रसटङ्कणगन्धार्क-पिप्पलीकुष्ठचन्दनम् ।
कुष्ठविध्वंसनो लेपो मातुलुङ्गाम्बुमर्दितः ॥४८॥

अथ कनकसुन्दर ।—

समतुलकनकोत्थ-व्योमसत्त्वोत्थपिष्टी
द्विगुणरससमेतां गोलमध्ये विपाच्य ।

दिनपञ्च च। मर्द्य षड्भि पुटै पाच्य भूधरे सम्पटोदरे॥ पुटे पुटे द्रवैर्मर्द्यं सर्वमेतच्च षट्पलम् । द्विपल मारित ताम्र लोहभस्म चतु पलम् ॥ जम्बीराम्लेन तत सर्वं दिन मर्द्य पुटेल्लघु। त्रिशदश विषञ्चास्य क्षिप्य सर्वं विचूर्णयेत ॥ मद्विषाज्येन सम्मिश्र निष्कार्द्धं पुण्डरीकनुत। मध्वाज्ये बाकुचीचूर्णं कर्षमात्र लिहेदन ॥ सर्वान कुष्ठान निहन्त्याशु महातालेश्वरो रस ॥" इति। तालादिक यथोक्तमान जम्बीराम्लेन पञ्चवारान् मर्दयित्वा भूधरपुटे पचेत, एव षड्वारान् कुर्यात। तत पक्वौषधस्य षड्भागान् लौहस्य चतुर ताम्रस्य चाष्टौ एकीकृत्य जम्बीराम्लेन दिन मर्दयित्वा लघुपुटे पुन पचेत। स्वाङ्गशीतमादाय विचूर्ण्य च सिद्धौषधात एकत्रिंशांशेन विषेण सह मर्दयित्वा स्थापयेत। तत स्निग्धतनु-रूर्द्धाध शोधनेनात्मान शोधयन् माषद्वयमित यथोक्तानुपानेन खादेत्, मध्ये मध्ये सशोधन कुर्याच्च इति ॥ ४१—४६ ॥

सर्वकुष्ठान्तकतैले—बलिवसा गन्धक, तथा चोक्त प्राक् तृतीयाध्याये—"बलिना सेवित पूर्वं प्रभूतबलहेतवे। वासुकि कर्षतस्तस्य तन्मुखज्वालया द्रुता॥ वसा गन्धकगन्धाढ्या सर्वतो नि सृता ततो । गन्धकत्वञ्च सम्प्राप्ता गन्धोऽभूत सविष स्मृत ॥ तस्माद्बलिवसेत्युक्तो गन्धकोऽतिमनोहर ॥" इति। नीलज्योतीरस तुत्थक, कुष्ठ-हरत्वात। रस पारदम्। अयसि लौहभाजने। वह्निरन्तश्च सेवित लेपाभ्यङ्गादि-विषया वहि प्रयोगेण पानविषया च अन्त प्रयोगेण व्यवहृतम् ॥ ४७ ॥

कुष्ठविध्वसनलेपे—रसादीना सर्वेषा समभागता ॥ ४८ ॥

त्रिकटुदहनवेल्लैर्वत्सनाभार्द्धभागै-
रससमनवशृङ्गी-दारुयुक्तैः समस्तैः ॥४९॥
अजसलिलविपिष्टैर्गुञ्जया तुल्यगोलः
कुपितकफसमुत्थं हन्ति कुष्ठं गरिष्ठम् ।
तदपरमथ वात-श्लेष्मजत्वग्विकारं
गुदगदमपि सर्वं वह्निमान्द्यं सुनिन्द्यम् ॥५०॥
तुष्टेन शम्भुना दिष्टः सोऽयं कनकसुन्दरः ।
त्वग्विकारविनाशाय कुबेराय महात्मने ॥५१॥

अथ हरिवलाङ्कुशः ।—

घनभवमृतसत्त्वं कान्तलोहार्कभस्म
त्रिगुणरससमेतं तुल्यगन्धेन युक्तम् ।
समतुलकृतमेभिष्टङ्कणं ताप्यचूर्णं
हरिदलमथ बोलं खण्डसत्त्वं मनोज्ञम् ॥५२॥

कनकसुन्दरे—स्वर्णपिष्ट्यभ्रसत्त्वपिष्ट्यौ समभागता । द्विगुणरससमेतामिति एक-भागापेक्षया रसस्य द्वैगुण्यं बोद्धव्यम् । गोलमध्ये गोलमूषामध्ये । दहन चित्रकः भल्लातको वा । वत्सनाभार्द्धभागैः वत्सनाभ अर्द्धभागो यत्र तादृशैरिति त्रिकटु दहनवेल्लैरित्यस्य विशेषणम्, तेन त्रिकट्वादीनां प्रत्येकमेकभाग वत्सनाभस्य चार्द्ध भाग इति । रसेति ।—रससमा रसभागा नवा प्रत्यग्रा शृङ्गी स्थावरविषभेदः, दारु दारुमूषाख्यं विषञ्च तदयुक्तैः, अत्र च शृङ्गिदारुणी मिलित्वा रससाम्यं बोद्धव्यम् । अजसलिलविपिष्टैः छागमूत्रपिष्टैः । अयमर्थः,—स्वर्णपिष्ट्यभ्रसत्त्वपिष्ट्योरेकैकभागं द्विभागपारदसम्मिश्रं गोलमूषायां पक्त्वा स्वाङ्गशीतलमादाय च त्रिकट्वादीनामेकैकभागेन वत्सनाभस्य चार्द्धभागेन शृङ्गिदारुणोश्च मिलित्वा भागद्वयेन सह पचेत्, तत तदौषधं छागमूत्रेण पिष्ट्वा गुञ्जामानां वटीं कृत्वा च स्थापयेदिति ॥४९—५१॥

हरिवलाङ्कुशे—घनभवमृतसत्त्वं मारिताभ्रसत्त्वम्, अत्र घनसत्त्वादीनां त्रयाणां तुल्यता । त्रिगुणरससमेतमिति घनसत्त्वापेक्षया रसस्य त्रैगुण्यम् । तुल्यगन्धेन सर्वतुल्येन गन्धकेनेत्यर्थः । समेति ।—घनादिभिर्गन्धान्तैः सर्वैस्तुल्यं टङ्कणं ताप्यञ्च ॥ ५२ ॥

अथ त्रिपुरान्तकः ।—

रसममृतमथापि शृङ्गवेरं विडङ्गं
मधुरदहनपाठा-सिन्धुवारञ्च वन्ध्या ।
त्रिफलकनकबीजं ऋद्धिवृद्धी निशे द्वे
छगलसलिलपिष्टं सर्वमेतेन जाता ॥५३॥
सुलघुबदरबीज-स्थूलगोली नराणां
हरति पवनपित्त-श्लेष्मसञ्जातकुष्ठम् ॥५४॥
उक्तस्त्रिपुरया पूर्वं रसोऽयं त्रिपुरान्तकः ।
सर्वदोषोत्थकुष्ठघ्नः कृपानिघ्नमनस्कया ॥५५॥

अथ विश्वहितः ।—

रसेन्द्रलिप्ततास्रस्य पत्रं गन्धकमारितम् ।
तत्ताम्रं पलमात्रं हि पलमात्रं हि यावकम् ॥५६॥
पलं चूर्णितशुद्धालं मर्दयेत्तु दिनत्रयम् ।
इति सिद्धो रसः प्रोक्तो नाम्ना विश्वहितो हितः ॥
वल्लाभ्यां तुलितः सेव्यो मरीचघृतसंयुतः ॥५७॥

त्रिपुरान्तके—रसः रसभस्म। अमृतं विषम्। मधुरं मधुरिका काकोली वा। दहनः चित्रकः भल्लातको वा। सिन्धुवारः निर्गुण्डी। वन्ध्या वन्ध्याकर्कोटकी। कनकबीजं धुस्तूरबीजम्। ऋद्धिवृद्धी स्वनामख्याते, तदप्राप्तौ बला-महाबले ग्राह्ये, यदुक्तं परिभाषायाम्—"ऋद्ध्यभावे बला देया वृद्ध्यभावे महाबला" इति। निशे द्वे हरिद्रा दारुहरिद्रा च। छगलसलिलपिष्टं छागमूत्रपिष्टम्। सुलघ्विति।—सुलघुबदरं क्षुद्रकोल, "मेटोकुल" इति भाषा, तस्य बीजवत् अस्थिवत् स्थूला गोली गुडिका। त्रिपुरया देव्या दुर्गया। कृपानिघ्नमनस्कया दयार्द्रचित्तया ॥ ५३—५५ ॥

विश्वहिते—रसेन्द्रलिप्तताम्रस्य पत्रमित्यत्र रसेन्द्रशब्देन रसगन्धकयोः कज्जली अभिप्रेता, केवलरसेन्द्रेण लेपनासम्भवात्, अथवा रसेन्द्रलिप्तताम्रस्य पारदेन सह मर्दितताम्रस्येत्यर्थः। गन्धकमारितम् ऊर्ध्वाधो गन्धकं दत्त्वा पुटितम् इत्यर्थः। यावकं लाक्षाम्। आलं हरितालम् ॥ ५६।५७ ॥

अथ निर्गुण्ड्यादिप्रलेपः ।—

निर्गुण्डीतैलमध्वाज्य-कुमारीशाल्मलीरसः ।
यवो गन्धकपिष्टश्च लेपः कुष्ठक्षयापहः ॥ ५८ ॥

अथ कुष्ठराक्षसः ।—

महानिम्बस्य सारेण मर्दितां गन्धपिष्टिकाम् ।
अमृतावाकुचीकान्ता-त्रिफलाचूर्णसयुताम् ॥५९॥
भक्षयेदायसे न्यस्तां कुष्ठे पाणितलोन्मिताम् ।
सा कुर्याल्लेपनात् कान्तिं षण्मासाद्वृद्धिमायुषः ॥ ६० ॥

अथ व्योषादि गुडिका ।—

पालिकं व्योषसूताग्नि-गन्धकं सफलत्रयम् ।
काकोडुम्बरिकाक्षीरैर्मर्दितं गुटिकीकृतम् ॥
माषप्रमाणं सक्षौद्रं कुष्ठार्शः श्वासकासजित् ॥ ६१ ॥

अथ कुष्ठकुठाररसः ।—

रसस्य कर्षः कर्षौ द्वौ गन्धकात् कज्जलं तयोः ।
तिलपर्ण्यलिमुण्डीनां स्वरसैः कृतभावनम् ॥६२॥
कर्षः कर्षौ वचाधात्री-कणातीक्ष्णक्रिमिच्छिदाम् ।
शाणं विषस्य कर्षार्द्धं जीरकस्य सितस्य च ॥६३॥

निर्गुण्ड्यादिप्रलेपे—तैलं कटुतैलम् । कुष्ठक्षयापहः कुष्ठे यः क्षयः कौण्यगति-क्षयनासाभङ्गादिरूपः इत्यर्थः, तमपहन्ति इति तथाभूतः ॥ ५८ ॥

कुष्ठराक्षसे—महानिम्बस्य सारेण पर्वतनिम्बत्वग्रसेन । वाकुची सोमराजी । कान्ता प्रियङ्गुः । आयसे न्यस्ता लौहपात्रे स्थापिता, लौहकटाहादौ विन्यस्य निम्बरसेन मर्दितामित्यर्थः । पाणितलोन्मिता कर्षप्रमाणाम् । सा अमृतादिचूर्णसयुता गन्धकपिष्टिका । बहिरन्तरुभयथैव प्रयोज्याऽयम् ॥ ५९।६० ॥

व्योषादिगुडिकायां—पालिकं प्रत्येकं पलमानम् । काकोडुम्बरिकाक्षीरैः काकोडुम्बरत्वङ्निःसृतक्षीरैरित्यर्थः ॥ ६१ ॥

कुष्ठकुठारे—तिलपर्णी रक्तचन्दनम्, अलिः अरिः, रलयोरभेदात् खदिरविशेष इत्यर्थः, मुण्डी मुण्डिरी तासाम् । तीक्ष्णं राजिका लौहं वा । क्रिमिच्छित्

पलाण्डुं मृततास्रस्य तथा शुण्ठ्याश्च मर्दितम् ।
भृङ्गाम्भसि घटे स्निग्धे पचेच्चणकसम्मिताः ॥६४॥
वटिकाः कुष्ठविश्वाग्नि-त्रिफलासैन्धवान्विताः ।
कुर्य्यात् कुष्ठकुठाराख्यो रसोऽयं सर्वकुष्ठजित् ॥ ६५ ॥

अथ गुञ्जाद्युद्वर्त्तनम् ।—

गुञ्जाचित्रकशङ्खचूर्णरजनी भल्लातक लाङ्गली
स्नुक्चीरोत्तमकन्यका घनरवा धूमोद्गम' सूतकः ।
गोमूत्रैडगज विडङ्गमरिचं सचौद्रखारीजल
पामादद्रुविचर्चिकाकिटिमजित् कण्डूघ्नमुद्वर्त्तनात् ॥६६॥

अथ वज्रशेखर ।—

विष्णुक्रान्ता घनरस' सर्पाची शङ्खपुष्पिका ।
गोजिह्वा चीरिणी नीली ब्रह्मवृक्षो रुदन्तिका ॥६७॥
निचुल' काकमाची च रसैरेषां विमर्दितम् ।
पक्व तुषकरीषाग्नौ रसाद्द्विगुणगन्धकम् ॥६८॥

विडङ्गम । तथा पलाण्डुमित्यर्थ । विश्व शुण्ठी । अयमर्थ ,—रसगन्धयो कज्जली कृत्वा तिलपर्ण्यादिस्वरसे प्रत्येक सप्तवारान् भावयेत । अनन्तर वचादिचूर्णं यथोक्तमान तत्र दत्त्वा विमर्दयेत । तत घृतभाविताया स्थाल्या भृङ्गराजस्वरसेन चूर्णादष्टगुणेन सह औषध तत आघनीभावात पचेत । तत अवताय्य युक्त्या किञ्चित किञ्चित् कुष्ठादि चूर्णानि दत्त्वा मर्दयेत चणकमिताश्च वटी कृत्वा स्थापयेदिति ॥ ६२—६५ ॥

गुञ्जाद्युद्वर्त्तने—उत्तमकन्यका उत्तमा मन शिला, कन्यका घृतकुमारी । घनरवा घनध्वनि , मुस्तकमित्यर्थ , मेघनाद इति वा, तण्डुलीय इत्यथ । धूमोद्गम वज्रचार इति मालवे प्रसिद्ध चारविशेष, गृहधूमो वा । सूतक पारद भस्म-सूत इत्यर्थ । एडगज चक्रमर्द । खारीजल जलविशेष , लवणविशेषो वा खारी तस्या जलम । उद्वर्त्तनात घर्षणात मर्दनादित्यर्थ ॥ ६६ ॥

वज्रशेखरे—विष्णुक्रान्ता अपराजिता । घनरस मूत्र वालक वा । सर्पाची गन्धनाकुली, रास्नाविशेष इत्यथ । ब्रह्मवृक्ष वकपुष्पवृक्ष , कुष्ठहरत्वात्, तस्य मूलत्वक् । रुदन्तिका—"चणपत्रसम पत्र चुपश्चैव तथाम्लकम् । शिशिरे जल

पर्पटीरसवत् पक्वं खसत्त्वेनारुणेन च ।
पृथक् गन्धकतुल्येन ताप्येन च रसाङ्घ्रिणा ॥६९॥
कृतावाप गता मुण्डी-हस्तिकर्णामृतालिकाः ।
मूर्वाविदार्य्योश्च रसैर्मर्दितं घृतमिश्रितम् ॥७०॥
कषाये दशमूलस्य विपक्वं लेहतां गतम् ।
रसतुल्यत्रिजाताग्नि-व्योषयष्ट्याह्वसंयुतम् ॥७१॥
स्निग्धभाण्डगत कुष्ठी क्षयी च कृतशोधनः ।
मञ्जिष्ठादिकषायस्य कृत्वा मासं निषेवणम् ॥
माषप्रमाणं सेवेत रसोऽयं वज्रशेखरः ॥७२॥

अथ कुष्ठविद्रावणतैलम् ।—

द्वात्रिंशत्पलबाकुचीमृतजलद्रोणाङ्घ्रिशेषे चतु-
र्विंशत्या दनुजस्य कान्तरसयोर्निष्कैः पृथक् पञ्चभिः ।
ताम्बूलीरसमर्दितैस्तिलभवप्रस्थं मृत चिक्कणे
पाके सत्यवताग्र्ये कल्कसहितं धान्ये द्विपक्षं क्षिपेत् ॥७३॥

पिन्दूनाम्नवन्तीति वदन्तिका ॥" इत्युक्तलक्षण स्वनामप्रसिद्ध क्षुपविशेष । निचुल इज्जल "हिजल" इति ख्यातम् । खसत्त्वेन अभ्रसत्त्वेन । अरुणेन सिन्दूरेण । आलिका वृश्चिकपर्णी । मञ्जिष्ठादिकषायस्य पूर्वोक्तमञ्जिष्ठादिगण-कृतकषायस्य निषेवण कृत्वा माषप्रमाण सेवेत इत्यन्वय । अस्यार्थ,—द्विगुण-गन्धक पारद विष्णुक्रान्तादीना रसेन पृथक् पृथक् मर्दयित्वा तुषकरीषाग्नौ पर्पटी-रसवत पाचयेत । तत विचूर्ण्य पृथक् पृथक् गन्धकतुल्यम् अभ्रसत्त्वम् अरुणञ्च तथा रसपादिक माक्षिकभस्म च तत्र दत्त्वा मुण्ड्यादीना रसेन पृथक् पृथक् मर्दयेत । अथ मर्दित तत् घृतमिश्रित कृत्वा चतुर्गुणे दशमूलक्वाथे यावत लेहीभूत पचेत् । अनन्तर त्रिजातादिचूर्णं पृथक् रसतुल्य तत्र दत्त्वा आलोड्य च स्निग्धे भाण्डे स्थापयेदिति ॥६७—७२॥

कुष्ठविद्रावणतैले—द्वात्रिंशत्पलबाकुच्या द्वात्रिंशत्पलमानाया सोमराज्या, मृताय पाकाय जलद्रोणे द्रोणपरिमिते जले, आङ्घ्रिशेषे पादावशेषे सति । दनुजस्य गन्धकस्य चतुर्विंशत्या निष्कै. । कान्तरसयो. लौहपारदयो. । तिलभवप्रस्थ

तत् चौरान्नाग्निना पीत लिप्त कुष्ठकुलान्तकम् ।
श्वित्रं दाहजमश्वेतं रूपमूलञ्च लुम्पति ॥७४॥

अथ दद्रुकुष्ठविद्रावणरस ।—

रसगन्धकताप्याभ्र-कान्तकृष्णाभ्रभस्मकम् ।
हिङ्गुलं मधुक कुष्ठ सर्वं समविभागिकम् ॥७५॥
अम्लवेतसतोयेन त्रिदिन परिमर्दयेत् ।
विशोष्याऽऽज्यमधुभ्याञ्च स्वदित्वा त्रिदिन पुनः ॥७६॥
दत्त्वा जीर्णं गुड तुल्य कोलास्थिप्रमिता वटी ॥
छायाशुष्का: प्रकुर्वीत शम्भोरग्रे च पूजयेत् ॥७७॥
इयं हि पञ्चाङ्गकृताभिधाना नागार्जुनोक्ता गुटिका च नूनम् ।
सर्वाणि कुष्ठानि विचर्चिकाञ्च दद्रूणि विद्रावयति क्षणेन ॥७८॥

तिलतैलप्रस्थम् । श्वित्र, दोषजमिति शेष, दाहजम् अग्निदग्धज, श्वित्रमिति शेष । अश्वेतम अरुण ताम्रवर्णं वा किलास, रक्तमासगत श्वित्रमित्यर्थ , तथा च वाग्भट, —"कुष्ठैकसम्भव श्वित्र किलास दारुण भवेत् । निर्दिष्टमपरिस्रावि त्रिधातूद्भव-संश्रयम् ॥ वातात् रूक्षारुण पित्तात् ताम्र कमलपत्रवत । सदाह रोमविध्वंसि कफात श्वेत घन गुरु । सकण्डूर क्रमात रक्त मासमेद स चादिशेत ॥" इति । चरकेणाप्युक्त—"दोषे रक्ताश्रिते रक्त ताम्र मासमश्रिते । श्वेत मेद श्रिते श्वित्र गुरु तच्चोत्तरोत्तरम ॥" इति । अत अश्वेतशब्देन अरुण ताम्रवर्णञ्च श्वित्र लक्ष्यते । रूपमूल रूपस्य रजतस्य, रजतवर्णश्वित्रस्येत्यर्थ , मूलम । अयमर्थ,—द्वात्रिंशत्पलमाकुचो जलद्रोणे निष्क्वाथ्य पादावशेषे षोडशशरावे अवतार्य्य वस्त्रपूत कुर्यात । तत तैलप्रस्थे त क्वाथ गन्धकादीना कल्कञ्च ताम्बूलीरसमर्दित यथा-मान दत्त्वा विपचेत् । सम्यक् पाके सति अवतार्य्य सकल्कमेव तत्तैल धान्य राशौ मास यावत स्थापयेत । मासानन्तरम् उद्धृत्य उपयुक्तमानेन पिबेत लिम्पेच्च तेन कुष्ठश्वित्रादिकम इति ॥ ७३।७४ ॥

दद्रुकुष्ठविद्रावणे—अभ्रस्य भागद्वय ग्राह्यम । कान्त कान्तलौहम् । दत्त्वा जीर्णं गुड तुल्यमिति सर्वचूर्णतुल्य पुराणगुडो बोद्धव्य, "चूर्णे चूर्णसमो देयो मोदके द्विगुणो गुड" इति परिभाषास्मरणात् । पञ्चाङ्गकृताभिधाना पञ्चाङ्गकृता गुटिका तुल्यपराख्या ॥ ७५—७८ ॥

अथ माणिक्यतिलकः ।—

रसगन्धककताप्याल कान्ततीक्ष्णाभ्रभस्मकम् ।
हिङ्गुलं मधुकं कुष्ठं सर्वं समविभागिकम् ॥ ७९॥
शतमूलीनिजद्रावैर्मञ्जिष्ठादिकषायतः ।
त्रिदिनं त्रिदिनं सम्यक् परिमर्द्य विशोष्य च ॥८०॥
ततस्तु पक्वमूषायां सन्निरुध्यातियत्नतः ।
प्रक्षिप्य वालुकायन्त्रे प्रपुटेत् दिवसद्वयम् ॥८१॥
माणिक्यतिलको नाम रसो नासत्यकीर्त्तितः ।
एष कुष्ठं हरत्याशु सन्मित्रमिव हृद्रुजाम् ॥८२॥

अथ परहितः ।—

श्वेतः पाठा जटा श्वेता श्वेता चैव पुनर्नवा ।
पिष्ट्वा जलेन तत्कल्कैः प्रकुर्य्यान्नालमूषिकाम् ॥८३॥
स्थालीमध्ये च तां क्षिप्त्वा क्षिपेत् संशोधितं रसम् ।
क्षिपेदुपरि सम्पेष्य द्व्यञ्जलिप्रमितं पटु ॥८४॥
पिधानं तन्मुखे दत्त्वा सन्निरुध्यातियत्नतः ।
अधस्ताज्ज्वालयेद्वह्निं पिधान्यामम्बु निक्षिपेत् ॥८५॥
यामत्रितयपर्य्यन्तं जातेऽथ शिशिरे ततः ।
क्रोडकेशे. समाकृष्य सूतं पारदमाहरेत् ॥
न चेदेतावता भस्म पुनरेव पुटेद्रसम ॥८६॥

माणिक्यतिलके—कान्ततीक्ष्णाभ्रभस्मकं कान्तलौहभस्म तीक्ष्णलौहभस्म अभ्रभस्म च। नासत्यकीर्त्तितः अश्विनीकुमारद्वयकथितः ॥ ७९—८२ ॥

परहिते—श्वेतः श्वेतार्कः । पाठा स्वनामख्याता। जटा जटामांसी, श्वेतपाठाजटेति समस्तपदत्वे श्वेतपाठाया मूलमित्यर्थः । श्वेता श्वेतापराजिता। नालमूषिका नालयुक्ता मूषिका, वृन्ताकमूषिकामित्यर्थः, सा च "वृन्ताकाकारमूषायाम्" इत्यादिना १०माध्याये उक्ता। "नालमूषिकाम्" इत्यत्र "मल्लमूषिकाम्" इति पाठान्तरम्। द्व्यञ्जलीति।—कुडवद्वयमानं सैन्धवलवणमित्यर्थः।

तद्भस्मातिविषं विषं क्रिमिहरं व्योषोत्तमा गन्धजं
चूर्णं द्वादशहाटकं खलु गुडो द्वात्रिंशदंशोन्मितं ।
तत् सर्वं परिचूर्णितं प्रतिदिनं वल्लैश्चतुर्भिर्मितं
चेत्थं हन्ति समस्तरोगनिवहं नागं गरुत्मानिव ॥८७॥
विशेषात् सर्वकुष्ठघ्नो रसोऽयं परिकीर्त्तितः ।
ख्यातः परहितो नाम्ना भानुना भूरिभानुना ॥ ८८ ॥

अथ तालकेश्वरः ।—

वीर्य्यं पुरारेरिह नागतुल्यं भागद्वयञ्चाप्यथ तालकस्य ।
शुद्धेन नागेन रसो विशुद्धो विमर्दनीयो हरितालिकञ्च ॥८९॥
मूत्रं गवां षोडशभागमानं निधाय भाण्डेऽथ पिधाय तस्मिन् ।
दीपाग्निना तत् परिशोष्य सर्वं मूत्रं ततस्तालकशुद्धता स्यात् ॥९०॥
ततस्तु जम्बीररसेन सर्वं विमर्दनीयं त्रिदिनं त्रिवारम् ।
भाव्यं कुमार्य्याः सलिलेन भृङ्ग-वज्राङ्घ्रिकन्देन च वारयुग्मम् ॥९१॥

क्रोडकेशं वराहक्रान्तामपि । क्रिमिहरं विडङ्गम् । उत्तमा त्रिफला मनःशिला वा । गन्धजं गन्धकजातं, चूर्णमित्यनेनान्वयः । द्वादशहाटकं द्वादशसुवर्णं, द्वादश-कर्षमित्यर्थः, तत्तु पृथगेव बोध्यं, परिचूर्णितमिति वक्ष्यमाणवाक्यस्वरसात्, मिलित्वा द्वादशहाटकत्वे गुडभागस्य द्विगुणादप्यधिकत्वेन चूर्णनिष्पत्तिसम्भावना-भावात् इति। द्वात्रिंशदंशोन्मितं द्वात्रिंशद्धाटकोन्मितं, यद्वा—द्वादश हाटकमिति पृथक् पदं, हाटकं स्वर्णं द्वादश द्वादशसङ्ख्यापूरणं, रसभस्मादि गन्धान्तानि एकादश द्रव्याणि द्वादशं च स्वर्णमित्यर्थः, अस्मिन् पक्षेऽपि—भस्मादीनां प्रत्येकमेको भागः गुडस्य च द्वात्रिंशत् भागा इति । भानुना भूरिभानुना प्रभूततेजसा भानुनाम्ना ॥ ८३—८८ ॥

तालकेश्वरे—वीर्य्यं पुरारेः पारदः । नागतुल्यं सीसकसमम्, तेन शुद्धो रसः सीसश्च तुल्यो ग्राह्यः । रसेन्द्रचिन्तामणौ रसेन्द्रसारसङ्ग्रहे च नागस्य रसाद्धता तालकस्य च रसतुल्यत्वं पठितं, तद्यथा—"नागस्य भस्म शाणैकं तोलैकं पारदस्य च। (रसेन्द्रसारसङ्ग्रहे "पारदस्य" इत्यत्र "गन्धकस्य" इति पाठः) द्विनिष्कं शुद्धतालस्य" इति। षोडशभागमानमिति सर्वद्रव्यापेक्षया षोडश-गुणमित्यर्थः, तथा च रसेन्द्रचिन्तामणौ रसेन्द्रसारसङ्ग्रहे च—"विपचेत् षोडशगुणे" इति । दीपाग्निना दीप्तवह्निना । त्रिवारमिति कुमार्य्याः सलिलेनेत्यनेन सम्बध्यते ।

कुष्ठे ददीतास्य रसस्य वल्ल-त्रयं रसैरार्द्रकजैर्विजेतुम् ।
शाखासु पक्वत्वमथो सुषुप्तिं स्तम्भञ्च मन्यास्वथ मण्डलानि ॥८२॥
गवां पयः शर्करया समेतं स्तम्भातिरेके सति सन्नियोज्यम् ।
औडम्बरं हन्ति सितामधुभ्यां कृष्णञ्च कुष्ठं त्रिफलारसेन ॥८३॥
गुडार्द्रकाभ्यां गजचर्मसिध्म-विचर्चिकास्फोटविसर्पदद्रून् ।
निहन्ति पाण्डुं विविधां विपादीं सरक्तपित्तां कटुकीसिताभ्याम् ॥८४॥
रोगेषु सर्वेष्वपि वासराणि त्रिसप्तसङ्ख्यानि रसः प्रदेयः ।
रसप्रयोगावसितौ सुषुप्त्यां क्वाथं पिबेच्छिन्नरुहासनोत्थम् ॥८५॥
मासद्वयं मुद्गघृतान्वितान्नं पथ्यं ततोडुम्बरभेषजान्ते ।
अङ्गानि पञ्चापि पलोन्मितानि दद्यादरिष्टस्य तथाऽऽढकीनाम् ॥८६॥
क्वाथेन युक्तं सघृतौदनञ्च पथ्याय कृष्णेऽप्यथ कृष्णवर्णे ।
रसावसाने सितया समेतां पादोन्मितामामलकीं प्रदद्यात् ॥८७॥

वज्राह्वकन्देन स्नुहीकन्दरसेन वन्यशूरणकन्दरसेन वा । शाखासु हस्तयोः पादयोश्च, हस्तपादाङ्गुलीषु इत्यर्थः, पक्वत्वं व्रतभावम् । सुषुप्तिं स्पर्शानभिज्ञताम् । स्तम्भातिरेके विबन्धातिशय्ये । "स्तम्भातिरेके" इत्यत्र "स्तम्भाय रेके" इति पाठे—रेके विरेके सति, स्तम्भाय मलस्तम्भायेत्यर्थः । "सितामधुभ्याम्" इत्यत्र "शिवामधुभ्याम्" इति रसेन्द्रचिन्तामणौ रसेन्द्रसारसङ्ग्रहे च पाठान्तरम् । कृष्णञ्च कुष्ठमिति कापालकुष्ठं किटिभकुष्ठं वा । "कृष्णम्" इत्यत्र "कृत्स्नं" "कृच्छ्रं" इति पाठद्वयं सुगमम् । गजचर्म हस्तिचर्मवत् घनचर्मयुतं कुष्ठं चर्मकुष्ठमित्यर्थः । रसप्रयोगेत्यादि ।—सुषुप्त्यां सुप्तिकुष्ठे रसप्रयोगावसितौ रसप्रयोगानन्तरमित्यर्थः, छिन्नरुहासनोत्थं छिन्नरुहा गुडूची आसनः स्वनामख्यातः तदुत्थं क्वाथं पिबेत् अनुपिबेदित्यर्थः अथवा—रसप्रयोगावसितावपि सुषुप्त्यां विद्यमानायां छिन्नरुहासनोत्थं क्वाथं पिबेदिति । मासद्वयमिति क्वाथं पिबेदित्यनेन सम्बध्यते । डुम्बरभेषजान्ते डुम्बरे उडुम्बरकुष्ठे भेषजान्ते औषधसेवनानन्तरम् अरिष्टस्य निम्बस्य पञ्चापि अङ्गानि पत्रपुष्पत्वक्फलमूलात्मकानि पलोन्मितानि दद्यात्, तथा पथ्याय आढकीनां क्वाथेन युक्तं सघृतौदनञ्च दद्यात् । यद्वा—अरिष्टाढक्योः पञ्चाङ्गानि पृथक् पलोन्मितानि गृहीत्वा तत्क्वाथेन ओदनं पक्त्वा सघृतं तदोदनं पथ्याय योज्यम् इति । कृष्णे कापालकुष्ठे किटिभकुष्ठे वा, "कृष्णारुण-

अन्नं समुद्गं सघृतं नियोज्य मासद्वय स्यादथवा विचिह्नम् ।
रसप्रयोगावसितौ प्रयुञ्ज्यादङ्गानि पञ्च स्रवनि स्रुतानि ॥९८॥
पादोन्मितानीह च मासयुग्म पथ्याय दुग्धौदनमाददीत ।
स्यात्तालकेशाख्यरसप्रयोगे तक्रञ्च मासञ्च विवर्जनीयम् ॥९९॥

अथ खगेश्वर ।—

पलेन प्रमित सूत पलेन प्रमिता वसा ।
खग पलमित: सर्व मर्दयेदर्जुनद्रवै: ॥ १०० ॥
गोलीकृत्य विशोष्याथ गोल कूप्या निरुध्य च ।
ततस्ता सुदृढे भाण्डे मूषा क्षिप्त्वा निरुध्य च ॥१०१॥
पचेत् सार्द्धदिन पश्चात् स्वाङ्गशीतं विचूर्णयेत् ।
खगेश्वरो रसो वल्ल-प्रमित: कुटजान्वित ॥१०२॥
श्वेतकुष्ठ निहन्त्याशु श्वासकासगदानपि ।
सघृत पित्तज कुष्ठ मधुना मेहमेव च ॥
पथ्य दोषानुरूपेण वुद्धेन मुनिनोदितम् ॥१०३॥

कपालाभ यद्रूच परुष तनु । कापाल तोदबहुल तत कुष्ठ विषम स्मृतम् ॥” तथा “श्याव किणखरस्पर्श परुष किटिभ स्मृतम्” इत्यनेन कापालकिटिभयो कृष्णता चरकादिभि प्रदर्शिता । अथ कृष्णवर्णे कुष्ठरोगे रक्तस्य कृष्णवर्णभावात अङ्गकार्ष्ण्य । कृष्णेऽपीत्यादि ग्रन्थ विचिह्नमित्यन्तेन सम्बध्यते । पादोन्मितामामलकीमिति रसापेक्षया चतुर्थभागप्रमिताम । मासद्वयमिति ।—मासद्वय यावत अथवा विचिह्न यावता कालेन कृष्णवर्णता नश्येत तावत्कालपर्य्यन्तमित्यर्थ, समिताम आमलकी दद्यात, समुद्ग सघृतमन्नञ्च नियोज्यमिति सम्बन्ध । रसप्रयोगावसितौ इत्यत्र सर्वेष्वेव कुष्ठेषु इति शेष । अङ्गानीति ।—स्रवनि स्रुतानि स्रव स्रवन्तीया, रुदन्तीति प्रसिद्धम , स्रवन्ती वा, मुण्डिरीति प्रसिद्ध, तन्नि स्रुतानि पञ्चाङ्गानि पत्रपुष्पफलमूलत्वग्रूपाणि । पादोन्मितानीति रसापेक्षया बोध्यम् । रसेन्द्रसारे त्वस्य राजतालेश्वर इति सञ्ज्ञा ॥ ८९—९९ ॥

खगेश्वरे—वसा वलिवसा गन्धक इत्यर्थ । खग माक्षिक रसाञ्जन वा । कुटजान्वित कुटजस्य त्वग्रसेन फलरसेन वा युक्त, फल त्वचोरुभयोरेव कुष्ठहरत्वात् अत्र यौगिकत्व बोद्धव्यम् ॥ १००—१०२ ॥

अथ कुष्ठनाशनं ।—

सूतभस्म द्विनिष्कं स्याद्गन्धकञ्च चतुष्पलम् ।
सार्द्धं चतुष्पलं चित्रं चतुर्विंशत् पलं भवेत् ॥१०४॥
वाकुचीवीजचूर्णं स्याद्द्वादशघ्नं मरीचकम् ।
सर्वमेकत्र संयोज्य निष्कद्वितयसम्मितम् ॥
मधुना लेहयेत् प्रातः सर्वकुष्ठविनाशनम् ॥१०५॥

अथाऽऽरोग्यवर्द्धनी गुटिका ।—

रसगन्धकलोहाभ्र-शुल्वभस्म समांशकम् ।
त्रिफला द्विगुणा प्रोक्ता त्रिगुणञ्च शिलाजतु ॥१०६॥
चतुर्गुणं पुरं शुद्धं चित्रमूलञ्च तत्समम् ।
तिक्ता सर्वसमा ज्ञेया सर्वं सञ्चूर्ण्य यत्नतः ॥१०७॥
निम्बवृक्षदलाम्भोभिर्मर्दयेत् द्विदिनावधि ।
ततश्च वटिका कार्य्या राजकोलफलोपमा ॥१०८॥
मण्डलं सेविता सैषा हन्ति कुष्ठान्यशेषतः ।
वातपित्तकफोद्भूतान् ज्वरान्नानाप्रकारजान् ॥१०९॥
देया पञ्चदिने जाते ज्वरे रोगे वटी शुभा ।
पाचनी दीपनी पथ्या हृद्या मेदोविनाशिनी ॥११०॥
मलशुद्धिकरी नित्यं दुर्द्धर्षक्षुत्प्रवर्त्तिनी ।
बहुनाऽत्र किमुक्तेन सर्वरोगेषु शस्यते ॥१११॥

कुष्ठनाशने—चित्रं चित्रकमूलम् । द्वादशघ्नं मरीचकं द्वादशान् द्वादशभागान् हन्ति इति व्युत्पत्त्या द्वादशपलानि इत्यर्थः, चतुर्विंशत्पलवाकुचीभागापेक्षया मरीचं द्वादशभागहीनं, तेन च द्वादशपलानि मरिचस्येति निष्कर्षः, "द्वादशघ्नम्" इत्यत्र "द्वादशान्तम्" इति पाठे—द्वादशं द्वादशपलानीत्यर्थः, अन्तम् अन्तिमं मरीचकम् अन्तस्थितस्य मरिचस्य द्वादशपलानीत्यर्थः । अत्र "द्वादशांशम्" इति पाठो युज्यते ॥ १०४।१०५ ॥

आरोग्यवर्द्धन्या—त्रिफला द्विगुणा इति त्रिफलायाः प्रत्येकं भागद्वयम् ।

आरोग्यवर्द्धनी नाम्ना गुटिकेयं प्रकीर्त्तिता ।
सर्वरोगप्रशमनी श्रीनागार्जुनयोगिना ॥ ११२ ॥

अथ नारायण ।—

रसभस्म समानेन गन्धकेन समन्वितम् ।
तुल्यभागपुरोपेतं तुल्यत्रिफलयाऽन्वितम् ॥११३॥
वातारितैलसंयुक्तं सेवितञ्च पलोन्मितम् ।
मासेन नाशयेत् कुष्ठ दुःसाध्यमपि देहिनाम् ॥ ११४ ॥
क्षयं भगन्दर शूलं मूल गुल्मञ्च पाण्डुताम् ।
ग्रहणीञ्च महाघोरां मन्दाग्निमपि दुस्तरम ॥११५॥
एवविधान् महारोगान् विनिहन्ति न सशय' ।
श्लेष्मरोगान् हरेत् सर्वान् रसो नारायणाभिधः ॥११६॥

अथ मेदिनीसाररस ।—

पलत्रयं मृतं लोह मृत शुल्वं पलत्रयम् ।
भृङ्गराजाम्बुगोमूत्र-त्रिफलाक्वथितैः पृथक् ॥११७॥
पुटेत्त्रिवारं यत्नेन ततस्तस्मिन् विनिक्षिपेत् ।
अत्यम्लकाञ्जिकं पश्चात् पचेद्यामचतुष्टयम् ॥११८॥
ततश्च तुल्यगन्धेन पुटानां विंशति पचेत् ।
पलमात्र मृत सूतं रुद्रांशममृतं तथा ॥११९॥

पुर गुग्गुलम् । तत्सम गुग्गुलुसमम् । तिक्ता कटुकी सर्वसमा सर्वचूर्णतुल्या । राजकोलफलोपमा वृहद्वदरतुल्या ॥ १०६—११२ ॥

नारायणे—रसभस्म इति विशेष्यपदम् । रसभस्मादीना सर्वेषा तुल्यभागता । मूलम् अर्शांसि । अत्र "विनिहन्ति न सशय" इत्यनन्तर क्वचित "भगन्दरव्रणञ्चापि व्रणञ्चापि विशेषत । षण्मासेन जरा मृत्यु पलित वलित हरेत ॥" इत्यधिक पाठ ॥११३—११६॥

मेदिनीसाररसे—रुद्रांशम् एकादशभागम् । लौहं ताम्रञ्च भृङ्गस्वरसादिना पृथक् पृथक् मर्दयित्वा वारत्रय गजपुटे पचेत । तत पुटितमौषधमादाय अत्यम्ल-काञ्जिकेन सह यामचतुष्टय पक्त्वा सर्वतुल्येन गन्धेन सह पुन सम्मर्द्य च गजपुटे विंशतिवारान् पचेत्, प्रतिपुटं गन्धकेन सह आलोडयाच्च । तत. पुटादौषधमादाय

कटुत्रय समं सर्वं पिष्ट्वा सम्यक् विधारयेत् ।
रसोऽयं मेदिनीसारो नन्दिना परिकीर्त्तित. ॥१२०॥
सेवितो वल्लमानेन घृतत्रिकटुकान्वित ।
हन्ति कुष्ठानि सर्वाणि श्वित्राणि विविधानि च ॥१२१॥
गुल्मं प्लीहामय हिक्का शूलरोगं क्षय तथा ।
उदावर्त्तं महावात कफ मन्दानल तथा ॥१२२॥
गलग्रहं मदोन्मादं कर्णदन्तामय तथा ।
सर्वाधिकं विषं घोर व्रणं लूताभगन्दरम् ॥
विद्रधिञ्चान्त्रवृद्धिञ्च शिरस्तोदञ्च नाशयेत् ॥१२३॥

वल्लमानेन पारदेन एकादशपलेन विषेण त्रिकटुना च सवतुल्येन सह मिश्रयित्वा स्थापयेदिति । महावात मेद कफावृतवातव्याधिम् । मदोन्माद मदेन सह उन्मादम् अप्रवृद्धतरुणोन्मादो मद "स चाप्रवृद्धलक्षणो मदसञ्ज्ञा बिभर्त्ति च" इति सुश्रुत-सवादात । लूताम ऊर्णनाभम्, ऊर्णनाभविषमित्यर्थ । लूताया ऐतिह्य सुश्रुते यथा—"विश्वामित्रो नृपवर कदाचिदृषिसत्तमम् । वशिष्ठ कोपयामास गत्वाऽऽश्रम-पद किल ॥ कुपितस्य मुनेस्तस्य ललाटात स्वेदविन्दव । अपतन् दर्शनादेव-मधस्तात्तीक्ष्णवर्चस ॥ लूने तृणे महर्षीणा धेन्वर्थं सम्भृतेऽपि च । ततो जातास्त्विमा घोरा नानारूपा महाविषा ॥ अपकाराय वर्त्तन्ते नृपसाधनवाहने । यस्माल्लून तृण प्राप्ता मुने प्रस्वेदविन्दव ॥ तस्माल्लूतास्तु भाष्यन्ते सञ्ज्ञया ताश्च षोडश ॥ ०। त्रिमण्डला तथा श्वेता कपिला पीतिका (पीतका) तथा । आल (लाला) मूत्रविषा रक्ता कसना (कठिना) चाष्टमी स्मृता ॥ सौवर्णिका लाजवर्णा जालिन्येणी (क) पदी तथा । कृष्णाग्निवर्णा (क्रा) काकाण्डा (काण्डा च) मालागुणा (ण्य) ष्टमी स्मृता (मता) ॥" इति । अत्र मधुकोष,—"इति किल श्रुति, विश्वामित्रो नरपति कामधेनोर्बलात्कारपरिग्रहेण मुनिसत्तम वशिष्ठ कोपयाञ्चकार । कुपितेन तेन अन्तर्ज्वलनभृशकोपानलस्खलित तण्डुलस्वगरलमिव निरवद्यनपटल लोचनद्वय वहता भगवान् रविरवलोकित । ततस्तस्य भ्रूकुटिकुटिलोद्भवो भयङ्करो ललाटतट-प्रस्यन्दी स्वेदविन्दूत्कर प्रचण्डतर प्रत्यासन्नलूनतृणे धेन्वर्थमुपात्ते निपतितो लूता-ऽभूदिति" इति ॥ ११७—१२३ ॥

अथ जन्तुघ्नी गुटिका।—

सूतगन्धौ समौ ताभ्यां मण्डूरं सप्तमांशतः।
विधाय कज्जलीमाखु-कर्ण्यां सम्मर्दयेद्दिनम् ॥१२४॥
ततो मण्डूरमानेन क्षुद्रदीप्यं विनिक्षिपेत्।
आरुष्करकषायेण दिनमेकं विमर्दयेत् ॥१२५॥
ब्रह्मबीजं समुद्रस्य फलं जातीफलं तथा।
विषतिन्दुकबीजञ्च ताप्यं सर्वं समांशकम् ॥१२६॥
विडङ्गं समस्तैश्च सूक्ष्मचूर्णं प्रकल्पयेत्।
रसतुल्यं छितं चूर्णं रसेन सह मेलयेत् ॥१२७॥
वासा च निम्बत्वग्वंशो वेल्लव्योषाम्बुदं तथा।
एषां क्वाथेन सप्ताहं त्र्यहं मूर्वाऽऽढके रसे ॥१२८॥
भावयित्वा चणप्रायाः कर्त्तव्या वटिकाः शुभाः।
अश्वनिम्बादिजक्वाथे प्रदत्तैका वटी शुभा ॥१२९॥
पातयेज्जठराज्जन्तून् सर्वदेहगदान् हरेत्।
कुष्ठजन्तून्निहन्त्याशु द्वित्रिवारप्रयोगतः ॥१३०॥

जन्तुघ्नीगुटिकायाम्—ताभ्यां मण्डूरं सप्तमांशतः मिलितसूतगन्धयोः सप्तमभागैकभागं मण्डूरचूर्णम्। आखुकर्ण्यां मूषिकपर्ण्याम्, रसेनेति शेषः। क्षुद्रदीप्यं क्षुद्रयमानीम् अजमोदामित्यर्थः। आरुष्करकषायेण भल्लातकक्वाथेन। ब्रह्मबीजं पलाशबीजम्। समुद्रस्य फलं "समुद्रफल" इति प्रसिद्धम्। ब्रह्मबीजादीनां ताप्यान्तानां सर्वेषां रससमानता। विडङ्गञ्च ब्रह्मबीजादीनां मिलितचूर्णानां समम्। छितं चूर्णं छितकरं ब्रह्मबीजादीनां चूर्णमित्यर्थः। वंशः वंशनेत्री। मूर्वाढके रसे मूर्वा "मूँचमुखी" इति प्रसिद्धम्, आढकः "अरहर" इति प्रसिद्धं, तद्‌द्वये रसे। अश्वेति।—अश्वनिम्बः "घोँडानिम" इति प्रसिद्धः, तस्य आदि मूलं तज्जक्वाथे मूलत्वक्क्वाथे इत्यर्थः। जन्तून् क्रिमीन्। सर्वदेहगदान् सर्वानेव शारीररोगानित्यर्थः; "सर्वदेहगतान्" इति पाठे—सर्वदेहगतान् सर्वस्मिन्नेव शरीरे सञ्जातान्। कुष्ठजन्तून् कुष्ठजनकक्रिमीन् केशादादीनित्यर्थः, यदुक्तं वाग्भटे—"केशादा रोमविध्वंसा रोमद्वीपा उदुम्बराः। षट् ते कुष्ठैककर्माणः सहसौरसमातरः॥" इति ॥ १२४—१३० ॥

अथ धन्वन्तरि ।—

सूतगन्धार्कसौभाग्य-कङ्कुष्ठं रक्तचन्दनम् ।
कणा चैतानि तुल्यानि मर्दयेल्लुङ्गवारिणा ॥१३१॥
एकाहमथ संशोष्य स्थापयेदतियत्नतः ।
रसो निःशेषकुष्ठघ्नो धन्वन्तरिरिति स्मृतः ॥१३२॥
निर्दिष्टः शम्भुना सर्व-रोगभीतिविनाशनः ।
पथ्याघृतयुतो वायं सिन्धुविश्वान्वितोऽपि वा ॥१३३॥

अथ वज्रधार ।—

वज्रसूताभ्रहेमाद्य भस्म योज्य सम समम् ।
सर्वांश तालक तुल्य शिग्रुधुस्तूरजद्रवे ॥१३४॥
मर्द्यं स्नुह्यर्कजैः क्षीरैर्दिनैकञ्चाथ भावयेत् ।
सप्ताह बाकुचीतैलैस्तन्माषैकन्तु भक्षयेत् ॥
वज्रधारो रसः ख्यातः सर्वकुष्ठनिकृन्तनः ॥१३५॥

अथ सर्वकुष्ठाङ्कुश ।—

मुषलीबाकुचीबीजं निर्गुण्डीमूलतुल्यकम् ।
मध्वाज्याभ्यां लिहेत् कर्षमनु स्यात् सर्वकुष्ठनुत् ॥१३६॥

धन्वन्तरौ—सौभाग्य टङ्कणम् । कङ्कुष्ठ स्वनामख्यात, तदभावे स्वर्णक्षीरी ग्राह्या । लुङ्गवारिणा मातुलुङ्गरसेन । पथ्येति ।—घृतहरीतकीभ्या शुण्ठीसैन्धवाभ्या वा युत धन्वन्तरिरस वाय, इत्यादिरिति शेष ॥ १३१—१३३ ॥

वज्रधारे—वज्र हीरकम् । स्नुह्यर्कजे क्षीरै स्नुहीक्षीरै अर्कक्षीरैश्च । भावयेदित्यस्य बाकुचीतैले सप्ताहमित्यनेन सम्बन्ध ॥ १३४।१३५ ॥

सर्वकुष्ठाङ्कुशे—मुषली तालमूली, मुषलीबाकुचीबीज मिलित्वा निर्गुण्डीमूलतुल्यम्, "मुषलीबाकचीबीजनिर्गुण्डीमूलमेव च" इति पाठे—मुषल्यादित्रयाणा समत्वम् । अनु इति वज्रधारसेवनात पश्चात लिहेदित्यर्थ , अथवा—अनु शब्दोऽत्र सहार्थे, मुषल्यादिचूर्णकर्षं मध्वाज्याभ्यामनु सह लिहेत्, यद्वा—अनु समकाल मेव, लेहनसमकालमेव इत्यर्थ, सर्वकुष्ठनुत स्यात् । "मुषलीचूर्णम्" इति नामान्तरमस्य ॥ १३६ ॥

अथ द्वितीयमहातालेश्वर ।—

ताम्रं ताप्यं शिला सूत शुद्धं सैन्धवटङ्कणम् ।
समांश चूर्णयेत् खल्वे सूताद्द्विगुणगन्धकम् ॥१३७॥
गन्धतुल्यं मृतं ताम्रं जम्बीरैर्दिनपञ्चकम् ।
मर्द्य षड्भिः पुटैः पाच्य भूधरे सम्पुटोदरे ॥१३८॥
पुटे पुटे द्रवैर्मर्द्यं सर्वमेतत्त षट्पलम् ।
द्विपल मारितं ताम्र लोहभस्म चतुष्पलम् ॥१३९॥
जम्बीराम्लेन तत् सर्वं दिनं मर्द्यं पुटेल्लघु ।
त्रिंशदन्त पुटञ्चास्य चिप्त्वा सर्वं विचूर्णयेत् ॥१४०॥
माहिषाज्येन सम्मिश्र निष्कार्द्धं भक्षयेत् सदा ।
मध्वाज्यैर्वाकुचीचूर्णं कर्षमात्रं लिहेदनु ॥
सर्वकुष्ठं निहन्त्याशु महातालेश्वरो रसः ॥१४१॥

अथ द्वितीयकुष्ठकुठार ।—

सूतभस्मसम गन्ध मृतायस्ताम्रगुग्गुलुः ।
त्रिफला विषमुष्टी च चित्रकश्च शिलाजतु ॥१४२॥
प्रत्येक चूर्णितं कुर्य्यात् प्रत्येक निष्कषोडश ।
चतुःषष्टि करञ्जस्य वीजचूर्णं प्रकल्पयेत् ॥१४३॥

द्वितीयमहातालेश्वरे—सर्वमेतत्तु षट्पल पुटपक्वस्यैतस्य रसस्य पलषट्कम । मर्द्यमित्यादि ।—जम्बीररसेन दिनपञ्चक मर्दयित्वा मूषायां संस्थाप्य च भूधरयन्त्रे पचेत ततो निष्काश्य पुन जम्बीररसेन दिनपञ्चक मर्दयित्वा पूर्ववत् पचेत एव षड्वारान् कुर्य्यात् । त्रिंशदिति ।—जम्बीराम्लेन दिन मर्दयित्वा लघुपुटे पचेत, एव त्रिंशत्पुट दद्यादित्यर्थ । "त्रिंशदन्त पुटञ्चास्य" इत्यत्र "त्रिंशदश विषञ्चास्य" इति रसरत्नाकरादिपाठ समीचीन । योगोऽय प्रायेणानुरूप पूर्वोक्तमहातालेश्वरस्य ॥ १३७—१४१ ॥

द्वितीयकुष्ठकुठारे—"विषमुष्टी" इत्यत्र "महानिम्ब" इति रसेन्द्रचिन्तामणि-रसेन्द्रसारसङ्ग्रहधृतपाठ । रसरत्नाकरे तु "विषमुष्टि" इति पाठ । "प्रत्येक चूर्णितम्" इत्यत्र "इत्येतच्चूर्णितम्" इति पाठान्तरम् । चतुःषष्टि इत्यत्र निष्कमिति

चतुःषष्टि मृत ताम्रं मध्वाज्याभ्यां विलोडयेत् ।
स्निग्धभाण्डगतं खादेद्द्विनिष्कं सर्वकुष्ठजित् ॥१४४॥
रसः कुष्ठकुठारोऽयं गलत्कुष्ठनिकृन्तनः ।
पथ्यं त्रिमधुरैर्दद्यात्तदभावे गुडौदनम् ॥१४५॥
पातालगरुडीमूलं मधुपुष्पीञ्च धान्यकम् ।
सितया भक्षयेत् कर्षमतितापप्रशुत्तये ॥
लिह्यान्नागबलामूलं मध्वाज्यैर्वान्तितापनुत् ॥१४६॥

अथ वज्रतैलम् ।—

वज्रक्षीरं रविक्षीरं धुस्तूरं चित्रकद्रवम् ।
महिषीविड्भवं द्रावं सर्वांशं तिलतैलकम् ॥१४७॥
पचेत्तैलावशेषन्तु तत्तैलं प्रस्थमात्रकम् ।
गन्धकाग्निशिलातालं विडङ्गातिविषाविषम् ॥१४८॥
तिक्तकोशातकी कुष्ठं वचा मासी कटुत्रयम् ।
हरिद्रादारु यष्ट्याह्व सर्जीक्षारञ्च जीरकम् ॥१४९॥

शेष । मृत ताम्रमपि चतुःषष्टिनिष्कम्, एवञ्च ताम्रभाग अशीतिनिष्क ग्राह्य । रसेन्द्रचिन्तामण्यादिषु तु "ताम्रम्" इत्यत्र "अभ्रम्" इति पाठान्तर समीचीन, ताम्रभागस्यातिबाहुल्यात । त्रिमधुरे सिताक्षौद्राज्ये, तदुक्त—"सितामाक्षिक-सर्पींषि मिलितानि यदा तदा । मधुरत्रयमाख्यात त्रिमधु स्यात मधुत्रयम् ॥" इति, "घृत गुडो माक्षिकञ्च विज्ञेय मधुरत्रयम" इति च । पातालगरुडीमूल पातालगरुडी छिलिहिण्ट तस्या मूलम् । "पातालगरुडीमूलम्" इत्यत्र "पञ्चाङ्ग-लगुडलीमूलम्" इति रसरत्नाकरे पाठ । मधुपुष्पीम अवाक्पुष्पी, "चोरहुली" इति प्रसिद्धा, दन्तीमूल वा । अतितापप्रशुत्तये औषधसेवनजनितसन्तापनिवृत्तये इत्यर्थ, एव वान्तितापनुत् इत्यस्यापि अर्थो बोध्य ॥ १४२—१४६ ॥

वज्रतैले—वज्रक्षीर स्नुहीक्षीरम् । धुस्तूर धुस्तूरद्रवम । सर्वांश सर्वतुल्य, तेन वज्रक्षीरादीनामेकैकभाग तिलतैलस्य च पञ्च भागा । रसरत्नाकरे तु—"महिषीविड्भव द्राव सर्वांश तिलतैलकम" इत्यत्र "सर्वांश तिलतैलञ्च गोमूत्रेण सम पचेत्" इति पाठान्तर, तत्र—वज्रक्षीरादीनि मिलित्वा तैलतुल्यानि

कर्षांशं देवकाष्ठञ्च चूर्णं तैले विमिश्रयेत् ।
वज्रतैलमिदं ख्यातं मर्दनात् सर्वकुष्ठनुत् ॥१५०॥

अथ स्वर्णक्षीरः ।—

क्षिप्त्वा तक्रघटे पश्चात् काञ्चनीपलपञ्चकम् ।
तक्रे जीर्णे समुद्धृत्य पुनः क्षीरघटे पचेत् ॥१५१॥
क्षीरे जीर्णे समुद्धृत्य जलैः प्रक्षाल्य शोषयेत् ।
तच्चूर्णितं पञ्चपलं मरिचानां पलद्वयम् ॥१५२॥
पलैकं मूर्च्छितं सूतमेकीकृत्य तु भक्षयेत् ।
निष्कैकं सुप्तकुष्ठार्त्तः स्वर्णक्षीररसो ह्ययम् ॥१५३॥

अथ महाभल्लाततैलम् ।—

यत्नाद्द्विखण्डितं कुर्याद्भल्लातशतपञ्चकम् ।
क्षिप्त्वा पश्चाच्छनैर्वह्नौ तैले द्वादशपालिके ॥१५४॥
यावत्तरन्ति ते पक्वा तत्तैलं पाचयेत् पुनः ।
मधुपाके तु सम्प्राप्ते ह्यवतार्य्य तु तत्क्षणात् ॥
सर्वकुष्ठानि हन्त्याशु महाभल्लाततैलकम् ॥१५५॥

गोमूत्रञ्च तैलाच्चतुर्गुणम् इति। तिक्तकोशातकी तिक्तघोषका, "तित्पोरला" इति भाषा। हरिद्रादारु दारुहरिद्रा, "हरिद्रादारु" इत्यत्र "दारुहरिद्रा" इति पाठो न युज्यते छन्दोभङ्गप्रसङ्गात्। गन्धकादीनां देवकाष्ठान्तानां प्रत्येकं कर्षप्रमाणं चूर्णं तैले दत्त्वा आलोड्य स्थापयेत्। अकल्कमिदं तैलम्, "अकल्कोऽपि भवेत् स्नेहो यः साध्यः केवले द्रवे" इति वचनात् ॥ १४७—१५० ॥

स्वर्णक्षीरे—तक्रघटे द्रोणप्रमिते तक्रे। काञ्चनी स्वर्णक्षीरी। जीर्णे शुष्के इत्यर्थः। मूर्च्छितं सूतं कज्जलीभूतं पारदम्, तथा च रसेन्द्रसारसङ्ग्रहे—"गन्धकेन रसं प्राज्ञः सुदृढं मर्दयेत् भिषक्। कज्जलाभो यदा सूतो विहाय घनचापलम् ॥ दृश्यतेऽसौ तदा ज्ञेयो मूर्च्छितो रसकोविदैः ॥" इति, स्वतन्त्रेऽप्युक्तम्—"मर्दनादिष्टभैषज्येनष्टपिष्टत्वकारकम्। तन्मूर्च्छनं हि वङ्गादि मलादिदोषनाशनम् ॥" इति ॥ १५१—१५३ ॥

महाभल्लाततैले—भल्लातशतपञ्चकं भल्लातकगुडकं पञ्चशतसङ्ख्याकम्। तैले

अथ त्रैलोक्यविजयतैलम्।—

रसं गन्धं विषं तालं स्वर्णक्षीरी रुदन्तिका।
वरुणाम्लेन सञ्चूर्ण्य प्रतिनिष्कद्वयं द्वयम्॥१५६॥
क्षिपेत्तस्मिन् विशोष्याथ क्रमान्निष्कं सदा लिहेत्।
त्रैलोक्यविजयं तैलं सर्वकुष्ठहरं ध्रुवम्॥१५७॥

अथ महामार्त्तण्डतैलम्।—

शाकं निम्बाङ्कोल्लवह्नि-राजवृक्षाक्षसम्भवम्।
गर्भशुष्कं शुभं खण्डं नारिकेलप्रियालकम्॥१५८॥
वातारिचक्रमर्दस्य बीजं बाकुचिजं तथा।
समं पातालयन्त्रेण तैलं ग्राह्यं प्रयत्नतः॥१५९॥
प्रस्थौ द्वौ तिलतैलस्य कुष्ठचूर्णं पलद्वयम्।
स्वर्णक्षीरीपलैकञ्च क्षिप्त्वा पक्त्वाऽवतारयेत्॥१६०॥
पूर्वतैले चतुष्प्रस्थे तैलीभूते विनिक्षिपेत्।
महामार्त्तण्डतैलोऽयं लेपात् कुष्ठं नियच्छति॥
अतिकण्डूं क्रिमिं पाकं स्फोटकानि च नाशयेत्॥१६१॥

कटुतैले। द्वादशपालिके द्वादशपलप्रमिते। तरन्ति उत्प्लवन्ते। मधुपाके पुनः पाकात् यदा मधुवर्णं मधुवद्घनञ्च जायते तदा इत्यर्थः॥१५४।१५५॥

त्रैलोक्यविजयतैले—"स्वर्णक्षीरी रुदन्तिका" इत्यत्र "स्वर्णक्षीरी च दन्तिका" इति पाठान्तरम्। वरुणाम्लेन मद्येनेत्यर्थः, अम्लजलेन वा, काञ्जिकेनेत्यर्थः। तस्मिन् पूर्वोक्तमहाभल्लाततैले॥१५६।१५७॥

महामार्त्तण्डतैले—शाकमित्यस्य बीजमित्यनेनान्वयः, शाकः सरुजद्रुमविशेषः, "शेगुन्" इति ख्यातः, तद्भवं बीजमित्यर्थः। वह्निः भल्लातकः, राजवृक्षः आरग्वधः, अक्षः विभीतकः, सुक् सुही तथा बीजम्। गर्भेति।—गर्भशुष्कम् आवरणाभ्यन्तरे स्वयमेव शुष्कमित्यर्थः, नारिकेलप्रियालकं नारिकेलपियालफलसम्बन्धि शुभं प्रशस्तं पूतिदोषादिरहितमित्यर्थः, खण्डम्। वातारिचक्रमर्दस्य वातारिः एरण्डः चक्रमर्दः "चाकुन्दा" इति प्रसिद्धः, तस्य। समं समभागम्। पातालेति।—पातालयन्त्रविधिस्तु प्रागेव प्रदर्शितः। पूर्वतैले शाकादिबीजानां तैले। तैलीभूते पाक-

अथ काञ्चनीतैलप्रयोगोपदेशः ।—

कुष्ठञ्च काञ्चनीतैलैर्मर्द्यालिप्य सुघर्षितम् ॥१६२॥

अथ शुष्ककण्डूहरकुमार्य्यादिलेपः ।—

कुमारीसैन्धवं लेप्यं शुष्ककण्डूहरं परम् ॥१६३॥

अथ विपादिकायां सैन्धवादिलेपः ।—

सैन्धवेन महामुण्डी-लेपो हन्ति विपादिकाम् ॥१६४॥

अथ कण्डूव्रणादौ शिलादिः ।—

शिला शम्भुबीजं वरं कुष्ठगन्धं
मरीचं तथा जीरकं देवधूपः ।
निशा सर्पिषा मर्दितो मन्दवारे
हरेत् कायकण्डूव्रणस्फोटगण्डान् ॥१६५॥

अथ कुष्ठान्तपर्पटी ।—

पलैकं शुद्धसूतस्य कर्षैकं शुद्धगन्धकम् ।
गन्धतुल्यं मृतं ताम्रं सूताशं मर्दयेद्विषम् ॥१६६॥

सिद्धिलक्षणे समुदिते सतीत्यर्थः । विनिक्षिपेत्, सुभाजने इति शेषः । आदौ पातालयन्त्रेण शाकादिबीजेभ्यः तैलं निष्काश्य, चतुःप्रस्थमिते तस्मिन् तिलतैलादिके यथोक्तमानं दत्त्वा पचेत्, सुसिद्धे च अवतार्य्य सुभाजने स्थापयेदिति ॥१५८—१६१॥

काञ्चनीतैलप्रयोगोपदेशे—काञ्चनीतैलैः स्वर्णक्षीरीबीजोत्थतैलैः सह कुष्ठं तदा-ख्यौषधविशेषं मर्द्यात, ततः कुष्ठं व्याधिं सुघर्षितं गोजीशाखोटकादिपत्रैः सुलिखित-मित्यर्थः, कृत्वा लेप्यं काञ्चनीतैलमृष्टकुष्ठेनेति शेषः, यद्वा—काञ्चनीतैलैः कुष्ठं कुष्ठव्याधिं मर्द्यात मर्द्यात् इति प्रयोगस्तु शिष्टप्रयोगानुसारात् सहनीयः, तथा सुघर्षितं कुष्ठं लेप्यं, काञ्चनीतैलैरेवेति बोध्यम् ॥ १६२ ॥

कुमार्य्यादिलेपे—शुष्ककण्डूः स्रावादिविरहितकण्डूरित्यर्थः ॥ १६३ ॥

सैन्धवादिलेपे—महामुण्डी महाश्रावणिका ॥ १६४ ॥

शिलादौ—शिला मनःशिला । शम्भुबीजं पारदः । वरं कुङ्कुमं सैन्धवं वा । देवधूपः सर्जरसः । मन्दवारे शनैश्चरवासरे । कायकण्डूः कायो मध्यदेहः तद्गतकण्डूः । "काय" इत्यत्र "कोठ" इति पाठान्तरम् । लेपविषया अयं योगः ॥ १६५ ॥

सर्वतुल्यं पुनर्गन्धं दत्त्वा किञ्चिद्विशोषयेत् ।
घृताभ्यक्ते लोहपात्रे पचाद्यावद्द्रवीभवेत् ॥१६७॥
रम्भापत्रे पटे वाऽथ पातयेत् पर्पटीं तदा ।
माषैकं चूर्णितं खादेद्गजचर्म नियच्छति ॥
निष्कैकं वाकुचीचूर्णं लेहयेदनुपानकम् ॥१६८॥

अथ काशीशबद्धो रसः ।—

पलं रसं हि काशीशैर्युतं पञ्चगुणैः सह ।
मर्दयेद्यामपर्यन्तमर्जुनस्य त्वचो रसे ॥१६९॥
शरावसम्पुटे रुद्ध्वा पुटेत् क्रोडपुटेन हि ।
रसः काशीशबद्धोऽयं मधुना वल्लतुल्यकः ॥१७०॥
शाणवाकुचिकायुक्तः सेवितो हन्ति निश्चितम् ।
त्रिभिर्मासैः किलासं हि दद्रूण्यपि विशेषतः ॥१७१॥

अथ द्वितीयसर्वेश्वरः ।—

शुद्धसूतं चतुर्गन्धं खल्ले यामं विमर्दयेत् ।
मृतताम्राभ्रलोहानि हिङ्गुलञ्च पलं पलम् ॥१७२॥
सुवर्णं रजतञ्चैव प्रत्येकं दशनिष्ककम् ।
माषैकं मृतवज्रञ्च तालसत्त्वं पलद्वयम् ॥१७३॥
जम्बीरोन्मत्तवासाभिः स्नुह्यर्कविषमुष्टिभिः ।
मर्द्यं हयारिजैर्द्रावैः प्रत्येकेन दिनं दिनम् ॥१७४॥
एवं सप्तदिनं मर्द्यं तद्गोलं वस्त्रवेष्टितम् ।
वालुकायन्त्रगं स्वेद्यं त्रिदिनं लघुनाऽग्निना ॥१७५॥

कुष्ठान्तपर्पट्या—गजचर्म चर्मकुष्ठम् ॥ १६६—१६८ ॥

काशीशबद्धरसे—रसः रससिन्दूरम् । क्रोडपुटेन वराहपुटेन ॥ १६९—१७१ ॥

द्वितीयसर्वेश्वरे—शोधितरसस्य पलमानता बोद्धव्या, समनन्तरमेव ताम्रादीनां पलमानतादर्शनात् "भागेऽप्रयुक्ते समता विज्ञेया" इति परिभाषाबलाच्च,

आदाय चूर्णयेत् सूक्ष्मं पलैकं योजयेद्विषम् ।
द्विपलं पिप्पलीचूर्णं मिश्रं सर्वेश्वरो रसः ॥१७६॥
द्विगुञ्जं भक्षयेत् क्षौद्रैः सुप्तिमण्डलकुष्ठजित् ।
बाकुचीं देवकाष्ठञ्च कर्षमात्रं सुचूर्णितम् ॥
लिहेदेरण्डतैलेन ह्यनुपानं सुखावहम् ॥१७७॥

अथ योगराजगुग्गुलुप्रयोगोपदेशः ।—

गुग्गुलुर्योगराजो वा योज्यो मण्डलशान्तये ॥१७८॥

अथ श्वित्रलक्षणम् ।—

श्वित्रन्तु कृष्णमरुणं मरुदस्रगामि
पित्तेन रोमशतनञ्च विदाहिताञ्च ।
मांसाश्रितं बहुसितं कफतः सकण्डु
मेदोगतं बलवदेव यथोत्तरं स्यात् ॥१७९॥

एवञ्च गन्धस्य पलचतुष्टयं ग्राह्यम् इति । उन्मत्तः धुस्तूरः । हयारिजैः करवीरजैः ॥ १७२—१७७ ॥

मण्डलकुष्ठे अधिकारान्तरोक्तमौषधविशेषमुपदिशति, गुग्गुलुरिति ।—वा शब्दः पूर्वयोगापेक्षया, मण्डलकुष्ठशान्तये सर्वेश्वरः योज्यः वक्ष्यमाणवातव्याध्यधिकारोक्तः योगराजो गुग्गुलुर्वा योज्य इति ॥ १७८ ॥

तुल्यनिदानत्वात् कुष्ठचिकित्सानन्तरं श्वित्रचिकित्सितं विवक्षुस्तस्य लक्षणमाह, श्वित्रमिति ।—मरुता वातेन अस्रं रक्तं दूष्यमिति यावत्, गच्छतीति तथाभूतं, वातेन रक्तगतमित्यर्थः । मरुत् शब्दाऽत्र समासान्तर्गतोऽपि पृथगन्वेतव्यः । वातात् श्वित्रं रक्ताश्रितं कृष्णम् अरुणञ्च भवेत् इति योजनीयम् । "कृष्णम्" इत्यत्र "रूक्षम्" इति पाठः वाग्भटसम्मतः । तथा पित्तेन दोषेण श्वित्रं रोमशतनं, शतनमिति छन्दोऽनुरोधात् ह्रस्वः, शातनमित्यर्थः, एवञ्च रोमशातनं रोमविध्वंसनं, तथा विदाहिताञ्च कुर्य्यादिति शेषः । तच्च मांसाश्रितं मांसधातुमाश्रित्य वर्त्तते इत्यर्थः, तथा कमलपत्रवत् वर्णतः ताम्रञ्च भवति वाग्भटसंवादात् । कफतः बहुसितं सुशुभ्रं, सकण्डु च, तच्च मेदोगतं मेदःश्रितम् । यथोत्तरम् उत्तरोत्तरं रक्तगतात् श्वित्रात् मांसगतं मांसगताच्च मेदोगतमित्यर्थः, बलवदेव कृच्छ्रसाध्यमेवेत्यर्थः, स्यात् । वाग्भटेऽप्युक्तं— "वाताद्रूक्षारुणं पित्तात्ताम्रं कमलपत्रवत् । सदाहं रोमविध्वंसि कफात् श्वेतं

अथ श्वित्रारिः ।—

काशीशरसगन्धानि मर्दयेत् सुरसारसे ।
सम्पुटे पुटयेद्दत्त्वा चाङ्गेरीमधरोत्तरम् ॥१८०॥
सर्वमेतच्च सञ्चूर्ण्य तण्डुलान् दश सप्त वा ।
आरभ्य वर्द्धयेद्यावत् पञ्चषष्टिं क्रमेण हि ॥१८१॥
अनुपानाय मध्वाज्यं दध्याज्यं नवनीतकम् ।
धात्र्यार्द्रकरसैश्चैव तिन्दुकं कदलीफलम् ॥
श्वित्रारिसञ्ज्ञितो ह्येष चित्रकुष्ठनिसूदनः ॥१८२॥

अथ श्वित्रे निम्बादिचूर्णम् ।—

निम्बपत्रनिशाकृष्णा-बाकुचीबीजकं समम् ।
चूर्णयित्वा पिबेद्दुग्धे. प्रभाते श्वित्रनाशनम् ॥१८३॥

अथ श्वित्रकुष्ठारिः ।—

रसगन्धकतुल्यार्कं बाकुचीक्वाथमर्दितम् ।
सेवितं सोमतैलेन श्वित्रकुष्ठं नियच्छति ॥१८४॥

घनं गुरु ॥ सकण्डूः क्रमात् रक्त-मांसमेदःसु चादिशेत् । वर्णेनैवेदृगुभयं कृच्छ्रं तच्चोत्तरोत्तरम् ॥" इति ॥ १७९ ॥

श्वित्रारौ—सुरसारसे तुलसीपत्ररसे । चाङ्गेरीम् अम्ललोणीम् । दश सप्त वा इति विकल्पस्तु दोषव्याधिबलाबलानुसारात् अवधातव्यः । चित्रकुष्ठम् इति श्वित्रस्यैव नामान्तरम् । "चित्र" इत्यत्र "श्वित्र" इति पाठान्तरम् । अयमर्थः,— काशीशादिकं समभागं तुलसीपत्ररसेन मर्दयित्वा मूषायामधरोत्तरं दत्तस्य अम्ललोणी-चूर्णस्य काशीशादितुल्यस्य मध्ये संस्थाप्य च गजपुटे पचेत्, ततः सर्वमेव भेषजं पुटादाकृष्य सञ्चूर्ण्य च सप्ततण्डुलमानेन दशतण्डुलमानेन वा आरभ्य एकैक-तण्डुलवृद्ध्या पञ्चषष्टितण्डुलं यावत् वर्द्धयेत्, अनुपानार्थं मध्वाज्यादीनामेकतमञ्च पिबेदिति ॥ १८०—१८२ ॥

निम्बादिचूर्णे—सर्वं सुगमम् ॥१८३॥

श्वित्रकुष्ठारौ—सोमतैलेन सोमः रक्तचन्दनं तस्य तैलेन, सोमः सोमराजी वा, नामैकदेशग्रहणेन नामसाकल्यग्रहणनियमात् ॥ १८४ ॥

अथ चन्द्रप्रभा वटिका ।—

पिष्टो निम्बुकगोमयूत्रसलिले सार्द्धो रसो गन्धकात्
मूषाया घननादपिण्डसहित पक्व करोषि तिलान् ।
वाकुच्याश्च फलानि गोजलकृता चन्द्रप्रभेति श्रुता
श्वित्रं तक्रभुजो निहन्ति वटिका क्षाराम्लतैल त्यजेत् ॥१८५॥

अथ ताम्रलिप्तकज्जली ।—

रसद्विगुणगन्धकं त्रिगुणताम्रलिप्त पचेत्
गृहीतमनु कज्जलीं खदिरवाकुचीनिम्बजै' ।
रसै' पुटविपाचितं समलयाकषाय पिबेत्
किलासमरुण सितं जयति शुद्धतक्राशिन: ॥१८६॥

चन्द्रप्रभाया—निम्बुकगोमयूरसलिले निम्बुकरसे गोमयूरथो मूत्रे च पिष्ट गन्धकात गन्धकभागापेक्षया सार्द्ध सार्द्धभाग रस पारद ग्राह्य इति शेष , तेन गन्धकस्य एक रसस्य च सार्द्धैकभागो ग्राह्य । तत घननादपिण्डसहित घननाद् मेघनाद तण्डुलीयमूलमित्यर्थ तत्पिण्डसहित तत्कल्कमध्ये निहितामत्यर्थ, मूषाया करोषि करीषाग्नौ, पक्व त रसगन्धकमिति शेष , तिलान वाकुच्या फलानि च प्रत्येक पक्वौषधतुल्यानि, एकीकृत्य इति शेष , गोजलकृता गोमूत्रमर्दिता, चन्द्र-प्रभेति श्रुता वटिका इत्यन्वय ॥ १८५ ॥

ताम्रलिप्तकज्जल्या—त्रिगुणताम्रलिप्त रसापेक्षया त्रिगुणताम्रपत्रे लिप्तम । पचेत् गजपुटे पचेदित्यर्थ । अनु पश्चात् पाकानन्तर, गृहीतं, पुटात बहिष्कृत्य इति शेष , कज्जलीम , गृहीत विपाचितमिति कज्जलीविशेषणयो पुलिङ्गतानिर्देशस्य महाजन-प्रयोगात साधुत्वमवगन्तव्यम् । "कज्जलीम्" इत्यत्र "कज्जलम्" इति साधु । खदिरादीना रसै मर्दयित्वा पुटविपाचितं पुन गजपुटे पक्व त, समलयाकषाय मलया सोमराजी तत्कषायसहितम । किलासमिति ।—"किलासमेव मांसमेद-समाश्रयणात् अरुण श्वित्रञ्च भण्यते" इति मधुकोष, विस्तरस्तु तत्रैव मृग्य । सितं श्वित्रम् । शुद्धतक्राशिन, केवलतक्रेण सहान्नभोजिन., न तु व्यञ्जनान्तरेणे-त्याशय. ॥ १८६ ॥

अथोदयादित्यः ।—

शुद्धसूतं द्विधा गन्धं मर्द्यं कन्याद्रवैर्दिनम् ।
तद्गोलं हण्डिकामध्ये ताम्रपात्रेण रोधयेत् ॥१८७॥
सूतकाद्द्विगुणेनैव शुद्धेनाधोमुखेन वै ।
पार्श्वे भस्म निधायाथ पात्रोर्द्ध्वे गोमयं जलम् ॥१८८॥
किञ्चित् किञ्चित् प्रदातव्यं चुल्ल्यां यामद्वयं पचेत् ।
चण्डाग्निनोद्धृत्य ततः स्वाङ्गशीतं विचूर्णयेत् ॥१८९॥
काकोडुम्बरिकावह्नि-त्रिफलाराजवृक्षकम् ।
विडङ्गं वाकुचीबीजं क्वाथयेत्तेन भावयेत् ॥१९०॥
दिनैकमुदयादित्यो रसो भक्ष्यो द्विगुञ्जकः ।
खदिरस्य कषायेण वाकुचीबीजचूर्णकम् ॥१९१॥
तुल्यं मृद्वग्निना पिण्डं जातं यावत् पचेल्लघु ।
त्रिनिष्कं तत् रविक्षीरैः क्वाथैर्वा त्रैफलैरनु ॥१९२॥
त्रिदिनान्ते भवेत् स्फोटः सप्ताहे वा न संशयः ।
नीलीं गुञ्जाञ्च काशीशं धुस्तूरं हंसपादिकाम् ॥१९३॥
सूर्य्यावर्त्तञ्चाम्लपर्णी-तुल्यं पिष्ट्वा प्रलेपयेत् ।
स्फोटस्थाने प्रशान्त्यर्थं सप्तरात्रं पुनः पुनः ॥
श्वेतकुष्ठं निहन्त्याशु साध्यासाध्यं न संशयः ॥१९४॥

उदयादित्ये—राजवृक्षकम् आरग्वधम् । खदिरस्य कषायेण चतुर्गुणेनेत्याशयः, तुल्यं खदिरतुल्यं वाकुचीबीजचूर्णकम् । केचित् खदिरस्य कषायेण तुल्यं वाकुचीबीज-चूर्णकमित्यन्वेति, तदयुक्तम्, क्वाथचूर्णयोस्तुल्यतायां पाकानुपपत्तेः । सूर्य्यावर्त्तम् आदित्यभक्ता "हुडहुडे" इति देशभाषया प्रसिद्धम् । अम्लपर्णीतुल्यम् अम्लपर्णी चाङ्गेरी चुक्रिका वा, तत्तुल्यम् । "अम्लपर्णी" इत्यत्र "ताम्रपर्णी" इति पाठान्तरम् । अयमर्थः,—कन्यारसमर्दितं रसगन्धपिण्डं हण्डिकायां संस्थाप्य सूतात् द्विगुणमितशुद्धताम्र-निर्मितपात्रविशेषेण अधोमुखेन आच्छाद्य च सन्धिं निरोधयेत्, तत्र तत्पार्श्वे पालाशादिभस्म निधाय ताम्रपात्रस्य उत्तरार्द्धे किञ्चित् किञ्चित् गोमयमिश्रं जलं सिञ्चेत्, एवं चुल्ल्यां तीव्राग्निना प्रहरद्वयं पक्त्वा स्वाङ्गशीतञ्चादाय विचूर्णयेत्, काकोडुम्बरिका-

अथ अल्पश्वित्रे शिलादिलेप ।—

अल्प श्वेत निघृष्याऽऽदौ रक्तमण्डलपल्लवैः ।
शिलाऽपामार्गभस्मापि लिप्त्वा श्वित्रं विनाशयेत् ॥१९५॥

अथ अङ्कोलतैलादिलेपद्वयम् ।—

लेपो वाऽङ्कोलतैलेन काञ्चन्या काञ्जिकेन वा ।
गुञ्जाफलाग्निमूलञ्च लेपित श्वेतकुष्ठजित् ॥१९६॥

अथ चतुर्गुणगन्धककज्जली ।—

सूते पले भूधरयन्त्रमध्ये सञ्जारयेद्गन्धपल ततश्च ।
सूतेन गन्धस्य पलत्रयञ्च दत्त्वाऽथ निम्बूत्थरसैर्विमर्द्य ॥१९७॥
खराशिकाबाकुचिकाग्निभृङ्ग-कोरण्टनीरैः परिमर्दयेत ।
दिनैकमेक कटुतुम्बिनीजलैर्मर्द्यं तत काञ्चनकूपिकान्त. ॥१९८॥
निक्षिप्य भाण्डे सिकतोदरान्तर्यामद्वयं स्वेदय तं ततश्च ।
ददीत वल्लद्वयमस्य कृष्णा-पर्णेन साई त्वथवा तदर्द्धम् ॥१९९॥

दीना मिलिताना क्वाथेन दिनमेक मर्दयित्वा स्थापयेच्च । तच्च रस द्विगुञ्ज भक्षयित्वा खदिरक्वाथपाचितबाकुचीचूर्णनिष्कत्रयमर्कक्षीरै त्रिफलाकषायैर्वा अनुपिबेत, तेन च दिनत्रयान्ते सप्ताहान्ते वा श्वित्रोपरि स्फोटो भविष्यत्येव । जाते च तस्मिन् तत्प्रशमाय नील्यादिक समभाग पिष्ट्वा सप्ताह यावत स्फोट लिम्पेदिति ॥१८७—१९४॥

शिलादिलेपे—अल्पम अप्रवृद्ध, नवमित्यर्थ, श्वेत श्वेतकुष्ठम् , यद्वा—श्वेतम् अल्प निघृष्य इति योजना कार्या। रक्तमण्डलपल्लवै रक्तलज्जावतीपत्रै रक्त-करवीरपत्रैर्वा । शिला मन शिला ॥ १९५ ॥

अङ्कोलतैलादिलेपद्वये—काञ्चन्या स्वर्णक्षीरीबीजेन, अङ्कोलतैलेन सह पिष्टेन स्वर्णक्षीरीबीजेन लेप इत्यर्थ । काञ्जिकेन वा गुञ्जाफलाग्निमूलञ्च इति द्वितीयो लेप , अग्निमूल चित्रकमूलम् ॥ १९६ ॥

चतुर्गुणगन्धककज्जल्या—गन्धपलमित्यत्र दत्त्वा इति शेष । दत्त्वा मिश्रयित्वेत्यर्थ । खराशिका सप्तभाग , सप्तगुण इत्यन्य , देशान्तरप्रसिद्ध औषधिविशेष खराशिका इति केचित्, सप्तपर्ण इत्यन्ये । कोरण्टनीरै कुरण्ट कुटज तद्भवनीरैः कौटजत्वग्रसैरित्यर्थ । “काञ्चनकूपिकान्त.” इत्यत्र “काचसुकूपिकान्त.” इति

पलाग्रमूलं त्वनुपाययीत तक्रेण साह्वञ्च दद्यीत पथ्यम्।
उष्णे क्षिपेत्तैलविमर्दितञ्च स्फोटा यदि स्युः सहसा च गात्रे॥२००॥

अथ श्वेतारियोग।—

पलत्रयं गन्धकभृङ्गकृष्णा-तिलोत्थतैलं कटुतुम्बिनी च।
भल्लाततैलं कटुनिम्बबीजं सर्वं समानं परिभावयेत॥२०१॥
त्रिःसप्तकं भृङ्गरसैस्तु तोयं श्वेतारियोगं समुपैति सिद्धिम्।
पलार्द्धमानेन दद्यीत चामुं सिताघृताक्तं दिनजन्मकाले॥२०२॥
विवर्जयेत् शूरणमाषमांस-वृन्ताकमुद्गानि कषायकादि॥२०३॥

अथ कृष्णीकरणयोग।—

कुमार्गजन्तीनुरपत्त्रसागरैर्वृष्टिशाभास्करलोकभासया।
कल्कीकृतं यन्मधुना च संयुतं करोति तारं भ्रमरप्रभञ्च तत्॥२०४॥

पाठान्तरम्। उष्णे आतपे घर्मे इत्यर्थः। अयमर्थः,—पारदपलं गन्धकपलञ्च एकीकृत्य भूधरयन्त्रे पचेत, तत पाकसिद्धेन तेन पारदेन सह पलत्रयं गन्धकं पुनर्मिश्रयित्वा निम्बरसेन मर्दयेत्। ततो बाकुचिकादीनां प्रत्येकरसेन कज्जल्यपेक्षया सप्तगुणेन एकमेकं दिनं, तिक्ततुम्बीरसेन च दिनमेकं मर्दयित्वा स्वर्णपात्रे काचपात्रे वा मृत्स्नेण वेष्टिते निधाय च बालुकायन्त्रे यामद्वयं पचेत्, स्वाङ्गशीतं तमादाय विचूर्ण्य च द्विवल्लसैकवल्लं वा कृष्णपर्णेन सह भक्षयेत, पलाग्रमूलञ्च किञ्चित् जलेन पिष्ट्वा अनुपिबेत, तक्रेण साह्वं पथ्यञ्च दद्यीत। औषधसेवनेन यदि गात्रे स्फोटा निर्गच्छेयुः, तदा तं तैलाभ्यक्तं रौद्रे वासयेदिति॥ १९७—२००॥

श्वेतारियोगे—"कृष्णातिलोत्थतैलम्" इत्यत्र "कृष्णा तिलोत्थतैलम्" इति पाठे—कृष्णा पिप्पली। कटुतुम्बिनी तिक्तालावू। कटुनिम्बबीजं पर्वतनिम्बबीजम्, अतितिक्तत्वात्। पलत्रयमित्युक्ताऽपि यत सर्वं समानमित्युक्तं तत् मिलित्वा पलत्रयबोधनार्थमिति। तोयं वालकम्। दिनजन्मकाले प्रभाते इत्यर्थः। अयमर्थः,—गन्धकादिकं तोयान्तं सर्वं मिलितं पलत्रयं गृहीत्वा एकविंशतिवासरं भृङ्गराज-रसेन भावयेत। ततः पलार्द्धमानमौषधं शर्कराघृतसंयुक्तं प्रभातकाले उपयुञ्जीत, आ प्रकृतिभावं यावत शूरणादिकञ्च विवर्जयेदिति॥ २०१—२०३॥

कृष्णीकरणयोगे—कु मृत्तिका कृष्णमृत्तिका इत्यर्थः, द्रव्यगुणे अस्या रक्त-दोषहरत्वमुक्तं अत्र यौगिकत्वं बोद्धव्यम्। मार्ग अपामार्गः। जन्ती जयन्ती,

अथ गन्धकादिक्षारः ।—

गन्धकाश्वत्थरुचक-श्वेतशूरणटङ्कणाः ।
तिलपुष्पञ्च तत्क्षारः सप्तधा गोजलाप्लुतः ॥२०५॥
तत्कर्षं मधुना श्वित्री तैलाढ्यो यामं खरातपे ।
विकृते पतिता ह्येव स्फोटाः स्युस्तान् वरोदकैः ॥२०६॥
सिञ्चेत्तुर्य्यदिनाल्लिप्ते निशातण्डुलतालकैः ।
शीततक्रकोद्रवान्नाशी सप्ताहाच्छ्वित्रजित् खलु ॥२०७॥

अथ उडम्बरादिचूर्णम् ।—

उडुम्बरस्य मूलानि चित्रमूलञ्च निम्बजम् ।
अवल्गुजस्य बीजानि चूर्णयित्वा विचक्षणः ॥२०८॥

जयन्तीति पठितव्ये जन्तीति पाठस्तु छान्दस, यथा—काकमाचीति वक्तव्ये कामाचीति प्रयोग । नुर देशान्तरप्रसिद्ध तृणविशेष । पक्ष पक्षी, स्वर्णमाक्षिक इत्यर्थ । सागर सामुद्रलवण ते । वरु वरुण तस्य त्वक्, "वरु" इत्यत्र "वसु" इति पाठे—वसु वसुक । टिशा देशान्तरप्रसिद्धा । भास्कर अर्क तस्य मूलम् । लोक लोकमक्षिका कन्दगुडूचीत्यर्थ । भामा कमारिका तथा । "सागरे" इत्यत्र बहुवचनमेषा प्रत्येकशो मिलित्वा वा तथा 'भामया" इति एकवचनञ्च मिलित्वैव प्रयोगबोधनार्थमिति मन्तव्यम् । कल्कीकृतम एतै सह पिष्ट पूर्वोक्तश्वेतारियोग-पठितद्रव्यजातमित्यर्थ । तार रजत, रजतप्रभ यत श्वित्रमित्यर्थ, तत भ्रमरप्रभ भ्रमरवत कृष्णवर्णमित्यर्थ ॥ २०४ ॥

गन्धकादिक्षारे—रुचक सौवर्चलम । श्वेतशूरण आरण्यशूरण । तत्क्षार तैर्गन्धकादिभि कृत क्षार । गोजलाप्लुत गोमूत्रसिक्त । मधुना इत्यत्र पिबेदिति शेष । तैलाढ्य तैलाभ्यङ्ग कृत्वेत्यर्थ, याम खरातपे तीव्ररौद्रे तिष्ठेदिति शेष । विकृते इति । —एवम् अनया क्रियया विकृते श्वित्रयुक्ते अङ्गे इति शेष स्फोटा पतिता निर्गता इत्यथ, स्युस्ते तान वरोदकै त्रिफलाजलै सिञ्चेत । तुर्य्यदिनात चतुर्थदिनमारभ्य, चतुर्थदिनन्तु स्फोटनिर्गमदिनापेक्षयेति मन्तव्यम्, शीततक्रकोद्रवान्नाशी सन निशा-तण्डुलतालकै निशा हरिद्रा तण्डुल विडङ्ग तालक हरिताल ते लिप्ते अङ्गलेपे कृते सतीत्यर्थ सप्ताहात श्वित्रजित श्वित्रजयी श्वित्ररोगात् विमुक्त इत्यर्थ, भवतीति शेष ॥२०५—२०७॥

उष्णेन वारिणाऽक्षांश सेवितं क्षीरभोजिना।
क्रिमिजाल श्वेतकुष्ठ सहसा तद्विनिर्हरेत् ॥२०९॥

अथ अङ्कोलादितैलम्।—

अङ्कोलनिम्बनिर्गुण्डी-पत्रकाष्ठाद्यथोचितम्।
पातालयन्त्रविधिना तैल श्वित्रनिवर्हणम् ॥२१०॥

अथ कुष्ठारितैलम्।—

नारिकेलं हरिद्रे द्वे वाकुची वचया सह।
अक्षभृङ्गकभल्लात शाककाष्ठञ्च काञ्चनम् ॥२११॥
एतानि समभागानि तैलं पातालयन्त्रतः।
सङ्गृह्य लेपयेत्तेन कुष्ठाष्टादशनाशनम् ॥२१२॥

अथ क्रिमिलक्षणम्।—

ज्वरो विवर्णता शूल हृद्रोग' श्वसनं भ्रमः।
भक्तद्वेषोऽतिसारश्च सञ्जातक्रिमिलक्षणम् ॥२१३॥

उडुम्बरादिचूर्णे—निम्बज निम्बबीज, कुष्ठहरत्वात। अक्षाश कर्ष-प्रमाणम् ॥ २०८।२०९ ॥

अङ्कोलादितैले—काष्ठ दारुहरिद्रा, वक्ष्यमाणयोगदर्शनात शाककाष्ठ वा, अङ्कोलादीना पत्रेण सह काष्ठ तस्मात अङ्कोलादिपत्रात काष्ठाच्चेत्यर्थ, यद्वा —अङ्कोलादित्रयाणा बीज पत्रं तेजपत्र तथा काष्ठ तस्मात्। यथोचितं यथाविधि ॥ २१० ॥

कुष्ठारितैले—अक्ष विभीतक। भृङ्गक भृङ्गराज। शाककाष्ठ शाक महत्द्रुमविशेष "शेगुन्" इति ख्यात, तत्काष्ठम्। काञ्चन पुन्नाग काञ्चन-क्षीरी वा ॥ २११।२१२ ॥

वाग्भटे "षट् ते कुष्ठैककर्माण" इत्यनेन कुष्ठस्य क्रिमिकार्य्यत्वेनोक्तत्वात तथा अस्थिमज्जसमाश्रितस्य कुष्ठस्य लक्षणे "क्षतेषु क्रिमिसम्भव" इति क्रिमिशब्दोल्लेखाच्च कुष्ठानन्तर क्रिमिचिकित्सित विवक्षुरादौ तल्लक्षणमाह, ज्वर इति।—विवर्णता शरीरस्य मालिन्यम्। शूलमिति उदरे। "श्वसनम्" इत्यत्र "कूर्दन" तथा "सदनम्" इति च पाठान्तरम् ॥ २१३ ॥

अथ क्रिमिचिकित्सा ।—

अथ क्रिमिशूलहरी रस ।—

अजमोदा फलास्थीनि चोरिणी रसगन्धकम् ।
आखुपर्णीरसं खादेत् सताम्र क्रिमिशूलनुत् ॥२१४॥

अथ अग्नितुण्डरस ।—

रसगन्धाजमोदाना क्रिमिघ्नब्रह्मबीजयोः ।
एकद्वित्रिचतुःपञ्च-भागान् सविषतिन्दुकान् ॥२१५॥
सञ्चूर्ण्य मधुना सर्वं गुटिका क्रिमिनाशिनीम् ।
खादयित्वाऽनु तोयञ्च मुस्ताना क्रिमिशान्तये ॥२१६॥
उदराध्माननुत्यर्थं रसो ह्येष निगद्यते ।
अग्नितुण्डेति विख्यातः सर्वोदरगदापहः ॥२१७॥

अथ क्रिमिज्वरे आखुपर्णीप्रयोग ।—

आखुपर्णीकषायञ्च शर्करा पिब सर्वथा ।
क्रिमिज्वरोपशान्त्यर्थं खण्डामलकमत्ति वा ॥२१८॥

क्रिमिशूलहररसे—अजमोदा यमानी । फल त्रिफला इन्द्रयवो वा, अस्थि अस्थिसंहार तानि, फलास्थीनि त्रिफलामज्जा इत्यर्थो वा । चोरिणी "खिरुइ" इति प्रसिद्धम् । आखुपर्णी मूषिकपर्णी । अजमोदादि ताम्रान्त सर्वं तुल्यभागम् आखुपर्णीरसेन पिष्ट्वा वटी कार्य्या ॥ २१४ ॥

अग्नितुण्डरसे—क्रिमिघ्नब्रह्मबीजयो विडङ्गतण्डुल पलाशबीजयो । सविषतिन्दु-कान् विषमुष्टिभागसहितान्, अत्र विषतिन्दुकस्य षड्भागा ग्राह्या, यदुक्तं रसेन्द्रचिन्तामणौ—"रसगन्धाजमोदाना क्रिमिघ्नब्रह्मबीजयो । एकद्वित्रिचतु पञ्च तिन्दोर्बीजस्य षट् क्रमात् ॥" इति । तिन्दो विषतिन्दुकस्य । तत्र चाय क्रिमिघातिनी गुडिका इति प्रसिद्धम् । रसेन्द्रसारसङ्ग्रहे रसरत्नाकरे च योगोऽय विषतिन्दुकस्य पञ्च पलाशबीजस्य च षड्भागा इति भागवैषम्येण यथाक्रम "क्रिमिमुद्गररस" "कीटमर्दरस" च इति सज्ञान्तरेण दृश्यते ॥ २१५—२१७ ॥

आखपर्णीप्रयोगे—शर्करा प्रक्षेपविधया प्रयोज्या । खण्डामलक तन्त्रान्तरे अम्ल-पित्ताधिकारे लिखितम् ॥ २१८ ॥

अथ क्रिमौ पर्पटीप्रयोगोपदेशः।—

स जग्ध्वैव पर्पटीञ्च स्नुहीरसं पिवेदनु।
स्नुहीरसं विना कश्चिज्जन्तून् क्षेप्तुमर्हति ॥२१९॥

अथ क्रिमिशूलसंहारः।—

रसस्य निष्कमादाय गन्धकं तत्समं कुरु।
ताम्रं देहि तदर्द्धञ्च पञ्चाङ्गशाकवारिणा ॥२२०॥
मर्द्दयेदेकदिनं रात्रौ क्षिपेत्तत्रैव यत्नतः।
क्षीरिणीक्वाथमादाय तथा कुरु दिनान्तरे ॥ २२१॥
दत्त्वा लघुपुटं पञ्च जयपालान् विमर्दयेत्।
देहि गुञ्जाद्वयञ्चास्य साज्यं शूलच्छिदे तथा ॥२२२॥

अथ अजमोदादिवटिका।—

अजमोदा पलाशास्थि क्षीरिणी रसगन्धकम्।
आखुपर्णीरसं खादेत् सताम्रं क्रिमिशूलवान् ॥२२३॥

अथ सूतभस्मप्रयोगः।—

मधुमिश्रनिम्बपल्लव-सत्त्वयुतो यदा सूतः।
क्रिमिसङ्घातान्नाशयति त्रिभिरह्नोभिरसौ ॥२२४॥

क्रिमिरोगेऽपि अनुपानविशेषेण पर्पटीरसस्य उपयोगितामाह, स इति।—स क्रिमिरोगवान्। पर्पटीं पर्पटीरसं रक्तपित्ताद्यधिकारोक्तम्। जन्तून् क्रिमीन् ॥२१९॥

क्रिमिशूलसंहारे—तदर्द्धं गन्धकार्द्धम्। पञ्चाङ्गशाकवारिणा शाकवृक्षस्य पत्र-पुष्पादिपञ्चाङ्गक्वाथेन। तत्रैव शाकवारिण्येव। पञ्च जयपालान् पञ्चनिष्कमित-जयपालवीजानीत्यर्थः। शूलच्छिदे क्रिमिशूलनाशनाय ॥ २२०—२२२ ॥

अजमोदादिवटिकायाः—पलाशास्थि पलाशवीजम्। योगोऽयं "पलाशास्थि" इत्यत्र "फलाम्बौनि" इति पाठान्तरेण क्रिमिशूलहररसे प्रागेव प्रदर्शितः ॥२२३॥

सूतभस्मप्रयोगे—समधुनिम्बपत्ररसेन सूतः सूतभस्म इत्यर्थः। "मधुमिश्र निम्बवेल्ल पत्राणीन्द्रयवादपि। क्रिमिदोषान् नाशयति त्रिभिरेव दिनैस्तथा ॥" इति वा पाठः ॥ २२४ ॥

अथ क्रिमिहरो रसः ।—

शुद्धसूतश्चेन्द्रयवमजमोदा मनःशिला ।
पलाशबीजं तुल्यांशं देवदाल्या द्रवैर्दिनम् ॥२२५॥
मर्दयेत् भक्षयेन्नित्यमाखुकर्णीकषायकम् ।
सितायुतं पिबेच्चानु क्रिमिपातो भवत्यलम् ॥२२६॥

अथ कीटमर्दो रसः ।—

शुद्धसूतं शुद्धगन्धमजमोदो विडङ्गकम् ।
विषमुष्टिर्ब्रह्मबीजं क्रमादुत्तगुणं भवेत् ॥२२७॥
चूर्णयेन्मधुना लेह्यं निष्कैकं क्रिमिजिद्भवेत् ।
कीटमर्दो रसो नाम मुस्तातोयं पिबेदनु ॥२२८॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्यस्य कृतौ रसरत्नसमुच्चये विसर्प-कुष्ठश्वित्रक्रिमिचिकित्सा नाम विंशतितमोऽध्यायः ॥२०॥

क्रिमिहररसे—शुद्धसूतं रससिन्दूरमित्यर्थः । "तुल्यांशम्" इत्यत्र "गन्धञ्च" इति रसेन्द्रसारसङ्ग्रहोक्तपाठे—शुद्धसूतं शुद्धपारदम् । "आखुकर्णीकषायकम्" इत्यत्र रसरत्नाकरे "मुद्गपर्णीकषायकम्" तथा रसेन्द्रसारसङ्ग्रहे "शालपर्णीरसैः सह" इति पाठान्तरम् ॥ २२५।२२६ ॥

कीटमर्दरसे—ब्रह्मबीजं पलाशबीजं, भार्गीबीजमित्यन्ये । "क्रमादुत्तगुणम्" इति पाठः न मनोरमः, इतः पूर्वं गुणानुल्लेखात्, "क्रमाद्द्विगुणितम्" इति रसेन्द्र-सारसङ्ग्रहधृतः तथा "क्रमोत्तरगुणम्" इति रसरत्नाकरधृतो वा पाठोऽत्र युज्यते । क्रमोत्तरगुणम् उत्तरोत्तरभागवृद्धमित्यर्थः । अयमेव योगः एकद्व्यादिभागनिर्देशेन प्राक् अग्नितुण्डरसनाम्ना प्रदर्शितः ॥ २२७ २२८ ॥

इति रसरत्नसमुच्चयबोधिन्यां विंशोऽध्यायः ॥ २० ॥

अथैकविंशोऽध्यायः ।

अथ वातव्याध्यादिचिकित्सनम् ।—

अथ महारोगनामानि ।—

वातव्याध्यश्मरीकुष्ठ-मेहोदरभगन्दराः ।
अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः ॥१॥

अथ शीतवातलक्षणम् ।—

तत्रानेकानिलगदाः शीतवातादयः स्मृताः ।
हिमवन्ति हि गात्राणि रोमाञ्चस्फुरितानि च ॥
शिरोऽक्षिवेदनाऽऽलस्य शीतवातस्य लक्षणम् ॥२॥

अथ वातारिः ।—

रसभागो भवेदेको गन्धको द्विगुणो मतः ।
त्रिभागा त्रिफला ग्राह्या चतुर्भागश्च चित्रकः ॥३॥
गुग्गुलः पञ्चभागः स्यादेरण्डस्नेहमर्दितः ।
स्निग्धाऽत्र पूर्वकं चूर्णं पुनस्तेनैव मर्दयेत् ॥४॥

क्रिमिलक्षणे समविष्टम्भादेर्वातकार्य्यस्य दर्शनात् क्रिम्यनन्तरं वातव्याधिचिकित्सितं विवक्षुरादौ वातव्याधेरष्टमहारोगान्तर्गतत्वेन तेषां महारोगाणां नामान्याह, वातव्याधीति ।—महत्त्वञ्चैषां चिरकालानुबन्धित्वात् दुःखातिशय्यजनकत्वाच्च ॥ १ ॥

तेषु शीतवातस्य लक्षणमाह, तत्रेति ।—तत्र वातव्याधिषु । रोमाञ्चस्फुरितानि रोमाञ्चेन रोमहर्षेण सह स्फुरितानि स्फुरणानि स्पन्दनानीत्यर्थः । "रोमाञ्चस्फुरितानि" इत्यत्र "रोमाणि स्फुरितानि" "रोमाञ्चज्वरितानि" इति च पाठान्तरद्वयम् ॥ २ ॥

वातारौ—त्रिभागा इति मिलितायास्त्रिफलाया भागत्रयम्, उक्तञ्च रसरत्नाकरे—"पञ्चेति सङ्ख्याकरणात् त्रिफला एकभागका" इति । एकभागका प्रत्येकमेकभाग इत्यर्थः । पूर्वकं चूर्णं रसादिचित्रकान्तं चूर्णम् । रसरत्नाकरे तु—

गुटिका कर्षमात्रान्तु भक्षयेत् प्रातरेव हि।
नागरैरण्डमूलानां क्वाथं तदनु पाययेत् ॥५॥
अभ्यज्यैरण्डतैलेन स्वेदयेत् पृष्ठदेशकम्।
विरिक्ते तेन सञ्जाते स्निग्धमुष्णञ्च भोजयेत् ॥६॥
वातारिसञ्ज्ञको ह्येष रसो निर्वातसेवितः।
मासेन सुखयत्येव ब्रह्मचर्य्यपुरःसरम् ॥७॥

अथ विजयागुटिकाप्रयोगोपदेशः।—

विजयागुटिकां रात्रौ स्वल्पमात्राञ्च भक्षयेत् ॥८॥

अथ शीतारिः।—

रसेन गन्धं द्विगुणं प्रगृह्य पुनर्नवावह्निरसैर्विमर्द्य।
पक्वार्कपत्रोत्थरसेन पश्चाद्विपाचयेदष्टगुणेन यत्नात् ॥९॥
रसार्द्धभागेन विषञ्च दत्त्वा विपाचयेद्वह्निजले. चूर्णं तत्।
शीतारिसञ्ज्ञो हि रसोऽयमस्य वल्लं तदर्द्धं यदि-वाऽऽर्द्रकेण ॥१०॥
मरीचचूर्णेन घृतप्लुतेन सेवेत मासं सघृतञ्च पथ्यम् ॥११॥

"स्निग्धाऽव •मर्दयेत" इत्यत्र "पुन्नागबृहतीयुग्म देवदारु सुचूर्णितम्। एतत पूर्वौषधि-सम मर्दयेत् यामसात्रकम् ॥" इति पाठ दृश्यते। तेनैव एरण्डस्नेहेनैव। आदौ एरण्डतैलेन गुग्गुलु पिष्ट्वा पश्चात् रसादिक दत्त्वा मर्दयेदिति ॥ ३—७ ॥

रोगेऽस्मिन् अधिकारान्तरोक्तमगदमुपदिशति, विजयेति।—विजयागुटिका पाण्डु-रोगाधिकारोक्ता ॥ ८ ॥

शीतारौ—वह्नि चित्रक। पक्केति।—परिणतत्वात् पीताभार्कपत्ररसेन विपाचयेत् इत्यस्य मृत्पात्रे द्रवक्षय यावत पचेदित्यर्थ। अष्टगुणेन इति रसगन्ध-भागापेक्षया इति मन्तव्यम्। वह्निजले चित्रकमूलक्वाथे। तदर्द्धं वल्लार्द्धम्, "वल्ल तदर्द्धं यदि वाऽऽर्द्रकेण" इत्यत्र "वल्लञ्च सार्द्ध मरिचार्द्रकेण" इति रसेन्द्र-सारपाठदर्शनात वल्ल तदर्द्धञ्च सार्द्धवल्लमित्यर्थ। यदि-वा शब्द मरिचचूर्णेन सम्बध्यते, यदि वा अथवा इत्यर्थ। "मासम्" इत्यत्र "मासम्" इति रसेन्द्रसारे पाठ। एष क्रम,—द्विगुणगन्धक रस पुनर्नवाचित्रकक्वाथाभ्यां मर्दयित्वा गोल कुर्य्यात्, तत. तं पिण्ड मृत्खोलके संस्थाप्य अष्टगुणेन परिणत-

अथ स्पर्शवातलक्षणम्।—

अङ्गेषु तोदनं प्रायो दाहः स्पर्शं न विन्दति।
मण्डलानि च दृश्यन्ते स्पर्शवातस्य लक्षणम्॥१२॥

अथ सर्वेश्वर।—

कर्षमात्र रसस्य स्याल्लोहहिङ्गुलयोरपि।
भास्वद्गगनयोश्चात्र गन्धकस्य पल मतम्॥१३॥
व्योषगन्धकताम्राणां प्रत्येकन्तु पलं पलम्।
निम्बुद्रावेण सम्मर्द्य भावयेत् सप्तधा पृथक्॥१४॥
हैमार्कस्नुक्पयोवासा-हयारिविषमुष्टिभिः।
पिण्डितं वालुकायन्त्रे स्वेदयेद्दिवसद्वयम्॥१५॥
कर्षमात्रन्तु पिप्पल्या निष्कमात्र विषस्य च।
सञ्चूर्ण्य दापयेदत्र सर्वेश्वररसाख्यके॥
गुञ्जामात्रं ददीतास्य स्पर्शवातापनुत्तये॥१६॥

अथ अर्केश्वर।—

रसेन गन्धं द्विगुणं प्रमर्द्य ताम्रस्य चक्रेण सुतापितेन।
आच्छाद्य भूत्या तु ततः प्रयत्नाच्चक्रोविलग्नन्तु रस प्रगृह्य॥१७॥

पीतवर्णार्कपत्ररसेन आद्रवक्षयात् पचेत्, एकीभूते चार्कपत्ररसे अवतार्य्य रसार्द्धमान् विष दत्त्वा मर्दयेत, तत भूयोऽपि किञ्चिच्चित्रकमूलक्वाथेन क्षण पक्त्वा अवतार्य्य स्थापयेदिति। क्वचिदेतच्छ्लोकात् प्राक् "रस पुनर्नवरसैर्विमर्द्य त्रिकगन्धकं। पचेत् पक्वार्कपत्रोत्थ-रसैर्यत्नाद्विमृद्य च॥" इत्यधिकपाठ॥ ९—११॥

वातव्याधिभेदस्य स्पर्शवातस्य लक्षणमाह, अङ्गेष्विति।—तोदन सूचीविद्धवत् वेदनाविशेषः। स्पर्शवातस्य स्पर्शे त्वचि वात, तस्य स्पर्शानभिज्ञतारूपस्य सुप्तिवातस्येत्यर्थ॥१२॥

सर्वेश्वरे—रसादीना गगनान्ताना प्रत्येक कर्ष। भास्वदिति।—भास्वान् ताम्रम्। गगनम् अभ्रम्। अत्र गन्धकताम्रयोर्द्विरुक्तत्वात् गन्धकस्य पलद्वय, ताम्रस्य च सपाद-पलमानता बोद्धव्या। व्योषस्य च प्रत्येक पलमानता, निर्देशस्य मानप्राधान्यात्। हैम धुस्तूर, तस्य पत्ररसोऽत्र इष्ट.। हयारि, करवीर., तस्य मूलम्॥१३—१६॥

विचूर्ण्य तद्द्वादशधाऽर्कदुग्धे पुटेत वह्नित्रिफलाजलैश्च ।
सम्भावितोऽर्केश्वर एष सूतो गुञ्जाद्वयञ्चास्य फलत्रयेण ॥१८॥
ददीत मासत्रितयेन सुप्त-वातादिमुक्तो हि भवेद्धिताशी ॥१९॥

अथ तारादिगुडिका ।—

तारं रसेनाष्टगुणं जयांशं विमर्द्य यत्नाद्गुलिकां गुडेन ।
निबध्य तां सेवय मासयुग्मं दिनोदये स्पर्शविकारनुत्त्यै ॥२०॥

अथ स्पर्शवाते राजवृक्षप्रयोगः ।—

मूलं पिबेद्राजतरोः शरीरं मासद्वयं तेन विलेपयेत ॥२१॥

अथ स्पर्शवाते चक्रमर्दादि ।—

यद्वा सुचूर्णीकृतचक्रमर्द-वीजं सुगोमूत्रपरिप्लुतञ्च ।
अर्कस्नुहीक्षीरनिशाद्वयेन युक्तं भजेन्मण्डलनाशनाय ॥२२॥

अर्केश्वरे—चक्रेण चक्राकारक्षुद्रभाजनविशेषेण । सुतापिनेन इति अग्निसम्पर्कात्, सन्तापनञ्च रसगन्धकसङ्ग्रहणार्थं शक्तिविशेषाधानार्थञ्च मन्तव्यम । भूत्या भस्मना । आच्छाद्य इति चक्रेण भूत्या इत्युभयत्रापि सम्बध्यते । अयमर्थः,—कज्जलिकाम् अग्नि-प्रतप्तेन ताम्रचक्रेण आच्छाद्य तदुपरि भस्मावरणं दद्यात, तेन च सा कज्जलिका ताम्रचक्रे सक्ता भवेत, ततः तां कज्जलिकां ताम्रपात्रादाकृष्य चूर्णयित्वा च अर्कक्षीरेण मर्दयित्वा द्वादशवारान् गजपुटे पचेत, अनन्तरं चित्रकमूलत्रिफलाक्वाथेन सप्तधा भावयित्वा गुञ्जाद्वयमिता वटी कुर्य्यादिति ॥ १७—१९ ॥

तारादिगुडिकायां—तारं रौप्यं, तच्च रसभागापेक्षया अष्टगुणम् । रसेनेति ।—रसशब्देनात्र रससिन्दूरं ग्राह्यं । जयांशं जया विजया तस्याः अंशं भागं तार-भागमित्यर्थः, जयायाः अंशः चतुर्थो भागः यत्र तादृशमिति वा, तारापेक्षया पादिक-विजयाचूर्णम् । गुडोऽत्र गुडिकाकरणोपयोगी देयः । "तारम्" इत्यत्र "तालम्" इति पाठे—तालं रसेन, तुल्यमिति शेषः । जयांशं विजयाभागम् अष्टगुणं, रसापेक्षयेति शेषः, तथा च रसेन्द्रसारे रसेन्द्रचिन्तामणौ च—"एकभागो रसस्य स्यात शुद्धतालैक-भागिकः । अष्टौ सुविजयायाश्च गुडिका गुडतश्चरेत ॥ एकैकां भक्षयेत प्रातश्छायाया-मुपवेशयेत । तालकेश्वरनामायं योगश्चास्पर्शनाशनः ॥" इति । दिनोदये प्रत्यूषे ॥२०॥

राजवृक्षप्रयोगे—राजतरोः आरग्वधस्य । तेन राजतरुमूलकल्केन ॥ २१ ॥

चक्रमर्दादौ—यद्वा शब्दः पूर्वयोगापेक्षया, ततश्च मण्डलनाशनाय राजतरोर्मूल

अथ स्पर्शवातान्तकवटिका।—

अष्टौ भागा रसस्य स्युर्विषतिन्दोर्दशैव च।
गन्धकस्य दश द्वौ च कटुत्रिफलयोस्त्रयः॥ २३॥
वह्निचित्रकमुस्तानां वचाऽश्वगन्धयोरपि।
रेणुकाविषकुष्ठानां पिप्पलीमूलनागयोः॥ २४॥
एकैकस्तु भवेद्भाग इत्याद्यायास्तथैव च।
चतुर्विंशद्गुडस्यात्र वटिका चणकाकृतिः॥
क्रमेणैवानुसेवेत स्पर्शवातापनुत्तये॥ २५॥

अथ अस्पर्शवातारितैलम्।—

त्रिगन्धकं तुत्थकमश्वगन्धा-ह्यारिनागाशितिवायसीनाम्।
मूलानि सञ्चूर्ण्य सुभाण्डके च तैलं क्षिपेत्तेन चतुर्गुणेन॥ २६॥

पिबेत चक्रमर्दबीजादिकं वा गोमूत्रेण पिबेदित्याशयः। मण्डलनाशनाय स्पर्शवात-लक्षणोक्तमण्डलचिह्नापनोदनाय॥ २२॥

स्पर्शवातान्तकवटिकायाम्—गन्धकस्य दश द्वौ च इति द्वादशभागा इत्यर्थः। कटुत्रिफलयोस्त्रय त्रिकटोस्त्रिफलायाश्च पृथक् पृथक् भागत्रयम्। वह्नि भल्लातकं, वह्न्यादिपञ्चानामपि प्रत्येकं भागत्रयम्, अपि शब्दप्रयोगसामर्थ्यात्। नागः नागकेशरं, रेणुकादीनां पञ्चानां प्रत्येकमेकैकभागः। क्वचिदेतदनन्तरं—"पञ्चार्कतैलम्। मूलैः सपुष्पैः फलपत्रसारैरर्कस्य निष्पीड्य रसाढके तु। भूपालका-वह्निपुनर्नवानां तुरङ्गगन्धाऽऽत्तंगलस्य मूलम्॥ निर्गुण्डिकायाश्च तथैव पृष्ठे मूलानि पिष्ट्वा पृथगाददीत। एला लवङ्गं तगरञ्च कुष्ठं ससैन्धवं कर्षमितं पृथक् स्यात्॥ स्नुक्क्षीरपिष्टाजपयो द्विभागं प्रस्थेन तैलस्य पचेद्धि पक्वम्। पञ्चार्कतैलं प्रवदन्ति तज्ज्ञा श्रोणिगतान् सन्धिगतान् निहन्ति॥ अभ्यञ्जनैश्च त्रिभिरेव सद्यो वाताश्च वेगास्त्रिरजानशीति॥ द्वितीयपञ्चार्कतैलम्। पाठान्तरम—अर्कद्वयस्य पञ्चाङ्ग-माढके विपचेज्जले। चतुर्गुणे वह्निसिन्धु-निर्गुण्ड्यानि च पीलुकम्॥ वर्षाभूवाजि-गन्धार्त्तगलं तेषां पृथक् पृथक्। स्नुक्क्षीरं कुडवं दत्त्वा शनैर्मन्दाग्निना पचेत्॥ एतदभ्यञ्जनेनैव निहन्यादाशु सन्धिगान्। स्पर्शवातोत्थरोगांश्च कटीपार्श्वगतास्तथा॥ ब्रुवन्ति तज्ज्ञा पञ्चार्कं तैलं श्रेष्ठं समीरनुत्॥" इत्यधिकपाठः॥ २३—२५॥

अस्पर्शवातारितैले—त्रिगन्धकं त्रिजातकम्, यदुक्तं राजनिघण्टौ—"त्वगेला-

पक्वार्कपत्रोत्थरसेन पश्चाद्विपाचयेदष्टगुणेन यत्नात् ।
अस्पर्शवाताय भवेद्धि तैलं विलेपयेत्तेन च तत् प्रदेशम् ॥२७॥

अथ अस्पर्शवाते त्रिगन्धप्रयोगः ।—

ह्रियावलीक्वाथविपाचितञ्चाप्यस्पर्शनाशाय ददेत्त्रिगन्धम् ॥२८॥

अथ अस्पर्शवाते ह्रियावलीप्रयोगः ।—

ह्रियावलीकन्दविलेपनाच्च अस्पर्शदेशं क्षरमेति यत्नात् ।
यवानिकासिद्धघृतेन पश्चादस्पर्शनाशाय विलेपयेत ॥२९॥

अथ अस्पर्शवाते अर्कदुग्धप्रयोगः ।—

अर्कोत्थदुग्धेन विलेपनाच्च स्फोटीभवेत्तस्य ततः प्रदेशः ।
घृतेन चोक्तेन विलेपनाद्वा स्पर्शो लयं याति च तत्क्षणेन ॥३०॥

अथ अस्पर्शवाते हल्यादिलेपः ।—

यद्वा हलीशूरणकं सिताश्चास्पर्शातकः स्यात् खलु लेपनेन ॥३१॥

पत्रकैस्तुल्यैस्त्रिसुगन्धि त्रिजातकम्" इति, त्रिभागगन्धकं वा, श्वेतादिभेदेन त्रिविध-गन्धकं वा, शिलातालगन्धकरूपं वा। हयारिः करवीरकम्। नागा नाकुली, रास्नाभेद इत्यर्थः। शितिः भूर्जत्वक्। वायसी काकमाची। तेन तैलेन। चतुर्गुणेन इति त्रिगन्धकादिकल्कापेक्षया चतुर्गुणेन "कल्कस्तु स्नेहपादिकः" इति वचनात्। विपाचयेत् इत्यत्र त्रिगन्धकादिद्रव्यजातमिति शेषः। अष्टगुणेनेति तैलापेक्षया ॥ २६।२७ ॥

त्रिगन्धप्रयोगे—ह्रियावली देशान्तरप्रसिद्धः लताविशेषः, "ह्रियावली" इत्यत्र "हिमावली" इति पाठकल्पना सुगमार्था, एष चार्थः प्रागेव प्रतिपादितः। अस्पर्श-नाशाय सुप्तिवातनाशाय। लेपयोगोऽयम् ॥ २८ ॥

ह्रियावलीप्रयोगे—क्षरं क्षयमित्यर्थः। यवानिकेति।—यवानिका यमानी तत्कल्कसिद्धेन घृतेन, जलञ्चात्र चतुर्गुणं पाकार्थं देयम्। पश्चात् ह्रियावलीकन्द-विलेपनानन्तरमित्यर्थः ॥ २९ ॥

अर्कदुग्धप्रयोगे—स्फोटीभवेत् स्फोटयुक्तो भवेत। ततः स्फोटीभवनानन्तरम्। प्रदेशः अस्पर्शदेशः। घृतेन चोक्तेन यवानिकासिद्धघृतेनेत्यर्थः। अत्र वा-शब्दः ह्रियावलीकन्देत्यादिनोक्तपूर्वयोगापेक्षया बोध्यः। स्पर्शः स्पर्शवातः ॥ ३० ॥

हल्यादिलेपे—हली लाङ्गलिका। सिता सितशर्करा सोमराजी वा। अस्पर्शा-तकः अस्पर्शाय स्पर्शवाताभावाय अतति गच्छति इति तथाभूतः ॥३१ ॥

अथ अस्रग्वाते रसेन्द्रलेप ।—

आदौ शिरामोक्षणतो रसेन्द्रं विलेपनञ्चापि नियोजयन्ति ॥३२॥

अथ गन्धाश्मगर्भरस ।—

गन्ध रसेनाष्टगुणं विमर्द्य कृशानुतोयेन विपाचयेत ।
मृद्वग्निना लोहमयेऽथ पात्रे विषेण पश्चादपि सिद्धिमेति ॥३३॥
गन्धाश्मगर्भो हि रसोऽस्य सर्वास्रपशप्रशुत्यै भज वल्लयुग्मम् ।
सक्षीरमन्न सघृतञ्च भोज्यं वर्ज्यञ्च सर्वं परिवर्जनीयम् ॥३४॥

अथ द्वितीयगन्धाश्मगर्भरस ।—

गन्धक चूर्णित कृत्वा सूक्ष्मवस्त्रेण बध्य च ।
भाण्डे गोदुग्धक दत्त्वा प्रावृत खर्परेण च ॥३५॥
अग्नि प्रज्वालयेदूर्द्ध्वं पश्चाच्छीत समुद्धरेत् ।
गन्धकाष्टकभागेन रस दत्त्वाऽथ पाचयेत् ॥३६॥
मृद्वग्निना शीतभूमावुत्तार्योत्तार्य्य यत्नतः ।
यावद्गन्धकरूपस्य पूर्वस्य ह्यन्यथा भवेत् ॥३७॥
सप्तगुञ्ज ददीतास्य यावत् स्यादेकविंशतिः ।
प्रत्यहन्तु हरीतक्या गुञ्जा देयैकविंशतिः ॥३८॥

रसेन्द्रलेपे—शिरामोक्षणत शिरामोचण कृत्वा । रसेन्द्र पारद, स च भस्मीकृतो ग्राह्य ॥ ३२ ॥

गन्धाश्मगर्भरसे—कृशानुतोयेन चित्रकमूलक्काथेन । विषेण इत्यत्र योजयेदिति शेष , विषञ्च रसतुल्य ग्राह्यम् ॥ ३३।३४ ॥

द्वितीयगन्धाश्मगर्भरसे—बध्य इति प्रयोगश्चिन्त्य । प्रावृतमित्यत्र कुर्य्यादिति शेष । खर्परेण शरावेणेत्यर्थ । उत्तार्य्य अवतार्य्य । अयमर्थ ,—नूतनस्थाल्या गोदुग्ध दत्त्वा घृताक्तवस्त्रखण्डेन तन्मुखमावृत्य वस्त्रोपरि गन्धकचूर्णं स्थापयेत, तत सुसूक्ष्म द्वितीय वस्त्रखण्ड गन्धकोपरि दत्त्वा बध्नीयात, अथ शरावेण आच्छाद्य स्थाली ता भूमौ निखन्य च उपरिष्टात् पुट दद्यात, शीतीभूतञ्च तम् उद्धृत्य अष्टभागेन रसेन सह मर्दयित्वा मृद्वग्निना लौहपात्रे पाचयेत्, अन्तराऽन्तरा शीतलमृत्तिकायामवतारयेच्च, एव गन्धकस्य स्वरूपविपर्य्यय यावत कुर्य्यात । तत सप्तगुञ्जामारभ्य क्रमवृद्ध्या एकविंशतिगुञ्जा यावत् त रस हरीतकीचूर्णस्यैकविंशत्या गुञ्जाभिः

सक्षीरं सघृतञ्चान्नं भोजयीत सशर्करम् ।
निर्वाते चावतिष्ठेत कम्पस्यशापनुत्तये ॥
गन्धाश्मगर्भसञ्ज्ञोऽयं योगिभिः परिकीर्त्तितः ॥३९॥

अथ अस्थिशारिरसः ।—

पलाशबीजोत्थरसेन सूतं गन्धेन युक्तं त्रिदिनं विमर्द्य ।
श्लक्ष्णीकृते तद्विषमुष्टिबीजं संयोजनीयञ्च कलाप्रमाणम् ॥४०॥
मासत्रयं निष्कमितं प्रयत्नादस्थ्यग्नसन्धौ खलु सेवयेत्तत् ॥४१॥

अथ रक्तवातलक्षणम् ।—

पादयोश्च भवेत्तापः श्वयथुश्च प्रजायते ।
रक्तच्छाया शरीरे च रक्तवातस्य लक्षणम् ॥४२॥

अथ रक्तवातचिकित्सा ।—

अथ हरीतक्यादिचूर्णम् ।—

त्रियोनिरसगुञ्जैका प्रथमं दापयेद्भिषक् ।
हरीतक्यामलक्यौ च गुडूचीं कटुका तथा ॥
पञ्चाङ्गानि च निम्बस्य चूर्णयित्वा च पाययेत् ॥४३॥

बहु सेवेतेति । रसेन्द्रचिन्तामणि रसरत्नाकरयोः "त्रिगुणाख्यरस" रसेन्द्रसारे च "द्विगुणाख्यरस" इति नाम्ना प्रसिद्धोऽयं, तत्र च हरीतकीचूर्णं रसगन्धकतुल्यमादौ मिश्रयित्वा पश्चात सप्तगुञ्जामारभ्य सेवनोपदेशः । रसेन्द्रसारे तु अष्टभागगन्धकस्थले "गन्धकात द्विगुण सूतम्" इति पाठो दृश्यते ॥ ३५—३९ ॥

अस्थिशारिरसे—सूतगन्धयोः समभागता । तदित्यव्ययं, तस्मिन्नित्यर्थः । कलाप्रमाणं षोडशांशम्, तत्तु एकभागापेक्षया बोध्यम् । "मासत्रयम" इत्यत्र "मासद्वयम्" इति रसेन्द्रसारसङ्ग्रहे पाठ, तत्र च पलाशादिवटीति सञ्ज्ञावानयम ॥ ४०।४१ ॥

वातव्याधिविशेषत्वात् तदनन्तरं वातरक्तविशेषस्य रक्तवातस्य चिकित्सितं विवक्षुरादौ तल्लक्षणमाह, पादयोरिति ।—पादयोस्तु तापः दुष्टरक्तस्यादौ पादयोरेव सञ्चयात ज्ञेय । श्वयथु सर्वगात्रे एवेति बोद्धव्यम् । रक्तच्छाया रक्तकान्तिः, रक्तमण्डलमित्यर्थः ॥ ४२ ॥

हरीतक्यादिचूर्णे—त्रियोनिरसः कामलाधिकारोक्तः रसविशेषः, तस्यैका गुञ्जा । आदौ त्रियोनिरसं पाययित्वा पश्चात् हरीतक्यादिकं पाययेदिति ॥ ४३ ॥

अथ कोकिलाचादिकषाय ।—

कोकिलाचस्य मूलानि गुडूचीनागरं तथा ।
क्वाथयित्वा रजन्यान्तु पाययेदतिशीतलम् ॥४४॥

अथ सशोधनोपदेश ।—

अग्रे शिराविमोचार्थं यवचिञ्चाविरेचनम् ।
वान्तिमङ्कोलबीजेन देवदालीजलेन वा ॥४५॥

अथ रक्तवाते अपथ्यम् ।—

शूरण माषवृन्ताक राजिकादि विवर्जयेत् ॥४६॥

अथाऽऽमवातलक्षणम् ।—

कट्यां व्यथा भवेन्नित्यं सन्धिषु श्वयथुर्भवेत् ।
उत्थानेऽप्यसमर्थत्वमामवातस्य लक्षणम् ॥४७॥

अथामवातचिकित्सा ।—

अथ आमवाते वातारिरसप्रयोगोपदेश ।—

एरण्डतैलसंयुक्तं वातारिरसमेव च ।
आमवातप्रशान्त्यर्थं दद्यात्तोष्णेन वारिणा ॥ ४८॥

कोकिलाचादिकषाये—अतिशीतलमिति क्वाथमेव अतिशीतल कृत्वा पाययेत्, उष्णेन रक्तस्य प्रकोपातिशय्यभयात ॥ ४४ ॥

सशोधनोपदेशे—यवचिञ्चाविरेचन यवचिञ्चा यवतिक्ता, द्रव्यगुणे अस्या रेचकत्व-श्रुते, तया विरेचन, देयमिति शेष । शिराविमोचणात प्राक् वमनविरेचने कारयेदिति निष्कर्ष ॥ ४५ ॥

रक्तवाते वर्जनीयान्याह, शूरणमिति ।—राजिकादि इत्यत्र आदिपदेन मूलक-निष्पावादीना ग्रहणम् ॥ ४६ ॥

पूर्वोक्तसङ्गत्या रक्तवातानन्तरमामवातचिकित्सित विवर्णिषुरादौ तल्लक्षणमाह, कट्यामिति ।—सुगमम् ॥ ४७ ॥

आमवाते अधिकारान्तरोक्तमौषधविशेषमुपदिशति, एरण्डेति ।—वातारिरस कुष्ठौ वातव्याधौ च उक्तम् । तन्तु आदौ एरण्डतैलेनामर्द्य उष्णेन वारिणा पिबेदिति ॥ ४८ ॥

अथ अनिलारियोग ।—

आमानिलस्यास्य रसोऽनिलारिश्चैरण्डतैलेन सकौशिकेन ।
कटुत्रयेणापि सगन्धकेन वल्लैकमान परिषेवयेत ॥४९॥

अथ आमवाते एरण्डतैलप्रशंसा ।—

आमवातगजेन्द्रस्य शरीरवनचारिणः ।
एक एवाग्रणीर्हन्ता एरण्डस्नेहकेसरी ॥ ५० ॥

अथापस्मारलक्षणम् ।—

मूर्च्छा शरीरस्य भवेदकस्मात् गात्रेषु कम्पश्च मुखे च फेनः ।
एवन्त्वपस्मारगदं विदित्वा नियोजयेत् पर्पटिकाख्यसूतम् ॥५१॥

अथापस्मारचिकित्सा ।—

अथ अपस्मारे पर्पटीरसस्य प्रयोगविधि ।—

पर्पटीरसगुञ्जे द्वे ब्राह्मीरससमन्विते ।
खादयेद्रोगिणे वैद्योऽपस्मारानिलशान्तये ॥५२॥

अथ ब्राह्म्यादिनस्यम् ।—

ब्राह्मीशुण्ठीवचाकुष्ठ नीलोत्पलससैन्धवम् ।
पिप्पलीमपि सञ्चूर्ण्य ब्राह्मीद्रावेण भावयेत् ॥५३॥

अनिलारियोगे—अनिलारिरस प्रागुक्त वातारिरस, रसेन्द्रसारोक्त अनिलारि-रसो वा। सकौशिकेन गुग्गलुसहितेन। सकौशिकेन सगन्धकेन सकटुत्रयेण एरण्डतैलेन वल्लैकमानम अनिलारिरस परिषेवयेत, एवञ्च अयमनिलारिरस अस्यामानिलस्य, हन्ता भवेदिति शेष, इति योजना कार्या ॥ ४९ ॥

आमवाते एरण्डतैलस्य विशेषेणोपयोगितामाह, आमवातेति ।—स्पष्टम् ॥५०॥

मूर्च्छानिद्रानाशादिलक्षणसाधर्म्यात "स कष्ट सर्वरोगाणा यदा प्रकुपितो भवेत" इति वचनेन तस्यापि अपस्मारवत कदाचित वेगकारित्वसाधर्म्याच्च आम-वातानन्तरमपस्मारप्रारम्भ । तत्रादौ तस्य लक्षणमाह, मूर्च्छेति।—शरीरस्य मूर्च्छा इन्द्रियमोह इत्यर्थ , मूर्च्छया भूमिपातादिरित्यर्थो वा। पर्पटिकाख्यसूत पर्पटीरसम्, स च "रस द्विगुणगन्धेन" इत्यादिना रक्तपित्ताधिकारे प्रदर्शित ॥ ५१ ॥

"नियोजयेत पर्पटिकाख्यसूतम्" इत्युक्तम्, अतस्तस्य प्रयोगविधिमाह, पर्पटीति ।—स्पष्टम् ॥ ५२ ॥

सप्तधा नवनीतेन पचेत् त्रिधा घृत शुचौ ।
वराहकर्णरक्तेन कर्कोट्या नस्यमाचरेत् ॥५४॥

अथ गवाक्ष्यादिनस्यम् ।—

शुष्कां गवाक्षीमादाय घृष्टं कांस्यञ्च कम्बलम् ।
गोघृतेनाऽऽयसे पिष्ट्वाप्यागते नस्यमाचरेत् ॥५५॥

अथ श्वेतापराजितादिनस्यम् ।—

श्वेतापराजितावीजं विजयावीजमेव च ।
नरमूत्रेण सम्पिष्य नस्यं दद्याज्ज्ञिषग्वरः ॥ ५६ ॥

अथ अपस्मारहरनस्यम् ।—

उन्मत्तकशुनोऽस्थीनि घृष्ट्वा तेनैव वा कुरु ॥५७॥

अथ अपस्मारहरो योगः ।—

श्वेतापराजितामूलं कर्णे बद्ध्वा सदा बुधः ।
निर्गुण्डीमूलकं जग्ध्वा ह्यपस्माराद्विमुच्यते ॥५८॥

अथोन्मादलक्षणम् ।—

बहु कृत्वा प्रलापैश्च विस्मृतिः कार्य्यवस्तुषु ।
हन्ति धावति सर्वत्रोन्मादवातस्य लक्षणम् ॥५९॥

ब्राह्म्यादिनस्ये—सप्तधा इति पदं ब्राह्मोद्रावेण नवनीतेन च इति द्वाभ्यामेव सम्बध्यते । पचेदिति ।—मर्दनानन्तरं किञ्चित् घृतं दत्त्वा शुचौ पात्रे लघु पचेत्, ततः आदाय विचूर्ण्य च वराहकर्णरक्तेन तथा कर्कोट्या ढेवताडिन, घोषकविशेषेण सह्रेत्यर्थ, नस्यं दद्यादिति ॥ ५३। ५४ ॥

गवाक्ष्यादिनस्ये—गवाक्षी गोरक्षकर्कटी । कांस्यं कांस्यखण्डम् । एवमायसमपि । कम्बलम् ऊर्णालोम । आगते अपस्मारवेगे उपस्थिते । गवाक्ष्यादित्रयं यथाक्रमं गोघृतेन सह कांस्ये लौहे च भाजने घृष्ट्वा वेगोपस्थितौ नस्यं दद्यादिति ॥ ५५ ॥

श्वेतापराजितादिनस्ये—सर्वं सुगमम् ॥ ५६ ॥

अपस्मारहरनस्ये—उन्मत्तकशुनोऽस्थीनि क्षिप्तकुकुरास्थीनि । तेनैव नरमूत्रेणैवेत्यर्थः । कुरु, नस्यमिति शेषः ॥५७॥

अपस्मारहरयोगे—श्वेतापराजितामूलं कर्णे बद्ध्वा निर्गुण्डीमूलञ्च जग्ध्वा इत्येवं योजनीयम् ॥ ५८ ॥

मनोदुष्टिसाधर्म्यादपस्मारानन्तरमुन्मादप्रारम्भः । तत्र उन्मादलक्षणमाह,

अथ उन्मादचिकित्सा ।—

अथ उन्मादे पर्पटीरसस्य प्रयोगविधि ।—

पर्पटीरसगुञ्जाष्टौ धुस्तूरबीजपञ्चकम् ।
गोघृतेन च संयोज्य खादेदुन्मादशान्तये ॥६०॥

अथ उन्मादे उपचारविशेषा ।—

सघृत माषमण्डं वा पाययेद्घृतदुग्धकम् ।
निम्बतैल समुद्धृत्य स्वभ्यज्याऽऽपादमस्तकम् ॥६१॥
गुर्वन्न प्रायशो दद्यात्कुष्माण्डशाकञ्च वर्जयेत् ।
बद्धाऽपि रक्षयेत्तावद्यावच्छान्तिं स गच्छति ॥६२॥

अथ माहेश्वरो धूप ।—

माहेश्वराख्यधूपञ्च दापयेत् सतत निशि ।
श्रीवेष्टं दारु वाह्लीकं मुस्ता कटुकरोहिणी ॥६३॥
सर्षपा निम्बपत्राणि मदनस्य फल वचा ।
बृहत्यौ सर्पनिर्मोक कार्पासास्थि यवास्तुषा ॥६४॥
गोशृङ्ग खररोमाणि बर्हिपिच्छं विडालविट् ।

वह्निति ।—प्रलापे, उपलक्षित इति शेष । "प्रलापेच" इत्यत्र "प्रलापश्चेत्" इति पाठान्तर सुगम । हन्ति जनान्तरमात्मान वा ताडयति ॥ ५९ ॥

पर्पटीरसस्य प्रयोगविधौ—पर्पटीरसगुञ्जाष्टौ इति रसपर्पटिकाया रक्तपित्ताधिकारोक्ताया अष्टौ गुञ्जा । रसेन्द्रसारे "उन्मादपर्पटीरस" इति नाम्ना अभिहितोऽयम् ॥ ६० ॥

उन्मादे उपचारविशेषानाह, सघृतमिति ।—माषमण्ड माषतण्डुलकृत चतुर्दशगुणाम्बुसाधित यवागूविशेष, न तु केवलमाषसाधित, शूकधान्य विना मण्डत्वासम्भवात । घृतदुग्धक सघृत दुग्धम् । समुद्धृत्य तैलपीडनचक्रात् तत्क्षणमेव गृहीत्वेत्यर्थ. । निम्बतैलेनापादमस्तक स्वभ्यज्य सघृत माषमण्ड घृतदुग्धक वा पाययेदित्यन्वय ॥६१।६२॥

माहेश्वरधूपे—श्रीवेष्ट नवनीतखोटी । वाह्लीक हिङ्गु न तु कुङ्कुम, सहस्र-

छागरोम च्छुनश्चेति वस्तमूत्रेण भावितम्॥
एष माहेश्वरो धूपः सर्वग्रहनिवारणः॥६५॥

अथैकाङ्गवातलक्षणम्।—

एकस्मिन् देहदेशे च तोद कार्श्यं चलात्मता।
हिमस्पर्शश्च दृश्येतैकाङ्गवातस्य लक्षणम्॥६६॥

अथैकाङ्गवातचिकित्सा।—

अथ एकाङ्गवाते पर्पटीरसप्रयोगविधिः।—

पर्पटीरसगुञ्जाष्टौ वक्ष्यमाणञ्च गुग्गुलुम्।
कर्षार्द्धं खादयेत् साज्यमेकाङ्गानिलशान्तये॥६७॥
एरण्डवह्निशुण्ठीनां गुडूच्याश्च कषायकम्।
अनुपानाय दातव्यं चणकक्वाथमेव च॥६८॥

अथ सर्जतैलम्।—

नलिकायन्त्रयोगेन सर्जतैलं समुद्धरेत्।
तदभ्यङ्गप्रयोगेण वातो दुष्टः प्रशाम्यति॥६९॥

योगे हिङ्गुपाठदर्शनात्। कार्पासास्थि कार्पासबीजम्। खररोमाणि गर्दभरोमाणि। बर्हिपिच्छं मयूरपिच्छम्। वस्तमूत्रेण छागमूत्रेण॥६३—६५॥

वातव्याध्यधिकारे प्रकुपितवातकार्य्यविशेषं रक्तवातादिकमभिधाय पुनरपि वातव्याधिप्रारम्भ, तत्र एकाङ्गवातस्य लक्षणमाह, एकस्मिन्निति।—एकस्मिन् देहदेशे देहस्य वामे वा दक्षिणे वा भागे इत्यर्थः। चलात्मता वायोश्चलत्वेन एकत्रानवस्थितता इत्यर्थः॥६६॥

एकाङ्गवाते पर्पटीरसप्रयोगविधौ—वक्ष्यमाणं गुग्गुलुं शतावर्य्यादिगुग्गुलुं योगराजगुग्गुलुद्वयर्योरेकतरं वा। रसपर्पटीं गुग्गुलुञ्च ऐकध्यमेव प्रयुञ्जीत। चणकक्वाथमेव च इत्यत्र चकारो वाऽर्थे, एरण्डादीनां क्वाथं चणकक्वाथं वा अनुपानं कुर्य्यादित्यर्थः॥६७।६८॥

सर्जतैले—नलिकायन्त्रं "लोहनालगतम्" इत्यादिना नवमाध्यायोक्तम्, नलिकासंयुक्तयन्त्रमिति वा, एवञ्च नलिकायन्त्रयोगेन डेकीयन्त्रयोगेनेत्यर्थः। सर्जतैलं सर्जः धूनकः तस्य तैलम्॥६९॥

अथ अर्द्धाङ्गवायौ शतावर्य्यादिगुग्गुलु ।—

शतावरी गुडूची च सारणी गोक्षुरः कणा ।
शताह्वा दीप्यका रास्ना अश्वगन्धा च संज्ञका ॥७०॥
कचोरो नागरश्चैति चूर्णनीयाः समांशकाः ।
एतैः सर्वैः समो ग्राह्यो गुग्गुलुर्महिषाक्षकः ॥७१॥
खण्डयित्वा घृतेनार्द्रं पूर्वचूर्णं विनिःक्षिपेत् ।
सम्मर्द्य सर्पिषा गाढं कर्षार्द्धगुलिकां किरेत् ॥७२॥

अथ विविधवातव्याधिचिकित्सा ।—

अथ योगराजगुग्गुलु ।—

पिप्पलीपिप्पलीमूल-चव्यचित्रकनागरैः ।
पाठाविडङ्गेन्द्रयव-हिङ्गुभार्गीवचान्वितैः ॥७३॥
सर्षपातिविषाजाजी-रेणुकाकृष्णजीरकैः ।
गजकृष्णाजमोदाभ्यां कटुकामूर्वमिश्रितैः ॥७४॥
समभागान्वितैः सर्वैस्त्रिफला द्विगुणा भवेत् ।
त्रिफलासहितैरेतैः समभागस्तु गुग्गुलुः ॥७५॥
एतच्चूर्णीकृतं सर्वं मधुना च परिप्लुतम् ।
योगराजमिमं विद्वान् भक्षयेत् प्रातरुत्थितः ॥७६॥

शतावर्य्यादिगुग्गुलौ—अर्द्धाङ्गवायौ एकाङ्गवातरोगे। सारणी प्रसारणी। दीप्यका यमानी। संज्ञका पीतकाष्ठ, पीतचन्दनं पद्मकाष्ठं वा इत्यर्थः "संज्ञका" इत्यत्र "संज्ञकम्" इति पाठः साधुः, "अश्वगन्धा च संज्ञका" इत्यत्र "अश्वगन्धाश्वमारक" इति क्वचित् पाठः। कचोरः गन्धशटी। . आर्द्रं सरसं यथा तथा, न तु शुष्कमित्यर्थः, आर्द्रमिति खण्डयित्वा इति क्रियायाः विशेषणम्, खण्डयित्वा पिष्ट्वा इत्यर्थः, गुग्गुलुमिति शेषः, प्रभूतघृतेन आर्द्रं यथा भवति तथा गुग्गुलुं पिष्ट्वा। पूर्वचूर्णं शतावर्य्यादिचूर्णम्। आदौ शुद्धगुग्गुलुं घृतेन पिष्ट्वा पश्चात् चूर्णं निःक्षिप्य सर्पिषा प्रगाढं मर्दयेदिति निष्कर्षः। किरेत् दद्यादित्यर्थः ॥ ७०—७२ ॥

योगराजगुग्गुलौ—गजकृष्णा गजपिप्पली। त्रिफला द्विगुणा मिलितत्रिफला-

अर्शांसि वातगुल्मञ्च पाण्डुरोगमरोचकम् ।
नाभिशूलमुदावर्त्तं प्रमेहं वातशोणितम् ॥७७॥
कुष्ठं क्षयमपस्मारं हृद्रोगं ग्रहणीगदम् ।
महान्तमग्निसादञ्च श्वासकासभगन्दरम् ॥७८॥
रेतोदोषाश्च ये पुंसां योनिदोषाश्च योषिताम् ।
निहन्यादाशु तान् सर्वान् दुर्वारान्न च संशयः ॥७९॥
एष निष्परिहारोऽस्ति पानभोजनमैथुने ।
सतताभ्यासयोगेन बलीपलितनाशनः ॥८०॥
सर्वव्याधिविनिर्मुक्तो जीवेद्वर्षशतत्रयम् ।
क्षीराज्यरसभुक्तानां दोषधातुमलोचितम् ॥
बुभुक्षितो मात्रयाऽन्नमद्याद्गुग्गुलुसेवकः ॥८१॥
दार्वीक्वाथेन मेहं जयतीत्यादि ।

अथ द्वितीययोगराजगुग्गुलुः ।—

चित्रकं पिप्पलीमूलं यवानी कारवी तथा ।
विडङ्गान्यजमोदश्च जीरकं सुरदारु च ॥८२॥
चव्यैला सैन्धवं कुष्ठं रास्नागोक्षुरधान्यकम् ।
त्रिफलामुस्तकव्योष-त्वगुशीरं यवाग्रजम् ॥८३॥
तालीशपत्रं पत्रञ्च सूक्ष्मचूर्णानि कारयेत् ।
एतानि समभागानि तावन्मात्रञ्च गुग्गुलुम् ॥८४॥
सम्मर्द्य सर्पिषा गाढं स्निग्धे भाण्डे विनिक्षिपेत् ।
भक्षयेत् कर्षमात्रञ्च वातरोगान् विनाशयेत् ॥८५॥

चूर्णस्य सर्वचूर्णात् द्वैगुण्यम् । क्षीराज्यरसभुक्तानामित्यत्र रसः मांसरसः, तेन सह भुक्तानाम् इति सम्बन्धे षष्ठी । दार्वीति ।—अत्र इत्यादिपदेन तत्तद्रोगहरानुपानेन प्रयुक्तोऽयं गुग्गुलुः तत्तद्रोगहरो भवतीत्यर्थः प्रतीयते । तन्त्रान्तरेऽस्य पिप्पल्यादि-गुग्गुलुरिति संज्ञा ॥ ७२—८१ ॥

द्वितीययोगराजगुग्गुलौ—कारवी कृष्णजीरकम् । "चव्यैला" इत्यत्र "वचैला"

ततो मात्रां प्रयुञ्जीत यथेष्टाहारसेवनात् ।
योगराज इति ख्यातो योगोऽयममृतोपमः ॥८६॥
आमवाताढ्यवातादीन् क्रिमिदुष्टव्रणानि च ।
प्लीहगुल्मोदरानाह-दुर्नामानि विनाशयेत् ॥
अग्निञ्च कुरुते दीप्तं तेजोवृद्धिबलं तथा ॥८७॥

अथ बडवानलः ।—

शुल्वं तालकगन्धकौ जलनिधेः फेनोऽग्निगर्भाशयः
कान्तायो लवणानि हेमवचयोर्नीलाञ्जनं तुल्यकम् ।
भागो द्वादशको रसस्य तदिदं वज्राम्बुघृष्टं शनैः
सिद्धोऽयं बडवानलो गजपुटे रोगानशेषान् जयेत् ॥८८॥
आर्द्रकस्य द्रवेणामुं दशवाराणि भावयेत् ।
दिनद्वयं चित्रकस्य द्रावेणैव तु भावयेत् ॥८९॥
पादांशममृतं दत्त्वा चित्रद्रावैः क्षणं पचेत् ।
मात्रया योजयेच्चानु दशमूलमृतं पयः ॥९०॥
वातश्लेष्मप्रधाने च दद्यात्त्र्यूषणचित्रकम् ।
स्वेदञ्च कटुतुम्बिन्या प्रयुञ्जीतातियत्नतः ॥
दाहञ्च जयया हन्याच्छीतवातञ्च वर्जयेत् ॥९१॥

इति पाठान्तरम् । त्वक् गुडत्वक् । यवाग्रजं यवक्षारम् । तावन्मात्रं सर्वचूर्णसमम् । आढ्यवातं ऊरुस्तम्भः ॥ ८२—८७ ॥

बडवानले—जलनिधेः फेनं समुद्रफेनं । अग्निगर्भाशयः शमी । लवणानि इति पञ्च, अत्र पञ्चानां लवणानां मिलितानामेको भागः । हेम स्वर्णं, तच्च भस्मीभूतं ग्राह्यम् । भागो द्वादशको रसस्य रसस्य पारदस्य द्वादशको भागः द्वादशानां पूरणः, एवञ्च रसैकभागेन सह शुल्वादीनां द्वादशभाग इत्यर्थः । वज्राम्बु स्नुहीक्षीरं तेन घृष्टं मर्दितम् । अमुं बडवानलम् । पादांशममृतमिति विषौषधापेक्षया । चित्रद्रावे क्षणं पचेत् चित्रकमूलक्वाथे, सह मृत्कटाहे लौहकटाहे वा मृदुपाकं कुर्य्यात् । दद्यात् त्र्यूषणचित्रकं त्र्यूषणचित्रकक्वाथमनुपानं कुर्य्यात् । दाहमिति ।—

अथ मार्त्तण्डेश्वरः ।—

समताप्ययुतं शुल्वं पलविंशतिमानकम् ।
पश्चात् हि चतुर्वारं खण्डयित्वा ततश्चरेत् ॥९२॥
तत्तुल्यमाक्षिकोपेतं पुटेद्विंशतिवारकम् ।
गन्धकेन पुटेत्तावद्यावत् पलमितं भवेत् ॥९३॥
क्षिपेत् पलमितं तत्र गन्धकेन हतं रसम् ।
शाणमात्रं मृतं वज्रं सर्वमेकत्र मर्दयेत् ॥९४॥
इति सिद्धो रसेन्द्रोऽयं मार्त्तण्डेश्वरनामवान् ।
कीर्त्तितो लोकनाथेन लोकानां हितकाम्यया ॥९५॥
मरीचघृतसंयुक्तः सेवितो मण्डलार्द्धतः ।
वाताद्यष्टमहारोगान् श्वासकासयुतं क्षयम् ॥९६॥
हलीमकञ्च पाण्डुञ्च ज्वरानपि सुदुस्तरान् ।
इत्यादिकगदान् सर्वान् विनाशयति निश्चितम् ॥९७॥
करोति दीपनं तीव्रं दीप्तानलशतोपमम् ।
सन्निपातं जयत्याशु व्योषार्द्रकसमन्वितः ॥
सर्वसौख्यकरो नृणां स्त्रीणां वन्ध्यत्वनाशनः ॥९८॥

अथ चतुःसुवरसः ।—

समभागौ शुभे हेम्नि निर्गूढं ताप्यमुत्तमम् ।
शतधा शतधा रौप्ये शुल्वे च शतवारकम् ॥९९॥

जयया जयन्त्या सह प्रयुक्तः सन् दाहं हन्यात्, "दाहे च व्यजनं कुर्यात्" इति पाठान्तरम् ॥ ८८—९१ ॥

मार्त्तण्डेश्वरे—ताप्यशुल्वयोः मिलितयोः विंशतिपलमानता । पश्चात् भस्मीकृतं कोष्ठिकायन्त्रे आध्मापितं वा । तुल्यमाक्षिकोपेतं वमनावशिष्टेन औषधेन तुल्यस्वर्णमाक्षिकसंयुक्तम् । गन्धकेन इति सर्वतुल्येन । पुटेदिति ।—गन्धकं दत्त्वा दत्त्वा तावत् पुटेत् यावता पुटेन औषधं पलमात्रमेव अवशिष्यात् । मण्डलार्द्धतः चतुर्विंशतिदिवसमित्यर्थः ॥ ९२—९८ ॥

इत्थं सिद्धमिदं बीजं पृथगष्टप्रमाणत ।
समावर्त्य तदेकत्र रसे पञ्चपलात्मके ॥१००॥
वक्ष्यमाणप्रकारेण जारयेदतियत्नत ।
तप्ते खल्ले रस दत्त्वा बीज निष्कमितं तथा ॥१०१॥
मर्दयेदतियत्नेन भवेद्यावद्दिनत्रयम् ।
पूर्वोक्तकच्छपे यन्त्रे वक्ष्यमाणविडान्विते ॥१०२॥
वक्ष्यमाणप्रकारेण बीजमेवमशेषत ।
बलिकाशीशकव्योम-काचीसौवर्चलै समै. ॥१०३॥
चक्राङ्गीरससम्भिन्नै शतधा विडमित्रवत् ।
एव जारितसूतेन पलमात्रेण तावता ॥१०४॥
गन्धकेनापि कर्त्तव्या सुस्निग्धा वरकज्जली ।
लोहपात्रे घृतोपेता द्रावयित्तान्तु कज्जलीम् ॥१०५॥
तुल्यसत्त्वाभ्रभसितं क्षिप्ता सम्मिश्र्य सर्वश ।
रम्भापत्रे विनिक्षिप्य कुर्य्यात् पर्पटिका शुभाम् ॥१०६॥
विचूर्ण्य पर्पटीं सम्यक् वैक्रान्त त्रिशदंशत. ।
निक्षिप्य हिङ्गुतोयेन शतधा परिभावितम् ॥१०७॥

पतु सुधरसे—निर्गूढ नि शेषेण प्रवेशित, ग्रासितमित्यर्थ । बीज स्वर्णादिग्रस्तं ताप्यमित्यर्थ । पूर्वोक्तकच्छपे यन्त्रे "जलपूर्णपात्रमध्ये" इत्यादिना नवमाध्यायोक्ते । वक्ष्यमाणविडान्विते बलिकाशीशकादिभि क्रतेन रसादीना ग्राससामर्थ्यापादकेन द्रव्यविशेषेण युक्ते इत्यर्थ । काची सौराष्ट्रमृत्तिका । समै' समपरिमितै । चक्राङ्गीरससम्भिन्नै चक्राङ्गी सुदर्शना, पद्मगुडूचीत्यर्थ , छिन्नमोचिका वा, तस्या रसेन मर्दितैरित्यर्थ । शतधा इति चक्राङ्गीरससम्भिन्नैरित्यनेन सम्बध्यते । विड-मित्रवत इति बीजमित्यस्य विशेषणम् , विडेव अमित्र ग्रासकरणादित्यर्थ , विड एव मित्र मिलनसम्पादनादित्यर्थौ वा । "विडमित्रवत्" इत्यत्र "विडयन्त्रवत्" इति पाठकल्पना साधीयसीति मन्यामहे, अष्टमाध्याये जारणालक्षणे "विडयन्त्रादि-योगत." इति पाठदर्शनात् । तुल्यसत्त्वाभ्रभसितं कज्जलीतुल्यमभ्रसत्त्वभस्म ।

निरुध्य मल्लमूषायां स्वेदयेदतियत्नतः ।
पुनः सञ्चूर्ण्य यत्नेन करण्डे विनिवेशयेत् ॥१०८॥
हन्यात् सर्वमरुग्गदान् क्षयगदं पाण्डुञ्च नष्टाग्निताम्
निर्वीर्य्यत्वमरोचकं त्वजरणं शूलञ्च गुल्मादिकम् ।
अष्टौ चैव महागदानतितरां व्याधिं मशोषं क्षणात्
भुक्तो मुद्गमितश्चतुःसुधरमः स्वस्थोचितो भूभुजाम् ॥१०९॥
मूलकं वर्जयेदस्मिन् रसे नान्यत्तु किञ्चन ।
त्रिवारमेकवारेण बुभुक्षा जनयेद्ध्रुवम् ॥११०॥

अथ सर्ववातारिः ।—

गन्धकाद्द्विगुणं तालं तालकाद्द्विगुणा शिला ।
शिलाया द्विगुणं ताप्यं ताप्याच्च द्विगुणं रसम् ॥१११॥

वैक्रान्तं विंशदंशतः इति कज्जल्यपेक्षया वैक्रान्तस्य विंशदंशत्वम् । हिङ्गुतोयेन हिङ्गुमिश्रितजलेन । त्रिवारमिति भुक्त इत्यनेन सम्बध्यते । "एकवारेण" इत्यत्र "द्विवारम्" इति क्वचित् पाठः । अयमर्थः,—आदौ स्वर्णं तुल्यमाक्षिकेण सह मर्दयित्वा लघुपुटे पचेत्, ततः उद्धृत्य खल्लयित्वा च पुनः पचेत् एवं शतपाकं कुर्य्यात् । स्वर्णवत् रौप्यताम्रेऽपि । एवं-पक्वस्य रसजारणे वीजाख्यस्यास्य प्रत्येकं कर्षमाणं पञ्चपलेन रसेन सह जारयेत्, तत्र जारणाविधिश्चाय—तप्ते खल्ले पञ्चपलरसं गृहीत्वा पूर्वोक्तवीजानां प्रत्येकं शाणं तत्र निक्षिप्य मर्दयेत्, एकीभूते च तस्मिन् पुनः निष्कमाणं वीजं दत्त्वा मर्दयेत् एवं दिनत्रयेण अक्षप्रमाणं तद्वीजं रसेन ग्रासयेत्, ततः कच्छपयन्त्रे तं रसं चक्राङ्गीरसेन शतधा मर्दितं वलिकाशीशादिकृतं विडञ्च ऐकध्य पुटेत्, एवं-जारितस्य सूतस्य पलं गन्धकस्य च पलं कज्जलीकृत्य घृताक्ते लौहपात्रे वदराङ्गारेण तां कज्जलीं द्रवीकुर्य्यात्, ततः द्रवीभूतायां तस्यां कज्जलीप्रमाणम् अभ्रसत्त्वभस्म निक्षिप्य मिश्रयेत्, अथ रसपर्पटीवत् रम्भापत्रे तां निक्षिप्य पर्पटिकां कुर्य्यात् । ततः तां पर्पटीं खल्ले विचूर्ण्य पर्पटीमानात् त्रिंशांशं भस्मवैक्रान्तं तत्र निक्षिप्य च हिङ्गुमिश्रितजलेन भावनाविधिनिष्पन्नेन शतवारं भावयेत्, अनन्तरं मल्लमूषायां निरुध्य पुटेत्, स्वाङ्गशीतं समुद्धृत्य विचूर्ण्य च करण्डान्तः स्थापयेदिति ॥ ९९—११० ॥

खल्वयेत् सर्वमेकत्र यावत् स्याद्दिनसप्तकम् ।
सर्वस्याष्टमभागेन दत्त्वा रक्तामृतं शुभम् ॥११२॥
विषतिन्दुकजैर्द्रावैः पिष्ट्वा गोलकमाचरेत् ।
विशोष्य वालुकायन्त्रे अन्धयेद्दिवसद्वयम् ॥११३॥
स्वाङ्गशीतलमुद्धृत्य तुल्यहिङ्गुष्टकान्वितम् ।
भावयेद्बीजपूरस्य सप्तवार रसेन हि ॥११४॥
सप्तवार रसे शुण्ठ्याश्चित्रमूलस्य वारिणा ।
इति सिद्धो रसेन्द्रोऽय सर्ववातारिसंज्ञकः ॥११५॥
घृतेन सहितो लीढो वल्लद्वयमितो नृभिः ।
निहन्त्यशीतिवातार्त्तीर्गुल्मानष्टविधानपि ॥११६॥
चतुर्विधञ्च मन्दाग्निं शूलानुदरजान् क्रिमीन् ।
आध्मानञ्च तथा हिक्का मूढवातञ्च विड्ग्रहम् ॥११७॥

अथ वातविध्वंसन ।—

मृतमभ्रकसत्त्वं हि कांस्यं शुल्वञ्च माक्षिकम् ।
गन्धकं तालक सर्वं भागोत्तरविवर्द्धितम् ॥११८॥
कज्जलीकृत्य तत् सर्वं वातारिस्नेहसंयुतम् ।
मर्दयेत् सप्तदिवस गोलीकृत्य तु यत्नत ॥११९॥
निम्बुद्रवेण सम्पिष्टं तालकल्केन लेपयेत् ।
अर्द्धाङ्गुलदलञ्चैव परिशोष्य प्रयत्नतः ॥१२०॥

सर्ववातारौ—रक्तामृत रक्तवर्णं महाविष, वक्ष्यमाणविषकल्पे "रक्तवर्णं महाविषम्" इति दर्शनात । विशोष्य इत्यत्र आतपे इति शेष । अन्धयेत बाधयेदित्यर्थ । तुल्यहिङ्गुष्टकान्वित पाचितौषधतुल्येन हिङ्गुष्टकाख्येन अग्निमान्द्याधिकारोक्तेन तन्त्रान्तरीयेण औषधेन मिश्रितम्, तच्च "त्रिकटुकमजमोदा सैन्धव जीरके द्वे । समधरणधृतानामष्टमो हिङ्गुभाग ॥ प्रथमकवलभुक्त सर्पिषा चूर्णमेतत् । जनयति जठराग्नि वातरोगाश्च हन्यात् ॥" इत्यनेन उक्तम् ॥ १११—११७ ॥

वातविध्वंसने—मृतमिति पदम् अभ्रकसत्त्वादिभि सर्वैः सम्बध्यते । "मृतम्"

प्रपचेद्वालुकायन्त्रे यामाना द्वादशावधि ।
पटचूर्णं विधायैतद्भावयेत्तदनन्तरम् ॥१२१॥
पञ्चकोलकचित्राङ्घ्रि-वरुणादिकषायतः ।
दशमूलकषायेण शृङ्गवेररसेन च ॥१२२॥
रक्तामृतं कलाशेन दत्त्वा निष्पिष्य यत्नतः ।
स्थूलकोलास्थितुलिता छायाशुष्का वटीं किरेत् ॥१२३॥
तत्तद्रोगहरैर्द्रव्यैर्नृणां देया सदा हिता ।
हन्यादशीतिधा भिन्नान् वातजातान् महागदान् ॥१२४॥
गुल्मानष्टविधांश्चापि शूलानष्टविधानपि ।
जठरस्य रुजः सर्वास्तथा च मलनिग्रहम् ॥१२५॥
आध्मानकमथाऽऽनाहं विसूचीं मन्दवह्निताम् ।
आमदोषानशेषांश्च दाहं छर्दिञ्च दुर्द्धराम् ॥१२६॥
ग्रहणीं श्वासकासौ च क्रिमिरोगमशेषतः ।
हन्यात् सर्वाङ्गसदनं मन्यास्तम्भञ्च वाजिनाम् ॥१२७॥

इत्यत्र "सूतम्" इति रसेन्द्रसारोक्तः पाठः समीचीनः, मृतमिति पाठे कज्जली-करणानुपयोगित्वात् । "गुल्मम्" इत्यत्रापि "गुड़म" इति तत्र पाठः । भागोत्तर विवर्द्धितम् उत्तरोत्तरमेकैकभागवृद्धम् । वातारिस्नेहः एरण्डतैलम् । गोलीकृत्य इत्यादौ—निम्बुद्रवेण सम्पिष्ट तत सर्वं यत्नतः गोलीकृत्य तालकल्केन लेपयेदित्यन्वयः । तालकल्कमानन्तु यावता कल्केन लेपस्य अर्द्धाङ्गुलघनता भवेत तावदिति बोद्धव्यम । "सम्पिष्ट तालकल्केन" इत्यत्र "सम्पिष्टतालकल्केन" इति पाठे—हरिताल निम्बुद्रावेण सम्पिष्य तेन कल्केन इत्यर्थः । "तालकल्केन" इत्यत्र "तिलकल्केन" इति रसेन्द्रसारसङ्ग्रहे पाठः । अर्द्धाङ्गुलदलम इति लेपयेदिति क्रियाया विशेषणम्, अर्द्धाङ्गुलदलम् अर्द्धाङ्गुलोत्सेधमित्यर्थः । भावयेदिति सप्ताह भावयेत । चित्राङ्घ्रि इन्द्रवारुणीमूलम् । वरुणादि वरुणादि-गणः, स च "वरुणार्त्तगलौ शिग्रुस्तकारी मधुशिग्रुकः । मेषशृङ्गीकरञ्जौ च बिम्ब्यग्निमन्थमोरटाः ॥ शैरेयौ वसिरो दर्भौ वरी वसुकचित्रकौ । बिल्वश्चैवाज-शृङ्गी च वृहतीद्वयमेव च ॥ वरुणादिर्गणः प्रोक्तः" इत्यादिना "वरुण सहचरद्वय

ज्वरे चैवातिसारे च शूलरोगे त्रिदोषजे ।
पथ्यं रोगानुरूपेण दापनीयं भिषग्वरैः ॥१२८॥
श्रीमता नन्दिना प्रोक्तो वातविध्वंसनो रसः ।
क्षुधार्थिभिः सदा सेव्यः सर्वाहारपरैर्नरैः ॥१२९॥

अथ वृकोदरगुटिका ।—

सूतगन्धकतीक्ष्णाभ्रैः सताप्यैः समभागिकैः ।
रसांशसमपरं सर्वं षट्कोलं जीरकद्वयम् ॥१३०॥
सौवर्चलं समभ्यूत्य विडङ्गञ्च हरीतकी ।
अम्लवेतसकं सर्वं वीजपूराम्बुमर्दितम् ॥
गुटिकास्तेन कल्केन कार्य्याः कोलास्थिमात्रकाः ॥१३१॥
योगिन्या बहुघातिनामयुतया त्रैलोक्यविख्यातया
निर्दिष्टा हि वृकोदरीति गुटिका सोष्णाम्बुना सेविता ।
निःशेषानिलदोषरोगजरुजः श्लेष्मामरोगोद्भवं
मन्दाग्निं ग्रहणीं चतुर्विधमहाजीर्णञ्च तूर्णं जयेत् ॥१३२॥

शतावरी दहन मोरट-बिल्व विषाणिका द्विबृहती- द्विकरञ्ज जयाद्वय बहुलपल्लव दर्भ-कुजकरा" इत्यादिना वा उक्त । पञ्चकोलक्काथेन इन्द्रवारुणीमूलक्काथेन वरुणादिगणक्काथेन च इत्यर्थ । कलांशेन पाचितौषधापेक्षया षोडशांशेन । रसेन्द्रसारे "पटचूर्णम्" इत्यारभ्य "शूलानष्टविधानपि" इत्यन्तस्य पाठस्य न्यूनता दृश्यते । वाजिनाम् इत्यत्र अपीति शेष । "वाजिनाम्" इत्यत्र रसेन्द्रसारे "तथैव च" इति पाठ । क्षुधार्थिभि मन्दाग्निभि अत एव क्षुधावर्द्धनेच्छुभिरित्यर्थ ॥ ११८—१२९ ॥

वृकोदरगुटिकाया—रसांशसमपर सर्वमिति षट्कोलादीनामम्लवेतसान्ताना सर्वेषां मिलित्वा रसभागता, सर्वेषां समभागत्वे रसांश तथा सर्वमिति पदद्वयो वैयर्थ्यात । षट्कोलं षडूषण, तत्तु "पञ्चकोल समरिच षडूषणमुदाहृतम्" इत्युक्तरूपम । बहुघातिनामयुतया बहुव्याधिहन्तृत्वात बहुघातिनीतिसंज्ञिकया । सोष्णाम्बुना इत्यत्र सा इति पृथक् पद, वृकोदरी गुटिकेत्यर्थ । निःशेषेति ।—

अथ प्रभावती वटी ।—

हेमाभ्रालकतीक्ष्णताप्यकमलामिषां सम सप्तकं
सूतञ्च द्विगुणं विशोधनवधूस्त्र्यक्त्रिशोभाञ्जनात् ।
पाठाशूरणसिन्दुवारविजयैरुण्डद्रवैर्मर्दितं
तैलं काङ्गुणिगन्धकं कटु भवेत् कल्कं वटीं कल्पयेत् ॥१३३॥
प्रभावतीति कथिताऽऽर्द्रकद्रावैर्निषेविता ।
ततस्तान् पिबेत्तोयं दशमूलप्रसाधितम् ॥१३४॥
सपिप्पलीकं पिबतो जलं जयेत्
मरुद्विकारानुदराण्यपस्मृतिम् ॥१३५॥

योगपदसामानाधिकरण्यात् विकृतः तु रुक्कारी अनिलदोषः अनिलदोषरोगः तस्मात् जाता रुजः अनिलदोषरोगजरुजः, निःशेषा अशेषाः, सर्वा इत्यर्थः, अशीतिरिति यावत्, अनिलदोषरोगजरुजः इति विग्रहः । श्लेष्मामरोगोद्भवमित्यत्र रुजमिति शेषः ॥ १३०—१३२ ॥

प्रभावतीवट्याः—कमलं ताम्रं तेषाम्, अत्र स्वरान्तस्यापि कमलशब्दस्य छन्दोऽनुरोधात् हलन्तत्वेन पाठः । "कमलामिषाम" इत्यत्र "कमलं सूर्यम्" इति कस्यचित् पाठे—कमलं कुङ्कुमं, सूर्यं ताम्रम् । एषां हेमादीनां समं समभागता । सप्तकं सप्तानां पूरणं सप्तममित्यर्थः, सूतमित्यनेन सम्बध्यते, सूतं द्विगुणम् इति एकभागापेक्षया ज्ञेयम् । विशोधनं विशोधनी, नागवल्लीत्यर्थः, वधूः स्पृक्का शारिवा वा, यद्वा—विशोधनवधूः इत्येकपदं, विशोधनी या वधूः सारिवेत्यर्थः, सारिवायाः रक्तशोधकत्वात् । शोभाञ्जनात् शोभाञ्जनत्वचः, उद्धृते द्रवैरिति शेषः । तैलं शिलकम् । कङ्गुणी प्रियङ्गुः तृणधान्यविशेषो वा, तस्याः फलं बीजं वा काङ्गुणि, ह्रस्वोऽत्र छान्दसः । कटु त्रिकटु, यद्वा—तैलमिति पदं काङ्गुण्यादिभिः सर्वैः संयोजनीयं, काङ्गुणि तैलं कङ्गुणीबीजकृतं तैलं, गन्धकं तैलं गन्धकस्य तैलं, तथा कटुतैलञ्च, "तैलं कल्कम्" इत्यत्र "तैले काङ्गुणिजैश्च गन्धकयुतात् कल्कात्" इति कुत्रचित् पाठः । विशोधनादिभिर्द्रवैः मर्दनानन्तरम् एतत् सर्वं भवेदित्यत्र देयमिति शेषः । कल्कं द्रवैः शिलायां पिष्टं हेमादिकम् । सपिप्पलीकं पिप्पलीचूर्णप्रक्षेपयुक्तम् । पिबतो जलं दशमूलक्वाथं पिबतो जनस्य । अपस्मृतिम् अपस्मारम् ॥ १३३—१३५ ॥

अथ एकाङ्गवाते पर्पटीरसप्रयोगे विध्यन्तरम् ।—

अष्टगुञ्जमितं खादेदेकाङ्गे पर्पटीरसम् ।
अर्द्धकर्षं घृतेनानु योगराजञ्च गुग्गुलुम् ॥१३६॥

अथ विजयभैरवतैलम् ।—

धान्याम्लपिष्टसुरभित्रयसूतलिप्त-
तैलाक्तक्षौमपटवर्त्तिमुखात् प्रवृत्तम् ।
कम्पोत्तरान् जयति पानविलेपनाभ्यां
वातामयान् विजयभैरवनाम तैलम् ॥१३७॥

उक्तञ्च—

रसतालशिलागन्धं दिन सञ्चूर्ण्य काञ्जिकैः ।
लिप्त्वा वस्त्रे कृता वर्त्तिं तैलाक्तां ज्वालयेत् पुनः ॥१३८॥
तद्भूत सङ्गृहे तैलमधःपात्रे धृते सति ।
तत्तैललेपितं पत्रं नागवल्ल्याश्च भक्षयेत् ॥१३९॥
बाहुकम्पं शिरःकम्पमेकाङ्ग जानुकम्पनम् ।
नाशयेत् भक्षणाल्लेपात् तैल विजयभैरवम् ॥१४०॥

एकाङ्गवाते पर्पटीरसप्रयोगस्य विध्यन्तरमाह, अष्टगुञ्जेति ।—पर्पटीरसेत्यादिना ६७।६८ श्लोकयो उक्तस्यापि अस्य योगस्य योगराजगुग्गुलो पर्पटीरसस्य अनुपानत्वेनाव कल्पनात पूर्वयोगापेक्षया पृथक्त्व मन्तव्य, तत्र उभयो मिलितयोरेव प्रयोगविधानात ॥ १३६ ॥

विजयभैरवतैले—धान्याम्ल काञ्जिकम् । सुरभित्रय गन्धकत्रय, तच्च शिलातालगन्धकरूप, न तु लगैलापत्ररूप त्रिजातकम् , तन्त्रान्तरीयविजयभैरवदर्शनात्, व्याकरिष्यति च स्वयमेवैतदग्रे । तैलाक्ता कटतैलाक्ता ॥ १३७ ॥

सुरभित्रय इति पदस्य शिलातालगन्धकार्थकत्वप्रतिपादनाय तन्त्रान्तरोक्तविजयभैरवतैलस्य पाठमुपन्यस्यति, उक्तञ्चेत्यादिना ।—"वस्त्रे" इत्यत्र "वस्त्रे" तथा "तद्भूत सङ्गृहे" इत्यत्र "तद्द्रुत ग्राहयेत्" इति रसरत्नाकरोक्त पाठ साधु । तद्भूत तद्द्रुत, तन्निःसुतमित्यर्थ । सङ्गृहे संस्थापिते इत्यर्थ । "तत्तैललेपितं

अथ स्वच्छन्दभैरवः।—

तीक्ष्णायस्कान्तगोदन्त-माक्षिकैर्मर्दितो रसः।
समांशगन्धकः पक्वो हण्डिकायन्त्रमध्यगः ॥१४१॥
व्योषाग्निमन्थसुरसा-कन्दशृङ्गाभयाविषैः।
समैः समं त्र्यहं मुण्डी-निर्गुण्डीरसपिण्डितः ॥१४२॥
सेवितः शमयेद्वातान्नाम्ना स्वच्छन्दभैरवः।
विशेषात् वातरक्तञ्च द्विवल्लञ्चाऽऽर्द्रकैर्दहेत् ॥१४३॥

अथ द्वितीयविजयभैरवतैलम्।—

रसगन्धशिलातालं सर्वं कुर्यात् समांशकम्।
चूर्णयित्वा ततः स्वच्छमारनालेन मर्दयेत् ॥१४४॥
लेपयित्वा तु कल्केन सूक्ष्मवस्त्रं ततः परम्।
तैलाक्तां कारयेद्वर्त्तिमूर्द्ध्वभागे प्रदीपयेत् ॥१४५॥
वर्त्त्यधःस्थापिते पात्रे तैलं पतति शोभनम्।
लेपयेत्तेन गात्राणि भक्षयेदातुरस्तथा ॥१४६॥

पत्र नागवल्ल्याश्च" इत्यत्र "तत्तैलैर्लेपयेद्गात्र नागवल्ल्या च" इति रसरत्नाकरे पाठान्तरम् ॥ १३८—१४० ॥

स्वच्छन्दभैरवे—तीक्ष्णं तीक्ष्णलौहम्। अयस्कान्तः "चुम्बक" इति प्रसिद्धः लौहाकर्षकप्रस्तरविशेषः, तीक्ष्णायः तीक्ष्णलौहं, कान्तः कान्तलौहमिति वा। गोदन्तः स्वनामख्यातः विषविशेषः। रसः पारदः। अत्र तीक्ष्णादीनां गन्धकान्तानां सर्वेषां तुल्यता। हण्डिकायन्त्रमध्यगः स्थालीयन्त्रमध्यगः, तल्लक्षणन्तु "स्थाल्यां ताम्रादि" इत्यादिना नवमाध्याये प्रोक्तम्। सुरसा निर्गुण्डी। कन्दः शूरणम्, "कन्द" इत्यत्र "टङ्क" इति पाठान्तरम्। शृङ्गी कर्कटशृङ्गी। समं सह। तीक्ष्णादिगन्धकान्तं सर्वं तुल्यभागं खल्ले सम्मर्द्य स्थालीयन्त्रे पचेत्, ततः व्योषादीनां प्रत्येकं चूर्णमेकैकभागसमं दत्त्वा मुण्डीनिर्गुण्डीरसाभ्यां त्र्यहं सम्मर्द्य पिण्डितं कुर्यात्, अथवा—तीक्ष्णादिकं विषान्तं सर्वं समांशं हण्डिकायन्त्रे विदिनं पक्त्वा अनन्तरं मुण्डीनिर्गुण्डीरसाभ्यां मर्दयित्वा वटीं कुर्यादिति ॥ १४१—१४३ ॥

नाशयेत् सूततैलं तत् वातरोगाननेकधा ।
बाहुकम्प शिरःकम्प जङ्घाकम्प ततः परम् ॥१४७॥
एकाङ्गञ्च तथा वात हन्ति रोगाननेकधा ।
रोगशान्त्यै सदा देयं तैलं विजयभैरवम् ॥१४८॥

अथ द्वितीयवडवानल ।—

सूतहाटकवज्रार्क-कान्तभस्म समाक्षिकम् ।
तालं नीलाञ्जन तुत्थमब्धिफेनं समांशकम् ॥१४९॥
पञ्चाना लवणानान्तु भागैकैक विमर्दयेत् ।
वज्रक्षीरैर्दिनैकन्तु रुद्ध्वा तं भूधरे पचेत् ॥१५०॥
माषैकञ्चाऽऽर्द्रकद्रावैर्लेहयेत् वडवानलम् ।
पिप्पलीमूलजं क्वाथं सपिप्पल्यनुपाययेत् ॥
धनुर्वातं दण्डवात शृङ्खलावातकम्पनुत् ॥१५१॥

अथ द्वितीयस्वच्छन्दभैरव ।—

शुद्धं सूतं मृत लौह ताप्यगन्धकतालकम् ।
पथ्याग्निमन्थनिर्गुण्डी-त्र्यूषण टङ्कणं विषम् ॥१५२॥
तुल्यांशं मर्दयेत् खल्वे दिनं निर्गुण्डिकारसैः ।
मुण्डीद्रावैर्दिनैकं तं द्विगुञ्जं वटकीकृतम् ॥
भक्षयेत् सर्ववातार्त्तो नाम्ना स्वच्छन्दभैरव ॥१५३॥

द्वितीयविजयभैरवतैले—सर्वं व्याख्यातपूर्वम् । तत्र पर्णखण्डेन सह भक्षणाय उपदेश कृत, अत्र तु विना पर्णखण्ड केवलस्यास्य सेवनमपि रोगहृत् भवति इति प्रदर्शनार्थं पुनरुल्लेख कृत ॥ १४४—१४८॥

द्वितीयवडवानले—हाटक स्वर्णम् । वज्र हीरकम् । वज्रक्षीरे स्नुहीक्षीरे । रसेन्द्रसारे वातनाशनरसोऽयम् ॥१४९—१५१ ॥

द्वितीयस्वच्छन्दभैरवे—"मुण्डीद्रावै." इत्यत्र "शुण्ठीद्रावै." इति रसरत्नाकरे पाठान्तरम् ॥ १५२।१५३ ॥

अथ षडङ्गगुग्गुलु ।—

रास्नामृतादेवदारु-शुण्ठीवातारितुल्यकम् ।
गुग्गुलुं सर्वतुल्यांशं कुट्टयेत् घृतवासितम् ॥
कर्षांश भक्षयेच्चानु ख्यातः षडाङ्गगुग्गुलुः ॥१५४॥

अथ षडङ्गयोग ।—

धूमसारं वरां यष्टीं टङ्कणं पत्रकं विषम् ।
तुल्यं गुञ्जाद्वयं खादेदामवातप्रशान्तये ॥१५५॥

अथ त्रिफलाद्य यमकम ।—

एरण्डतैलं त्रिफलां गोमूत्रं चित्रकं विषम् ।
सर्पिषा सहितं पक्त्वा सर्वाङ्गं तेन मर्दयेत् ॥
त्वग्वातघ्नं महाश्रेष्ठ—" ॥१५६॥

अथ त्वग्वाते आनन्दभैरवप्रयोगोपदेश ।—

"—देयश्चाऽऽनन्दभैरवम् ।
लशुनं सैन्धव तैलमनुपानं प्रकल्पयेत् ॥ १५७ ॥

षडङ्गगुग्गुलौ—वातारि' एरण्ड तस्य मूलम् । रास्नादीना तुल्यक तुल्यांशता इत्यर्थ । "तुल्यकम्" इत्यत्र रसरत्नाकरोक्त "तैलकम" इति पाठस्तु समीचीन । घृतवासित घृतमिश्रितम् । अनु कुट्टनानन्तरमित्यर्थ । "अमृता देवकाष्ठञ्च शुण्ठी वातारितैलकम् । गुग्गुलु सर्वतुल्यांश कुट्टयेच्च सदा दृढम् ॥ कर्षांश भक्षयेच्चापि ख्यात षडङ्गगुग्गुलम् ॥" इति रसरत्नाकरोक्त पाठस्तु लिपिकर-प्रमादविजृम्भित इति प्रतिभाति, रास्नाभावे पञ्चाङ्गतया षडङ्गगुग्गुलुरिति नाम-वैयर्थ्यादिति ॥ १५४ ॥

षडङ्गयोगे—धूमसार गृहधूमम् । वरा त्रिफलाम् ॥ १५५ ॥

त्रिफलाद्ययमके—एरण्डतैलसर्पिषो मिलित्वा प्रस्थ, गोमूत्र चतुर्गुण, त्रिफला-चित्रकविषाणा कल्क स्नेहपादिक । अथवा—एरण्डतैलमपि कल्कविधया ग्राह्य, घृतस्यैव प्राधान्येन ग्रहणात, एवञ्च सर्पिष प्रस्थ, गोमूत्र चतुर्गुणम् एरण्डतैलत्रिफला-चित्रकविषाणा कल्क स्नेहचतुर्थांश । त्वग्वातघ्न रसगतवातव्याधिनाशनम्, उपधातुरूपा त्वच प्राप्तस्य वायो नाशनम् इति वा ॥१५६॥

त्वग्वाते अधिकारान्तरोक्तमौषधविशेषमुपदिशति, देयमिति ।—च, समुच्चये,

अथ निर्गुण्डीप्रयोग ।—

निर्गुण्डीमूलचूर्णन्तु कर्षं तैलेन लेहयेत् ।
सन्धिवातः कटीवातः कम्पवातश्च शाम्यति ॥ १५८ ॥

अथ रक्तैरण्डप्रयोग ।—

रक्तस्यैरण्डमूलस्य कर्षं घृष्ट्वा जले पिबेत् ।
सर्ववातहरं श्रेष्ठं भग्नवाते विशेषतः ॥१५९॥

अथ इन्द्रवारुणीप्रयोग ।—

इन्द्रवारुणिकामूलं मागधीगुडसंयुतम् ।
भक्षयेत् कर्षमात्रन्तु सन्धिवातहरं भवेत् ॥ १६० ॥

अथ सर्वाङ्गवातारिरस ।—

मृतं सूतं मृत तीक्ष्णं मर्दयेत् कटुकीद्रवैः ।
चणमात्रा वटीं खादेत् सर्वाङ्गिकाङ्गवातनुत् ॥१६१॥

सर्पिषा सर्वाङ्ग मर्दयेत, आनन्दभैरवञ्च देयमित्यर्थ, "देयञ्च" इत्यत्र "देय वा" इति पाठान्तरम् । आनन्दभैरव "हिङ्गल वत्सनाभञ्च" इत्यादिना षोडशाध्यायोक्तम । लशुनमिति ।—लशुनादित्रयम् आनन्दभैरवसेवनानन्तरमनुपान कुर्य्यात । तैलमत्र ऐरण्ड, मात्रा च कर्षमाणा, तथा च रसरत्नाकरे—"लशुन सैन्धव तैल कर्षमात्र सुखावहम" इति ॥ १५७ ॥

निर्गुण्डीप्रयोगे—तैलेन एरण्डतैलेन ॥ १५८ ॥

भग्नवातघ्नरक्तैरण्डप्रयोगे—सर्व स्पष्टम ॥ १५९ ॥

सन्धिवातहरे इन्द्रवारुणीप्रयोगे—इन्द्रवारुणिकामूल गोरचकर्कटीमूलम् । मागधी पिप्पली । कर्षमात्रमिति इन्द्रवारुणिकादीना त्रयाणा मिलित्वा कर्षमाणता ॥१६०॥

सर्वाङ्गवातारिरसे—"तीक्ष्णम्" इत्यत्र "ताम्रम्" इति रसरत्नाकरे पाठ । कटुकीद्रवै कटुरोहिणीकषायै. । कटुकीद्रवैर्भावनाश्च एकविंशतिवारान् देया, तथा च रसरत्नाकरे—"मृत सूत मृत ताम्र मर्दयेत् कटुकद्रवै । एकविंशतिवारञ्च शोष्य पेष्य पुन पुन ॥ चणमात्रा वटी भक्ष्या रस. सर्वाङ्गकम्पजित् ॥" इति । अत्र चाय सर्वाङ्गकम्पारिरस. इति ख्यातम् ॥ १६१ ॥

अथ त्र्यम्बकेश्वररस।—

सूतकस्य पलं पञ्च पलैकं ताम्रचूर्णकम्।
जम्बीराणां द्रवैः पिष्टं सूततुल्यञ्च गन्धकम् ॥१६२॥
नागवल्लीदलैः पिष्टं ताम्रपिष्टं प्रकल्पयेत्।
रुद्ध्वा लघुपुटैः पश्चाद्भूधरे यामपञ्चकम् ॥१६३॥
आदाय चूर्णयेत्तुल्यैस्त्रूषणैः सममिश्रितैः।
अर्द्धाङ्गकम्पवातार्त्तो भक्षयेच्च द्विगुञ्जकम् ॥१६४॥

अथ गगनगर्भा वटी।—

सूताभ्रं तीक्ष्णताम्रञ्च मृतं तालकगन्धकम्।
भार्गीशुण्ठीवचाधान्य-कम्पिल्लञ्चाभयाविषम् ॥१६५॥
मर्द्यं पर्पटकद्रावैर्निष्कैका भक्षयेद्वटीम्।
वातश्लेष्महरा ह्याशु वटी गगनगर्भिता ॥१६६॥

अथ वातगजाङ्कुश।—

मृतं सूतं मृतं लौहं गन्धकं तालमाक्षिकम्।
पथ्याभृङ्गीविषं व्योषमग्निमन्थञ्च टङ्कणम् ॥१६७॥

त्र्यम्बकेश्वररसे—ताम्रपिष्टं सूतगन्धकाभ्यां पिष्टं ताम्रमित्यर्थः। तुल्यैस्त्र्यूषणैः सममिश्रितैः प्रत्येकं समभागेन मिलित्वा पाचितौषधतुल्यैस्त्रिकटुभिरित्यर्थः। "ताम्रपिष्टम्" इत्यत्र "ताम्रपत्रीम्" इति रसेन्द्रसार रसेन्द्रचिन्तामण्युक्तः पाठान्तरः समीचीनः सुबोधश्च। रसेन्द्रसारसङ्ग्रहे "पिष्टीरसः" रसेन्द्रचिन्तामणौ "पिष्टीरसः" तथा रसरत्नाकरे "अर्द्धाङ्गवातारिरसः" इत्यादिभिर्विविधैः नामभिः ख्यातोऽयम्। तत्र तत्र च पाठान्तराण्यस्य विविधानि मृग्याणि ॥ १६२—१६४ ॥

गगनगर्भायां—"वचा" इत्यत्र "बला" "कम्पिल्लम्" इत्यत्र "कट्फलम्" तथा "पर्पटकद्रावैः" इत्यत्र "चपलाद्रावैः" इति पाठान्तराणि रसेन्द्रसार-सङ्ग्रह रसरत्नाकरयोः दृश्यन्ते। पर्पटकद्रावैः चैवपर्पटीरसैः। "चपलाद्रावैः" इति पाठे—पिप्पलीक्वाथैः। तत्र तत्र चास्य महावातगजाङ्कुश इति सञ्ज्ञा दृश्यते ॥ १६५।१६६ ॥

तुल्यं खल्ले दिनं मर्द्यं मुण्डीनिर्गुण्डिजैर्द्रवैः ।
द्विगुञ्जा वटिका खादेत् सर्ववातप्रशान्तये ।
साध्यासाध्यं निहन्त्याशु रसो वातगजाङ्कुशः ॥१६८॥

अथ वातरक्तलक्षणम् ।—

सन्धिष्वनिलरक्ताभ्यां शोफोऽन्तर्बहिराश्रयः ।
छर्दिज्वरारुचिकरो भवेद्वातास्रसञ्ज्ञकः ॥१६९॥

अथ वातरक्तचिकित्सा ।—

अथ वातरक्ते अन्याधिकारोक्तौषधप्रयोगोपदेशः ।—

त्रिनेत्राख्यं रसं खादेद्वातशोणितपीडितः ।
वातास्रजिच्छूलगज-केशर्य्युदयभास्करः ॥१७०॥
पूर्वोक्ता पर्पटी योज्या सर्वेष्वावरणेषु च ।
सर्वरोगहिता चैव नाम्ना सर्वेश्वरी शुभा ॥१७१॥

अथ पित्तरोगचिकित्सा ।—

अथ चन्द्रावलेहः ।—

एलायाश्च तुलां ग्राह्या जलद्रोणे विपाचयेत् ।
अष्टभागावशिष्टन्तु शर्कराद्धतुलां क्षिपेत् ॥१७२॥

वातगजाङ्कुशे—शृङ्गी अतिविषा । "शृङ्गी" इत्यत्र "शृङ्गी" इति रसेन्द्रसारसङ्ग्रहे पाठः ॥१६७।१६८॥

वातव्याधिविशेषत्वात् तदनन्तरं वातरक्तचिकित्सितं विवक्षुः तल्लक्षणमाह, सन्धिष्विति ।—वातास्रसञ्ज्ञकः वातरक्ताख्यः ॥ १६९ ॥

वातरक्ते अधिकारान्तरोक्तानौषधविशेषानतिदिशति, त्रिनेत्राख्यमिति ।—शूलगजकेशरी-त्रिनेत्राख्यरसौ शूलाधिकारोक्तौ । उदयभास्करः शूलाधिकारोक्तः, प्रमेहाधिकारोक्तो वा । पूर्वोक्तेति ।—सर्वेषु आवरणेषु वातावरकेषु रक्तेषु, वातरक्तेषु इत्यर्थः. वातरक्ते हि दुष्टो वायुः दुष्टेन रक्तेन आवृतो भवति, यदुक्तं चरके,—"वायुः प्रवृद्धो वृद्धेन रक्तेनावारितः पथि । क्रुद्धः सन्दूषयेद्रक्तं तज्ज्ञेयं वातशोणितम् ॥" इति । पूर्वोक्ता विद्भ्युक्ता सर्वेश्वरीति नाम्ना प्रसिद्धा पर्पटी सर्वेश्वरपर्पटीत्यर्थः ॥१७०।१७१॥

चन्द्रावलेहे—तुला शतपलम् । अष्टभागावशिष्टमिति विपाचयेत् इत्यस्य

शतावर्य्या विदार्य्याश्च गोक्षीरञ्चाऽऽढकं पृथक् ।
लेहवत् साधिते तस्मिन् द्राक्षामधुकपिप्पलीः ॥१७३॥
त्रिजातकञ्च खर्जूरं चन्दनद्वयसारिवा ।
मुस्तापद्मकह्रीवेर-धात्री चोत्पलचोरकम् ॥१७४॥
एतेषां पलमादाय क्षिपेत् क्षीर्य्याश्चतुष्पलम् ।
क्षौद्रप्रस्थेन संयुक्तं लेहयेत् प्रातरुत्थितः ॥१७५॥
पित्तोन्मादविकारेषु शिरोभ्रमणमूर्च्छिते ।
हस्तपादाङ्गदाहे च पित्तरक्तोत्तरावृते ॥
छर्दिकासक्षये पाण्डौ चन्द्रवच्चन्द्रभाषितम् ॥१७६॥

अथ ऐलेयसर्पिः ।—

ऐलेयकस्य स्वरसे घृतं क्षीरं समं पचेत् ।
चन्दनं मधुकं द्राक्षा मधूकञ्च सिता तुगा ॥१७७॥
ऐलेयकमिदं सर्पिः सर्वपित्तविकारजित् ।
वातपित्तविकारघ्नं शिरोभ्रमणकम्पनुत् ॥१७८॥

विशेषणम् । गोक्षीरमित्यत्र समासान्तर्गतमपि क्षीरपदं शतावरीत्यादिभिरपि सयोजनीयम्, तेन च शतावर्य्याः क्षीरं विदार्य्याः क्षीरं गोक्षीरञ्च, क्षीरवद्दृश्यमानत्वात् शतावरीविदारीरसयोः क्षीरसञ्ज्ञा । त्रिजातकं त्वगेलापत्रकम् । ह्रीवेरं बालकम् । चोरकं चोरपुष्पी स्पृक्का वा । पलमिति पृथक् पलमानम् । क्षीर्य्याः तुगाक्षीर्य्याः । चन्द्रवत् इति व्याधिजसन्तापनिवारणात् । चन्द्रभाषितं चन्द्रेण तन्नाम्ना रसकोविदेन चन्द्रमसा वा भाषितं कथितम् ॥ १७२—१७६ ॥

ऐलेयसर्पिषि—ऐलेयकस्य एलबालुकस्य आर्द्रस्य इत्याशय, अन्यथा स्वरसस्य दुर्ग्राह्यत्वात्, स्वरसाभावे तु "कुडवं चूर्णितं द्रव्यं प्रक्षिप्तं द्विगुणे जले । अहोरात्रं स्थितं तस्मात् भवेद्वा रस उत्तमः ॥" इत्युक्तलक्षणकः "शुष्कद्रव्यमुपादाय स्वरसानामसम्भवे । वारिण्यष्टगुणे साध्यं ग्राह्यं पादावशेषितम् ॥" इत्युक्तलक्षणको वा स्वरसानुकल्पः कार्य्यः । मधूकं मधुद्रुमः । सिता शर्करा । "सिता" इत्यत्र "शिला" इति पाठे—शिला मनःशिला । तुगा वंशलोचना । अत्र ऐलेयकस्वरसः चतुर्गुणः घृतस्य प्रस्थः, क्षीरञ्च घृतसमं चन्दनादीनां कल्कः स्नेहपादिकः ॥ १७७।१७८ ॥

अथ ऐलेयकप्रयोग ।—

ऐलेयकस्य स्वरसे सक्षीरां शर्करां पिबेत् ।
क्काथं वा शर्करायुक्तं शिरोभ्रमणकम्पनुत् ॥१७९॥

अथ ऐलेयकतैलम् ।—

ऐलेयकस्य स्वरसमाढकन्तु भिषग्वर: ।
कुमार्य्या: स्वरस शुद्ध चतुष्प्रस्थन्तु कारयेत् ॥१८०॥
आमलक्या: शतावर्य्या रस प्रस्थद्वय पृथक् ।
तैलाढकसमायुक्त क्षीरद्रोणविमिश्रितम् ॥१८१॥
चोचं मलयज वारि सरल कुमुदोत्पलम् ।
द्वे मेदे मधुकं द्राक्षा तुगाक्षीरी मधूलिका ॥१८२॥
काकोली क्षीरकाकोली जीवकर्षभकावुभौ ।
मृगनाभ्यजगन्धा च शशाङ्कश्च पृथक् पृथक् ॥१८३॥
एतेषाञ्चार्द्धपलकं श्लक्ष्णं चूर्णं विनिक्षिपेत् ।
एतत् सर्वं समालोड्य मन्द मन्दाग्निना पचेत् ॥१८४॥
मुहूर्त्ते शुभनक्षत्रे नववस्त्रेण पीडयेत् ।
शिरोनेत्रविकारेषु नस्यवत् कर्णयोजितम् ॥१८५॥
अभ्यङ्गोद्वर्त्तनालेपै शिरोभ्रमणकम्पनुत् ।
अङ्गदाह शिरोदाह नेत्रदाहञ्च दारुणम् ॥१८६॥
विसर्पकविकारांश्च मूर्द्ध्नि जातान् बहून् व्रणान् ।
आस्यशोष भ्रमञ्चैव नाशयेन्नात्र संशय: ॥
ऐलेयकमिदं तैलं प्रशस्तं पित्तरोगिणाम् ॥१८७॥

ऐलेयकप्रयोगे—सक्षीरा शर्करामिति क्षीरशर्करयोर्मिलिला पादिक प्रक्षेप । क्काथमिति ऐलेयकस्य ॥ १७९ ॥

ऐलेयकतैले—चोच गुडत्वक् । मलयज श्रीखण्ड, श्वेतचन्दनमित्यर्थ । वारि बालकम । द्वे मेदे मेदा महामेदा च । तुगाक्षीरी वंशरोचना । मधूलिका मूर्वा, क्लीतक वा । अजगन्धा यमानीभेद । शशाङ्क कर्पूर: । मुहूर्त्ते शुभलग्ने,

अथैलेयकामृतप्राश ।—

ऐलेयकं समूलञ्च मुद्गपर्णी तथैव च ।
शतावरी विदारी च वाराहीकन्दमेव च ॥१८८॥
मधुकञ्च मधूकञ्च तुगाक्षीरी च गोस्तनी ।
एतानि द्विपलांशानि चूर्णीकृत्य पृथक् पृथक् ॥१८९॥
सरलं चन्दनं चोचमुत्पलं कुमुदं जलम् ।
काकोली क्षीरकाकोली द्वे मेदे जीवकर्षभौ ॥१९०॥
एतेषाञ्चार्द्धपलिकं प्रत्येकं शर्करायुतम् ।
ऐलेयकं विदारी च वाराही मुद्गपर्णिका ॥१९१॥
एतेषां स्वरसे शुद्धे शतावर्य्याश्च भावितम् ।
एतत् सर्वं समाहृत्य छायाशुष्कन्तु सप्तधा ॥१९२॥
इक्ष्वामलकयोः क्षौद्रैर्भावितं सप्तधा पुनः ।
पयसा तु पिबेत् प्रातर्यथाऽग्निबलवान्नरः ॥१९३॥
अङ्गदाहं शिरोदाहं रक्तपित्तं सुदारुणम् ।
शिरोऽक्षिकम्पभ्रमणमित्यादिकगदान् जयेत् ॥१९४॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये शीतवात-स्पर्शवात-रक्तवातामवातापस्मारोन्मादैकाङ्गवात सन्धिवात भग्न कम्प-वातरक्त शिरोभ्रमणचिकित्सानामैकविंशोऽध्याय ॥ २१ ॥

पचेदित्यनेन सम्बन्ध । नववस्त्रेण पीडयेत इति पाकसिद्धौ । मूर्द्धि जातान् बहून् व्रणान् अरुंषिका ॥ १८०—१८७ ॥

ऐलेयकामृतप्राशे—ऐलेयक समूलम् एलबालुक तद्‌वृक्षस्य मूलञ्च । गोस्तनी द्राक्षा । चोच त्वचम् । जल बालकम् । काकोल्यादिषट्काभावे यथाक्रम शतावरी शतावर्य्यश्वगन्धासारिवागुडूचीवंशलोचना ग्राह्या । शर्करायुतम् इत्यत्र शर्कराया अपि अर्द्धपलमानता । ऐलेयकमिति ।—ऐलेयकादीना स्वरसेन सप्तधा भावयित्वा छायाया शोषयेदिति ॥ १८८—१९४ ॥

इति रसरत्नसमुच्चयदीपिकायामेकविंशोऽध्याय ॥ २१ ॥

अथ द्वाविंशोऽध्यायः ।

अथ वन्ध्यादिचिकित्सनम् ।—

अथ वन्ध्याया दोषभेदादिकम् ।—

भेदा वन्ध्याबलानां हि नवधा परिकीर्त्तिताः ।
तत्राऽऽदिवन्ध्या प्रथमा पापकर्मविनिर्मिता ॥ १ ॥
रक्तेन च पृथग्दोषैः समस्तैः पञ्चधा भवेत् ।
भूतदेवापचारैश्च तिस्रो वन्ध्याः प्रकीर्त्तिताः ॥ २ ॥

अथ वन्ध्यस्य दोषभेदादिकम् ।—

पुमानपि भवेद्वन्ध्यो दोषैरेतैश्च शुक्रतः ॥ ३ ॥

अथ वन्ध्यालक्षणम् ।—

गर्भस्रावी स्मृता पूर्वं मृतवत्सा द्वितीयका ।
तृतीया स्त्रीप्रसूतिः स्यात् काकवन्ध्या सकृत्प्रसूः ॥ ४ ॥ इत्यादि ।

अथ वन्ध्यत्वस्य प्राधान्येन वातकार्य्यत्वात् तथा वक्ष्यमाणे वन्ध्याया दोषभेदादिनिरूपणे उक्तस्य "रक्तेन च" इति पदस्य प्रदुष्टार्त्तवरक्तहेत्वर्थकत्वेऽपि रक्तपद सामान्यात् वातव्याधिवातरक्ताद्यनन्तर वन्ध्यादिचिकित्सितम् उपदिदिक्षुरादौ वन्ध्याया दोषभेदादिकमाह, भेदा इति ।—आदिवन्ध्या जन्मवन्ध्या, सा पापकर्मविनिर्मिता प्राक्तनाधर्मानुष्ठानजाता । रक्तेन प्रदुष्टेनार्त्तवेनेत्यर्थः । भूतेति ।—भूतेन देवग्रह-यक्षयक्षादीनामावेशेनेत्यर्थः, देवेन इहैव जन्मनि कृतेन देवगुर्वाद्यपमानेन इत्यर्थः, तथा अपचारेण मिथ्याहारविहारादिना च ॥ १।२ ॥

प्रसङ्गात पुंवन्ध्यस्य दोषभेदादिकमाह, पुमानिति ।—दोषैः रक्तं विना पापकर्मादिभिः तथा शुक्रतः दुष्टशुक्रात् ॥ ३ ॥

वन्ध्यालक्षणमाह, गर्भेति ।—गर्भस्रावी गर्भं चतुर्थमासपर्य्यन्तं गर्भं स्रवति या सा तथोक्ता, "आ चतुर्थात्ततो मासात् प्रस्रवेद्गर्भविद्रव" इत्युक्ते, अथवा—स्राव-शब्दोऽत्र सामान्यत मोचनार्थे प्रयुक्त, तेन स्रावपातयोरुभयोरपि अवरोध । पूर्वं प्रथमा, एकविधा वन्ध्या इत्यर्थः । द्वितीयका अपरा इत्यर्थः, मृतवत्सा यथाकाले मृतसन्तानप्रसाविनी, जीवत्यपि तदा सन्ताने अचिरेणैव कालेन मृतपुत्त्रका

अथ जयसुन्दर।—

सुवर्णं रजतं ताम्रं ताप्यसत्त्वञ्च वैक्रतम्।
एकैकं निष्कमानेन सशुद्धं परिमारितम् ॥५॥
एतच्चतुर्गुणं सूतं सूताद्द्विगुणगन्धकम्।
मर्दयेल्लक्ष्मणातोयैर्बन्धुजीवरसैरपि ॥६॥
काचकूप्या ततः क्षिप्त्वा ताम्रपात्रं मुखे न्यसेत्।
विलिम्पेदभितः कूपीमङ्गुलोत्सेधया मृदा ॥७॥
विशोष्य च पुटं दद्याद्भूमौ निक्षिप्य कूपिकाम्।
गजाख्यपुटपर्य्याप्तैः शाणकर्षमितोत्पलैः ॥८॥
स्वाङ्गशीतं विचूर्ण्याथ भावयेल्लक्ष्मणाद्रवैः।
सप्तवारं विशोष्याथ करण्डान्तर्विनिक्षिपेत् ॥९॥
अश्वगन्धारजोयुक्तस्ताम्रगोक्षीरसंयुतः।
सेवितो गुञ्जया तुल्यः सितया च रसोत्तमः ॥१०॥
मासत्रयप्रयोगेण बन्ध्या भवति पुत्त्रिणी।
पुत्त्रिण्यै स्नानशुद्धायै रजःकौशिकचक्षुषो ॥११॥

या। तथा स्त्रीप्रसूतिः या केवलं स्त्र्यपत्यमेव प्रसूते सा इत्यर्थः, अपत्यसामान्यत्वेऽपि कन्याया केवलं स्त्र्यपत्यप्रसवकारिण्याः नार्य्या बन्ध्यात्वं, तस्याः मुख्यतः पुन्नामनरकत्राणासामर्थ्यात्, तृतीया अपरविधा बन्ध्या इत्यर्थः। या सकृत्प्रसूः एकवारमात्र-प्रसवकारिणी, एकमात्रपुत्त्रा इत्यर्थः, सा काकबन्ध्या साऽपि तृतीया बन्ध्या इत्यर्थः, यद्वा—या स्त्री गर्भस्रावी सा पूर्वं प्रथमा स्मृता, या स्त्री मृतवत्सा सा द्वितीयका, या च प्रसूतिः स्त्री सकृत्प्रसूः सा काकबन्ध्या, सा च तृतीया इति ॥ ४ ॥

जयसुन्दरे—ताप्यसत्त्वं माक्षिकसत्त्वम्। वैक्रतं वैक्रान्तमित्यर्थः। एतच्चतुर्गुणं मिलितसुवर्णादिभ्यः चतुर्गुणम्, तेन सूतस्य विंशतिनिष्कमानता। लक्ष्मणातोयैः लक्ष्मणामूलस्वरसैः, लक्ष्मणा च—"पुत्त्रकाकाररक्ताल्प-विन्दुभिर्लाञ्छिता सदा। लक्ष्मणा पुत्त्रजननी बस्तगन्धाकृतिर्भवेत ॥" इत्युक्तलक्षणा स्वनामख्याता। बन्धुजीवरसैः बन्धूकपुष्पस्वरसैः। भूमौ निक्षिप्य कूपिकां कूपिकां मृत्तिकायां संस्थाप्य, न तु उपलोपरि संस्थाप्य इत्यर्थः, मृत्तिकायां कूपिकां संस्थाप्य पुटं दद्यात।

गव्याज्येन च सम्साध्य तत्तदानीं हि भोजयेत् ।
ऋताव्रताविदं देयं यावन्मासत्रयं भवेत् ॥१२॥
रसेन्द्रः कथित सोऽयं चम्पकारण्यवासिभिः ।
पूर्णामृताख्ययोगीन्द्रैर्नामतो जयसुन्दरः ॥१३॥
सेवितेऽस्मिन् रसे स्त्रीणां न भवेत् सूतिकागदः ।
भवेत् पुत्रश्च दीर्घायु पण्डितो भाग्यमण्डितः ॥१४॥

अथ रत्नभागोत्तर ।—

वज्रं मरकत पद्म-राग पुष्पञ्च नीलकम् ।
वैदूर्य्यञ्चाथ गोमेदं मौक्तिक विद्रुम तथा ॥१५॥
पञ्चगुञ्जामितं सर्वं रत्नं भागोत्तरं परम् ।
तत् तन्त्रोक्तविधानेन भस्मीकुर्य्यात् प्रयत्नतः ॥१६॥
सर्वस्मादष्टगुणित भस्म वैक्रान्तसम्भवम् ।
तत्तुल्यं ताप्यज भस्म तद्वद्विमलभस्म च ॥१७॥
सर्वतस्त्रिगुणा तुल्या रसगन्धककज्जलीम् ।
सर्वमेकत्र सम्मर्द्य छागीदुग्धेन तद्दिनम् ॥१८॥

ताम्रगोक्षीरसंयुत अरुणवर्णाया गो क्षीरेण सहित । पुत्रिण्यै स्नानशुद्धायै ऋतुस्नातायै पुत्रकामायै इत्यर्थ, पुत्रजन्मानन्तर शुद्धस्नातायै इत्यर्थो वा, रक्त-कौशिकचक्षुषी रक्त कौशिकस्य पेचकविशेषस्य चक्षुषी नेत्रे, रक्तसा सह कौशिक-चक्षुषी इत्यर्थो वा, तत्र रक्त चित्रपर्पटी कर्पूरी वा, कौशिक गुग्गुलु, चक्षु, मेषशृङ्गी। भोजयेत् भोजन दद्यादित्यर्थ.। "पुत्रिण्यै भोजयेत्" इत्यत्र "पुत्रिणीं स्नानशुद्धाञ्च गलदार्द्रकचाम्बराम्। गव्याज्यपयसा सिद्ध तत्तदन्न हि भोजयेत ॥" इति कुत्रचित पाठ । इदम् औषधम् ॥ ५—१४ ॥

रत्नभागोत्तरे—पुष्प पुष्परागम् । नीलकम् इन्द्रनीलाख्यमणिम् । गोमेद रक्तवर्णमणिविशेषं स्वनामख्यातम् । पञ्चेति ।—उत्तरोत्तरभागवृद्धिक्रमेण गृहीत्वा मिलितानां नवानां पञ्चगुञ्जामितत्वम् अवधेयम्, एवञ्च वज्रस्य षोडश सर्षपाः मरकतस्य सप्तदश सर्षपा इति क्रमेण भागवृद्धौ मिलित्वा पञ्चगुञ्जामितत्व भवेत । तत् रत्नजातम्। तत्तुल्य वैक्रान्ततुल्यम्। तद्वत् ताप्यभस्मवत्, तेन च ताप्यवैक्रान्त-

विधाय पर्पटीं यत्नात् परिचूर्ण्य प्रयत्नतः।
बन्ध्याकर्कोटकीपर्ण-क्वाथेन परिमर्दयेत् ॥१९॥
काननोत्पलविंशत्या पुटेत् षोडशवारकम्।
एव रसो विनिष्पन्नो रत्नभागोत्तराभिध ॥२०॥
महाबन्ध्यादिबन्ध्याना सर्वासा सन्ततिप्रदः।
देवीशास्त्रे विनिर्दिष्टः पुंसां बन्ध्यत्वरोगनुत् ॥२१॥
सोऽयं पाचनदीपनो रुचिकरो वृष्यस्तथा गर्भिणी-
सर्वव्याधिविनाशनो रतिकरः पाण्डुप्रचण्डार्त्तिनुत्।
धन्यो बुद्धिकरश्च पुत्त्रजननः सौभाग्यकृद्योषिता
निर्दोषः स्मरमन्दिरामयहरो योगादशेषार्त्तिनुत् ॥२२॥

अथ चक्रिकाबन्धः।—

गन्धकः पलमात्रश्च पृथगष्टौ शिलाऽऽलकौ
त्रिदिन मर्दयित्वाऽथ विदध्यात् कज्जलीं शुभाम् ॥२३॥
विषाणाकारमूषायां कज्जलीं निक्षिपेत्ततः।
द्विपलस्य च ताम्रस्य तन्मुखे चक्रिका न्यसेत् ॥२४॥
सन्निरुध्यातियत्नेन सन्धिबन्धे विशोषिते।
ततः करिपुटार्द्धेन पाकं सम्यक् प्रकल्पयेत् ॥२५॥
स्वतःशीत समुद्धृत्य चक्रिकां परिचूर्णयेत्।
स्थगयेत् कूपिकामध्ये वस्त्रेण परिगालितम् ॥२६॥

विमलाना त्रयाणा प्रत्येक तुल्यभागता। सर्वत सर्वेभ्य वज्रादिविमलान्तानां रत्नाना मिलितचूर्णेभ्य। त्रिगुणाम् इति कज्जलीविशेषणम्, तुल्या रसगन्धक-कज्जली तुल्यरसगन्धकयो कज्जलीमित्यर्थ। धन्य नैरुज्यसम्पादनद्वारा धनार्जन-हेतुत्वेन धन्यत्वम्। स्मरमन्दिरामयहर योनिरोगहन्ता॥ १५—२२॥

चक्रिकाबन्धे—विषाणाकारमूषाया शृङ्गाकृतिमूषाया, मुषलाख्यमूषायामित्यर्थ। द्विपलस्येति।—पलद्वयमित ताम्र चक्रीकृत्य कज्जल्या उपरि दत्त्वा सन्धि लेपयेत। करिपुटार्द्धेन अर्द्धगजपुटेन, गजपुटार्थं खनितस्य गर्त्तस्य अर्द्धभागमात्र करीषेण-

रसोऽय चक्रिकाबन्धस्तत्तद्रोगहरौषधैः ।
दातव्यः शूलरोगेषु मूले गुल्मे भगन्दरे ॥२७॥
ग्रहण्यामग्निमान्द्ये च विद्रधौ जठरामये ।
नागोदरे तथैवोप-विष्टके जलकूर्मके ॥२८॥
स्कन्देनामन्दकृपया त्रिलोकत्राणहेतवे ।
चक्रिकाबन्धनामाऽय प्रसूतस्तोगदापहः ॥२९॥

अथ वर्द्धमान ।—

पलार्द्धप्रमिते स्वर्णे ताम्रं दत्त्वाऽचमात्रया ।
निर्वापयेच्छत वारं निक्षिप्य शुकपिच्छकम् ॥३०॥
ततश्च सारणायन्त्रे सूत्रस्थानसमोरिते ।
सारणातैलसंयुक्तं जीर्णषड्गुणगन्धकम् ॥३१॥

पूर्य्यंत्यथ । स्थगयेत् रचेत् । नागोदरे दुष्टगर्भविशेषे, तल्लक्षणमुक्त सुश्रुतेन यथा,—'शुक्रशोणित वायुनाऽभिप्रपन्नम् अवक्रान्तजीवमाध्मापयत्युदरम्, तत कदाचित् यदृच्छयोपशान्त नैगमेषापहृतमिति भाषन्ते । तमेव कदाचित् प्रलीयमान नागोदरमित्याहु" इति । चरकेणाप्युक्त यथा—"उपवासव्रतकर्मपराया पुन कदाहाराया स्नेहद्वेषिण्या वातप्रकोपणोक्तान्यासेवमानाया गर्भो न वृद्धि प्राप्नोति परिशुष्कत्वात, स चापि कालमवतिष्ठतेऽतिमात्रम्, अतिमात्रस्पन्दनश्च भवति, त नागोदर इत्याचक्षते" इति । उपविष्टक जलकूर्मकावपि दुष्टगर्भविशेषौ, तत्र उपविष्टकलक्षण यथा चरके—"यस्या पुनरुष्णतीक्ष्णोपयोगात गर्भिण्या महति गर्भे जातसारे पुष्पदर्शन स्यादन्यो वा योनिस्राव, तस्या गर्भो न वृद्धि प्राप्नोति नि स्रुतत्वात्, स कालमवतिष्ठतेऽतिमात्रम्, तमुपविष्टक इत्याचक्षते केचित" इति । जलकूर्मकलक्षणन्तु मृग्यम् ॥ २३—२९ ॥

वर्द्धमाने—निर्वापयेदित्यत्र अग्नौ प्रताप्य तैलतक्रादिषु इति द्रष्टव्यम् । शुकपिच्छक गन्धकम् । "शुकपिच्छकम्" इत्यत्र "कपिकच्छुजे" इति कुत्रचित् पाठ । सूत्रस्थानसमोरिते सूत्रस्थानप्रोक्ते, प्रथमाध्यायात एकादशाध्यायपर्य्यन्तेषु सूत्रस्थानेषु "सूते सतैलयन्त्रस्थे" इत्यादिना नवमाध्यायोक्ते, यद्यप्यत्र चरकादिवत् सूत्रस्थानादिस्थानविभागो नास्ति, तथाऽपि "सूचनात् सूत्रणा-

रस हि द्विपलं क्षिप्त्वा सारणाविधियोगतः।
सारयित्वा तत पश्चात् पिष्ट सूत प्रयत्नतः ॥३२॥
सूत्रप्रोक्तेष्टिकायन्त्रे स्वेदावेष्टनवाससाम्।
मातुलुङ्गरसैः पिष्टं चतुर्निष्कमित दनुम् ॥३३॥
ऊर्द्धञ्च विनिधायाथ जारयित्वा चतुर्गुणम्।
तमादाय रसं सम्यक् विचूर्ण्य परिगाल्य च ॥३४॥
षष्ठांशेन मृतं वज्र समं वैक्रान्तक मृतम्।
निक्षिप्य लिङ्गिकापत्र-रसैरापूर्य्य वासरम् ॥३५॥

श्चैव सूत्रस्थानमितीरितम्" इति सूत्रस्थानलक्षणोक्ते प्रथमत एकादशाध्याय-पर्य्यन्तेषु ग्रन्थेषु एतद्ग्रन्थोक्तविषयाणा सञ्ज्ञादिनियमनात् तत्पर्य्यन्ताना सूत्रस्थानत्व-मधिगन्तव्यमिति। सारणातैलसंयुक्त सारणायन्त्रस्थतैलसंयुतम्। सारणार्थं यन्त्र तैलञ्च रसेन्द्रचिन्तामणावुक्त, यथा—"अन्धमूषा तु कर्त्तव्या गोस्तनाकारसन्निभा। सैव छिद्रान्विता मध्ये गम्भीरा सारणोचिता॥" इति यन्त्रम्। "मञ्जिष्ठा किंशुकञ्चैव खदिर रक्तचन्दनम्। करवीर देवदारु सरलो रजनीद्वयम्॥ अन्यानि रक्तपुष्पाणि पिष्ट्वा लाक्षारसेन तु। तैल विपाचयेत्तेन कुर्य्यात् वीजादिरञ्जनम्॥ द्विगुणे रक्त-पुष्पाणा रक्तपीतगणस्य च। क्वाथे चतुर्गुण क्षीर तैलमेक सुरेश्वरि।॥ ज्योतिष्मती-करञ्जाख्य-कटुतुम्बीसमुद्भवम्। पाटलाकाकतुण्डाम्बु-महाराष्ट्रीरसे पृथक्॥ भेक शूकरमेषाहि-मत्स्यकूर्मजलौकसाम्। वसया चैकया युक्तं षोडशांशे सुपेषिते॥ भूलतामलमाक्षीक-द्वन्द्वमेलापकौषधे। पाचित गालितञ्चैव सारणात्तेन शुध्यति॥" इति सारणातैलम्। सारणाविधियोगत सारयित्वा, सारणाप्रकारोऽपि तत्रैवोक्त, यथा—"अस्यामेव मूषाया तत्तैलमपगतकल्कविमलमापूर्य्यमाग्निनाधिकमधस्तात द्रुत-वीजप्रक्षेपसमकालमेव समावर्जनीय सूतवर, तदनु सद्यो मूषाननमाच्छादनीयम्। एतत्तैलाक्तखण्डग्रन्थिवन्धेन अरुणासितवीजाभ्याम् अश्वनासारकर्मणा (१) मिलित-श्चेत सारित सम्यक् स्वयमित विज्ञातव्य। प्रतिसारितस्तु द्विगुणवीजेन, तत्तदनु-सारितस्तु त्रिगुणेन, अत्र त्रिविधायामेव सारणायाम् अरुणासितकर्मणो क्रामणार्थ-मौषदौषत् पन्नगवङ्गौ विश्रापणीयाविति" इति। स्वेदेति।—स्वेदाय आवेष्टनवाससाम् आवरणवस्त्राणाम्, ऊर्द्धमित्यनेन सम्बन्ध। "स्वेदावेष्टनवाससाम्" इत्यत्र "वेधावेष्ट्य च वाससा" इति क्वचित् पाठ.। दनु गन्धकम्। चतुर्गुणमिति रसापेक्षया। त गन्धक-

पुटैर्द्वादशवाराणि मध्वा द्वादशकोपलैः ।
बन्धुजीवरसेनाथ लक्ष्मणास्वरसेन च ॥३६॥
पुनः सञ्चूर्ण्य सम्पूज्य योगिनीोपिष्टदेवता ।
पुत्रिण्याः पूर्णिमायाश्च पूजितायाः विधानतः ॥३७॥
इति कृत्वाऽऽप्नुयाद्गर्भं षण्मासाभ्यन्तरात् खलु ।
आदिवन्ध्यादिका वन्ध्या याश्चान्या दुष्टयोनयः ॥३८॥
प्राप्नुयुर्जीवपुत्त्रं हि भाग्यसौभाग्यसयुतम् ।
पुंसामपि च वन्ध्यत्वं ह्यल्परेतस्त्वमेव च ॥
वीजदोषा विचित्राश्च विनश्यन्ति न संशयः ॥३९॥

मित्यर्थ । षष्ठांशेन इति रसापेक्षया। समं वैक्रान्तं रससमं वैक्रान्तभस्म । लिङ्गिका-पत्ररसे शिवलिङ्गीपत्ररसे । अत्र "मध्वा" इति पाठ समीचीनतया न भाति, व्याकरणदुष्टत्वात् मधुन उणविरोधित्वाच्च, "मध्यद्वादशकोपलै" इत्येव युक्त पाठ, मध्यप्रमाणद्वादशकरीषैरित्यर्थ । मध्वा इत्येव पाठे तु—मधू मधूक तेन मधूकपुष्परसेन सह मर्दयित्वा इत्यर्थ, नामैकदेशग्रहणेन नामसाकल्यग्रहणनियमात। पुत्रिण्या इति ।—यथाविधानेन पुत्रवती नारी पूर्णिमा तिथिश्च पूजयेदित्यर्थ, एतत्तु तासा प्रसादनार्थं कार्य्यं, दृश्यते च लोके, अपुत्रिण्या पुत्रकामया पुत्रिण्या अर्चनादिक क्रियते इति। पुत्रिण्या पूर्णिमायाश्च इत्यत्र आशिष गृह्णीयादिति शेष । "पुत्रिण्याः पूजितायाः" इत्यत्र "पुत्रच्छापूर्णनाम्नी च सेवितश्च" इति कुत्रचित् पाठ । रोगहृद्योगयुक्त रोगहृता तत्तद्रोगनाशिना योगेन औषधेन द्रव्येण वा इत्यर्थ, सह युक्त प्रयुक्त । अयमर्थ,—कर्षद्वयमिते द्रवीभूते स्वर्णे कर्षमाण द्रवीभूत ताम्र निक्षिप्य आलोड्य च तैलतक्रादिषु निक्षिपेत, एव शतवार कुर्य्यात, तत ताम्रपरिमितेन गन्धकेन सह मर्दयित्वा सारणायन्त्रे त सस्थापयेत। तत सारणातैलमर्दित षड्गुणगन्धकजीर्णं द्विपल पारद तत्र दत्त्वा सारणाविधानेन सारयेत। अनन्तर त पारद स्वर्णादि-सहित पिष्ट्वा इष्टकायन्त्रे स्थापयेत्, वस्त्रेणाच्छादयेच्च इष्टकायन्त्रगर्त्तमुखम्। ततः मातुलुङ्गरसपिष्ट चतुर्निष्क गन्धक वस्त्रोपरि दत्त्वा शरावेणाच्छाद्य च शरावपालिकयो सन्धि मृदा निरुध्य कपोतपुटे पचेत्। एव जारित रस जारितेन चतुर्गुणेन तेनैव गन्धकेन सह विचूर्ण्य वस्त्रपूत कारयेत, तत षडंशेन वज्रभस्मना समेन च वैक्रान्त-भस्मना मर्दयित्वा शिवलिङ्गीपत्ररसेनाप्लाव्य च दिनमेक स्थापयेत्। अथ द्वादशसङ्ख्यकेन

ब्रह्मज्योतिर्मुनिवरमतो वर्द्धमानो रसोऽयं
बन्ध्यारोगं हरति सकलं योनिदोषानशेषान्।
सूतीरोगानपि बहुविधान् दुःखसाध्यान् समस्तान्
रोगानन्यानपि खलु तथा रोगहृद्योगयुक्तः ॥४०॥

अथ द्रुतिसार।—

युक्तं हि व्योमजद्रुत्यां तुल्यांशं स्वर्णयुग्रसम्।
पिष्टीकृतं चिर पिष्ट्वा मल्लसम्पुटके क्षिपेत् ॥४१॥
निष्कमात्रं बलिं दत्त्वा शतवार पुटेत्ततः।
सम्यक् निष्पिष्य सङ्गाल्य करण्डान्तर्विनिक्षिपेत् ॥४२॥

इत्युक्तो द्रुतिसारनामकरसो बन्ध्यामयध्वंसनः
पुष्टोयः खलु सूतिकामयहरो वृष्यश्चिरायुष्करः।
सम्यक्सिद्धबलिद्रुतिप्रकलितो गुञ्जामित सेवितः
कुर्यात्तीव्रतरा क्षुधं त्वथ महारोगादिरोगान् जयेत् ॥४३॥

मध्यप्रमाणोपलेन पुट दद्यात, एव द्वादशवार कुर्यात, प्रतिपुटञ्च लिङ्गिनीपत्र-रसेनाप्लाव्य दिनमेक स्थापयेत। एव पुटयित्वा बन्धूकपुष्पस्वरसेन लक्ष्मणास्वरसेन च सम्मर्द्य संशोष्य चूर्णयित्वा च स्थापयेदिति। "रोगहृद्योगयुक्त" इत्यनन्तरं क्वचित् "समजीर्णाभ्रसूतेन भस्मैतत साधयेत खलु। अन्यथा न यथाप्रोक्त फल दत्त इत्यब्रवीत ॥ पाण्डुर्ग्रहणीप्रमेहगुदजातीसारयक्ष्मापह सद्यो दीपनपाचनो रुचिकरो नि शेषगुल्मापह। कासश्वासबलासपीनसमरुत्पित्तार्त्तिमात्यन्तिक वृष्य पुष्टिकर समस्तगदहृद्योगेन सयोजितम् ॥ इति योग" इत्यधिक पाठ ॥३०—४०॥

द्रुतिसारे—व्योमजद्रुत्या द्रुताभ्रे, अभ्रद्रुतिप्रकारास्तु रसेन्द्रचिन्तामणौ यथा—"अगस्त्यपवनिर्य्यासैर्मर्दित शूरणोदरे। गोष्ठभूस्थ घन मास जायते जलसन्निभम् ॥" इति। अन्यच्च—"स्वरसेन वज्रवल्ल्या पिष्ट सौवर्चलान्वितं गगनम्। पक्वञ्च शराव-पुटे बहुवार भवति रसरूपम् ॥ निजरसबहुपरिभावितसुरदालीचूर्णवापेन। द्रवति पुन सस्थान भजते कनकत्व कालेऽपि ॥" इत्यादयो बहव। युक्त निक्षिप्त-मित्यर्थ, तुल्याश द्रुताभ्रसम स्वर्णयुग्रस स्वर्णसयुक्त पारदमित्यर्थ, तुल्याशम् अभ्रद्रुतितुल्य स्वर्णयुग् द्विभागस्वर्ण रसमित्यर्थो वा। मल्लसम्पुटके शरावसम्पुटे।

अत: सर्वामयध्वंसी रसोऽयं हरिसूचित: ।
जीवत्पुत्त्रप्रद: स्त्रीणां यौवनस्थैर्य्यदायक: ॥४४॥
भूतप्रेतपिशाचानां भयेभ्योऽभयदायक: ।
जडानां दोहदार्त्तानां मन्दबुद्धिमतामपि ॥ ४५॥
मण्डूकीरससंयुक्तो दातव्यो वचया सह ।
जन्मवन्ध्या: काकवन्ध्या मृतवत्साश्च या: स्त्रिय: ॥
तासां पुत्त्रोदयार्थाय शम्भुना सूचित: पुरा ॥४६॥

अथ वन्ध्यागर्भसम्प्राप्ति: ।—

अथ सर्पाक्षीप्रयोग: ।—

समूलपत्रां सर्पाक्षीं रविवारे समुद्धरेत् ।
एकवर्णगवां क्षीरै: कन्याहस्तेन पेषयेत् ॥४७॥
ऋतुकाले पिबेद्वन्ध्या पलार्द्धं तद्दिने दिने ।
क्षीरशाल्यन्नमुद्गञ्च अल्पाहारं प्रकल्पयेत् ॥४८॥
उद्वेगं त्वथ शोकञ्च दिवा निद्राञ्च वर्जयेत् ।
न कर्म कारयेत् किञ्चित् वर्जयेच्छीतमातपम् ॥
एवं सप्तदिनं कुर्य्याद्वन्ध्या भवति गर्भिणी ॥४९॥

बलिं गन्धकम, अत्र गन्धकस्य निष्कमानतोक्त्या स्वर्णाभ्रयोरपि तथात्वमधिगन्तव्यम् । शतवारं पुटेदित्यत्र प्रतिपुटं गन्धकनिष्कं दातव्यमिति बोद्धव्यम् । पुत्त्रीयं पुत्त्रहितं पुत्त्रप्रदं इत्यर्थ: । सम्यगिति ।—सम्यक् यथाविधि सिद्धया निष्पादितया बलिद्रुत्या गन्धकद्रवेण, द्रुतगन्धकेन, प्रकल्पितं मिश्रितं । हरिसूचितं हरिणा प्रचारितं इत्यर्थ:, "हरिसूचित" इत्यत्र "नन्दिनोदित" इति पाठान्तरम् । दोहदार्त्तानां गर्भाभिलाषापूरणजनितपीडितानामित्यर्थ: । मण्डूकीरससंयुक्त: मण्डूकी मण्डूकपर्णी ब्राह्मी वा तद्रससहितं, जन्मवन्ध्यादिभ्य: वचामण्डूकीरसाभ्यां सह दातव्योऽयं रस इत्यर्थ: । शम्भुना सूचित: पुरा पूर्वकाले भगवता शिवेन आविष्कृत इत्यर्थ: ॥ ४१—४६ ॥

सर्पाक्षीप्रयोगे—सर्पाक्षी सर्पकङ्काली "पानशिउलि" इति ख्याताम्, रास्नाविशेष वा । कन्याहस्तेन कुमारीहस्तेन, अनूढाहस्तेनेत्यर्थ: ॥ ४७—४९ ॥

अथ देवदालीप्रयोग ।—

देवदालीयमूलन्तु ग्राहयेत् पुष्यभास्करे ।
निष्कत्रयं गवा क्षीरैः पूर्ववत्क्रमयोगतः ॥
बन्ध्या प्रलभते गर्भं दिनं पथ्यं यथा पुरा ॥५०॥

अथ शरपुङ्खाप्रयोग ।—

शीततोयेन सम्पिष्टं शरपुङ्खीयमूलकम् ।
कर्षं पीत्वा लभेद्गर्भं पूर्ववत्क्रमयोगतः ॥५१॥
नो चेदपरमासि तु कारयेत् पूर्ववत् फलम् ।
पतिसङ्गे लभेद्गर्भं नात्र कार्य्या विचारणा ॥५२॥

अथ रुद्राक्षादिप्रयोग ।—

एकमेव तु रुद्राक्षं सर्पाक्षी कर्षमात्रकम् ।
पूर्ववच्च गवा क्षीरैर्ऋतुकाले प्रदापयेत् ॥५३॥
महागणेशमन्त्रेण रक्षा तस्यास्तु कारयेत् ।
एवं दिनत्रय कुर्य्याद्बन्ध्या भवति पुत्रिणी ॥५४॥

अथ श्वेतकण्टकारीप्रयोग ।—

सुश्वेतकण्टकार्य्याश्च मूलं तद्वच्च गर्भकृत् ॥५५॥

देवदालीप्रयोगे—देवदालीयमूल धुन्धिघोषकमूलम् । पुष्यभास्करे पुष्यानक्षत्रस्थे सूर्य्ये इत्यर्थ, भास्करस्य पुष्यर्क्षस्थितिकालस्तु सौरनभस तृतीयांशेन-चतुर्थदिनादारभ्य सप्तदशवासरस्य चत्वारिंशद्दण्डान् यावत् । पूर्ववत्क्रमयोगत ऋतुकाले पूर्वयोगोक्तविधानेनेत्यर्थः । एवमुत्तरत्राप्यवगन्तव्यम् ॥ ५० ॥

शरपुङ्खाप्रयोगे—अपरमासे परमासीय ऋतुकाले इत्यर्थ ॥ ५१।५२ ॥

रुद्राक्षादिप्रयोगे—एकमेव रुद्राक्षम् एक रुद्राक्षगुडकम् । महागणेशमन्त्रस्तु "ओँ नमो महाविनायकाय अमृत रक्ष रक्ष, मम फलसिद्धिं देहि रुद्रवचनेन स्वाहा" इति ॥ ५३।५४ ॥

श्वेतकण्टकारीप्रयोगे—सर्वं स्पष्टम् ॥ ५५ ॥

अथ विष्णुक्रान्ताप्रयोग. ।—

पूर्वपुत्त्रवती तासां कर्म तद्वच्च कथ्यते ।
पेषयेन्महिषीक्षीरैर्विष्णुक्रान्तां समूलकाम् ॥५६॥
महिषीनवनीतेन ऋतुकाले तु भक्षयेत् ।
एवं दिनं दिनं कुर्य्यात् पथ्यं युक्त्या च पूर्ववत् ॥
गर्भं प्रलभते नारी काकवन्ध्या सुशोभनम् ॥५७॥

अथ अश्वगन्धाप्रयोग ।—

अश्वगन्धीयमूलन्तु ग्राहयेत् पुष्यभास्करे ।
पेषयेन्महिषीक्षीरैः पलार्द्धं पाययेत् सदा ॥
सप्ताहाल्लभते गर्भं काकवन्ध्या चिरायुषम् ॥५८॥

अथ मृतवत्सालक्षणम ।—

गर्भः सम्भूतमात्रस्तु पक्षात् मासाच्च वत्सरात् ।
म्रियते द्वित्रिवर्षैर्वा यस्याः सा मृतवत्सका ॥
तत्र योग' प्रकर्त्तव्यो यथा शङ्करभाषित: ॥५९॥

अथ शङ्करोक्तदैवव्यपाश्रयचिकित्सा ।—

मार्गशीर्षेऽथवा ज्यैष्ठे पूर्णायां लेपिते गृहे ।
नूतनं कलसं पूर्णं गन्धतोयेन कारयेत् ॥६०॥
शाखाफलसमायुक्तं सर्वरत्नसमन्वितम् ।
सुवर्णमुद्रिकायुक्तं षट्कोणे मण्डले स्थितम् ॥६१॥

विष्णुक्रान्ताप्रयोगे—पूर्वपुत्त्रवती पूर्वं प्रथमम् एकवारमेवेत्यर्थ, पुत्त्रवती या काकवन्ध्या इत्यर्थ । कर्म तद्वत पुत्त्रवत कर्म, पुत्त्रप्रद कर्मेत्यर्थ । विष्णुक्रान्ताम अपराजिताम् । दिन दिन दिवसत्रयमित्यर्थ ॥ ५६।५७ ॥

अश्वगन्धाप्रयोगे—अश्वगन्धीयमूलम् अश्वगन्धामूलम् ॥ ५८ ॥

मृतवत्सालक्षणे—सर्वं सुगमम् ॥ ५९ ॥

शङ्करोक्तदैवव्यपाश्रयचिकित्सायां—पूर्णायां पञ्चम्यां दशम्यां पौर्णमास्यां वा तिथौ । लेपिते इत्यत्र गोमयेन इति पूरणीयम् । सुवर्णमुद्रिकायुक्तं स्वर्णमुद्रासयुक्तम् ।

तन्मध्ये पूजयेद्देवीमेकान्तानामविश्रुताम् ।
गन्धपुष्पाक्षतैर्धूप-दीपैर्नैवेद्यसंयुतैः ॥६२॥
अर्चयेद्भक्तिभावेन मत्स्यैर्मांसैः समत्स्यकैः ।
ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा ॥६३॥
वाराही च तथा चैन्द्री षट्पत्रेषु च मातृकाः ।
पूजयेन्मन्त्रलिङ्गेन ओङ्कारैर्नामसंयुतैः ॥६४॥
दधिभक्तेन पिण्डानि सप्तसङ्ख्यानि कारयेत् ।
षट्सङ्ख्या षट्सु पत्रेषु आहृत्य कल्पयेत् पृथक् ॥६५॥
उल्लेख्य सप्तकं पिण्डं शुचिस्थाने बहिः क्षिपेत् ।
तैर्भुक्तैर्गृहमागच्छेच्चक्राग्रे योगमाचरेत् ॥६६॥
कन्यकायोगिनीरामा भोजयेत् सकुटुम्बकम् ।
दक्षिणा दापयेत्तासां देवताग्रे निवेद्य च ॥६७॥
विसृज्य देवताश्चाथ नद्यां तत् कलसोदकम् ।
शकुनं वीक्षयेद्धीमान् शुभेन शुभमादिशेत् ॥६८॥
विपरीते पुनः कुर्य्याद्योगं तद्वत् सुसिद्धिदम् ।
प्रतिवर्षमिदं कुर्य्यात् दीर्घजीवी सुतो भवेत् ॥६९॥
"ओँ ह्रां ह्रीं एकान्तदेवतायै नमः ।" अनेन मन्त्रेण पूजा
जपश्च कार्य्यः ।

षट्कोणे मण्डले स्थितं षट्कोणं मण्डलं लिखित्वा तदुपरि कलसं स्थापयेदित्यर्थः । एकान्तानामविश्रुताम् एकान्ता इति नाम्ना ख्याताम् । मन्त्रलिङ्गेन तत्तद्देवताया वीजमन्त्रेण इत्यर्थः । ओङ्कारैर्नामसंयुतैः ओँ ब्राह्म्यै नमः इत्यादिरूपैरित्यर्थः । कल्पयेत् पृथक् ब्राह्मीत्यादिदेवताभ्य उत्सर्गं कुर्य्यादित्यर्थः । उल्लेख्य मृतवत्सया एकान्ताया देव्या नामोल्लेखं कारयित्वा निवेद्येत्यर्थः । तैः सप्तभिः पिण्डैः भुक्तैः, काकादिप्राणिभिरिति शेषः, तेषु भुक्तेषु सत्सु इत्यर्थः । चक्राग्रे मण्डलसम्मुखे इत्यर्थः, उपविश्येति शेषः, योगमाचरेत देव्या ध्यानं कुर्य्यादित्यर्थः । शकुनमिति ।—धीमान् पुरोहितः शकुनं शुभसूचकनिमित्तं वीक्षयेत्, मृतवत्सामिति शेषः । शुभेन शुभशकुनदर्शनेन शुभं कल्याणं पुत्रस्य दीर्घजीवनप्राप्तिरूपमित्यर्थः, आदिशेत्

अथ युक्तिव्यपाश्रये बन्ध्याककोंटकीप्रयोग ।—

प्राङ्मुखः कृत्तिकाऋक्षे बन्ध्याककोंटकीं हरेत् ।
तत्कन्दं पेषयेत्तोये कर्षमात्रं पिबेत् सदा ॥
ऋतुकाले तु सप्ताह दीर्घजीवी सुतो भवेत् ॥७०॥

अथ प्रथममासि पद्मकादिकल्क ।—

अकस्मात् प्रथमे मासे गर्भे भवति वेदना ।
गोक्षीरैः पेषयेत्तुल्यं पद्मकोशीरचन्दनम् ॥
पलमात्रं पिबेन्नारी त्र्यहाद्गर्भः स्थिरो भवेत् ॥७१॥

अथ द्वितीयमास नीलोत्पलादिकल्क ।—

नीलोत्पलं मृणालञ्च खण्डी कर्कटशृङ्गिका ।
गोक्षीरैर्द्वितीये मासि पीत्वा शाम्यति वेदना ॥७२॥

अथ तृतीयमासि श्रीखण्डादिकल्क ।—

श्रीखण्ड तगरं कुष्ठ मृणाल पद्मकेशरम् ।
पिबेच्छीतोदकैः पिष्टं तृतीये वेदना न हि ॥७३॥

अथ तृतीयमासि नीलोत्पलादिकल्क ।—

नीलोत्पलमृणालानि गोक्षीरैश्च कशेरुकम् ॥७४॥

जानीयात। विपरीते दुरदृष्टवशात अशुभशकुने दृष्टे इत्यर्थं । "क्रा क्रीम्" इत्यत्र "क्री क्रीम्" इति पाठान्तरम् ॥ ६०—६९ ॥

युक्तिव्यपाश्रयचिकित्साया बन्ध्याककोंटकीप्रयोगे—बन्ध्याककोंटकी तिक्त-ककोंटकीम् ॥ ७० ॥

प्रथममासिकपद्मकादिकल्के—पद्मक पद्मकाष्ठम् । चन्दन रक्तचन्दनम् । पलमात्र-मिति त्र्याणा मिलिताना ज्ञातव्यम ॥ ७१ ॥

द्वितीयमासिकनीलोत्पलादिकल्के—खण्डी मुद्गपर्णी, "खण्डम" इति पाठे—इक्षुविकारविशेष, "खाँडगुड" इति भाषा ॥ ७२ ॥

तृतीयमासिकश्रीखण्डादिकल्के—श्रीखण्ड श्वेतचन्दनम् ॥ ७३ ॥

तृतीयमासिकनीलोत्पलादिकल्के—मृणालानीति बहुवचन पद्मोत्पलकुमुदा-दीना मृणालबोधनार्थम् ॥ ७४ ॥

अथ गर्भिणीज्वरे पाठादिकषायः ।—

पाठामुस्तावयःस्थाम्बु-सारिवापद्मकैः शृतम् ।
शीतं तोयं निहन्त्याशु गर्भिणीज्वरवेदनाम् ॥७५॥

अथ गर्भिणीज्वरे छिन्नादिकषायः ।—

छिन्नाश्रीपर्णिकाक्वाथः सिताक्षौद्रयुतो हरेत् ।
गर्भिणीनां ज्वरं घोरं लङ्केशमिव राघवः ॥७६॥

अथ गर्भिणीज्वरे पयस्यादिकषायः ।—

पयस्यासारिवायष्टी-बलालोध्रमधूद्भवः ।
दुग्धेन मिश्रितः क्वाथो हरेद्गर्भवतीज्वरम् ॥७७॥
दुर्जयः सर्वरोगेषु गर्भिणीनां ज्वरः खलु ।
तापो जूर्त्तिषु गर्भस्य विक्रिया कुरुतेतराम् ॥७८॥

अथ गर्भिण्यतिसारे वृक्षकत्वगादिकषायः ।—

वृक्षकत्वग्घनौ देव-दारुदार्विभावरी ।
गर्भिण्या अतिसारघ्नः क्वाथ एषां भवेद्ध्रुवम् ॥७९॥

अथ गर्भिण्यतिसारे श्रीपर्ण्यादिबलादिक्वाथौ ।—

श्रीपर्णीयष्टिगोप्यब्द-दार्वीक्वाथोऽतिसारनुत् ।
बलादुरालभापाठा-शुण्ठीमुस्ताकषायवत् ॥८०॥

गर्भिणीज्वरे पाठादिकषाये—वयःस्था ब्राह्मी आमलकं वा । अम्बु वालकम् । सारिवा अनन्तमूलम् ॥ ७५ ॥

गर्भिणीज्वरे छिन्नादिकषाये—छिन्ना गुडूची । श्रीपर्णिका गाम्भारी । सिता-क्षौद्रे प्रक्षेप्ये ॥ ७६ ॥

गर्भिणीज्वरे पयस्यादिकषाये—पयस्या क्षीरकाकोली । मधूद्भव मधु मधूकसारं तज्ज । दुग्धोऽत्र प्रक्षेपविधया प्रयोज्य । जूर्त्तिषु ज्वरेषु तापः ज्वरसन्ताप इत्यर्थः । जूर्त्तिषु इत्यत्र बहुवचनं ज्वरस्य अष्टविधत्वापेक्षया अवधातव्यम् ॥ ७७।७८ ॥

गर्भिण्यतीसारे वृक्षकत्वगादिकषाये—वृक्षकत्वक् कुटजवल्कलम् । घनः मुस्तकम् । दारुविभावरी दारुहरिद्रा ॥ ७९ ॥

गर्भिण्यतीसारे श्रीपर्ण्यादिक्वाथ-बलादिक्वाथयोः ।—गोपी सारिवा । बला ••

अथ गर्भिण्या उदावर्त्तादौ पुनर्नवादिक्वाथ ।—

जात: पुनर्नवाद्राभ्यां क्वाथः क्षीरयुतो निशि ।
पीतो हरेदुदावर्त्तं गुल्मार्शः शोफवेदनाम् ॥८१॥

अथ गर्भिण्याः शोथादौ अभयादिक्वाथ निर्गुण्ड्यादिचूर्णञ्च ।—

घृतक्षीरगुडाभ्याऽऽर्द्र-क्वाथं सिन्धेन चूर्णिताम् ।
कणां सयोज्य सेवेत शोफपित्तापनुत्तये ॥८२॥

अथ गर्भिणीशोथे पुनर्नवादिलेप ।—

पुनर्नवावचाकल्क-धान्यैर्लेपोऽतिशोफनुत् ॥८३॥

अथ गर्भिण्या उदावर्त्तादौ वर्षाभूक्वाथ ।—

गुडाज्यसहित क्वाथ वर्षाभूमूलसाधितम् ।
उदावर्त्ते च शोफे च गर्भिणीं पाययेद्भिषक् ॥८४॥

अथ गर्भिण्याः पित्तार्त्तौ यष्टिकादियवागू ।—

पित्तार्त्तिं हन्ति यष्टीका-द्राक्षामलकसाधिता ।
पीता दुग्धयवागूश्च गर्भिणीनामसंशयम् ॥८५॥

मुस्ताकषायवत इत्यत्र बलादिकषायो यथा अतिसारनुत तथा श्रीपर्ण्यादिक्वाथोऽपि अतिसारनुत, एवञ्च श्रीपर्ण्यादिना प्रथमो योग बलादिना च द्वितीयो योग: अवगन्तव्य ॥ ८० ॥

गर्भिण्या उदावर्त्तादिषु पुनर्नवादिक्वाथे—क्षीरयुत दुग्धप्रक्षेपयुक्त ॥८१॥

गर्भिण्या शोथादौ अभयादिक्वाथ निर्गुण्ड्यादिचूर्णयो,—अभया हरीतकी । आर्द्रम् आद्रकम् । सिन्धेन निर्गुण्ड्या । घृतक्षीरगुडाभ्यार्द्रक्वाथ इत्यनन्तर सेव्य इति शेष, तथा चूर्णिता कणाञ्च सिन्धेन सयोज्य सेवेत इत्यन्वय, हरीतक्यार्द्रक-क्वाथे घृतादित्रय प्रक्षिप्य शोथादिनाशनाय पिबेत तथा निर्गुण्डीचूर्णं पिप्पलीचूर्णञ्च ऐकध्य सेवेत इति निष्कर्ष । "घृत सयोज्य" इत्यत्र "घृतक्षीरगुडान् वार्द्रक्वाथ सिन्धानुचूर्णित । सयोज्य नित्यम्" इति क्वचित पाठ ॥ ८२ ॥

गर्भिणीशोथे पुनर्नवादिलेपे—कल्क शिल्क । धान्य धन्याक । अत्र "पुनर्नवावचाकल्को धान्यैर्लेप" इति पाठकल्पना साधीयसी, तथात्वे धान्यै: धान्ययूषैरित्यर्थ, काञ्जिकैरिति यावत् ॥ ८३ ॥

गर्भिण्या उदावर्त्तादिषु वर्षाभूक्वाथे—गुडाज्ययो प्रक्षेप ॥ ८४ ॥

गर्भिण्या पित्तार्त्तिहरयष्टिकादियवाग्वा—दुग्धयवागू दुग्धमिश्रिता यवागू:

अथ गर्भिण्या श्वासकासे तिक्तादिकषायः।—

तिक्ताहरीतकीभार्गी-वचाशुण्ठीकषायकम्।

सगुडं पाययेद्वैद्य. श्वासकासापनुत्तये ॥८६॥

अथ गर्भिणीकासे मरिचप्रयोग।—

मरीचचूर्णं सक्षौद्र-सिताज्यं कासनाशनम् ॥८७॥

अथ गर्भिण्या वान्तौ लाजादिकषाय।—

लाजैलाकोलमज्जाम्बु निपीतं वान्तिनाशनम् ॥८८॥

अथ गर्भिण्या हिक्कायां बालबिल्वप्रयोग।—

बालबिल्वोद्भव' क्वाथो हिक्कां हन्यात् समाक्षिकः ॥८९॥

अथ गर्भिण्या अग्निमान्द्ये अजमोदादिचूर्णम।—

अजमोदाऽश्वगन्धा च द्वे कणे जीरकं तथा।

लीढा मधुगुडोपेता निहन्युर्मन्दवह्निताम् ॥९०॥

अथ गर्भिण्या वातरोगे बालादिक्षीरं क्षीरयवागूश्च।—

बालबिल्वविदारीभिः पृश्निपर्ण्या च साधितम्।

क्षीरं क्षीरयवाग्वाऽपि पिबेद्वातकृतामये ॥९१॥

रित्यर्थ, यष्टिकादीनां क्वाथेन कल्केन वा यवागूं साधयित्वा दुग्धेन सह पिबेदिति निष्कर्ष ॥ ८५ ॥

गर्भिण्या' श्वासकासे तिक्तादिकषाये—गुड प्रक्षेप्य ॥ ८६ ॥

गर्भिणीकासे मरिचप्रयोगे—मरिचचूर्णस्य माषकद्वय क्षौद्रादिभिरवलेह्यम् ॥८७॥

गर्भिण्या वान्तौ लाजादिकषाये—कोलमज्जा बदरफलास्थिमध्यम्। "कोलमज्जा" इत्यत्र "अङ्कोलमज्जा" इति पाठान्तरम्। अम्बु क्वाथ ॥ ८८ ॥

गर्भिण्या हिक्कायां बालबिल्वप्रयोगे—बालबिल्व बिल्वशलाटु ॥ ८९ ॥

गर्भिण्या अग्निमान्द्ये अजमोदादिचूर्णे—द्वे कणे पिप्पली गजपिप्पली च ॥९०॥

गर्भिण्या वातामये बालादिक्षीरे—बाल बालक, बिल्व बिल्वपेशी। "विदारीभि" इत्यत्र "विदारीभ्याम्" इति पाठकल्पना साधीयसी, तथात्वे बालबिल्व बिल्वशलाटु। क्षीरयवाग्वाऽपि बालबिल्वादिसाधितक्षीरेण पक्वया यवाग्वा इत्यर्थ, यवाग्वा इत्यत्र विवक्षावशात तृतीया, यवागू पिबेदित्यर्थः। "क्षीरयवागू वा" इति पाठकल्पना साधीयसी ॥ ९१ ॥

अथ गर्भिण्या मूत्ररोगे श्वदंष्ट्रादिक्वाथः ।—

श्वदंष्ट्राबलयोः क्वाथो मूत्ररोगे प्रशस्यते ॥९२॥

अथ गर्भिण्या मासानुमासिकयोगाः ।—

सुरदारु वयःस्था च शाकबीजञ्च यष्टिका ।
बला कृष्णतिलास्ताम्र-वल्ली चाश्मन्तकस्तथा ॥९३॥
नीलोत्पलं वयस्था च गुडूची सारिवा तथा ।
मधुयष्टी च पद्मञ्च रास्ना सारिवया सह ॥९४॥
काश्मर्य्यो बृहती क्षीरी शृङ्गवल्लीत्वचौ घृतम् ।
मधुपर्णी बला शिग्रु श्वदंष्ट्रा पृश्निपर्णिका ॥९५॥
सितामधुककशृङ्गाट-द्राक्षाबिसकशेरुकाः ।
सप्तश्लोकार्द्धनिर्दिष्टान् योगान् सप्त पयोऽन्वितान् ॥
पिबेत् क्रमेण मासेषु गर्भस्रावादिवारणान् ॥९६॥

गर्भिण्या मूत्ररोगे श्वदंष्ट्रादिक्वाथे—मूत्ररोगे मूत्रकृच्छ्रादौ ॥ ९२ ॥

मासिकयोगेषु सुरदार्वित्यादिप्रथममासिकयोगे—वयःस्था क्षीरकाकोली, सुश्रुते "वयःस्था" इत्यत्र "पयस्या" इति पाठः । शाकबीजं शाकः महाद्रुमविशेषः "शेगुन्" इति भाषा, तस्य बीजम् । यष्टिका मधुयष्टिका । बलेत्यादिद्वितीयमासिकयोगे—"बला" इत्यत्र "शतावरी" इति सुश्रुते पाठः । ताम्रवल्ली मञ्जिष्ठा । अश्मन्तकः अम्ललोटकः । नीलोत्पलमित्यादितृतीयमासिकयोगे—वयस्था क्षीरकाकोली, "वयस्था" इत्यत्र "पयस्या" इति पाठान्तरम् । "वृक्षादनी पयस्या च लता चोत्पलसारिवा" इति सौश्रुतपाठे—लता दूर्वा प्रियङ्गुर्वा । उत्पलसारिवा अनन्तमूलम् । मधुयष्टीत्यादिचतुर्थमासिकयोगे—पद्मं पद्मपुष्पम्, "पद्मम्" इत्यत्र "पद्मा" तथा "सारिवया सह" इत्यत्र "अनन्तासारिवा" इति सौश्रुतपाठे—पद्मा भार्गी । काश्मर्य्य इत्यादिपञ्चममासिकयोगे—काश्मर्य्यं गाम्भारीफलम् । क्षीरी क्षीरिका पक्षे क्षीरिवृक्षा वा, एकवचनन्तु क्षीरित्वसामान्यात् । शृङ्गं पद्मं, जीवकं वा, वल्ली कैवर्त्तमुस्तकं, त्वक् गुडत्वक् । "काश्मर्य्यौ · ·घृतम्" इत्यत्र "बृहत्यौ काश्मरी चापि क्षीरिशुङ्गास्त्वचो घृतम्" इति सौश्रुतपाठे तथा "बृहतीद्वयकाश्मर्य्यक्षीरिशुङ्गास्त्वचो घृतम्" इति वाग्भटपाठे च—क्षीरिशुङ्गास्त्वच' क्षीरिणां क्षीरिवृक्षाणां वटादीनां शुङ्गाः अविकसितपत्रमुकुलानि त्वचश्च वल्कलानि चेत्यर्थः । "घृतम्" इत्यत्र "बिसम्"

अथ गर्भिणीवाते उशीरादिचीरम् ।—

उशीरयष्टीसंसिद्धं गर्भिणीवातहृत् पयः ॥९७॥

अथ गर्भिणीवाते द्राक्षादियवागू ।—

द्राक्षायष्टिकसिद्धा च यवागूश्च तथाफला ॥९८॥

अथ गर्भिण्या पित्ते बलादिक्काथ ।—

बला वासा पृथक्पर्णी-निर्य्यूहश्चापि पित्तनुत् ॥९९॥

अथ गर्भिण्या कामलादौ बलादिक्काथ ।—

स पुनश्छिन्नया युक्तो गर्भिणीकामलापहः ।
कासं श्वास तथा रक्त-पित्तञ्चाशु विनाशयेत् ॥१००॥

अथ गर्भिण्या सर्वरोगे बलाप्रयोग ।—

अघृत' सघृतो वाऽपि सदुग्धो वाऽप्यदुग्धवान् ।
एक एव बलाक्काथो गर्भिणीसर्वरोगनुत् ॥१०१॥

अथ मूढगर्भाया लक्षणम ।—

विलोमवायुना गर्भो जीवन् यदि न निःसरेत् ।
स गर्भसङ्ग इत्युक्तो मूढगर्भो—" ॥१०२॥

इति चक्रदत्तोक्त' पाठः । मधुपर्णीत्यादिषष्ठमासिकयोगे—मधुपर्णी यष्टिमधु ; "मधुपर्णी" इत्यत्र "मधुयष्टिका" इति चक्रदत्तोक्त' पाठ. । सितेत्यादिसप्तम-मासिकयोगे—बिस मृणालम् । पयोऽन्वितान् दुग्धसयुक्तान् , कल्कविधया एते उपयोज्या , केचित्तु चीरपाकपरिभाषया इत्याहु ॥ ९३—९६ ॥

गर्भिणीवाते उशीरादिचीरे—यष्टी यष्टिमधु ॥ ९७ ॥

गर्भिणीवाते द्राचादियवाग्वा—षडङ्गपरिभाषया शृतेन द्राचामधुकक्काथेन सिद्धा यवागू । तथाफला पूर्ववत् वातहरा इत्यर्थ ॥ ९८ ॥

गर्भिण्या पित्ते बलादिक्काथे—पृथक्पर्णी पृश्निपर्णी ॥ ९९ ॥

गर्भिण्या कामलादौ बलादिक्काथे—स पुन बलादिनिर्य्यूह पुन । छिन्नया गुडूच्या , छिन्नाऽत्र प्रचेपविधया योज्या , छिन्नासहितानां बलादीनां निर्य्यूहो वा ॥ १०० ॥

गर्भिण्या, सर्वरोगे बलाप्रयोगे—सर्वं स्पष्टम् ॥ १०१ ॥

अथ अन्तर्मृतापत्याया लक्षणम् ।—

"—मृते शिशौ ।
स्तब्धाध्मानं शिशिरजठरं सास्यशोषं समूर्च्छं
गर्भास्पन्दः श्वसनकमहा-पूतिगन्धो भ्रमार्त्तिः ।
कृच्छ्रोच्छ्वासोऽसितरुचिवपुः स्तब्धनेत्रे व्यथोग्रा
विण्मूत्रार्त्तिर्भवति हि मृतापत्यगर्भाङ्गनायाः ॥१०३॥

अथ मूढगर्भाया असाध्यलक्षणम् ।—

अकालश्वाससंयुक्ता बद्धभ्रष्टभगान्विता ।
शीताङ्गी पूतितोद्गारा मूढगर्भा न जीवति ॥१०४॥

अथ मूढगर्भचिकित्सा ।—

अथ करञ्जबीजादिप्रलेपः अहिनिर्मोकसुराधूपप्रयोगौ च ।—

बीजं करञ्जसञ्जातं कपित्थतुलसीजटा ।
दुग्धे पिष्ट्वा विलिप्याथ नाभिपत्कारलेपतः ॥१०५॥
सुरया वाऽहिनिर्मोकैः सम्यग्योनिप्रधूपनात् ।
सुखं सूते वधूर्मूर्ध्नि स्नुक्पयःक्षेपणादपि ॥१०६॥

स्त्रीरोगसामान्यात् मूढगर्भचिकित्सितं विवक्षुः तल्लक्षणमाह, विलोमेति ।—विलोमवायुना प्रतिलोमवायुना । गर्भसङ्गः गर्भानिःसरणं मूढगर्भ इत्युक्तः ॥१०२॥

अन्तर्मृतापत्याया लक्षणमाह, मृते इति ।—शिशौ मृते गर्भान्तर्मृते इत्यर्थः । स्तब्धाध्मानं स्तब्धता देहस्य जडता आध्मानञ्च । शिशिरजठरम् उदरस्य शैत्यम् । गर्भास्पन्दः गर्भस्य निश्चलता । श्वसनकमहापूतिगन्धः श्वसनके निश्वासे महान् पूतिगन्धः दुर्गन्धः । असितरुचिवपुः कृष्णवर्णदेहः । विण्मूत्रार्त्तिः विण्मूत्रसङ्ग इत्यर्थः ॥ १०३ ॥

मूढगर्भाया असाध्यलक्षणमाह, अकालेति ।—अकालश्वाससंयुक्ता श्वासहेतोः श्रमादेरभावेऽपि पुनः पुनः दीर्घनिश्वासनिक्षेपिणी । बद्धेति ।—बद्धः रुद्धच्छिद्र इत्यर्थः, भ्रष्टः स्वस्थानाच्चलितश्च भगः योनिः तेन अन्विता युक्ता सङ्कुचितयोनिः, चलितयोनिश्च इत्यर्थः । पूतितोद्गारा पूतिता दुर्गन्धिता उद्गारे यस्याः सा ॥१०४॥

सुखप्रसवार्थं करञ्जबीजादिप्रलेपे—कपित्थतुलसीजटा कपित्थतुलस्योर्मूलम् ।

अथ हलिनीप्रयोग ।—

हलिनीमूलिका नाभि-गुह्यवस्तिप्रलेपिता ।
विशल्यां कुरुते नारीं श्वेतपुष्पा च सा क्षणात् ॥१०७॥

अथ यष्टिकादिकल्क ।—

यष्टीलुङ्गजटा पिष्टा पीता सूतिकरी ध्रुवम् ॥१०८॥

अथ लाङ्गल्यादिलेप ।—

लाङ्गलीमधुसिन्धूत्थैर्योनिलेपात् स्रवेद्वधूः ॥१०९॥

अथ मातुलुङ्गीरम्भाप्रयोगौ ।—

मातुलुङ्गयाश्च मूले च रम्भाया वा कटिस्थिते ॥११०॥

अथ सिद्धार्थादिवस्ति ।—

सिद्धार्थमागधीकुष्ठ-गोलोमीमिषिकल्कितः ।
निरूहः स्नेहपटुयुक् जरायु पातयेत्तराम् ॥१११॥

विलिप्य इत्यत्र नाभिपल्कारमिति शेष, सुख सूते इत्युत्तरेणान्वय । नाभिपल्कारलेपतः इत्यस्य सुरया इत्यनेन सम्बन्ध, सुरया वा करञ्जवीजादिक पिष्ट्वा नाभिपल्कारलेपात् सुख सूते इति निष्कर्ष । अहिनिर्मोक स्नुहीक्षीरप्रयोगयो,—अहिनिर्मोके इत्यत्र अहिशब्देन कृष्णसर्प ग्राह्य । स्नुक्पय स्नुहीक्षीरम् ॥ १०५।१०६ ॥

सुखप्रसवार्थं हलिनीप्रयोगे—हलिनीमूलिका लाङ्गलीमूलम् । श्वेतपुष्पा च सा श्वेतपुष्पा हलिनीत्यर्थ, श्वेतपुष्पा श्वेतापराजिता वा ॥ १०७ ॥

सुखप्रसवार्थं यष्टिकादिकल्के—यष्टी यष्टिमधुक, लुङ्गजटा मातुलुङ्गमूलम्, योगोऽय मधुघृताभ्या पातव्य चक्रपाणिधृततन्त्रान्तरीयवचनदर्शनात्, तथा हि—"मातुलुङ्गस्य मूलानि मधुक मधुसयुतम् । घृतेन सह पातव्य सुख नारी प्रसूयते ॥" इति ॥ १०८ ॥

सुखप्रसवार्थं लाङ्गल्यादिलेपे—मधुना पेषण कार्य्यम् । स्रवेत् गर्भं मुञ्चेदित्यर्थ ॥ १०९ ॥

सुखप्रसवार्थं मातुलुङ्गीरम्भाप्रयोगयो,—कटिस्थिते इत्यस्य "वधू स्रवेत्" इति पूर्वेण सम्बन्ध, कटिस्थिते कट्या धृते सति इत्यर्थ ॥ ११० ॥

सिद्धार्थादिवस्तौ—गोलोमी श्वेतदूर्वा वचा वा । मिषि मधुरिका, एतै कल्कितः सिद्धार्थादिकल्कसयुत. । निरुह आस्थापन रूक्षवस्तिरित्यर्थ । स्नेहपटुयुक्

अथ सिद्धार्थकानुवासनम् ।—

सिद्धं सिद्धार्थकं तैलं पायौ वा स्मरमन्दिरे ।
अनुवासनतः शीघ्रमपरां पातयेद्ध्रुवम् ॥११२॥

अथ सूतिकाचिकित्सा ।—

अथ कौरण्टकादिक्वाथः ।—

कौरण्टकं कुलत्थञ्च सर्वैरेभिः शृतं जलम् ।
युक्तं शर्करया पीतं सूतिशूलज्वरापहम् ॥११३॥

अथ पञ्चमूलक्वाथः ।—

लोहखण्डयुतं पञ्च-मूलिकासाधितं जलम् ।
नाशयेत् सूतिकारोगान् सवातान् विविधान् खलु ॥११४॥

स्नेहः तैलादि पटु सैन्धवलवणं तद्युक् स्नेहपटुभ्यां युक्तं इत्यर्थः । जरायुम् अमरा-मित्यर्थः । सिद्धार्थादिकं समभागं पिष्टा जलेनालोड्य च तैलादिस्नेहं लवणञ्च अनुरूप-मात्रया प्रक्षिप्य निरूहः कार्य्यः ॥ १११ ॥

सिद्धार्थकानुवासने—सिद्धं सिद्धार्थादिकल्कपक्वमित्यर्थः, सिद्धार्थकं तैलं सार्षपं तैलम् । अनुवासनं स्नेहवस्तिः । सिद्धार्थादिकल्कपादेन चतुर्गुणजलेन च सार्षपतैलं पक्त्वा अनुवासनं कर्त्तव्यम् । अपराम् अमराम् ॥ ११२ ॥

गर्भिणीचिकित्सानन्तरं सूतिकाचिकित्सामाह । तत्र कौरण्टकादिक्वाथे—कौरण्टकं कुरण्टकं पीतपुष्पा झिण्टी तस्य इदं कुरण्टकमूलमित्यर्थः । "सर्वैरेभिः" इत्यस्य बहुत्वे प्रयोगश्चिन्त्यः, द्रव्यबहुत्वाभावात् ॥ ११३ ॥

पञ्चमूलक्वाथे—लोहखण्डयुतं तप्तलौहखण्डस्पृष्टम् । पञ्चमूलिकासाधितमित्यत्र पञ्चमूलं महदिति ज्ञातव्यं, दीपनत्वादुष्णवीर्य्यत्वाच्च । लौहगुडकमेव वह्नौ प्रताप्य पञ्चमूलक्वाथे निर्वाप्य च तं क्वाथं पाययेत । तथा च रसरत्नाकरे—"ध्मापयित्वा-ऽनले लौहं मुद्गयूषे निषेचयेत । पञ्चमूलस्य वा क्वाथे पिप्पलीसलिलेऽथवा ॥ पीतं यूषादि तच्छीघ्रं सर्वसूतीरुजाहरम् ॥" इति । योगरत्नाकरेऽप्युक्तं—"पञ्चमूलस्य क्वाथं वा तप्तलौहेन सङ्गतम् । सूतिकारोगनाशाय पिबेद्वा तद्युतां सुराम् ॥" इति ॥ ११४ ॥

अथ भूनिम्बादितैलम् ।—

भूनिम्बनिम्बभद्राख्य-गन्धसप्तच्छदत्वचा ।
तैलं पचेत्तदभ्यङ्गात् सूतिकासर्वरोगनुत् ॥११५॥

अथ सौभाग्यशुण्ठी ।—

अञ्जलिद्वितये तोये कंसमात्रपयोऽन्विते ।
तुलार्द्धशर्करां दत्त्वा गुडपाके कृते क्षिपेत् ॥११६॥
एलारिङ्गिणिकावेल्ल-व्योषजीरकदीप्यकान् ।
भृङ्गं लवङ्गं बोलञ्च प्रत्येकञ्च पलं पलम् ॥११७॥
मिषिं पञ्चपला धान्यं पलत्रयमितं तथा ।
शुण्ठीमष्टपलां सम्यक् विचूर्ण्य परिमिश्रयेत् ॥११८॥
एषा सौभाग्यशुण्ठीति शम्भुदेवेन कीर्त्तिता ।
सेविता हन्ति सूताया ज्वरं रोगमनेकधा ॥११९॥

भूनिम्बादितैले—भूनिम्बं किराततिक्तकम् । भद्रं मुस्तकं, भद्रा प्रसारणीत्यर्थो वा । सप्तच्छदत्वचा सप्तपर्णवल्कलेन । भूनिम्बादीनां पादिककल्केन चतुर्गुणेन जलेन च तैलं पक्तव्यम् । क्वचिदेतदनन्तरं—"तैलं लाक्षादिकं नाम सर्वामयविनाशनम् ॥ चन्दनं सारिवा लोध्रं मृद्वीकाशर्करान्वितम् । क्वाथं कृत्वा प्रदातव्यं गर्भिण्या ज्वरशान्तये ॥ ह्रीबेररक्तचन्दनबला धान्यार्कवत्सादनी मुस्तोशीरयवासपर्पटवृषा क्वाथं पिबेद्गर्भिणी । नानावर्णरुजातिसारकगदे रक्तस्रुतौ वा ज्वरे योगोऽयं मुनिभिः पुरा निगदितः सूत्यामयेषूत्तमः ॥" इत्यधिकपाठो दृश्यते ॥११५॥

सौभाग्यशुण्ठ्याम्—अञ्जलिद्वितये कुडवद्वये, शरावमिते इत्यर्थः । तोये तोयदे घृते इत्यर्थः, "नामैकदेशग्रहणेनापि नामसमुदायग्रहणम्" इति न्यायात् तोयशब्देनात्र तोयदस्य ग्रहणं, तोयदश्च घृतं तथा च मेदिनी—"तोयदो मुस्तके मेघे पुमानाज्ये नपुंसकम्" इति । तन्त्रान्तरे घृतपाठदर्शनादत्रापि तोयशब्देन घृतस्यैव ग्रहणमभिप्रेतम् । कंसमात्रपयोऽन्विते दुग्धाढकयुक्ते, द्रवद्वैगुण्यात् षोड़शशरावदुग्धसहिते इत्यर्थः । गुडपाके कृते गुडपाकलक्षणे समुदिते इत्यर्थः । रिङ्गिणिका कैवर्त्तमुस्तकम् । वेल्लं विडङ्गम् । दीप्यकं यमानी कृष्णजीरकं वा, तन्त्रान्तरे "साजाजीजीरादपि" इति पाठदर्शनात्, तत्र अजाजीशब्देन कृष्णजीरकस्याभिधानम् । भृङ्गं गुडत्वक् । बोलं गन्धरसं, बोलपत्रमिति वा, तन्त्रान्तरे "दलं" इति

प्लीहान मलबन्धञ्च पाण्डुगुल्मारुचीस्तथा ।
कासश्वासक्रिमीनग्नि-मान्द्यादिकगदांस्तथा ॥
कायाग्निजनन ह्येतत् सूतिकामृतमुच्यते ॥१२०॥

अथ पर्पटीरस ।—

मञ्जारीमितवज्रहेमजरसैर्व्योमार्ककान्तैर्मृतै-
र्भागैस्सूत्तरवर्द्धितै. समरसैर्गन्धैर्द्विकर्षान्वितै ।
जात पर्पटिकारसो घृतकणायुक्तो हरेत् सर्वश:
सूतीनां हि महागदान् गदचय नानानुपानान्वित' ॥१२१॥

पाठदर्शनात्, बोलपत्र तेजपत्रसदृशसुगन्धिपत्रविशेष, "वाटियापत्र" इति ख्यातम्। मिषि मधुरिका। कायाग्निजननं जठराग्निसन्दीपनम्। योगरत्नाकरे तु तोयस्थाने सर्पि, कसमात्रपय स्थाने पयस प्रस्थद्वय, दौप्यकमित्यत्र अजाजी, बोलमित्यत्र दल तथा भृङ्गादिद्रव्यत्रयस्थाने नागकेशर तेजपत्रच दृश्यते, तथा हि—"आज्यस्याञ्जलियुग्ममत्र पयस प्रस्थद्वय खण्डत पञ्चाशत्पलमत्र चूर्णितमथ प्रक्षिप्यते नागरम्। प्रस्थार्द्धं गुडवद्विपाच्य विधिना मुष्टिद्वय धान्यकात मिष्या पञ्चपल पलं क्रिमिरिपो साजाजिजीराद्दपि ॥ व्योषाम्भोददलोरगेन्द्रकुसुम सद्राविडीना पल पक्व नागरखण्डसञ्ज्ञकमिदं सौभाग्यद योषिताम् ॥" इति। कल्पना चास्या एव—गुण्ठ्या अष्टपल चूर्णं घृतशरावे मनाक् भृष्ट्वा सपादषट्शरावमिता शर्करा षोडशशरावदुग्धेनालोड्य तत्र निक्षिप्य गुडपाकविधिना पचेत, आसन्नपाके च एलादिचूर्णं दत्त्वा अवतारयेदिति। क्वचिदेतदनन्तर—"नागरस्य पलान्यष्टौ घृतस्य पलविंशति । चीराढकेन सयुक्त खण्डस्यार्द्धपल तथा ॥ शताह्वाजीरकव्योष विसुगन्धि यमानिका । कारवीमिषिचव्याग्नि मुस्तानाञ्च पल पलम् ॥ लेहीभूतमिद सर्वं घृतभाण्डे निधापयेत् । त यथाग्निबल खादेत प्रसूता च विशेषत ॥ तत् वर्ण्यं बल्यमायुष्य बलीपलितनाशनम्। वयस स्थापन ह्येतदग्निवृद्धिकर परम् ॥ आमवातप्रशमनं सौभाग्यकरमुत्तमम्। मक्कल्लशूलशमन सूतिकारोगनाशनम् ॥" इत्यधिकपाठ ॥ ११९—१२० ॥

पर्पटीरसे—मञ्जारी साद्धपादद्वय, तच्च एकभागापेक्षया बोद्धव्य, तन्मिता वज्रहेमजरसा वज्र हीरक, हेमज सुवर्णमाक्षिक, रस रसाञ्जन ते ते, अत्र वज्रादीना त्रयाणा प्रत्येक व्योमभागापेक्षया साद्धपादद्वयमान, ततश्च व्योमस्य कोल-

अथ स्वर्णादिप्रयोग ।—

स्वर्णतारघनभानुतीक्ष्णकं तेषु चैकमतिमात्रमारितम् ।
सूतिकासकलरोगनाशनं रोगहारि विहितानुपानतः ॥१२२॥

अथ योनिव्यापच्चिकित्सा ।—

अथ योनिशूले निर्गुण्डीप्रयोग ।—

निर्गुण्डीपत्रनिर्य्यासो गुडो जीर्णः सुरान्वित ।
सेवितस्त्र्यहमत्राभ्या योनिशूलविनाशन ॥१२३॥

अथ प्रस्रसिन्या कारल्लीकन्दप्रयोग ।—

निर्गताऽपि विशेद्योनि कारल्लीकन्दलेपिता ॥१२४॥

अथ शिथिलयोनौ इन्द्रगोपप्रयोग ।—

इन्द्रगोपाग्निलेपेन श्लथयोनिर्दृढा भवेत् ॥१२५॥

भागत्व वज्रादीना प्रत्येक माषकपञ्चोन्मान ग्राह्यम् । व्योम अभ्र, कान्त कान्तलौहम् । भागैस्तूत्तरवर्द्धितै उत्तरोत्तरमेकैकभागवृद्धै । समरसैरित्यादौ रसगन्धयोर्मिलित्वा कर्षद्वयमान, प्रत्येकमित्यपरे । घृतकणायुक्त पिप्पलीचूर्णघृतमिश्रित । वज्रादिक सर्वं मर्दयित्वा रसपर्पटीवत पचेदिति ॥ १२१ ॥

स्वर्णादिप्रयोगे—तार रजतम् । घनम् अभ्रम् । भानु ताम्रम् । तीक्ष्णक तीक्ष्णलौहम् । तेष्विति ।—स्वर्णादिष्वेतेषु मध्ये एक यत्किञ्चिदेक स्वर्ण वा तार वा इत्यादिरूपम् अतिमात्रमारित सुजीर्णमित्यर्थ । रोगेति ।—विहितानुपानत तत्तद्रोगहितानुपानयोगात् रोगहारि सूतिकारोगव्यतिरिक्तान्यविधरोगनाशन, भवेदिति शेष ॥ १२२ ॥

सूतिकानन्तर स्त्रीरोगविशेषयोनिव्यापच्चिकित्सामाह । तत्र योनिशूलहरनिर्गुण्डीप्रयोगे—निर्गुण्ड्यादीना त्रयाणा समभागता । "सुरान्वित" इत्यत्र "सुरासुत" इति कस्यचित पाठ ॥ १२३ ॥

प्रस्रसिन्या कारल्लीकन्दप्रयोगे—निर्गताऽपि योनि कारल्लीकन्दलेपिता कारवेल्लीमूललेपिता विशेत् अन्त प्रविशेत , यद्वा—या योनि विशेत् अन्त प्रविशेत, साऽपि कारल्लीकन्दलेपिता निर्गता वहिर्निःसृता भवेदित्यर्थ, अन्तर्मुखयोनि वहिर्भवतीति यावत्, "सुषवीमूललेपाच्च प्रविष्टान्तर्वहिर्भवेत" इति सिद्धयोगदर्शनात् ॥ १२४ ॥

शिथिलयोनौ इन्द्रगोपप्रयोगे—इन्द्रगोपाग्निलेपेन इन्द्रगोपाख्यकीटविशेषप्रलेपेन,

अथ विवृताया माकन्दमूलादिलेप ।—

माकन्दमूलकर्पूर-मधुभिश्च जरत्स्त्रिय' ।
कुरुते संवृता योनिं कन्यकाया इव ध्रुवम् ॥१२६॥

अथ श्रीपर्णीतैलम् ।—

श्रीपर्णीरसकल्काभ्यां तैलं सिद्धं तिलोद्भवम् ।
तत्तैलं तुलिकेनैव स्तनयोः परिदापयेत् ॥१२७॥
पतितावुच्छ्रितौ स्त्रीणां भवेयातां पयोधरौ ।
गजकुम्भसमाकारावुन्नतौ परिमण्डलौ ॥१२८॥

अथ बालचिकित्सा ।—

अथ बालस्य गर्भक्लेशनिवारणोपाय ।—

गर्भनिर्गतबालस्य कणास्वर्णं प्रदापयेत् ॥१२९॥

यद्यपि अग्निशब्देनैव इन्द्रगोपशब्देनैव वा इन्द्रगोपाख्यकीटविशेषो लभ्यते, तथाऽपि एकपर्य्यायकस्य पदद्वयस्य युगपदभिधान "पद्मिनीषण्डम्" इत्यादिप्रयोगवत ज्ञातव्यम् ; अथवा—इन्द्रगोपाख्यसरीसृपविशेषस्य निषेधार्थम् अग्ने, चित्रकस्य च निषेधार्थ मिन्द्रगोपस्य ग्रहणम् । इन्द्रगोपाग्नि वार्षिककीटविशेष, "आषाढे पोका" इति ख्यातम् , इन्द्रगोप तदाख्यकीटविशेष, अग्नि चित्रक इत्यर्थो वा, "इन्द्र-गोपाज्यलेपेन" इति पाठान्तरे—आज्य घृत, घृतेन इन्द्रगोप पिष्ट्वा प्रलेप दातव्य' ॥ १२५ ॥

विवृताया माकन्दमूलादिलेपे—माकन्दमूलम् आम्रवृक्षस्य मूलम्, "माकन्दमूल" इत्यत्र "मदफल" इति चक्रोक्तपाठे—"मद कस्तूरी, फल जातीफल, किं वा मदफलं मदनफलमेव, एतैर्मधुना पिष्टैर्योनिप्रपूरणम्" इति शिवदास । संवृता सङ्कुचिताम् । योनिं विवृता योनिमित्यर्थ , विवृता योनिं संवृता कुरुते इति ॥ १२६ ॥

श्रीपर्णीतैले—श्रीपर्णी गाम्भारी तस्या रस त्वग्रस तैलाच्चतुर्गुण , कल्कोऽपि त्वच एव स्नेहपाद । तुलिकेन तुलकेनेत्यर्थ, "तुलकेन" इति चक्रधृत-पाठ ॥ १२७।१२८ ॥

सूतिकार्त्ताया दुष्टस्तन्यादिपानात् बालाना रोगसम्भवात सूतिकानन्तर बालरोग-चिकित्सिते वक्तव्ये आदौ बालस्य गर्भक्लेशनिवारणोपायमाह, गर्भेति ।—कणास्वर्णं मारितमारितस्वर्णचूर्णम् , कणा पिप्पली, स्वर्णञ्चेति वा ॥ १२९ ॥

अथ सद्योजातबालस्य सञ्ज्ञाजननोपायः ।—

पाषाणद्वितयं युञ्ज्यात् कांस्यभाजनमुच्चकैः ।
तेन त्रस्तः ससञ्ज्ञः स्याद्योनिनिर्गमपीडितः ॥१३०॥

अथ सद्योजातबालस्य ज्वरादिनिवारणोपायः ।—

सुखोष्णैः काञ्जिकैर्बालं सम्प्रोक्ष्य द्विस्त्रिवारतः ।
देयः शिरसि बालस्य घृतपिण्डो ज्वरापहः ॥
शिरोगतविकारघ्नो मुख्यो रक्षाकरस्तथा ॥१३१॥

अथ पित्तज्वरे रोहिणीक्षीरम् ।—

भक्षणं रोहिणीकल्के सिद्धं पानानुलेपतः ।
ज्वरं पित्तोत्तरं हन्ति मुस्ताक्वाथ इव ध्रुवम् ॥१३२॥

निःसरणकाले अपत्यपथपीडनजनितक्लेशेन निःसञ्ज्ञस्य सञ्ज्ञाजननमाह, पाषाणेति ।—पाषाणद्वितयं प्रस्तरखण्डद्वयं कांस्यभाजनं कांस्यपात्रं वा उच्चकैः उच्चशब्दं कृत्वा युञ्ज्यात् घर्षेत्, आहन्यादित्यर्थः ॥ १३० ॥

"प्राणिनः सज्वरा एव जायन्ते सज्वरा एव म्रियन्ते" इति चरकोक्त्या भूमिष्ठकालिकज्वरादिनाशकमुपचारमाह, सुखोष्णैरिति ।—ज्वरापहः भूमिष्ठकालिकज्वरापहः, यद्वा—ज्वरशब्दस्य रोगसामान्यवाचित्वात् ज्वरापहशब्देन गर्भरुजापह इत्यर्थो बोद्धव्यः । शिरोगतविकारः योनिसम्पीडनेन शिरसः चिपिटत्वादिरूपः तालुपातादिरूपो वा, तं हन्तीति तथोक्तः । मुख्यः श्रेष्ठः ॥ १३१ ॥

पित्तज्वरघ्नं रोहिणीक्षीरं—रोहिणीकल्के सिद्धम् इत्यत्र अनन्तरश्लोकात् सिंहावलोकितन्यायेन क्षीरमिति पदं समाकृष्य अन्वेतव्यं, ततश्च रोहिणीकल्के सिद्धं क्षीरं भक्षणं कारयितव्यमित्यर्थः, रोहिणी कटुकी । क्षीरसाधनञ्च "द्रव्यादष्टगुणं क्षीरं क्षीरात्तोयं चतुर्गुणम् । क्षीरावशेषः कर्त्तव्यः क्षीरपाके त्वयं विधिः ॥" इति परिभाषानुसारेण कर्त्तव्यम् "भक्षणम्" इत्यत्र "भक्षणे" इति कस्यचित् पाठः । पानानुलेपतः पानं रोहिणीकल्के सिद्धस्य अम्भसः पानं, तेनैव कल्केन अनुलेपश्च ताभ्याम्, यद्वा—रोहिणीकल्के सिद्धं भक्षणं यवाग्वादिरूपमन्नं, तथा पानानुलेपतः रोहिणीकल्के सिद्धस्य क्षीरस्य अम्भसो वा पानात् तस्यैव कल्कस्यानुलेपाच्च इत्यर्थः । मुस्ताक्वाथ इव इति दृष्टान्तेन मुस्ताक्वाथोऽपि पित्तज्वरं हन्ति इत्यर्थो ऽप्यवगम्यते ॥ १३२ ॥

अथ पित्तज्वरे अश्वत्थक्षीरम् ।—

अश्वत्थपल्लवैश्चाम्भः क्षीरं पक्वं निषेवितम् ।
पित्तजातं ज्वरं तीव्रं बालानां हन्ति निश्चितम् ॥१३३॥

अथ गन्धोत्पलजटादिकल्कः ।—

गन्धोत्पलजटापिष्टा कटुकी नाशयेज्ज्वरम् ॥१३४॥

अथ सहदेव्यादिचूर्णम् ।—

सहदेवीकणाभृङ्ग-क्षौद्रं लीढं हरेच्छिशोः ।
वमिकासज्वरव्याधीन् क्षौद्रेणातिविषा तथा ॥१३५॥

अथ न्यग्रोधादि क्वाथः ।—

न्यग्रोधजम्ब्वाम्रशिरीषकाणां
क्वाथो रसो वा नवपल्लवानाम् ।
पित्तातिसारज्वरवान्तिमूर्च्छा-
तृष्णा निहन्यान्मधुना शिशूनाम् ॥१३६॥

अथ रक्तातीसारहरचूर्णम् ।—

मध्वम्बुशृङ्गीपाठाब्दं रक्तातीसारहृच्छिशोः ॥१३७॥

पित्तज्वरघ्नाश्वत्थक्षीरे—अश्वत्थपल्लवैः पक्वमम्भः क्षीरञ्च क्षीरपरिभाषया अम्भः क्षीरञ्चैकध्यं पक्वं इत्यर्थः, यद्वा—अश्वत्थपल्लवैः पक्वम् अम्भः क्वाथः, क्षीरं च इति योगद्वयम् ॥ १३३ ॥

गन्धोत्पलजटादिकल्के—गन्धोत्पलं कुमुदपुष्पं श्वेतपद्मं वा, तस्य जटा मूलं कन्द इत्यर्थः, जटा जटामासी वा, "जटा" इत्यत्र "जले" इति क्वचित् पाठः, तथा ताभ्यां वा पिष्टा कटुकी ॥ १३४ ॥

सहदेव्यादिचूर्णे—सहदेवी बला दण्डोत्पला वा । भृङ्गं गुडत्वक् । अतिविषा-प्रयोगे—क्षौद्रेणातिविषा तथा वम्यादिव्याधीन् हरेदित्यर्थः ॥ १३५ ॥

न्यग्रोधादिक्वाथे—न्यग्रोधादीनां वल्कलस्य क्वाथः । रसो वा नवपल्लवानां न्यग्रोधादीनामेव नवपल्लवानां रसः ॥ १३६ ॥

रक्तातीसारहरचूर्णे—अम्बु बालकम् । शृङ्गी कर्कटशृङ्गी । मधुना लेहः कार्य्यः चूर्णयोगोऽयम् ॥ १३७ ॥

अथ सक्षीरबोलप्रयोग।—

क्षीरं सबोलं कण्ठोर-शिरःकफहरं शिशोः ॥१३८॥

अथ मधुकादिकल्क।—

मधुकं मरिचं पिष्टं गोजले परिषेवितम्।
विनाशयति वेगेन बालानां मूत्रविड्ग्रहम् ॥१३९॥

अथ यष्ट्यादिघृतम्।—

यष्टीलोध्रकणागन्ध-बालाशाल्मलिसारिवा।
सुगन्धा माक्षिकश्चेति सिद्धं सर्पिर्निषेवितम् ॥
शुष्यद्गात्रस्य बालस्य बृंहणं बलकारि तत् ॥१४०॥

अथ शङ्खनाभ्यादिवर्त्ति।—

शङ्खनाभिकणापथ्या-रसाञ्जनविनिर्मिता।
वर्त्तिर्निहन्ति मधुना बालनेत्राखिलामयान् ॥१४१॥

अथ अश्वगन्धा घृतम्।—

क्षीरेऽश्वगन्धया ताम्र-सूतान्तैः सह साधितम्।
घृतं पुष्टिकरं वर्ण्यं बलकृत् सुखकारि च ॥१४२॥

सक्षीरबोलप्रयोगे—बोल गन्धबोल, तच्च रक्तिक रक्तिद्वय वा क्षीरेणालोड्य पेयम् ॥ १३८ ॥

मधुकादिकल्के—गोजले, गोमूत्रे, बहुवचनन्त्वत्र बहुधा पेषणबोधनार्थम् ॥ १३९ ॥

यष्ट्यादिघृते—गन्ध गन्धाह्वः प्रियङ्गुरित्यर्थ, "गन्धा" इति पाठेऽपि—स एवार्थ वंशलोचना वा। बाला बालक सूक्ष्मैला वा, यद्वा—गन्धबाला इत्येकपद, सुगन्धिबालकमित्यर्थ। "बाला" इत्यत्र "बला" इति पाठान्तरम्। शाल्मलीशब्देन तन्मूल ग्राह्यम्। सुगन्धा सूक्ष्मा एलबालुका वा, "सुगन्धि" इति पाठेऽपि—एलबालुक कशेरुका वा। यष्ट्यादीना कल्क स्नेहचतुर्थांश जल चतुर्गुण, सर्पिषश्च प्रस्थमेकत्र पक्तव्यम्। बृंहण पुष्टिकरम् ॥ १४० ॥

शङ्खनाभ्यादिवर्त्त्यां—"पथ्या" इत्यत्र "मन शिला" इति चक्रधृतपाठ ॥१४१॥

अश्वगन्धाघृते—अश्वगन्धया ताम्रसूतान्तैश्च कल्कै सह क्षीरे साधित घृतमित्यन्वय., ताम्रसूतान्तै ताम्र रक्तचन्दन ताम्रभस्म वा, सूत. पारद, पारदभस्म

अथ तालुकण्टकलक्षणम् ।—

श्लेष्मा हन्तालुमांसस्थः करोति कुपितः शिशोः ।
तालुकण्टकमेतेन तालुस्थाने च निम्नता ॥१४३॥
तृष्णा तालुविपाकश्च स्तन्यद्वेषश्च विड्ग्रहः ।
भ्रमास्यशोषः कण्डूति-ग्रीवामूर्द्धगता वमिः ॥
अक्षिरोगादिकञ्चापि—" ॥१४४॥

अथ तालुकण्टकचिकित्सा ।—

"—तत्र चोन्नीय तालुकम् ।
प्रतिसार्य्यं यवक्षार-क्षौद्राभ्यामतियत्नतः ॥१४५॥

इत्यर्थ, अन्त मुक्ता तैः । क्षीरमत्र चतुर्गुणम् । "ताम्रसूतात्तै सह" इत्यत्र "सार्द्ध बलाक्वाद्यैश्च" इति क्वचित पाठ ॥ १४२ ॥

बालरोगविशेषस्य तालुकण्टकस्य लक्षणमाह, श्लेष्मेति ।—हत् हारी नाशक इत्यर्थ, घोर इति यावत् । "श्लेष्मा हत" इत्यत्र "श्लेष्मा तु" इति पाठान्तरम् , "तालुमांसे कफ क्रुद्धः कुरुते तालुकण्टकम्" इति वाग्भटे पाठ । एतेन तालुकण्टकेन । तालुस्थाने शिरस्तालुनि, "तेन तालुप्रदेशस्य निम्नता मूर्द्धि जायते" इति वाग्भटदर्शनात । विड्ग्रह मलसरोध , "विड्ग्रह" इत्यत्र "शकृद्द्रवम्" इति वाग्भटपाठे—शकृद्द्रव भिन्नपुरीषता । अत्र तु विड्ग्रह इत्यनेन शकृद्द्रवमित्यस्य विरोध न आशङ्कनीय, यत द्रवमलनि सरणात प्राक् विट्सङ्गो भवति , यदुक्त सुश्रुते अतीसारपूर्वरूपे—"हृन्नाभिपायूदरकुक्षितोद गात्रावसादानिलसन्निरोधा । विट्सङ्ग आध्मानमथाविपाको भविष्यतस्तस्य पुर सराणि ॥" इति । अत्र तु एतदेवाश्रयीकृत्य विड्ग्रह इत्युक्तम् , अथवा गृह्णातीति ग्रह ग्रहण, विष पुरीषस्य ग्रह अपा धातुभि ग्रहण निश्रणमित्यर्थ, अब्धातुभि सह मिश्रीभूय प्रवर्त्तनमिति यावत , किं वा दोषाणा दुर्ज्ञेयगतिकत्वात विड्ग्रहोऽपि कदाचित सम्भवतीति समाधानम् । ग्रीवामूर्द्धगता कण्डूति ग्रीवाया मूर्द्धि च कण्डू । "ग्रीवामूर्द्धगता" इत्यत्र "ग्रीवादुर्वहता" इति रुग्विनिश्चयोक्तपाठ, "ग्रीवादुर्द्धरता" इति वाग्भटोक्त: पाठो वा सुगम समीचीनश्च ॥ १४३।१४४ ॥

तालुकण्टकस्य चिकित्सामाह, तत्रेति ।—तत्र तालुकण्टके । उन्नीय ऊर्द्धीकृत्य ॥

यद्वा विश्वाकणानिम्ब-गोमयोत्थरसैस्तथा।
पथ्याकुष्ठवचाकल्कं स्तन्येन मधुना सह॥
पीतं निहन्ति वेगेन बालानां तालुकण्टकम्॥१४६॥

अथ गुदकीटस्य निदानलक्षणे।—

प्रस्वेदान्मललेपाद्वा रक्तश्लेष्मभवो गुदे।
गुदकीटो भवेद्रोगस्तीव्रव्रणसमन्वितः॥१४७॥

अथ गुदकीटचिकित्सा।—

शृतशीताम्बुशैलेय-लुकचूर्णं मधूत्कटम्।
तेनापानव्रणं सम्यक् लेपयेद्भिषगुत्तमः॥१४८॥
त्रिफलाबदरीपत्र-क्वाथेन परिषेचयेत्।
रागकण्डूमतो रक्तं जलूकाभिः समन्वितम्॥
पित्तव्रणचिकित्सा च सकलाऽत्र प्रशस्यते॥१४९॥

प्रतिसार्य्य उद्घृष्य। विश्वा शुण्ठी। तथा प्रतिसार्य्य इत्यर्थः। पथ्यादिकल्कपानञ्च प्रतिसारणानन्तरं कार्य्यम्। वाग्भटेन तु प्रतिसारणीयं यवक्षारादिकं विश्वादिकञ्च तथा पातव्यञ्च पथ्यादिकं पृथक् पृथक् पठितं न तु प्रतिसार्य्य पिबेदित्येवम्॥१४५।१४६॥

गुदकीटस्य निदानं लक्षणञ्चाह, प्रस्वेदादिति।—प्रस्वेदात् अतिघर्मात्, मललेपात् शकृन्मूत्रलिप्तत्वात्। "गुदकीट" इत्यत्र "गुदकिट्ट" इति पाठान्तरम्। सुश्रुते तु व्याधिरयम् "अहिपूतनम्" इति नाम्ना ख्यातम्, यदुक्तं—"शकृन्मूत्रसमायुक्ते धौतेऽपाने शिशोर्भवेत्। स्विन्ने वाऽस्नाप्यमाने वा कण्डू रक्तकफोद्भवा॥ कण्डूयनात् ततः क्षिप्रं स्फोटः स्रावश्च जायते। एकीभूतं व्रणं घोरं तं विद्यादहिपूतनम्॥" इति। वाग्भटे पुनरस्य विविधानि नामान्युक्तानि, तद्यथा—"केचित्तं मातृकादोषं वदन्त्यन्येऽपि पूतनम्। पृष्टारुर्गुदकुन्दञ्च केचिच्च तम-नामिकम्॥" इति॥१४७॥

गुदकीटचिकित्सायां—शैलेयं शैलजं, लुकं लुण्टकं, तण्डुलीयः इत्यर्थः, "लुक" इत्यत्र "कणा" इति क्वचित् पाठः, तयोः चूर्णं मधूत्कटं मधुप्रगाढं, शैलेयलुकचूर्णं शृतशीताम्बुना पिष्ट्वा प्रभूतमधुना आलोड्य लेपयेत्। "मधूत्कटम्" इत्यत्र "मधूच्छकम्" इति पाठे—सिक्थकमित्यर्थः। अपान-व्रणं मलद्वारस्थव्रणविशेषं गुदकीटमित्यर्थः। त्रिफलेत्यादौ—"बदरीपत्र" इत्यत्र

अथ गुदपाकचिकित्सा ।—

गुदपाके तु कर्त्तव्या पित्तव्रणहरा क्रिया ।
पानप्रलेपयोः शस्तं विशेषेण रसाञ्जनम् ॥१५०॥
अजादुग्धेन सम्मिश्र्य जीरकाञ्जनचूर्णकैः ।
जातीपत्ररसोपेतैः पूर्वप्रोक्तरसैरपि ॥१५१॥

अथ मुखपाकचिकित्सा ।—

मुखपाके मुखं लिम्पेद्बोधित्वग्घृतसारवैः ।
जातीपत्राभयायष्टी-मधुदार्व्या च लेपयेत् ॥१५२॥

अथ नाभिपाकचिकित्सा ।—

नाभिपाके प्रलेपश्च सिक्तं तैलेन भूरिशः ।
रजनीयष्टिकालोध्र-प्रियङ्गूणाञ्च कल्कतः ॥
चूर्णैर्वा सतैलेन नाभिपाकं शमं नयेत ॥१५३॥

"खदिर" इति योगरत्नाकरे पाठ । रागकण्डूमत रागकण्डूयुतात, व्रणादिति शेष, जलूकाभि जलौकाभि समन्वित रक्तम् अशुद्धरक्तमित्यर्थ, परिषेचयेदिति पूर्व-वाक्यानुसरणम। वाग्भटे अस्य पाठान्तरादिक यथा—"घृतशीतञ्च शीताम्बु युक्तमन्तरपानकम्। सक्षौद्रताच्यशैलेन व्रण तेन च लेपयेत ॥ त्रिफलाबदरीप्लक्ष-त्वक्क्वाथपरिषेचितम्। ॥ रागकण्डूत्कटे कुर्य्याद्रक्तस्राव जलौकसा। सर्वञ्च पित्तव्रण-जिच्छस्यते गुदकुट्टके ॥" इति ॥१४८।१४९॥

गुदपाकचिकित्सायां—सम्मिश्र्य इति छेद, रसाञ्जनम् अजादुग्धेन सम्मिश्र्य पानालेपनयो विशेषेण शस्तमित्यन्वय। जीरकेत्यादौ द्वितीययोगे—अञ्जन रसाञ्जन, चूर्णक शक्तुकम, जातीपत्ररसोपेते जीरकाञ्जनचूर्णके तथा पूर्वप्रोक्तरसे त्रिफला-बदरीपत्रक्काथे सह जीरकाञ्जनचूर्णके प्रलेपयेत, गुदकीटगुदपाकयो समस्थानत्वेन तयोक्तानामत्रापि हितत्वात, यद्वा—पूर्वप्रोक्तरसे रसाञ्जनेन केवलेन जातीपत्र-रसोपेतेन, प्रलेपयेदिति शेष। पानप्रलेपयोरित्यादिना उक्त योगत्रय मुखपाकेऽपि प्रयोक्तुमर्हति वृद्धव्यवहारदर्शनादिति बोद्धव्यम् ॥ १५०।१५१ ॥

मुखपाकचिकित्सायां—बोधित्वक् अश्वत्थवल्कलम्, "घृत" इत्यत्र "दल" इति चक्रोक्तपाठे—दलं पत्रम् अश्वत्थस्यैव। सारघ क्षौद्रम्। मुखपाके जातीपत्रे-त्यादिना द्वितीयो लेपः ॥ १५२ ॥

अथ कुण्डलचिकित्सा।—

अपुष्पाश्वत्थपञ्चाङ्ग-क्काथेनापि च कल्कतः।
सिद्ध तैल प्रलेपेन कुण्डलव्याधिनाशनम् ॥१५४॥

अथ बालपञ्चामृतम्।—

हिङ्गुशुण्ठीकणापथ्या-मिषीपञ्चामृतं मतम्।
सर्वबालामयान् हन्ति पाचन दीपनं परम् ॥१५५॥

अथ तिक्ताद्य घृतम्।—

तिक्ताग्निव्योषमालूर-पथ्यारुचकहिङ्गुकम्।
तुल्यदुग्धं घृतं पक्क गुल्मानाहविलम्बिका ॥
कास श्वास गुदभ्रंशं विनिहन्ति न संशय' ॥१५६॥

नाभिपाकचिकित्सायां—प्रलिम्पव्यमित्यस्य रजन्यादीना कल्कत इत्यनेनान्वय',
आदौ तैलेन सिक्त कृत्वा रजन्यादीना कल्केन प्रलेपयेत्। तथा सतैलेन तैलमिश्रितेन
एषा रजन्यादीना चूर्णेन वा प्रलिम्पव्यमिति। चक्रेण तु रजन्यादीना कल्कपादेन
चतुर्गुणजलेन च तैल पक्तव्य तथा रजन्यादीनां चूर्णेन अवचूर्णनञ्च कार्य्यमित्युक्तम्,
तथा च—"नाभिपाके निशालोध्रप्रियङ्गुमधुकै शृतम्। तैलमभ्यञ्जने शस्तमेभि-
र्वाऽप्यवचूर्णनम ॥" इति ॥ १५३ ॥

कुण्डलचिकित्सायाम्—अपुष्पाश्वत्थपञ्चाङ्गक्काथेन अश्वत्थस्य पुष्पहीनपञ्चाङ्गक्काथेन,
मूलफलपत्रत्वक्क्काथेन तैलचतुर्गुणेन तथा कल्कत अपुष्पपञ्चाङ्गकल्कात तैलपादिकात।
कुण्डलव्याधिनाशन कुण्डलव्याधि मूत्राघातोक्त वातकुण्डलिकाख्यरोग'
बस्तिकुण्डलाख्यरोगो वा, नाभिकुण्डलगत शोथपाकादिरूपो व्याधिविशेषो
वा ॥ १५४ ॥

बालपञ्चामृते—मिषी मधुरिका। पञ्चामृत हिङ्ग्वादिमिष्यन्त द्रव्यपञ्चकमेव
अमृतवत हितत्वात् पञ्चामृतम्। हिङ्ग्वादीनां चूर्ण मधुना लेहयितव्य स्तन्येन
पाययितव्य वा ॥ १५५ ॥

तिक्ताद्यघृते—तिक्ता कटुकी। अग्नि चित्रक। मालूरं श्रीफल, विल्वपेशी-
त्यर्थ। रुचक सौवर्चलम। रुचको वा बीजपूरकमित्यर्थ। तिक्तादीना नवानां
कल्क। तुल्यदुग्धमिति घृतसम दुग्ध, जलञ्चात्र चतुर्गुण देयम् ॥ १५६ ॥

अथ राजीकुष्ठादिप्रलेपः ।—

राजीकुष्ठनिशागेह-धूमवत्सकतक्रतः ।
लेपो विचर्चिकां सिध्म हन्ति पामाञ्च वेगतः ॥१५७॥

अथ ग्रहघ्नी गुटिका ।—

राजीकरञ्जपुन्नाट-शिरीषार्कनिशाद्वयम् ।
प्रियङ्गुत्रिफलादारु-हिङ्गुव्योषकुचन्दनम् ॥१५८॥
मञ्जिष्ठोग्राऽजमूत्रञ्च गुटिका ग्रहनाशिनी ।
पाननस्याञ्जनालेप-स्नानोद्वर्त्तनधूपनात् ॥१५९॥

अथ माहेश्वरो धूपः ।—

श्रीवेष्टदारुबाह्लीक मुस्ताकटुकरोहिणी ।
सर्षपा निम्बपत्राणि मदनस्य फलं वचा ॥१६०॥
बृहत्यौ सर्पनिर्मोक-कार्पासास्थियवास्तुषा. ।
गोशृङ्गं खररोमाणि बर्हिपिच्छं विडालविट् ॥१६१॥
छागरोम घृतञ्चेति बस्तमूत्रेण भावितम् ।
एष माहेश्वरो धूपः सर्वग्रहनिवारणः ॥१६२॥

अथ छिन्नादि तैलम् ।—

छिन्नाफणिज्झहंसाङ्घ्रि-भानुपत्रीरसैः सह ।
मस्तन्यं साधित तैलं लिप्तं सर्वग्रहार्त्तिजित् ॥१६३॥

राजीकुष्ठादिप्रलेपे—राजी राजिका सर्षप इत्यर्थः । वत्सक इन्द्रयव, अत्र तक्रेण पेषणम ॥ १५७ ॥

ग्रहघ्न्यां गुटिकायां—राजी राजिका । करञ्ज "डहरकरञ्ज" इति ख्यातम् । पुन्नाट चक्रमर्द अस्य बीजम् । कुचन्दन रक्तचन्दनम् । उग्रा वचा ॥१५८।१५९॥

माहेश्वरधूपे—श्रीवेष्ट नवनीतखोटी । बाह्लीक हिङ्गु । सर्षपा. राजिका । बस्तमूत्रेण छागमूत्रेण ॥ १६०—१६२ ॥

छिन्नादितैले—छिन्ना गुडूची । फणिज्झ तुलसी । हंसाङ्घ्रि हंसपदी, "गोहालिया" इति ख्यात, भूतहन्तृत्वात । भानुपत्री अर्कपत्री, ईश्वरमूलाख्यवृक्षस्य ग्रहणम्, "भानुपत्र" इति पाठे—अर्कपत्रम्, आसां रसैः प्रत्येकं तैलसमैः, मस्तुर्न्य

अथ स्फूर्जकादि तैलम्।—

स्फूर्जकं इपुषापुष्पं हंसपादी कुरण्टकम्।
करञ्जार्कदलस्फूर्ज-श्वेतपत्रञ्च कल्कितम्॥
तेन संसाधितं तैलं तेनाभ्यङ्गं चरेच्छिशोः॥१६४॥

अथ निम्बादिघृत क्षीरञ्च।—

निम्बाश्वत्थपलाशानां विल्वकिंशुकयोर्दलैः।
सिद्धं सर्पिस्तथा क्षीरं पानाद्बालग्रहान् जयेत्॥१६५॥

अथ शैलेयादिधूपः।—

शैलेयगुग्गुलुरसैः सपुरप्रचण्ड-
द्रव्यापहृत्सरसकुन्दुरुभिः सकुष्ठैः।
सध्यामकैः सुरभिगन्धरसैश्च धूपः
सौभाग्यबुद्धिजयकृद्विजयो विवादे॥१६६॥

सक्षीरम्, एतदपि तैलसममेव, क्षीरञ्चात्र गव्यमेव, स्त्रिया इति केचित्। अकल्कमिदं तैलम्॥१६३॥

स्फूर्जकादितैले—स्फूर्जकं तिन्दुकम्। इपुषापुष्पं इपुषा स्वनामख्यात-वणिग्द्रव्यविशेषः तस्याः पुष्पम्। हंसपादी गोधापदी। कुरण्टकं पीतपुष्पा झिण्टी। "स्फूर्जकं" "कुरण्टकम्" इत्यत्र क्लीवत्वं वैवचिकम्, "स्फूर्जकः" "कुरण्टकः" इति तु साधु। अर्कदलम् अर्कपत्रम्। स्फूर्जः काकस्फूर्जः, काकतिन्दुकः इत्यर्थः। श्वेतपत्रं श्वेततुलसी, "श्वेतपुष्पम्" इति पाठे—श्वेतसिन्दुवारः श्वेतकरवीरको वा, एषां कल्केन स्नेहतुर्य्यांशेन जलेन च चतुर्गुणेन तैलं पक्तव्यम्॥१६४॥

निम्बादिघृतक्षीरयोः,—किंशुकः शाल्मली। दलैः पत्रैः, निम्बपत्रादीनां कल्कः स्नेहचतुर्थांशः, जलं चतुर्गुणं देयम्। तथा क्षीरमिति निम्बपत्रादिभिः सहैव क्षीरपरि-भाषया पक्वं क्षीरम्, 'सिद्धं जयेत्" इत्यत्र "सिद्धं पीतस्तनेकांशबालग्रहनिवारणं" इति कुत्रचित् पाठः॥१६५॥

शैलेयादिधूपे—शैलेयं शैलजम्। रसः शिह्लकम्। पुरं दारुागुरु। प्रचण्डः श्वेतकरवीरः। द्रव्यं लाक्षा। अपहृत् चोरकः, ग्रन्थिपर्णः इत्यन्ये, चोरपुष्पी इत्यर्थो

देवासुरोरगपिशाचपितृग्रहेषु
गन्धर्वयक्षपिशिताशिषु च ग्रहेषु ।
जीर्णज्वरेषु विहितश्च विषातुरेषु
धूपोऽयमाजिविजयार्त्तिषु पार्थिवानाम् ॥१६७॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये वन्ध्या-गर्भिणी सूतिका बालरोगचिकित्सानाम द्वाविंशोऽध्यायः ॥ २२ ॥

अथ त्रयोविंशोऽध्यायः ।

अथ उन्मादवातादिचिकित्सनम् ।—

अथोन्मादस्य निदानसम्प्राप्ती ।—

आधिव्याधिकृशस्य दुर्बलतनोराहारतो वा भयात्
पूज्यातिक्रमणाद्विषादुपविषाद्दैवादसामर्थ्यतः ।
वैषम्यादपि कर्मणां हृदि मला बुद्धेर्विधायोल्वणं
कालुष्यं हतसौख्यदुःखमथनमुन्मादमातन्वते ॥१॥

वा । सरसं काष्ठागुरु । कुन्दुरु कुन्दुरुखोटि तत्सहिते । सध्यामके गन्धतृण-सहिते । सुरभि सर्जरस । गन्धरस गन्धबोल तत्सहिते । "सपुरं सकुष्ठे" इत्यत्र "सनखप्रचण्डपुष्पा तु सर्जरसकुन्दुरुरासकुष्ठे" इति पाठान्तरम् । पिशिताशी राक्षस । आजि रण, विजय अरिभिः पराजयाशङ्का, अर्त्ति पीडा तासु ॥ १६६।१६७ ॥

इति रसरत्नसमुच्चयबोधिन्यां द्वाविंशोऽध्यायः ॥ २२ ॥

बालरोगे ग्रहाणां नामोत्कीर्त्तनात् तथा पूतनादिदुष्टग्रहजनितबालरोगविशेषवत् भूतोन्मादस्यापि ग्रहकर्तृत्वात् बालरोगानन्तरम् उन्मादादिचिकित्सितं वक्तुं त्रयो विंशाध्यायमारभते । ननु एकविंशाध्याये वातव्याध्यादिचिकित्साप्रसङ्गे उन्मादापस्मार-योर्निदानादिकमुक्तं, पुनरत्रापि तयोर्निदानादिकमुच्यते, तत् कथं न पुनरुक्तमिति

अथोन्मादलक्षणम्।—

सञ्जल्पको धावति हन्ति चैतदुन्मादवातस्य च लक्ष्म बोध्यम्॥२॥

अथोन्मादचिकित्सा।—

अथ अर्कमूर्त्तिरसस्य प्रयोगविधि।—

अत्रार्कमूर्त्त्याख्यरसस्य वल्लं धुस्तूरवीजेन समं प्रपद्यात्।
मरीचचूर्णेन घृतेन वाऽपि पथ्यञ्च गुर्वन्नमिह प्रशस्तम्॥३॥

चेदुच्यते,—वातव्याधीनामानन्त्यात् दुष्टवातकार्य्यविशेषयोस्तयोरपि वातव्याध्यन्तर्गतत्व-प्रदर्शनार्थं तत्र दिङ्मात्रमुल्लेखः कृतः, अत्र तु तयोर्वातव्याधिविशेषत्वेऽपि स्वतन्त्रत्वप्रतिपादनार्थं विशिष्टचिकित्स्यत्वप्रदर्शनार्थञ्च विस्तारेणोल्लेखो न दोषाय इति। तत्रोन्मादस्य सनिदानसम्प्राप्तिमाह, आधीति।—आधिः मनःपीडा व्याधिः ज्वरादिः ताभ्यां क्लमस्य क्षीणमांसस्य, तथा दुर्बलतनोः आधिव्याधिक्षयादिभिरेव बलहीनदेहस्य पुंसः, आहारतः विरुद्धदुष्टाशुचिभोजनदोषात्, भयात् भयजनितमनोऽभिघातात्, पूज्यातिक्रमणात् पूज्यपूजाव्यतिक्रमात्, देवगुरुद्विजानां प्रधर्षणादिति यावत्, विषात् स्थावरविषभक्षणात् आलर्कादिजङ्गमविषाच्च, उपविषात् "लाङ्गली विष-मुष्टिश्च करवीरो जयास्तथा। नीलकः कनकोऽर्कश्च वर्गो ह्युपविषात्मकः॥" इत्येत-द्रूपात्, "अर्कसेहुण्डधुस्तूरलाङ्गलीकरवीरकाः। गुञ्जाहिफेनावित्येताः सप्तोपविष-जातयः॥" इति-स्वरूपाद्वा, दैवात् प्राक्तनकर्मवशात्, अत्र दैवशब्देन तन्त्रा-न्तरोक्तानां देवयक्षादिग्रहाणामवरोधः, तेषामपि उन्मादकर्त्तृत्वेन उक्तत्वात्, असामर्थ्यतः स्वशक्तिमतिक्रम्य कर्मकरणात्, कर्मणां वैषम्यात् विषमाङ्गन्यास-बलवद्विग्रहादिचेष्टावैषम्यादिति यावत्, कर्मणां पञ्चकर्मणां वैषम्यात् अयथा-प्रयोगादिति वा, मलाः दोषाः कुपितवातादयः, हृदि हृदये, स्थिताः सन्तः इति शेषः, बुद्धेः उल्वणम् अत्यर्थं कालुष्यं मालिन्यं विकृतिमित्यर्थः, विधाय हतसौख्य-दुःखमथनं हते विनष्टे सौख्यदुःखाभ्यां मथनम् आलोडनं चित्तविक्षोभः इत्यर्थः, यत्र येन वा तादृशं, सुखदुःखाभ्यां हर्षविषादभावविरहितमित्यर्थः, उन्मादम् आतन्वते कुर्वते इत्यर्थः। सुश्रुतेऽस्य निरुक्तिरुक्ता यथा—"मदयन्त्युद्गता दोषा यस्मादुन्मार्गमागताः। मानसोऽयमतो व्याधिरुन्माद इति कीर्त्तितः॥" इति॥१॥

उन्मादस्य सङ्क्षिप्तलक्षणमाह, सञ्जल्पक इति।—सञ्जल्पकः असम्बद्धवाक्, बहूपार्थभाषी इत्यर्थः। हन्ति ताडयति, आत्मानम् अन्यान् वा इति शेषः। लक्ष्म रूपम्॥२॥

शुष्कञ्च शाकं परिवर्जयीत रूक्षं कषायं बहु शीतलञ्च ।
निम्बस्य तैलेन विमर्दयेत कलेवरं शाम्यति तेन रोगः ॥४॥

अथ निर्गुण्डिकादितैलम् ।—

निर्गुण्डिकोन्मत्तकतुम्बिनीनां रसैस्तु तैलं परिपाचयीत ।
कलेवरं तेन विलेपयेत मासार्द्धतः शान्तिमुपैति रोगः ॥५॥

अथ माहेश्वरो धूपः ।—

कार्पासास्थिमयूरपिच्छबृहती-निर्माल्यपिण्डीतक-
त्वङ्मांसीवृषदंशविट्तुषवचा-केशाहिनिर्मोककैः ।
नागेन्द्रद्विजशृङ्गहिङ्गुमरिचैस्तुल्यैस्तु धूपः कृतः
स्कन्दोन्मादपिशाचराक्षससुरावेशग्रहघ्नः परम् ॥६॥

अथापस्मारसम्प्राप्तिलक्षणं ।—

क्रुद्धैर्धातुभिराहते च मनसि प्राणी तमः संविशन्
दन्तान् खादति फेनमुद्गिरति दोःपादौ क्षिपन्मूढधीः ।

अर्कमूर्त्तिरसस्य प्रयोगविधौ—अर्कमूर्त्याख्यरसस्य सन्निपातज्वरे निर्दिष्टस्य तन्त्रान्तरीयरसविशेषस्य । तथा च—"लौहाष्टकं मारितमर्कभागं सूतं द्विभागं द्विगुणञ्च गन्धम् । विमर्दयेत वह्निरसेन तापे दिनत्रयञ्चाथ विषं कलांशम् ॥ विचिप्य पित्ते परिभावितोऽयं रसोऽर्कमूर्त्तिर्भवति त्रिदोषे ॥" इति । स च रसः धुस्तूरबीजेन घृतमरिचचूर्णाभ्यां वा प्रयोज्यः । औषधसेवनकाले निम्बतैलेनाभ्यङ्गश्च कार्य्यः ॥ ३।४ ॥

निर्गुण्डिकादितैले—उन्मत्तकः धुस्तूरः । तुम्बिनी कटुकालावुः, आसां रसैः निर्गुण्ड्यादीनां स्वरसैः प्रत्येकं तैलचतुर्गुणैः । अकल्कमिदम् ॥ ५ ॥

माहेश्वरधूपे—निर्माल्यं शिवनिर्माल्यम् । पिण्डीतकं मदनफलम् । त्वक् चर्म्मोरसः; "त्वङ्मांसी" इत्यत्र "त्वग्वांशी" इति पाठान्तरे—वांशी वंशलोचना, केचित्तु "त्वग्वांशी वंशत्वक्" इत्याहुः । वृषदंशविट् वैडालशकृत् । तुषः धान्यत्वक् । केशः भूतकेशी, "कच" इत्यन्ये । अहिनिर्मोककैः सर्पकञ्चुकैः । नागेन्द्रद्विजः हस्तिदन्तः । शृङ्गं गोशृङ्गं, प्राधान्यात् तन्त्रान्तरसंवादित्वाच्च, यदुक्तं चक्रसङ्ग्रहे—"गोशृङ्गद्विपदन्त." इति ॥ ६ ॥

पश्यन् रूपमसत् क्षितौ निपतति प्रायः करोति क्रिया
बीभत्साः स्वयमेव शाम्यति गते वेगे त्वपस्माररुक् ॥७॥

अथ अपस्मारचिकित्सा।—

अथ अपस्मारनाशनो रस।—

रसगन्धशिलातुल्य-कान्तहेमाब्धिफेनकम्।
रजनीतेजनीवीज कर्षमात्र पृथक् पृथक् ॥८॥
निम्बुद्रवार्द्रैं तेनान्तर्लिप्ता ताम्रपलोन्मिताम्।
पात्रीं न्युब्जां सुभाण्डान्ता रुद्ध्वा खर्परिका धृताम् ॥९॥
भस्मनाऽऽपूर्य्य भाण्डान्तर्धृत्वाऽधो ह्यग्निमग्नं पचेत्।
स्वाङ्गशीतं विचूर्ण्याथ रसोऽपस्मारनाशन. ॥१०॥

चेतोविकारसाधम्यात तुल्यचिकित्सितत्वाच्च उन्मादानन्तरमपस्मारचिकित्सितं विवक्षुरादौ तस्य सम्प्राप्तिं लक्षणञ्चाह, क्रुद्धैरिति।—धातुभि वातादिभि, देहधारकत्वात् वातादीनामपि धातुसञ्ज्ञा चरकादिभि. स्वीकृता, यदुक्त—"धारणाद्धातव', दूषणाद्दोषा, मलिनीकरणान्मला" इति। तम सविशन् तम अन्धकारं संविशन् प्रविशन्। दो पादौ करचरणौ क्षिपन् विक्षिपन् सवेग चालयन्नित्यर्थ, मूढधी भ्रान्तबुद्धि, असत अविद्यमानं रूप पश्यन् क्षितौ निपतति। बीभत्सा' क्रिया उत्कटदन्तघर्षणफेनवमनादिरूपा क्रिया। गते वेगे अपस्मारारम्भकदोषाणा वेगे प्रशान्ते न तु निवृत्ते इत्यर्थ, स्वयमेव शाम्यति, स्वयं प्रशान्तिश्च कालस्वभावात् रोगस्वभावाच्च। ननु अपस्मारारम्भके दोषे सत्यपि स कथ न नित्यवेगः स्यात? कथ वा शान्तवेग' स्यात इत्याशङ्कायां सुश्रुतेनोक्त—"देवे वर्षत्यपि यथा भूमौ बीजानि कानिचित्। शरदि प्रतिरोहन्ति तथा व्याधिसमुच्छ्रया ॥" इति। अन्यत्राप्युक्त—"वेगे तु समतिक्रान्ते गतोऽयमिति लक्ष्यते। धात्वन्तरस्थो लीनत्वात् सौक्ष्म्यात्वान्नोपलभ्यते ॥" इति च ॥ ७ ॥

अपस्मारनाशनरसे—शिला मन शिला। अब्धिफेनक समुद्रफेन। तेजनी ज्योतिष्मती तस्या बीजम्। तेन रसादिकल्केन अन्तर्लिप्ता पात्रीमित्यनेन सम्बध्यते, ताम्रपलोन्मिता ताम्रस्य ताम्रपत्रस्य पलोन्मिता पात्री ताम्रपत्रपलेन कृत स्वल्पभाजनम्। न्युब्जाम् अधोमुखी खर्परिका धृता ताम्रपात्रोपरि क्षुद्रशरावमधोमुख स्थापित कृत्वा इत्यथ.। धृत्वाऽध. इत्यत्र अग्निमिति शेष.) भाण्डाध. अग्नि दत्त्वा इत्यर्थः।

वल्लमस्योदये दद्याद्वचाव्योषविडङ्गयुक् ।
अनु देयमजामूत्रं ततोऽर्द्धप्रहरे गते ॥११॥
सार्षपे षोडशपले तैले तल्लेपिता पचेत् ।
नस्यं तैलेन तेनास्य दद्यात् सव्योषकेण तु ॥ १२ ॥

अथ धुस्तूरपञ्चाङ्गघृतम् ।—

कृष्णधुस्तूरपञ्चाङ्गं कृष्णगोनवनीतकम् ।
षड्गुणं नवनीतात्तु आषक्काथं चतुर्गुणम् ॥१३॥
क्षिप्त्वा पचेत् घृतं तत्तु पथ्यं शाकौदनादिषु ।
शाकेषु काकमाची स्याद्भोजने कृष्णगोपयः ॥१४॥

अथ चूर्णाञ्जनम् ।—

शतधा मारिचं चूर्णं कुष्माण्डीपुष्पभावितम् ।
कुर्य्यात्तेनैव चूर्णेन रात्रावञ्जनमाचरेत् ॥१५॥

उदये सूर्य्योदयकाले, प्रातरित्यर्थः । वचाव्योषविडङ्गयुक् इति अस्य वल्लमित्यनेनान्वीयते। अर्द्धप्रहरे गते इति तैलेन नस्यं दद्यादित्यनेन सम्बध्यते। तल्लेपिता तेन रसगन्धादिकृतेन कल्केन लेपिता लिप्तामित्यर्थः, ताम्रपत्रीमिति शेषः, "तल्लेपिताम्" इत्यत्र "धुस्तूरकम्" इति कस्यचित् पाठः। कल्पना चास्य एवं कार्य्या —रसादिकं सर्वं यथोक्तमानं गृहीत्वा निम्बुद्रवेण पेषयेत्, ततस्तेन कल्केन पलपरिमितताम्रपत्रकृतस्य क्षुद्रभाजनस्य अभ्यन्तरं लिप्त्वा तत् भाजनं स्थाल्यन्तः स्थापयेत्, ततः क्षुद्रशरावेणैकेन अधोमुखेन तत् पात्रमाच्छाद्य स्थालीं तां भस्मना पूरयेच्च, अथ चुल्लिकायां वह्निं प्रज्वाल्य द्व्यहोरात्रं पचेत्, स्वाङ्गशीतं समुद्धृत्य विचूर्ण्य च रक्तिद्वयं प्रातः वचादिचूर्णेन सह खादेत्, ततः अजामूत्रम् अनुपिबेत्। किञ्च षोडशपलमितं कटुतैलञ्च रसगन्धादिकृतकल्कलिप्तेन ताम्रपत्रेण यथोक्तमानेन चतुर्गुणजलेन च पक्त्वा विस्राव्य च प्रागेव स्थापयेत्, औषधसेवनादर्द्धप्रहरानन्तरं तत्तैलं किञ्चित् त्रिकटुचूर्णेन सह आलोड्य नस्यार्थं दद्यादिति ॥ ८—१२ ॥

धुस्तूरपञ्चाङ्गघृते—कृष्णधुस्तूरपञ्चाङ्गं कल्करूपम्। कृष्णगोनवनीतकं षड्गुणमिति धुस्तूरपञ्चाङ्गकल्कमपेक्ष्य। तदिति।—तत् घृतं शाकौदनादिषु अन्नव्यञ्जनादिषु पथ्यं हितम् अन्नव्यञ्जनादिषु अवचारणया तत् घृतं प्रयोज्यमित्यर्थः। शाकौदनादिषु इत्युक्तं, तत्र किं शाकमपथ्यादिभ्यः हितमित्याह,—शाकेष्विति ॥ १३।१४ ॥

एवं नित्यं कृते याति तृतीयदिवसे ध्रुवम् ।
अपस्मारस्तथा मास सेव्यमेतन्महौषधम् ॥१६॥

अथ मसीयोग ।—

उद्बध्यमानवगलव्यतिषक्तमग्नौ
रज्जुं विदह्य निपुणेन कृता मसी या ।
सा शीतलेन सलिलेन समं निपीता
पुंसामपस्मृतिविनाशकरी प्रसिद्धा ॥१७॥

अथ तिलजदीपाञ्जनम् ।—

कृष्णं श्वानं स्थितमनशनं स्थापयित्वा विरेकं
पश्चाद्दध्नाऽसिततिलयुतं भोजनं भोजयित्वा ।
तद्ग्रीवोत्थासिततिलजदीपाञ्जनं लोचनस्थं
चापस्मारं हरति विधृतं नैम्बसारे शरावे ॥१८॥

चूर्णाञ्जने—कुष्माण्डीपुष्पभावितं कर्कोटकपुष्पभावित कुष्माण्डपुष्पभावित वा । एतन्महौषध कुष्माण्डीपुष्पभावितमरिचचूर्णम, उद्बद्धेत्यादिना वक्ष्यमाणमौषधं वा ॥१५।१६॥

मसीयोगे—उद्बध्यमानवगलव्यतिषक्तम उद्बन्धनमृतमानवस्य गललग्नम् । निपुणेन दक्षेण भिषजा इत्यर्थ, यथा सुदग्धा भवति, न कोऽप्यंश अर्द्धदग्धस्तिष्ठेत, तथा दग्धव्या इति निपुणशब्दप्रयोगस्याशय ॥ १७ ॥

तिलजदीपाञ्जने—कृष्ण श्वान कुक्कुरम, अनशन स्थित स्थापितमित्यर्थं, अन्तर्भूतण्यर्थोऽत्र स्थित-शब्द । पश्चात अनशनात् परदिने इत्यर्थ, असिततिलयुतं भोजन दध्ना भोजयित्वा विरेक वमनम् , विरेकशब्दोऽत्र विरिच्यते दोषोऽनेन इति व्युत्पत्त्या वमनार्थे प्रयुक्त इत्यवधातव्यम , स्थापयित्वा कारयित्वा, धातूनामनेकार्थत्वात्, "स्थापयित्वा" इत्यत्र "कारयित्वा" इति पाठान्तरम् । नैम्बसारे शरावे निम्बकाष्ठकृते शरावाकारे भाजनविशेषे विधृत गृहीतम् । तदिति ।—तस्य कुक्कुरस्य ग्रीवोत्थात् , अत्र ग्रीवाशब्देन कण्ठोऽभिप्रेत, ततश्च वमनवेगेन कण्ठानिःसृतादित्यर्थ, असिततिलात् अन्नेन सह भोजितात जायते इति असिततिलज कृष्णतिलतैल तस्य दीप तत्तैलेन प्रज्वालित प्रदीप तस्य , यद्वा—तद्ग्रीवोत्थस्य कुक्कुरग्रीवाया स्थितस्य, ग्रीवादेशे प्रज्वालितस्येत्यर्थं, असिततिलजदीपस्य दर्शितप्रकारेण गृहीततिलतैलकृतप्रदीपस्य, अञ्जन दीपशिखोद्भूत कज्जलमित्यर्थ. ॥ १८ ॥

अथ चण्डभैरवरस ।—

हेम्ना शुद्धेन सम्पिष्ट दशमाशरसं विषम् ।
स्रोतोज मर्दितं तोयैः शूलिनीदेवदालिजैः ॥
गन्धकस्य पचेत्तैले वटिकोन्मादहृन्मता ॥१९॥

अथ नवाङ्गवटिका ।—

त्रिलोहपिष्टस्रोतोज-स्पृष्टित्रययुत रसम् ।
भक्षयेत् पूर्ववत् सिद्धमपस्मारप्रशान्तये ॥२०॥

अथ सूतकप्रत्यय ।—

तथैव पर्पटी सूत ब्राह्मीरसविमिश्रितम् ।
सूतकप्रत्ययाख्योऽसावुन्मादापस्मृती हरेत् ॥२१॥

चण्डभैरवरसे—"दशमाशरस विषम्" इत्यत्र "दशमाशविष रसम्" इति पाठान्तरम। स्रोतोज रसाञ्जन सौवीराञ्जन वा। तोये स्वरसै क्वाथैर्वा, तोयैरिति बहुवचन सप्तधा भावनाबोधनार्थम। शूलिनी मूलपर्णी, "शोला" इति वङ्गीयैराख्यातम्। अयमर्थ,—स्वर्णविषस्रोतोजाना प्रत्येक तुल्यभाग, पारदस्य च स्वर्णापेक्षया दशमाशता, तत् सर्वमेकीकृत्य शूलिनीदेवदालीरसे सप्त सप्त वारान् भावयित्वा च गन्धकतैलेन सह मृदु पचेदिति। रसरत्नाकरे—रसस्य हेमपादत्व विष हेमतुल्य तथा स्रोतोजमित्यत्र शोभाञ्जन शूलिनीत्यत्र च त्रिशूलीति पाठभेदो दृश्यते, तथा च—"हेमपाद मृत सूत निष्टखल्ले विमर्दयेत। शोभाञ्जन विष तुल्य मर्द्यस्त्रिशूलीद्रवे॥ देवदाल्या द्रवैस्त्र्यह्नि तद्गोल पाचयेद्दिनम। गन्धकोत्थेन तैलेन तत उद्धृत्य चूर्णयेत॥ माषैक भक्षयेन्नित्य पिबेद्ब्राह्मीघृत त्वनु। सर्वभूतग्रह हन्ति रसोऽय चण्डभैरव ॥" इति ॥ १९ ॥

नवाङ्गवटिकाया—त्रिलोह "सुवर्ण रजत ताम्र त्रयमेतत्त्रिलोहकम्" इत्युक्तरूप स्वर्णादिधातुत्रय, पिष्ट सीसक, स्रोतोज नीलाञ्जन, स्पृष्टि ऋद्धि, "स्पृष्ट" इत्यत्र "स्पृष्ट" इति पाठान्तरम्, त्रय सोमराजी, रस रससिन्दूरम, सर्वेषामेषा तुल्यभागता। पूर्ववत् सिद्धमिति शूलिनीदेवदालीजैस्तोयैर्मर्दयित्वा गन्धकतैलेन पाचितमित्यर्थ ॥२०॥

सूतकप्रत्यये—पर्पटी प्रागुक्त. पर्पटीरस । सूत सूतभस्म इत्यर्थ । सूतकप्रत्ययाख्य. सूतकप्रत्यय इतिसञ्ज्ञक असौ, रस इति शेष.। "सूतक. प्रत्ययाख्य." इति पाठे—प्रत्ययाख्य. सूतकः रस इत्यर्थ. ॥ २१ ॥

अथ पर्पटीरसप्रयोगविधिः ।—

पर्पटीरसगुञ्जाऽष्टौ नाकुलीबीजपञ्चकम् ।
गोघृतेन तु संयोज्य खादेदुन्मादशान्तये ॥
सघृतं माषमण्डञ्च पाययेत् घृतदुग्धकम् ॥२२॥

अथ पर्पटीरसस्य अन्यविधप्रयोगविधिः ।—

पर्पटीरसगुञ्जाष्टौ ब्राह्मीरससमन्वितम् ।
खादयेद्रोगिणं वैद्योऽपस्मारस्य प्रशान्तये ॥२३॥

अथ सर्वेश्वरः ।—

रसं नारङ्गमूलञ्च दन्ती पाठा पृथक् पृथक् ।
पलमेकं फेनफलमर्कमूलं तथैव च ॥२४॥
पलं शशविषाणञ्च त्रिफला च पलत्रयम् ।
एतेषां क्वाथसंयुक्तं दिनानि त्रीणि मर्दयेत् ॥२५॥
अम्लवेतससंयुक्तमर्कक्षीरसमन्वितम् ।
पञ्चपञ्चदिने तद्वदमरीरससंयुतम् ॥२६॥

उन्मादशान्तये पर्पटीरसस्य प्रयोगविधिमाह, पर्पटीरसेति ।—नाकुलीबीजपञ्चकं नाकुली रास्नाभेदः तस्याः पञ्चसङ्ख्यकं बीजम्, "नाकुली" इत्यत्र "बाकुची" इति पाठान्तरम् । एतस्य प्रयोगे सघृतमाषमण्डादिकं पाययितव्यम्, मण्डशब्दश्चात्र सारार्थकः, तेन माषमण्डं माषसारं निस्तुषमाषविदलमित्यर्थः, चतुर्दशगुणाम्बुसाधितयवागूविशेषं वा, अत्र पक्षे—मण्डयोनित्वात् माषेण सह तण्डुलादयोऽपि दातव्याः ॥ २२ ॥

अपस्मारशान्तये पर्पटीरसस्य अन्यविधप्रयोगविधिमाह, पर्पटीति ।—सुगमम् ॥ २३ ॥

सर्वेश्वरे—रसं रसभस्म । नारङ्गमूलं नारङ्गं "कमलालेबु" इति ख्यातं तद्वृक्षस्य मूलं, गृञ्जनकं वा । फेनफलं फेनं अहिफेनं तस्य फलं खाखसबीजं, "पोस्तदाना" इति लोके, "फेनपलम्" इति पाठे—फेनं समुद्रफेनं तस्य पलम् । शशविषाणं मृगशृङ्गं, शशशब्दोऽत्र मृगवाची, "शशधर" "शशलाञ्छन" इत्यादिदर्शनात्, "मृगविषाणम्" इति पाठान्तरम् । एतेषां नारङ्गमूलादीनाम्;

त्रि:सप्तदिवसं तद्वन्मर्दयेत् सिद्धमौषधम्।
पिष्टं चित्रकनिष्क्वाथे वल्लत्रयनिषेवितम् ॥
उन्मादापस्मृती हन्यादेष सर्वेश्वरो रसः ॥२७॥

अथ नेत्ररोगाणां सङ्ख्या।—

कृष्णे पञ्च नवैव सन्धिषु दश त्रीण्येव शुक्लेऽखिले
जाता षोडश वर्त्मजाः खलु चतुर्विंशो दृशोर्विंशतिः।
सप्तातङ्कयुताश्चतुर्नवतिरित्यक्ष्णोरशेषामयान्
यो वेत्ति व्यपहर्तुमेष विदुषामग्रे समर्थो भवेत् ॥२८॥

नारङ्गमूलदन्तीपाठाफेनफलार्कमूलत्रिफलानामष्टानां क्वाथेन रसादित्रिफलान्तं द्रव्यदशकं दिवसत्रयं मर्दयेत्, ततः अम्लवेतसरसयुक्तम् अम्लवेतसक्वाथसयुक्तम् अर्कक्षीरसमन्वितञ्च कृत्वा अम्लवेतसक्वाथेन अर्कक्षीरेण च प्रत्येकं दिनत्रयं मर्दयेत्। पञ्चपञ्चदिने प्रतिपञ्चमदिवसे, अमरीरससंयुतम् अमरी कृष्णपुष्पा निर्गुण्डी नीलदूर्वा वा तद्रससंयुतम्, अत्रायमाशयः,—नारङ्गादिक्वाथेन दिवसत्रयं मर्दयित्वा एकदिनं विश्रम्य परदिने अमरीरसेन मर्दयेत्, एवम् अम्लवेतसक्वाथेन अर्कक्षीरेण च मर्दयित्वा कार्य्यम्। त्रि सप्तदिवसमिति चित्रकनिष्क्वाथे इत्यनेन सम्बध्यते। पिष्टं चूर्णीकृतम्। "चित्रकनिष्क्वाथे" इत्यत्र "त्रिकटुकक्वाथे" इति पाठान्तरम् ॥२४—२७॥

अपस्मारे असद्रूपं पश्यन् इत्युक्तं, तच्च दृष्टिमण्डलदुष्ट्या जायते, अत अपस्मारानन्तरं नेत्ररोगचिकित्साधिकारः। तत्रादौ अधिष्ठानभेदेन नेत्ररोगाणां सङ्ख्यां निरूपयति, कृष्णे इति।—कृष्णे नेत्रकृष्णमण्डले, दृष्टिमण्डलवेष्टने इति यावत्, पञ्च पञ्चसङ्ख्याकातङ्कान्, यो वेत्ति इत्यग्रेणान्वयः। सन्धिषु कनीनिकादिगतेषु षट्सु सन्धिषु नव, सन्धयस्तु षडित्युक्तं सुश्रुतेन, तद्यथा—"पक्ष्मवर्त्मगतः सन्धिः वर्त्मशुक्लगतोऽपरः। शुक्लकृष्णगतस्त्वन्यः कृष्णदृष्टिगतस्तथा॥ कनीनिकागतो ज्ञेयः षष्ठश्चापाङ्गगः स्मृतः॥" इति। अखिले सम्पूर्णे शुक्ले शुक्लभागे, नेत्रयोरेवेति शेषः, दश त्रीण्येव त्रयोदश इत्यर्थः, अत्र त्रीणि इति नपुंसकप्रयोगश्चिन्त्यः, रोगवाचकानां पुंलिङ्गत्वात्, त्रीनेव इति कल्पना साध्वी। वर्त्मजाः चक्षुर्गोलकावरकं निमेषोन्मेषाश्रयं पटलद्वयं वर्त्म उच्यते, तज्जाः आमयाः षोडश जाताः। दृशोः दृष्टिमण्डलयोः चतुर्विंशः, विंशतिः सप्तातङ्कयुताः सप्तविंशतिरोगाः, पारिशेष्यात् नेत्रसर्वगताः इति बोध्यम्, तन्त्रान्तरे नेत्रसर्वगतरोगनिदानाभिधानात् तच्चिकित्साभिधानाच्च अत्र कृष्णभागादिगतरोगाणां सङ्ख्यान

अथ नेत्ररोगचिकित्सा।—

अथ नागादिवर्त्तिः।—

शिलया निहतं नागं रसराजप्रपेषितम्।
द्विगुणं तुल्यमीषच्च कर्पूरं द्रोणपुष्पजैः॥
रसैर्विमर्द्दयेद्वर्त्तिरेषाऽभिष्यन्दनाशिनी ॥२९॥

अथ वाताभिष्यन्दे इन्द्वादिवर्त्तिः।—

कार्पासरसपिष्टेन्दु-मधुशुल्वरसाञ्जनम्।
वाताभिष्यन्दजे ताम्रे तिलपर्ण्यम्बुमर्दितम् ॥३०॥

कृत्वा केवलं विंशतिः सप्त इत्युक्त्या पारिशेष्यात् सप्तविंशतिरिति सङ्ख्यानिर्देशः सर्वगत-रोगानेव बोधयतीति ज्ञेयम्। इति चतुर्नवतिः परस्परं मिलिता गणनया चतुर्नवतिः, नेत्ररोगा इति शेषः। व्यपहर्त्तुं विशेषेण नाशयितुम्, अक्ष्णोरशेषामयानित्यनेन सम्बन्धः, "व्यवहर्त्तुम्" इति पाठे—चिकित्साकर्माचरितुमित्यर्थः। ननु सुश्रुतेन—"तेस्त्रिभिस्त्रिशदुक्तास्ते कफेनाभ्यधिकास्त्रयः। रक्तजाः षोडश प्रोक्ताः सर्वजाः पञ्चविंशतिः॥ बाह्यौ पुनर्द्वौ च तथा रोगाः षट्सप्ततिः स्मृताः। नव सन्ध्याश्रयास्तेषु वर्त्मजास्त्वेकविंशतिः॥ शुक्लभागे दशैकश्च चत्वारः कृष्णभागजाः। सर्वाश्रयाः सप्तदश दृष्टिजा द्वादशैव तु॥ द्वौ च बाह्याश्रयावन्यावनिमित्तनिमित्तजौ। षटसप्ततिर्नेत्ररोगाः सङ्क्षेपेण प्रकीर्त्तिताः॥" इत्यनेन यतः षट्सप्ततिर्नेत्ररोगा उक्ताः तेनात्र विरोधो नाशङ्कनीयः, यतः सुश्रुताचार्य्येण "सङ्क्षेपेण प्रकीर्त्तिताः" इत्युक्तवता प्रायोभाविना प्रधानभूतानामेव सङ्ख्यानिर्देशः कृतः, न त्वप्रधानानाम् इति विज्ञापितम्, "अक्ष्णो-रशेषामयान्" इत्युक्तवता वाग्भटाचार्य्येण तु प्रधानाप्रधानभूताना सर्वेषामेव कार्त्स्न्येन सङ्ख्या निर्देशिता, तेन चतुर्नवतिरिति सङ्ख्याधिक्यं सञ्जातम्, किञ्च दोषदूष्यादीनां मिलनभेदेन रोगानन्त्यात् तन्त्रकर्त्तृणाञ्च विभिन्नकालिकत्वात् सुश्रुतोक्तादन्येऽपि रोगाः सम्भवन्त्येव, यथा रुग्विनिश्चयकृता स्वसङ्ग्रहे पठितौ तन्त्रान्तरीयौ कुञ्चनपक्ष्मशातौ, व्याख्यामधुकोषकृता च पठितौ तन्त्रान्तरीयौ उपपक्ष्म-कृच्छ्रोन्मीलाख्यरोगौ सुश्रुतेन न पठितौ, एवञ्चैतदीयसङ्ख्याधिक्यं न विरोधावहमिति ॥ २८ ॥

नागादिवर्त्त्याम्—शिलया मनःशिलया निहतं मारितं नागं सीसकं शुद्धसीसकं मनः-शिलया सह पुटितमित्यर्थः, तथा रसराजप्रपेषितं शुद्धपारदेन तुल्येन सह पिष्टं, द्विगुणं तुल्यमिति नागापेक्षया द्वैगुण्यं तुल्यत्वं। ईषत् कर्पूरं चतुर्थांशकर्पूरसंयुक्तमित्यर्थः ॥२९॥

अथ श्लेष्माभिष्यन्दे शुल्वादिवर्त्ति ।—

शुल्वजीमूतलोहञ्च सीसञ्च समभागिकम् ।
द्विगुणञ्चाञ्जनं जाती-तिलपर्णीमयूरजैः ॥
पिष्टं निर्घृष्टदध्यर्के श्लेष्माभिष्यन्दनाशनम् ॥३१॥

अथ त्रिदोषाभिष्यन्दे रसेन्द्रादिवर्त्ति ।—

रसेन्द्रभुजगौ तुल्यौ ताभ्यां द्विगुणमञ्जनम् ।
ईषत्कर्पूरसंयुक्तं दशमांशञ्च सर्जकम् ॥३२॥
बलानागबलाजाजी-रसैस्ताम्रे दिनत्रयम् ।
मर्दितं स्यादभिष्यन्दे सन्निपातात्मके हितम् ॥३३॥

अथ पित्ताभिष्यन्दे तीक्ष्णादिवर्त्ति ।—

चूर्णं तीक्ष्णस्य ताम्रस्य रसेन्द्रसमचारितम् ।

इन्द्वादिवर्त्त्यां—कार्पासरस कार्पासमूलरस । इन्दु कर्पूर । मधु क्षौद्र मधुयष्टिकं वा । शुल्व ताम्रम् । ताम्रे ताम्रपात्रे । तिलपर्ण्यम्बुमर्दित रक्तचन्दनक्वाथमर्दितम् ; इन्द्वादिकं सर्वं कार्पासरसेन पिष्ट्वा वर्त्तिं विधाय तां वर्त्तिं ताम्रपात्रे तिलपर्णी-क्वाथेन घृष्ट्वा तया अञ्जयेदिति । यद्वा—पिष्टं सीसकम, कार्पासरसादिकं सर्वं तुल्यांशं गृहीत्वा तिलपर्णीक्वाथेन ताम्रपात्रे घृष्ट्वा तेन चक्षुषोरञ्जनं कर्त्तव्यम् ॥ ३० ॥

शुल्वादिवर्त्त्यां—जीमूतम् अभ्रम् । द्विगुणञ्चाञ्जनमित्येकभागापेक्षया रसाञ्जनस्य द्वैगुण्यम् । जातीति ।—जाती मालती तस्याः पुष्प, चक्षुष्यत्वात् , मयूर अपामार्गः, तस्य च मूल तज्जैः, रसैरिति शेष । निर्घृष्टदध्यर्के निर्घृष्ट विशेषेण घृष्ट, मृष्टमित्यर्थ, दधि यत्र तादृशे अर्के ताम्रपात्रे , ताम्रभाजनमन्थनादौ दध्ना निर्घृष्य तत तस्मिन् जात्यादिरसैः शुल्वादिकं पेषयेदिति । "निर्घृष्टदध्यर्के" इत्यत्र "निर्घृष्ट दध्यर्के" इति कस्यचित पाठ ॥ ३१ ॥

रसेन्द्रादिवर्त्त्यां—भुजग सीसक. । ताभ्यां रसेन्द्रभुजगाभ्यां मिलिताभ्याम् । ईषदिति एकभागापेक्षया चतुर्थांशमित्यर्थ । दशमांशमपि एकभागापेक्षया बोध्यम् । "सर्जकम्" इत्यत्र "सक्तुकम्" इति पाठे—सक्तुकं यवसक्तुकम् , यवस्य नेत्रहितत्वात । नागबला गोरक्षतण्डुला । अजाजी जीरकम , बलानागबलयो स्वरस. अजाज्याश्च क्वाथ.। "अजाजी" इत्यत्र "जाती" इति कुत्रचित पाठ.। ताम्रे ताम्रपात्रे ; "ताम्रे" इत्यत्र "ताम्रम्" इति पाठान्तरम् ॥ ३२।३३ ॥

रसाञ्जनञ्च द्विगुणं वर्षाभूरसमर्दितम् ॥
शर्करामाक्षिकोपेतं पित्ताभिष्यन्दसूदनम् ॥३४॥

अथ पित्ताभिष्यन्दे नागादिवर्त्तिः ।—

नागपारदधात्रीन्दु-रत्नाज्यकणसैन्धवम् ।
रसाञ्जनं कणाक्षौद्रं ताम्बूलीपत्रवारिणा ॥
ताम्रेण मर्दितं कांस्ये पित्ताभिष्यन्दमन्यनुत् ॥३५॥

अथ ताम्रादिवर्त्तिः ।—

ताम्राहितारसपीतकरोहिणीन्दु-
शौण्डीरसाञ्जननदीजपुराणकांस्यैः ।
वर्त्तिः कृता सकलसम्मितहंसपादी-
मूलैर्निहन्ति नयनामयजालमाशु ॥३६॥

तीक्ष्णादिवर्त्त्यां—तीक्ष्णस्य तीक्ष्णलौहस्य । रसेन्द्रसमचारित समभागरसभस्म-योजितम् ॥ ३४ ॥

द्वितीयनागादिवर्त्त्यां—नाग सीसक, पारद पारदभस्म, धात्री आमलकी, इन्दुरत्नं मुक्ताफल कर्पूरमणिर्वा , इन्दु कर्पूर , रत्न मुक्ताफलम् इति वा, उभयोरेव चक्षुष्य-त्वात् , आज्य घृत, कण पिप्पली । कणा जीरक , पिप्पल्या एव भागद्वय वा ; यदुक्त परिभाषायां—"घृते तैले च योगे च यद्द्रव्य पुनरुच्यते । ज्ञातव्य तद्विद्वाचार्य्यै-र्भागतो द्विगुणेन हि ॥" इति , स्थलजजलजभेदात् द्विविधा पिप्पली वा । ताम्रेण मर्दित कांस्ये कांस्यपात्रे ताम्रदण्डेन मर्दितमित्यर्थ । पित्ताभिष्यन्दमन्यनुदित्यत्र मन्य अधिमन्थ ॥ ३५ ॥

ताम्रादिवर्त्त्याम्—अहि सीसकम् । तार रौप्यम् । पीतकं स्वर्णं पीतलोह्न वा । रोहिणी कटुरोहिणी , पीतकरोहिणीत्येकपद वा, तथात्वे—गाम्भारीत्यर्थ । इन्दुः कर्पूरम । शौण्डी पिप्पली । नदीज क्षुद्रशङ्ख , रसरत्नाकरदर्शनात् । पुराणकांस्ये जीर्णकांस्ये , कांस्यभस्मभि । सकलेति ।—ताम्रादिसवतुल्यमण्डूकपर्णीमूलचूर्णे । रसरत्नाकरे "तारकादिवटिका" इति ख्यातायामस्या "पीतकरोहिणी शौण्डी" इति पाठद्वय न, परन्तु "खर्परम्" इत्यधिक पाठो विद्यते, तथा हंसपादीरसेन मर्दन विहितम , तथा च—"तार ताम्र रस सीस कर्पूर खर्पर तथा । रसाञ्जन कांस्यशङ्ख हंसपाद्या द्रवैर्मर्दनम् ॥ वर्त्तिं कृत्वाऽञ्जनाद्धन्ति समस्त नेत्रजामयम् ॥" इति ॥ ३६ ॥

अथ पारदादिवर्त्ति ।—

पारदनागरसाञ्जनसमानदृढशिखिमूलकं सरजम् ।
सप्तदिनं चिञ्चादलरसपिष्टं ताम्रपात्रपर्य्युषितम् ॥३७॥
वर्त्तिरातपशुष्काऽधिमन्थतिमिरार्मपिल्लशुक्लघ्नी ॥३८॥

अथ एकविंशाङ्गवर्त्ति ।—

पारदनागरसाञ्जनविद्रुममाक्षीकसीसलोध्रताम्राणि ।
वृत्तत्रिकटुकगैरिकसिन्धूद्भवतुल्यफेनवराः ॥३९॥
मौक्तिकगन्धिन्याभागिरिकर्णीपुत्रजीवकनकशिफाः ॥४०॥
चिञ्चा षड्विधमौर्वलवणं पिचुमर्दपत्ररसैः ।
पिष्ट्वा ताम्रे लिप्ता वर्त्तिः स्यादधिमन्थपिल्लघ्नी ॥४१॥

अथ षडङ्गवर्त्ति ।—

कर्पूराञ्जनसीसपारदकणातीक्ष्णानि पिष्ट्वा सकृत्
नन्द्यावर्त्तरसैर्विशोष्य मधुना पिष्ट्वा पुनर्भाजने ।
शार्ङ्गे स्फाटिक एव वा विनिहितं शुक्लार्मकाचापहं
तैमिर्यञ्च निराकरोति सहसा नेत्रेऽञ्जनं सर्वदा ॥४२॥

पारदादिवर्त्त्यां—समानमिति प्रत्येकं तुल्यमित्यर्थः । दृढं लौहं, शिखि हरिद्रशृङ्गं, चक्षुष्यत्वात्, मूलकं स्वनामख्यातः कन्दविशेषः, तच्च बालमेव ग्राह्यम्, "दृढशिखिमूलकम्" इत्यत्र "क्षारसिन्धुफेनकम्" इति क्वचित् पाठः । सरजं नवनीतम्, रजः पर्पटकः तत्सहितमित्यर्थो वा । चिञ्चादलरसपिष्टं तिन्तिडीपत्ररसमर्दितं ताम्रपात्रपर्य्युषितं ताम्रभाजने एव सप्तदिनस्थितम् ॥ ३७।३८ ॥

एकविंशाङ्गवर्त्त्यां—वृत्तं सप्तपर्णः । फेनं समुद्रफेनं । वरा त्रिफला । गन्धिनी मुरामांसी । आभा बब्बूलः । गिरिकर्णी श्वेतापराजिता । पुत्रजीवः तापसतरुः । कनकशिफा धुस्तूरमूलम् । षड्विधमौर्वलवणम् और्वेण पांशुलवणेन सह लवणं पञ्चलवणम्, और्वेण पञ्चलवणेन च मिलित्वा षड्विधं लवणमित्यर्थः । पिचुमर्दपत्ररसैः निम्बपत्ररसैः । "लिप्ता" इत्यत्र "पाते" इति पाठान्तरम् ॥ ३९—४१ ॥

षडङ्गवर्त्त्यां—तीक्ष्णं तीक्ष्णलौहं खर्परं वा । नन्द्यावर्त्तरसैः पिण्डीतगररसैः, "नन्द्यावर्त्त" इत्यत्र "नन्दीवर्त्त" इति क्वचित् पाठः । सकृत् एकवारम्, एकदिनमित्यर्थः । शार्ङ्गे शृङ्गनिर्मिते, भाजने इति सम्बन्धः ॥ ४२ ॥

अथ गरुडाञ्जनम् ।—

कतकसैन्धवतुत्थरसाञ्जन त्रिकटुकस्फटिकाब्दवराटकम् ।
त्रिकटुताम्रमयोहिमरोहिणी-जलधिफेनवचानृकरोटिका ॥४३॥
उरगपारदटङ्कणमञ्जनं त्रिफलया मधुकेन च संयुतम् ।
करजवल्करसेन सुपेषितं गरुडदृष्टिसमां कुरुते दृशम् ॥४४॥

अथ नयनामृताञ्जनम् ।—

रसेन्द्रभुजगौ तुल्यौ ताभ्यां द्विगुणमञ्जनम् ।
ईषत्कर्पूरसंयुक्तमञ्जनं तिमिरापहम् ॥४५॥

अथ तिमिरहराञ्जनम् ।—

गन्धकाद्द्विगुणः सूत सौवीरञ्चाष्टमाशतः ।
कपित्थरससम्पिष्टमञ्जनं तिमिरप्रणुत् ॥४६॥

गरुडाञ्जने—कतक जलप्रसादनफल "निर्मली" इति लोके । अब्द मुस्तकम् । "त्रिकटुताम्रम्" इत्यत्र पुनस्त्रिकटुग्रहणात् त्रिकटोर्भागद्वयम्, "त्रिकटु" इत्यत्र "त्रिफला" इति पाठे—"त्रिफलया मधुकेन च सयुतम्" इत्यत्र द्वितीयत्रिफलया "द्राक्षाकाश्मर्य्यखर्जूरी फलानि मिलितानि तु । मधुरत्रिफला ज्ञेया मधुरादिफल-त्रयम् ॥" इत्यनेनोक्ता मधुरत्रिफला ग्राह्या । हिम कर्पूर । नृकरोटिका नरशिर-कपालम् । उरग सीसकम । अञ्जनमिति नेत्राञ्जन, रसाञ्जनस्य प्रागुपात्तत्वात् । करजवल्करसेन करञ्जत्वग्रसेन । कतकादिमधुकान्त सर्वं करञ्जत्वग्रसेन पिष्ट्वा वर्त्ति कार्य्या ॥ ४३।४४ ॥

नयनामृताञ्जने—ईषदिति चतुर्थांश, योगरत्नाकरसवादात, तथा च—"रसेन्द्र-भुजगौ तुल्यौ तयोर्द्विगुणमञ्जनम । सूततुर्य्यांशकर्पूरमञ्जन नयनामृतम ॥" इति ॥४५॥

तिमिरहराञ्जने—गन्धकाद्द्विगुण गन्धकमपेक्ष्य द्विगुण, भागो ग्राह्य इति शेष, एवञ्च सूतस्य एको भाग गन्धकस्य च भागद्वयम् । गन्धकभागापेक्षया सूतस्य द्वैगुण्यमिति केचित् । सौवीर सौवीराञ्जनम् अष्टमाशत इति एकभागापेक्षया बोध्यम् ॥ ४६ ॥

अथ द्वादशाङ्गवर्त्तिः ।—

नेपालतुत्थटङ्कणतार्क्ष्य-वरात्रिकटुफेनजलजञ्च ।
जम्बीरनीरपिष्टं काचार्म-स्रावतिमिरशुक्लपिल्लघ्नम् ॥४७॥

अथ पटलहरेन्द्ररसः ।—

रुद्ध कपर्दटङ्कणं लाक्षाजम्बीरयोर्द्रवैः ।
मास धान्ये क्षिप्तः सूतः पटलादिरोगहरः ॥४८॥

अथ स्वर्णादिवर्त्तिः ।—

स्वर्णं वराटिका सूतः सारः पूतिकपल्लवः ।
नवनीतेन संयुक्ता वर्त्ति पुष्पं चिरन्तनम् ॥४९॥

अथ विषाद्यञ्जनम् ।—

विषं धात्रीफलरसैर्दिनैकं परिभावितम् ।
अञ्जन शङ्खसहितं प्रगाढतिमिरप्रणुत् ॥५०॥

अथ पुष्पहराञ्जनम् ।—

शम्बूकं वा वराटं वा दग्धं सूक्ष्मं विचूर्णयेत् ।
अञ्जनं नवनीतेन हन्ति पुष्प चिरन्तनम् ॥५१॥

द्वादशाङ्गवर्त्त्यां—नेपाल ताम्रम्, "नेपालम्" इत्यत्र "जैपालम" इति कस्यचित पाठ । तार्क्ष्यं रसाञ्जनम् । वरा त्रिफला । फेन समुद्रफेन । जलजं शङ्ख शङ्खनाभिरित्यर्थं ॥ ४७ ॥

पटलहरेन्द्ररसे—कपर्द वराटक । सूतशब्देनात्र भस्मसूत ग्राह्य । कपर्दटङ्कणं तथा लाक्षाजम्बीरयोर्द्रवै पिष्ट रुद्धश्च सूत मासं धान्ये क्षिप्त इति योजना । कल्पना चेदृशी—लाक्षाक्काथेन जम्बीररसेन च पिष्ट सूत वराटिकायां प्रपूर्य्य टङ्कणेनाजम्बीरपिष्टेन वराटिकामुखञ्चालिप्य धान्यराशौ मास स्थापयेदिति ॥४८॥

स्वर्णादिवर्त्त्यां—सार पूतिकपल्लव पूतिक नाटाकरञ्ज तत्पल्लोत्थरस इत्यथ । पुष्पमित्यत्र हन्तीति अध्याहरणीयम् ॥ ४९ ॥

विषाद्यञ्जने—विषम् अमृतम् । शङ्खसहित शङ्खनाभिसहितम्, विष शङ्खञ्च आमलकीरसै, पिष्ट्वा अञ्जन प्रयोक्तव्यम् ॥ ५० ॥

पुष्पहराञ्जने—सर्वं स्पष्टम् ॥ ५१ ॥

अथ शिग्रुमूलाद्याश्च्योतनम् ।—

शिग्रुमूलं वचा क्षौद्रैर्घृष्ट्वा नेत्रं प्रपूरयेत् ॥५२॥

अथ नेत्रशूलघ्नमाश्च्योतनम् ।—

निष्पिष्याऽऽर्द्रां निशां वाऽथ सद्यः शूले सुखावहम् ॥५३॥

अथ पौनर्नवाञ्जनम् ।—

श्वेतं पुनर्नवामूलं जलेनाञ्ज्याच्च शूलनुत् ॥५४॥

अथ स्रावहराञ्जनम् ।—

श्वेत पुनर्नवामूलं घृतघृष्टं समञ्जयेत् ।
जलस्रावं निहन्त्याशु—" ॥५५॥

अथ वक्ररोमहराञ्जनम् ।—

"—तन्मूलञ्च निशायुतम् ।
अञ्जयेद्वक्ररोमाणि न भवन्ति कदाचन ॥५६॥

अथ नृकपालाञ्जनम् ।—

निघृष्य नृकपालन्तु नारीस्तन्येन चाञ्जयेत् ।
शूलं सतिमिरं हन्ति पुष्पं सर्पाक्षिदुग्धतः ॥५७॥

शिग्रुमूलाद्याश्च्योतने—शिग्रुमूलं शिग्रुमूलरसम्, शिग्रुमूलरसेन क्षौद्रेण च सह वचा ताम्रपात्रे घृष्ट्वा तेन नेत्रपूरणं कार्य्यम् ॥ ५२ ॥

नेत्रशूलघ्नाश्च्योतने—आर्द्रां निशां सरसहरिद्राम् । शूले नेत्रशूले ॥ ५३ ॥

पौनर्नवाञ्जने—आञ्ज्यात् अञ्जनं कार्य्यम् ॥ ५४ ॥

स्रावहराञ्जने— सर्वं स्पष्टम् ॥ ५५ ॥

वक्ररोमहराञ्जने—तन्मूलञ्च निशायुतं हरिद्रा पुनर्नवामूलञ्च घृतेन घृष्ट्वा अञ्जयेत । वक्ररोमाणि पक्ष्मकोप-पक्ष्मशातादिरोगयुक्तानीत्यर्थः, बत्मानीति शेषः ॥ ५६ ॥

नृकपालाञ्जने—नृकपालं नरशिरोऽस्थि । सर्पाक्षिदुग्धत इत्यत्र अञ्जनादिति शेषः, सर्पाक्षिदुग्धः सर्पाक्षी सर्पसहा "पानशिउली" इति भाषा, तस्या दुग्ध-वन्निर्य्यासः, पुष्पं हन्ति इत्यनेन सम्बन्धः ॥ ५७ ॥

अथ शिग्रुबीजतैलाश्चोतनम्।—

चिञ्चाटलस्वरसपेषितशिग्रुबीजं
कांस्ये निघृष्य परिशोष्य खरातपेन।
तैलं ततः स्रुतमिदं शशिपादयुक्तं
युञ्ज्यादृशामतिमिरे तिलमात्रमक्ष्णि ॥५८॥

अथ पटलहराञ्जनम्।—

कारवेल्लद्रवैः सार्धं सम्यग्भर्ज्या कपर्दिका।
सूतकं टङ्कणं लाक्षा-तुल्यं जम्बीरजद्रवैः ॥५९॥
मर्दयेत्ताम्रपात्रे तु तस्मिन् रुद्ध्वा विनिक्षिपेत्।
धान्यराशिस्थितं मासमञ्जनं पटलं हरेत् ॥६०॥

अथ तिमिरनाशनाञ्जनम्।—

भृङ्गराजरसैर्घृष्टं पलैकं रक्तचन्दनम्।
ताम्रपात्रे स्थितं भाव्यं तद्रसेन पुनः पुनः ॥६१॥
शतधा भावयेत् यत्नात् पेष्यं पेष्यं पुनः पुनः।
मधुनाऽप्यञ्जनं हन्ति षड्विधं तिमिरामयम् ॥६२॥

शिग्रुबीजतैलाश्चोतने—चिञ्चा तिन्तिडी। तैलं ततः स्रुतं तद्बीजनिःस्रुतं तैलम्, "स्रुतम्" इत्यत्र "शृतम्" इति पाठे—तद्बीजकल्कपक्वं तैलमित्यर्थः। शशिपादयुक्तं पादांशकर्पूरसंयुक्तम्। तिलमात्रं बिन्दुमात्रमित्यर्थः, तैलमित्यस्य विशेषणम् ॥ ५८ ॥

पटलहराञ्जने—भर्ज्या पाच्या इत्यर्थः, दोलायन्त्रे कारवेल्लद्रवेण कपर्दिका पक्त्वा विशोषयेदिति। तस्मिन् ताम्रपात्रे। कपर्दिकादिलाक्षान्तद्रव्यचतुष्टयं जम्बीर-रसेन ताम्रपात्रे मर्दयेत, ततः सौषधं तत् पात्रं पात्रान्तरेण रुद्ध्वा धान्यराशौ मासं स्थापयेदिति निष्कर्षः ॥ ५९।६० ॥

तिमिरनाशनाञ्जने—तद्रसेन भृङ्गराजरसेन। भाव्यं तद्रसेन पुनः पुनः इत्युक्त्वाऽपि पुनः शतधा भावयेदित्युक्तिः विशेषबोधनार्थं न्यूनाधिकसङ्ख्यानिरासार्थं वा। पेष्यं पेष्यं पुनः पुनः प्रतिवारं भावनादानकाले चूर्णीकृत्येत्यर्थः "दिवा दिवाऽऽतपे शुष्कं रात्रौ रात्रौ निवासयेत्। शुष्कं चूर्णीकृतं द्रव्यं भावनाविधिरिष्यते ॥" इति भावनाविधानात्। षड्विधं तिमिरामयं वातपित्तकफरक्तसन्निपातजं परिम्लायिसंज्ञकञ्च ॥ ६१।६२ ॥

अथ काचान्ध्यहराञ्जनम्।—

बीजपूररसैर्घृष्टं विषतुल्यसितायुतम्।
अञ्जनं कारयेद्रात्रौ काचमान्ध्यञ्च नाशयेत्॥६३॥

अथ शम्बूकादिवर्त्तिः।—

शम्बूकं पारदं नागं कांस्यचूर्णं रसाञ्जनम्।
समं सर्वमिदं चिञ्चा-दलद्रावेण पेषयेत्॥६४॥
ताम्रपात्रगतां वर्त्तिं छायाशुष्कान्तु कारयेत्।
शुक्रार्मतिमिरं पिल्लं हन्ति सा मधुनाऽञ्जिता॥६५॥

अथ अभिष्यन्दहरो योगः।—

असकृच्छीततोयेन सिञ्चेन्नेत्राभिष्यन्दजित्॥६६॥

अथ रात्र्यन्धहराञ्जनम्।—

अजस्य कृष्णमांसान्तः पिप्पलीमरिचं क्षिपेत्।
सीवयित्वा घृतैः पश्चाद्घटिकान्ते समुद्धरेत्॥
मध्वाज्यस्तन्यसम्पिष्टं रात्र्यन्धस्याञ्जनं हितम्॥६७॥

काचान्ध्यहराञ्जने—विषम् अमृतम्। अञ्जनं रसाञ्जनम्। कारयेत् दापयेदित्यर्थः, अञ्जनमिति शेषः। विषतुल्यसितायुतं विषतुल्यसितानां युतं योगेन कृतमित्यर्थो वा, अस्मिन् पक्षे—अञ्जनशब्देन नेत्राञ्जनमेव बोद्धव्यम्। "विषतुल्यसितायुतम्" इत्यत्र "विषतुल्यं शिलाजतु" इति क्वचित् पाठः॥६३॥

शम्बूकादिवर्त्त्यां—शम्बूकं शम्बूकभस्म। ताम्रपात्रगतां वर्त्तिं ताम्रपात्रे तिन्तिडीपत्ररसेन पिष्टा वर्त्तिं कृत्वा तत्रैव स्थितां वर्त्तिं छायायां शोषयेदित्यर्थः॥६४।६५॥

अभिष्यन्दहरयोगे—सिञ्चेत्, अभिष्यन्दमिति शेषः। नेत्राभिष्यन्दजिदित्यत्र तत्तोयमिति अध्याहरणीयम्॥६६॥

रात्र्यन्धहराञ्जने—कृष्णमांसान्तः यकृत्पिण्डाभ्यन्तरे, यकृतः कृष्णवर्णपिण्डाकारत्वात्। "सीवयित्वा" इत्यत्र "सेचयित्वा" इति कुत्रचित् पाठः। घटिकान्ते दण्डद्वयान्ते दण्डान्ते वा घटिकाशब्देन दण्डद्वयस्य मतान्तरे दण्डस्य चाभिधानात्। विपाटितच्छागयकृत्पिण्डमध्ये पिप्पलीमरिचं समभागं क्षिप्त्वा संसीव्य च घृतेन घटिकां यावत् पचेत्, ततः सर्वं ततः पिष्ट्वा मध्वादिभिरञ्जयेत्। चक्रेण तु योगोऽयमेव पठ्यते, यथा—"कणा छागयकृन्मध्ये पक्वा तद्रसपेषिता। अचिराद्धन्ति नक्तान्ध्यं तद्वत् सक्षौद्रमूषणम्॥" इति॥६७॥

अथ रात्र्यन्धे व्योषाञ्जनम्।—

अजापित्तकृतं व्योष धूमस्थाने विशोष्य च।
चिरविल्वरसैर्घृष्टं रात्र्यन्धस्याञ्जनं हितम्॥६८॥

अथ रात्र्यन्धे मरिचाञ्जनम्।—

मरिचं मत्कुणे रक्ते रात्र्यन्धहरमञ्जनम्॥६९॥

अथ रात्र्यन्धे पञ्चाङ्गगुडिका।—

ताम्राग्र्यलवणशङ्खैस्तुल्या मगधोद्भवाऽथ वै धात्री।
जलपिष्टा गुटिकेयं सायसमयान्ध्यमपहरति॥७०॥

अथ नवनेत्रदात्री वटी।—

द्विरष्टौ ताम्ररजसो मधुकस्य चतुर्दश।
कुष्ठस्य द्वादशांशाः स्युर्वचायाश्च दशैव तु॥७१॥
रजतस्य च चत्वारो द्वौ भागौ कनकस्य च।
सैन्धवस्याष्टभागाः स्यु पिप्पल्याश्च षडेव तु॥७२॥
अजाक्षीरेण सम्पेष्य ताम्रपात्रे निधापयेत्।

व्योषाञ्जने—अजापित्तकृत छागपित्ते निक्षिप्तमित्यर्थ, धातूनामनेकार्थत्वात, "अजापित्तकृत व्योषम्" इत्यत्र "अजापित्तगत व्योम" इति पाठान्तरम्। धूमस्थाने यत्र नित्य धूम उद्गच्छति तस्मिन् स्थाने पाकशालायामित्यर्थ। चिरविल्वरसे करञ्जरसे। छागपित्तमध्ये त्रिकटुचूर्णं संस्थाप्य धूमोष्मणा विशोष्य च पिष्ट्वा वर्त्तिं कुर्य्यात, तत चिरविल्वरसेन घृष्ट्वा रात्र्यन्धे अञ्जन कार्य्यम्॥ ६८॥

मरिचाञ्जने—मत्कुणे रक्ते इत्यत्र पिष्टमिति शेष, मत्कुण "छारपोका" इति प्रसिद्ध. क्रिमिविशेष॥ ६९॥

पञ्चाङ्गगुडिकायाम्—अग्र्यलवण सैन्धवम्। शङ्ख शङ्खनाभि। मगधोद्भवा पिप्पली, सा च ताम्रादिभिस्त्रिभिस्तुल्या, तेन च ताम्रादित्रयाणा प्रत्येकमेकैकभाग पिप्पल्याश्च भागत्रयम्, धात्री आमलकी, साऽपि ताम्रादिद्रव्यत्रयतुल्या। "अग्र्य" इत्यत्र "बाल" तथा "अथ वै धात्री" इत्यत्र "मनोज्ञा च" इति क्वचित् पाठ। सायसमयान्ध्य नक्तान्ध्यमित्यर्थ.॥ ७०॥

नवनेत्रदात्र्या—द्विरष्टौ षोडश भागा., "द्विरष्टौ" इत्यत्र "द्वौ भागौ" इति

अभिष्यन्दमधीमन्थं व्रणशुक्लं कुकूणकम् ॥
तिमिरं पटलं काच कण्डूं हन्ति विशेषतः ॥७३॥

अथ द्विरुत्तरकणादिवर्त्ति ।—

कणालवणवचायुग्यष्टिताम्रैः क्रमेण
द्विगुणधरणवृद्धैश्छागदुग्धेन पिष्टैः ।
निखिलनयनरोगान् हन्ति वर्त्तिर्विशिष्टा
रज इव निशि सर्पिः-चौद्रयुक्तं वरायाः ॥७४॥

अथ ताम्रवर्त्ति ।—

आर्द्रालकुचभृङ्गाणां रसः पिष्टेन कस्यचित् ।
गन्धकेन समांशेन प्राग्वत्ताम्रञ्च मारितम् ॥७५॥

क्वचित पाठ । कनकस्य सुवर्णस्य । व्रणशुक्ल सव्रणशुक्लम् । कुकूणक बाला-नामक्षिवर्त्मस्थरोगविशेषम् ॥ ७१—७३ ॥

द्विरुत्तरकणादिवर्त्त्या—कणा पिप्पली, क्रस्वोऽव छान्दस । लवण सैन्धवं, चक्षुष्यत्वात् । युग्यष्टि स्थलजजलजभेदात् यष्टिमधुद्वयम, "युग्" इत्यत्र "रुग्" इति पाठे—कुष्ठमित्यर्थ । द्विगुणधरणवृद्धै उत्तरोत्तर द्विरावृत्तधरणै, धरण पलदशमांश', रक्तिचतुष्टयाधिका षण्माषका इति यावत्, एवञ्च पिप्पल्या धरण, लवणस्य द्वे धरणे, वचाया चत्वारि धरणानि, यष्टिमधुन अष्टौ धरणानि, जलजयष्टिमधुकस्य षोडश धरणानि, ताम्रस्य च द्वात्रिंशदिति बोध्यम् । विशिष्टा विशेषौत्कर्ष्यविशिष्टा इत्यर्थ । रज इवेति ।—वराया त्रिफलाया रज चूर्णं निशि इत्यत्र सेवितमिति शेष । अत्र इव शब्दात वरारज कृतयोगोऽपि नयनरोगहन्ता इत्यर्थेत आयाति । सैव्ययोगोऽय तन्त्रान्तरदर्शनात्, तथा च सिद्धयोगे—"यस्त्रैफलं चूर्णमपथ्यवर्जी साय समश्नाति हविर्मधुभ्याम् । स मुच्यते नेत्रगतैर्विकारैर्भृत्यैर्यथा क्षीणधनो मनुष्य ॥" इति ॥ ७४ ॥

ताम्रवर्त्त्याम्—आर्द्रा आर्द्रकम् । लकुच डहु । रस कस्यचित् आर्द्रादित्रयाणां मध्ये कस्यचिदेकस्य रस । पिष्टेन चूर्णितेन । समांशेन आर्द्रादीनामेकतमस्य रसतुल्येन । प्राग्वत् एभि कृता वर्त्ति निखिलनयनरोगान् हन्तीत्यर्थ । पिष्टेन समांशेन गन्धकेन सह आर्द्रादीना कस्यचित् रस, मारित ताम्रञ्च प्राग्वत् इति योजना ॥ ७५ ॥

अथ ताम्रद्रुतिः ।—

ताम्राभ्रकञ्च तुल्यञ्च दशनिष्कं पृथक् पृथक् ।
कन्दुकस्थमिदं त्रिंशत्कर्षं चूर्णितगन्धकम् ॥७६॥
दत्त्वाऽल्पशोऽग्निनाऽल्पेन रुद्ध्वा धूमं विसर्जयेत् ।
प्रस्थाम्बुमर्दितस्याथ प्रसादं निःसृतं युतम् ॥७७॥
तुल्यनीरशिलाजाभ्यां कर्षांशाभ्यां विशोषयेत् ।
ताम्रद्रुतिरियं साध्य-मानुषीचौरमाचिकात् ॥७८॥
काचार्मपिल्लाभिष्यन्द-व्रणशुक्लप्रणाशिनी ।
तत्किट्टं दद्रुकिटिभ-पामादीन् लेपनाज्जयेत् ॥७९॥

अथ द्वितीयताम्रद्रुतिः ।—

शुल्वं गन्धकमभ्रकञ्च रसकं दिक्सङ्ख्यनिष्कं पृथक्
सर्वं रुद्रजटारसेन बहुशो भृङ्गस्य सारेण वा ।
प्रायः श्लक्ष्णतरं सुमर्दितमिदं सम्यक् पुटं कारयेत्
स्थाल्यां तत् पुनरेव शीतलमिदं विन्यस्य तस्यान्तरे ॥८०॥

ताम्रद्रुतौ—कन्दुकस्थं कन्दुरेवेति कन्दुकः लौहमयकटाहविशेषः तत्स्थम् । अग्निनाऽल्पेनेत्यत्र पचेत् इति शेषो द्रष्टव्यः । धूमं विसर्जयेत् पाककाले अन्तरा अन्तरा आवरणमुद्घाट्य धूमं निःसारयेदित्यर्थः, पाककाले तदुत्थधूमः यथा स्वगात्रे न लगति तथा परिहरेदित्यर्थो वा । अस्य ताम्रादिभस्मनः प्रसादम् उपरिस्थ-स्वच्छजलम् । तुल्येति ।—तुल्यनीरः चर्णिततुल्यालोडितजलं शिलाजः शिलाजतु ताभ्यां, युतमित्यनेन सम्बध्यते । कर्षांशाभ्यामिति प्रत्येकम् । तत्किट्टं जलाधः-स्थितं ताम्रादिभस्म । अयमर्थः,—ताम्रादिद्वयं यथोक्तमानं लौहपात्रे गृहीत्वा चुल्ल्यां मृद्वग्निना पचेत्, किञ्चिदुष्णे तत्र अल्पमानं गन्धकचूर्णं क्षिप्त्वा पात्रान्तरेणाच्छादयेत्, भस्मीभूते च तस्मिन् गन्धके आवरणमुन्मोच्य धूमं निःसार्य च पुनः अल्प-मात्रया गन्धकचूर्णं क्षिपेत् आवृणुयाच्च, एवमागन्धकक्षयात् कुर्यात्, ततः प्रस्थमितेन जलेन तद्भस्म मर्दयित्वा स्थापयेत्, कियत्कालान्तरे उपरिस्थितं प्रसन्नं जलं गृहीत्वा कर्षमात्राभ्यां तुल्योदकशिलाजतुभ्यां सह मिश्रयित्वा च शुष्कं कुर्यादिति ॥ ७६—७९ ॥

द्वितीयताम्रद्रुतौ—रसकः खर्परम् । दिक्सङ्ख्यनिष्कं दशनिष्कम् । रुद्रजटारसेन

निष्कं निष्कमनन्तरं परिपचेज्जीर्णं यथा गन्धकं
स्यादेवं शतनिष्कमात्रमसकृत्तद्भस्म शीतं ततः ।
प्रस्थेनोष्मितवारिणा विलुलितं कल्कं विना गालितं
सङ्गृह्याम्बु तदन्तरे शिखिनिभं तुत्थं सुचूर्णीकृतम् ॥८१॥
कर्षांशामितमञ्जनं विनिहितं कांस्ये परं शोषयेत्
तां ताम्रद्रुतिमामनन्ति निखिलान्नेत्रामयान्नाशयेत् ॥८२॥

अथ गन्धकद्रुतिः ।—

आर्द्रकस्य रसे पिष्टं गन्धकेन विमिश्रितम् ।
तुल्यन्तु निष्कदशकं तन्मानञ्चाभ्रकं क्षिपेत् ॥८३॥
दशनिष्केण तन्मानं ताम्रञ्च शकलीकृतम् ।
भर्जयेत् खर्परे क्षिप्त्वा दहेत्तदनु चूर्णयेत् ॥८४॥
तन्मिश्रं कन्दुकस्थेन चूर्णमेतेन भर्जयेत् ।
गन्धकं चूर्णितं कृत्वा कर्षन्तु विधिना शनैः ॥८५॥

रुद्रजटा शिवजटा "जटालङ्का" इति ख्याता, तस्या रसेन। भृङ्गस्य भृङ्गराजस्य सारेण रसेन। श्लक्ष्णतरं मसृणतरं यथा तथा इति सुमर्दितमित्यस्य विशेषणम्। तस्यान्तरे तस्य स्थालीपुटस्याभ्यन्तरे। निष्कं निष्कमिति।—स्थालीपुटाभ्यन्तरे तद्भस्म स्थापयित्वा असकृत् पुनः पुनः निष्कं निष्कं गन्धकं दत्त्वा तथा परिपचेत् यथा गन्धकं जीर्णं स्यात्, एवं-क्रमेण शतनिष्कमात्रं गन्धकं दत्त्वा पचेत्। अत्रापि "अग्निनाऽल्पेन रुद्ध्वा धूमं विसर्जयेत्" इति पूर्वयोगोक्तकल्पना प्रसज्यते। शिखिनिभं तुत्थं मयूरकण्ठाभं तुत्थम्। असितमञ्जनं नीलाञ्जनं सौवीराञ्जनमिति यावत्, तुत्थनीलाञ्जनयोः प्रत्येकं कर्षमानता। कांस्ये कांस्यपात्रे। पूर्वयोगप्रदर्शिता कल्पना अस्मिन्नपि ज्ञातव्या ॥ ८०—८२ ॥

गन्धकद्रुतौ—तन्मानं दशनिष्कमानम्। दशनिष्केण इति पदं प्रथमश्लोके द्वितीयपादोक्तेन "गन्धकेन" इति तृतीयान्तेन सम्बध्यते, एवञ्च दशनिष्केण गन्धकेन विमर्दितम् आर्द्रकस्य रसे च पिष्टं दशनिष्कं तुल्यं दशनिष्कञ्चाभ्रमिति फलितम्। तन्मानं ताम्रञ्च शकलीकृतं कुट्टितं ताम्रमपि दशनिष्कमानं खर्परे भर्जयेत् दहेच्च, तदनु दाहानन्तरं चूर्णयेत्, खर्परे दग्धं ताम्रखण्डमिति शेषः। तन्मिश्रमिति।—

भर्जितं तज्जलप्रस्थे नीलञ्चापि शिलाजतु ।
कर्षप्रमाणं निक्षिप्य मर्दयेद्भावयेत् पुनः ॥८६॥
प्रसाद स्रावयेत् पश्चादातपे परिशोषयेत् ।
गन्धकद्रुतिरित्येषा सर्वनेत्रामयापहा ॥८७॥
विशेषात् व्रणकुष्ठञ्च पिल्ल काच कुकूणकम् ।
जयेत्तस्य घृतक्षौद्रे सर्वं तत् परिकल्पयेत् ॥८८॥
व्रणान् कृच्छ्रान् सुसूक्ष्मास्यानपि शीघ्र निवर्त्तयेत् ।
तत्किट्ट दद्रुकिटिभ-पामादीन् लेपनाज्जयेत् ॥८९॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये उन्माद-वातापस्मार-नेत्ररोगाणामुपचारो नाम त्रयोविंशोऽध्यायः ॥ २३ ॥

अथ चतुर्विंशोऽध्यायः ।

अथ कर्णरोगादिचिकित्सनम् ।—

अथ कर्णरोगाणां नामानि ।—

शूला दोषचयाभिभूतिजनिता पञ्च प्रतीनाहरुक्-
कण्डूविद्रधिपालिशोषपरिपोटोत्पातलेह्यर्बुदाः ।

कन्दुकस्थेन भर्जनखर्परस्थेन रसेन ताम्रचूर्णेन सह मिश्र मिश्रित तत पूर्वोक्त गन्धकाम्रतुल्यचूर्णं तथा चूर्णित गन्धक कर्षं कर्षप्रमाण कृत्वा दत्त्वा इत्यर्थ, शनैः मन्दाग्निना विधिना यथाविधि, "हृष्टा धूम विसर्जयेत्" इत्युक्तक्रमेणेत्यर्थ, भर्जयेत ; भर्जित तत भस्म कर्षप्रमाण नीलञ्चापि शिलाजतु जलप्रस्थे निक्षिप्य मर्दयेत पुन भावयेच्च, नील नीलाञ्जन, शिलाजतु च एतयो प्रत्येक कर्षप्रमाणम्। नीलमित्यस्य शिलाजतुविशेषणत्वे नील शिलाजतु ताम्रनि सर्वशिलाजतु इत्यर्थ, तस्य मयूरकण्ठसच्छायत्वात, यदुक्त चरके—"ताम्रात बर्हिणकण्ठाभ तीक्ष्णोष्ण पच्यते काटु" इति। सुसूक्ष्मास्यान् व्रणान् सूक्ष्मच्छिद्रान् व्रणान् इत्यर्थ ॥ ८३—८९ ॥

इति रसरत्नसमुच्चयबोधिन्या त्रयोविंशोऽध्याय समाप्त ॥ २३ ॥

शोफार्शः क्रिमिकूचिकर्णकविदार्य्युन्मन्थसत्तन्त्रिका-
नादः पिप्पलिदुःखवर्द्धिवधिरास्ते पूतिकर्णेन च ॥१॥

नेव ह्रीन्द्रियाधिष्ठानम्, अत इन्द्रियाधिष्ठानगतरोगचिकित्साप्रसङ्गात् कर्णरोग-चिकित्सित विवक्षुरादौ तेषां नामान्याह शूला इति ।—दोषचयाभिभूतिजनिताः दोषचयेन दोषसमूहेन वातपित्तकफरक्तसन्निपातेन इत्यर्थः, या अभिभूतिः आक्रान्तिः आक्रमणमित्यर्थः, कर्णयोरिति शेषः, तज्जनिता पञ्च पञ्चविधा, शूला कर्णशूला इत्यर्थः । प्रतीनाहरुक् प्रतीनाहरोग इत्यर्थः । कण्डूः कर्णकण्डूः । विद्रधिः कर्णविद्रधिः, अत्र विद्रधिशब्देन कर्णपाकस्यापि परिग्रहणम्, कर्णविद्रधेः पाकेन कर्णपाकसम्भवात् । पालिशोषः पालिः कर्णावयवविशेषः तद्गतः शोषः, तथा च वाग्भटः,—"शिरास्थः कुरुते वायुः पालिशोषं तदाह्वयम्" इति । "पालिशोथः" इति पाठस्तु न मनोरमः तदाख्यकर्णरोगस्य शास्त्रेऽदर्शनात् वाग्भटे पालिशोषदर्शनाच्च इति । परिपोटः, उत्पातः लेही परिलेही, त्रयोऽप्येते पालिगतविकाराः । अर्बुदशोफार्शांसि कर्णगतान्येव ते चार्बुदादयः यथोक्तसञ्ज्ञाका ज्ञातव्याः । क्रिमिकूचिकर्णकः क्रिमिकर्णकः कूचिकर्णकश्च, कूचिकर्णः कर्णरोगविशेषः, रोगेऽस्मिन् वाताद्भ्यन्तरे शष्कुली सङ्कुचिता भवति, तथा च वाग्भटः,—"गर्भेऽनिलात् सङ्कुचिता शष्कुली कूचिकर्णकः" इति । विदारी विदारिका, तथा च वाग्भटः,—"सन्निपाताद्विदारिका । सवर्णः सरुजः स्तब्धः श्वयथुः समुपेक्षितः ॥ कटुतैलनिभं पक्वः स्रवेत् कृच्छ्रेण रोहति । सङ्कोचयति रूढा च सा ध्रुवं कर्णशष्कुलीम् ॥" इति । उन्मन्थः उन्मन्थकः, अयमपि पालिगतरोगविशेषः । सत्तन्त्रिका सती स्थिरा दृढा इत्यर्थः, तन्त्रिका कर्णपालिगतरोगविशेषः, तल्लक्षणं यथा वाग्भटे—"कृशा दृढा च तन्त्रीवत् पाली वातेन तन्त्रिका" इति, "उन्मन्थसत्तन्त्रिका" इत्यत्र "उन्मन्थकस्तन्त्रिका" इति पाठकल्पना सुखबोधानु-कूला । नादः कर्णनादः, समानतन्त्रोक्तकर्णक्ष्वेडस्यात्रैवान्तर्भावः । पिप्पली "एको नीरुगनेको वा गर्भे मांसाङ्कुरः स्थिरः । पिप्पली पिप्पलीमानः—" इत्यनेन वाग्भटोक्ता । दुःखवर्द्धिः दुःखवर्द्धनाख्यः दुर्विद्धजनितः शोथविशेषः । वधिरः पूतिकर्णश्च, एते पञ्चविंशतिसञ्ज्ञाका कर्णरोगा ज्ञातव्या इति वाक्यशेषः । परार्द्धे "शोफार्शः क्रिमिपूतिकर्णकविदार्य्यास्रावनिस्तन्द्रिका नादः पिप्पलिदुःखवर्द्धिवधिरास्ते कर्णपाकेन च" इति पाठान्तरं न समीचीनं, वाग्भटमतोपजीविनि अस्मिन् उपजीव्य-वाग्भटविरुद्धपाठस्य सन्निवेशासम्भवादिति ॥ १ ॥

अथ कर्णरोगचिकित्सा ।—

अथ कर्णशूले लवणार्द्रकप्रयोगः ।—

कर्णशूलहरः क्षेप्यो लवणार्द्रकयो रसः ॥२॥

अथ गोमक्षिकायां क्रिमिकर्णारितैलम् ।—

अहिफेनो वचा शुण्ठी सैन्धवञ्च समं समम् ।
समतैलार्द्रकद्रावे पक्वे तस्मिन् पलद्वये ॥३॥
पूर्वोक्तचूर्णं कर्षांशं क्षिप्त्वोत्तार्य्य सुशीतलम् ।
तत्तैलं प्रक्षिपेत् कर्णे ध्रुवं गोमक्षिका व्रजेत् ॥४॥

अथ कर्णशूले तिलपर्णीप्रयोगः ।—

तिलपर्णीद्रवे तैलं कोष्णं कर्णे प्रपूरयेत् ॥५॥

अथ कर्णशूले अर्कपत्रप्रयोगः ।—

अर्कपत्रद्रवे तैलं पूरयेत् कर्णशूलनुत् ॥६॥

लवणार्द्रकप्रयोगे—क्षेप्यः कर्णविवरे निक्षेप्य इत्यर्थः । लवणार्द्रकयोरिति द्विवचनेन लवणार्द्रकयोरैक्यं पिष्टयो वस्त्रपूतः रसः ग्राह्यः ॥ २ ॥

क्रिमिकर्णारितैले—अहिफेनादीनां चतुर्णां कल्कः तैलपादिकः । समतैलार्द्रकद्रावे समं तैलम् आर्द्रकद्रावश्च तैः सह, समं समम् अहिफेनादिकं, पचेदिति शेषः, तैलप्रस्थम् आर्द्रकस्वरसप्रस्थेन अहिफेनादिकल्कपादेन च पचेदित्यर्थः, तैलमत्र कटुतैलं तिलभवं वा । पक्वे इति ।—पक्वं वस्त्रपूतं सुशीतलञ्च तत् पलद्वयं गृहीत्वा तस्मिन् पूर्वोक्तचूर्णम् अहिफेनादिद्रव्यचतुष्टयं प्रत्येकं कर्षांशं क्षिप्त्वा कर्णे प्रपूरयेत् । गोमक्षिका दंशाख्यमक्षिकाविशेषः, सा च मांसशोणितकोथे सति कर्णे अपत्यानि सृजति अत्र मक्षिकाशब्द उपलक्षणं, तेनान्येऽपि जन्तवः कर्णे सम्भवन्ति; यदुक्तं सुश्रुतेन—"यदा तु मूर्च्छन्त्यथवाऽपि जन्तवः सृजन्त्यपत्यान्यथवाऽपि मक्षिकाः । तदाञ्जनत्वात् श्रवणो निरुच्यते भिषग्भिराद्यैः क्रिमिकर्णको गदः ॥" इति ॥ ३।४ ॥

कर्णशूलहरतिलपर्णीप्रयोगे—तिलपर्णी "तिलोनी" इति ख्यातः शाकविशेषः, तस्याः द्रवं रसम् । कर्णशूलशान्तये तैलं तिलपर्णीद्रवञ्चैकध्यमुष्णीकृत्य तेन कर्णपूरणं कुर्य्यात ॥ ५ ॥

कर्णशूलहरार्कपत्रप्रयोगे—पूर्वयोगवत सर्वं कार्य्यमिति ॥ ६ ॥

अथ कर्णशूले रसोनप्रयोगः।—

रसोनस्य रसः कोष्णं पूरयेत् कर्णशूलनुत् ॥७॥

अथ पूयस्रावे मेघनादप्रयोगः।—

मेघनादद्रवैः पूर्णे कर्णे पूयः प्रशाम्यति ॥८॥

अथ बाधिर्य्ये मुषल्यादिचूर्णम्।—

मुषलीवाकुचीचूर्णं खादेत् बाधिर्य्यशान्तये ॥९॥

अथ कर्णमूलस्फोटे कतकादिलेपः।—

कतकं शिग्रुलवणमारनालेन पेषयेत्।

कर्णमूलस्थितं स्फोटं सोष्णलेपाद्विनाशयेत् ॥१०॥

अथ कर्णमूलस्फोटे पुत्रजीवलेपः।—

पुत्रजीवफलस्यैव मज्जा जलनिपेषिता।

लेपात् कर्णे गले कक्षे स्फोटं हन्त्युरुमूलकम् ॥११॥

अथ गोमक्षिकायां तगरादिपूरणम्।—

तगरब्रह्मवृक्षस्य दन्तैर्मूलानि चर्वयेत्।

रसेन श्रवणं तस्य पूरयेदतियत्नतः ॥

गोमक्षिका विनिर्याति पूरणस्य विधानतः ॥१२॥

रसोनप्रयोगे—सर्वं स्पष्टम् ॥ ७ ॥

मेघनादप्रयोगे—मेघनादः तण्डुलीयकः ॥ ८ ॥

मुषल्यादिचूर्णे—मुषली तालमूली। वाकुची सोमराजी ॥ ९ ॥

कतकादिलेपे—कतकः जलप्रसादनफलः "निर्मली" इति लोके। "कतकम्" इत्यत्र "केतकी" इति रत्नाकरे पाठः ॥ १० ॥

पुत्रजीवलेपे—मज्जा फलास्थिमध्यमित्यर्थः। उरुमूलकम् अवगाढमूलं महामूलं वा ॥ ११ ॥

तगरादिपूरणे—तगरः पिण्डीतगरः। ब्रह्मवृक्षः पलाशः। विधानतः यथाविधि, कर्णपूरणविधिश्च भावप्रकाशे यथा—"स्वेदयेत् कर्णदेशन्तु किञ्चित् पार्श्वशायिनः। मूत्रैः स्नेहैः रसैः कोष्णैः तच्च श्रोत्रं प्रपूरयेत् ॥ कर्णश्च पूरितं रक्षेत् शतं पञ्चशतानि च। सहस्रं वाऽपि मात्राणां श्रोत्रकण्ठशिरोगदे ॥ स्वजानुनः करावर्त्तं कुर्या-

अथ पालीवर्द्धने मुषलीप्रयोग ।—

मुषलीकन्दचूर्णं हि महिषीनवनीततः ।
लोलयेद्रोधयेद्भाण्डे धान्यराशौ निधापयेत् ॥
सप्ताहादुद्धृत लेप कर्णपालीं विवर्द्धयेत् ॥१३॥

अथ पालीवर्द्धने चर्मचेटप्रयोग ।—

चर्मचेटस्य रक्तेन लेपात् कर्णौ विवर्द्धते ॥१४॥

अथ पालीवर्द्धने वराहवसाप्रयोग ।—

वराहोत्थेन तैलेन लेपात् कर्णौ विवर्द्धते ॥१५॥

अथ वज्रादिवटिका ।—

वज्रवैक्रान्तविमल-तुल्यनागविषान्विते ।
तुल्यपारदगन्धाश्म-माक्षिके कज्जली कृता ॥१६॥
रसोनार्द्रकशिग्रूणामरण्या मूलकस्य च ।

स्फोटिकया युतम् । एषा मात्रा भवेदेका सर्वत्रैव विनिश्चय ॥ रसाद्यै पूरण कर्णे भोजनात् प्राक् प्रशस्यते । तैलाद्यै पूरण कर्णे भास्करेऽस्तमुपागते ॥" इति । कर्णगदे शतमात्रा एव पूरण धार्य्यं शत पञ्चशतानि च इत्यादि क्रमिकत्वात्, तथा च— "धारयेत पूरण कर्णे कर्णमूल विमर्दयन् । रुज स्यान्मार्दव यावन्मात्राशतमवेदने ॥" इति । मात्रालक्षणञ्च वाग्भटे यथा—"यावत पर्य्येति हस्ताग्र दक्षिण जानुमण्डलम् । निमेषोन्मेषकालेन समं मात्रा तु सा स्मृता ॥" इति ॥ १२॥

मुषलीप्रयोगे—मुषली तालमूली, सा च अभिनवा एव ग्राह्या, यदुक्त चक्रसङ्ग्रहे—"माहिषनवनीतयुत सप्ताह धान्यराशिपरिवासि तत् । नवमुषलीकन्द-चूर्णंम्हिकर कर्णपालीनाम ॥" इति । लोलयेत आलोडयेत । तत्त्वचन्द्रिकाकृता अन्य एव कल्पना प्रदर्शिता,* यथा—"तत्क्षणानीतशुष्कतालमूलीकन्दचूर्णं पल २ माहिषनवनीत पल १ सम्मर्द्य सप्ताह धान्यराशौ स्थाप्यम्" इति ॥ १३ ॥

चर्मचेटप्रयोगे—चर्मचेट "चामचिका" इति प्रसिद्ध, तस्य ॥ १४ ॥

वराहवसाप्रयोगे—वराहोत्थेन तैलेन वराहवसया ॥१५॥

वज्रादिवटिकायां—विमल तारमाक्षिकम । नाग सीसकम । विषम् अमृतम । गन्धाश्मा गन्धक, वज्रादीनां माक्षिकान्तानां सर्वेषां तुल्यता । अरण्याः

पृथग्रसै कदल्याश्च सप्तधा परिभावयेत् ॥
एवं सुपिष्टा वल्लेन सेविता कर्णरोगनुत् ॥१७॥

अथ कुष्ठाद्यं तैलम्।—

कुष्ठशुण्ठीवचाहिङ्गु-शताह्वाशिग्रुसैन्धवैः।
बस्तमूत्रे शृतं तैलं सर्वकर्णामयापहम् ॥१८॥

अथ नासारोगाणां नामानि।—

षट् पीनसाश्च मलसञ्चयरक्तदुष्टैः
पूयास्रदीप्तिपिटिकाऽर्बुदपूतिनासाः।
आस्रावनाहपरिशोषभ्रंशक्षवार्शः-
पाकास्रवपीनसयुतैश्च गदा नसि स्युः ॥१९॥

इन्द्रवारुण्या; "अरुण्या" इत्यत्र "वारुण्या" इति योगरत्नाकरे पाठः, सुश्रुते रसोनेत्यादियोगस्य स्वरसेन कर्णपूरणं कार्यमित्युपदेशो दृश्यते, तत्र च "अरुण्या" इत्यत्र "सुरङ्ग्या" इति पाठः, सुरङ्गी रक्तशोभाञ्जनम्। कदल्याः कदली कदलीवागुडा तस्याः ॥१६।१७॥

कुष्ठाद्यतैले—"शिग्रु" इत्यत्र "दारु" इति वृन्दोक्तः पाठः। कुष्ठादीनां कल्कः स्नेहचतुर्थांशः, बस्तमूत्रं स्नेहचतुर्गुणम् ॥१८॥

उक्तसाधर्म्यात् कर्णरोगचिकित्साभिधानानन्तरं नासारोगाधिकारारम्भः। तत्रादौ नासारोगाणां नामान्याह, षडिति।—षट् पीनसाः षड्विधाः प्रतिश्यायाः। षट्त्वञ्च विवृणोति मलेति।—मलसञ्चयः वातादिदोषाणां सञ्चयः, तत्पूर्वकः प्रकोपश्च, रक्तं, दुष्टश्च तैः, वात-पित्त कफ सन्निपात-रक्त-दुष्टप्रतिश्यायभेदात् षड्विधा इत्यर्थः। यद्यपि तन्त्रान्तरे दुष्टप्रतिश्यायस्य वातादिजप्रतिश्यायपञ्चकानामेवावस्थान्तरतया पञ्च प्रतिश्यायाः, न षष्ठ इत्युक्तं, तथाऽपि तस्य पृथक्-लक्षणनिर्देशात् मन्दबुद्धीनां सुखावबोधनाय षडित्युक्तं श्रीमताचार्य्येण, वस्तुतस्तु प्रतिश्यायाः पञ्च एव; अथवा उभयमपि सत्यं स्मृतिद्वैधवत् मुनीनां भिन्नमतिकत्वात्। पूयास्रं पूयरक्तम्। "पिटिकाऽर्बुद—" इत्यत्र "पुटकार्बुद—" इति कल्पना साध्वी, वाग्भटे पुटकाख्य-नासारोग एव दृश्यते, न तु पिटिका, तल्लक्षणञ्च यथा—"पित्तश्लेष्मावरुद्धो-ऽन्तर्नासायां शोषयेत् मरुत्। कफं सशुष्कपुटतां प्राप्नोति पुटकन्तु तत् ॥" इति।

अथ पूयास्रलक्षणम्।—

पूयास्रमतिदुर्गन्धि नासायामतितापकृत् ॥२०॥

अथ नासारोगचिकित्सा।—

अथ पूयास्रे जीरकादिनस्यम्।—

कृत नस्येन हन्यात्तच्छ्वेतजीरं सितायुतम् ॥२१॥

अथ पीनसहरनस्यम्।—

घृताक्तं कुङ्कुमं घृष्टं नस्यं पीनसजिद्भवेत् ॥२२॥

अथ कामलाहराञ्जनम्।—

जलेन पेषयेद्धिङ्गुमञ्जनात् कामला जयेत् ॥२३॥

नाहः प्रतीनाहः। "भ्रंशथव" इत्यत्र वाग्भटे—"भ्रंशक्षव" इति पाठो दृश्यते, तथा च—"तीक्ष्णघ्राणोपयोगार्क-रश्मिसूत्रतृणादिभिः। वातकोपिभिरन्यैर्वा नासिकातरुणास्थनि॥ विघट्टितेऽनिलः क्रुद्धो रुद्धः शृङ्गाटकं व्रजेत्। निवृत्तः कुरुतेऽत्यर्थं क्षवथुं स भ्रंशक्षवः॥" इति। अयमेव सुश्रुतादौ क्षवथुः इति नाम्ना पठितः। पाकः नासिकापाकः। नसि नासिकायाम् ॥ १९ ॥

तत्र पूयास्रलक्षणमाह, पूयास्रमिति।—अतिदुर्गन्धि तथा अतितापकृत् इति पदद्वयं पूयास्रमित्यस्य विशेषणम्, तादृशत्वञ्च पित्तरक्ताधिकत्वात् रक्तस्य कोथीभावाच्च ॥२०॥

जीरकादिनस्ये—कृत नस्येन यथाविधि नासिकया गृहीतम् ॥ २१ ॥

पीनसहरनस्ये—घृष्टं घृतेनैव सह घृष्टमित्यर्थः ॥ २२ ॥

कामलाहराञ्जने—सर्वं स्पष्टम्। ननु नासारोगाधिकारे "कामला जयेत्" इति वचनं कथमिति चेदुच्यते—नासारोगस्य चिरावस्थानेन नेत्रगतासृग्दुष्ट्या यदि कामला जायते तदा तत्प्रशमनायैव एतत्प्रसङ्गावतारणम्, वक्ष्यति च स्वयमेव "नासारोगप्रसङ्गतः" इति। अथवा—योगस्यास्य कामलाहरत्वेऽपि शक्तिरस्ति इति प्रदर्शनार्थमेवेति बोद्धव्यम्। एवञ्च अत्र प्रकरणवशात् जलपिष्टस्य हिङ्गुनः नस्यं पीनसजित् इत्यवगन्तव्यं, तथा प्रसङ्गक्रमेण योगस्यास्य प्रयोगवैशिष्ट्येन कामलाजित्त्वमपि प्रदर्शितमिति। "अञ्जनात् कामलाम्" इत्यत्र "अञ्जयेत्तेन तत्" इति क्वचित् पाठः ॥ २३ ॥

अथ कामलाहरद्वितीयाञ्जनम् ।—

तद्दत्तण्डुलतोयेन ह्याकुलीमूलमञ्जयेत् ।
कामलां हन्ति नो चित्र नानारोगप्रसङ्गत: ॥२४॥

अथ मणिपर्पटी ।—

वज्रं मरकत पुष्पमिन्द्रनील सुचूर्णितम् ।
रसहिङ्गुलगन्धञ्च कज्जलीं कारयेद्बुध: ॥२५॥
द्रावयेत्तां लोहपात्रे पर्पट्याकारतां नयेत् ।
निर्गुण्डीतुलसीशिग्रु-धुस्तूररविवह्निजे ॥२६॥
रसैर्व्योषवरारम्भा-सुरसैश्चापि भावयेत् ।
आर्द्रकस्य रसेनापि सप्तधा परिभावयेत् ॥२७॥
एव सिद्धो रसो नाम्ना विख्याता मणिपर्पटी ।
सेविता गुञ्जया तुल्या निहन्यान्नासिकागदान् ॥
पथ्योपचारादिवशात् सर्वव्याधीन् विशेषत: ॥२८॥

अथ मुखरोगाणा सङ्ख्यानिर्देश ।—

एको गण्डभवो गद' षडुदिता जिह्वोद्भवास्तालुजा-
श्चाष्टावष्ट च मस्तजाश्च दशनोद्भूता दशौष्ठोद्भवा: ।

कामलाहरद्वितीयाञ्जने—आकुली देशान्तरे प्रसिद्धा, "आकुली" इत्यत्र "अङ्कोल" इति क्वचित पाठ ॥ २४ ॥

मणिपर्पट्या—पुष्प पुष्परागमणिम । "हिङ्गुल" इत्यत्र हिगुण" इति पाठान्तरम् । रवि अर्क । वह्नि चित्रक । वरा त्रिफला । रम्भा कदलीकन्द । सुरस तुलसी, अत्र तुलसीशब्देन कृष्णतुलस्या सुरसशब्देन च श्वेततुलस्या. ग्रहण बोद्धव्यम् । एषा प्रत्येकरसेन सप्तधा भावना देया इति ॥ २५—२८ ॥

पूर्वोक्तमङ्गल्यैव नासारोगचिकित्साभिधानानन्तरं मुखरोगचिकित्सित विवर्णिषुरादौ तेषा सङ्ख्या आह, एक इति ।—गण्डभव कपोलदेशज एक, अयन्तु सुश्रुतेन दन्तगतमुखरोगमध्ये "हनुमोच" इति नाम्ना पठित, तथा च—"वातेन तैस्तै-र्भावैस्तु हनुसन्धी विघट्टिते । हनुमोच इति ज्ञेयो व्याधिरर्दितलक्षण ॥" इति, हनुगण्डयो स्वल्पान्तरत्वात् अत्र गण्डशब्देन हनुरभिप्रेत इति मन्तव्यम् । अष्ट च

सन्ध्येकादश च त्रयोदश गदा दन्तस्य मूलोद्भवाः
कण्ठेऽष्टादश चोदिता वदनजाः पञ्चाधिका सप्ततिः ॥२९॥

अथ गलकीलके आमलकप्रयोग ।—

चूर्णं त्वामलकस्यैव गवा क्षीरेण पाययेत् ।
गलकीलकनुत्यर्थं—" ॥३०॥

अथ गलकीलके विषतिन्दुकादि वटी ।—

"—विषतिन्दुं सनागरम् ।
हरीतक्या च सयुक्तं मुखे धारय सन्ततम् ॥३१॥

मस्तजाश्च इत्यत्र मस्तशब्देन मस्तकावयवविशेषमुखमभिप्रेत, नेत्रकर्णनासास्यादीना शिरस्येवोपनिबद्धत्वात्, मुखगतरोगाधिकारे शिरोगतरोगाणा सङ्ख्यानिर्देशस्य सङ्गतिविरोधाच्च, एवञ्च सर्वसरमुखरोगा अष्टौ इत्यर्थ । "अष्ट च मस्तजाश्च" इत्यत्र "अष्ट समस्तजाश्च" "अष्ट च तुण्डजाश्च" इति वा पाठप्रकल्पनं सुगमम् । क्वचित् तन्त्रे मुखरोगाणा पञ्चषष्टिसङ्ख्यावत्त्व क्वचिद्वा सप्तषष्टिसङ्ख्यावत्त्व प्रदिष्टम्, तथा च भोज,—"दन्तेष्वष्टावोष्ठयोश्च मूलेषु दश पञ्च च । नव तालुनि जिह्वाया पञ्च सप्तदशामया. ॥ कण्ठे त्रय सर्वसरा एकषष्टिस्तु परा ॥" इति, तथा भावमिश्रश्च—"स्युरष्टावोष्ठयोर्दन्त मूलेषु दश षट् तथा। दन्तेष्वष्टौ च जिह्वाया पञ्च स्युर्नव तालुनि ॥ कण्ठे त्वष्टादश प्रोक्तास्त्रय सर्वसरा स्मृता । एवं मुखामया सर्वे सप्तषष्टिर्मता बुधै ॥" इति । वाग्भटसवादिनि अस्मिस्तु पञ्चसप्ततिरित्युक्तम्, एतद्विरोधसमन्वयार्थं नेत्ररोगचिकित्साधिकारे प्रदर्शिता सरणिरवलम्बनीया । दन्तगतहनुमोक्षादय कतिचित रोगा वाग्भटसुश्रुतादिभि अधिकत्वेन प्रदर्शिता, भोजादिभिस्तु सङ्ख्यातरोगेष्वेव तेषामन्तर्भाव इति कृत्वा पृथक्तया न पठिता इति ॥२९॥

आमलकप्रयोगे—गलकीलकनुत्यर्थमिति पद काकाक्षिगोलकन्यायेन चूर्णमित्यादियोगे विषतिन्दु-इत्यादियोगे च उभयत्रापि समन्वेतव्यम् । गलकीलकनुत्यर्थं गलकीलकस्य गलदेशे कीलकवत सञ्जातस्य मांसाङ्कुरविशेषस्य नुत्ति विनाश, तदर्थम्, अत्र गलकीलकशब्देन गलरोहिण्यादयोऽभिप्रेता, तेष्वेव कीलवत् मांसाङ्कुरसम्भवात् ॥ ३० ॥

विषतिन्दुकादिवट्या—विषतिन्दु कारस्कर, "कुचिला" इति ख्यातम्, स च शोधित एव ग्राह्य., उपविषत्वात ॥ ३१ ॥

अथ गलकीलके सैन्धवप्रयोग ।—

बहुशो भानुदुग्धेन सैन्धवेन प्रलेपनम् ॥३२॥

अथ गलकीलके भल्लातकप्रयोग ।—

भल्लातकरसं दत्त्वा चूर्णञ्चोपरि बन्धयेत् ॥३३॥

अथ दन्तदार्ढ्ये जयाप्रयोग ।—

यः प्रातरुत्तेजयति द्विजान् जयाकाष्ठेन वज्रद्विज एव जायते ।
तेनैव तैलोपहितेन मार्जनाज्जिह्वा जह्यात्युद्गतपूतिगन्धिताम्॥३४॥

अथ मुखपाके पर्पटीरसप्रयोगोपदेश ।—

मुखपाकापनुत्त्यर्थं मधुना पर्पटीरसम् ।
खादयेत् कृतगण्डूषो वटिकाञ्चानुधारयेत् ॥३५॥

सैन्धवप्रयोगे—भानुदुग्धेन अर्कक्षीरेण, सैन्धवमर्कक्षीरेण पिष्ट्वा तेन गलकीलकं बहुश लिम्पेदित्यर्थ ॥ ३२ ॥

भल्लातकप्रयोगे—चूर्णं भल्लातकस्यैव, गलकीलके बहिर्गल भल्लातकरसेनालिप्य तच्चूर्णं दत्त्वा बध्नीयादित्यथ ॥३३॥

जयाप्रयोगे—उत्तेजयति उद्धर्षयतीत्यथ । द्विजान् दन्तान् । जयाकाष्ठेन जयन्तीकाष्ठकृतदन्तपवनेन । तेनैव तैलोपहितेन तैलसिक्तेन जयाकाष्ठेन । "य. प्रात द्विजधावनञ्च कुरुते काष्ठेन वज्रद्विज । निम्बेन शाखोटककाण्डकेन स्याद्दन्तकाष्ठ द्विजशोधनाय ॥" इत्यधिकपाठ क्वचित् ॥ ३४ ॥

मुखपाके पर्पटीरसप्रयोगमुपदिशति, मुखेति ।—पर्पटीरस रक्तपित्ताद्यधिकारे श्वासचिकित्सितोक्तम् । कृतगण्डूष मधुनैव कृतगण्डूष, यदुक्त वृन्देन—"वैशद्य जनयत्यास्ये सन्दधाति मुखे व्रणान् । दाहतृष्णाप्रशमन मधुगण्डूषधारणम् ॥" इति । पञ्चपल्लवक्वाथेन त्रिफलादिक्वाथेन वा गण्डूष इत्यर्थो वा । गण्डूषमात्रा तु सुश्रुतेनोक्ता यथा—'सुखं सञ्चार्य्यते या तु सा मात्रा कवले हिता । असञ्चार्य्या तु या मात्रा गण्डूषे सा प्रकीर्त्तिता ॥" इति । वटिका खादिरवटिकादिरूपाम् अनुधारयेत् अनु गण्डूषानन्तर धारयेत्, मुखे इति शेष. ॥ ३५ ॥

अथ मुखशोषे महाराष्ट्री गुटिका ।—

महाराष्ट्रिकचूर्णञ्च चतुष्कृत्वा विभावयेत् ।
निम्बार्द्रकरसाभ्यान्तु गुटिका मुखशोषनुत् ॥३६॥

अथ मुखवैवर्ण्ये पुनर्नवाद्युद्वर्त्तनम् ।—

श्वेत पुनर्नवामूल सर्पाक्षीमूलसयुतम् ।
उद्वर्त्तनं हरेत् स्त्रीणा मुखच्छाया सुदु'सहाम् ॥३७॥

अथ नीलिकायां रजन्यादिप्रलेप ।—

महिषोक्षीरसम्पिष्ट रजनीरक्तचन्दनम् ।
कृतलेप निहन्त्याशु श्यामिका गण्डयो स्थिताम् ॥३८॥

अथ मुखवैवर्ण्ये वङ्गभस्मप्रयोग ।—

मुखच्छायाहर वङ्ग-भस्म स्यान्महिषीजलैः ॥३९॥

अथ मुखवैवर्ण्यादौ मातुलुङ्गादिप्रलेप' ।—

गोमयस्य रस सर्पिर्मातुलुङ्ग मनःशिला ।
मुखवर्णकरं श्रेष्ठं तिलकानाञ्च नाशनम् ॥४०॥

अथ मुखवैवर्ण्ये हरिद्रादिलेप ।—

उभे हरिद्रे मञ्जिष्ठा घृत गौराश्च सर्षपा' ।
पिष्टा गैरिकसयुक्ता अजाक्षीरेण पाचिताः ॥
एतेनैव भवेद्वक्त्रमुद्यादित्यसन्निभम् ॥४१॥

महाराष्ट्रीगुटिकायां—महाराष्ट्रिकचूर्णं जलकत्तटचूर्णम् । चतुष्कृत्वा निम्बार्द्रकयो प्रत्येक रसेन वारचतुष्टयमित्यर्थ ॥ ३६ ॥

पुनर्नवाद्युद्वर्त्तने—सर्पाक्षी सर्पसहा "पानशिउलि" इति भाषा, सुगन्धरास्ना वा । उद्वर्त्तनम् उद्वर्षणम् । मुखच्छाया सुदु सहा मुखवैवर्ण्यं, व्यङ्गादकमित्यर्थ ॥३७॥

रजन्यादिप्रलेपे—श्यामिका नीलिकाम् ॥ ३८ ॥

वङ्गभस्मप्रयोगे—महिषीजलै महिषीमूत्रै महिषीक्षीरैर्वा ॥ ३९ ॥

मातुलुङ्गादिप्रलेपे—मातुलुङ्ग मातुलुङ्गमूलम् , लेपयोगोऽयम् , यदुक्त वृन्देन —"मातुलुङ्गजटा सर्पि शिला गोशकृतो रस । मुखकान्तिकरो लेप पिडकातिलकालजित ॥" इति ॥४०॥

हरिद्रादिलेपे—गौराश्च सर्षपा, श्वेतसर्षपा, । अजाक्षीरेण पाचिता, हरिद्रा·

अथ मुखदौर्गन्ध्ये कुष्ठादिवटी ।—

गोमूत्रैः क्वाथयेत् कुष्ठं बालकं सहरीतकम् ।

पिष्ट्वा सर्वं वटी कुर्य्यात् मुखदौर्गन्ध्यनाशिनीम् ॥४२॥

अथ मुखदौर्गन्ध्ये गृहधूमक्वाथ ।—

गृहधूमारनालेन क्वाथ समधुसैन्धवम् ॥४३॥

अथ मुखदौर्गन्ध्ये पथ्यादिवटिका ।—

गोमयै. क्वाथिता पथ्या-मिषी कृष्णान्विता कणा ।

वदनस्य दुरामोद निहन्ति परिशीलिता ॥४४॥

अथ मुखवैरस्ये लाजादिचूर्णम् ।—

लाजा जातीफल पूग तुल्य भक्ष्य पिबेदनु ।

शीततोय पलाडुञ्च आस्यवैरस्यशान्तये ॥४५॥

दिक सर्वं पिष्ट्वा अजाक्षीरेण दूषत उत्खिन्ना इत्यथ, अथवा—अजाक्षीरेण पेषणेनैव उपयोगविषये परिणतिमागता इत्यथ, कर्मविपाक तथा काल पचति इत्यादिवत पचनातोरव परिणति-निष्पादनार्थे प्रयोग बोद्धव्य, युक्तञ्चायमेव पत्त तन्त्रान्तरसवादात्, तथा च वृन्द,—"रचोघ्नशवरोद्वयमञ्जिष्ठागैरिकाज्यवस्तपय ।—सिद्धेन लिप्तमाननमुद्यद्विधुविम्बवत विभाति ॥" इति । अत्र च तत्त्वचन्द्रिकाकारेण एव व्याख्या कृता—"वस्तपय-सिद्धेन" इति समासपद, रचोघ्नादिसिद्धेन लेपेनेत्यथ" इति । रचोघ्नादिसिद्धेन रचोघ्नादिभि निष्पन्नेन । उदयादित्यसन्निभम् उदयकालिकसूर्य्यसमकान्तमित्यर्थ । "पेष्या" "पाचिता" "उदयादित्य" इत्येतेषु "लेप्या" "पेषिता" "उद्यदादित्य" इति क्वचित पाठान्तराणि ॥ ४१ ॥

कुष्ठादिवटिकाया—क्वाथयेत किञ्चिदुत्स्वेदयेदित्यर्थ ॥ ४२ ॥

गृहधूमक्वाथे—गृहधूमेन सह आरनाल तेन, कृतमिति शेष, क्वाथ गृहधूमारनालयो क्वाथमित्यर्थ, मुखे धारयेदिति शेष । क्वाथविधिना षडङ्गविधिना वा आरनालेन गृहधूम निक्वाथ्य मधुसैन्धवे प्रक्षिप्य च तेन कवलादिक कुर्य्यादित्यर्थ ॥ ४३ ॥

पथ्यादिवटिकाया—गोमयै गोमयरसै । मिषी मधुरिका । कणा कृष्णजीरकम् । दुरामोद दुष्टगन्धम् । परिशीलिता नित्य प्रयुक्ता, पथ्यादिक गोमयरसेन किञ्चित् पक्वा अवतार्य्य च शिलाया पेषयेत, ततो गुटिका विधाय मुखे धारयेदिति कल्पना ॥ ४४॥

लाजादिचूर्णे—लाजा भृष्टधान्यचूर्णम्, "लाजा" इत्यत्र "लज्जा" इति

अथ उपजिह्वाया निर्गुण्ड्यादियोगः ।—

निर्गुण्डीमुत्पलं कन्दं चर्वयेदुपजिह्वके ॥४६॥

अथ क्रिमिदन्ते अभयागुडिका ।—

ताम्रपात्रे क्षणं पाच्यमभयाचूर्णकं मधु ।
करेण गुडिका कार्य्या दन्तैर्धार्य्या क्रिमीन् हरेत् ॥४७॥

अथ क्रिमिदन्ते कासीसादिगुडिका ।—

कासीसं हिङ्गु सौराष्ट्री देवदारु समं जलैः ।
गुडिका धारयेद्दन्तैः कृमिशूलहरं परम् ॥४८॥

अथ क्रिमिदन्ते विशालाधूमः ।—

विशालाया फलं चूर्ण्यं तप्तलोहोपरि क्षिपेत् ।
तद्धूमाद्घृष्टदन्तानां कीटपातो भवत्यलम् ॥४९॥

पाठे—वराहक्रान्ता, लज्जावती लता वा । भक्ष्य मुखे धार्य्यमित्यर्थः, सेव्यं वा । अनु सेवनानन्तरम् ॥ ४५ ॥

निर्गुण्ड्यादियोगे—उत्पलं कन्दं नीलोत्पलकन्दम् । उपजिह्वके उपजिह्वाख्य-जिह्वागतमुखरोगभेदे ॥ ४६ ॥

अभयागुडिकायां—मधु किञ्चिज्जलेनालोड्य पक्त्वा, समुदिते च गुडपाकलक्षणे कृत्वा अभयाचूर्णं तत्र प्रक्षिप्य गुडिकां कारयेत् । क्रिमीन् दन्तक्रिमीन् ॥ ४७ ॥

कासीसादिगुडिकायां—सौराष्ट्री सौराष्ट्रमृत्तिका ॥ ४८ ॥

विशालाधूमे—विशाला गोरक्षकर्कटी । "विशालाया फलं चूर्ण्यं" इत्यत्र "विशालाया फलं चूर्णम्" इति पाठान्तरम् । तदिति ।—अग्निवर्णीकृतलौहखण्डोपरि निक्षिप्तविशालाफलचूर्णोत्थधूमात् भ्रष्टदन्तानां धूमस्पर्शेन कृष्णवर्णत्वात् भ्रष्टानामिव दन्तानां, सन्तप्तलौहतापेन तप्तानां दन्तानामित्यर्थो वा, क्रिमिदन्तके तद्विनितदन्तानां कृष्णच्छिद्रवत्त्वात् दग्धवत्परिदृश्यमानानां दन्तानामित्यर्थो वा, तथा च सुश्रुते—"कृष्णच्छिद्रश्चलः स्रावी ससंरम्भो महारुजः । अनिमित्तरुजो वातात् विज्ञेयः क्रिमिदन्तकः ॥" इति । "तद्धूमाद्घृष्टदन्तानां कीटपातः" इत्यत्र "तद्धूमो दन्तकीटानामुक्तः पातः" इति क्वचित् पाठः ॥ ४९ ॥

अथ चलदन्ते जातीपत्रादिचर्वणम् ।—

जातीकोरण्टपत्रञ्च चर्वयेत् प्रातरुत्थितः ।
स्थिराः स्युश्चलिता दन्तास्तत्काष्ठैर्दन्तधावनात् ॥५०॥

अथ चलदन्ते मूलकबीजप्रयोगः ।—

मूलबीजं मुखे धार्य्यं दन्तदार्ढ्यकरं परम् ॥५१॥

अथ मुखवैरस्ये आरनालगण्डूषः ।—

किञ्चिल्लवणसंयुक्तमारनालं विपाचयेत् ।
तेन गण्डूषमात्रेण मुखवैरस्यनाशनम् ॥५२॥

अथ चूर्णदग्धे तैल-काञ्जिकगण्डूषौ ।—

ताम्बूलचूर्णदग्धस्य गण्डूषस्तिलतैलतः ।
काञ्जिकैर्लवणाक्तैर्वा गण्डूषः सुखदायकः ॥५३॥

अथ सहस्रश्लोकधारियोगः ।—

अश्वगन्धाऽजमोदा च वचा कुष्ठं कटुत्रयम् ।
शतपुष्पा ब्रह्मबीजं सैन्धवञ्च समं समम् ॥ ५४॥
एतदर्द्धं वचार्द्धञ्च चूर्णितं मधुसर्पिषा ।

जातीपत्रादिचर्वणे—जाती मालती तस्याः पत्रं, कुरण्टः सहचरः तस्य इदं कौरण्टं, जातीपत्रं तथा कौरण्टपत्रञ्च । तत्काष्ठैः जातीकोरण्टकाष्ठैः ॥ ५० ॥

मूलकबीजप्रयोगे—मूलबीजं मूलककन्दबीजम् ॥ ५१ ॥

आरनालगण्डूषे—चतुर्थांशसैन्धवलवणेन सह काञ्जिकमुष्णीकृत्य गण्डूषं कुर्य्यात् ॥ ५२ ॥

तैल-काञ्जिकगण्डूषयोः,—ताम्बूलचूर्णदग्धस्य ताम्बूले यत् चूर्णं ताम्बूलसहितं यच्चूर्णमिति वा विग्रहः, तेन दग्धस्य । सुखदायकः चूर्णदग्धरुजाप्रशमकः ॥ ५३ ॥

सहस्रश्लोकधारियोगे—शतपुष्पा "शुल्फा" इति प्रसिद्धम् । ब्रह्मबीजं पलाशबीजम् । एतदर्द्धं वचार्द्धञ्च एतेषां वचावर्जितानाम् अश्वगन्धादीनां मिलितानाम्

भक्षयेत् कर्षमात्रन्तु जीर्णान्ते क्षीरभोजनः ॥
सहस्रग्रन्थधारी स्यान्मूको वा वाक्पतिर्भवेत् ॥५५॥

अथ कण्ठशालूकादौ पारदादिप्रलेपः ।—

पारदं विमलं ताप्यं त्रिकटु ताम्रसैन्धवम् ।
तुल्यं गवां जलैः पिष्टं सुखोष्णं लेपयेन्मुहुः ॥
त्र्यहेण कण्ठशालूकं गलग्रन्थिञ्च नाशयेत् ॥५६॥

अथ गलकीले सैन्धवप्रलेपः ।—

लेपयित्वा तु दुग्धेन सैन्धवं गलकीलनुत् ॥५७॥

अथ मुखरोगे ताप्यादिवटी ।—

ताप्याभ्रतुल्यकुनटी-राजावर्त्तशिलाजतु ।
गुग्गुलुर्हरवीर्यञ्च मुखरोगनिवर्हणम् ॥५८॥

अथ गलरोगे मण्डूरलेपः ।—

महिषीमूत्रसम्पिष्टं लोहकिट्टं क्षणं पचेत् ।
तेन लेपो निहन्त्याशु गलरोगं सुदुःसहम् ॥५९॥

अथ अपचीगण्डमालयोः काञ्चन्यादिलेपः ।—

जलेन पेषयेत्तुल्यं काञ्चनीचित्रकं विषम् ।
सप्ताहं लेपयेत्तेन ह्यपच्यो गण्डमालिकाः ॥
स्फुटन्ति नात्र सन्देहः स्फोटे लेपमिमं कुरु ॥६०॥

अर्द्धं, वचायाश्च अर्द्धमिति मिलित्वा एको भाग इत्यर्थः । कर्षमात्रम् अश्वगन्धादीनां मिलित्वा कर्षार्द्धं वचायाश्च कर्षार्द्धमिति कर्षमात्रमित्यर्थः ॥ ५४।५५ ॥

पारदादिप्रलेपे—पारदः भस्मसूतम । विमलं रौप्यमाक्षिकम् । ताप्यं स्वर्णमाक्षिकम । गवां जले गोमूत्रे ॥ ५६ ॥

सैन्धवप्रलेपे—सर्वं स्पष्टम् ॥ ५७ ॥

ताप्यादिवटिकायां—कुनटी मनःशिला । हरवीर्य्यं पारदः, एतत सर्वं जलेन पिष्ट्वा लेपयेत वटिकां कृत्वा भक्षयेद्वा ॥ ५८ ॥

मण्डूरलेपे—लौहकिट्टं मण्डूरम ॥ ५९ ॥

काञ्चन्यादिलेपे—काञ्चनी हरिद्रा स्वर्णक्षीरी वा । अपच्यः इत्यत्र प्रथमा

निजद्रावेण सम्पिष्ट-मुण्डीमूलप्रलेपनात्।
गण्डमालाः क्षयं यान्ति तद्रवञ्च पिबेज्जलम्॥६१॥

अथ गण्डमालायां ब्रह्मदण्डीप्रलेपः।—

ब्रह्मदण्डीयमूलन्तु पिष्टं तण्डुलवारिणा।
स्फुटिता हन्ति लेपेन गण्डमाला न संशयः॥६२॥

अथ गण्डमालायां पश्चाद्गप्रलेपः मुण्डीप्रलेपश्च।—

गन्धकं सूतकं तुल्यमर्कक्षीरेण सैन्धवम्।
पिष्ट्वा च काञ्चनीमूलं लेपोऽयं गण्डमालिकाम्॥६३॥
अदृश्या स्फोटयत्याशु मुण्डीद्रावेण पेषितम्।
तन्मूलं लेपयेत्तत्र त्रिःसप्ताहं प्रशान्तये॥६४॥

अथ गण्डमालायां जैपालप्रलेपः।—

पिष्ट्वा जैपालपत्राणि स्वरसेन ततो वटी।
छायाशुष्का तया लेपात् गण्डमालां विनाशयेत्॥६५॥

इति शेषः, अपचीत्रणा इत्यर्थः, "अपच्चो गण्डमालिका" इति कल्पनं सुगमम्। "अपच्चा" इत्यत्र "अदृश्या" इति क्वचित् पाठः। स्फोटे काञ्चन्यादिप्रलेपेन स्फुटनजनिते अपच्यादिस्फोटे। इमं निजेत्यादिना वक्ष्यमाणम्। निजद्रावेण मुण्डी-मूलस्वरसेन। मुण्डी अलम्बुषा, भूमिकदम्ब इत्यर्थः। तद्रवं जलं मुण्डीस्वरस-मित्यर्थः। पिबेत् अनुपिबेदित्यर्थः॥६०।६१॥

ब्रह्मदण्डीप्रलेपे—ब्रह्मदण्डीयमूलं भार्गीमूलम्। स्फुटिता काञ्चन्यादिलेपेन स्फुटिता-मित्यर्थः। आदौ काञ्चन्यादिलेपेन स्फोटयित्वा पश्चादेतल्लेपं दद्यादित्याशयः॥६२॥

पश्चाद्गप्रलेपं मुण्डीप्रलेपयोः—अदृश्याम् ईषद्दृश्याम्, उत्पद्यमानामित्यर्थः, गन्ध-कादिकृतो लेपः अदृश्यां गण्डमालामाशु स्फोटयति, तत्र प्रशान्तये निःशेष-निवृत्त्यै मुण्डीद्रावेण पेषितं तन्मूलं मुण्डीमूलं त्रिःसप्ताहं तत्र लेपयेत्। अदृश्यामिति पदं लेपयेदित्यनन्तरमन्वेतव्यं वा, एवञ्च तन्मूललेपः गण्डमालाम् अदृश्यां, कारयतीति शेषः॥६३।६४॥

जैपालप्रलेपे—स्वरसेन जैपालपत्ररसेनेत्यर्थः॥६५॥

अथ चलदन्ते हेमतारादिगुटिका ।—

हेमतारयुतं सूतं तालकं चीरमर्दितम् ।
क्षौद्रे तिलानां तैलेन प्रस्विन्नं दन्तदार्ढ्यकृत् ॥६६॥

अथ चलदन्ते धातुबद्धरसगुटिका ।—

दन्तदार्ढ्यप्रसिद्ध्यर्थं गुटिकां देहि सर्वदा ।
रसस्य धातुबद्धस्य चालनं घर्षणं तथा ॥६७॥
रूप्यादिचूर्णमादाय पिष्टिं साधय यत्नतः ।
निम्बुमध्ये विनिक्षिप्य दिनानां पञ्च धारय ॥६८॥
तालचूर्णं समादाय भानुदुग्धेन भावयेत् ।
तन्मध्ये गुलिकां क्षिप्त्वा पचस्व तिलतैलके ॥६९॥
दोलायन्त्रे निबध्यैनां यत्नेन दिवसत्रयम् ।
मलापकर्षणं कृत्वा मधुभाण्डे निधापयेत् ॥
मुखे धारय दन्तानां दार्ढ्याय गुटिकामिमाम् ॥७०॥

हेमतारादिगुटिकायां—हेमतारयुतं हेमतारं तुत्थकं, दन्त्यत्वात्, तेन युतम् । क्षौद्रे इत्यत्र प्रक्षिप्तं, तथा प्रस्विन्नमित्यत्र च दोलायन्त्रे इति शेषः, रूप्येत्यादिना वक्ष्यमाणे योगे तथाभूतकल्पनादर्शनात्, हेमतारादिकं दुग्धेन पिष्ट्वा गुटिकां विधाय दोलायन्त्रे तिलतैलेन यामद्वयं यामं वा पक्त्वा क्षौद्रभाण्डे स्थापयेत्, सा च गुटिका मुखे धृता दन्तदार्ढ्यकारिणी भवेदिति । "हेमतारयुतं सूतं तालकं चीरमर्दितम्" इत्यत्र "हेमतारयुतं सूतं शिलार्कक्षीरमर्दितं" इति पाठान्तरम् ॥ ६६ ॥

धातुबद्धरसगुटिकायां—दन्तदार्ढ्यप्रसिद्ध्यर्थं दन्तदार्ढ्यस्य प्रकर्षेण सम्पादनार्थमित्यर्थः । गुटिकामित्यस्य रसस्य धातुबद्धस्येत्यनेन सम्बन्धः । गुटिकां रूप्यादीत्यादिना वक्ष्यमाणाम् । चालनं धातुबद्धरसगुटिकायाः मुखान्तः भ्रामणं, घर्षणं तयैव दन्तानां मार्जनमित्यर्थः । रसगुटिकाचालनघर्षणे कर्त्तव्यमित्युक्तम्, अतस्तामेव विवृणोति, रूप्यादीति ।—अत्र आदिपदेन ताम्रसीसकवङ्गादीनां धातूनां ग्रहणम्, एषान्तु व्यस्तानां समस्तानां वा प्रयोगः कार्य्यः । पिष्टिं लकुचद्रवसूताभ्यां पेषणात् पिष्टकाकारं पिण्डाकारं वा, "लकुचद्रवसूताभ्यां तारपिष्टिं प्रकल्पयेत्" इति प्रागुक्तिदर्शनात् । निम्बुमध्ये जम्बीररसमध्ये । भानुदुग्धेन

अथ शिरोरोगाणां नामानि ।—

शिरस्तोदाश्चतुर्द्धोक्ता दोषैः सर्वास्रजन्तुभिः ।
कम्पश्चार्द्धावभेदश्च सूर्य्यावर्त्तोऽपि शङ्खकः ॥७१॥

अर्कक्षीरेण भावयेदिति सप्तधा । तन्मध्ये अर्कक्षीरभाविततान्त्रचूर्णकृतपिण्डमध्ये गुलिका रूप्यादिचूर्णकृतापिष्टिमित्यर्थः । मलापकर्षणं गुटिकागात्रसक्ततैलादिमार्जनम् ॥ ६७—७० ॥

नेत्रकर्णादीनां शिरःसंश्रितत्वात् तद्गतरोगचिकित्सिताभिधानानन्तरं शिरोरोगचिकित्सितारम्भः । तत्रादौ तस्य नामान्याह, शिर इति ।—शिरस्तोदाः शिरःशूलानि, शिरोरोगा इत्यर्थः चतुर्द्धा इति दोषैस्त्रिभिः सर्वैश्च एकः इति चतुःप्रकारा इत्यर्थः, सर्वास्रजन्तुभिरित्यत्र सर्वं इति पदं समासान्तर्गतमपि आकृष्य पृथक्तया चतुर्द्धा इत्यनेन अन्वेतव्यम्, सर्वं सर्वदोषाः, अस्रं रक्तं, जन्तुः क्रिमिः तैः, त्रिदोषजं रक्तजं क्रिमिजञ्चेत्यर्थः अथवा—दोषैः वातपित्तकफैरेकविधः सर्वास्रजन्तुभिश्च त्रिविधः इति मिलित्वा चतुर्द्धा, अत्र दोषैः पृथक् वातपित्तकफैः त्रिविधस्यापि पृथक्सामान्यादेकत्वेन परिगणनम् इति । कम्पः शिरःकम्पः, अस्य गणना तु क्वचिन्निश्चयकृता न कृता, वातजशिरोरोगे, वातव्याधौ शिरोगतवाते वेपथुवाते वा तस्यान्तर्भावात्, वाग्भटे चरके च पृथक् चिकित्साभिधानात् तल्लक्षणं प्रदर्शितं, तथा च वाग्भटः,—"वातोल्बणाः शिरःकम्पं तत्सञ्ज्ञं कुर्वते मलाः" इति । चरकोऽप्याह—"वातो रूक्षादिभिः क्रुद्धः शिरःकम्पमुदीरयेत्" इति । ननु सुश्रुते "शिरो रुजति मर्त्त्यानां वातपित्तकफैस्त्रिभिः । सन्निपातेन रक्तेन क्षयेण क्रिमिभिस्तथा ॥ सूर्य्यावर्त्तानन्तवातार्द्धावभेदकशङ्खकैः ॥" इत्यनेन क्षयजानन्तवाताभ्यां सह एकादश शिरोरोगाः प्रदर्शिताः, अत्र तु क्षयजानन्तवातौ न पठितौ, तथा दश च शिरोरोगाः प्रदर्शिताः । कथमेतद्वैषम्यम् ? इति चेदुच्यते—क्षयजस्य वातजे अन्तर्भावादेव न तस्य पृथग्ग्रहणं, यदुक्तं—"वायोर्धातुक्षयात् कोपः" इति । मधुकोषकृताऽप्युक्तम्—"अस्य वातजत्वं व्युत्पादितमेव। चक्षुष्योऽप्याह—'स्त्रीप्रसङ्गादभिघातादथवा देहकर्मणा । क्षिप्रं सञ्जायते कृच्छ्रः शिरोरोगः क्षयात्मकः ॥ वातपित्तात्मकं लिङ्गं व्यामिश्रं तत्र लक्षयेत् ॥' इति ।" अनन्तवातस्य च अन्यतोवाताद्यनेत्ररोगविशेषेण तुल्यलक्षणत्वात् अग्रहणम्, एवं सुश्रुतादिष्वपि दृश्यते । यत्तु माधवकरेण स्वसङ्ग्रहे अनन्तवातः अधिकत्वेन पठितः, तत् अस्मिन् हनुग्रहलक्षणदर्शनात् केवलवातजेनान्यतोवातेन विशिष्टताप्रदर्शनार्थमिति मन्तव्यम् ॥ ७१ ॥

अथ शिरोरोगचिकित्सा ।—

अथ अर्द्धावभेदके गिरिकर्णीप्रयोगः ।—

गिरिकर्णीफलं मूलं सजलं नस्यमाचरेत् ।
मूलं वा बन्धयेत् कर्णे निहन्त्यर्द्धशिरोव्यथाम् ॥७२॥

अथ अर्द्धावभेदके गुडादिनस्यम् ।—

गुडं करञ्जबीजञ्च नस्यमुष्णजलैर्हितम् ॥७३॥

अथ अर्द्धावभेदके मरिचप्रलेपः ।—

मरिचं भृङ्गजैर्द्रावैर्लिप्तोऽयं हन्ति तां रुजम् ॥७४॥

अथ चन्द्रकान्तो रसः ।—

मृतसूताभ्रकं तीक्ष्णं कान्तं ताम्रं मृतं समम् ।
कुहोचोरैर्दिनं मर्द्यं पिण्डं तन्माषमात्रकम् ॥
सप्ताहात् सूर्य्यावर्त्तादीन् शिरोरोगान् विनाशयेत् ॥७५॥

अथ शिरःशूले कुङ्कुमादिनस्यम् ।—

कुङ्कुमं मधुयष्टी च सिताघृतगुणोत्तरम् ।
सप्ताहेन कृते नस्ये दाहं हन्ति शिरोरुजाम् ॥७६॥

गिरिकर्णीप्रयोगे—गिरिकर्णी श्वेतापराजिता । "गिरिकर्णीफलं मूलं सजलम्" इत्यत्र "गिरिकर्णीफलरसं मूलञ्च" इति पाठान्तरम् । "सजलम्" इत्यत्र "सदलम्" इति क्वचित् पाठः । मूलं वा गिरिकर्ण्या एव मूलमित्यर्थः । अर्द्धशिरोव्यथाम् अर्द्धावभेदकम् ॥७२॥

गुडादिनस्ये—सर्वं स्पष्टम् ॥ ७३ ॥

मरिचप्रलेपे—तां रुजम् अर्द्धावभेदकरुजमित्यर्थः । "गुड॰ ॰रुजम्" इति योगद्वय-स्थले भैषज्यरत्नावल्यां "गुञ्जा करञ्जबीजञ्च तयोः कल्को जले कृतः । मरिचैर्भृङ्गराजैश्च शीघ्रं हन्ति शिरोव्यथाम् ॥" इति पाठः प्रकल्प्य एक एवायं योगः पठितः ॥ ७४ ॥

चन्द्रकान्तरसे—मृतसूतं पारदभस्म । रसरत्नाकरे रसेन्द्रसारसङ्ग्रहे च "कान्तम्" इत्यत्र "गन्धम्" इति पाठो दृश्यते । रसरत्नाकरे च "सूर्य्योदयरसः" इति नाम्ना निर्दिष्टोऽयं योगः । अस्य उपयोगविधिरपि तत्रैव प्रदर्शितः यथा—"मधुना मर्दितं सेव्यं लौहपात्रे दिने दिने" इति ॥ ७५ ॥

कुङ्कुमादिनस्ये—मधुयष्टी यष्टिमधु । गुणोत्तरम् उत्तरोत्तरभागवृद्धमित्यर्थः,

अथ अर्द्धावभेदके मरिचप्रयोग ।—

शिग्रुपत्ररसैर्मर्द्यं मरिचञ्चार्द्धशूलनुत् ॥७७॥

अथ शिर शूले कुङ्कुमप्रयोग ।—

कुङ्कुमं घृतसंयुक्तं नस्याद्धन्ति शिरोरुजम् ॥७८॥

अथ यूकालिचाया पारदप्रयोग ।—

पारदं मर्दयेन्निष्कं कृष्णधुस्तूरजैर्द्रवैः ।

नागवल्लीदलैर्वाऽथ वस्त्रखण्डं प्रलेपयेत् ॥७९॥

तद्वस्त्रं मस्तके वेष्ट्य धार्य्यं यामत्रयं बुधैः।

यूकाः पतन्ति निःशेषा सलिक्षा नात्र संशयः ॥८० ॥

अथ दारुणहरतैलम् ।—

कण्टकारीफलरसैस्तैलं तुल्यं विपाचयेत् ।

जयापुष्पद्रवैर्वाऽथ तल्लेपो दारुणप्रणुत् ॥८१॥

अथ केशपाते हरिद्रादिलेप ।—

द्विनिशा नवनीतेन लेपाद्वा खण्डकेशनुत् ॥८२॥

तेन च कुङ्कुम १ भा, यष्टिमधु २ भा, सिता ३ भा, घृत ४ भा, सर्वं घृतेन पिष्ट्वा तेनैवालोड्य च नस्यं कार्य्यमिति। योगोऽयं वातासृग्गुल्मे पित्तजे च प्रशस्त, तन्त्रान्तरेऽपि तथाविधदर्शनात ॥७६॥

मरिचप्रयोगे—शिग्रुपत्ररसमृष्टमरिचचूर्णेन नस्यं कार्य्यमिति ॥ ७७ ॥

कुङ्कुमप्रयोगे—सर्वं स्पष्टम्। तन्त्रान्तरे तु योगेऽस्मिन् शर्करायोगोऽपि दृश्यते, किञ्च शर्कराकुङ्कुमे घृतेन आलोड्य अग्नौ किञ्चित् उत्ताप्य च नस्यार्थे योज्यमिति ॥७८॥

पारदप्रयोगे—यूका लिक्षा. केशाश्रया क्रिमिविशेषा "उकुन" "लिकि" च इति भाषा ॥ ७९ ८० ॥

दारुणहरतैले—जयापुष्पद्रवे जयन्तीपुष्परसे, तुल्यमिति पदम् अत्रापि सम्बध्यते। "जया" इत्यत्र "जपा" इति पाठान्तरम्। दारुणप्रणुत दारुणः केशरोगविशेष, "खुस्की" इति भाषा ॥ ८१ ॥

हरिद्रादिलेपे—द्विनिशा हरिद्रा दारुहरिद्रा च। खण्डकेशनुत् इन्द्रलुप्त-नाशिनीत्यर्थ. ॥८२॥

अथ केशपाते वाङ्गजातीप्रलेपः ।—

जातीपुष्पदलं मूलं कृष्णगोमूत्रपेषितम् ।
लेपोऽयं सप्तरात्रेण दृढकेशकरः परम् ॥८३॥

अथ केशपाते शृङ्गाटादितैलम् ।—

शृङ्गाटत्रिफलाभृङ्गी-नीलोत्पलमयोरजः ।
सूक्ष्मचूर्णं समं कृत्वा पचेत्तैले चतुर्गुणे ॥
तल्लेपेन दृढा केशाः कुटिलाः सरला अपि ॥८४॥

अथ इन्द्रलुप्ते भल्लातादिलेपः ।—

कीटभक्षितकेशान्त-स्थानं स्वर्णेन घर्षयेत् ।
यावत् सुतप्तता याति ततो लेपमिमं शृणु ॥८५॥
भल्लातकञ्च बृहती गुञ्जामूलं फलं तथा ।
मधुना सह लेपेन चाम्पारोगचयप्रणुत् ॥८६॥

वाङ्गजातीप्रलेपे—जातीपुष्पदलं मालतीपुष्पं मालतीपत्रञ्च, "दलम्" इत्यत्र "फलम्" इति पाठान्तरम् । मूलमपि जात्या एव ॥८३॥

शृङ्गाटादितैले—शृङ्गाटं शृङ्गाटकं तस्य पत्रं कान्दो वा । भृङ्गी भृङ्गराजः । अयोरजः लौहचूर्णम् । शृङ्गाटादीनां कल्कः तैलपादिकः, जलमत्र चतुर्गुणं पाकार्थं देयम् ॥ ८४ ॥

भल्लातकादिप्रलेपे—कीटभक्षितकेशान्तस्थानम् इन्द्रलुप्तमित्यर्थः, इन्द्रलुप्तस्य केशादाख्य रक्तजक्रिमिकार्य्यत्वेन तन्त्रान्तरे प्रसिद्धत्वात्, "रोमकूपानुगं पित्तं वातेन सह मूर्च्छितम् । प्रच्यावयति रोमाणि ततः श्लेष्मा सशोणितः ।। रुणद्धि रोमकूपांस्तु ततोऽन्येषामसम्भवः । तदिन्द्रलुप्तं खालित्यं रुह्येति च विभाव्यते ॥" इतीन्द्रलुप्त-लक्षणे शोणितस्यापि तत्कारणत्वेनोल्लेखात्, शोणिते च क्रिम्युत्पत्तिसम्भवात् वा । स्वर्णेन सुवर्णधातुना धुस्तूरेण वा घर्षयेत् आदौ इन्द्रलुप्तस्थानं कर्कशपत्रे नख-रञ्जन्यादिना वा उल्लिख्य पश्चात् स्वर्णेन घर्षयेदित्यर्थः । यावत् सुतप्तता याति यावन्तं कालं घर्षणेन तत् स्थानं सन्तप्तं भवति तावत् घर्षयेत्, ततो भल्लातकादिना लिम्पे-दित्यर्थः । चक्रेण तु भल्लातकमित्यादिना चत्वारो योगा उक्ताः, तथा च—"भल्लातक-बृहतीफलगुञ्जामूलफलैश्च एकेन । मधुसहितेन विलिप्तं सुरपतिलुप्तं शमं याति ॥"

अथ इन्द्रलुप्ते गुञ्जाप्रयोग ।—

गुञ्जामूलं फलं चूर्णं कण्टकार्य्याः फलद्रवैः ।
तेन लेपेन हन्त्याशु चाचारोगं सुदुःसहम् ॥८७॥

अथ सूर्य्यावर्त्तादौ अभ्रादिवटिका ।—

अभ्रजीर्णरसस्तीक्ष्णं स्नुहीक्षीरं सुरायसम् ।
शुल्वञ्च सूर्य्यावर्त्तादीन् शिरोरोगान्निवर्त्तयेत् ॥८८॥

अथ पलितादौ कटुतैलनस्यम् ।—

कटुतैलकृतं नस्यं पलितारुंषिकापहम् ॥८९॥

इति । अत्र शिवदास,—"भल्लातकबृहतीफलयो रस, उक्त हि वाग्भटे—'सक्षौद्र-क्षुद्रवार्त्ताकुस्वरसेन रसेन वा । धुस्तूरस्य च पत्राणां भल्लातकरसेन वा ॥' इति ।" चाम्यारोगचयप्रणुत इत्यत्र चाम्यारोग इन्द्रलुप्त । "चाम्या" इत्यत्र "चाचा" इति पाठकल्पना साधीयसी, वाग्भटे इन्द्रलुप्तस्य चाचेति नामान्तरदर्शनात. तथा च—"तदिन्द्रलुप्त रुझ्याञ्च प्राहुश्चाचेति चापरे" इति। क्वचित् "रुझ्या" इति पाठ ॥८५।८६॥

गुञ्जाप्रयोगे—वा-शब्द लुप्तो द्रष्टव्य, गुञ्जाया मूलचूर्णं फलचूर्णं वा इत्यर्थ । सिद्धयोगे तु कण्टकारीस्थले बृहतीफलरसेन पेषणविधिर्दृश्यते। अत्रापि आदौ नखरञ्जन्यादिना उल्लिख्य स्वर्णेन घर्षण कर्त्तव्यम्, तथा च—"बृहतीफलरसपिष्ट गुञ्जामूलफलञ्चेन्द्रलुप्तस्य। कनकनिघृष्टस्य सतो दातव्य प्रच्छितस्य सदा ॥" इति। अत्र शिवदासव्याख्या—"पक्कबृहतीफलरसेन पिष्ट गुञ्जाया मूल फल वा। कनकं सुवर्णं धुस्तूरस्य फल वा। प्रच्छितस्य नखरञ्जन्यादिना विलिखितस्य" इति। "चाचारोगम्" इत्यत्र "चाप्यरोगम्' इति पाठस्तु न समीचीन ॥ ८७ ॥

अभ्रादिवटिकायाम—अभ्रेण सह जीर्णरस अभ्रजीर्णरस अभ्र रसभस्म च इत्यर्थ, "अभ्र जीर्णरस" इति पाठ सुगम। तीक्ष्ण तीक्ष्णलौहम्। सुरायस सुरा मद्यम् आयस लौह कान्तलौहमित्यर्थ., किंवा—सुरायसं सुरै ब्रह्मादिभिर्देवतात्रयै अधिष्ठितम् आयस लौह कान्तलौहमित्यर्थ, तथा च अस्यैव पञ्चमाध्याये—"भ्रामक चुम्बकञ्चैव कर्षक द्रावकन्तथा। एव चतुर्विध कान्त रोमकान्तञ्च पञ्चमम् ॥ एकद्वित्रिचतु पञ्च सर्वतोमुखमेव तत। पीत कृष्ण तथा रक्त त्रिवर्णं स्यात् पृथक् पृथक् ॥ क्रमेण देवतास्तत्र ब्रह्मविष्णुमहेश्वरा. ॥" इति ॥ ८८ ॥

कटुतैलनस्ये—अरुंषिका शिरोगतव्रणविशेष. ॥ ८९ ॥

अथ खालित्ये स्नुह्यादितैलं विषतैलञ्च ।—

स्नुह्यर्कक्षीरभृङ्गाम्बु गोमूत्रहलिनीविषैः ।
गुञ्जाविशालामरिचैः कटुतैलं विपाचितम् ॥
खलतिं शमयत्यम्लपिष्टमष्टगुणं विषात् ॥९०॥

अथ व्रणस्य भेदनिर्देशः ।—

दोषैर्द्वन्द्वैः समस्तैश्च सास्रैस्तैरस्रजाऽपि च ।
व्रणभेदा इति प्रोक्ता वैद्यशास्त्रविशारदैः ॥९१॥

स्नुह्यादितैले—स्नुह्यर्कयोः क्षीरम् । हलिनीविषैः लाङ्गल्याख्योपविषैः, विषमिति पृथक्पदं वा लाङ्गली विषञ्चेत्यर्थः । गुञ्जाया मूलं फलमित्यन्ये । विशाला गोरक्षकर्कटी । अत्र द्रवकार्य्यार्थं भृङ्गाम्बुगोमूत्रे प्रत्येकं स्नेहाच्चतुर्गुणे देये, मिलित्वा चतुर्गुणे इति केचित्, अन्येषां कल्कः । चक्रेण तु किञ्चित् परिवर्त्तिततया तैलमिदं पठ्यते, तथा च—"स्नुहीपयः पयोऽर्कस्य मार्कवो लाङ्गलीविषम् । मूत्रमाजं सगोमूत्रं रक्तिका सेन्द्रवारुणी ॥ सिद्धार्थं तीक्ष्णतैलञ्च गर्भं दत्त्वा विपाचितम् । वह्निना मृदुना पक्वं तैलं खालित्यनाशनम् ॥" इति । अस्य व्याख्याया श्रीशिवदासः,—"लाङ्गलीविषं विषलाङ्गलियामूलाख्यं विषं, किंवा लाङ्गली च विषञ्चेति द्रव्यद्वयम् । सिद्धार्थं श्वेतसर्षपं तीक्ष्णतैलं सार्षपतैलम् । ज्योतिष्मतीमूलं फलमित्यन्ये । सिद्धार्थतीक्ष्णतैलमिति समस्तपाठपक्षे—तीक्ष्णमिति तैलविशेषणम् अनर्जितस्य सर्षपस्य तैलं ज्ञेयम्" इति । वङ्गसेनस्तु—"लाङ्गली मार्कवो विषम्" इति कृत्वा "विषम्" इति पदं पृथगेव तथा "तीक्ष्णतैलञ्च" इत्यत्र "तीक्ष्णगन्धा" इति पठति । विषतैले—अम्लपिष्टम् अम्लालोडितम्, अम्लकाञ्जिकसाधितमित्यर्थः, अष्टगुणमित्यत्र कटुतैलमिति पदं पूर्वत आकृष्य योजनीयम्, चतुर्गुणाम्लकाञ्जिकसाधितं विषादष्टगुणं कटुतैलमित्यर्थः, विषञ्चात्र कल्कः । यद्वा—अम्लपिष्टम् अम्लीभूतं पिष्टं क्षुद्रतण्डुलमित्यर्थः, धान्याम्लमिति यावत्, अष्टगुणधान्याम्लपिष्टं विषं खलतिं शमयतीति निष्कर्षः ॥९०॥

शिरोरोगेषु अर्द्धावभेदके "शस्त्रारणिनिभा कुर्यात् तीव्राम्" तथा शङ्खके "तीव्ररुग्दाहरागं हि शोथं कुर्वन्ति दारुणम्" इत्युल्लेखात् व्रणेऽपि शस्त्रारणिनिभाया वेदनायाः सम्भवसाधर्म्यात् तथा शोथसाधर्म्याच्च किञ्च शिरसो मर्मस्थानत्वेन तद्रोगाणां मर्मगतत्वात् व्रणानामपि मर्मस्थानोत्पत्तेः सम्भावितत्वाच्च शिरोरोगानन्तरं व्रणचिकित्सितं जिगदिषुरादौ तस्य दोषभेदं निरूपयति, दोषैरिति ।—दोषैः पृथक् वातपित्तकफैः । सास्रैः सरक्तैः रक्तान्वितैरित्यर्थः, तैः दोषैः पृथग्द्वन्द्वसमस्तात्मकैरित्यर्थः,

अथ व्रणचिकित्सा ।—

अथ व्रणशोधने ताम्रप्रयोगः ।—

शुल्वचूर्णं रसे जीर्णं मदयन्तीपुनर्नवे ।

मेषशृङ्गीरसस्यैतद्व्रणशोधनरोपणम् ॥९२॥

अथ व्रणरोपणे पटोलादिपूरणम् ।—

पटोलनिम्बपत्रञ्च मधुयष्टीनिशातिलाः ।

त्रिवृद्दन्तीरसैः पिष्ट्वा पूरयेत् व्रणरोपणम् ॥९३॥

अथ व्रणरोपणे निम्बपत्रादिपूरणम् ।—

निम्बपत्रं तिलं पिष्ट्वा पूरयेन्मधुसर्पिषा ॥९४॥

एवञ्च पृथग्दोषैस्त्रयः द्वन्द्वैस्त्रयः समस्तैरेकः सास्रैः पृथग्दोषैस्त्रयः सास्रैर्द्वन्द्वैस्त्रयः सास्रैः समस्तैरेकः केवलेन रक्तेन चैकः इति मिलित्वा दोषप्रसरेण पञ्चदश व्रणभेदाः, उक्ताश्च माधवकरेण—"रक्तो रक्तयुतो रक्तात द्विविजः स्यात्तदन्वये" इति। अस्य व्याख्यायां श्रीकण्ठः,—"रक्तस्य एकैकस्मिन् दोषे द्वन्द्वे च प्रसरमाह द्विविजः स्यात्तदन्वयैरित्यादि।—रक्तान्वयैरेकैकदोषैः द्वन्द्वैश्च, रक्तान्वितैरेकैकदोषैः द्विजः व्रणः रक्तान्वितैर्द्वन्द्वयैस्त्रिजः, एवं दोषत्रयेऽपि रक्तसम्बन्धः ऊहनीयः, एवं पञ्चदशधा प्रसरो दोषाणामुपगृहीतो भवति" इति ॥९१॥

ताम्रप्रयोगे—शुल्वचूर्णमिति पदं जीर्णमित्यनेन सम्बध्यते, ताम्रभस्म इत्यर्थः। रसे इत्यस्य मदयन्तीपुनर्नवे इत्यनेन योजना, मदयन्तीपुनर्नवोत्थे रसे इत्यर्थः, मदयन्ती वनमल्लिका तया सह पुनर्नवं तस्मिन् इति विग्रहः, पुनर्नवाऽर्थकः पुनर्नवशब्दोऽप्यस्तीति दृश्यते, "मदयन्ती" इत्यत्र "मधुपर्णी" इति रसरत्नाकरे पाठः। तथा च—"ताम्रभस्म द्रवैर्मर्द्यं मधुपर्णीपुनर्नवे। मेषशृङ्ग्यादिनैकेन व्रणशोधनरोपणम् ॥" इति। मदयन्तीपुनर्नवयो तथा मेषशृङ्ग्याश्च रसेन ताम्रभस्म मर्दयित्वा रक्तिद्वयमानेन व्रणशोधनरोपणार्थं सेव्यम् इति प्रयोगविधिः ॥९२॥

पटोलादिपूरणे—पटोलस्य पत्रम्। निशा हरिद्रा। चक्रदत्तेन तु "निशा" इत्यत्र "निशाद्वयम्" इति तथा सैन्धवयोगेन च योगोऽयं पठ्यते, तथा च—"पटोलीतिलयष्ट्याह्व त्रिवृद्दन्तीनिशाद्वयम्। निम्बपत्राणि चालेपः सपटुर्व्रणशोधनः ॥" इति। पूरयेत, व्रणान् इति शेषः ॥९३॥

निम्बपत्रादिपूरणे—सर्वं स्पष्टम्। योगोऽयं रोपणार्थं प्रयोज्यः, सिद्धयोगसंवादात् ॥९४॥

अथ जात्याद्यं घृतम् ।—

जातीपत्रं पटोलञ्च निम्बांशोरकरञ्जकम् ।
मञ्जिष्ठा मधुयष्टी च तुत्थपत्रकसारिवा ॥९५॥
प्रत्येकं चूर्णयेत् कर्षं गव्याज्य द्वादश पलम् ।
घृताच्चतुर्गुणं तोय पाच्यमाज्यावशेषितम् ॥९६॥
तेनाभ्यङ्गो मर्मजातान् व्रणान्नाडीव्रणानपि ।
स्रवन्ति सूक्ष्मरन्ध्राणि पूरयेन्नात्र संशयः ॥९७॥

अथ व्रणरोपणे अपामार्गप्रयोग ।—

अपामार्गस्य पत्रोत्थ-रसेनाऽऽपूरयेत् व्रणम् ।
किं वा तद्बीजचूर्णेन व्रणं दुष्टं प्ररोहयेत् ॥९८॥

अथ व्रणरोपणे गुडटङ्कणवर्त्ति ।—

पुरातनगुडैस्तुल्यं टङ्कणं सूक्ष्मचूर्णितम् ।
तद्वर्त्त्या पूरयेद्गूढं व्रणं शीघ्रतर महत् ॥९९॥

अथ व्रणलेखने पारदादिलेप ।—

पारदस्य त्रयो भागाः कमलस्यैकविंशतिः ।
जम्बीराम्लेन तत्पिष्टं माणिमन्थस्य सप्ततिः ॥१००॥
नवभिर्गन्धकस्यांशैर्भृङ्गसारेण मर्दयेत् ।
सप्ताहमातपे तीव्रे धारितं शस्त्रवल्लिखेत् ॥१०१॥

जात्यादिघृते—जाती मालती तस्या पत्रम् । पत्रक तेजपत्रम् ॥९५—९७॥

अपामार्गप्रयोगे—तद्बीजचूर्णेन अपामार्गबीजचूर्णेन ॥ ९८ ॥

गुडटङ्कणवर्त्त्या—गूढ सूक्ष्ममुखमित्यर्थः । महत् गम्भीरमित्यर्थः ॥ ९९ ॥

पारदादिलेपे—कमलस्य ताम्रस्य, लेखनत्वात रसरत्नाकरसंवादाच्च , तथा च—"ताम्रचूर्णं सप्तभाग सूतमेक विमर्दयेत । सैन्धव सप्तभागञ्च गन्धक नवभागकम् ॥ भृङ्गाद्रवे सजम्बीरे सप्ताह परिमर्दितम् । तैललिप्त स्फुटत्याशु यद्यपक्वं भगन्दरम् ॥" इति । मेदिनीकोषेऽपि ताम्रार्थक. कमलशब्द विद्यते, तथा च—"कमल सलिले ताम्रे जलजे क्लोम्नि भेषजे' इति । अत्र यद्यपि प्रस्तुतग्रन्थेन सह रसरत्नाकरोक्तभागस्य वैषम्य विद्यते, तथाऽपि द्रव्यसाम्यप्रदर्शनार्थं कमलशब्दस्य ताम्रार्थकत्वबोधनार्थञ्च पाठो-

अथ भग्नस्य भेदनिर्देशः।—

भग्नो द्विधा निजागन्तु-बाह्याभ्यन्तरभेदतः ॥१०२॥

अथ भग्नचिकित्सा।—

अथ भग्ने पर्पटीरसप्रयोगविधिः।—

भग्नेष्वैरण्डतैलेन प्रयुञ्ज्यात् पर्पटीरसम् ॥१०३॥

अथ भग्ने वज्रीलेपः कान्तपाषाणलेपश्च।—

वज्रीं पिष्ट्वा बालकस्य प्रणुत्त्यै मेषीदुग्धं कान्तपाषाणतुल्यैः।
युक्तं लेपादस्थिभग्नं निहन्ति बाह्याभ्यन्तःसंस्थितं तत्क्षणेन ॥१०४॥

अथ भगन्दरलक्षणम्।—

गुदस्य पार्श्वे पिटिकाऽर्त्तिकारी
शोफादियुक्तः स भगन्दरः स्यात् ॥१०५॥

ऽत्र प्रदर्शित इति ज्ञातव्यम्। माणिमन्थस्य सैन्धवस्य। भृङ्गसारेण भृङ्गराजरसेन। लिखितं विदारयेदित्यर्थः। रत्नाकरे योगोऽयं भगन्दरे सन्निवेशितः॥१००।१०१॥

"व्रण गात्रविचूर्णने" इत्यनेन व्रणस्य गात्रविचूर्णनार्थकत्वात्, भग्नेऽपि गात्रचूर्णनसाम्यात्, तथा सव्रणाव्रणभेदेन द्विविधे भग्ने व्रणाधिकारे सव्रणस्यापि चिकित्साभिधानात् अनन्तरम् अव्रणभग्नचिकित्सितमुपदिदिक्षुस्तस्य भेदानाह, भग्न इति।—द्विधा इति सव्रणाव्रणभेदेन सन्धिभग्न-काण्डभग्नभेदेन वा द्विप्रकार इत्यर्थः। निजागन्तु बाह्याभ्यन्तरभेदतः स एव भग्नः पुनः निजागन्तुभेदेन तथा बाह्याभ्यन्तरभेदेन च भिद्यते, तत्र निजः शारीरदोषजः, स च सन्धिभग्नेषु विश्लिष्टविवर्त्तितादिरूपः, काण्डभग्नेषु अतिपातितवक्रादिरूपश्च अवगन्तव्यः, आगन्तुश्च उत्पिष्टादयः अन्ये अवशिष्टा इति ज्ञातव्यम्। बाह्यः काण्डभग्नः, आभ्यन्तरः सन्धिभग्न इत्यर्थः, अथवा—बाह्यः रुचकादिषु स्फुटनलक्षणो भग्नः, आभ्यन्तरः नलककपालादिषु भेदनादिलक्षणो भग्न इत्यर्थः ॥ १०२ ॥

पर्पटीरसप्रयोगविधौ—पर्पटीरसः रक्तपित्ताद्यधिकारोक्तम् ॥ १०३ ॥

वज्रीलेप कान्तपाषाणलेपयोः—वज्रीम् अस्थिसंहारम्। प्रणुत्त्यै प्रकरणादस्थिभग्नापनोदनायेत्यर्थः, प्रलेपः कार्य्य इति शेषः। मेषीदुग्धमित्यादौ—कान्तपाषाणतुल्यैः तुल्यकान्तपाषाणैरित्यर्थः, कान्तपाषाणः राजपट्टम्, मेषीदुग्धकान्तपाषाणौ समांशौ पिष्ट्वा लिम्पेत इति ॥ १०४ ॥

भग्नस्यापि व्रणभावमापन्नस्योपेक्षया नाडी भवति भगन्दरेऽपि नाडी भवति,

अथ भगन्दरस्य निरुक्तिः ।—

वृषणासनयोर्मध्ये प्रदेशो भग उच्यते ।
तमेव दारयत्यस्माद्भगन्दर इति स्मृतः ॥१०६॥

अथ भगन्दरचिकित्सा ।—

अथ भगन्दरे उपचारविशेषः ।—

आदौ सर्वप्रयत्नेन पाकं रक्षेत् भगन्दरे ।
स्राव्य रक्तं व्रणे जाते जलूका वा प्रयोजयेत् ॥१०७॥

अथ लाङ्गल्यादिप्रलेपः ।—

लाङ्गलीकणाधुस्तूर-विषमुष्टिं प्रलेपयेत् ॥१०८॥

एतत्साधर्म्यात शोथसाधर्म्याच्च भग्नानन्तरं भगन्दरारम्भः । तत्रादौ तस्य स्वरूपलक्षणमाह, गुदस्येति ।—पार्श्वे द्व्यङ्गुले देशे इत्यर्थः, यदुक्तं माधवेन—"गुदस्य द्व्यङ्गुले क्षेत्रे पार्श्वतः पिडकाऽर्त्तिकृत" इति । पिटिका पिडकापूर्वकः इत्यर्थः, यो व्रणो भवेदिति शेषः, तथा च वाग्भटः,—"प्रायेण पिटिकापूर्वो योऽङ्गुले द्व्यङ्गुलेऽपि वा । पायोर्व्रणोऽन्तर्बाह्यो वा दुष्टासृङ्मांसगो भवेत् ॥ बस्तिमूत्राशयाभ्यासगतत्वात् स्यन्दनात्मकः । भगन्दरः स सर्वश्च दारयत्यक्रियावतः ॥" इति ॥ १०५ ॥

निरुक्तिमाह, वृषणेति ।—आस्यते उपविश्यते अनेन इति व्युत्पत्त्या आसनशब्देनात्र गुद उच्यते, वृषणासनयोः मुष्कगुदयोः यदुक्तं राजनिघण्टौ—"गुदमुष्कद्वयोर्मध्ये यो भागः स भगः स्मृतः" इति । "वृषणासनयोः" इत्यत्र "वृषणापानयोः" इति पाठान्तरम् । भगशब्दोऽत्र वस्तिगुदोपलक्षणः, तयोरपि दारणात्, यदुक्तं सुश्रुतेन—"गुदभगवस्तिप्रदेशदारणात् भगन्दरः" इति । भोजेनाप्युक्तं—"भगं परिसमन्ताच्च गुदं वस्तिं तथैव च । भगवद्दारयेत यस्मात् तस्मात् ज्ञेयो भगन्दरः ॥" इति ॥१०६॥

उपचारविशेषमाह, आदाविति ।—पाकं रक्षेत् जाता पिडका यथा न पाकमागच्छेत तथा कुर्यादित्यर्थः । पाकनिवारणोपायं प्रदर्शयति, स्राव्यमिति ।—व्रणे जाते पिडकायामुत्पन्नमात्रायामेवेत्यर्थः । शोणितस्रावणञ्च लङ्घनशोधनपूर्वकं कर्त्तव्यम्, यदुक्तं सिद्धयोगे—"गुदस्य श्वयथुं दृष्ट्वा विशोध्य शोधयेत्ततः । रक्तावसेचनं कुर्यात् यथा पाकं न गच्छति ॥" इति । जलूका जलौकाम् ॥१०७॥

लाङ्गल्यादिप्रलेपे—विषमुष्टिः कुचेलकः । लाङ्गल्यादिकं सर्वं तुल्यांशं वारिणा पिष्ट्वा प्रलेपः देयः ॥ १०८ ॥

अथ कालाग्निरसः ।—

रसगन्धकसिन्धूत्थ-तुल्यनागाः सजीरकाः ।
तिक्तकोषातकीसारैः पिष्टा घ्नन्ति भगन्दरम् ॥१०९॥

अथ चक्रिकाबद्धरसप्रयोगोपदेशः ।—

गुल्मोक्तचक्रिकाबद्धो भगन्दरहरः परम् ॥११०॥

अथ रवितांडवरसः ।—

शुद्धसूतं द्विधा गन्धं कुमारीरसमर्दितम् ।
त्र्यहान्ते गोलकं कृत्वा हण्डिकान्ते निरोधयेत् ॥१११॥
शुद्धेन ताम्रपात्रेण तयोस्तुल्येन यन्त्रतः ।
तद्भाण्डं भस्मनाऽऽपूर्य चुल्ल्यां तीव्राग्निना पचेत् ॥११२॥
द्वियामान्ते तदुद्धृत्य चूर्णयेत् स्वाङ्गशीतलम् ।
जम्बीरस्य द्रवे पिष्ट्वा रुद्ध्वा सम्पुटे पचेत् ॥११३॥
गुञ्जैकं मधुराहारं दिवा स्वापञ्च मैथुनम् ।
वर्जयेच्छीतलाहारं रसेऽस्मिन् रवितांडवे ॥११४॥

कालाग्निरसे—नागं सीसकम् । तिक्तकोषातकी तिक्तघोषकः, "तित्पोरला" इति भाषा, तस्याः सारे रसे । अस्य रक्तिद्वयं सेवेत लेपयेच्च, यदुक्तं रसरत्नाकरे—"शुद्धसूतं समं गन्धं मृतनागं सतुत्थकम् । जीरकं सैन्धवं तुल्यं तिक्तकोषातकीद्रवैः ॥ पिष्टं तल्लेपनाद्धन्ति भक्षणाच्च भगन्दरम् । रसः कालाग्निनामाऽयं द्विगुञ्जं मृत्युजिद्भवेत् ॥" इति ॥ १०९ ॥

चक्रिकाबद्धरसप्रयोगोपदेशे—गुल्मोक्तेत्यत्र गुल्मेति पाठः प्रामादिकः, तत्र चक्रिकाबद्धस्य सत्त्वाभावात्, वन्ध्योक्त इत्येव भाव्यः ॥ ११० ॥

रवितांडवे—तयोस्तुल्येन रसगन्धकतुल्येन । यन्त्रतः यन्त्रं विरच्येत्यर्थः, "यत्नतः" इति पाठान्तरम् । द्विभागगन्धेन कज्जलीकृतं पारदं दिनत्रयं कुमारीरसेन मर्दयित्वा गोलकं विधाय च हण्डिकान्तः स्थापयेत्, ततः कज्जलीतुल्यशुद्धताम्रपत्रीकृतेन कण्टकवेधयोग्येन भाजनेन तं कज्जलीपिण्डमाच्छाद्य पात्रपिण्डयोः सन्धिं निरुन्ध्यात्, अथ तां हण्डिकां भस्मना पूरयित्वा तीव्राग्निना पचेदिति । रसेन्द्रसारे तु—कज्जलीसमं सूक्ष्मताम्रपत्रं तेन पिण्डेनालिप्य हण्डिकान्तर्निवेश्य च प्रदर्शितरीत्या पचेत्, एवं यन्त्रप्रकारः प्रदर्शितः, तथा च—"शुद्धसूतं द्विधा गन्धं

अथ स्फोटने चतुरङ्गलेपः।—

ताम्रचूर्णं सप्तभागं भागमेकन्तु पारदम्।
सैन्धवं सप्तभागञ्च गन्धकं नवभागिकम् ॥११५॥
भृङ्गोद्रावैः सजम्बीरैः सप्ताहं घर्ममर्दितम्।
तेन लिप्तं स्फुटत्याशु यदि पक्वं भगन्दरम् ॥
न शस्त्रैश्छेदयेत् प्राज्ञः स्फोटयेल्लेपनादिभिः ॥११६॥

अथ स्फोटने हरिद्रादिप्रलेपः।—

हरिद्रानिम्बसिन्धूत्थं पिष्ट्वा लिप्त्वा स्फुटत्यलम् ॥११७॥

अथ शोषणे नरास्थितैलप्रयोगः।—

नरास्थितैललेपेन स्फुटितं शुष्यति व्रणम् ॥११८॥

अथ शोधनरोपणे ताम्रप्रयोगः।—

ताम्रभस्म दिनं मर्द्यं मदयन्तीपुनर्नवे।
मेषशृङ्गोद्रवैस्तेन व्रणशोधनरोपणम् ॥११९॥

कुमारीरसमर्दितम्। वाद्दान्ते गोलकं कृत्वा ततस्तेन प्रलेपयेत् ॥ तयोः समं ताम्रपत्रं हण्डिकान्तर्निवेशयेत् ॥" इति। रुद्ध्वा कवचीयन्त्रे निरुध्येत्यर्थः। "गुञ्जैकम" इत्यस्मात् परं "मधुनाऽऽज्येन लिह्याद्धन्ति भगन्दरम्। मुषलीलवणञ्चानु ह्यारनाल-युतं पिबेत् ॥ भुञ्जीत—"इत्यधिकः पाठः रसेन्द्रसार रसरत्नाकरादिषु दृश्यते। भैषज्यरत्नावल्यान्तु रसोऽयं "चित्रविभाण्डकः" इति नाम्ना प्रसिद्धः। रसरत्नाकरे भैषज्यरत्नावल्याञ्च "मुषली लशुनञ्चानु" इति पाठः ॥ १११—११४॥

चतुरङ्गलेपे—सर्वं सुगमम्। पक्वे भगन्दरे शस्त्रप्रयोगस्य अकर्त्तव्यतामाह, —नेति ॥ ११५।११६ ॥

हरिद्रादिप्रलेपे—निम्बस्य पत्रं ग्राह्यम्। लिप्त्वा इत्यनन्तरं तिष्ठेदिति शेषः। अलम् अतिशयेन, सम्यगित्यर्थः ॥ ११७ ॥

नरास्थितैलप्रयोगे—नरास्थितैललेपेन मानुषास्थिचूर्णतैलाभ्यां लेपेन, मानुषास्थि-नि स्रुततैललेपेनेति वा, "लेपो भगन्दरं हन्यात् नरास्थ्नां तैलमेव च" इति योग-रत्नाकरदर्शनात्। "शुष्यति" इत्यत्र "शुध्यति" इति पाठान्तरम् ॥ ११८ ॥

ताम्रप्रयोगे—"मर्द्यं मदयन्ती" इत्यत्र "घर्ममदयन्ती" इति पाठे—घर्ममदयन्ती वैश्मिकमल्लिका इत्यर्थः। योगोऽयं व्रणाधिकारे प्राक् पठितः ॥११९ ॥

अथ रोपणे मार्जारास्थिप्रलेपः।—

त्रिफलाक्काथसंयुक्त-मार्जारास्थिप्रलेपनात्॥१२०॥

अथ क्षालने त्रिफलाक्काथः।—

क्षालयेत्त्रिफलाक्काथैर्हन्याद्दुष्टभगन्दरम्॥१२१॥

अथ भूलताप्रयोगः।—

भूलतोत्थं पिबेच्चूर्णं खररक्तेन संयुतम्॥१२२॥

अथ कुक्कुरास्थिलेपः।—

श्वानास्थिलेपनं कार्य्यं शीघ्रं हन्याद्भगन्दरम्॥१२३॥

मार्जारास्थिप्रलेपे—"भगन्दरं निहन्त्याशु दुष्टव्रणहरं परम्" इति वृन्दोक्तः शेषार्द्धं द्रष्टव्यः॥ १२०॥

त्रिफलाक्काथे—सर्वं स्पष्टम्। भैषज्यरत्नावल्यान्तु त्रिफलेत्यादिना भगन्दर-मित्यन्तेन उक्त योगः एक एव पठितः तथा च—"भगन्दरं प्रत्यहन्तु सुधौत त्रिफलाम्बुना। त्रिफलारसपिष्टेन मार्जारास्थ्ना च लेपयेत्॥" इति॥१२१॥

भूलताप्रयोगे—भूलतोत्थं चूर्णं गण्डूपदचूर्णम्, "भूलतोत्थम" इत्यत्र "भूतलोत्थम्" इति पाठेऽपि स एवार्थः, तस्य भूतलादुत्थितत्वात्, सर्वेष्वेव तन्त्रेषु "भूनाग" "भूलता" "भूरोह" इति पाठदर्शनाच्च, तथा "पिबेत" इत्यत्र "लेप" इति पाठोऽपि तत्र तत्रैव दृश्यते, यदुक्तं चक्रेण—"खराश्वपक्वभूनाग चूर्णलेपो भगन्दरम्" इति। अस्य व्याख्याया शिवदासः,—"गर्दभरक्तपक्वगण्डू-पदचूर्णलेपः इत्यर्थः" इति। एवं योगरत्नाकरे—"शुनोऽस्थिभूलता तक्रे पेषिता खररक्तयुक्। लेपः" इति। तथा भैषज्यरत्नावली-रसरत्नाकरयोः,—"खराश्वपक्व-भूरोह चूर्णलेपो भगन्दरम्" इति। खररक्तेन गर्दभरक्तेन॥ १२२॥

कुक्कुरास्थिलेपे—श्वानास्थिलेपनं कुक्कुरास्थिप्रलेपनम्, अत्रापि सिंहावलोकित-न्यायेन मण्डूकप्लुतिगत्यनुसारेण वा "त्रिफलाक्काथसंयुक्त" इति पाठः पूर्वत आकृष्टव्यः, तथा च शिवदासः,—"शुनोऽस्थि इत्यत्र तृतीययोगे त्रिफलारसोऽपि पेषणार्थं ज्ञेयः", उक्तं हि—'शुनोऽस्थि वा विडालास्थि त्रिफलारसभावितम्' इति।" "श्वानास्थि" इत्यत्र "शुनोऽस्थि" इति सर्वतन्त्रीयः पाठः साधुः, महाजनप्रयुक्तत्वात् ग्रहणीयो वा। योगरत्नाकरे तु श्वास्थिभूलताचूर्णयोरैकत्र्यमेव प्रयोगो दृश्यते, तच्च प्रदर्शितमेव॥ १२३॥

अथ ग्रन्थेर्लक्षणं व्युत्पत्तिश्च ।—

मेदोमांसासृगाः कुर्य्युर्वृत्तं ग्रन्थितमुन्नतम् ।
दोषाः शोफादिकं तत्र ग्रथनात् ग्रन्थिमाहु तम् ॥१२४॥

अथ मेदोग्रन्थौ अरिमेदादिभस्मलेपः ।—

अरिमेदपलाशानां ग्रन्थिभस्म विमर्दयेत् ।
भस्मना तेन दत्तः सन्मेदोग्रन्थिविनाशनः ॥१२५॥

अथ मेदोवृद्धौ गुडूच्यादि ।—

गुडूचीचूर्णं निष्क-त्रयमुष्णाम्बुमर्दितम् ।
मेदोवृद्धिरसात्तेन हन्ति रोगञ्च पूर्वजम् ॥१२६॥

अथ गण्डमालायामुदयभास्करप्रयोगोपदेशः ।—

गण्डमालां जयत्याशु गुल्मोक्तोदयभास्करः ॥१२७॥

अथ कालस्फोटादौ पुत्रजीवप्रयोगः ।—

पुत्रजीवस्य मज्जान्तु जलैः पिष्ट्वा प्रलेपनात् ।
कालस्फोटं विषस्फोटं सद्यो हन्यात् सवेदनम् ॥
ग्रन्थ्यादिनिखिलान् रोगान् सर्वरोगाश्रयान् हरेत् ॥१२८॥

उत्सेधसाधर्म्यात् भगन्दरानन्तरं ग्रन्थ्यादिचिकित्सिताधिकारः । तत्रादौ तस्य सामान्यलक्षणं निरुक्तिञ्चाह, मेद इति ।—ग्रन्थितं ग्रन्थिबद्धवत् कठिनमित्यर्थः । ग्रथनात् ग्रन्थिबद्धस्येव कठिनत्वात् ॥ १२४ ॥

अरिमेदादिभस्मलेपे—अरिमेदः विट्खदिरः । ग्रन्थिभस्म अरिमेद-पलाशयोः त्वक्स्थग्रन्थिक्षारः इत्यर्थः । विमर्दयेत् इत्यत्र ग्रन्थियुक्तस्थले इति शेषः । दत्त इत्यत्र लेप इति शेषः । सन् नित्यः, नित्यं दत्तः लेप इत्यर्थः, "सन्" इत्यत्र "स्यात्" इति पाठः सुगमः ॥ १२५ ॥

गुडूच्यादौ—"गुडूची" इत्यत्र "गुञ्जाग्नि" इति क्वचित् पाठः । निष्कत्रयमिति मिलित्वा बोद्धव्यम् । "मेदोवृद्धिरसात्तेन" इत्यत्र "मेदोवृद्धिमशेषेण" इति क्वचित् पाठः । रोगमिति प्रकरणात् ग्रन्थिमित्यर्थः । पूर्वजं दीर्घकालोत्थमपीत्यर्थः ॥१२६॥

उदयभास्करप्रयोगोपदेशे—"गुल्मोक्तोदयभास्करः" इत्यत्र "शूलोक्तोदयभास्करः" इति युक्तः पाठः, गुल्मे तस्यापरिदृष्टत्वात् ॥ १२७ ॥

पुत्रजीवप्रयोगे—पुत्रजीवस्य इङ्गुदीफलस्य मज्जाम् अस्थिमध्यम् । "जलैः"

अथ सन्धिग्रन्थौ रक्तस्रावविधि ।—

सन्धिग्रन्थिस्तापयुक्तो यदि स्यात् क्षीर रात्रावोदनं सन्निदध्यात् ।
पादाङ्गुष्ठस्याग्रदेशेषु रक्त स्राव कुर्य्यात्तेन शीघ्र सुखी स्यात् ॥
॥१२९॥

अथ कक्षग्रन्थ्यादौ पुत्त्रजीवप्रयोग ।—

कक्षग्रन्थिं गलग्रन्थिं कटिग्रन्थिञ्च नाशयेत् ।
अन्यच्च स्फोटकं तीव्र पुत्त्रजीवो विनाशयेत् ॥१३०॥

अथ कालस्फोटे गुञ्जापत्रादिचूर्णम् ।—

गुञ्जापत्रं शिला यष्टिं गवा क्षीरेण पाययेत् ।
कालस्फोट निहन्त्याशु मज्जा वा पुत्त्रजीवजा ॥१३१॥

इत्यत्र "अले" इति कस्यचित पाठ । कालस्फोटं कृष्णवर्णस्फोटविशेष तन्त्रान्तरोक्तम् । विषस्फाट विस्फोटम् । "ग्रन्थ्यादिनिखिलान् रोगान् सर्वदेहाश्रयान् हरेत् । तण्डुलीयकवर्षाभू-नागकन्यावरारसै ॥ गोमूत्रे च रस. पिष्ट पुटपक्वोऽर्बुदादिजित् । ब्राह्मीपलाशयो क्वाथे रीतिपत्र विनिक्षिपेत् ॥ दिनत्रय ततस्तानि पुनस्तेनैव मर्दयेत् । लघुभाण्डे समादाय चूर्णं कुष्माण्डवारिणा ॥ ततस्त्रिवार कुर्वीत पुट करभवारिणा । मर्दयित्वा पुट दद्यादजामूत्रेण भावयेत ॥ ततोऽप्येकपुट दद्यात् तिस्रस्त्रिकटुभावना । आखुपर्णीविडङ्गाग्नि जलैरथ विभावित ॥ एवमेष सुसंसिद्धो रसो वल्मीकमुद्रसै । वल्लत्रयमितो देयो वल्मीके तस्य मृत्युरा ॥ वल्मीक सविलिम्पेत्तु क्रिमिसङ्घप्रशान्तये । रसेरुतरवारुण्या सभम हन्ति मारुतम् ॥ वासानीरानुपानेन जयेत् कफसमीरणौ ॥" इति क्वचिदधिक पाठ ॥ १२८ ॥

रक्तस्रावणविधौ—सन्धिग्रन्थि सन्धिदेशस्थ ग्रन्थि तापयुक्त पित्ताधिकत्वात यदि दाहसन्तापादिभि पीडित । पादाङ्गुष्ठस्य देहस्य यद्भागीयसन्धौ तापयुक्तो ग्रन्थिर्भवेत्, तत्पार्श्वीयपादाङ्गुष्ठस्येत्यर्थ ॥ १२९ ॥

पुत्त्रजीवप्रयोगे—सर्वं स्पष्टम् ॥ १३० ॥

गुञ्जापत्रादिचूर्णे—शिला मन शिलाम् । यष्टिं यष्टिमधुकम् । "कालस्फोटम्" इत्यत्र "तलस्फोटम्" इति क्वचित् पाठ । मज्जा वा पुत्त्रजीवजा इत्यत्र क्षीरेण पीता इति शेष. ॥ १३१ ॥

अथ कालस्फोटे विष्णुक्रान्तादिप्रलेप ।—

विष्णुक्रान्ता च पेटारी काञ्जिकेन तु पेषिता ।
कालस्फोटं हरेल्लेपाद्दुष्टग्रन्थिषु का कथा ? ॥१३२॥

अथ ग्रन्थ्यादौ पुनर्नवादिप्रलेप ।—

पुनर्नवाकाभयशिग्रुमुष्टि-करञ्जसिन्धूत्थमहौषधञ्च ।
गोमूत्रपिष्टञ्च सुखोष्णलेपात ग्रन्थ्यर्बुदं हन्त्यपचीञ्च सद्यः ॥१३३॥

अथ अर्बुद-शोणितार्बुदलक्षणम् ।—

मेदोऽत्र दोषमासोत्थ-ग्रन्थिरूपं ततो महत् ।
अर्बुदं दुष्टरुधिरं स्रवेत्तच्छोणितार्बुदम् ॥१३४॥

अथ अर्बुदादौ पुटपक्वरस ।—

तण्डुलीयकवर्षाभू-नागकन्यावरारसे ।
गोमूत्रे च रसः पिष्टः पुटपक्वोऽर्बुदादिजित् ॥१३५॥

विष्णुक्रान्तादिप्रलेपे—विष्णुक्रान्ता अपराजिता। पेटारी "झाँपी टुकुरी" इति ख्यातम् ॥ १३२ ॥

पुनर्नवादिप्रलेपे—अभयम् उशीरम्। मुष्टि घण्टापाटला ॥ १३३ ॥

उत्सेधसाधर्म्यात् तुल्यलिङ्गचिकित्सितत्वाच्च ग्रन्थ्यानन्तरमर्बुदचिकित्सिते वक्तव्ये प्राक् तस्य भेदानाह, मेद इति।—"अत्र" इत्यत्र "अस्र' इति पाठ साधु, सुश्रुतादिभि रक्तस्यापि कारणत्वेन ग्रहणात्, अत्रापि शोणितार्बुदस्य वक्ष्यमाणत्वाच्च। दोष वातादि। तत ग्रन्थित। एवमर्बुदभेदानुक्त्वा वातादिजेन ग्रन्थिना ततदर्बुदस्य तुल्यलक्षणत्वेन तदभिधानस्य निष्प्रयोजनत्वात् विशिष्टलक्षणकं शोणितार्बुदमाह, दुष्टेति।—स्रवेत इत्यत्र यत् इति अध्याहरणीय, यत्तदोर्नित्यसम्बन्धात् ॥१३४ ॥

पुटपक्वरसे—तण्डुलीयक मारिष "चाँपानटे" इति भाषा। नाग नागवल्ली। कन्या "घृतकुमारी" इति प्रसिद्धम्। वरा त्रिफला, तण्डुलीयकादीना रसे गोमूत्रे च पारद पिष्ट्वा पुटपाकेन पचेत्। सेव्ययोगोऽयम्। "वरारसे" इत्यत्र "वराऽरे" इति पाठान्तरम् ॥ १३५ ॥

अथ अर्बुदे यवक्षारादिलेप ।—

लिम्पेद् यवक्षारविडङ्गवीजं गन्धोपलस्यानशनैः कृतैर्यत् ।
रक्तेन मिश्रैः सरसस्य सद्यः तदर्बुदं शाम्यति नान्यथैतत् ॥१३६॥

अथ गण्डमालाऽपचीलक्षणम् ।—

मेदोत्था गलकक्षवङ्क्षणतले मन्याद्दृशोः कुर्वते
वार्त्ताकीफलकोपमान् सकठिनान् गण्डान् सकण्डून् मलाः ।

यवक्षारादिलेपे—"गन्धोपलस्यानशने" तथा "सरसस्य" इत्यत्र "गन्धपले-स्यान्मसृणीकृते" तथा "सरटस्य" इति पाठद्वय समीचिन तन्त्रान्तरीयपाठेन सह साम्यात, तथा च योगरत्नाकर,—"लिम्प यवक्षारविडङ्गवीज गन्धोपले स्यान्मसृणीकृतैर्यत् । रक्तेन मिश्रै सरटस्य सद्यस्तदर्बुद शाम्यति नान्यथैतत् ॥" इति । अत्र गन्धोपल गन्धक । सरट कृकलास । चक्रदत्ते शुण्ठीयोगे-माप्ययं दृश्यते, यदुक्त—"सरटरुधिरार्द्रैर्गन्धक यवजविडङ्गनागरैर्वाऽथ" इति । योगरत्नाकरे तु "यवज" इत्यत्र "नागभस्म" इति पाठ, तथा च—"गन्धशिला-विश्वौषधविडङ्गनागभस्मभि समैश्चूर्णम् । कृकलासरक्तयुक्त लेपात् सद्योऽर्बुदध्वंसि ॥" इति ॥१३६॥

अथ उत्सेधसाधर्म्यात् गुडकसाम्याच्च अर्बुदानन्तर गण्डमालाऽपचीमाह, मेदोत्था इति ।—ननु सुश्रुतादौ—"कर्कन्धुकोलामलकप्रमाणै कक्षासमन्यागलवङ्क्षणेषु । मेद कफाभ्या चिरमन्दपाकै स्याद्गण्डमाला बहुभिश्च गण्डै ॥ ते ग्रन्थय केचि-दवाप्तपाका स्रवन्ति नश्यन्ति भवन्ति चान्ये । कालानुबन्ध चिरमादधाति सैवापचीति प्रवदन्ति तज्ज्ञा ॥" इत्यनेन गण्डमालापच्यौ पृथगेव पठिते, अत्र तु "सा गण्डमाला-ऽपची" इत्यनेन ग्रन्थेन मिलितेव पठिता, तत किमत्र समाधानमिति चेदुच्यते—गण्डमालाऽऽरम्भकग्रन्थय एव पुन पुन स्रावनाशोत्पत्तियोगात् अपचीसञ्ज्ञा लभन्ते, एतच्च "ते ग्रन्थय केचित" इत्यत्र "ते" इत्यनेनैव स्फुटीकृतम् । भोजेनाप्युक्त—"वातपित्तकफा वृद्धा मेदश्चापि समाचितम् । जङ्घयो कण्डरा प्राप्य मत्स्याण्डसदृशान् बहून् ॥ कुर्वन्ति ग्रन्थीस्तास्तेभ्य पुन प्रकुपितोऽनिल । तान् दोषानूर्ध्वगो वक्ष-कक्षामन्यागलाश्रित ॥ नानाप्रकारान् कुरुते ग्रन्थीन् सा त्वपची मता । अपची कण्ठमन्यासु कक्षवङ्क्षणसन्धिषु । गण्डमाला विजानीयादपचीतुल्यलक्ष-

पच्यन्तेऽल्परुजः स्रवन्ति नितरां कण्डूयन्ति नश्यन्त्यलं
दूर्वेव क्षयवृद्धिभागिनि नृणां सा गण्डमालाऽपची ॥१२७॥

अथ गण्डमालायां सुरवारुण्यादियोगः ।—

सुरवारुण्या मूलं गोमूत्रयुतं महेन्द्रकन्या च ।
अपकरोति गण्डमालां पित्तं स्लक्ष्णेन परिघृष्टम् ॥१२८॥

अथ गण्डमालायामर्कक्षीरादिलेपः ।—

अर्कक्षीरजयापुष्प-तैललाक्षारसैः समैः ।
गण्डमाला शमं याति प्रलिप्ता सप्तभिर्दिनैः ॥१२९॥

स्याम् ॥" इति । एवञ्च तन्त्रेऽस्मिन् हेतुसाम्यादपृथगेव प्रदर्शिता, तत्तत्तन्त्रे तु स्रावादि-लक्षणयोगात् वैशिष्ट्यप्रदर्शनार्थं ते पृथक् कृत्वा पठिते इति मन्तव्यम् । मेदोत्थाः मेदःस्थाः, मला इत्यनेन सम्बध्यते । "वार्त्ताकीफलकोपमान्" इत्यत्र "वार्त्ताका-मलकोपमान्" इति पाठः साधुः, वाग्भटे तादृशपाठदर्शनात्, यदुक्तं वाग्भटेन— "मेदःस्थाः कण्ठमन्यास-कक्षावङ्क्षणगा मलाः । सवर्णान् कठिनान् स्निग्धान् वार्त्ता-कामलकाकृतीन् ॥ अवगाढान् बहून् गण्डान् चिरपाकांश्च कुर्वते । पच्यन्ते-ऽल्परुजस्त्वन्ये स्रवन्त्यन्येऽतिकण्डुराः ॥ नश्यन्त्यन्ये भवन्त्यन्ये दीर्घकालानुबन्धिनः । गण्डमालाऽपची चेयं दूर्वेव क्षयवृद्धिभाक् ॥ तां त्यजेत् सज्वरच्छर्दि पार्श्वरुक्कास-पीनसाम् ॥" इति । कण्डूयन्ति उत्पद्यन्ते इत्यर्थः । दूर्वेव क्षयवृद्धिभागिनी कदाचित् क्षयं कदाचित् वृद्धिञ्च भजते या सा तथाभूता, क्षयेऽपि वृद्धिं भजते या तथाभूता इति वा, दूर्वा यथा क्षीणाऽपि पुनर्वृद्धिं भजते तथा इत्यर्थः । भागिनि इत्यत्र ह्रस्वश्छान्दसः ॥ १२७ ॥

सुरवारुण्यादियोगे—सुरवारुणी इन्द्रवारुणी । महेन्द्रकन्या महाकालाख्यलता, श्वेतापराजिता वा, तन्त्रान्तरोक्तयोगेन सह सादृश्यदर्शनात् महेन्द्रकन्या इति शब्दस्य अन्यत्र प्रयोगादर्शनाच्च, यदुक्तं श्रीचक्रपाणिना—"ऐन्द्र्या वा गिरिकर्ण्या वा मूलं गोमूत्रयोगतः । गण्डमालां हरेत् पीतं चिरकालोत्थितामपि ॥" इति । अत्र ऐन्द्री सुरवारुणी गिरिकर्णी श्वेतापराजिता । पित्तं गोपित्तम्, "पित्तम्" इत्यत्र "पीतम्" इति पाठो युक्तः, अर्थसङ्गतिराहित्यात् प्रदर्शितयोगे तथा दर्शनाच्च ॥ १२८ ॥

अर्कक्षीरादिलेपे—जया जयन्ती तस्याः पुष्पम् । समैः समभागैः ॥ १२९ ॥

अथ अपच्यां गिरिकर्णिकाप्रयोगः ।—

पुष्ये गृहीतं गिरिकर्णिकाया मूलं सितायाः गलके निबद्धम् ।
गव्येन लीढं यदि वा घृतेन निहन्ति घोरामपचीं तदेव ॥१४०॥

अथ गण्डमालायां कुकुन्दरीतैलम् ।—

कुकुन्दरीसाधिततैललिप्ता त्रिभिर्दिनैर्नश्यति गण्डमाला ॥१४१॥

अथ गण्डमालायां सहदेवीप्रयोगः ।—

मूलिका सहदेव्यास्या रवौ ग्राह्याऽथ धारिता ।
गण्डमालाहरा कर्णे महादेवेन भाषिता ॥१४२॥

अथ अपच्यादौ गुञ्जादिलेपः ।—

गुञ्जाटङ्कणशिग्रुमूलरजनी-शम्पाकभल्लातकैः
स्नुह्यर्काग्निकरञ्जसैन्धववचा-कुष्ठाभयालाङ्गली ।
वर्षाभूशरभूशिरीषलवण-व्योषाश्वमारा विषं
गोमूत्रे शमयेद्विलिप्तमपची-ग्रन्थ्यर्बुदश्लीपदम् ॥१४३॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये कर्णरोग-नासा-रोग मुखरोग-गलरोग-मुखपाक मुखच्छाया-जिह्वा दन्त कण्ठरोग गण्डमाला-शिरोरोग-यूका-दारुण-केशरोग-व्रणरोग भग्नरोग भगन्दरापची-ग्रन्थ्यर्बुद-कालस्फोटादिचिकित्सितं नाम चतुर्विंशोऽध्यायः ॥ २४ ॥

गिरिकर्णिकाप्रयोगे—पुष्ये पुष्यानक्षत्रे । गिरिकर्णिकायाः अपराजितायाः, सितायाः इति पदं गिरिकर्णिकायाः विशेषणं, श्वेतापराजितायाः इत्यर्थः ॥ १४० ॥

कुकुन्दरीतैले—कुकुन्दरी "कुँकुरा" इति ख्यातं, तया साधितं पक्वम् । अत्र कुकुन्दर्याः कल्कः तैलपादिकः, जलं चतुर्गुणं सम्यक्पाकाय इति बोध्यम् ॥१४१॥

सहदेवीप्रयोगे—सहदेवी दण्डोत्पला बला वा । रवौ रविवारे ॥ १४२ ॥

गुञ्जादिलेपे—रजनी हरिद्रा । शम्पाकः आरग्वधः । अग्निः चित्रकः । लाङ्गली विषलाङ्गली । वर्षाभूः पुनर्नवा । शरभूः शरपुङ्खा शरमूलं वा । लवणं सैन्धवम्, अत्र सैन्धवस्य भागद्वयं ग्राह्यं द्विरुक्तत्वात्, "लवण" इत्यत्र "वरुण" इति पाठे —वरुणः वरुणत्वक् । अश्वमारः करवी ॥ १४३ ॥

इति रसरत्नसमुच्चयबोधिन्यां चतुर्विंशोऽध्यायः समाप्तः ॥ २४ ॥

अथ पञ्चविंशोऽध्यायः ।

अथ क्षुद्ररोगादिचिकित्सनम् ।—

अथ क्षुद्ररोगाणां नामानि ।—

व्यङ्गः कच्छपनीलिकाकुनखविद्धोत्कोठकोठालसैः
कक्षाकुदरगुदप्रसुप्तिविवृता-विस्फोटवल्मीककक् ।
विस्फः स्यात् कदराजगल्लिजतुमण्यन्धालजीराजिकाः
क्षुद्रा लाञ्छनशर्करेति च यव-प्रख्याग्निरोहिण्यपि ॥१॥

जालाश्मगर्दभविदारिमसूरिकाभिः
सत्पद्मकण्टकरुजा सह गर्दभी च ।
स्याच्छर्करार्बुदमषाननदूषिकैश्च
गण्डाह्वया पनसिका त्विरिवेल्लिकेति ॥२॥

अक्षुद्रनिदानलक्षणचिकित्सितानां ज्वरादीनां निर्देशेन क्षुद्रनिदानलक्षणचिकित्सितानां व्यङ्गादीनां क्षुद्ररोगाणां पारिशेष्यात् तच्चिकित्सिते वक्तव्ये चिकित्सायां व्याधीनां भेदज्ञानसापेक्षतया आदौ क्षुद्ररोगाणां भेदान् प्रदर्शयति, व्यङ्ग इति ।— कच्छप. कच्छपिका । विद्धा "इन्द्रविद्धा" इति नाम्ना सुश्रुतेन पठिता । उत्कोठ कोठौ तन्त्रान्तरे भिन्नाधिकारे पठितौ । अलस अलसकः, "पाँकुइ" इति ख्यातम् । कदरगुद सन्निरुद्धगुद । प्रसुप्ति स्पर्शाज्ञता, "वायुनोदीरित श्लेष्मा त्वच प्राप्य विशुष्यति । ततस्त्वक् जायते पाण्डु क्रमेण च विचेतना ॥ अल्पकण्डूरविक्लेदा सा प्रसुप्ति प्रसुप्तित ॥" इत्यनेन वाग्भटोक्ता, चरकेण त्वियम् अशीतिवातविकारेषु पठिता । "विस्फ" इत्यत्र "चिप्प" इति पाठ साधु, सुश्रुतवाग्भटयो विस्फ इति संज्ञायास्तल्लक्षणस्य चादर्शनात् चिप्पस्य दर्शनाच्च । अन्धालजी क्वचित् तन्त्रे "अन्त्रालजी" वाग्भटे च "अलजी" इति नाम्ना पठिता । राजिका ग्रीष्मपिडका, "घामाचि" इति प्रसिद्धम्, तल्लक्षण वाग्भटे यथा—"घर्मस्वेदपरीतेऽङ्गे पिटिकाः सरुजो घनाः । राजिकावर्णसंस्थान-प्रमाणा राजिकाह्वया ॥" इति । क्षुद्रा तन्नामक कश्चित् रोगविशेष. । लाञ्छन न्यच्छ, न्यच्छपर्याये लाञ्छनमिति

अथ क्षुद्ररोगचिकित्सा।—

अथ क्षुद्ररोगे पर्पटीप्रयोगविधिः।—

सर्पिषा निम्बचूर्णेन प्रयुक्ता पर्पटी हरेत्।
मसूरिकाः क्षुद्ररोगानन्यानपि च दुस्तरान्॥३॥

अथ व्यङ्गे शशरुधिरप्रयोगः जातीफलप्रयोगश्च।—

तत्कालशस्त्रप्रहतः शशो यस्तस्यासृजा नश्यति लिप्यमानम्।
व्यङ्गं मुखे जातिफलस्य वाह्य-त्वचाऽथवा सन्ततमेव लिप्तम्॥४॥

अथ व्यङ्गे इङ्गुदीमज्जप्रयोगः।—

इङ्गुदीफलसमुद्भवमज्जा पेषिताऽतिशिशिरेण जलेन।
एकविंशतिदिनप्रविलिप्ता व्यङ्गमाननभवं परिमार्ष्टि॥५॥

पाठदर्शनात्, यथा—"व्यच्छ लाञ्छनमुच्यते" इति। शर्करा "ग्रन्थिं करोत्यसौ—" इत्यादिना शर्करार्बुदस्य हेतुत्वेन प्रदर्शिता, यद्यपि शर्करावस्थाविशेषः शर्करार्बुदं तेनैतत्तत्रापि भिन्नसङ्ख्याया न गणितं तथाऽपि अत्र उभयोः पृथग्ग्रहणं सम्प्राप्ति-भेदज्ञापनार्थम्। जालाश्मगर्दभः, जालगर्दभः अश्मगर्दभश्च पाषाणगर्दभ इत्यर्थः। सप्त रोगभेदाः। वाग्भटेन तु सप्तक्षुद्रे न पठिते, पठितौ च चर्मकीलतिलकालकौ, तत्तु विकाराणामानन्त्यात् क्वचित् किञ्चिदिति कृत्वा सहनीयम्। सह इति आननदूषिकैश्च इत्यनेन सम्बन्धनीयम्। सप्त सप्तकम्। आननदूषिकः मुखदूषिका, युवानपिडका इत्यर्थः, "आननदूषिकैः" इत्यत्र "आननदूषकैः" इति पाठः साधुः। "गण्डाऽऽह्वया" इत्यत्र "गन्धाऽऽह्वया" इति पाठः साधुः, वाग्भटे "गन्धनामा" इति पाठदर्शनात् रुग्विनिश्चये तु "गन्धमाला" इति नाम्ना प्रसिद्धेयम्॥ १।२॥

पर्पटीप्रयोगविधौ—पर्पटी प्रागुक्तः पर्पटीरसः॥ ३॥

शशरुधिरप्रयोग-जातीफलप्रयोगयोः—तत्कालशस्त्रप्रहतः सद्योविनाशितः, तत्क्षणमेव शस्त्रेण हतस्य शशस्य क्षतमुखनिर्गतेन रक्तेन व्यङ्गमालिम्पेदिति। जाती-फलस्य वाह्यत्वचा फलावरकेण कठिनेनांशेन, फलोपरिस्थेन धूसरेण तनुनांशेन वा। चक्रमङ्गहे तु "जातीफलकल्कलेपो नीलीव्यङ्गादिनाशनः" इत्यनेन जातीफलस्यैव पिष्टस्य लेपो विहितः॥ ४॥

इङ्गुदीमज्जप्रयोगे—इङ्गुदीफलसमुद्भवमज्जा इङ्गुदीफलास्थिशस्यम्॥ ५॥

अथ कुनखे स्नुहीक्षीरादिप्रलेपः ।—

उद्धृत्य कुनखं क्षीरं स्नुक्पर्णी टङ्कणं समम् ।
सम्यङ्निरुद्धदाहश्च मूले कृत्वा नखी भवेत् ॥६॥

अथ कुनखे अभयाप्रयोगः ।—

व्रणपूतिपूयजुष्टं नखविवरं मङ्क्षु रोपयत्यभया ।
नानाविधैः किमेतैरास्फोतारविकुरण्टकक्षीरैः ॥७॥

अथ कुनखे कुष्ठादिप्रलेपः ।—

सकुष्ठं जीरकं तोयैः पिष्ट्वा लेपेन नाशयेत् ॥८॥

अथ कुनखे पुत्रजीवप्रयोगः ।—

पुत्रजीवस्य वा मज्जां तोयैः पिष्ट्वा प्रलेपयेत् ॥९॥

अथ कक्षाग्रन्थौ शिग्रुप्रयोगः ।—

शिग्रुमूलं निशातोयैः कक्षाग्रन्थिहरं लिपेत् ॥१०॥

अथ कक्षाग्रन्थौ विषादिलेपः ।—

विषं पुनर्नवामूलं जललेपेन तं जयेत् ॥११॥

स्नुहीक्षीरादिप्रलेपे—उद्धृत्य शस्त्रेणोत्कृत्येत्यर्थः । क्षीरं स्नुक्पर्णी स्नुक्क्षीरं पर्णीक्षीरञ्च, पर्णी चात्र सप्तपर्णः स्नुहीक्षीरपर्णीक्षीरटङ्कणानां समत्वम् । मूले नखमूले, कुनखं शस्त्रेणोद्धृत्य मूलदेशं दग्ध्वा स्नुक्क्षीरादिकल्कं लिम्पेदित्यर्थः । नखी प्रशस्तनखवान् ॥ ६ ॥

अभयाप्रयोगे—व्रणपूतिपूयजुष्टं नखविवरं क्षिप्रमित्यर्थः । मङ्क्षु झटिति । नानाविधैः किमेतैः एतैः वक्ष्यमाणैः आस्फोतादिभिर्नानाविधैः किम् ? किं प्रयोजनम् ? एका अभयैव क्षिप्रं रोपयितुमलम्, आस्फोतादिभिरन्यैः किमपि प्रयोजनं नास्तीत्यर्थः । आस्फोता "हापरमाली" इति प्रसिद्धः रविः अर्कः, कुरण्टकः पीतपुष्पा झिण्टी, एषां क्षीरैः क्षीरवन्निर्यासैः ॥ ७ ॥

कुष्ठादिप्रलेपे—नाशयेत् इति पदं "व्रणादिजुष्टं नखविवरम्" इति पूर्वोक्तेन सम्बध्यते ॥ ८ ॥

पुत्रजीवप्रयोगे—पुत्रजीवस्य मज्जा फलास्थिमध्यम् ॥ ९ ॥

शिग्रुप्रयोगे—निशातोयैः हरिद्राम्बरसैः । कक्षाग्रन्थिहरं कक्षाज्वरमित्यर्थः ॥१०॥

विषादिलेपे—तं कक्षाग्रन्थिम् ॥ ११ ॥

अथ स्तनविद्रधौ क्रियाक्रमः ।—

सर्वेषां स्तनरोगाणां रक्तमोक्षं प्रशस्यते ।
पूयपक्वः स्तनो यः स्याल्लेपस्तस्यावपाटने ॥१२॥

अथ स्तनविद्रधिस्फोटने एकवीरप्रयोगः ।—

एकवीरस्य मूलन्तु अजामूत्रेण लेपयेत् ।
तत्क्षणात् स्फुटते पक्वः शस्त्रैर्वा स्फोटयेद्भिषक् ॥१३॥

अथ स्तनविद्रधिरोपणे यष्ट्यादिचूर्णम् ।—

यष्टीनिम्बहरिद्रा च निर्गुण्डीधातकीसमम् ।
चूर्णं स्तनव्रणे देयं रोपणं कुरुते हितम् ॥१४॥

अथ स्तनविद्रधिरोपणे दारुवर्त्तिः ।—

मध्वाज्यैर्देवदारुञ्च पिष्ट्वा वर्त्तिं प्रलेपयेत् ।
पूयपक्वे स्तने क्षिप्ता रोपणं कुरुते क्षणात् ॥१५॥

अथ लिङ्गरोगे बोलप्रयोगः ।—

लिङ्गव्याधौ लोहितं स्रावयित्वा
पश्चाद्बोलं भक्षयेत्तस्य नुत्त्यै ॥१६॥

अस्मिन्नधिकारे अनुक्तमपि स्तनरोगं क्षुद्रहेतुनिङ्गादिकत्वेन क्षुद्ररोग एव अन्तर्भाव्य तच्चिकित्सितमाह । तत्र स्तनविद्रधौ क्रियाक्रमे—रक्तमोक्षं शोथप्रादुर्भावमात्रेणैव जलौकादिना रक्तमोक्षणं कारयितव्यमित्यर्थः । पूयपक्वः पूयेन पूयप्रादुर्भावेन पक्वः पाकलक्षणोपपन्न इत्यर्थः । अवपाटने अवपाटनाय स्फोटनायेत्यर्थः ॥ १२ ॥

एकवीरप्रयोगे—एकवीरस्य स्वनामख्यातवृक्षस्य, वन्ध्याकर्कोटिकाया इति केचित् । स्फुटते इत्यस्य स्तन इति पूर्वोक्तेनान्वयः ॥ १३ ॥

यष्ट्यादिचूर्णे—यष्टी यष्टिमधु । हितं हितकरं, चूर्णमित्यनेनान्वयः ॥ १४ ॥

दारुवर्त्त्यां—"प्रलेपयेत्" इत्यत्र "प्रकल्पयेत्" इति कल्पना साधीयसी । क्षिप्ता इत्यत्र तिष्ठेदिति शेषः । "क्षिप्ता" इति निर्विकारपाठे—सा वर्त्तिरिति शेषः ॥ १५ ॥

स्तनरोगसङ्गतिवत् सङ्गत्यैव स्तनरोगानन्तरं लिङ्गरोगचिकित्सितारम्भः । तत्र बोलप्रयोगे—लिङ्गव्याधौ उपदंशादिलिङ्गगतरोगे लोहितं रक्तं स्रावयित्वा, जलौकादिना इति शेषः । बोलं गन्धरसम् । नुत्त्यै अपनोदनाय ॥ १६ ॥

अथ लिङ्गपाके उडुम्बरादिक्षालनम् ।—

उडुम्बरवटाश्वत्थ-साम्रजम्बूत्वचः शृतम् ।
जलैः क्वाथञ्च तेनैव क्षालयेल्लिङ्गपाकनुत् ॥१७॥

अथ लिङ्गपाके जीरकप्रयोग ।—

कुमारीरससम्पिष्ट जीरकं लेपयेद्भिषक् ।
तेन दाहश्च पाकश्च शममाप्नोति निश्चितम् ॥१८॥

अथ लिङ्गपाके महाशङ्खप्रयोग ।—

महाशङ्खं जलैर्घृष्ट्वा तेन लिङ्गं प्रलेपयेत् ॥१९॥

अथ लिङ्गरोगे घोण्टादिलेप ।—

घोण्टा पूगञ्च वा तोये. सार वा खदिरोत्थितम् ।
जलै. पिष्ट प्रलेपोऽयं लिङ्गरोगहरः पृथक् ॥२०॥

अथ लिङ्गपाके गन्धकप्रयोग ।—

सुगन्धकघृतैर्लेपः पक्वलिङ्गे सुखावहः ॥२१॥

अथ लिङ्गपाके निम्बादिचूर्णम् ।—

निम्बखादिरमञ्जिष्ठा-चूर्णञ्च पतन जयेत् ॥२२॥

उडुम्बरादिक्षालने—त्वच इति उडुम्बरादिभि प्रत्येकेन सम्बध्यते । शृत पक्वम् । तेनैव उडुम्बरादीना क्वाथेनैव ॥ १७ ॥

जीरकप्रयोगे—सर्वं सुगमम् ॥ १८ ॥

महाशङ्खप्रयोगे—महाशङ्ख नरकपालम् ॥ १९ ॥

घोण्टादिलेपे—घोण्टा शृगालकोलि तस्या मूलम् । पूग गुवाक तस्य फलम् । वा शब्द पूर्वयोगापेक्षया । योगरत्नाकरे तु "घोण्टा पूगञ्च वा तोये" इत्यत्र "कुष्ठ पूग वचा तोये" इति पाठान्तरम् । सार वा खादिरोत्थितम् अथवा खदिरसारम् ॥ २० ॥

गन्धकप्रयोगे—सुगन्धक' प्रशस्तगन्धक , "सुगन्धक—" इत्यत्र "सगन्धक—" इति रसरत्नाकरे पाठ ॥ २१ ॥

निम्बादिचूर्णे—पतन विशीर्णमांससमपोत्थश. ॥ २२ ॥

अथ लिङ्गव्रणरोपणे सैन्धवप्रयोगः ।—

यवचिञ्चारसैर्घृष्टं सैन्धवं रोपयेत् व्रणम् ।
ग्रन्थिः कक्ष्याञ्च जघने शममाप्नोति नान्यथा ॥२३॥

अथ लिङ्गव्रणादौ शिग्रुप्रयोगः ।—

शिग्रुमूलत्वचस्तोयैः पिष्ट्वा लेपेन तं जयेत् ॥२४॥

अथ लिङ्गादिगतग्रन्थौ कुष्ठादिलेपः ।—

कुष्ठजीरकयोर्लेपस्तोयैर्ग्रन्थिप्रशान्तये ॥२५॥

अथ गुह्यादिगतपिडकायाम् अश्वत्थादिप्रलेपः ।—

अश्वत्थस्य त्वचो भस्म चूर्णेन सह मिश्रितम् ।
नवनीतं द्वयोस्तुल्यं मर्द्यं तेन विलेपनात् ॥
आसने गुदपार्श्वे च कक्ष्याञ्च पिटिकां जयेत् ॥२६॥

अथ लिङ्गादिपिडकायां वाकुची-चित्रकप्रयोगौ ।—

गोमूत्रैः क्षालयेत्ताञ्च लेपो वाकुचीबीजकैः ।
कृत्वा कण्डूं निहन्त्याशु चित्रकं वा गवां जलैः ॥२७॥

सैन्धवप्रयोगे—यवचिञ्चा चौरिका । "यवचिञ्चारसैर्घृष्टम्" इत्यत्र "बदरीरसैश्च सङ्घृष्टम्" इति पाठान्तरम् । व्रणम् औपदंशिकव्रणमित्यर्थः । ग्रन्थिरिति प्रकरणात् लिङ्गग्रन्थिरित्यर्थः, तथा कक्ष्यां जघने च ग्रन्थिरिति सम्बन्धः ॥२३॥

शिग्रुप्रयोगे—त्वचः शिग्रोरेवेत्यर्थः, "शिग्रुमूलत्वचः" इति समस्तपाठे—शिग्रोर्मूलत्वक्, त्वचः इति द्वितीयाबहुवचनम् । तं व्रणं ग्रन्थिञ्च ॥ २४ ॥

कुष्ठादिलेपे—सर्वं स्पष्टम् ॥ २५ ॥

अश्वत्थादिप्रलेपे—चूर्णेन सुधया, "चुण" इति प्रसिद्धेनेत्यर्थः । आसने नितम्बे इत्यर्थः । पिटिकां पिडकाम्, अत्रापि लिङ्गपिटिकामिति बोध्यम्, लिङ्गगतपिडकां तथा आसनादिषु च पिडकां जयेदित्यर्थः ॥ २६ ॥

वाकुचीप्रयोगे चित्रकप्रयोगयोः,—तां पिटिकाम् । लेपः, कार्य्य इति शेषः । कृत्वा लेपं कृत्वा इत्यर्थः, "कृत्वा" इत्यत्र "पिष्ट्वा" इति पाठान्तरम् । कण्डूमित्यत्रापि पूर्ववत् लिङ्गकण्डूमित्यर्थः । गवां जलैः गोमूत्रैः ॥ २७॥

अथ लिङ्गस्थविद्रधिकायां सर्पाक्षीप्रयोगः ।—

नरमूत्रेण सर्पाक्षीं पिष्ट्वा लेपेन तां जयेत् ॥ २८ ॥

अथ लिङ्गरोगे लवङ्गादिधूमः ।—

लवङ्गजानां लवकं कर्पूरं चणसम्मितम् ।
दरदं तोलमानञ्च सर्वं खल्ले विचूर्णयेत् ॥२९॥
ब्रह्मवृक्षकोकिलाक्षैः सर्वं यत्नेन मर्दयेत् ।
यावत् कज्जलसङ्काशं श्यामताञ्च तथैव च ॥३०॥
चतुर्दशसमा कार्या पूडिका बन्धयेद्भिषक् ।
रविवारे समादेया ह्यङ्गारे छगणोद्भवे ॥३१॥
तां निक्षिप्याथ सङ्गोप्य नासिकां विवृतां नयेत् ।
मुखमाच्छाद्य श्वासेन यातायातेन ग्राहयेत् ॥३२॥
वीटिकापूर्णवदनो द्विवारं कारयेत् सदा ।
एवं सप्तदिनं कृत्वा पश्चात् स्नानादिकं चरेत् ॥३३॥
पथ्यं निर्लवणं देयं जलं शीतं निषेवयेत् ।
अनेन योगराजेन लिङ्गव्याधिः प्रशाम्यति ॥३४॥

सर्पाक्षीप्रयोगे—सर्पाक्षी सर्पसहा "पानिछिउलि" इति ख्यातम् । तां कल्कं पिटिकाजातामित्यर्थः ॥ २८ ॥

लवङ्गादिधूमे—लवङ्गजानां लवङ्गचूर्णानामित्यर्थः, लवकं पादांशः, तच्च दरदापेक्षया बोध्यम् । दरदं हिङ्गुलम् । ब्रह्मवृक्षः पलाशवृक्षम् । कोकिलाक्षः "कुलेखाडा" इति प्रसिद्धे, सहार्थे तृतीया । अत्र दरदादीनां त्रयाणां समभागता । "यावत् कज्जलसङ्काशं श्यावताञ्च तथैव च" इति पाठश्चिन्तनीयः, दरदयोगे श्यामतायाः अदर्शनात् । पूडिका इति देशीयभाषा, पुरिया इति ख्यातम् । समादेया ग्राह्या । छगणोद्भवे आरण्यगोमयजे । तां पूडिकाम् । सङ्गोप्य, आत्मानमिति शेषः, वस्त्रादिकृतकुटीमध्ये प्रविश्य वस्त्रान्तरेण स्वदेहं गोपायित्वेत्यर्थः, तथाकरणञ्च धूमस्य बहिर्निःसरणरक्षार्थं बोध्यम् । विवृतां प्रकाशितां, सर्वदेहं वस्त्रेणाच्छाद्य धूमग्रहणार्थं नासिकाम् अनावृतां स्थापयेदित्यर्थः । मुखमाच्छाद्य संवृत्य, तथाकरणञ्च मुखेन धूमग्रहणनिषेधार्थम् । वीटिकापूर्णवदनः धूमग्रहणकाले मुखमध्ये ताम्बूलवीटिकां धारयेदिति ॥ २९—३४ ॥

अथ कण्ड्वादौ काञ्चनीप्रयोग ।—

लेपयेत् काञ्चनीमूलं नरमूत्रेण पेषितम् ।
कण्डूपामा शमं याति सर्वाङ्गेणा न संशयः ॥३५॥

अथ पामायां शाखोटकक्काथ ।—

शाखोटस्य त्वचस्तोये पक्त्वा क्काथं समाहरेत् ।
पिवेद्गोमूत्रसन्तुल्यं पामार्त्तः सुखमाप्नुयात् ॥३६॥

अथ पादकण्डूहरयोग ।—

पादकण्डूहरं कुर्य्यान्नवनीतेन म्रक्षणम् ।
हयारिपत्रधूपेन स्वेदनं तदनन्तरम् ॥३७॥

अथ पाददाहे तिलादिचूर्णम् ।—

पाददाहहरक्काथे तिलाद्द्विगुणवाकुचौ ।
चूर्णिता मधुसर्पिर्भ्यां द्विकर्षं तत्प्रशान्तये ॥३८॥

काञ्चनीप्रयोगे—काञ्चनीमूलं हरिद्राकन्दम् ॥ ३५ ॥

शाखोटकक्काथे—शाखोटस्य "शेओड़ा" इति प्रसिद्धस्य । अत्र शाखोटकक्काथ-गोमूत्रयो समत्वं, पानञ्च युक्त्या पलमर्द्धपलं वा ॥ ३६ ॥

पादकण्डूहरयोगे—म्रक्षणं मर्दनमित्यर्थ । योगरत्नाकरे श्लीपदाधिकारोक्ते-ऽस्मिन् योगे "म्रक्षणम्" इत्यत्र "माक्षिकम्" इति पाठ, किञ्च तत्र करवीपत्र-धूपस्योल्लेखो नास्तीति । हयारिपत्रधूपेन करवीरपत्रधूमेन, आदौ नवनीतेन पादा-वभ्यज्य पश्चात् करवीरपत्रेण धूपयेत ॥ ३७ ॥

तिलादिचूर्णे—पाददाहहरक्काथे पाददाहनाशकद्रव्यकृते क्काथे, पिष्टमसूरविदल-क्काथे इत्यर्थ, यदुक्तं भावमिश्रेण—"मसूरविदलै पिष्टै शृतशीतेन वारिणा । चरणौ लेपयेत् सम्यक् पाददाहप्रशान्तये ॥" इति । तिलात द्विगुणवाकुचौ, भाव्यौ इति शेष, तिलस्यैक भाग वाकुच्याश्च द्वौ भागौ पिष्टमसूरविदलक्काथेन भावये-दित्यर्थ । तच्चूर्णं द्विकर्षं मधुसर्पिर्भ्यं, लिह्यादिति शेष । तत्प्रशान्तये पाददाह-प्रशान्तये । योगरत्नाकरे श्लीपदचिकित्सायामुक्त "पाददाहहरं खादेत्तिलाद्द्विगुण-वाकुचे । चूर्णन्तु मधुसर्पिर्भ्यां कर्षमार्त्तिप्रशान्तये ॥" इति पाठ, समीचीनतया प्रतिभाति ॥ ३८ ॥

अथ पादकण्डूहरयोगान्तरम् ।—

पादकण्डूविनोदार्थं नवनीतेन म्रक्षणम् ॥३९॥

अथ पादस्फुटने पथ्यामर्दनम् ।—

पथ्या घृतेन सञ्चूर्ण्य मर्दनं करपादयोः ।

स्फुटितत्वनिवृत्त्यर्थं—" ॥४०॥

अथ कदरे यवचिञ्चादिकषाय ।—

"—यवचिञ्चार्द्धपक्वया ।

शिलादिना कृते भेदे षड्गुणञ्च द्रवं क्षिपेत् ॥४१॥

अथ विपादिकाया गुडादिप्रलेप ।—

गुडगुग्गुलुसिन्दूरमुशीर गैरिकं मधु ।

मदनं घृतसंयुक्तं पादस्फोटे प्रलेपयेत् ॥

सप्ताहात् स्फुटितौ पादौ स्यातां पङ्कजसन्निभौ ॥४२॥

पादकण्डूहरयोगान्तरे—सर्वं स्पष्टम् । पूर्वोक्तयोगे नवनीतेन मर्दनानन्तरं करवीरपत्रैश्च धूपप्रयोग उपदिष्ट, अत्र तु धूपप्रयोगाभावात् योगान्तरोऽयमिति मन्तव्यम् । योगरत्नाकरेऽपि एवमेवोक्त, तच्च प्रदर्शितमेव । "म्रक्षणम्" इत्यत्र "भक्षणम्" इति क्वचित् पाठ ॥ ३९ ॥

पथ्यामर्दने—स्फुटितत्वनिवृत्त्यर्थं पादस्फुटनप्रशमनार्थं पथ्या सञ्चूर्ण्य घृतेन सह करपादयो मर्दनं कार्य्यम् ॥ ४० ॥

यवचिञ्चादिकषाये—शिलादिना कङ्करादिना भेदे कृते विद्धे, पादे इति शेष, कदरे इत्यर्थं, यवचिञ्चार्द्धपक्वया यवचिञ्चाया चीरिण्या अर्द्धेन सह पक्वया, अत्र पथ्या इति पद पूर्वेन आवर्त्य विभक्तिविपरीणामेन तृतीयान्ततया योजनीयं, ततश्च पथ्यया इत्यर्थ, एवञ्च पथ्याया एको भाग यवचिञ्चायाश्च अर्द्धौ ग्राह्य, मर्दन कार्य्यं परीषेको वा कार्य्य इति शेष । पाकार्थं कियन्मानो द्रवो देय १ इत्यत आह षडिति ।—पथ्यायवचिञ्चयो षड्गुण जल पाकाय देयमित्यर्थ ॥४१॥

गुडादिप्रलेपे—मदनं सिक्थक, चक्रदत्तसंवादात, अपरञ्च—तत्र सिन्दूरो-शीरयो स्थाने सर्जरसपैन्धवे इति पाठ, तथा च—"सर्ज्जरससिन्धुसम्भवगुडमधु-महिषाक्षगैरिक सघृतम् । सिक्थकमेतत् पक्व पादस्फुटनापह सिद्धम् ॥" इति।

अथ विपादिकायां मदनादिप्रलेपः ।—

मदनं सिक्थकं तुल्यं सामुद्रं लवणं तथा ।
महिषीनवनीतेन सुतप्तालेपनाद्भवेत् ॥
सप्ताहात् स्फुटितौ पादौ जायेते कमलोपमौ ॥४३॥

अथ कण्ड्वादौ रसादिप्रलेपः ।—

रसं गन्धं समं मर्द्यं द्वाभ्यां तुल्यञ्च काञ्चनम् ।
दिनैकं चित्रकद्रावैः पिष्ट्वा लेपं प्रकारयेत् ॥
कण्डूगण्डं खुडं हन्ति गुल्फयोरन्तरस्थितम् ॥४४॥

अथ स्वरभङ्गे रसादिवटिका ।—

धात्रीफलरसक्षीरैः पानं स्यात् स्वरभङ्गनुत् ॥४५॥

अथ स्वरभङ्गे देवदार्वादिचूर्णम् ।—

देवदारुकणाव्योष-शताह्वापत्रक शिला ।
वचासैन्धवशिग्रूत्थ-मूलं पेष्यं समं समम् ॥४६॥

"एतत् सर्वं समभागमेकीकृत्य मनाक् पक्त्वा, यथा सिक्थकाकृतिर्भूत्वा लेपयोग्यं भवति" इति तट्टीकायां शिवदासोक्तक्रम अत्रापि ग्राह्य इति ॥ ४२ ॥

मदनादिप्रलेपे—मदनं सिक्थकं मदनापराख्यं सिक्थकं, न तु भक्तादिसिक्थकमित्यर्थः, मदनं मदनफलं, सिक्थकमिति वा। सुतप्तालेपनात् महिषीनवनीतेन सह मदनसामुद्रलवणे पिष्ट्वा उष्णप्रलेपात्। "भवेत्" इति पदं "तुल्यम्" इत्यनेन सम्बध्यते मदनं सिक्थकं तथा सामुद्रलवणं तुल्यं भवेत गृह्णीयादित्यर्थः ।४३॥

रसादिप्रलेपे—काञ्चनं हरितालम्। गण्डं मांससञ्चयविशेषं ग्रन्थिं वा। खुडं खुडकाऽऽख्यवातं वातरक्तरुजां वा। गुल्फयोः पादतलजङ्घयोः सन्धिग्रन्थिः गुल्फौ नाम मर्म तयोः ॥ ४४ ॥

रसादिवटिकायां—पूर्वोक्तमेव रसगन्धादिकृतमौषधं धात्रीफलरसक्षीरैः आमलकीस्वरसदुग्धैः, "धात्रीफलरसं क्षीरे" इति असमस्तपाठे—धात्रीफलरसं एव क्षीरे सह पानं कार्य्यमित्यर्थः। चक्रपाणिना तु धात्रीफलचूर्णपानमेव क्षीरेण उपदिष्टम्, तथा च—"गोपयसा पीतं वाऽऽमलकचूर्णञ्च" इति ॥ ४५ ॥

देवदार्वादिचूर्णे—व्योषं इत्युक्ताऽपि कणायाः पृथगुल्लेखात् पिप्पल्याः भागद्वयम्,

अथ भस्मकलक्षणम् ।—

येन भस्मीभवन्त्याशु भक्षितान्यखिलान्यपि ।
वस्तूनि स क्षुधारूपो व्याधिर्भस्मक उच्यते ॥ ५६ ॥

अथ श्लीपदस्य सम्प्राप्तिलक्षणे ।—

कफोत्तरा रक्तचलाश्रिता मलाः
पादेष्वध कायमुपाश्रिताः शनैः ।
कुर्वन्ति शोफं घनमाहु श्लीपदं
तत् कर्णनासादिषु पादवद्भवेत् ॥ ५७ ॥

अथ श्लीपदे चक्रेश्वरो रसः ।—

ताम्रचूर्णसमं सूतं शुद्धं मर्द्यं दिनत्रयम् ।
नागवल्लीमिवनाद-पाठापौनर्नवद्रवैः ॥ ५८ ॥

भस्मकलक्षणमाह, येनेति ।—रोगोऽयं तन्त्रान्तरे अग्निमान्द्याद्यधिकारे पठित',
अस्मिंस्तु क्षुद्रहेतुलिङ्गादिसाधर्म्यात क्षुद्ररोगाधिकारे पाठ न दोषावह. । भस्मक
इति तीक्ष्णाग्नेर्नामान्तरम् ॥ ५६ ॥

श्लीपदस्य सलक्षणसम्प्राप्तिमाह, कफोत्तरा इति ।—कफोत्तरा, कफप्रधाना रक्त-
चलाश्रिता चलशब्देनात्र शाखा उच्यते, रक्तेन चलेन शाखागतेन आश्रिता शाखास्थ-
रक्तसश्रिता इत्यर्थ । "रक्तचलाश्रिता" इत्यत्र "रक्तपलाश्रिता" इति पाठ साधु,
वाग्भटसवादात , अस्मिन् पक्षे—पल मास, रक्तपलाश्रिता रक्तमासाश्रिता , तथा च
—"प्रस्थिता वङ्क्षणोर्वादिमध काय कफोल्बणा । दोषा मासास्रगाः पादौ कालेनाश्रित्य
कुर्वते ॥ शनै शनैर्घन शोफ श्लीपदं तत प्रचक्षते ॥" इति । मला वातादयो
दोषा शनै अध कायमुपाश्रिता वङ्क्षणोर्वादिक सश्रिता , पादेषु इति व्यक्त्य
पेक्षया बहुवचनम् , घन निविड, प्रवृद्धमित्यर्थ , शोफ कुर्वन्ति, तत् श्लीपदमाहु,
पादवत् कर्णनासादिषु, अपिरत्र अध्याहरणीय , कर्णनासादिष्वपि, आदिपदेन
करनयनशिश्नौष्ठाना ग्रहणम् । तन्त्रान्तरेषु तु कर्णादिगतश्लीपदेषु निर्दिष्टसम्प्राप्ति
लक्षणायोगात् केषाञ्चिन्मतमिदमिति कृत्वा प्रदर्शित तत, यदुक्त—"करकर्णनेत्र-
शिश्नौष्ठनासास्वपि केचिदाहु " इति । वाग्भटेनाप्युक्त—"पाणिनासौष्ठकर्णेषु वदन्त्येके
तु पादवत्" इति । सुश्रुतोऽपि—"कर्णाक्षिनासिकौष्ठेषु केचिदिच्छन्ति तद्विद "
इत्याहु ॥ ५७ ॥

चक्रेश्वररसे—"ताम्रचूर्णसम सूतम्" इत्यत्र "ताम्र गन्ध सम सूतम्" इति रसरत्ना-

गोमूत्रे मर्दयेद्गाढं चक्रयन्त्रे दिनं पचेत्।
मासैकं भक्षयेत् क्षौद्रैः श्लीपदी च पिबेदनु ॥ ५९ ॥
खादिरं शल्लकीकाष्ठं क्षौद्रञ्चाशनकाष्ठकम्।
गवां मूत्रे. सम पिष्ट्वा पिबेत् श्लीपदनाशनम् ॥ ६० ॥

अथ श्लीपदे गुडूच्यादिलेप।—

गुडूचीकटुकाशुण्ठी-देवदारुविडङ्गकम्।
पिष्ट्वा गोमूत्रसंयुक्तो लेप श्लीपदनाशनः ॥६१॥

अथ वल्मीके बहुभावितपित्तलप्रयोग।—

ब्राह्मीपलाशयोः क्वाथे रीतिपत्र विनिक्षिपेत्।
दिनद्वय ततस्तानि पुनस्तेनैव घर्षयेत् ॥६२॥
लघुभाण्डे समादाय चूर्णं कुष्माण्डवारिणा।
सहस्त्रिवारं कुर्वीत पुट करभवारिणा ॥ ६३ ॥

करधृत पाठ.। दिनत्रयमिति।—नागवल्ल्यादीना प्रत्येकस्वरसेन दिनत्रय मर्दनम्। गाढ प्रगाढम्। चक्रयन्त्रे—"गर्त्तवाह्ये भवेद्गर्त्तो मध्यगर्त्ते रस कुरु। चक्रयन्त्रमिदं सिद्ध वाह्ये गर्त्ते दहेत पुटम् ॥" इत्यनेन अविसहितोक्ते। "मासैकम्" इत्यत्र "माषैकम्" इति पाठान्तरम्। शल्लकीकाष्ठ शल्लकी शालभेद, तस्या काष्ठ सार-मित्यर्थ। अशनकाष्ठकम् अशन पीतशाल तस्य काष्ठ सारम्। रसरत्नाकरे तु—"खादिरम्—" इत्यादौ "खादिर पद्मकाष्ठञ्च मधुनश्चाष्टमाषकम्" इति पाठान्तरम्। भैषज्यरत्नावल्या पुन,—"निम्ब खदिरसारञ्च मधुना चाष्टमाषकम्" इति पाठ। ताम्रचूर्णादिक नागवल्ल्यादीना प्रत्येकेन दिनत्रय मर्दयित्वा गोल विधाय चक्रयन्त्रे दिनमेक पचेत्, स्वाङ्गशीत समुद्धृत्य विचूर्ण्य च माषमात्रा युक्त्या अग्निसमा वा मात्रा मधुना सह लिह्यात्, खादिरादिकञ्च गोमूत्रे पिष्ट्वा अनुपान कुर्वीतेति ॥ ५८—६० ॥

गुडूच्यादिलेपे—सर्वं सुगमम्। सुश्रुते तु "गुडूची—" इत्यादौ "चित्रकम्" इत्यधिकपाठो दृश्यते ॥ ६१ ॥

बहुभावितपित्तलप्रयोगे—पलाश पलाशमूलत्वक्। रीतिपत्र पित्तलपत्र कण्टकवेधार्हम। तानि रीतिपत्राणि। तेन ब्राह्मीपलाशयो क्वाथेन सहेत्यर्थ। चूर्णं रीतिचूर्णं, वर्षणजमित्याशय। कुष्माण्डवारिणा इत्यत्र सह मर्दयित्वेति शेष.।

मर्दयित्वा पुटं दद्यादजामूत्रेण भावयेत् ।
ततोऽप्येकं पुटं दत्त्वा तिस्रस्त्रिकटुभावनाः ॥६४॥
अमर्य्यजाविडङ्गाग्नि-गोजलैरथ भावितः ।
प्रतिमिषः सुसंसिद्धो रसो वल्मीकमृद्रसैः ॥ ६५ ॥
वल्लत्रयमितो देयो वल्मीके तस्य मृत्स्नया ।
वल्मीकं सविलिप्यैतत् क्रमिसङ्घप्रशान्तये ॥६६॥
रसेन्द्रत्तरवारुण्या' सप्तमं हन्ति मारुतम् ।
वासानीरानुपानेन जयेत् कफसमीरणम् ॥६७॥

अथ स्थौल्ये विडङ्गादिचूर्णम् ।—

विडङ्गं नागरं क्षारं काललोहरजो मधु ।
यवामलकचूर्णञ्च योगोऽतिस्थौल्यदोषजित् ॥ ६८ ॥

महत इति पदं पुटमित्यनेन सम्बध्यते, महापुटमित्यर्थः, तल्लक्षणन्तु दशमाध्याये द्रष्टव्यम् । करभवारिणा करभ उष्ट्र करिशावको वा तस्य वारिणा मूत्रेण । तिस्रस्त्रिकटुभावना मिलितत्रिकटुक्वाथेन त्रिवार भावयेदिति । अमरी नीलनिर्गुण्डी जलैरिति पदम् अमर्य्यादिभिः प्रत्येकेन सम्बध्यते, अमरीरसेन छागमूत्रेण विडङ्गक्वाथेन चित्रकक्वाथेन गोमूत्रेण चेत्यर्थः । "प्रतिमिष" इत्यत्र "प्रातरेव" इति पाठकल्पना अर्थबोधानुकूला इति सुधीभिर्विभाव्यम् । वल्मीकमृद्रसैः वल्मीक' उपजीकाख्यकीटविशेषकृतमृत्तिकास्तूप तस्य मृद्रसैः वल्मीकमृत्तिकाया जलेनालोडिताया कियत्काल स्थापितायाश्च उपरिस्थस्वच्छजलैरित्यर्थः । वल्मीके वल्मीकाख्यक्षुद्ररोगे । तस्य मृत्स्नया वल्मीकमृत्तिकया । एतदिति पदं वल्मीकमित्यनेन सम्बध्यते । क्रमिसङ्घप्रशान्तये वल्मीकरोगे रक्तादिभक्षककीटसमूहविनाशाय । उत्तरवारुण्या' गोरक्षकर्कट्या ॥ ६२—६७ ॥

विडङ्गादिचूर्णे—क्षार यवक्षार, अत्र क्षारशब्दस्य नपुंसकलिङ्गता चिन्तनीया । सिद्धयोगे तु—"विडङ्गनागरक्षार काललोहरजो मधु" इति समस्तपाठ । "काललोह वज्रादि, अस्य चूर्णं मारणपुटननिष्पन्न ग्राह्यम् । अत्र सर्वचूर्णानामेव समभाग ग्राहयन्ति किन्तु लोहस्य महावीर्य्यत्वेन प्राधान्यात इतरमिलितचूर्णसमत्वम् । लोहस्याधिको भाग, मधुना चावालेह. इत्यप्याहु" इति शिवदासव्याख्या ॥६८॥

अथ स्थौल्ये त्रिफलादि-पत्रादिकषायौ।—

वरासनाग्नयः पत्र-निशाक्वाथं मधुप्लुतम्।
द्विरदस्थूलदेहोऽपि पिबेन्मासात् कृशो भवेत्॥ ६९॥

अथ विपरीतरतिजव्याधिलक्षणम्।—

विपरीते रते प्राप्ते लिङ्गे दाहः प्रजायते।
कार्श्यञ्च सर्वगात्रेषु—" ॥७०॥

अथ विपरीतरतिजव्याधिप्रतीकार।—

"—तत्प्रतीकार उच्यते।
प्रत्यग्रस्तन्निबध्यैव लिङ्गे चोषणमाचरेत्॥ ७१॥
क्षणे त्वेतस्य सञ्जाते क्षालयेच्छीतलाम्बुना।
कोलनिर्य्यासमादाय पाययेत्त सशर्करम्॥
शाल्मलीदूर्वयोर्मूलो-रसपायसमाशयेत्॥ ७२॥

त्रिफलादि पत्रादिकषाययो,—वरा त्रिफला, असन स्वनामख्यात शालभेद, अग्नि चित्रक ते, वरासनाग्नय इति पृथक्पदकरणात् "वरासनाग्नय" तथा "पत्र-निशाक्वाथम्" इति योगद्वयम्। मधुप्लुतमिति पद लिङ्गवचनविपरीणामेन उभयत्रापि सम्बध्यते। वरासनाग्नय क्वाथरूपा कल्करूपा वा मधुप्लुता, प्रयोज्या इति शेष, एव सङ्गति करणीया॥ ६९॥

विपरीतरतिजनितव्याधेर्लक्षणमाह, विपरीते इति।—विपरीते रते प्राप्ते दुष्टयोन्ययोन्यादिषु रतिकर्मणि प्रवृत्ते इत्यर्थ., यदि वा—उत्तानभावेन तत्र प्रवृत्ते, पुरुषे इति शेष॥ ७०॥

विपरीतरतिजन्यव्याधिप्रतीकारे—प्रत्यग्र इत्यस्य प्रतीकार इत्यनेन सम्बन्ध, प्रत्यग्र अभिनव, सद्य इत्यर्थ। प्रतीकारमाह तदिति।—एतस्य लिङ्गदाहिन पुस· सञ्जाते, दाहे इति शेष, क्षणे तत्क्षण एव तत लिङ्ग निबध्य वस्त्रादिना आवेष्ट्य लिङ्गे चोषणमाचरेत् आचूषणक्रिया कुर्य्यात, करेण अनुलोम मर्द्दयेत इत्यर्थो वा, तत्र लिङ्गनालसञ्चितदोषनिःसारणार्थं कर्त्तव्यमिति बोध्यम, अनन्तर शीतलाम्बुना क्षालयेच्च। किञ्च कोलनिर्य्यासादिक तथा शाल्मल्यादिकञ्च पाययेत। कोल-निर्य्यास बदरक्वाथम्। सशर्कर शर्कराप्रक्षेपयुक्तम। शाल्मलीदूर्वयो मूलोरसपायसं शुभ्रमूलनिःसृतरसकृतपायसम्, यद्वा—मूलोरस. शतमूलीरस, शाल्मलीदूर्वयो रसः

अथ उपदंशादिप्रतीकारः ।—

पुरुषव्याधिमुक्त्यर्थं रक्तस्रावो हि पृष्ठके ।
भक्षणं बोलबद्धस्य मत्स्याक्षीमूललेपनम् ॥७३॥
जानुरुग्ग्रन्थिमुक्त्यर्थं यवचिञ्चाः प्रलेपयेत् ।
सामुद्रकाञ्जिकाभ्यां हि लेपं विधेहि सत्वरम् ॥७४॥

अथ रक्तविकृतौ बोलबद्धरसप्रयोगोपदेशः ।—

सर्वरक्तविकारेषु बोलबद्धस्य सेवनम् ॥७५॥

अथ अस्थिभग्ने लाक्षादिप्रलेपः ।—

मिषीक्षीरं द्रवं चूर्णं कटुतुम्बे विनिक्षिपेत् ।
प्रलेपनेन सातत्यादस्थिभग्नं प्रशाम्यति ॥७६॥

अथ स्नायुके अस्पर्शारिप्रयोगोपदेशः ।—

स्नायुकस्यापनुत्यर्थमस्पर्शारिप्रवेशनम् ॥७७॥

शतमूलीरसश्च तैः कृतं पायसं, स च अनुरूपं तण्डुलं दत्त्वा पक्तव्यः । आशयेत् भोजयेत ॥ ७१।७२ ॥

उपदंशादिप्रतीकारे—पुरुषव्याधिमुक्त्यर्थम् उपदंशादिलिङ्गरोगापनोदनार्थम् । पृष्ठके लिङ्गपृष्ठे लिङ्गमध्ये इत्यर्थः, "स्निग्धस्विन्नशरीरस्य ध्वजमध्ये शिराव्यधः" इति चक्रपाण्युक्त्या पुरुषरोगे लिङ्गमध्ये शिराव्यधस्य विहितत्वात् । बोलबद्धस्य रक्तपित्ताद्यधिकारे कासचिकित्सितोक्तस्य । मत्स्याक्षी शालिञ्च तस्य मूललेपनं, लिङ्गे इति शेषः । जानुरुग्ग्रन्थिमुक्त्यर्थं रोगस्यास्य परिपाके आमवातादिका विविधा रोगा जायन्ते, तत्रामवाते जातायां जानुरुजः तथा ग्रन्थेश्च ग्रन्थिवेदनायाः इत्यर्थः, ग्रन्थिशब्देनात्र ग्रन्थिरुक् बोद्धव्या, मुक्त्यर्थम् अपनोदनार्थम् । यवचिञ्चा चोरिणी । सामुद्रं समुद्रफेनं द्वीपान्तरवचा वा "तोपचिनि" इति ख्यातम् ॥ ७३।७४ ॥

बोलबद्धरसस्य प्रयोगोपदेशे—सर्वरक्तविकारेषु उपदंशादौ हि रक्तं विकृतं जायते अत एव तज्जनितेषु रक्तविकारेषु तथा अन्येष्वपि रक्तविकारेषु इत्यर्थः ॥७५ ॥

लाक्षादिप्रलेपे—द्रवं द्रवरसां, लाक्षामित्यर्थः, भग्नहितत्वात् । "मिषीक्षीरद्रवम्" इति समस्तपाठे तु—मिषीक्षीरेण सह लाक्षामित्यर्थः । चूर्णं सुधाम् । विनिक्षिपेदित्यत्र चिरात्रमिति शेषः ॥ ७६ ॥

अस्पर्शारिप्रयोगोपदेशे—स्नायुकस्य "नहरुया" नाम्ना पश्चिमदेशे ख्यातस्य रोग-

अथ योनिव्यापन्निदानम्।—

दैवेनातिरते स्त्रीणां विषमोत्कटकासनात्।
जायन्ते व्यापदो योनौ दुष्टबीजार्त्तवान्मत ॥७८॥

अथ योनिव्यापत्सु पिष्टीयोग।—

पिष्टी तारार्कयोरेका तैले गन्धस्य पाचिता।
सेविता मधुसर्पिर्भ्यां गुह्यरोगान्नियच्छति ॥७९॥

अथ योनिशूले निम्बादिगोलकम्।—

निम्बुद्रावैः सुसम्पिष्टं निम्बैरण्डस्य वीजकम्।
योनिशूलहरं क्षिप्त्वा गोलकं योनिमध्यगम् ॥८०॥

विशेषस्य, रक्तविकृतिजन्यत्वेऽर्थ, विसर्पोक्तक्रियादिविधानात् अत्र रक्तदुष्टिरवश्यमेवास्तीति मन्तव्यम्। अभ्यन्तरप्रवेशन वातव्याध्यधिकारोक्तस्य अस्पर्शवातारिरसकस्य तैलस्य अभ्यन्तरेनास्य रसस्य वा प्रवेशन प्रयोग इत्यर्थ तैलाभ्यङ्ग रससेवन वा कर्त्तव्यमिति। "प्रवेशनम्" इत्यत्र "प्रलेपनम" इति क्वचित पाठ ॥ ७७ ॥

योनिव्यापदो निदानमाह, दैवेनेति।—दैवेन प्राक्तनेन कर्मणा दैवस्य सर्वरोगकारणत्वे सत्यपि यदत्र पृथक् ग्रहणं तदस्मिन् व्याधौ तस्य विशेषेण कारणत्वबोधनार्थम्, तथा अतिरते अतिसुरते कृते इत्यर्थ, एतच्च मिथ्याचारान्तर्गत निदानमिति बोद्धव्यम्; विषमोत्कटकासनात् विषमासनात् तथा उत्कटकासनात विषमासनम् उन्नतानतसङ्कीर्णतादियुक्तमासनम् उत्कटकासन कठिनकाष्ठादिनिर्मितमासनमित्यर्थ, एतदपि मिथ्याचारान्तर्गतं निदानम्, तथा दुष्टबीजार्त्तवात दुष्टबीजात पितृमातृशुक्रशोणितयो दुष्टत्वात्, आर्त्तवात दुष्टरजसश्च हेतो स्त्रीणां योनौ व्यापद. विंशतिप्रकारा रोगा इत्यर्थ, जायन्ते इति मत मुनिभि कथित इत्यर्थ। चरकेणाप्युक्त—"विंशतिर्व्यापदो योनेर्निर्दिष्टा रोगसङ्ग्रहे। मिथ्याचारेण ता स्त्रीणां प्रदुष्टेनार्त्तवेन च॥ जायन्ते बीजदोषाच्च दैवाच्च शृणु ता पृथक्॥" इति ॥ ७८ ॥

पिष्टीयोगे—तारार्कयो रौप्यताम्रयो एका पिष्टी "अकाशतुल्यात् रसताम्रमस्मात्" इत्यादिना अष्टमाध्यायोक्ता, एवञ्च तारार्कौ रसादिभि सह खल्ले विमर्द्य तीव्रातपे स्थापयित्वा च नवनीतरूपा पिष्टी कार्य्या, गन्धस्य तैले शुद्धगन्धककृते तैले इत्यर्थ, पाचिता ईषत् भृष्टा। गुह्यरोगान् योनिरोगान् ॥ ७९ ॥

निम्बादिगोलके—गोलक निम्बद्रावपिष्टनिम्बैरण्डबीजकृतगोलक योनिमध्यगं

अथ योनिरोगे सोमराज्यादिप्रलेपः।—

सोमराजी देवदारु निम्बदारुनिशासनम्।
तक्रपिष्टं प्रलेपोऽयं योन्यामयहरो भवेत्॥८१॥

अथ योनिकृमिशूले रसोनादिप्रलेपः।—

रसोनं गृहधूमन्तु विशाला सविडङ्गकम्।
कण्टकारीफल तोयैः पिष्ट्वा योनौ प्रलेपयेत्॥
कृमिशूलहरं स्यात समाहान्नात्र संशयः॥८२॥

अथ फलघृतम्।—

मञ्जिष्ठा तगरं कुष्ठं त्रिफला शर्करा वचा।
मेदा यष्टी हरिद्रे द्वे दीप्यकं कटुरोहिणी॥८३॥
पयस्या हिङ्गु काकोली वाजिगन्धा शतावरी।
प्रत्येकं चूर्णयेत् कर्षं द्वात्रिंशत्पलकं घृतम्॥८४॥
घृताच्चतुर्गुणं क्षीरं घृतशेषं विपाचयेत्।
योनिशूले शुक्रदोषे गर्भिणीनाञ्च पाययेत्॥८५॥

यथा भवेत् तथा चिन्त्वा, तिष्ठेदिति शेषः, एवञ्च तन्नीलक योनिशूलहरं भवेत् इति योजनीयम्॥ ८०॥

सोमराज्यादिप्रलेपे—दारुनिशा दारुहरिद्रा। असन स्वनामख्यातम्। तक्रपिष्ट-मित्यनन्तर कुर्य्यादिति शेषः॥ ८१॥

रसोनादिप्रलेपे—विशाला गोरक्षकर्कटी। कृमिशूलहरं योनिकृमिहरं योनिशूलहरञ्चेत्यर्थः॥ ८२॥

फलघृते—यष्टी यष्टिमधु। दीप्यकं यमानी। पयस्या क्षीरकाकोली। घृतेऽस्मिन् पाकार्थं जल चतुर्गुणं देयं, "खरसक्षीरमाङ्गल्ये पाको यत्रेरित क्वचित्। चतुर्गुणं जल तत्र वीर्य्याधानार्थमावपेत्॥ न मुञ्चति रस द्रव्य क्षीरादिभिरुपस्कृतम्। तस्मा-च्चतुर्गुणं वारि देयं पाकाय जानता॥" इति परिभाषाबलात केवलक्षीरेण सम्यक् पाकसिद्धेरभावात्। चक्रपठितफलघृतसंवादात समधिकोपयोगित्वाच्च अत्रापि लक्ष्मणामूलप्रक्षेपादिरूपः वृद्धवैद्योपदेशः अनुसर्त्तव्यः, तथा च—"अनुक्त लक्ष्मणामूलं

अथ रजोनाशे वियोनिरसप्रयोगविधिः।—

वियोनिरसगुञ्जैकं त्रिनिष्कमभयागुडम्।
पुष्परोधहरं खादेत् पलैकं तिलजीवनम्॥
ततः शीतोदकं पिबेत् पुष्पं स्रवति तत्क्षणात्॥८६॥

अथ पुष्परोधहरयोगत्रयम्।—

लाङ्गलीकन्दचूर्णं वा मूलं वाऽप्यापमार्गजम्।
इन्द्रवारुणीमूलं वा योनिस्थं पुष्परोधनुत्॥८७॥

अथ पुष्परोध रक्तगुल्महरयोगद्वयम्।—

तिलमूलकषायन्तु ब्रह्मदण्डीयमूलकम्।
यष्टीत्रिकटुकं चूर्णं क्वाथयुक्तञ्च पाययेत्॥
पुष्परोधे रक्तगुल्मे स्त्रीणां सद्य प्रशस्यते॥८८॥

क्षिपन्त्येव चिकित्सकाः। जीवद्वत्सैकवर्णाया घृतमेव प्रशस्यते॥ आरण्यगोमयेनापि वह्निज्वाला प्रदीयते॥" इति॥ ८३—८५॥

वियोनिरसप्रयोगविधौ—वियोनिरस, उदरादिचिकित्सिताधिकारे कामलाचिकित्सितोक्त, तस्य एका गुञ्जा त्रिनिष्कमभयागुड गुडहरीतक्यौ मिलित्वा निष्कत्रयम्। पुष्परोधहरं रजोरोधहरम्। तत गुडाभयाभ्यां वियोनिरसगुञ्जा सेवित्वा पलैक तिलजीवन तिलबीज, बीजाभावे अङ्कुरोत्पत्तेरभावात तिलस्यापि विनाशात् जीवनशब्देनात्र बीज बोद्धव्यम्, शीतोदक पिबेत् इत्यत्र, खादेदिति पूर्वानुवृत्ति ॥ ८६ ॥

पुष्परोधहरयोगत्रये—आपमार्गज मूलम् अपामार्गसम्बन्धिमूलमित्यर्थ। "आपामार्गजम्" इति कर्त्तव्ये "आपमार्गजम्" इति ह्रस्वप्रयोगस्तु छान्दसत्वात्। योगत्रयमेतत्॥ ८७॥

पुष्परोध रक्तगुल्महरयोगद्वये—ब्रह्मदण्डीयमूलक भार्गीमूलम्, तिलमूलकषाये ब्रह्मदण्डीमूलचूर्णं प्रक्षिप्य पिबेदित्येको योग.। क्वाथयुक्त तिलक्वाथयुक्तम्, तिलक्वाथे यष्टित्रिकटुकचूर्णं प्रक्षिप्य पिबेदित्यपरो योग। योगरत्नाकरधृतसुश्रुतपाठे तु योगाविमौ किञ्चित् पाठपरिवृत्त्या चूर्णरूपैकयोगत्वेन दृश्येते, तथा च—"तिलमूलञ्च शिग्रुञ्च ब्रह्मदण्डीयमूलकम्। मधुयष्टीत्रिकटुकैर्युत चूर्णमुपासयेत्॥" इति॥ ८८॥

अथ पुष्परोधे चणकप्रयोग ।—

चणकाना रसञ्चैव सृतं क्षीर घृतेन वा ।
शर्करामधुसंयुक्तं रक्तदोषहर पिबेत् ॥८९॥

अथ पुष्परोधे गुडव्योषादिचूर्णम् ।—

तिलक्वाथो गुडं व्योष तिलभार्गीयुत पिबेत् ।
क्वाथ रक्तभवे गुल्मे नष्टपुष्पेऽथ पाययेत् ॥९०॥

अथ गर्भाजनने धुस्तूरप्रयोग ।—

ग्राह्य कृष्णचतुर्दश्यां धुस्तूरस्य तु मूलकम् ।
कट्यां बद्धा रमेत् स्वेच्छ न गर्भः सम्भवेत् क्वचित् ॥९१॥
मुक्तेन लभते गर्भं पुरा नागार्जुनोदितम् ।
तन्मूलचूर्णं योनिस्थ न गर्भः सम्भवेत् क्वचित् ॥९२॥

अथ गर्भाजनने सैन्धवप्रयोग ।—

ऋतौ जाते क्षिपेद्योनौ तिलतैलाक्तसैन्धवम् ।
द्रवते तत्क्षणादेव तच्छुक्र पुष्पितामपि ॥९३॥

चणकप्रयोगे—चणकाना रसम् आर्द्रचणकस्य स्वरस क्वाथ वा, सृतं केवलमावर्त्तित क्षीरम, चणकरस-क्षीरौ समभागौ गृहीत्वा घृतमधुशर्कराभि सन्नीय पिबेदित्यर्थ । घृतेन वा इत्यत्र वा-शब्द पूर्वयोगापेक्षयेति ज्ञातव्यम् । रक्तदोष-हरम् आर्त्तवदोषहरम् ॥ ८९ ॥

गुडव्योषादिचूर्णे—"तिलभार्गीयुतम्" इत्यत्र "हिङ्गुभार्गीयुतम्" इति सिद्धयोगे तथा "घृतभार्गीयुतम्" इति वाग्भटे पाठ । भार्गी ब्रह्मयष्टि । तिलक्वाथे गुड तथा व्योषादीनाञ्च चूर्ण प्रक्षिप्य पिबेत् इति ॥ ९० ॥

अथ रजोरोधप्रसङ्गेन गर्भाजननचिकित्सा वक्तुमुपक्रमते । तत्र धुस्तूर-प्रयोगे—मुक्तेन कटीदेशात् धुस्तूरमूलेन परित्यक्तेन सता । तन्मूलचूर्णं धुस्तूरमूल-चूर्णम् ॥ ९१।९२ ॥

सैन्धवप्रयोगे—तत् तिलतैलाक्तसैन्धवमित्यर्थ, तत्क्षणादेव शुक्रपतनसमकालमेव शुक्र द्रवते द्रावयते, गर्भाशयगतमपि शुक्र निःसारयतीत्यर्थ., अन्तर्भूतण्यर्थोऽत्र प्रयोग. । तथा पुष्पितामपि रजस्वला स्त्रियमपि द्रवते इति योज्य, द्रावयते

अथ गर्भस्रावणे चूर्णप्रयोग।—

देवालये तु यच्चूर्णं कर्षैकं तोयपेषितम्।
पिबेद्गर्भवती नारी गर्भः स्रवति तत्क्षणात्॥९४॥

अथ गर्भस्रावणे एरण्डप्रयोग।—

काण्डमेरण्डपत्रस्य योनावष्टाङ्गुलं क्षिपेत्।
चतुर्मासोद्भवो गर्भः स्रवत्येव हि तत्क्षणात्॥९५॥

अथ गर्भस्रावणे चित्रकप्रयोग।—

निर्गुण्डोद्रवसम्पिष्टं चित्रमूलं मधुप्लुतम्।
कर्षं भुक्त्वा पतत्याशु गर्भो रण्डाकुलोद्भवः॥९६॥

अथातिरक्तस्रावे शरपुङ्खाप्रयोग।—

मूलन्तु शरपुङ्खायास्तण्डुलाम्बुप्रपेषितम्।
पाययेत् कर्षमात्रं तदतिरक्तप्रशान्तये॥९७॥

इत्यर्थ, आर्त्तव शोणितमपि निःसारयतीत्याशय। ऋतुकाले तिलतैलाक्तसैन्धवखण्ड योनौ स्थापयेच्चेत् तदा ऋतवन्ते रतिकाले आहित शुक्र गर्भाशयगतमपि निःसरति, शोणितमपि निर्गच्छति, एवञ्च गर्भसम्भावनैव नास्ति इति फलितम्। अत्र च योग-रत्नाकरोक्त पाठ सुगमार्थक, तथा च—"तैलाविल सैन्धवखण्डनादौ निधाय रण्डा निजयोनिमध्ये। नरेण सार्द्धं रतिमातनोति या सा न गर्भं लभते कदाचित॥" इति॥ ९३॥

गर्भजनकभेषजानन्तर गर्भस्रावकभेषजमाह। तत्र चूर्णप्रयोगे—देवालये यच्चूर्णं पुरातनदेवमन्दिरगात्रस्य लेपचूर्णमित्यर्थ॥ ९४॥

एरण्डप्रयोगे—काण्ड नालमित्यर्थ॥ ९५॥

चित्रकप्रयोगे—भुक्त्वा इत्यस्य गर्भ, इत्यनेन एककर्तृत्व बोद्धव्यम्, अत्र मातु-र्भक्षणस्य गर्भस्थमाले उपचार, अन्यथा एककर्तृकत्वाभावदोषात, अथवा—भुक्त्वा इत्यनन्तर "तिष्ठति चेन्नारी तदा तस्या" इति वाक्यमूहनीयम्॥ ९६॥

अथ प्रदरादिजनितातिरक्तस्रावचिकित्सामाह। तत्र शरपुङ्खाप्रयोगे—अतिरक्त-प्रशान्तये प्रदरादिव्याधौ तथा गर्भपाताद्यनन्तरमतिनिःसृतस्य रक्तस्य निवृत्तये इत्यर्थ॥ ९७॥

अथातिरक्तस्रावे अर्कमूर्त्तिरसप्रयोगविधि ।—

स्त्रीणां रक्ते पूयके वा प्रवृत्ते सैसं चूर्णं पेटकारीभवञ्च ।
दद्यात् प्रातर्मल्लखण्डेन सार्द्धं दत्त्वा सूतं त्वर्कमूर्त्तिं घृतेन ॥९८॥

अथ योनिशूलहरयोगद्वयम् ।—

योनौ शूले निम्बवातारिपिष्टिं कुर्य्याद्यद्वा नागकर्णोत्थमूलैः॥९९॥

अथ रक्तदोषे व्योषादितैलम् ।—

तैलं क्वाथ व्योषयष्टिप्रयुक्तं दद्यात् स्त्रीणां रक्तदोषापनुत्त्यै॥१००॥

अथ पुष्यानुग चूर्णम् ।—

पाठा जम्ब्वाम्रयोरस्थि शिलोद्भेदं रसाञ्जनम् ।
अम्बष्ठा शाल्मली पिष्टा समङ्गावत्सकत्वचम् ॥१०१॥
वाह्लीकबिल्वातिविषा-लोध्रतोयदगैरिकम् ।
शुण्ठीमधूकमाद्वीकं रक्तचन्दनकट्फलम् ॥१०२॥

अर्कमूर्त्तिरसस्य प्रयोगविधौ—रक्ते पूयके वा प्रवृत्ते, योनित इति शेष । सैसं चूर्णं सीसकचूर्णम् । पेटकारीभवञ्च इत्यत्रापि चूर्णमिति सम्बध्यते, पेटकारी "पेटारि" इति ख्यातं, "झाँपिटकुरी' इति लोके । मल्लखण्डेन गुडशर्करया, गुडमध्ये जातेन शर्करावत कठिनेन खण्डेनेत्यर्थ । सूतं त्वर्कमूर्त्तिम् अर्कमूर्त्तिरसं, स च रस "लौहाष्टकं मारितमर्कभाग सूतं द्विभागं द्विगुणञ्च गन्धम् । विमर्दयेत वह्निरसेन तापे दिनत्रयञ्चाव विषं कलांशम् ॥ विक्षिप्य पित्ते परिभावितोऽयं रसोऽर्कमूर्त्तिर्भवति त्रिदोषे ॥" इत्यनेन भैषज्यरत्नावल्यां पठित । आदौ अर्कमूर्त्तिरसं घृतेन सह पाययित्वा पश्चात् सीसकादिचूर्णं मल्लखण्डेन सह प्रातः पाययेदिति ॥ ९८ ॥

योनिशूलहरयोगद्वये—निम्बवातारिपिष्टिं निम्बस्य त्वक् तथा वातारि शुक्लैरण्ड, तस्य मूलं तयो पिष्टिं कल्कमित्यर्थं, योनौ धारयेदिति शेष । यद्वा—नागकर्णोत्थमूलै रक्तैरण्डमूलै पिष्टिं कुर्य्यादित्यन्वय । निम्बवातारिकल्क नागकर्णकल्कं वा सशूलाया योनौ धारयेदिति ।। ९९ ॥

व्योषादितैले—तैलं क्वाथ व्योषयष्टिप्रयुक्तं त्रिकटुयष्टिमधुक्वाथसिद्धं तैलमित्यर्थ ॥ १०० ॥

पुष्यानुगचूर्णे—शिलोद्भेदं पाषाणभेदी । अम्बष्ठा दक्षिणापथे स्वनामख्याता, तदभावे पाठा एव ग्राह्या, लज्जा इति केचित् । शाल्मली शाल्मलीवेष्टकं मोचरस॰

कट्वङ्गवत्सकानन्ता-धातकीमधुकाञ्जनम्।
पुष्ये गृहीत्वा सञ्चूर्ण्य सक्षौद्रं तण्डुलाम्बुना ॥१०३॥
पिबेदर्शःस्वतीसारे रक्तं यश्चोपवेश्यते।
दोषागन्तुकृता ये च बालानां तांश्च नाशयेत् ॥१०४॥
योनिदोषं रजोदोषं श्यावं श्वेतारुणं विषम्।
चूर्णं पुष्यानुगं नाम हितमात्रेयपूजितम् ॥१०५॥

अथ विविधविषनिर्देशः।—

यत् कन्दमूलादिषु जायते ततो विषाद्विषं स्थावरमुग्रवीर्य्यम्।
सर्पादिकं जङ्गममुच्यते तद्द्रव्यैरनेकैः कृतकञ्च यत्तत् ॥१०६॥

मित्यर्थः। समङ्गा मञ्जिष्ठा वराहक्रान्ता वा। वत्सकत्वच कुटजवल्कलम्, "वत्सकत्वचम्" इत्यत्र "पद्मकेशरम्" इति सिद्धयोगादौ पाठः। वाह्लीकं कुङ्कुमम्। विल्वं विल्वशलाटु। तोयदं मुस्तकम्। "मधूकं" तथा "कट्फलम्" इत्यत्र "त्रिफला मरिचम्" इति चक्रपाणिधृतः पाठः। चरके "मधूकम्" इत्यत्र "मरिचम्" इति पाठः। "मार्द्वीकम्" इत्यत्र "माचीकम्" इति पाठे—माचीकं देवदारु। कट्वङ्गं श्योनाकः। वत्सकं इन्द्रयवः। अञ्जनं सौवीराञ्जनं, रसाञ्जनस्य प्रागुक्तत्वात्, यदि वा—रसाञ्जनस्यैव भागद्वयम्। "अञ्जनम्" इत्यत्र "अर्जुनम्" इति चरकादिसर्वतन्त्रसम्मतः पाठः। पुष्ये पुष्यानक्षत्रे इत्यर्थः ॥ १०१—१०५ ॥

इदानीं व्याधितहितचिकित्सापरिशेषात् विषचिकित्सितं वक्तुमिच्छुर्ग्रन्थकृत्, आदौ विषस्य जातिभेदानाह, यदिति।—विषात् विविधविषमपेक्ष्य इत्यर्थः, कन्दमूलादिषु विषयेषु कन्दमूलादिरूपमित्यर्थः, यदुग्रवीर्य्यं विषं जायते, ततः कन्दमूलादिरूपस्थावरात्मकत्वात्, तत् स्थावरम्, कन्दमूलादिषु इत्यत्र आदिपदेन पत्रपुष्पादिरूपाणां दशविधानां ग्रहणम्, यदुक्तं सुश्रुते—"मूलं पत्रं फलं पुष्पं त्वक् क्षीरं सारं एव च। निर्य्यासो धातवश्चैव कन्दश्च दशमः स्मृतः॥" इति। तथा सर्पादिकं सर्पवृश्चिकादिसम्भूतं विषमित्यर्थः, जङ्गमं विषमुच्यते। यद्वा—ततः तस्मात् प्रसिद्धात् इत्यर्थः, मथ्यमानजलनिधिसमुत्पन्नादिति यावत्, विषात् निजरूपपरित्यागेन परिगृहीतरूपान्तरात् विषादित्यर्थः, कन्दमूलादिषु यत् रूपं, प्रतिष्ठितमिति शेषः, तत् उग्रवीर्य्यं स्थावरं जायते, यत् रूपं सर्पादिकम्, अधिष्ठितमिति शेषः, तत् जङ्गमम् उच्यते। उक्तञ्च वाग्भटेन—"मथ्यमाने जलनिधावमृतार्थं सुरासुरैः।

अथ विषचिकित्सा ।—

अथ मेघनादप्रयोग ।—

घननादजटा हन्ति विषं स्थावरजङ्गमम् ॥१०७॥

अथ सूत शतावरीयोग ।—

ज्येष्ठाम्बुसूतराजेन पीताऽभीरुशिफा तथा ॥१०८॥

अथ सूत सोमराजीयोग ।—

सुरभिशकृद्रसभावित-शशिराजीचूर्णसयुतः सूतः ।
स्थावरजङ्गमकृत्रिमविषजित् गुञ्जामितोऽभ्यस्त ॥१०९॥

जात प्रागमृतोत्पत्ते पुरुषो घोरदर्शन ॥ दीप्ततेजाश्चतुर्दंष्ट्रो हरिकेशोऽनलेक्षण ॥ जगद्विषण्ण त दृष्ट्वा तेनासौ विषसञ्ज्ञित ॥ ब्रह्मतो ब्रह्मणा मूर्त्तिस्तत स्थावरजङ्गमे । सोऽत्यतिष्ठन्निज रूपमुत्सृज्य वत्सनाभकम् ॥ स्थिरमत्युल्बण वीर्य्यं यत कन्देषु प्रतिष्ठितम् । कालकूटेन्द्रवत्साख्य शृङ्गीहालाहलादिकम् ॥ सर्पलूतादिदंष्ट्रासु दारुणं जङ्गम विषम ॥" इति । जङ्गममपि षोडशविधम्, यदुक्त तत्रैव—"दृष्टि नि श्वास-दंष्ट्रा नख-मूत्र-पुरीष शुक्र-लाला ऽऽर्त्तव-मुख सन्दश विशर्द्धित गुदास्थि पित्त शूक-शवानीति" इति । एषा विस्तरस्तु सौश्रुतकल्पे मृग्य । "द्रव्ये" इत्यत्र "द्रवे" इति पाठ न साधु "कृत्रिम गरसञ्ज्ञन्तु क्रियते विविधौषधै" इति वाग्भटपाठे द्रवोल्लेखा दर्शनात । कृतश्च कृत्रिम, विविधद्रव्यसयोगात् कृतमित्यर्थ । तदपि द्विविध यदुक्त काश्यपेन—"सयोगजञ्च द्विविध तृतीय विषमुच्यते । दूषीविषन्तु सविषमविष गर उच्यते ॥" इति ॥ १०६ ॥

मेघनादप्रयोगे—घननाद मेघनाद तण्डुलीयमित्यर्थ, तस्य जटा मूलम्, एतच्च तण्डुलाम्बुना पिष्टा पेय योगरत्नाकरसवादात, तथा च—"तण्डुलीयकमूलन्तु पीतं तण्डुलवारिणा । तक्षकेणापि सन्दष्ट निर्विष कुरुते नरम् ॥" इति ॥ १०७ ॥

सूत-शतावरीयोगे—ज्येष्ठाम्बु तण्डुलोदक, तेन सह सूतराज पारद पारदभस्म इत्यर्थ, तेन । अभीरुशिफा शतावरी । तथा स्थावरजङ्गमविषं हन्तीत्यर्थ ॥१०८॥

सूत-सोमराजीयोगे—सुरभिशकृद्रसभावित गोमयरसभावित य शशिराजीचूर्ण, सोमराजीचूर्ण तेन सयुत सूत रसभस्म इत्यर्थ. । सूतसोमराजीचूर्णयो मिलितयो: गुञ्जामानम् ॥ १०९ ॥

अथ अभ्रकादिप्रलेप ।—

अभ्रक तालक ताप्यं शिलाजित् कुनटी रसः।
देवदालीरसो व्योषं लेपनाद्विषनाशनम् ॥११०॥

अथ लूताविषे सूतभस्मप्रयोग ।—

रसेन चक्रमर्दस्य पुटितः पुटपाचितः।
एरण्डस्नेहसयुक्तः सूतो लूताविकारजित् ॥१११॥

अथ महासर्पविषे नागदमनीप्रयोग ।—

जलेन नागदमनी-मूलं नस्ये प्रयोजितम्।
महासर्पस्य विषमं विषं नश्यति तत्क्षणात् ॥११२॥

अथ पञ्चाङ्गशिरीषप्रयोग ।—

जलपिष्टं शिरीषस्य पञ्चाङ्गं यः पिबेन्नरः।
स नागराजदष्टोऽपि मानुषो निर्विषो भवेत् ॥११३॥

अथ अश्वगन्धा वन्ध्याप्रयोगौ ।—

अश्वगन्धाभव कन्दं वन्ध्याया वाऽथ यः पिबेत्।
तस्य देहान्तरं याति विषं स्थावरजङ्गमम् ॥११४॥

अथ वृश्चिकविषे व्योषादितैलम्।—

व्योषैरण्डस्रावपक्वन्तु तैलं लेपायोक्तं वृश्चिकाना सदैव ॥११५॥

अभ्रकादिप्रलेपे—ताप्य सुवर्णमाक्षिकम्। शिलाजित शिलाजतु। कुनटी मन शिला। रस पारद। देवदाली हस्तिघोषक तस्या रस, अभ्रादिक देवद्वालीरसेन पिष्ट्वा लेपे योजयेत ॥ ११० ॥

सूतभस्मप्रयोगे—चक्रमर्दस्य एडगजस्य "चाकुन्दे" इति प्रसिद्धस्य। चक्रमर्दरसेन पुटित रसम् एरण्डतैलेन सह सयोज्य लेपयेत किञ्चित भक्षयेच्च ॥ १११ ॥

नागदमनीप्रयोगे—नागदमनी स्वनामख्यातलताविशेष तस्या मूलम ॥ ११२ ॥

पञ्चाङ्गशिरीषप्रयोगे—शिरीषस्य पञ्चाङ्गं पत्रपुष्पफलमूलवल्कलरूपम ॥११३॥

अश्वगन्धा वन्ध्याप्रयोगयो,—पूर्वयोगोक्त जलपिष्टमिति पद योगद्वयेऽपि आवर्त्तनीयम्। वन्ध्या वन्ध्याकर्कोटकी तस्या कन्दम ॥ ११४ ॥

व्योषादितैले—व्योष त्रिकटु एरण्डस्राव, एरण्डनिर्य्यास, ताभ्या कल्करूपाभ्यां

अथ तार्क्ष्यसूतः ।—

सूतं गन्धं टङ्कणं हेमयुक्तं घर्षेद् यामं मेघनादीरसेन ।
गोलं कृत्वा कान्तपाषाणमूषा-मध्ये क्षिप्त्वा भूधरे तं पुटेत ॥
पश्चाद्घर्षेन्मेघनादीरसेन सूतः सिद्धस्त्वेष तार्क्ष्यो विषारिः ॥११६॥

अथ विषहररसः ।—

तार्क्ष्यं वन्ध्या भक्षयेद्रक्तिमानं सूतं तस्मात् यान्ति नाशं विषाणि ॥
॥ ११७ ॥

अथ मृतसञ्जीवनम् ।—

ससिन्दुवारतगरं मृतसञ्जीवनं विषम् ॥११८॥

अथ आखुविषे शिरीषप्रयोगः ।—

शिरीषकुसुमं पत्रं विषमाखुविषापहम् ॥११९॥

अथ सर्वविषे देवदार्वादियोगः ।—

देवदारु नतं मांसी लवली वाकुची विषम् ।
कुष्ठञ्च पानलेपाभ्यां समस्तविषनाशनम् ॥१२०॥

पक्वं तैलं तिलभवम्, व्योषैरण्डनिर्य्यासकल्केन पादिकेन चतुर्गुणजलेन च तिलतैलं पक्वा तेन प्रलेपः देयः ॥११५॥

तार्क्ष्यसूते—हेम सुवर्णम् । मेघनादीरसेन तण्डुलीयमूलरसेन । कान्तपाषाण-मूषामध्ये कान्तपाषाणकृतमूषामध्ये । भूधरे भूधरयन्त्रे । सूत इति ।—एष तार्क्ष्यः तदाख्यः सूतः रसः तार्क्ष्यरस इत्यर्थः, सिद्धः अव्यर्थ इत्यर्थः, विषारिः विषहन्ता ॥ ११६ ॥

विषहररसे—तार्क्ष्यं स्वर्णमाक्षिकम् । वन्ध्या वन्ध्याकर्कोटकीम् । सूतं पारदं पारदभस्म इत्यर्थः, तार्क्ष्यादित्रयाणां मिलिता रक्तिमानम् ॥ ११७ ॥

मृतसञ्जीवने—सिन्दुवारं निर्गुण्डी तस्य पत्रम् । तगरं तगरपादुका । विषम् अमृतम्, भक्षणविषया लेपविषया च योज्योऽयम् ॥ ११८ ॥

शिरीषप्रयोगे—पत्रमिति शिरीषस्यैव । विषम् अमृतम् । आखुविषापहम् उन्दुरुविषापहम् । अनेनापि पानलेपौ कार्य्यौ ॥ ११९ ॥

देवदार्वादियोगे—नतं तगरपादुका । मांसी जटामांसी । लवली "नोयाड" इति ख्यातम् । वाकुची सोमराजी ॥ १२० ॥

अथ सर्वविषे टङ्कणप्रयोग ।—

सर्पादिविषनाशाय टङ्कणस्य रजोऽम्भसा ।
पानाभ्यञ्जननस्याद्यैरतिगुह्योपदर्शिना ॥१२१॥

अथ वृश्चिकविषे मनोह्वादिगुडिका ।—

मनोह्वा सैन्धवं हिङ्गु मालतीपल्लवानि च ।
गोशकृद्रसपिष्टानि गुडिका वृश्चिकापहा ॥१२२॥

अथ वृश्चिकविषे पलाशबीजगुडिका ।—

अर्कपयसा द्विवा ब्राह्म-तरोर्भावितैर्मुहुर्बीजैः ।
गुडिका कृता प्रयत्नात् वृश्चिकविषमाशु नाशयति ॥१२३॥

अथ गरविषे कनकादिवटी ।—

कनकसारसुतीक्ष्णनिदिग्धिका-हपुषासिद्धकलाशनिषेवणात् ।
जयति साधु युवा धनकाङ्क्षया गणिकया परिदत्तगरौषधम् ॥
॥१२४॥

टङ्कणप्रयोगे—पानाभ्यञ्जननस्याद्यै इत्यत्र प्रयोज्यमिति शेष । अतिगुह्योपदर्शिना अतिगोप्योपदशवताऽपि अम्भसा टङ्कणचूर्णं पानाभ्यञ्जनादिभिरभ्यवहार्य्यमित्यर्थं ॥ १२१ ॥

मनोह्वादिगुडिकायां—मनोह्वा मन शिला । "मालतीपल्लवानि च" इत्यत्र "जातीफल सनागरम्" इति पाठान्तरम्। लेपविधया प्रयोज्योऽयम् ॥ १२२ ॥

पलाशबीजगुडिकायाम्—अर्कपयसा अर्कक्षीरेण । द्विवा दिवसे । ब्राह्मतरोर्बीजैः पलाशबीजै' ॥ १२३ ॥

कनकादिवटिकायां—कनक सुवर्णं, सार वङ्ग, सुतीक्ष्ण शोभाञ्जन, निदिग्धिका कण्टकारी. हपुषा स्वनामख्याता, सिद्ध पारद, कला मन शिला आसा अशः भाग प्रत्येक समभाग इत्यथ, तन्निषेवणात । साधु इति जयति इति क्रियाया विशेषणम् , साधु सम्यक् यथा तथा जयतीत्यथ ॥ १२४ ॥

अथ सविषान्ने वृक्षाम्लादियोगः ।—

पुराणवृक्षाम्लयुतं कटुत्रयं नरेण भुक्तं त्वशनावसाने ।
असारवृत्तावलयाऽर्थकाङ्क्षया सहान्नदत्तं विषमाशु नाशयेत् ॥
॥१२५॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्यस्य कृतौ रसरत्नसमुच्चये क्षुद्ररोग-गुह्यरोग स्थावर जङ्गमविषप्रतीकारो नाम पञ्चविंशोऽध्यायः ॥२५॥

अथ षड्विंशोऽध्यायः ।

अथ जरारोगचिकित्सनम् ।—

अथ रसायनगुणाः ।—

दीर्घमायुः स्मृतिं मेधामारोग्यं तरुणं वयः ।
प्रभावर्णस्वरौदार्य्यं देहेन्द्रियबलोदयम् ॥
वाक्सिद्धिं वृषतां कान्तिमवाप्नोति रसायनात् ॥ १ ॥

वृक्षाम्लादियोगे—पुराणं वत्सरातीतं वृक्षाम्लं तिन्तिडीफलं तेन युतम् । अत्र तिन्तिडीत्रिकटुचूर्णानां प्रत्येकं समभागः । अशनावसाने भोजनान्ते । असारवृत्तावलया दुष्टचरित्रया स्त्रिया । सहान्नदत्तम् अन्नेन सह दत्तमित्यर्थः । विषं गरमित्यर्थः ॥१२५॥

इति रसरत्नसमुच्चयबोधिन्यां पञ्चविंशोऽध्यायः समाप्तः ॥ २५ ॥

स्वस्थातुरहितभेदेन द्विविधयोरौषधयो विवृतं तावदातुरहितं सर्वम्, इदानीं रसायनवाजीकरणभेदेन स्वस्थहितं द्विविधं विवक्षु वाजीकरणमपेक्ष्य रसायनयोगानां दीर्घायुःस्मृत्यादिकरत्वेन बहुगुणत्वेन चादौ रसायनं विवृणोति, तत्र च नराणां रुचिप्रकर्षजननार्थं प्रक्रमे एव तत्फलमाह, दीर्घमिति ।—अध्यायस्यास्य यत् "जरा-रोगचिकित्सनम्" इति नामकरणं कृतं, तत्र जरारूपस्य अकालवलिपलितादिरूपस्य कालिकस्वाभाविकवलिपलितादिरूपस्य च रोगस्य चिकित्सनं प्रशमनोपाय इत्यर्थः, जरा च रोगश्च तयोश्चिकित्सनमित्यर्थो वा, रसायनस्योभयार्थसाधकत्वात्, यदुक्तं चरकेण—"प्रायः प्रायेण रोगाणां द्वितीयं प्रशमे मतम्" इति । मेधा धारणावती धियम् ।

अथ जराया निदानम् ।—

पन्थाः शीतं कदन्नञ्च वयोवृद्धाश्च योषितः ।
मनसः प्रातिकूल्यञ्च जरायाः पञ्च हेतवः ॥ २ ॥

अथ वार्द्धक्यहरं रसायनम् ।—

हलिनीरससम्पिष्टौ तुल्यांशौ रसगन्धकौ ।
हस्तिपर्णीलवलिका-मत्स्याक्षीकल्कवेष्टितौ ॥
त्रिःपक्वौ मूकमूषायां सव्योषौ वार्द्धकापहौ ॥ ३ ॥

तरुणं वयः युवत्वमित्यर्थः । प्रभावर्णस्वरौदार्य्यं प्रभावर्णस्वराणाम् औदार्य्यं महत्त्वं, प्राशस्त्यमित्यर्थः, यद्वा—प्रकृष्टप्रभादिकम् औदार्य्यञ्च दातृत्वञ्च, तच्च रसायनप्रभावेण विशुद्धसत्त्वोदयात सम्भवति । देहेन्द्रियबलोदयं देहेन्द्रियाणां बलोदयं बलसम्पदं, देहेन्द्रियबलानामुदयं सम्पदं प्रशस्ततामित्यर्थो वा, देहदार्ढ्यम् इन्द्रियाणां स्थिरत्वं विपुलबलञ्च इति निष्कर्षः, यदि वा—देहेन्द्रियबलेन सह उदयं सम्पदम् ऐश्वर्य्यमित्यर्थः, तथात्वञ्च रसायनस्य नैरुज्यसाधकत्वात्, नीरुजस्य च धनार्जनशक्तिरक्षुण्णत्वात् इति । वाक्‌सिद्धिं सफलवचनत्वम् । वृषतां मैथुनसामर्थ्यम् ; "वृषताम्" इत्यत्र "प्रणतिम्" इति चरकसम्मतः पाठः । रसायनात् रसानां रसकार्य्यभूतानां सप्तानामेव प्रकृष्टानां धातूनाम् अयनं लाभोपायः यतः तत् रसायनं तस्मात्, यदुक्तं चरकेण—"लाभोपायो हि शस्तानां रसादीनां रसायनम्" इति ॥ १ ॥

जराप्रतिरोधप्रयोजनके रसायनयोगे वक्तव्ये "सङ्क्षेपतः क्रियायोगो निदानपरिवर्जनम्" इति सुश्रुतवाक्यात् निदानपरिवर्जनस्य प्राथमिकोपचारत्वात तद्वर्जनार्थं जराया निदानमाह, पन्था इति ।—पन्था अत्यध्वपर्य्यटनम् । शीतं कदन्नञ्च शीतान्नं तथा कदन्नञ्च कुत्सितमन्नं, तच्च पूतिमलाक्तादिदोषजुष्टम् इति । मनसः प्रातिकूल्यं दौर्मनस्यादिकमित्यर्थः ॥ २ ॥

वार्द्धक्यहरं रसायने—हलिनी लाङ्गली विषलाङ्गलीया इत्यर्थः । हस्तिपर्णी हस्तिकर्णाख्यपलाश इत्यर्थः । लवलिका लवङ्गम् । मत्स्याक्षी शालिञ्च, हिलमोचिकेति केचित । अयमर्थः,—रसगन्धकौ कज्जलीकृत्य लाङ्गलीमूलरसेन पिष्ट्वा गोलकं कुर्य्यात्, ततः हस्तिपर्ण्यादिभिः कृतकल्कमध्ये गोलकं तं संस्थाप्य मूकमूषायामवरुध्य च गजपुटे पचेत्, एवं वारत्रयं कृत्वा विचूर्ण्य च सुगुप्तं निधापयेत् । ततस्तच्चूर्णं त्रिकटुचूर्णसमं मधुनाऽऽलोड्य सेवेत इति ॥ ३ ॥

अथ उदयादित्यरसः।—

आवर्त्तिते रसपलं क्षिप्त्वा द्विपलगन्धके।
आर्द्रकद्रवमुष्टीनां विंशत्या मर्दितं पचेत्॥ ४॥
मृद्गूढताम्रमूषायां तं गुञ्जाप्रमितं रसम्।
ससर्पिर्नागरं भुक्त्वा तप्ताम्बुप्रसृतं पिबेत्॥
रसोऽयमुदयादित्यः स्याज्जरारजनीहरः॥ ५॥

अथ सर्वरोगहरं रसायनम्।—

मूषां तिन्दुकविस्तारामायामे षोडशाङ्गुलाम्।
भाण्डबाह्यस्थपादांशां बालुकाभिः प्रपूरयेत्॥६॥
तस्यां निवेश्य द्विगुण-गन्धगर्भगतं रसम्।
याममात्रं पचेच्चुल्ल्यां क्षिपेद्गन्धस्य तूद्गमे॥७॥
वायसीनागिनीमत्त-मेघनादरसं क्रमात्।
स रसः सर्वरोगघ्नो वलीपलितजिद्भवेत्॥८॥

उदयादित्यरसे—आवर्त्तिते द्राविते इत्यर्थः। अत्र प्रथमार्द्धे "आवर्त्तिते रसपलं क्षिप्त्वा द्विपलगन्धकम्" इति क्वचित् पाठः। आर्द्रकद्रवमुष्टीनां विंशत्या विंशतिपलार्द्रकरसेन। मृद्गूढताम्रमूषायां मृल्लिप्तताम्रमूषायाम्। तप्ताम्बुप्रसृतं पलद्वयमितमुष्णजलमित्यर्थः। जरारजनीहरः जराख्यनैशतिमिरनाशन इत्यर्थः॥ ४।५॥

सर्वरोगहरे रसायने—तिन्दुकविस्तारां तिन्दुकफलवत् परीणाहवतीम्। आयामे दैर्घ्ये। भाण्डबाह्यस्थपादांशां भाण्डस्य पाकार्थं गृहीतस्य भाण्डस्य बाह्यस्थः बहिःप्रदेशे अवस्थितः पादांशः चतुर्थभागः यस्यास्तादृशीं हण्डिकान्तःस्थितत्रिभागामित्यर्थः, मूषामित्यस्य विशेषणम्, "पादांशाम्" इत्यत्र "पादांशम्" इति क्वचित् पाठः। द्विगुणगन्धगर्भगतं रसं द्विगुणगन्धककवलितं पारदं, तावन्मानरसगन्धकयोः कज्जलीमित्यर्थः, "द्विगुणगन्धगर्भगतं रसम्" इत्यत्र "द्विगुणं गन्धकं पाक्षिकं रसम्" इति क्वचित् पाठः। "याममात्रम्" इत्यत्र "यामत्रयम्" इति पाठान्तरम्। गन्धस्य तूद्गमे गन्धकस्य गन्धे निर्गते सतीत्यर्थः। वायसी काकमाची नागिनी नागदन्ती मत्तः धुस्तूरः मेघनादः तण्डुलीयकः, एषां रसः स्वरसम्। अयमाशयः,—यथोक्तायामविस्तारायां कज्जलीगर्भायां मूषायां द्वादशाङ्गुलं हण्डिकान्तः अङ्गुलीचतुष्टयञ्च बहिःप्रदेशे संस्थापयेत्, ततः हण्डिकां सर्वां बालुकाभिः प्रपूर्य्य मूषामुखञ्च कठिन्या

अथ मासिक रसायनम् ।—

रसगन्धकमध्वाज्य-शिलाजत्वश्लवेतसम् ।
द्विमाषप्रमितं वेगान्मासमात्राज्जरा जयेत् ॥९॥

अथ षाण्मासिक-रसायनम् ।—

विष्णुक्रान्तारुणागस्ति-चीरिणीतण्डुलीयकैः ।
रसगन्धकयोः पिष्टी स्त्रीस्तन्येन च मर्दिता ॥१०॥
यवास्तिला घृतक्षौद्रमेषामुद्वर्त्तनं जयेत् ।
कार्श्यं जराञ्च षण्मासाद्विधत्ते वृद्धिमायुषः ॥११॥

अथ पाक्षिक-रसायनम् ।—

शिलाजतुक्षौद्रविडङ्गसर्पिर्लौहाभयापारदताप्यभक्षः ।
आपूर्य्यते दुर्बलदेहधातुस्त्रिपञ्चरात्रेण यथा शशाङ्कः ॥१२॥

अथ हैमादि-रसायनम् ।—

हेम धात्रीफलं क्षौद्रं गायत्रीरसभावितम् ।
लिहन्ननु पिबेत् क्षीरं दृष्टरिष्टोऽपि जीवति ॥१३॥

आवृत्य प्रहरमात्र प्रहरत्रय वा पचेत्, यदा गन्धकस्य गन्धो निःसृतो भवेत् तदा वायस्यादिस्वरस किञ्चित् किञ्चित् तत्र क्षिपेत्, शुष्कीभूते च तस्मिन् रसे अवतार्य्य प्रयोजयेदिति ॥ ६—८ ॥

मासिक रसायने—वेगात् प्रसह्य । मासमात्रात् मासैकेनैव ॥ ९ ॥

षाण्मासिक-रसायने—विष्णुक्रान्ता अपराजिता । अरुणा अतिविषा । अगस्ति वकुक । विष्णुक्रान्तादिस्वरसे स्त्रीस्तन्येन च मर्दिता रसगन्धकयो. कज्जली सेवेत तथा घृतक्षौद्राभ्या यवतिलौ पिष्ट्वा उद्वर्त्तनञ्च कुर्य्यात् ॥ १०।११ ॥

पाक्षिक-रसायने—लौहस्य निर्दिष्टेतरचूर्णसमत्व, रसायनतया श्रेष्ठत्वात महावीर्य्यत्वाच्च । ताप्य सुवर्णमाक्षिकम् । शिलाजत्वादीन् भक्षयतीति भक्ष, पचाद्यच् । त्रिपञ्चरात्रेण पञ्चदशाहेन इत्यर्थ ॥ १२ ॥

हैमादि-रसायने—हेम स्वर्णभस्म । धात्रीफलम् आमलकचूर्णम् । गायत्रीरसभावित खदिरक्वाथभावितम्, "गायत्रीरसभावितम्" इत्यत्र "गालित रसमर्दितम्" इति क्वचित् पाठ । स्वर्णभस्मामलकीचूर्णञ्च खदिरक्वाथेन भावयित्वा क्षौद्रेण लिह्यात् क्षीरञ्चानुपिबेदिति ॥ १३ ॥

अथ पिप्पल्यादि-रसायनम्।—

मधुमागधिकाविडङ्गसार-त्रिफलाहेम घृतं सिताञ्च खादन्।
जरयाऽनवलीढदेहकान्तिः समधातुश्च समाः शतञ्च जीवेत् ॥१४॥

अथ अष्टमासिक-रसायनम्।—

ज्योतिष्मतीनाम लता पीता पीतफलोज्ज्वला।
आषाढे पूर्वपक्षे स्यात् गृहीत्वा वीजमुत्तमम् ॥१५॥
आहरेत्तिलवत्तैलं मुष्टिना चापि तत् पचेत्।
क्षीरतुल्य चतुर्थांश-माक्षिकं तैलशेषितम् ॥१६॥
ततस्तत् कोलकर्पूर-त्वग्जातीफलमिश्रितम्।
स्निग्धभाण्डगतं धान्येष्वनुगुप्तं निधापयेत् ॥१७॥
पिबेत् सूर्य्योदये तैलात् पलं याति विसञ्ज्ञताम्।
ततः संज्ञा शनैर्लब्ध्वा ततः क्रन्दति रोदिति ॥१८॥
एव मासे श्रुतिधरः परस्मिन् सूर्य्यसन्निभः।
तृतीये पूज्यते देवैश्चतुर्थे नैव दृश्यते ॥१९॥
खेचरः पञ्चमे षष्ठे सिद्धैर्मिलति सप्तमे।
विष्णो. सप्तदिनं जीवेज्जीवन्मुक्तोऽष्टमे भवेत् ॥२०॥

पिप्पल्यादि रसायने—मागधिका पिप्पली। विडङ्गसार. विडङ्गतण्डुल। हेम स्वर्णम्। अनवलीढदेहकान्ति. अनवलीढ अनास्वादित., अस्पृष्ट इत्यर्थ, देहकान्तिर्यस्य तथाविध सन्। समा शत शत वत्सरान् ॥ १४ ॥

अष्टमासिक-रसायने—ज्योतिष्मती स्वनामख्यातलताविशेष., "लताफटकी" इति ख्यातम्। पीता पीतवर्णा। पीतफलोज्ज्वला पीतेन पीतवर्णेन परिणतेनेत्यर्थ, फलेन उज्ज्वला। आषाढे पूर्वपक्षे आषाढशुक्लपक्षे। मुष्टिना इत्यस्य गृहीत्वा इत्यनेन सम्बन्ध, मुष्टिकरणकेन गृहीत्वेत्यर्थ। क्षीरतुल्य तैलसम दुग्धम्। चतुर्थांशमाक्षिक तैलपादिक-सुवर्णमाक्षिककल्कमित्यर्थं। तैलशेषित तैलावशेषम्। कोल कोलमानम्, कश्चित् बदरफलम् इत्याह। त्वक् गुडत्वक्। कर्पूरादिद्रव्याणा प्रत्येक कोलप्रमाण ग्राह्यम। अनुगुप्त सुरक्षितम्। क्रन्दति चीत्कार करोति। परस्मिन् द्वितीये मासे। नैव दृश्यते औषधप्रभावेण रसायनसेवी अन्यैरदृश्यो भवति इत्यर्थ.। आषाढशुक्लपौर्णमास्या

अथ त्रिवार्षिकं रसायनम्।—

भूमावरत्निमात्रायां ताम्रं तैलेन पूरयेत्।
षण्मासं तापयेदूर्द्ध्वं मृदुना तुषवह्निना॥
पीत्वा माषादिनिष्क्रान्तं तत्त्रिवर्षान्महाकवि.॥२१॥

अथ षष्ट्यधिकत्रिशतवर्षायुष्कर-रसायनम्।—

तैलप्रस्थं घृतप्रस्थं चतुष्प्रस्थं पयः पचेत्।
द्विप्रस्थशेषं तत् पीत्वा मासं त्रिपुरुषायुषः॥२२॥

अथ सहस्रवर्षायुष्कर-रसायनम्।—

तैलं पिबेद्घृतक्षौद्र-क्षीरान्यतममिश्रितम्।
कुर्य्याच्च तैलमध्वाज्यैर्नस्यं क्षीरघृताशिनः॥
भुक्त्वा शतायुः षण्मासात् सहस्रायुर्भवेन्नरः॥२३॥

परिणतज्योतिष्मतीफलात् उत्तमं बीजं मुष्टिना गृहीत्वा तिलवत् प्रपीड्य च तैलं निष्काशयेत्, ततः पादांशमाक्षिकेण कल्केन समक्षीरेण चतुर्गुणजलेन च तत्तैलं पचेत्, शीतीभूते च तस्मिन् कौलादिचूर्णं निक्षिप्य पादिकं प्रक्षिप्य स्निग्धभाण्डे संस्थाप्य च धान्यराशौ निधापयेत्, प्रतिदिनं प्रातः तस्मात् पलं पिबेच्चेति॥ १५—२०॥

त्रिवार्षिकं रसायने—अरत्निमात्रायां प्रसारितकनिष्ठाङ्गुलिमुष्टिप्रमाणेन खनितायामित्यर्थः, भूमौ भूम्यधः ताम्रं ताम्रपात्रम्। तैलेन तिलतैलेन ज्योतिष्मतीतैलेन वा। माषादिनिष्क्रान्तं माषमात्रादारभ्य शाणमानं यावत्। अरत्निमितगर्त्तमध्ये तिलतैलपूर्णं ज्योतिष्मतीतैलपूर्णं वा ताम्रपात्रं निधाय मृत्तिकादिना उपरिभागमावृत्य च स्थापयेत्, तदुपरि च मृदु तुषाग्निं षण्मासं यावत् ज्वालयेत्, षण्मासान्ते च उद्धृत्य माषमात्रमारभ्य क्रमवृद्ध्या चतुर्माषं यावत् वर्षत्रयं सेवेत इति॥ २१॥

षष्ट्यधिकत्रिशतवर्षायुष्कर-रसायने—द्विप्रस्थशेषं ततः पीत्वा मासं मासेन प्रस्थद्वयं तत् यमकं पीत्वा त्रिपुरुषायुषः त्रयाणां पुरुषाणां समाहारः त्रिपुरुषं तादृशम् आयुः यस्य तथाविधः, पुरुषायुस्तु पञ्चदिनाधिकसविंशतिवर्षशतं, यदुक्तमायुर्निरूपणे वराहाचार्य्येण—"समाः षष्टिर्द्विघ्ना मनुजकरिणां पञ्च च निशा" इत्यादि, एवञ्च त्रिपुरुषायुष-शब्देन दिनपञ्चदशाधिकसषष्टवर्षशतत्रयं भवति, एतद्रसायनसेवी तादृशायुषो भवेदित्यर्थः। अकल्कामदम्॥ २२॥

सहस्रवर्षायुष्कर-रसायने—भुक्त्वा भोजनानन्तरं घृताद्यन्यतममिश्रितं तैलं पिबेत्,

अथ त्रिफला रसायनम् ।—

मधुकेन तुगाक्षीरी पिप्पली क्षौद्रसर्पिषा ।
विडङ्गपिप्पलीभ्याञ्च त्रिफला लवणेन च ॥२४॥
संवत्सरप्रयोगेण स्मृतिमेधाबलप्रदा ।
भवत्यायुष्प्रदा पुंसां जरारोगनिवर्हणी ॥२५॥

अथ द्वितीयत्रिफला-रसायनम् ।—

खदिरासनभृङ्गसातला-क्रिमिशत्रूदकभाविता मुहुः ।
गुडमाक्षिकसर्पिरन्विता त्रिफला हन्ति जराञ्च वत्सरात् ॥२६॥

अथ तृतीयत्रिफला-रसायनम् ।—

त्रिफलामसनोदकेन पिष्टा रजनीपर्युषितामयःकपाले ।
मधुरां मधुना लिहन् हिनस्ति स्थविमानं जरसं गदांश्च सर्वान् ॥
॥२७॥

तैलमध्वाज्ये मिलिते, नस्यञ्च कुर्व्वीत क्षीरघृताभ्यां तदा भोजयेञ्च । "क्षीरघृताशिन" इत्यत्र "क्षीरघृताशन" इति पाठः साधुः ॥२३॥

त्रिफला रसायने—"तुगाक्षीरी पिप्पली" इत्यत्र "तु गोक्षीरे पिप्पल्या" इति पाठान्तरम् । अत्र त्रिफला इति पदं मधुकेन इत्यादिभिः षड्भिः पृथक् सम्बध्यते, वाग्भटोक्तत्रिफलारसायनेन सह सादृश्यदर्शनात्, यदाह वाग्भटः,—"मधुकेन तुगाक्षीर्य्या पिप्पल्या लवणेन च । पृथग्लोहैः सुवर्णेन वचया मधुसर्पिषा ॥ सितया वा समायुक्ता समा युक्ता रसायनम् । त्रिफला सर्वरोगघ्नी मेधायुःस्मृतिबुद्धिदा ॥" इति । एवञ्च मधुकेन त्रिफला इत्येकः, तुगाक्षीरी त्रिफला इति द्वितीयः, पिप्पली त्रिफला इति तृतीयः, क्षौद्रसर्पिषा त्रिफला इति चतुर्थः, विडङ्गपिप्पलीभ्यां त्रिफला इति पञ्चमः, लवणेन च त्रिफला इति षष्ठः इति षड् योगाः ॥ २४।२५ ॥

द्वितीयत्रिफला रसायने—असनः पीतशालः, भृङ्गः भृङ्गराजः, सातला चर्मकषा, क्रिमिशत्रुः विडङ्गः, एषामुदकेन क्वाथेन भाविता । मुहुः सप्तवारानित्यर्थः । खदिरादीनां क्वाथेन भाविता त्रिफला गुडमध्वाज्यैः संवत्सरं लेहयेदिति ॥२६॥

तृतीयत्रिफला-रसायने—अयःकपाले लौहपात्रे । मधुरां मधुना मधुना मधुरीकृतामित्यर्थः । स्थविमानं स्थौल्यम् । असनक्वाथेन पिष्टा त्रिफला लौहपात्रे

अथ षडङ्ग-रसायनम्।—

कान्ताभ्रकशिलाधातु-विषसूतकमाक्षिकम्।
शीलितं मधुसर्पिर्भ्यां व्याधिवार्द्धकमृत्युजित्॥२८॥

अथ वार्षिक रसायनम्।—

गन्धं लौहं भस्म मध्वाज्ययुक्तं सेव्यं वर्षं वारिणा त्रैफलेन।
शुभ्रे केशे कालिमा दिव्यदृष्टिः पुष्टिर्वीर्य्यं जायते दीर्घमायुः॥
॥२९॥

अथ कुष्ठादिहर रसायनम्।—

नीलज्योतिः कान्तचूर्णं रुदन्ती-धात्रीपत्रैर्वारिणा त्रैफलेन।
मध्वाज्याभ्यां वत्सरार्द्धप्रयोगात् कुष्ठं शुभ्रं रोमजातं निहन्ति॥
॥३०॥
देहे दार्ढ्यं दिव्यदृष्टिः सुपुष्टि-वीर्य्यं शौर्य्यं जायते दीर्घमायुः॥
॥३१॥

रजनीं वासयेत्, प्रभाते प्रभूतमधुना तामालोड्य लिह्याच्च। मात्रा चाग्निबलापेक्षिणी कर्त्तव्या॥ २७॥

षडङ्ग-रसायने—कान्तं कान्तलौहम्। शिलाधातु शिलाजतु, रसायनत्वात्। विषम् अमृतम्॥ २८॥

वार्षिक-रसायने—लौहं भस्म भस्मलौहम्। शुद्धगन्धक लौहचूर्णञ्च समभाग मध्वाज्याभ्यां सम्मर्द्य त्रिफलाक्वाथेनालोड्य च वर्षं यावत् पिबेत्। शुभ्रे केशे कालिमा केशकार्ष्ण्यम्॥ २९॥

कुष्ठादिहर-रसायने—नीलज्योति तुत्थकम्। कान्तचूर्णं कान्तलौहचूर्णं तच्च मारितपुटित ग्राह्यम्। रुदन्ती—"चणपत्रसम पत्र क्षुपश्चैव तथाविध। शैशिरे जलविन्दूनास्रवन्तीति रुदन्तिका॥" इत्युक्तलक्षणा उत्कलादौ स्वनामख्याता, धात्रीपत्राणि आमलकपत्राणि ते सह क्वाथेन त्रैफलेन वारिणा रुदन्ती धात्रीपत्र-त्रिफलाना क्वाथेन। शुभ्र रोमजातं शुक्लरोम श्वित्र पलित वा। "रोमजातम्" इत्यत्र "रोगजातम्" इति पाठे—शुभ्र कुष्ठं श्वित्रकुष्ठम्॥ ३०।३१॥

अथ ज्योतिष्मतीतैल-रसायनम् ।—

ज्योतिष्मत्यास्तैलमाज्यं सगन्धं गुञ्जावृद्ध्या सेवयेन्माषमात्रम् ।
यावच्च स्वादयस्तु स प्राप्य मूर्त्तिं मेधायुक्तो दिव्यदृष्टिर्नियक्ष्मा ॥
॥३२॥

अथ सर्वरोगान्तक रसायनम् ।—

कान्ताभ्रत्रिफलाविडङ्गरजनी-ताप्याब्ददेवद्रुम-
व्योषैलाग्निपुनर्नवाद्रिगिरिजाङ्कोलैः समं गुग्गुलुम् ।
पिष्ट्वा भृङ्गजलेन सूक्ष्मगुलिकां खादेद्यथासात्म्यतो
मेदःश्लेष्मसमीरणोल्वणगदेष्वन्येषु वा पूरुषः ॥३३॥

अथ कान्त-रसायनम् ।—

कान्तं तुल्याभ्रसत्त्वं चरणपरिमितं हेम तत्तुल्यमर्कं
वैक्रान्तं ताप्यरूप्यं क्रिमिहरकटुकैस्तुल्यभागैः समेतम् ।
लीढं देवद्रुतैलैर्विरचयति नृणां देहसिद्धिं समृद्धां
पथ्यं कल्योक्तभुक्तं हरति च सकलान् रोगपूगान् अथेन ॥३४॥

तदेतत् सर्वरोगघ्नं रम्यं कान्तरसायनम् ।
सेव्यं वृष्यं सुपुत्रीयं मङ्गल्यं दीपनं परम् ॥३५॥

ज्योतिष्मतीतैल रसायने—ज्योतिष्मत्यास्तैलं प्रागुक्तदिशा ग्राह्यम् । सगन्धं तुल्यगन्धकसहितम्, एवञ्च तैलाज्यगन्धानां समभागः । गुञ्जावृद्ध्या सेवयेन्माषमात्रं गुञ्जैकमारभ्य प्रतिदिनं गुञ्जामानेन वर्द्धयित्वा द्वादशगुञ्जा यावत् खादेत्, ततः वर्षमर्द्धवर्षं वा तेनैव मानेन खादेत् । "मूर्त्तिं" इत्यत्र "मूर्त्तिम्" इति साधु कथनम्, मूर्त्तिं प्राप्य शोभनं रूपमासाद्येत्यर्थः । नियक्ष्मा नीरोगः ॥ ३२ ॥

सर्वरोगान्तक रसायने—अद्रिगिरिजं अद्रिजं गिरिजञ्च, तत्र अद्रिजं शिलाजतु गिरिजं गैरिकं । गुग्गुलुरत्र सर्वचूर्णसमः । भृङ्गजलेन भृङ्गराजरसेन । यथासात्म्यतः अग्निबलं विविच्येत्यर्थः ॥ ३३ ॥

कान्त-रसायने—तुल्याभ्रसत्त्वमिति पदं कान्तमित्यनेन सहान्वेतव्यम् । चरणपरिमितं हेम लौहचतुर्थांशं सुवर्णभस्म । तत्तुल्यमर्कं स्वर्णतुल्यं जीर्णताम्रम् । वैक्रान्तताप्यरूप्याण्यपि प्रत्येकं स्वर्णतुल्यानि । क्रिमिहरकटुकैः विडङ्गकटुत्रयचूर्णैः, तुल्यभागैः

अथ चतुर्थत्रिफला रसायनम्।—

रात्रौ कान्तशरावके त्रिकफला भिन्ना जलैः स्वादुभिः
प्रातर्मुष्टिमिता खलु प्रतिदिनं षण्मासमासेविताः।
हन्युः पित्तकफामयान् बहुविधं कुष्ठं प्रमेहांस्तथा
पाण्डुं यक्ष्मगदञ्च कामलगदं पथ्यञ्च तक्रं तथा॥२६॥

अथ द्वितीयकान्त रसायनम्।—

त्रिफलामस्तुसंयुक्तं कान्तं सर्वरसायनम्॥२७॥

अथ तृतीयकान्त-रसायनम्।—

एतत् स्वादपुनर्भवं हि भसितं कान्तस्य दिव्यामृतं
सम्यक्सिद्धरसायनं त्रिकटुकीविडङ्गाज्यमध्वन्वितम्।
हन्यान्निष्कमितं जरामरणजव्याधींश्च सत्पुत्रदं
प्रोक्तं श्रीगिरिशेन कालयवनोद्भूत्यै पुरा तत्त्वितुः॥२८॥

कान्तभागिकैरित्यर्थः। देवद्रुतैलैः देवदारुतैलैः। कल्कीकृतमुक्त पञ्चमाषलौह-कल्कीकृतभोज्यम्। रोगपूगान् रोगसमूहान्॥२४।२५॥

चतुर्थत्रिफला रसायने—कान्तशरावके कान्तलौहभाजने। त्रिकफला त्रिफला। केचित्तु "त्रिकफला" इत्यत्र "सुचणका" इति पठन्ति, परन्तु त्रिफलायां मेहकुष्ठपाण्डुकामलापित्तकफादिहरगुणसद्भावात् चणके तु कुष्ठयक्ष्मादिहरगुणस्यादृष्टत्वाच्च स पाठः न मनोरमतया प्रतिभाति। भिन्ना चूर्णिविरहिता, "सुचणका" इति पाठे—भिन्ना विदलिता। जलैः स्वादुभिरित्यत्र उषिता इति शेषः। मुष्टिमिता, पलमिता अन्तर्नखमुष्टिमिता वा॥२६॥

द्वितीयकान्त-रसायने—मस्तु दधिमस्तु, "मस्तु" इत्यत्र "मधु" इति पाठान्तरम्। कान्तं कान्तलौहं, तच्च मारितपुटितं ग्राह्यं, त्रिफलाचूर्णसमं लौहं मस्तुना पातव्यमिति॥२७॥

तृतीयकान्त रसायने—अपुनर्भवं पुनरुत्थानरहितं निरुत्थीकृतमित्यर्थः। दिव्यामृतं देवानां यथा अमृतं तथा गुणकारकमित्यर्थः। त्रिकटुकीति।—मिलितत्रिकटु-विडङ्गचूर्णतुल्यं लौहचूर्णं मध्वाज्याभ्यां लिह्यात, त्रिकट्वाद्यन्वितं निष्कमितम् अपुनर्भवं कान्तस्य भसितं जरादिकं हन्यात् सत्पुत्रदञ्च, भवेदिति शेषः। दिव्यामृत

अथ कान्ताभ्रक रसायनम् ।—

सिद्धमभ्रं सम कान्तं मर्दयेदार्द्रवारिणा ।
कलाश हेमचूर्णस्य वीजपूररसे पुनः ॥३९॥
मर्दयेत् खल्लमध्यस्थ यावत् सप्तदिनावधि ।
आटरूषरसेनैव तथा मुण्डीरसेन च ॥४०॥
तालमूलीरसेनैव दशमूलीरसेन वा ।
तत्तद्रोगहरैः क्वाथैर्भावयेत् सप्तधा भिषक् ॥४१॥
त्रिफलाव्योषचूर्णञ्च मध्वाज्याभ्यां प्रयोजयेत् ।
पञ्चकर्मविशुद्धेन सेव्यमेतद्रसायनम् ॥४२॥
पाण्डुशोफोदरानाह-ग्रहणीशोषकासजित् ।
सन्तत सततञ्चैव पुराण विषमं ज्वरम् ॥४३॥
निहन्यात् सर्वकुष्ठानि प्रमेहान् विंशतिं जयेत् ।
कान्ताभ्रकमिदं श्रेष्ठं रसायनमनुत्तमम् ॥४४॥

अथ पाठादिघृतम् ।—

पालाशोलूखले तन्मुसलवियुजि विमर्दोद्धृतैराढकांशै-
र्मिश्र ब्राह्मीरसैस्तैर्विधिवदिह पचेत् प्रस्थमात्र गवाज्यम् ।
पाठाधात्रीहरिद्रात्रिवृदुपरचितेनापि कल्केन सिद्ध
यो वा कीटारिकृष्णासलवणजटिलाभिर्विलीढः सदा स्यात् ॥४५॥

सम्यक् सिद्धरसायनमेतत् पुरा कालयवनीद्भूत्यै तत्पितु श्रीगिरिशेन प्रोक्त स्यादिति योजना कार्या । व्याख्यातोऽय श्लोक प्राक् लौहनिरूपणाख्यपञ्चमाध्याये ॥३८॥

कान्ताभ्रक-रसायने—सिद्ध पुटनादिमृतम् । कलाश हेमचूर्णस्य अर्थात् षोडशांश सुवर्णभस्म । आटरूषरसेन वासकस्वरसेन । तत्तद्रोगहरै यस्मिन् यस्मिन् रोगे प्रयोज्य तदर्थं तत्तद्व्याधिनाशनद्रव्यकृतैरित्यथ । त्रिफलाव्योषचूर्णञ्च समुदायेनाभ्रसमम् ॥ ३९—४४ ॥

पाठादिघृते—पालाशोलूखले पलाशकाष्ठविरचितोलूखले, तन्मुसलवियुजि सुपरिष्कृते इत्यर्थ । विमर्दोद्धृते विमर्दात् पीडनात उद्धृते सद्गृहीते , "विमर्दोद्धृते."

सौकर्य्यः समरावान्मतिमतिविशदा पश्यतो मासमात्रा-
च्चातुर्य्यं सत्कवित्वं वरसकलकलाभिज्ञता प्राप्नुयात् सः ॥४६॥

अथ ताप्यादिवटक ।—

ताप्याभ्रकत्रिकटुतुत्थशिलाजकान्त-
मङ्कोल्ललोहमलटङ्कणसैन्धवञ्च ।
भृङ्गीरसेन वटकाश्च मसूरमात्रान्
खादेद्रसायनवरं सकलामयघ्नम् ॥४७॥

अथ कमलाविलासो रस ।—

लोहाभ्रौ बलिसूतहाटकमयस्तुल्य कुमारीरसे
पक्कैरण्डदलैर्निबध्य सुदृढं सद्धान्यराशौ त्र्यहम् ।
छित्वाहृत्य विचूर्णितं मधुवरा-युक्तं ययासात्म्यतः
कृष्णात्रेयविनिर्मित गदजरा-विध्वंसि सौख्यप्रदम् ॥४८॥
आज्ञासिद्धमिदं रसायनवर सर्वप्रमेहप्रणुत्
कासं पञ्चविध तथैव तनुगं पाण्डुञ्च हिक्कां व्रणम् ।
श्लेष्माणं पवन हलीमकगदं हन्याच्च मन्दानलं
कण्डूकुष्ठविसर्पविद्रधिमुखापस्मारमुख्यान् जयेत् ॥४९॥

इत्यत्र "विमर्दोद्धृते" इत्यपपाठ अर्थसङ्गतिविरहात् । आढकांशे ब्राह्मीरसे मिश्र-मित्यन्वय । कौटारि विडङ्ग । जटिला जटामांसी । "सौकर्य्य" इत्यत्र "सौकार्य्यम्" इति पाठ साधु, सौकर्य्यं कामनैपुण्यमित्यर्थः । ब्राह्मीरसाढकेन पाठादिकल्केन च पादिकेन सिद्ध घृतप्रस्थ विडङ्गादिचूर्णेन घृतात् पादिकेन सह संयोज्य नित्य लिह्यादिति ॥ ४५।४६ ॥

ताप्यादिवटके—शिलाज शिलाजतु । लोहमल मण्डूरम् ॥ ४७ ॥

कमलाविलासे—बलि गन्धक । हाटक स्वर्णम । अयस्तुल्यम् अभ्रादि-चतुष्टय प्रत्येक लौहतुल्यम्, "अय" इत्यत्र "पवि" इति कस्यचित् पाठ । पक्का सर्वं कुमारीरसेनामर्द्य स्वल्पाग्नौ किञ्चित् सन्ताप्य च इत्यथ, रौद्रपक्कं कृत्वा इत्यर्थो वा । "पक्कैरण्ड" इत्यत्र "पक्वैरण्ड" इति कस्यचित् पाठ । सद्धान्यराशौ उत्कृष्टधान्य

गोप्याद्गोप्यतरः सुखेन सुलभः सर्वत्र सिद्धो रसो
नाम्नाऽयं कमलाविलास इति सद्वैद्यस्य कीर्त्तिप्रदः ॥५०॥

अथ लक्ष्मीविलास ।—

वेदेन्दुनेत्राङ्गरसाङ्गभागा भूसूतगन्धोषणतिन्दुटङ्काः ।
भृङ्गार्द्रगुञ्जाजवनीनवाभिर्भाव्य त्रिशः स्वेद्यमदोऽर्कपत्रे ॥५१॥
लक्ष्मीविलासः स विशाललक्ष्मीं
तनौ तनोति त्वयिण. प्रयोगे. ॥५२॥

अथ नारिकेलपाक ।—

वाराहीमुषलीकन्द-कनकाहिखरस्तथा ।
वानरीफलसयुक्त चूर्णयित्वा पृथक् पृथक् ॥५३॥
कार्पासमज्जदुग्धेन उत्कालय्य यथाक्रमम् ।
भावनासप्तक दत्त्वा सूर्य्यतापे विशोषयेत् ॥५४॥

राशिमध्ये। वरा त्रिफला। तनुग सार्वदैहिकमित्यर्थं। "नाम्नाऽय कमला॰ विलास इति सद्वैद्यस्य कीर्त्तिप्रद" इत्यत्र "नाम्नाऽय कमलाविलासमहता वैद्यानू॰ यशस्कारक" इति पाठ अर्थसङ्गतिराहित्यात् न साधुतया प्रतिभाति। "वैद्याना कमलाविलासकरसोऽत्यन्त यशस्कारक" इति कस्यचित पाठ ॥ ४८—५० ॥

लक्ष्मीविलासे—वेदा चत्वार, इन्दु एक, नेत्राणि द्वौणि, अङ्गानि षट् रसा. षट्, अङ्गानि षड् भागा। भू मृत, सौराष्ट्रमृत्तिका इत्यर्थ, "सीसकम्" इति कश्चित्। ऊषण मरिचम्। तिन्दु तिन्दुक। टङ्का इत्यनन्तर ग्राह्या इति शेष। भृङ्ग भृङ्गराज, आर्द्र आर्द्रक, गुञ्जा रक्तिका, जवनी यमानी. नवा पुनर्नवा ताभि। अद एतद्भेषज भृङ्गादिरसै त्रिश भाव्य, तत अर्कपत्रे स्वेद्यम् अर्कपत्रेणावेष्ट्य करीषाग्नौ किञ्चित स्वेदयेदित्यर्थ ॥ ५१।५२ ॥

नारिकेलपाके—वाराहीमुषलीकन्द वाराहीकन्द मुषलीकन्दश्च, कनक धुस्तूर-बीजम, अहि सीसक, खर सुवर्णम, "खर" इत्यत्र "खरम्" इति पाठ साधु, "खर" इति पाठे—दुरालभा। वानरीफलसयुक्त शूकशिम्बीबीजसयुक्तम्। कार्पास-मज्जदुग्धेन कार्पासार्द्रबीजनिर्य्यासेन उत्कालय्य आर्द्रीकृत्य इत्यर्थ, "कार्पासमज्ज-दुग्धेन" इत्यत्र "कार्पासमज्जा दुग्धेन" इति पाठे—कार्पासमज्जा दुग्धेन उत्कालय्य

नारिकेलञ्च सम्पूर्य द्वारं रुद्ध्वा यथाविधि।
गोदुग्धेन तु तत्क्वाथ्य-षोडशद्वयमात्रत ॥५५॥
दर्व्या संवर्त्तित भाण्डे यथा दार्ढ्यं न याति च।
शीत चूर्णीकृतं पक्वमाज्येन प्रपचेन्नरः ॥५६॥
जातीफलं लवङ्गञ्च एलाचूर्णं विनिक्षिपेत्।
निष्पन्न शाणमात्रन्तु गृहीत्वा प्रपिबेत् पयः ॥५७॥
वातरोगाः प्रमेहाश्च बलक्षयस्तथोल्वणाः।
सप्तरात्रप्रयोगेण प्रशमं यान्ति सर्वतः ॥५८॥
वृद्धोऽपि तरुणत्वं स प्रहर्षति सदा नरः।
कौस्तुभाख्यं नारिकेलं गुरुणा परिकीर्त्तितम् ॥५९॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये रसायनविधिर्नाम षड्विंशोऽध्यायः ॥ २६ ॥

आवर्त्त्य तेन दुग्धेनेत्यर्थः। नारिकेलं वल्कल कपालविरहितं विमुक्तमुखावरण नारिकेलशस्यमित्यर्थः, तच्च सावरणावस्थाया यथा स्यात तथैव स्थापनीयम्, सम्पूर्य प्रपूर्य्य. वाराहीकन्दादिनेति शेष। तत्क्वाथ्यषोडशद्वयमात्रत तेषा क्वाथ्याना पाच्यानां सनारिकेलवाराहीकन्दादिचूर्णानां, चूर्णमपेक्ष्येत्यर्थः, षोडशद्वयमात्रत द्वात्रिंशद्गुण-प्रमाणेनेत्यर्थः। यथा दार्ढ्यं न याति यथा नात्यर्थं शुष्कीभवति दग्धीभवति वा। "वातरोगा प्रमेहाश्च बलक्षयस्तथोल्वणा" इत्यत्र "वातरोगान् प्रमेहाश्च बलक्षय-स्तथोल्वणान्' इति पाठ न साधु। परमार्थस्तु,—वाराहीकन्दादीना चूर्णं पृथक् पृथक् कार्पासबीजनिर्य्यासेन सप्त सप्त वारान् भावयित्वा आतपे शोषयेत्, तत समभाग तत् सर्वं गृहीत्वा वल्कल कपालरहितस्य यथावस्थितस्य उन्मुक्तमुखावरणस्य नारिकेलस्यान्त प्रपूर्य्य च मुखं निरोधयेत, तत औषधनारिकेलापेक्षया द्वात्रिंशद्गुणेन दुग्धेन सह तं नारिकेल दर्व्या मुहु सङ्घट्टयन् मृत्पात्रे तथा पचेत् यथा नात्यर्थं शोष गच्छेत न वा दग्धोभवेत। तत पक्व शीतञ्च त नारिकेल सौषध सञ्चूर्ण्य घृते भर्जयेत्, पाकावसाने जातीफलादिचूर्णं यथायोग्य प्रक्षिप्य स्थापयेच्च, तस्माच्च प्रतिदिन शाणमान भुक्त्वा क्षीरानुपान कुर्य्यादिति ॥ ५३—५९ ॥

इति रसरत्नसमुच्चयबोधिन्यां षड्विंशोऽध्याय ॥ २६ ॥

अथ सप्तविंशोऽध्यायः ।

अथ वाजीकरणम् ।—

अथ वाजीकरणस्य गुणा ।—

वाजीकरणमन्विच्छेत् सततं विषयी पुमान् ।
पुष्टिस्तुष्टिरपत्यञ्च गुणवत्तत्र संस्थितम् ॥ १ ॥

अथ वाजीकरणस्य निरुक्तिः ।—

वाजीवातिबलो येन यात्यप्रतिहतोऽङ्गनाः ।
तत् वाजीकरणं विद्धि देहस्यौजस्करं परम् ॥ २ ॥

स्वस्थस्यौजस्करत्वसामान्यात् रसायनानन्तरं वाजीकरणं बुवुर्षुः प्रथमं तस्य प्रयोजनीयतामाह, वाजीति।—विषयी विषया स्रक्चन्दनवनितादयः, ते अस्य सन्तीति तादृशः विषयोपभोगशीलः पुमान् सततं वाजीकरणं वाजः शुक्रं सोऽस्यास्तीति वाजी, अवाजो वाजी क्रियते येन तत् , यद्वा—वाजः मैथुनं मैथुन-शक्तिरित्यर्थः, सोऽस्यास्तीति वाजी, अवाजी मैथुनशक्तिविरहितः वाजी मैथुनशक्तियुतः क्रियते येन तत् , उक्तञ्च हारीतेन—"वाजो नाम प्रकाशत्वात् तच्च मैथुनसञ्ज्ञितम् । वाजीकरणसञ्ज्ञाभिः पुस्त्वमेव प्रचक्षते ॥" इति। चरकेऽपि तु—"येन नारीषु सामर्थ्यं वाजीव लभते नरः। व्रजेच्चाभ्यधिकं येन वाजीकरणमेव तत् ॥" इत्युक्तम् , एवञ्च वाजीकरणं वाजीकरणयोगमित्यर्थः, अन्विच्छेत् सेवेत, तत्र वाजीकरणे पुष्टिः मांसोपचयः, तुष्टिः सन्तोषः, गुणवत् सर्वगुणाढ्यम् अपत्यं न पतति वंशो येन जातेन तत्, सन्तानमित्यर्थः, संस्थितम् अवस्थितं, नित्यं वाजीकरणौषधसेवनेन देहपोषणं प्रमदासु अप्रतिहतशक्तिमत्तया मनसः प्रीतिबाहुल्यं रूपशौर्यादिगुणाढ्यमपत्यञ्च जायते इत्यर्थः ॥ १ ॥

वाजीकरणसञ्ज्ञाया, बीजमाह, वाजीवेति।—वाजीव अश्व इव। येन औषधेन इत्यर्थः ॥ २ ॥

अथ शुक्रक्षयस्य निदानम् ।—

शुक्रन्तु चिन्ताव्यायाम-व्याधिभिर्देहकर्षणात् ।
क्षयं गच्छत्यनशनात् स्त्रीणाञ्चातिनिषेवणात् ॥ ३॥

अथ वाजीकरणयोगोपदेशे प्रतिज्ञा ।—

तस्मात् प्रयोगान् वक्ष्यामि दुर्बलानां बलप्रदान् ।
सुखोपयोगात् बालाना भूयश्च बलवर्द्धनात् ॥ ४॥

अथ वाजीकरणप्रयोगे पूर्वकृत्यम् ।—

शुद्धकायो यथापक्ति वृष्ययोगान् प्रयोजयेत् ॥ ५॥

अथ मधुकप्रयोग ।—

कर्षं मधुकचूर्णस्य घृतक्षौद्रसमन्वितम् ।
पयोऽनुपान या लिह्यान्नित्यवेग. सदा भवेत् ॥ ६ ॥

क्षीणशुक्र पुमान् स्त्रीषु दुर्बलो भवति, अत एव शुक्रक्षयस्य कारणपरिहाराय तन्निदानमाह, शुक्रमिति ।—स्पष्टम् ॥ ३ ॥

वाजीकरणस्य प्रयोजनान्तरोक्तिसहित तत्प्रयोगोपदेशं प्रतिजानीते, तस्मादिति ।—"सुखोपयोगात् बालाना भूयश्च बलवर्द्धनात्" इति पाठ न मनोरम', बालाना वाजीकरणयोगानर्हत्वात्, तथा "बालानाम्" इति कण्ठोक्त्या यूना वृद्धानाञ्च बलकरत्वाभावप्रसङ्गाच्चेति । चरके तु—"सुखोपभोगान् बलिना भूयश्च बलवर्द्धनान्" इति पाठ दृश्यते, सुखोपभोगान् सुखेन उपभोगो ये तान् ये योगे उपभोग-शक्तिर्वर्द्धते तानित्यर्थ, बलिना भूयश्च बलवर्द्धनान् न केवल दुर्बलाना बलप्रदान्, बलिनोऽपि यदि सेवन्ते तदा तेऽपि विशिष्टबलवन्तो भवन्तीत्यर्थ ॥ ४ ॥

वाजीकरणयोगप्रयोगे पूर्वकृत्यमाह, शुद्धकाय इति ।—शुद्धकाय' वमन-विरेचनादिपञ्चकर्मणा संशोधितदेह, यथापक्ति पक्ति परिपाकशक्तिम् अनतिक्रम्य, अग्निबलादिकमपेक्ष्येत्यर्थ, वृष्ययोगान् वृषाय कामुकाय हित वृष्य तादृशान् योगान् ॥ ५ ॥

मधुकप्रयोगे—"सदा" इत्यत्र "स ना" इति चरकसम्मत पाठ मनोरम', सदा नित्यशब्दयोरेकार्थकयोरेकत्र प्रयोगस्य पुनरुक्तिदुष्टत्वात् । ना पुरुषः ॥ ६ ॥

अथ शृङ्गीप्रयोग ।—

कुलीरशृङ्ग्या यः कल्कमालोड्य पयसा पिबेत् ।
सिताघृतपयोऽन्नाशी स नारीषु वृषायते ॥ ७ ॥

अथ स्वयङ्गुप्तादिचूर्णम् ।—

स्वयङ्गुप्तेक्षुरकयोर्बीजचूर्णं सशर्करम् ।
धारोष्णेन नरः पीत्वा पयसा रासभायते ॥८॥

अथ तिलप्रयोग ।—

बस्ताण्डसिद्धे पयसि भावितानसकृत्तिलान् ।
यः खादेत् ससितान् गच्छेत् स स्त्रीशतमपूर्ववत् ॥९॥

अथ सिन्दूररस ।—

गन्धकेन समं सूतं श्वेताङ्कोल्लजटारसैः ।
त्रिदिनं मर्दितं तेन रसेन गुटिकीकृतम् ॥१०॥
रक्तचित्रककाराङ्गी-पत्रनिर्यासपेषिते ।
सद्योहताजमांसस्य पिण्डे न्यस्य विपाचितम् ॥११॥
तप्ततैले मज्जयेत यावत् सिन्दूरसन्निभम् ।
भक्षयेत् मधुसर्पिर्भ्यां गोक्षीरञ्च पिबेदनु ॥१२॥

शृङ्गीप्रयोगे—कुलीरशृङ्ग्या कर्कटशृङ्ग्या ॥ ७ ॥

स्वयङ्गुप्तादिचूर्णे—स्वयङ्गुप्ता शूकशिम्बी । इक्षुरक कोकिलाक्ष । रासभायते रासभ गर्दभ इव आचरति गर्दभवत रतिशक्तिसम्पन्नो भवतीत्यर्थं ॥ ८ ॥

तिलप्रयोगे—बस्ताण्डसिद्धे छागाण्डसिद्धे पयसि, तच्च क्षीरपरिभाषया साधितव्यम, यद्यपि क्षीरेण सह वत्समांसस्य विरोध तन्त्रकृद्भि' प्रोक्त, तथाऽपि तद्विशेषवचनम् इदन्तु बस्ताण्डविषयतया विशिष्टत्वेन पुनरुत्सर्गापवादरूप न विरुणद्धीति मन्तव्यम् । असकृत सप्तवारान् । स्त्रीशतमिति बहुकान्तोपलक्षणम् । अपूर्ववत पूर्वमकृतस्त्रीसम्भोगवत ॥ ९ ॥

सिन्दूररसे—श्वेताङ्कोल्लजटारसै श्वेताङ्कोठमूलरसै. । तेन रसेन अङ्कोल्लमूल-

स्त्रियः सेवेत तत्त्यागे यतः स्फुटति लोचनम्।
न क्रामति रसञ्चास्मिन् क्रान्ते स खलु मन्मथः॥१३॥

अथ कामकलाख्यरसः।—

मुषलीकदलीकन्द-वाजिगन्धाकशेरुकैः।
मर्दितं हेमसूताभ्रं मूषास्थं पुटपाचितम्॥१४॥
शाल्मलीचूर्णसंयुक्तं वासराण्येकविंशति।
भक्षयित्वा चतुर्माषं गव्यं क्षीरं पिबेदनु॥१५॥
सर्वाङ्गोद्वर्त्तनं कुर्य्यात् सयवैः शाल्मलीरसैः।
अन्वहं मधुराहारः सहस्रं रमते स्त्रियः॥१६॥

अथ कामदेवः।—

हेमपादयुतः सूतो मर्दितः शाल्मलीरसैः।
कदलीकन्दनिर्य्यासे क्षीरेक्षुरसगोघृते॥१७॥

रसेन। वाराही वाराहीकन्दः। स्त्रिय इति बहुवचननिर्देशः बहुनारीसम्भोगज्ञापकः। तत्त्यागे स्त्रीगमने अकृते। तत्त्यागे यतः लोचनं स्फुटति, अतः स्त्रियः सेवेत इत्यन्वयः। नेति।—रसम् इमं रसं, भेषजमिदमित्यर्थः, न क्रामति नातिक्रमितुं समर्थं भवति, किमपि भेषजमिति शेषः, अन्यत् किमपि भेषजं नानेन तुल्यं वीर्य्यवत् भवतीत्यर्थः। अस्मिन् रसे क्रान्ते अवचारिते स रसक्रामी पुमान् मन्मथः खलु काम एव, द्वितीयः काम इव रूपादिसम्पन्नः भवतीत्यर्थः॥१०—१३॥

कामकलाख्यरसे—मुषली तालमूली। मुषल्यादीनां प्रत्येकरसेनैकैकदिनमर्दितं हेमसूताभ्रं मूषायां संस्थाप्य पुटपाकं कुर्य्यात, ततः माषचतुष्टयमौषधं शाल्मलीचूर्णेन एकविंशति दिनानि सेवेत क्षीरानुपानञ्च कुर्य्यात्। किञ्च औषधभक्षणकाले शाल्मलीमूलरसपिष्टयवचूर्णेन उद्वर्त्तनं कुर्य्यादिति। रसरत्नाकरे अस्य किञ्चित पाठवैषम्यं दृश्यते, तथा च—"मृतसूताभ्रकं स्वर्णं वाजिगन्धामृतारसैः। मुषलीकदलीकन्द द्रवैस्तु मर्दयेद्दिनम्॥ रुद्ध्वा लघ्वग्निना पच्यात मर्द्यं पूर्वोक्तके द्रवे। पुटं देयं पुनर्मर्द्यमेवमष्टपुटे पचेत॥ शाल्मलीजातनिर्य्यासे चतुर्माषञ्च भक्षयेत। गोक्षीरैः मर्कटीबीजं पलार्द्धं पाययेदनु॥ रसः कामकलाख्योऽयं रमते स्त्री सहस्रधा। सर्वाङ्गोद्वर्त्तनं कुय्यात् सयवैः शाल्मलीरसैः॥" इति॥१४—१६॥

कामदेवे—हेम्न. पादेन सूताच्चतुर्थांशेन युत., तेन भस्मसूतस्यैको भागः स्वर्णस्य च

माचिके चासकृत् स्विन्नः शाल्मलीक्षीरगोक्षुरैः।
शर्करामलकद्राक्षा-मुषलीमाषमाक्षिकैः ॥१८॥
युक्तो रम्भाफलद्रुत्या कामदेव इति स्मृतः।
सेवनादूर्द्धलिङ्गः स्याद्द्रावयेद्वनिताशतम् ॥१९॥

अथ मदनसुन्दरः।—

गन्धकेन रसः पिष्टः कह्लाररसमर्दितः।
विपक्वो वालुकायन्त्रे वृष्यो मदनसुन्दरः ॥२०॥

चतुर्थांशो ग्राह्य। असकृत् सप्तधा स्विन्न सन्तप्तकदलीकन्दनिर्यासादौ निक्षेपात् क्वतस्वेद पक्व इत्यर्थ। शाल्मलीक्षीरगोक्षुरै इत्यत्र शाल्मली च क्षीरञ्च गोक्षुरश्च ते ते इति विग्रह, न तु शाल्मल्या क्षीरञ्च गोक्षुरश्च इति। रम्भाफलद्रुत्या आम-कदलीफलरसेन। अयमर्थ,—हेमसूतौ यथोक्तमानौ शाल्मलीरसेन दिनैक मर्दयित्वा पिण्ड कुर्य्यात्, तत सुशुष्क त सन्तप्ते कदलीकन्दनिर्य्यासे निक्षिपेत्, शीतीभूते च निर्य्यासे उद्धृत्य संशोष्य प्रक्षाल्य च पुनरन्यस्मिन् तादृशे निर्य्यासे निक्षिपेत्, एव सप्तवारान् कुर्य्यात्, तत पूर्वोक्तविधानेन क्षीरे इक्षुरसे गोघृते मधुनि च निक्षिपेत्। यद्यपि मधु उष्णविरोधि न सन्तापमर्हति विषवदपकारकत्वात्, तथाऽपि उत्तरकाल शाल्मल्यादिद्रव्यान्तरसंयोगात् संयोगशक्तेरचिन्त्यत्वाच्च नेदमौषध विरुद्ध-गुणमावहति। तत तदौषध पुन संशोष्य प्रक्षाल्य विचूर्ण्य च शाल्मल्यादिद्रव्याणा सूतभागिकाना चूर्णं क्षीरक्षौद्राभ्याञ्च तुल्याभ्या सन्नीय आमनीचफलद्रवेण गुटिका कुर्य्यादिति ॥ १७—१९ ॥

मदनसुन्दरे—रसगन्धकयो समभागता। कह्लाररसमर्दित रक्तोत्पलरसमर्दितः, मर्दनञ्च दिनत्रय कर्त्तव्य रसेन्द्रसारसंवादात, तत्र च "अनङ्गसुन्दररस" इति नाम्ना प्रसिद्धोऽय योग वालुकायन्त्रे पाकानन्तर पुन रक्तपुष्पवक श्वेतपद्मरसाभ्या-मेकैकभावनया निष्पादनीय इत्युपदेश दृश्यते, तथा च—"शुद्धसूत सम गन्ध त्र्यहं कह्लारकद्रवे। मर्दित वालुकायन्त्रे याम सम्पुटके पचेत ॥ रक्तागस्त्यद्रवैर्भाव्य दिनैकन्तु सिताम्बुजे। यथेष्ट भक्षयेच्चानु कामयेत् कामिनीशतम् ॥" इति। तथा भैषज्यरत्नावल्या "कामिनीमदभञ्जन" इति नाम्ना प्रसिद्धेऽस्मिन् रक्तवर्गोक्तद्रव्याणा रसे, दिनैक भावना शर्करया सह भक्षणञ्च कार्य्यमित्युपदेशश्च कृत.। तत्र च

अथ पूर्णचन्द्रः ।—

कामदेव इह सोच्चटारसो रक्तपुष्पमुनिसारभावितः ।
पूर्णचन्द्र इति विश्रुतो रसः प्राणिनां चरमधातुपूरकः ॥२१॥
रहस्यं कुसुमास्त्रस्य शृङ्गारस्याधिदैवतम् ।
कार्मणं सुदृशामूचे रसत्रयमिदं हर ॥२२॥

अथ मदनसुन्दरः ।—

मासार्द्धमात्रं हरजं विमर्द्य रसेन मोचस्य रसेन तेन ।
त्रिःसप्तसङ्ख्यानि दिनानि गन्धं तत्सम्मितं गोघृतमध्यपक्वम् ॥२३॥
विभाव्य तेनैव विशोध्य युञ्ज्यात् काचस्थयोर्नागलतादलेन ।
तयोर्विमर्द्याथ निषेव्य दुग्धं पिबेन्निशायां कदलीफलं तत् ॥२४॥

"रक्तागस्त्यद्रवैर्भाव्य दिनैकन्तु सिताम्बुजे" इति रसेन्द्रोक्तपाठस्थले "रक्ताङ्गस्य द्रवैर्भाव्य दिनैकन्तु सितायुतम्" इति विशेषपाठः ॥ २० ॥

पूर्णचन्द्रे—इह वाजीकरणाधिकारे कामदेवः "हेमपादयुत" इत्यादिना प्रागुक्तः निष्पन्नः रसः सोच्चटारसः उच्चटा गुञ्जा तस्याः रसेन सह वर्त्तमानः, गुञ्जाफल-रसमर्दित इत्यर्थः, रक्तपुष्पमुनिसारभावितः रक्तवर्णवकपुष्परसेन सप्तधा मर्दितः । चरमधातुपूरकः शुक्रपोषकः, प्रागुक्तः कामदेवरस एव उच्चटारसः रक्तवकपुष्प-रसाभ्यां मर्दितश्चेत् पूर्णचन्द्ररसो भवति । कुसुमास्त्रस्य कामस्य रहस्यं गोप्यास्त्र-मित्यर्थः, हर्षजननात् । शृङ्गारस्य अधिदैवतम् अधिष्ठात्री देवता, सम्भोगशक्ते रत्युत्कर्षजननादित्यर्थः । सुदृशां वराङ्गनानां कार्मणं मन्त्रतन्त्रादियोजनेन वशीकरणवत् वशीकरणमित्यर्थः । रसत्रयमिदं कामदेवमदनसुन्दरपूर्णचन्द्राख्यं रसत्रयम् ॥ २१।२२ ॥

मदनसुन्दरसे—मासार्द्धमात्रं पञ्चदशदिनानि, "माषार्द्धमात्रम्" इति कस्यचित् पाठः । हरजं पारदम् । मोचस्य रसेन शाल्मलीमूलरसेन, न तु मोचरसेन, तन्त्रान्तरोक्तयोगेन सह सादृश्यदर्शनात् । तेन रसेन मोचस्य रसेन । त्रिःसप्तसङ्ख्यानि दिनानि एकविंशतिदिनानि । तत्सम्मितं रससम्मितम् । विभाव्य तेनैव गोघृतेनैव भावयित्वा । युञ्ज्यात् तादृशं रसं गन्धञ्च ऐकध्यं मेलयेत् । काचस्थयोः काचकूपिका-स्थितयोः तयोः रसगन्धयोः, मात्रामिति शेषः । नागलतादलेन ताम्बूलीपत्ररसेन । कदलीफलमित्यत्र खादेदिति शेषः । तत् औषधसेवनानन्तरं सेवितं कदलीफल-

मदनं मदयन्मदमुज्ज्वलयन् प्रमदानिवहानतिविह्वलयन् ।
सुरते सुखदं गतविच्यवनैर्भवसारजुषाममयमिव सुहृत् ॥२५॥

अथ कुसुमायुधः ।—

सूतस्य द्विपलं चतुष्पलमिता गन्धो मृतं काञ्चनं
पादन्यूनपलं सुवर्णविमला-ताप्यं रसेनान्वितम् ।
लोहं कान्तमलस्तथाऽसितघनः कर्षान्विताविकांशौ
हन्तव्यं दरदेन लोहमखिलं चूर्णं ततो मर्दितम् ॥२६॥

मित्यर्थः, यद्वा—तदिति स इत्यर्थे अव्ययं, स रस इत्यर्थः, मदनं मदयन् उत्तेजयन्; मदं हर्षम्, उज्ज्वलयन् वर्द्धयन् । गतविच्यवनैः स्खलनमुक्तैरित्यर्थः । भवसारजुषां भवे संसारे सारं रत्नभूतं कामिनीरूपं वस्तु इत्यर्थः, यद्वा—सारं श्रेष्ठं कामसुखमित्यर्थः, जुषन्ते सेवन्ते ये तेषाम् । अयमर्थः,—अनियतमानं पारदं शाल्मलीरसेन पञ्चमेकं मर्दयेत्, मर्दयेच्च पृथग्भाजने गन्धकमपि पारदतुल्यम् एकविंशतिवासराणि तेनैव रसेन, ततस्तं वस्त्रेणावेष्ट्य यामद्वयं घृतेन पचेत्, अवतार्य च यामद्वयानन्तरं तेनैव घृतेन पुनः सप्ताहं भावयेत्, ततः शुष्कीकृतं तं गन्धकं रसेन मेलयित्वा मर्दयेत् काचकूप्यां स्थापयेच्च । अथ निशि ताम्बूलपत्ररसेन सह तस्य मात्रां पीत्वा पक्वकदलीफलं सदुग्धमनुपिबेदिति । रसरत्नाकरे योगोऽयं पूर्णेन्दुरसनाम्ना किञ्चित् विभिन्नपाठतया पठितः, यथा—“शाल्मलीत्थद्रवैर्मर्द्यं पञ्चैकं शुद्धसूतकम् । पृथक् खल्वे त्रिसप्ताहं तद्द्रवैर्मर्द्य गन्धकम् ॥ एकीकृत्य घृते साज्ये मर्दयेत्तच्च गोलकम् । यामद्वयं पचेदाज्ये वस्त्रे बद्ध्वा तु पाचयेत् ॥ दिनैकं शाल्मलीद्रावैः पिण्डं यामद्वयं पचेत् । मर्दयित्वा पुनः पिण्डं नागवल्ल्या च वेष्टयेत् ॥ निक्षिप्य काचकूप्यां च द्रवं दत्त्वा तु शाल्मलम् । पलैकपरिमाणन्तु पचेत् यामद्वयं ततः ॥ वालुकायन्त्रमध्ये तु द्रवे जीर्णे समुद्धरेत् । द्विगुञ्जं भक्षयेत् प्रातः नागवल्लीदलान्तरे ॥ सुपक्वौ ससिता क्षीरैः पलैकं पाययेदनु । रसः पूर्णेन्दुनामायं सम्यग्वीर्यकरो भवेत् ॥ कामिनीनां सहस्रैकं नरः कामयते ध्रुवम् ॥” इति । मदनं काममपि मुदा हर्षेण हर्षजननेन मदयति एतद्रससेवनेन उन्मत्तवत् करोतीति मदनमुन्मत्, मदयतेः क्विप्, तथाभूतः रसः ॥ २३—२५ ॥

कुसुमायुधे—पादन्यूनपलमिति वाक्यं मृतं काञ्चनमित्यनेन सम्बध्यते, पादन्यूनपलं कर्षत्रयम् । सुवर्णविमलाताप्यं सुवर्णं गैरिकं, विमला रौप्यमाक्षिकं ताप्यं सुवर्ण-

मूषायां विगतावृतौ सिकतया यन्त्रे कृते स्थापयेत्
ब्राह्मीवारि दिनं निधेहि तदनु प्रत्येकमेकाच्चयहम् ।
वासाकुञ्जरशुण्ठिकात्रिकटुकं मेषी च निर्गुण्डिका
ताली कुञ्जरशुण्डिका हुतवहस्तोयानि दत्त्वा पचेत् ॥२७॥

ततस्तु निखिलाम्भोभिर्विमर्द्य पुटयेल्लघु ।
निर्यासैः शाल्मलैर्ग्राह्यो वल्लत्रयमितो रसः ॥
वलीपलितनाशाय त्रिमासं मधुराशनः ॥२८॥

सुरतेषु सुलोचनाशतैर्गतवीर्य्यच्यवनैर्मनो यदि ।
तदमुं रसमाश्रयाऽऽश्रयं कुसुमास्त्रस्य चिराय धन्विनः ॥२९॥

यदि सन्ति सहस्रशः स्त्रियश्चतुराश्लेषमनोहराः प्रसन्नाः ।
सुकवेरिव गुम्फना गिरां सुरसोऽनेन युवा रसेन भूयात् ॥३०॥

माक्षिकं रसेनोन्मितं प्रत्येकं द्विपलम् । लौहं कान्तमलं मण्डूरं असितघनं कृष्णाभ्रम् ; "असितघनम्" इत्यत्र "सितघनम्" इति पाठो न मनोरमः, श्वेताभ्रस्य रसादिकर्म्मणि अप्राशस्त्यात् , कर्षोन्मितावेकश एकश लौहादित्रयाणां प्रत्येकश कर्षोन्मितौ द्विकर्ष-मित्यर्थः । हन्त्र्य दरदेन लौहं द्वादशांशहिङ्गुलेन सह लौहं मर्दयित्वा मारयितव्यं, तादृशञ्च लौहं योगेऽस्मिन् प्रयोज्यम् । दरदेन सह लौहमारणे शार्ङ्गधरवचनं यथा —"त्रिपेहा द्वादशांशेन दरदं तीक्ष्णचूर्णतः । मर्दयेत् कन्यकाद्रावैर्यामयुग्मं ततः पटेत् ॥ एवं सप्तपुटैर्मृत्युं लौहचूर्णमवाप्नुयात् ॥" इति । मूषायां विगतावृतौ निरावरणायां मूषायाम् । सिकतया कृते यन्त्रे वालुकायन्त्रे । तदनु प्रत्येकमेकाच्चयहं ब्राह्मीरसे दिनमेकं पाकानन्तरं वक्ष्यमाणात् एकैकस्मात् द्रव्यात् गृहीते तोये दिनत्रयं निधेहीत्यर्थः । प्रत्येकमेकादित्युक्तं, तदेव विशिष्याह, वासेति ।—कुञ्जरशुण्ठिका हस्तिकन्दः, हस्त्यालुकं इत्यर्थः । "कुञ्जरशुण्ठिका" इत्यत्र "कुञ्जरशुण्डिका" इति पाठे —कुञ्जरशुण्डिका 'हातिशुँडा' इति भाषा, अस्मिन् पक्षे—हस्तिशुण्डीरसेन वारद्वयं पचेत । "कुञ्जरपिप्पली" इति क्वचित् पाठः । मेषी मेषशृङ्गी, "मेषी" इत्यत्र "मेथी" इति पाठान्तरम् । "मेषी च" इत्यत्र "लोध्रार्द्रं" इति क्वचित पाठः । ताली तालमूली । हुतवहः चित्रकः, एषां तोयानि रसान् क्वाथान् वा । ततस्तु वालुका-यन्त्रे पक्वं तं रसं निखिलाम्भोभिः वासादीनां सर्वेषां मिलितरसैः । निर्यासैरिति ।—

अथ सूतेन्द्र ।—

मुक्ताफलं प्रवालञ्च सुवर्णं रौप्यमेव च ।
रसं गन्धञ्च तत् सर्वं तोलैकैकं प्रकल्पयेत् ॥२१॥
रक्तोत्पलैः पत्ररसैर्मर्दयेत्तत्तलीकृते ।
मर्दयेत्तत् पुनर्दत्त्वा गन्धं माषचतुष्टयम् ॥२२॥
तन्मध्ये गन्धकं दत्त्वा मर्दयेत्तदनन्तरम् ।
भीत्या काचघटीमध्ये सन्निरुध्य प्रयत्नतः ॥२३॥
वालुकायन्त्रमध्यस्था कृत्वा काचघटीं ततः ।
पाकस्तत्र तथा कार्य्यो भवेद्यामत्रयं यथा ॥२४॥
काचपात्रं समाकर्षेत् सिद्धं सूतं ततः परम् ।
भक्षयेद्रक्तिकाः पञ्च रोगैराक्रान्तपुद्गलः ॥२५॥
भोजनं पूर्वरोगोक्तं यत्नतः कारयेद्भिषक् ।
दुर्बलं वपुरत्यर्थं बलयुक्तं करोत्यसौ ॥२६॥

पुटानन्तरं विवक्षितौषधं शाल्मलीमूलरसेन मासत्रयं खादेत् । सुकवेरिति ।—सुकवेः गिरा वाचा गुम्फना ग्रथना इव रचना इव इत्यर्थः, सुकवेः रचना यथा सुरसा, तथा अनेन रसेन युवा सुरसो भूयात् इति निष्कर्षः ॥ २६—३० ॥

सूतेन्द्रे—तत्तलीकृते पत्तलीकृते, पत्तलीभूते सतीत्यर्थः । "तत्तलीकृते" इत्यत्र "पत्तलीकृतम्" इति पाठे—आर्द्रीभूतं यथा स्यात् तथा मर्दयेदित्यर्थः । मर्दयेत्तत् पुनरिति ।—रक्तोत्पलपत्ररसे मुक्ताफलादिकं मर्दयित्वा माषचतुष्टयं गन्धञ्च तत्र दत्त्वा रक्तोत्पलपत्ररसैरेव पुनर्मर्दयेत्, ततः पुनरपि माषचतुष्टयं गन्धं तन्मध्ये दत्त्वा मर्दयेत् । भीत्या भीतजनयोग्या देया इत्यर्थः, काचघटीमध्ये स्थाप्या इति निष्कर्षः, "भीत्या" इत्यत्र "वीत्या" "क्षिप्ता" वा इति पाठकल्पना सुगमार्था, काचघटीमध्ये प्रयत्नतः सन्निरुध्य सा काचघटी वीत्या औषधं यथायथं विन्यस्तं न वा काचघटी अविकृतेवास्ति न वा इत्यादिपरीक्षार्थं सावहितं दर्शनीया इत्यर्थः । क्षिप्ता इति पाठपक्षे—काचघटीमध्ये औषधं क्षिप्ता । रोगैराक्रान्तपुद्गलः रोगैराक्रान्तः पुद्गलः शरीरं यस्य सः, "पुद्गल" इत्यत्र "युद्गल" "युगल" इति पाठान्तरद्वयम् । "पूर्वरोगोक्तम्" इत्यत्र "पूर्वयोगोक्तम्" इति पाठकल्पना साधीयसी, पूर्वयोगोक्तं कुसुमायुधाक्तं मधुराम्ल

शुक्रवृद्धिं करोत्येष ध्वजभङ्गञ्च नाशयेत् ।
मासेनैकेन सूतेन्द्रो रोगनाशाय कल्पते ॥३७॥
शालयो मुद्गयुक्ताश्च गोधूमा भोजने हिताः ।
घृतं गव्यं तथा क्षीरं स्निग्धं पथ्यं प्रयोजयेत् ॥
पारावतस्य मांसञ्च तित्तिरेर्लावकस्य च ॥३८॥

अथ कार्श्यहरयोगः ।—

शुद्धं सूतं वाजिगन्धाञ्च यष्टीं पक्त्वा दुग्धं तच्च कार्श्ये ददीत ॥३९॥

अथ कार्श्यहरयोगत्रयम् ।—

एवञ्चाप्यं वापयित्वा च दद्यात् यद्वा यष्टिं मागधीं वाजिगन्धाम् ।
मध्वाज्याभ्यां शाल्मलीसत्त्वयुक्तां शम्बूकैर्वा भर्जितैर्वाप्यमिश्रैः ॥
॥४०॥

भवेदित्यर्थः । योगोऽयं रसरत्नाकरे किञ्चित् परिवर्त्तिताकारेण अभिनवकामदेव-रसनाम्ना पठितः, तथा च—"मुक्ताफलं प्रवालञ्च सुवर्णं रौप्यमेव च । तोलकैकं समादाय पृथक् गन्धकसूतयोः ॥ रक्तोत्पलदलाम्भोभिर्मर्दयेद्दिवसत्रयम् । मर्दयित्वा पुनर्देयं गन्धं माषचतुष्टयम् ॥ तस्यैव पत्रतोयेन पुनर्दत्त्वा च गन्धकम् । शङ्खिन्याश्चापि तोयेन रुद्धा काचघटे दृढे ॥ ततस्तु वालुकायन्त्रे पचेत् यामत्रयं ततः । काचकूप्याः समाकृष्य सिद्धसूतमतः परम् ॥ खादेत्तु रक्तिका पञ्च रोगैराक्रान्तमानवः । भोजनं पूर्ववद्देयं यत्नतः सततं भिषक् ॥ दुर्बलं वपुरत्यर्थं मल्लवत् जायते नृणाम् । मासेनैकेन सूतेन्द्रः पित्तजान्नाशयेद्गदान् ॥" इति ॥ ३१—३८ ॥

कार्श्यहरयोगे—शुद्धं सूतं शोधनमारणादिकर्मणा विशुद्धं पारदं, रससिन्दूर-मित्यर्थः । आवर्त्तितदुग्धे सूतादिकं दत्त्वा मोदकवत् पचेदिति ॥ ३९ ॥

कार्श्यहरयोगत्रये—आप्यं कुष्ठम्, "आप्यम्" इत्यत्र "वाप्यम्" इति पाठान्तरम्, वापयित्वा प्रक्षिप्य दुग्धे इति शेषः । पूर्वयोगोक्तदिशा आवर्त्तितदुग्धे कुष्ठचूर्णं प्रक्षिप्य आलोड्य च दद्यादित्येको योगः । यष्टीत्यादिद्वितीययोगे—मागधी पिप्पली, यष्ट्यादित्रयाणां चूर्णं घृतमधुशाल्मलीमूलरसैः संयोज्य दद्यादिति । शम्बूकैरित्यादि-तृतीययोगे—वा अथवा यष्ट्यादित्रयं भर्जितैः वाप्यमिश्रैः कुष्ठमिश्रैः शम्बूकमांसैः सह दद्यादिति ॥ ४० ॥

अथ मदनकामदेवः ।—

गोलं गन्धकसूतयोस्त्रिकटुकक्वाथेन बद्ध्वाऽथ भू-
कुष्माण्डान्तरवस्थितं विपिहितं तेनैव लिप्तोपरि ।
माषैर्द्व्यङ्गुलमाज्यपक्वमथ तत् कुष्माण्डमध्याद्धरेत्
तच्चूर्णं लवसम्मितं सुरलता-चूर्णस्य मुष्टिद्वयम् ॥४१॥
जया शतावरी कृष्णा कपिकच्छूफलं तिलाः ।
प्रत्येकं पलसम्माना यवाः पञ्चपलान्विताः ॥४२॥
तावन्मोचफलं द्वे च यष्टी मुष्टिद्वयं शुभा ।
निक्षिप्य सप्त सप्तात्र भावनाः क्रमशश्चरेत् ॥४३॥
महाबलाबलानाग-बलाभिर्द्राक्षयाऽपि च ।
कृष्णाधात्रीक्षुभिश्चापि दन्तपात्रे निवेश्य च ॥४४॥
मत्स्यण्डिकायुतं वल्ल-द्वयमानं भजेन्निशि ।
अनुपानमिह प्रोक्तं धारोष्णं सुरभेः पयः ॥४५॥
दोषमार्त्तरजं हत्वा कुर्य्याद्वीर्य्यप्रवर्द्धनम् ।
ध्वजोत्साहं तथा स्त्रीषु वाजीकरणमुत्तमम् ॥४६॥

मदनकामदेवे—विपिहितं तेनैव भूमिकुष्माण्डखण्डेनैव आच्छादितम् । लवसम्मितं पादप्रमितं, तच्च पलद्वयमपेक्ष्य बोद्धव्यम् । "लव" इत्यत्र "पल" इति क्वचित् पाठः । सुरलताचूर्णस्य गुडूचीचूर्णस्य मुष्टिद्वयं पलद्वयम् । जया विजया । तावन्मोचफलं रम्भाफलमपि पञ्चपलान्वितमित्यर्थः । द्वे च यष्टी यष्टिमधुनः पलद्वयम्, "द्वे" इत्यत्र "द्वौ" इति पाठो न सम्यक्, पलशब्दस्य नपुंसकलिङ्गत्वात् । मुष्टिद्वयं शुभा वंशलोचनायाः पलद्वयम् । सप्तेति ।—वक्ष्यमाणमहाबलादीनां समानां द्रव्याणां प्रत्येकेन सप्त भावना दद्यात्, तत्र महाबला अतिबला श्वेतबला इत्यर्थः । बला पीतपुष्पबला । नागबला गोरक्षतण्डुला । दन्तपात्रे गजदन्तनिर्मिते भाजने । सुरभेः पयः गोदुग्धम् । अयमर्थः,—कज्जलीं त्रिकटुक्वाथेन मर्दयित्वा गोलकं कुर्य्यात्, ततः तद्गोलकं भूमिकुष्माण्डोदरे संस्थाप्य छिद्रमुखं भूमिकुष्माण्डखण्डेनैव पिधाय च पिष्टमाषकल्केन द्व्यङ्गुलोत्सेधं लिम्पेत्, अथ तत् पिण्डं घृते पचेत्, शीतीभूतञ्च कुष्माण्डमध्यस्थितं कज्जलीगोलकं तं बहिष्कृत्य विचूर्ण्य च पलार्द्धं

अल मलयवायुना कुमुदबान्धवेनाप्यल
मधुव्रतसुखायिनः कलितपञ्चमाः के पिकाः ? ।
अतो भज विशङ्कित रतिसरोजिनीभास्करं
मनोजपरिदैवत मदनकामदेव रसम् ॥४७॥

अथ कामधेनुः ।—

हेमाभ्रसत्त्वकान्तार्काः प्रत्येकं पलमात्रकाः ।
एकत्र द्राविता सर्वे कर्षभूनागसत्त्वकाः ॥४८॥
पलविंशतिसूतेन तैश्च पिष्टिं प्रकल्पयेत् ।
शतधा पातयेत् सूतं पिष्टीं कृत्वा पुनश्च तैः ॥४९॥
शिष्टं द्विपलिकं सूतं सन्न्यासाद्भस्मतां नयेत् ।
भस्मीभूते रसे तस्मिन् शिष्टे चैकपले ततः ॥५०॥
वज्रं निष्कमितञ्चाभ्र-सत्त्वं षट्पलिकं क्षिपेत् ।
द्विपलं गन्धकं शुद्धं द्विदिनं मर्दयेत्ततः ॥५१॥
तत् सर्वं लोहजे पात्रे क्षिप्त्वा च मृदुवह्निना ।
शाल्मलीमूलजं क्वाथं चत्वारिंशत्पलोन्मितम् ॥५२॥
जारयेद्भ्रमराजस्य दत्त्वा दत्त्वाऽल्पमल्पकम् ।
स्वाङ्गशीतं रसं हृत्वा सुगाढं परिमर्दयेत् ॥५३॥

प्रमाणं गृह्णीयात्, ततः गुडूचीचूर्णादिकं यथोक्तमानं तत्र निक्षिप्य महाबलादीनां यथालाभ्यं रसेन क्वाथेन वा सप्त सप्त वारान् भावयित्वा गजदन्तमये भाजने स्थापयेदिति ॥ ४१—४७ ॥

कामधेनौ—कान्तं कान्तलौहम् । अर्कं ताम्रम् । कर्षेति ।—कर्षं कर्षप्रमाणं भूनागसत्त्वं सीसकसत्त्वं यत्र तादृशाः, हेमाभ्रसत्त्वकान्तार्काः इत्यस्य विशेषणम् । तैः हेमादिभिः भूनागसत्त्वान्तैः । शिष्टम् अवशिष्टं, शतधा पातनेन यदा पलद्वयसूतं अवशिष्टं स्यात् तदा इत्यर्थः, सन्न्यासात् "रसस्यौषधयुक्तस्य भाण्डरुद्धस्य यत्नतः । सदाग्नियुतचुल्ल्यन्तःक्षेपः सन्न्यास उच्यते ॥" इत्यष्टमाध्यायोक्तलक्षणकं क्रियाविशेषमाश्रित्य, उक्तदिशा अवशिष्टं द्विपलं सूतं भाण्डमध्ये निरुध्य पुटविशेषेण दग्ध्वा इत्यर्थः । भस्मीभूते इति ।—भस्मावशिष्टे पलैके तस्मिन् रसे । हृत्वा आहृत्य,

नालोपातेन तत् क्वाथ रजोदग्ध प्रदापयेत् ।
ततः करण्डके क्षिप्त्वा यत्नेन स्थापयेत् खलु ॥५४॥
सोऽयं गुञ्जामितघृतयुतः सेवितो हन्ति रोगा-
स्तत्तद्दोषप्रभवकुटिलान् दुःखसाध्यान् समस्तान् ।
दद्याद्दीप्तिं जठरशिखिनः स्त्रोशत सेवयेत्तु
स्थैर्य्यं कुर्य्यादपि च वपुषो नामत. कामधेनु. ॥५५॥

अथ महाभ्रसत्त्वम् ।—

कृष्णाभ्रकस्य धान्याभ्र कृत्वा भृङ्गाम्बुनि क्षिपेत् ।
तस्मिंश्च तुल्यक देय सूक्ष्म ताप्यभवं रजः ॥५६॥
टङ्कणञ्चाग्निना भृष्टं तावदेव विनिक्षिपेत् ।
छागास्थिसम्भव चूर्णं चतुर्थांशेन निक्षिपेत् ॥५७॥
रसभस्माष्टमांशञ्च गुडगुञ्जापुरस्तथा ।
पञ्चाजेन विनिष्पिष्य गोलीकृत्य विशोष्य च ॥५८॥
ततो नूतनभाण्डस्य जलघृष्टेन पाण्डुना ।

सङ्गृह्य इत्यथ । चत्वारिंशत्पलोन्मितं शाल्मलीमूलक्वाथम अल्पमल्पं दत्त्वा दत्त्वा इत्युक्तम, इदानीं तद्दानप्रकारमाह, नालीति ।—रजोदग्ध पाककाले औषधचूर्ण यथा सम्यक् दग्ध स्यात, नातिदग्ध न वा हीनदग्ध स्यादित्यर्थ, तथा तत क्वाथ शाल्मलीमूलज क्वाथ, नालीपातेन नाल्या नाडीकया, नलिकया इत्यर्थ, पातेन पातनेन प्रदापयेत, पाककाले शाल्मलीक्वाथं वंशादिर्नालिकया अल्पाल्प कृत्वा तथा दातव्य, यथा औषध सम्यक् पक्व भवेत् इत्यर्थ । करण्डके रौप्यादिभाजने । जठरशिखिन जाठराग्ने ॥ ४८—५५ ॥

महाभ्रसत्त्वे—ताप्यभवं रज स्वर्णमाक्षिकभस्म । तावदेव अभ्रकतुल्यमेव, अत्र अभ्रादीना चतुर्णां तुल्यभागत्वम् । छागेति ।—छागास्थिचूर्णम् अभ्रपादिकम् , "छागास्थिसम्भव चूर्णम्" इत्यत्र "छागविष्ठाभव चारम्" इति क्वचित पाठ । रसेति ।—रससिन्दूरस्य तथा गुडगुञ्जाफलगुग्गुलूना प्रत्येकश अभ्रात अष्टमांशत्वम् । पञ्चाजेन छागमूत्रपुरीषदधिदुग्धघृतेन पञ्चविधेन, "पञ्चाजेन" इत्यत्र "पञ्चाज्येन" इति

विलिप्य वटिका सर्वा हरेत् सर्वं पुरोक्तवत् ॥
महाभ्रसत्त्वमेतत् स्यादेकमप्यखिलार्त्तिनुत् ॥५९॥

अथ उमापति ।—

त्रिफलाक्वथितैः सार्द्धं पुटितञ्च शतावधि ।
इत्थं महाभ्रसत्त्व तन्मृतं शाणचतुष्टयम् ॥६०॥
एकशाणमित सम्यग्रसराजस्य भस्म च ।
एकशाणमित गन्ध त्रिफला च त्रिशाणिका ॥६१॥
कान्तपात्रे क्षिपेदेतत् सर्वं घृतसितायुतम् ।
मर्दयेदतियत्नेन यावत् स्यात् प्रहराष्टकम् ॥
तत् कल्क निक्षिपेत् कान्त-लोहजातकरण्डके ॥६२॥
संसिद्धोऽयमुमापतिर्वररसो गुञ्जामितः सेवितो
मासेनैव महामयान् प्रशमयेत् पथ्यादियुक्तिं विना ।
नित्य क्षीरघृताशनेन च पुनः ससेवितो नाशये-
दब्देनैव जरा बलीपलितकैर्दध्याच्छताब्द वयः ॥६३॥
उमापतौ रसः सोऽयमुमापतिरिवापरः ॥६४॥

पाठेऽपि स एवार्थः । हरेत सर्वं पुरोक्तवत पूर्वोक्ताभ्रसत्त्वनिष्काशनविधिना सर्वं हरेत् वटिकाभ्य सत्त्वमाहरेदित्यर्थः । अयमाशय,—धान्याभ्रीकृत कृष्णाभ्रचूर्णं भृङ्गराजरसे मज्जनयोग्ये निक्षिप्य स्थापयेत, तत्र च तुल्यादित्रयम् अभ्रतुल्य छागास्थिचूर्णमभ्रपाद, रसभस्मादीना चतुर्णामष्टमाशञ्च निक्षिप्य तावन्मर्दयेत्, यावत् रसशोषणं स्यात, तत आजपञ्चकेन निष्पिष्य क्षुद्राकृती वटिका कृत्वा शोषयेत, अनन्तर नूतनभाण्डसैक जलेन घृष्टा तज्जेन पाण्डुवर्णकल्केन ता वटिका' लिम्पेत्, अथ सत्त्वनिष्काशनविधिना ताभ्य सत्त्वं सङ्गृह्य सर्वरोगेषु योजयेदिति ॥ ५६—५९ ॥

उमापतौ—इत्थ पूर्वोक्तप्रकारेण निष्पादित महाभ्रसत्त्व तदाख्यभस्म त्रिफलाक्वथिते त्रिफलाक्वाथे सार्द्ध मर्दयित्वा शतावधि शतवारपर्य्यन्त पुटित, कुर्य्यादिति शेष , मृत पुटित तत महाभ्रसत्त्व शाणचतुष्टय कर्षमेकम् । जरा बलीपलितकैः बलीपलितकैः सह जरा नाशयेदित्यन्वय ॥ ६०—६४ ॥

अथ महाकनकसुन्दरः।—

कान्तकाञ्चनगन्धाश्म-जारितं मारितं रसम्।
चतुर्निष्कमितञ्चाथ स्वर्णं निष्कमितं मतम्॥६५॥
निक्षिप्य कान्तपात्रे तु पञ्चाशन्निष्कसम्मितम्।
जारयेद्गन्धकं शुद्ध-गन्धेन वडवाग्निना॥६६॥
निष्कतुल्यमिदं चूर्णं श्लक्ष्णीकृत्य प्रयत्नतः।
निक्षिपेत् मधुसम्पूर्णे घृतसुस्निग्धभाण्डके॥६७॥
अमुनैव प्रकारेण पथ्याना षष्टिसयुतम्।
त्रिशत साधयेत् यत्नात् शास्त्रदृष्टविधानतः॥६८॥
त्रिधा विभज्य तत्रैकां समादाय हरीतकीम्।
एकपादं दिनाभ्याञ्च द्वितीय दिवसैस्त्रिभिः॥६९॥
तृतीयञ्च ततः पादं चतुर्भिर्दिवसैर्भजेत्।
एकैकाञ्च तत पथ्यां भजेदावत्सर नरः॥७०॥

महाकनकसुन्दरे—कान्त कान्तलौह, गन्धाश्म गन्धक , कान्तादिभि त्रिभि सह रस मर्दयित्वा मारयेदित्यर्थ । चतुर्निष्कमितमिति पद मारित रसमित्यनेन सम्बध्यते, तथाविध मारित रस चतुर्निष्कमित गृह्णीयात्। "मतम" इत्यत्र "मृतम्" इति क्वचित् पाठ । निक्षिप्येति।—पञ्चाशन्निष्कप्रमाण गन्धक कान्तलौहपात्रे सस्थाप्य वडवाग्निना तन्नाम्नाग्निना इत्यर्थ, "बदराग्निना" इति क्वचित् पाठ , जारयेत, तत शुद्धगन्धेन तथा जारितगन्धकेन सह , "शुद्धगन्धेन" इत्यत्र "शुद्धमन्धेन" इति क्वचित पाठ । निष्कतुल्यमिद चूर्ण रसचूर्ण स्वर्णचूर्णञ्च, शुद्धगन्धेन सह मिश्रितात स्वर्णपारदात निष्कतुल्य श्लक्ष्णीकृत्य सूक्ष्मचूर्ण कृत्वा घृतभाविते मधुपूर्णे भाण्डे स्थापयेत्। अमुनैव प्रकारेण घृतभाविते तस्मिन्नेव मधुपूर्णे भाण्डे निक्षेपेणेत्यर्थ, पथ्याना षष्टिसयुत त्रिशत षष्ट्यधिकशतत्रय हरीतकीगुडक साधयेत् वक्ष्यमाणव्याधिसमूहहरणोपयोगिता-मापादयेदित्यर्थ, यथा भाण्डस्थचूर्णानि हरीतकीभि सह मिश्रता यान्ति तथा कुर्य्या-दित्याशय । शास्त्रदृष्टविधानत यथाशास्त्रम्। त्रिधेति।—एका हरीतकी समादाय त्रिधा विभज्य इत्यन्वय । एकपादमिति।—भागत्रये विभक्तस्य तस्य हरीतकीगुडकस्य एकभाग दिवसद्वयेन, अपरभाग दिवसत्रयेण, शेषाश दिवसचतुष्टयेन खादेत्, एवं

जीवेद्वर्षशतं साग्रं वलीपलितवर्जितः।
सर्वव्याधिविनिर्मुक्तो नित्यं स्त्रीशतसेवितः ॥७१॥
बलवान् वीर्य्यवांश्चैव पूर्णसर्वेन्द्रियोदयः।
जायते नात्र सन्देह आज्ञेयं पारमेश्वरी ॥७२॥
हन्यादक्षिगदांश्च कुष्ठमखिलं मासान्तमासेवितः
पाण्डुञ्च ग्रहणीं प्रमेहगुदजान् गुल्मांश्च शूलामयान्।
स्थूलत्वञ्च तथा महाऽग्निमदनं रोगांस्तथैवापरान्
कुर्य्याद्दीपनपाचनं खलु नृणां भाव्यामयारोधनम् ॥७३॥
अयं रसायनो दिव्यो महाकनकसुन्दरः ॥७४॥

अथ अमृतार्णवे।—

कृत्वा कण्टकवेध्यानि पलस्वर्णदलान्यथ।
अष्टाशरसलिप्तानि निक्षिपेदुपले त्र्यहम् ॥७५॥
हिङ्गुहिङ्गुलगन्धाश्म-ताप्यनीलाञ्जनैः समैः।
कृतं चूर्णमधश्चोर्द्धं पत्राणां विनिधाय च ॥७६॥
शतवारं पुटेत् सम्यक् निरुत्थं भस्म जायते।
तद्भस्मद्विगुणं सूतं तस्माद्द्विगुणहिङ्गुलः ॥७७॥
तस्माच्च द्विगुणं ताप्यं सर्वमेकत्र मर्द्दयेत्।
रसेन मातुलुङ्गस्य निरन्तरदिनद्वयम् ॥७८॥
तुषैः पुटत्रयं दद्यात् गोकरीषैः पुटत्रयम्।
पुटानि दश विंशत्या कुगणाना प्रकल्पयेत् ॥७९॥

नवदिवससेवनानन्तरं प्रत्यहमेका हरीतकी संवत्सरं यावत् सेवेत। भाव्यामयारोधनम् अनागताबाधप्रतिषेधनं, रोगाक्रमणशङ्कानिवारकमित्यर्थः ॥६५—७४॥

अमृतार्णवे—अष्टाशरसलिप्तानि स्वर्णपलापेक्षया अष्टमांशपारदयुतानि, निक्षिपेदुपले त्र्यहं खल्लशिलायां दिवसत्रयं मर्द्दयेत्। समैः प्रत्येकं स्वर्णपलतुल्यैः। पत्राणां स्वर्णपत्राणामित्यर्थः। तस्मात् सूतात्। तस्माच्च हिङ्गुलाच्च। "द्विगुणम्" इत्यत्र "त्रिगुणम्" इति पाठान्तरम्। विंशत्या कुगणाना विंशतिसङ्ख्यकवनोपलैः,

त्रिंशद्भिश्छगणैर्दद्यात् पुटानामथ विंशतिम् ।
तस्मिन् वैक्रान्तजं भस्म क्षिपेत्तत्पादमात्रया ॥८०॥
सर्वमेकत्र सञ्चूर्ण्य भृङ्गराजनिजद्रवैः ।
भावयेत् सप्तवाराणि सिध्यत्येवमयं रसः ॥
श्रीमता नन्दिना प्रोक्तो रसोऽयममृतार्णवः ॥८१॥

गुञ्जाबीजमितः सिताघृतकणा-संयोजितः सेवितः
कुर्य्यात् वृष्यमनेकशो वरवधूसन्तोषसम्पोषणः ।
यक्ष्मव्याधिविधूननो गरगरः पर्य्याप्तदीप्तानलो
मूलव्याधिनिवारणः किमपरः सर्वामयध्वंसनः ॥८२॥
रम्भापक्वफलं घृतं दधि पयः चैरेयकं मण्डका
बालं तालफलं सिता च पललं सन्तानिका मोदकाः ।
खर्जूरं वरपानकञ्च वटकाः पुण्ड्रेक्षवः सारसं
गुर्वन्नं पनसं तथा शिखरिणी पथ्यं रसेऽस्मिन्मतम् ॥८३॥

अथ मदनसञ्जीवनः ।—

त्रिपलं पारदं शुद्धं गन्धकञ्च चतुष्पलम् ।
मृतमभ्रकसत्त्वञ्च स्वर्णं कान्तञ्च कार्षिकम् ॥८४॥

तत्पादमात्रया मिलितौषधचतुर्थांशेन । गरगरः विषदोषापहः इत्यर्थः, "गरहरः" इति क्वचित् पाठः । मूलव्याधिनिवारणः शिरोरोगविनाशनः अर्शोरोगविनाशनो वा । चैरेयकं दुग्धकृतभक्ष्यम् । मण्डका "वारिणा कोमला कृत्वा समितां साधु मर्दयेत् । हस्तचालनया तस्या लोप्त्रीं सम्यक् प्रसारयेत् ॥ अधोमुखघटस्यैताम् विस्तृतां प्रक्षिपेत् बहिः । मृदुना वह्निना साध्यः सिद्धो मण्डक उच्यते ॥ दुग्धेन साज्यखण्डेन मण्डकं भक्षयेन्नरः । अथवा सिद्धमांसेन सतक्रवटकेन वा ॥" इत्युक्तलक्षणपिष्टकविशेषाः । सन्तानिका क्षीरसरः, सरकृतमिष्टान्नविशेषो वा, "सरभाजा" इति भाषा, तत्प्रकारश्च पाकराजे द्रष्टव्यः । सारसं कमलं, तदाख्य-पक्षिविशेषस्य मांसं वा । पनसं कण्टकीफलम् । शिखरिणी सन्धानविशेषः द्राक्षाभेदो वा ॥ ७५—८३ ॥

द्विपलं हेम विमलं भूनागायाः पलत्रयम् ।
एभिः सर्वैश्च सम्पिष्य प्रकुर्य्यान्नष्टपिष्टिकाम् ॥८५॥
बालुकायन्त्रविन्यस्त-लोहपात्रे क्षिपेत्ततः ।
अधस्ताज्ज्वालयेदग्निं कारयेत्तदनन्तरम् ॥८६॥
मण्डूकब्राह्मिकायाश्च मुषल्याश्चित्रकस्य च ।
हस्तिशुण्ड्यास्तथा कृष्ण-निर्गुण्ड्या गोक्षुरस्य च ॥८७॥
रसं कुडवमानेन क्षिपेत् खल्ले मुहुर्मुहुः ।
तत आकृष्य सम्पिष्य मधुना सह यत्नतः ॥८८॥
मल्लमूषोदरे क्षिप्त्वा विनिरुध्य विशोष्य च ।
दशभिश्छगणैर्देयं पुटं सम्पूज्य भैरवम् ॥
करण्डे स्थापयेत् पिष्ट्वा समभ्यर्चितकन्यकः ॥८९॥
रसः ख्यातो नाम्ना भुवि मदनसञ्जीवन इति
द्विवल्लाभ्यां तुल्यो घृतमधुसितादुग्धसहितः ।
निपीतः सप्ताहं प्रचुरमधुराहारसहितो
नरं कुर्य्यान्नारीशतसुरतसुप्रीतहृदयम् ॥९०॥

मदनसञ्जीवने—कार्षिकमिति पदम् अभ्रादिभिस्त्रिभिः सम्बध्यते। हेम सुवर्ण-माक्षिकं, स्वर्णस्य प्रागुक्तत्वात् हेमशब्देनात्र तत्तुल्यगुणं सुवर्णमाक्षिकं बोद्धव्यं। विमलम् इति हेम इत्यस्य विशेषणं विमलं प्रशस्तमित्यर्थः। भूनागाया सीसकस्य, "भूनागस्य" "भूनागस्य" इति वा पाठः साधुः, "भूनागाय" इति क्वचित् पाठः। एभिः सर्वैः गन्धकादिभिः सह इत्यर्थः, सम्पिष्य, पारदमिति शेषः। लौहपात्रे लौहखल्ले इत्यर्थः, परत्र खल्ले इति दर्शनात्। कारयेत् इति पदं रसमित्यनेनान्वीयते, मण्डूकब्राह्मिकादीनां कुडवमानेन रसं कारयेत्। मण्डूकब्राह्मिकाया मण्डूकपर्ण्याः। मुषल्याः तालमूल्याः। क्षिपेत् खल्ले मुहुर्मुहुः तं रसं बालुकायन्त्रोपरिस्थलौहपात्रे अल्पमल्पं कृत्वा मुहुर्मुहुः क्षिपेदित्यर्थः। ततः आकृष्य कृत्स्ने एव रसे चयिते खल्लात् अवतार्य्य इत्यर्थः। मल्लमूषोदरे "निर्दिष्टा मल्लमूषा या मल्लद्वितयसम्पुटात्। पर्पट्यादिरसादीनां स्वेदनाय प्रकीर्त्तिता ॥"

हन्यादुन्मादमुग्रं क्षयगदमरुचिं कामलामम्लपित्त
सर्वान् पित्तोत्थरोगान् रुधिरभवगदान् रक्तपित्तज्वरांश्च ।
रक्तार्शः पित्तगुल्मं सततमतिमहाऽऽनाहमन्तर्विदाहं
पाण्डुं मेहांश्च मोहं प्रदरगदमपि स्नोजनस्योग्रमाशु ॥९१॥

अथ मदनमोदकः ।—

त्रैलोक्यविजयापत्रं घृतेनाऽऽभर्जितं कियत् ।
त्रिकटुत्रिफलामुस्ता-कुष्ठसैन्धवधान्यकम् ॥९२॥
शटीतालीशपत्रञ्च कट्फलं नागकेशरम् ।
अजमोदा यमानी च यष्टीमधुकमेव च ॥९३॥
मेथी जीरकयुग्मञ्च सवीजं भर्जितं तथा ।
यावन्त्येतानि चूर्णानि तावदेवं तदौषधम् ॥९४॥
तावत्येव सिता ग्राह्या यावत्याऽऽयाति बन्धनम् ।
घृतेन मधुना युक्तं मोदकं परिकल्पयेत् ॥९५॥
त्रिसुगन्धिसमायुक्तं कर्पूरेणापि वासयेत् ।
स्थापयेत् घृतभाण्डे च श्रीमन्मदनमोदकम् ॥९६॥

इत्युक्तलक्षणकमूषाविशेषाभ्यन्तरे । समभ्यर्चितकन्यकं समभ्यर्चिताः कन्यकाः कुमार्य्यः, गौर्य्यादिमातृका इत्यर्थः, येन सः ॥ ८४—९१ ॥

मदनमोदके—त्रैलोक्यविजयापत्रं शक्राशनपत्रम् आभर्जितम् ईषद्भर्जितम् ; "घृतेनाऽऽभर्जितं कियत्" इत्यत्र "सवीजं घृतभर्जितं" "मुस्ता" इत्यत्र "शृङ्गी" तथा "सवीजं भर्जितं तथा" इत्यत्र "गृहीत्वा स्वल्पभर्जितम्" इति सर्वतन्त्र-सम्मतानि पाठान्तराणि । जीरकयुग्मं सितकृष्णभेदेन जीरकद्वयम् । "सवीजम्" इति पदं "त्रैलोक्यविजयापत्रम्" इत्यनेन तथा "भर्जितम्" इति पदं "जीरकयुग्मम्" इत्यनेन च सम्बन्धनीयं तन्त्रान्तरदर्शनात्, तच्च प्रागेव प्रदर्शितम् । तदौषधं विजयापत्रं, सर्वचूर्णसममत्र विजयाचूर्णं ग्राह्यम् । तावतीति ।—सितायास्तु तावती मात्रा दातव्या यावत्या पिण्डाकारं भवितुमर्हति, मात्रा तु सा "मोदके द्विगुणो गुडः" इति परिभाषानुसारेण सर्वचूर्णाद्द्विगुणा । घृतमधुनोस्तु युक्त्या किञ्चित् दातव्यम् । त्रिसुगन्धीति ।—त्रिसुगन्धि कर्पूरयोः तावती मात्रा देया

भक्षयेत् प्रातरुत्थाय वातश्लेष्मनिवारणम्।
कासघ्नं सर्वशूलघ्नं वलीपलितनाशनम् ॥९७॥
आमवातविकारघ्नं सङ्ग्रहग्रहणीहरम्।
सदा निषेवयेद्धीमान् रुच्यमग्निविवर्द्धनम् ॥९८॥
ब्रह्मणः प्रमुखाच्छ्रुत्वा वासुदेवे जगत्पतौ।
एतत् कामविवृद्ध्यर्थं नारदेन प्रकीर्त्तितम् ॥
तेन लक्ष वरस्त्रीणां रेमे स यदुनन्दनः ॥९९॥

अथ मदनाशने कर्पूरादिप्रलेप।—

शशिसूतकटङ्कणमागधिकं घृतशूरणमाक्षिकहेमरसम्।
मुनिपत्ररसप्लुतलेपवर युवतीमदपातनवश्यकरम् ॥१००॥

अथ द्रावणे सूतप्रयोग।—

योषागर्भरज' सूतं मधुना सह लेपयेत्।
अवश्यं द्रावयेन्नारीं शुष्ककाष्ठोपमामपि ॥१०१॥

यथा सुगन्धमात्र स्यात, तत्र त्रिसुगन्धि त्वगेलापत्रम। "कर्पूरेणापि वासयेत्" इत्यत्र "कर्पूरेणाधिवासयेत" इति सर्वतन्त्रसम्मत पाठ। घृतभाण्डे घृतभाविते भाण्डे ॥ ९२—९९ ॥

कर्पूरादिप्रलेपे—शशी कर्पूर। माक्षिक क्षौद्रम। हेम नागकेशर रसं रसाञ्जन न तु हेमरस धस्तूरपत्रस्वरस, स्वरसार्थकरसशब्दस्य पुंलिङ्गत्वात। मुनि-पत्ररसप्लुतलेपवरम अगस्त्यपत्ररसाप्लुतप्रकृष्टप्रलेप। "लेपवर" तथा "वश्यकरम्" इत्यनयो पुंलिङ्गता समीचीना, श्रेष्ठवाचिवरशब्दस्य पुंलिङ्गत्वात। युवतीमदपातन कामिनीगर्वनाशनम ॥ १०० ॥

सूतप्रयोगे—योषागर्भरज प्रसवकालनि सृत स्त्रीरक्तम, "रज" इत्यत्र "रसम" इति पाठेऽपि—स एवार्थं। "योषा" इत्यत्र "घोषा" इति पाठकल्पना मृगमार्था, तन्त्रान्तरे तादृशप्रयोगदर्शनात, तथा च—"एक माक्षिकमिश्र लेपात कोषातकीभव चूर्णम्। योन्या वराङ्गपाते कुरुते रेतःस्रुतिस्तस्या ॥" इति, घोषागर्भरजः घोषाफलमध्यचूर्णम् ॥ १०१ ॥

अथ पुष्पधन्वा रसः ।—

रम्भाकन्दे हेमतारार्कपिष्टी पक्त्वा यन्त्रे भूधरे तां पचेत ।
गन्धं दत्त्वा षड्गुणाङ्गं क्रमेण पश्चात् कान्तं तेन तुल्यं क्रमेण ॥१०२॥
दत्त्वा खल्ले शाल्मलीयष्टितोयैः पञ्चैकं तन्मर्दयेन्नागवल्ल्याः ।
नीरैर्याम पुष्पधन्वा रसः स्यात् वल्लं दद्यादस्य पूर्वोक्तयुक्त्या ॥१०३॥
पुष्टिं वीर्यं दीपनं सोऽत्र दद्यात् हन्याद्रोगान् रोगयोग्यानुपानैः ॥
॥१०४॥

अथ द्रावणे सिन्दूरप्रयोगः ।—

सिन्दूरमधुनो लेपं लिङ्गस्य कुरुते यदि ।
अत्यर्थं रमते नारीं द्रावयेद्वशमानयेत् ॥१०५॥

अथ रसेन्द्रचूडामणिः ।—

सूतहेमभुजगाभ्रवङ्गकाः कान्ततार्प्यविमलाः समाक्षिकाः ।
भागवृद्धिमिलिता विमर्दिता धूर्त्तपत्रविजयासलिलेन ॥१०६॥

पुष्पधन्वनि—रम्भाकन्दे कदलीकन्दरसे पक्त्वा खल्ले मर्दनेन परिणतिमापद्यमाना हेमतारार्कपिष्टी स्वर्णरजतताम्रपिष्टी, कदलीकन्दरसेन मर्दनात् पिण्डतया परिणत स्वर्णादित्रयमित्यर्थः । तां पिष्टिम् । षड्गुणाङ्गं त्रिगुणम् । क्रमेण अल्पमल्पं कृत्वा । तेन तुल्यं गन्धतुल्यम । शाल्मलीयष्टितोयैः शाल्मलीयष्टिमधुभ्यां कृते क्वाथे । अयमर्थः, —हेमादित्रयं रम्भाकन्दनीरे मर्दयित्वा पिष्टं कुर्य्यात, ततः तां भूधरे यन्त्रे पचेत, अथ यन्त्रादाकृष्य तदौषधसमेन गन्धकचूर्णेन खल्ले मर्दयेत्, निःशेषं मिश्रीभूते तस्मिन् गन्धके पुनरौषधसमं गन्धकं दत्त्वा तथा मर्दयेत्, एवं त्रिगुणगन्धकं तत्र सम्मिश्य गन्धकवत् लौहचूर्णमपि तथा मिश्रयेत, अनन्तरं शाल्मलीयष्टिक्वाथेन पञ्चकालं भावयित्वा ताम्बूलीपत्ररसेन प्रहरमेकं मर्दयित्वा च निगूढं स्थापयेदिति । पूर्वोक्तयुक्त्या घृतमधुसितादुग्धसहितं इत्यर्थः ॥ १०२—१०४ ॥

सिन्दूरप्रयोगे—सिन्दूरमधुनः सिन्दूरं नागसम्भवं तेन सह मधु तस्य ॥१०५॥

रसेन्द्रचूडामणौ—भुजगं सीसकं । कान्तं कान्तलौहम । तार्प्यं स्वर्णमाक्षिकम् । समाक्षिका इत्यनेन पुनर्माक्षिकग्रहणात माक्षिकस्य षोडशभागाः, तार्प्यमित्यस्य तुल्यकमित्यर्थो वा । विमलं रौप्यम । "विमलं विमलभस्म, समाक्षिकाः रौप्यमाक्षिकं" इति कश्चित् । भागवृद्धिमिलिता उत्तरोत्तरमेकैकभागवृद्ध्या

सप्तसप्त चपलामृतवल्ली सारिवासुररताञ्जलतोयैः ।
वारिवाहमृतयष्टिकावरी-वानरीभुजगदृष्ट्युदकेन ॥१०७॥
अर्द्धभागमहिफेनक न्यसेत् मर्दयेत् सुरसपुष्परसेन ।
चन्दनार्ककरहाटपिप्पली-श्रावणीकृतरसैः पृथगेव ॥१०८॥
कुङ्कुमेन च ततो विभावयेन्नाभिजद्रवयुतं विभावयेत् ।
सिद्धिमिति रसराडयं शुभ' कामिनीमदविधूननदक्षः ॥१०९॥
शर्करामधुयुतो हिमाषक. स्तम्भकृन्निधुवने वनितानाम् ॥११०॥
संसेव्य सूतं न च रात्रिभोज्यं कुर्वीत पेयं पय एव चैकम् ।
तृतीययामे रससेवनन्तु कृत्वा निशाया' प्रहरे व्यतीते ॥१११॥
सेवेत कान्ता कमनीयगात्रा घनस्तनीमुज्ज्वलचारुवस्त्राम् ।
रत्युत्सुका कातरलोलनेत्रा विलोलहारावलिमादधानाम् ॥११२॥
किं कामि तनुकामिनां मलयजेनावश्यजेनाऽऽशु किम् ?
किं चन्द्रेण परोपतापजनिना ? पुंस्कोकिलेनापि किम् ? ॥११३॥

मिश्रिता । सप्त सप्त प्रत्येकरसेन सप्त सप्त वारान्, विमर्दिता इत्यनेन सम्बन्धः । चपला पिप्पली । अमृतवल्ली गुडूची । सुररता रलयोरभेदात सुरलता इत्यर्थ, सुरलता ज्योतिष्मती । अञ्जल अञ्जलिका, लाजालुरित्यर्थ , "सारिवासुररताञ्जलतोये" इत्यत्र "मार्ङ्गिकासुरलताञ्जलितोये" इति कुत्रचित पाठ , एषा तोये क्वाथे । वारिवाट् मुस्तकम्, वार्य्युपपदपूर्वकस्य वहधातो क्विपि निपातनात् । अमृत वाराहीकन्द । यष्टिका यष्टिमधु । वरी शतावरी । वानरी शूकशिम्बी । भुजगदृष्टि सर्पाक्षी "पानशिउलि" इति ख्यातम् । अर्द्धभागमहिफेनकमिति एकभागापेक्षया अहिफेनस्यार्द्धत्वम् । सुरसपुष्परसेन तुलसीमञ्जरीस्वरसेन । अर्ककरहाट आकारकरभ, "आकरकरा" इति ख्यातम् । श्रावणी मुण्डिरी । नाभिजद्रवयुत मृगनाभिजलसयुत, तच्च फाण्टकषायविधिना कर्त्तव्यम । निधुवने सुरतकर्मणि । तृतीययामे इति अङ्क । अस्य पत्री—पारद १ स्वर्ण २ सीसक ३, अभ्र ४ वङ्ग ५, लौह ६, स्वर्णमाक्षिक अथवा तुत्थ ७ रौप्य ८, स्वर्णमाक्षिक' ९. एकीकृत्य धुस्तूरादीना यथायोग्य रसेन क्वाथेन वा सप्तवारान् भावयेत, ततस्तस्मिन् सूतार्द्धम् अहिफेन मिश्रयित्वा सुरसपुष्पादीना रसेन एकैकवार मर्दयेत्, ततः

सहस्रशः सन्ति यदा तरुण्यो मदालसाः पीनपयोधरा दृढाः।
तदा रसेन्द्रः परिषेवणीयो विकारकारी भवतीह नान्यथा ॥११४॥

अथ कामेश्वरो मोदकः।—

सम्यङ्मारितमभ्रक कटुफल कुष्ठाश्वगन्धा वचा
मेथी मोचरसो विदारिमुषलीगोक्षुरकेक्षुरकम्।
रम्भाकन्दशतावरी ह्यजमुदा माषास्तिला धान्यकं
यष्टीनागबलाकचूरमदन जातीफलं सैन्धवम् ॥११५॥
भार्गी कर्कटशृङ्गिका त्रिकटुक द्वे जीरके चित्रकं
चातुर्जातपुनर्नवागजकणा-द्राक्षाशठीकट्फलम्।
शाल्मल्यङ्घ्रिफलत्रिकं कपिभवं बीजं समं चूर्णयेत्
चूर्णार्द्धा विजया सिता द्विगुणिता मध्वाज्यमिश्रन्तु तत् ॥११६॥

कुङ्कुमोदकेन मृगनाभिजलेन च सप्त सप्त वारान् विभाव्य माषद्वयमिता वटिका कृत्वा शर्करामधुभ्यां प्रयोजयेदिति। किमिति।—तनुकामिना स्वल्पकामवता, क्षीणशुक्रत्वात् हर्षविहीनानामित्यर्थः, आशु कामे कामोद्दीपने मलयजेन श्रीखण्डेन किम्? अवश्यजेन कर्पूरनिर्य्यासेन उद्दीपकेन वा किम्? न किमपि प्रयोजनमित्यर्थः, रसेनानेनैव तत्कर्मसम्पादनात। दृढा रतिदक्षा ॥ १०६—११४ ॥

कामेश्वरमोदके—कटुफल कक्कोलम्। "वचा" इत्यत्र "अमृता" इति पाठान्तरम्। विदारी भूमिकुष्माण्ड। मुषली तालमूली। इक्षुरक कोकिलाक्ष। "इक्षुरकम्" इत्यत्र नपुंसकलिङ्गता द्वन्द्वैकवद्भावात, "इक्षुरका" इति पाठकल्पना हेया। अजमुदा अजमोदा, यमानीत्यन्ये। यष्टी यष्टिमधु। नागबला गोरक्षतण्डुला। कचूर शटी। मदन दमनक, "दना" इति भाषा, "दमनम्" इति पाठान्तरम्। रसरत्नाकरे तथा भैषज्यरत्नावल्याञ्च "सम्यक्" इत्यादि प्रथमपादे "चूर्णाभ्र गगन घनार्द्धविमल गन्धश्च कुष्ठामृता" इति, तथा तृतीयचतुर्थपादयोश्च "भीरुश्चैव कशेरुक यमानिका तालाङ्कुर धान्यक यष्टी नागबला सिला मधुरिका जातीफल सैन्धवम्" इति पाठान्तरम्। गजकणा गजपिप्पली। "कट्फलम्" इत्यत्र "बालकम्" इति पाठान्तरम्। शाल्मल्यङ्घ्रि शाल्मलीमूलम्। कपिभवं बीज शूकशिम्बीबीजम्। चूर्णार्द्धा विजया मिलितचूर्णापेक्षया विजयाचूर्णस्य अर्द्धभाग। "चूर्णांशा" इति

कर्षार्द्धा गुलिका विलेह्यमथवा कृत्वा च तत् सेवयेत्
पेया क्षीरसिताऽनुबोध्यं करणे स्तम्भेऽप्यय कामिनाम्।
रामावश्यकरः सुखातिसुखदः प्रौढाङ्गनाद्रावकः
क्षीणे पुष्टिकरः क्षयक्षयकरो नानाऽऽमयध्वंसकः ॥११७॥
नित्यानन्दकरो विशेषकविताबाचाविलासोद्भवं
धत्ते सर्वगुणं महास्थिरवयो ध्यानावधानेऽप्यलम् ।
अभ्यासेन निहन्ति मृत्युपलितं कामेश्वरो वत्सरात्
सर्वेषां हितकारको निगदितः श्रीनित्यनाथेन सः ॥११८॥

अथ स्तम्भने कृकवाकुप्रयोगः ।—

कृकवाकूग्रपिच्छन्तु मुद्रिकाकारकं कृतम् ।
ऊर्णनाभेः सुजालेन वेष्टयित्वाऽथ धारयेत् ॥
वामहस्तकनिष्ठाया नरो वीर्य्यं न मुञ्चति ॥११९॥

क्वाचित्कः पाठः न समीचीनः, रसरत्नाकरादिविरोधात्। सिता द्विगुणिता विजयाचूर्णसहितसर्वचूर्णमपेक्ष्य सिताया द्वैगुण्यम् । मध्वाज्यमिश्रं मोदकबन्धनोपयोगिघृतमधुसहितम् । "कर्षार्द्धा गुलिका विलेह्यमथवा कृत्वा च तत् सेवयेत्" इत्यत्र "कर्षार्द्धा गुलिका विधाय विधिना राजा सदा सेवयेत्" इति रसरत्नाकरोक्तः, "कर्षार्द्धा गुटिकाऽथ कर्षमथवा सेव्या सता सर्वदा" इति भैषज्यरत्नावल्युक्तो वा पाठः सुगमः । क्षयक्षयकरः क्षयरोगनाशनः । विशेषकविताबाचाविलासोद्भवं विशेषा उत्कर्षवती, या कविताबाचा कवित्वद्योतकवाक्यं, कवित्वशक्तिरित्यर्थः तस्याः विलासात् स्फुरणात् उद्भवः उत्पत्तिः यस्य तादृशं, तथा महास्थिरवयः महत् प्रशस्तम्, आरोग्यादिसमन्वितमित्यर्थः, स्थिरं यौवनस्थमित्यर्थः, वयः येन तथाभूतः, स्वास्थ्यादिसम्पन्नवयःप्रदरूपमित्यर्थः, सर्वगुणं धत्ते, मोदकोऽयमिति शेषः । ध्यानावधाने ध्याने विषयचिन्तने परमात्मचिन्तने वा यत् अवधानम् अप्रमादः, चित्तैकाग्रीकरणं तत्र अलं समर्थः ॥ ११५—११८ ॥

कृकवाकुप्रयोगे—कृकवाकुः कुक्कुटः तस्य उग्रपिच्छम् ऊर्द्ध्वभावेनावस्थितं पुच्छम्, उग्रं पृष्ठग्रन्थि तत्रस्थं पुच्छमित्यर्थो वा । "कृकवाक्वग्रपिच्छम्" इति कस्यचित् पाठः । मुद्रिकाकारकम् अङ्गुरीयकाकारम् ॥ ११९ ॥

अथ स्तम्भने कर्पूरादिप्रलेपः ।—

कर्पूरं टङ्कणं सूतं मुनिपुष्परसं मधु ।
मर्दयित्वा लिपेत्तेन लेपो यावत्तु तिष्ठति ॥१२०॥

अथ स्तम्भने पुण्डरीकप्रयोगः ।—

लिङ्गन्तु पुण्डरीकस्य चूर्णीकृत्य प्रयोजयेत् ।
मधुना तिलकं कृत्वा रेतस्तम्भकरो ह्यलम् ॥१२१॥

अथ पूर्णचन्द्रः ।—

सूतं गन्धञ्चाश्वगन्धागुडूची-यष्टीतोयैर्वासरैकं विघृष्य ।
क्षुद्रं शङ्खं मौक्तिकं लौहकिट्टं भस्मीभूतं सूततुल्यञ्च दद्यात् ॥१२२॥
भूकुष्माण्डैर्वासरैकं विघृष्य गोलं कृत्वा भूधरे तं पुटेत ।
चूर्णं कृत्वा नागवल्लीरसेन दद्यादेकं मर्दयित्वा च निष्कम् ॥१२३॥
मध्वाज्याभ्यां पूर्णचन्द्रः रसेन्द्रः पुष्टिं वीर्य्यं दीपनञ्चैव कुर्य्यात् ।
योज्यश्चायं पित्तरोगे ग्रहण्यामर्शोरोगे सेवयेत् बीलयुक्तम् ॥१२४॥
स्त्रीणां तापे शाल्मलीनीरयुक्तं मात्रामानं कालदेशौ विभज्य ॥
१२५॥

कर्पूरादिप्रलेपे—मुनिपुष्परसम् अगस्त्यपुष्पस्वरसम् । लेपो यावत्तु तिष्ठति इत्यस्य नरो वीर्य्यं न मुञ्चति इति पूर्वोक्तेन सम्बन्धः ॥ १२० ॥

पुण्डरीकप्रयोगे—पुण्डरीकस्य श्वेतपद्मस्य, लिङ्गं केशरमित्यर्थः, स्तम्भनयोगे शुभ्रपद्मस्य केशरस्यैव सर्वत्र प्रयोगदर्शनात्, चूर्णीकृत्य मधुना सह तिलकं कृत्वा तिलकरूपेणेत्यर्थः, प्रयोजयेत । रेतस्तम्भकरः इत्यत्र स तिलक इति विशेष्यपदमूहनीयम् । अलम् अत्यर्थम् ॥ १२१ ॥

पूर्णचन्द्रे—क्षुद्र शङ्खः शम्बूकः शङ्खनाभिः वा । "भूकुष्माण्डैः" इत्यत्र "कुष्माण्डैर्वा" इति क्वचित् पाठः । चूर्णमिति ।—चूर्णं कृत्वा नागवल्लीरसेन मर्दयित्वा च निष्पादितमिति शेषः, पूर्णचन्द्रः रसेन्द्रम् एकं निष्कं निष्कमात्रमित्यर्थः, दद्यादित्यन्वयः, "पूर्णचन्द्रो रसेन्द्रः" इति पाठकल्पनं सुगमम् । स्त्रीणां तापे स्त्रीरोगे, प्रदरयोनिव्यापदादिरोगे इत्यर्थः, स्त्रीणां स्त्रीभिः तापे इति वा, स्त्रीणामतिसेवनजनितधातुक्षीणादिरोगे इत्यर्थः ॥ १२२—१२५ ॥

अथ कामदीपन ।—

शुद्धं गन्धं वाजिगन्धाञ्च यष्टिं माकन्दमिक्षुरकमात्मगुप्ताम् ।
मध्वाज्याभ्यां शाल्मलीसत्त्वयुक्ता शम्बूकैर्वा भुज्यते वाऽऽज्यमिश्रैः॥
॥१२६॥

अथ मदनजीवन ।—

कर्पूररससंयुक्त सौभाग्यरससंयुतम् ।
लेपाय क्रियते नित्यं नाम्ना मदनजीवनः ॥१२७॥

अथ महाकल्क ।—

धान्याभ्रक विनिक्षिप्य मुषलीरसमर्दितम् ।
स्थाल्यां क्षिप्त्वा निरुध्याथ पिधान्या मध्यरन्ध्रया ॥१२८॥
स्थाल्यधो ज्वालयेद्वह्निं यामपर्य्यन्तमुद्धतम् ।
तत क्षिपेत् पिधान्या हि व्योम्नस्त्वष्टगुण पयः ॥१२९॥
जीर्णे पयसि पिष्ट्वा तत्तालमूलीरसे. पुन ।
इत्थ हि साधयेत् व्योम त्रिवारमतियत्नतः ॥१३०॥
अजादुग्धैः पुटेत् पश्चाद्वाराणि खलु विंशतिः ।
कम्पिल्लकरसेनापि विष्णुक्रान्तारसेन च ॥१३१॥

कामदीपने—वाजिगन्धाम् अश्वगन्धाम् । माकन्दम् आम्रफलम् । इक्षुरकं कोकिलाक्षम् । शम्बूकै शम्बूकमांसै । आज्यमिश्रै घृतभर्जितैरित्यर्थ , शाल्मलीसत्त्वयुक्तामात्मगुप्ता शुद्धगन्धादिकञ्च मध्वाज्याभ्यां सेवेत, अथवा घृतभर्जितै शम्बूकमांसैः सह चूर्णमिद भुज्यते इति निष्कर्ष । क्वचित पुस्तके द्वितीयपादे—“माजगन्ध माजिगन्धाम्” इति खण्डित पाठो दृश्यते ॥ १२६ ॥

मदनजीवने—कर्पूररससयुक्त कर्पूरपारदाभ्या मिश्रितम् । “सौभाग्यरससयुक्तम्” इत्यत्र “सौभाग्य रससयुतम्” इति पाठकल्पना साधीयसी , सौभाग्य टङ्कण, रस-सयुत सिन्दूरमिश्रमित्यर्थ. , एवञ्च कर्पूरपारदसिन्दूरविमिश्रेण सौभाग्येन लेप काय्य. इति । क्वचित् पुस्तके “कर्पूर रससयुक्तं सौभाग्य रससयुतम्” इति पाठ ॥ १२७ ॥

महाकल्के—विनिक्षिप्य इत्यत्र मुषलीरसे इति शेष. । मुषलीरसमर्दितं तालमूलीरसपिष्टम् । पिधान्या मध्यरन्ध्रया मध्यच्छिद्रेण शरावेण । व्योम्न, अभ्रात् ।

कदलीकन्दतोयेन तालमूलीरसेन च।
शतवारं पुटेदेवं भवेत् व्योम रसायनम् ॥१३२॥
तत् व्योमभसितं ताप्य-भस्म ताम्रस्य भस्म च।
शुल्वभस्म च तत् सर्वं समांश परिकल्पयेत् ॥१३३॥
भावयेत् सप्तधा निम्ब-रसैर्लोध्ररसेन च।
केतक्या मार्कवस्यापि कदल्यास्त्रिफलस्य च ॥१३४॥
कोरकस्यापि सारेण तावद्वाराणि यत्नतः।
इति निष्पन्नकल्केऽस्मिंस्तत्समा त्रिफला क्षिपेत् ॥१३५॥
भस्मसूतं सिता व्योष चित्रकञ्च पृथक् पृथक्।
मधुना गुटिकाः कार्य्याः शाणेन प्रमिताः खलु ॥१३६॥
महाकल्क इति ख्यातो दस्राभ्या परिकीर्त्तितः।
एका गोलीं समारभ्य तथैकैका विवर्द्धयेत् ॥१३७॥
चतुर्गोलकपर्य्यन्त मण्डले मण्डले खलु।
सेवितो द्वादशाब्दन्तु जरामृत्युविवर्जितः ॥१३८॥
सर्वव्याधिविनिर्मुक्तो दृढदीपनपाचनः।
भीमतुल्यबलः श्रीमान् पुत्रसन्ततिसंयुतः ॥१३९॥
सर्वारोग्यमयो भीम-समानभुजविक्रमः।
सर्वाऽऽयाससहिष्णुश्च शीतातपसहस्तथा ॥१४०॥
अमन्दसम्मदोपेत. प्रौढस्त्रीरतिरञ्जनः।
दृढसर्वेन्द्रियो भूत्वा जीवेद्वर्षशतत्रयम् ॥१४१॥
श्वास कासं क्षय पाण्डुं तथैवाष्टौ महागदान्।
मण्डलार्द्धेन शमयेत् ज्वरादीनान्तु का कथा ? ॥१४२॥

क्षीर्षे पयसि दुग्धे शुष्के। विष्णुक्रान्ता अपराजिता। ताप्यभस्म स्वर्णमाक्षिकभस्म। शुल्वभस्म ताम्रभस्म तेन च ताम्रभस्मनो भागद्वयम्। मार्कवस्य भृङ्गराजस्य। कोरकस्यापि सारेण काकोलीरसेन मृणालरसेन वा। तावद्वाराणि सप्त वारान्। तत्समा निष्पन्नकल्कसमाम्। दस्राभ्याम् अश्विनीकुमाराभ्याम्। मण्डले मण्डले प्रत्यष्टचत्वा-

सर्वंगोरससंयुक्तं पथ्यं कार्य्यं रसायने ।
रोगोचितमथान्यच्च दद्यात खलु रोगिणे ॥१४३॥
संसारसुखमिच्छद्भिः सुखं जीवितुमिच्छुभिः ।
नित्यं रसो निषेव्योऽयं दिव्यामृतसमो मतः ॥१४४॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
वाजीकरणनिरूपणं नाम सप्तविंशोऽध्यायः ॥ २७ ॥

रिंशद्दिवसे । अष्टौ महागदान् "वातव्याध्यश्मरीकुष्ठ-मेहोदरभगन्दराः । अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः ॥" इत्युक्तान् उन्माद त्वग्दोष-राजयक्ष्म-श्वास मधु-मेह भगन्दरोदराश्मरीरूपान नारदस्मृत्युक्तान् वा। मण्डलार्द्धेन औषधसेवनदिनादारभ्य चतुर्विंशतिदिवसेन । "सर्वंगोरससयुक्तम" इत्यत्र "सर्वं गोरससयुक्तम्" इति पाठ-कल्पनं साधु । कल्पना चास्यैवंविधा कार्य्या—तालमूलीरसेन पिष्ट धान्याभ्रक स्थाल्यां निधाय मध्यच्छिद्रेण शरावेणाच्छाद्य च प्रहर यावत तीव्राग्निना पचेत प्रहरान्ते च शरावच्छिद्रेण अस्मादष्टगुण दुग्ध स्थाल्या प्रक्षिप्य दुग्धशोष यावत तीव्रज्वाला दद्यात, ततो बहिष्कृत्य पुनस्तालमूलीरसेन पिष्ट्वा पूर्ववत पचेत, एवं वारत्रय कुर्य्यात, ततः छागदुग्धे सह पिष्ट्वा पुटपाकं कुर्य्यात, एव विंशतिवारान्, ततः काम्पिल्लकादीना प्रत्येकरसेन पिष्ट्वा पिष्ट्वा विंशतिपुटं दद्यात, एवञ्च शतवारपुटित तदभ्र ताप्यादि-भस्मना तुल्यमानेन संयोज्य निम्बादीना प्रत्येकरसेन क्वाथेन वा सप्त सप्त वारान् भावयेत्, एव कल्कीकृते तस्मिन्नभ्रादौ सर्वतुल्य त्रिफलादीना प्रत्येक चूर्ण दत्त्वा मधुना शाणमाना गुडिका कुर्य्यात, ततः अष्टचत्वारिंशद्दिनानि एकैका गुडिका भक्षयेत, एकोनपञ्चाशद्दिनमारभ्य षण्णवतिदिनानि यावत् गुडिकाद्वय खादेत, एव प्रत्यष्टचत्वारिंशद्दिवसे एकैका वर्द्धयित्वा गुडिकाचतुष्टय खादेत्, ततो द्वादशाब्दं यावत् चतस्र एव गुडिका प्रतिदिन भक्षयेदिति ॥ १२८—१४४ ॥

इति रसरत्नसमुच्चयबोधिन्यां सप्तविंशोऽध्यायः समाप्तः ॥ २७ ॥

अथाष्टाविंशतितमोऽध्यायः ।

अथ लोहकल्प. ।—

अथ रसस्य प्राधान्यकीर्त्तनम् ।—

अल्पमात्रोपयोगित्वादरुचेरप्रसङ्गत' ।
चिप्रमारोग्यदायित्वादौषधेभ्योऽधिको रसः ॥ १ ॥

सकलग्रन्थेन रसोपरसलौहादियुतो भेषजसमुदाय उक्त, इदानीं तेषा महागुणाना रसविषलौहाना स्वतन्त्राणामेव व्याधिविध्वंसित्वप्रदर्शनाय कल्पस्थानमष्टाविंशाध्याय विवक्षु लौहकल्पं प्रथममारभते। स्थाने चास्मिन् लौहविषरसाना कल्पना वक्ष्यति, तत्र रसस्य औषधेभ्य प्राधान्यख्यापनार्थम् आदौ तद्गुणानाह, अल्पेति।—अल्पमात्रोपयोगित्वात अल्पमात्रया प्रयुक्तस्यापि रसस्य व्याधिनिग्रहणसामर्थ्यादित्यर्थ। औषधेभ्य' क्वाथकल्कादिरूपेभ्य बहुमात्रया प्रयोज्येभ्यः इत्यर्थ, रस पारद मृतलोहादिश्चेत्यर्थ वक्ष्यति चाग्रे स्वयमेव—"मृतानि लोहानि रसीभवन्ति' इति। अधिक गुणाधिक्यकार'। किञ्च पारदापरपर्य्याय रस खलु न केवलमौषधेभ्य एवाधिक, परन्तु योगसाधनत्वात् बहुकार्य्यकरत्वात मुक्तिप्रदत्वाच्च सर्वेभ्य एवाधिक, यत उक्त रसेन्द्रचिन्तामणौ—"अचिराज्जायते देवि! शरीरमजरामरम्। मनसश्च समाधान रसयोगादवाप्यते ॥ सत्त्वञ्च लभते देवि! विज्ञान ज्ञानपूर्वकम्। सत्य मन्त्राश्च सिध्यन्ति योऽश्नाति मृतसूतकम् ॥ यावन्न शक्तिपातस्तु यावन्न पाशकृन्तनम। तावत्तस्य कुत शुद्धिर्जायते भस्मसूतके ? ॥ यावन्न हरबीजन्तु भक्षयेत पारद रसम्। तावत्तस्य कुतो मुक्ति कुत पिण्डस्य धारणम् ? ॥ स्वदेहे खेचरत्वञ्च शिवत्व येन लभ्यते ॥" इति। अपरञ्च—"दोषहीनो रसो ब्रह्मा मूर्च्छितस्तु जनार्दन। मारितो रुद्ररूपी स्यात् बद्ध साक्षात् सदाशिव ॥" इति। तस्य दर्शनात स्पर्शनात भक्षणात स्मरणात् पूजनात् दानाच्च षड्विध फल लभ्यते। यथा—"केदारादीनि लिङ्गानि पृथिव्या यानि कानिचित। तानि दृष्ट्वा च यत् पुण्य तत पुण्य रसदर्शनात ॥ चन्दनागुरुकर्पूर कुङ्कुमान्तर्गतो रस। मूर्च्छित. शिवपूजा सा शिवसान्निध्यसिद्धये ॥ भक्षणात् परमेशानि! हन्ति तापत्रय रस। दुर्लभ ब्रह्मविष्ण्वाद्यै. प्राप्यते परम पदम् ॥ हृद्योमकर्णिकान्त.स्थं रसेन्द्रं

अथ रसभेदा ।—

लोह मृत कन्दविषं सूतश्चेति निगद्यते ॥ २ ॥

अथ पानीयकषायविधि ।—

कार्य्य पानकषायोऽस्मिन षोडशांशावशेषित: ॥ ३ ॥

परमेश्वरि ।। स्मरन् विमुच्यते पापै सद्यो जन्मान्तरार्जितै ॥ स्वयम्भूलिङ्गसाहस्रैर्यत् फल सम्यगर्चनात् । तत् फल कोटिगुणित रसलिङ्गार्चनाद्भवेत् ॥ रसविद्या परा विद्या त्रैलोक्येऽपि च दुर्लभा । भुक्तिमुक्तिकरी यस्मात् तस्मात् ज्ञेया गुणान्विते ॥" इत्यादिगुणो ज्ञेय इति ॥ १ ॥

"औषधेभ्योऽधिको रस" इत्युक्त, तत्र कस्तावद्रस ? इत्याशङ्कायां तमेव विवृणोति, लोहमिति ।—मृत लोह भस्मीकृता स्वर्णाद्यष्टौ धातव , ते च—"सुवर्ण रजत ताम्र कांस्य पित्तलमेव च । नाग वङ्ग तथा लोह धातवोऽष्टौ प्रकीर्त्तिता ॥" इति, "शुद्धलोहम्" इत्यादिना लोहनिरूपणाध्याये उक्त वा । कन्दविष विषकल्पे वक्ष्यमाण कर्कटादिक, युक्तियुक्त प्रयुक्तस्य विषस्यापि रसवत् रसायनत्वात रसत्वम् , यदुक्त—"विष प्राणहर तच्च युक्तियुक्त रसायनम्" इति , किञ्च नानार्थध्वनिमञ्जर्य्यादौ रसशब्देन विषस्यापि ग्रहणात विषस्य रसत्वम् , यदुक्त—"शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रस" इति । निगद्यते इत्यत्र रस इति शेष ॥ २ ॥

अत्रैव लोहकल्पादिषु विविधक्वाथानामनुपानत्वेन सहपानत्वेन च विधानात् तत्साधनप्रकारमाह, कार्य्य इति ।—अस्मिन् लोहकल्पादौ, न त्वन्यत्र इत्यथ , तत्र चतु पञ्च षडष्ट द्वादशार्द्धांशावशेषनियमात । षोडशांशावशेषित इत्यनेनास्य पाचन-शोधन क्लेदन सशमन दीपन तर्पण शोषणभेदेन सप्तविधेषु कषायभेदेषु शोषणकषायत्व ख्यापित, तेषु अर्द्धावशेष पाचन , द्वादशांशक शोधन , चतुरंशक क्लेदन , अष्टांशक संशमन , षडशको दीपन , पञ्चमांशकस्तर्पण , शोषणश्च षोडशांशक इत्युक्तत्वात् , यदुक्त राजनिघण्टौ—"पाचन शोधनीयश्च क्लेदन शमनस्तथा । दीपनस्तर्पण शोष इति सप्तविधा स्मृता ॥ पाचनोऽर्द्धावशेषश्च शोधनो द्वादशांशक । क्लेदनश्चतुरंशस्तु शमनोऽष्टांशको मत ॥ दीपनस्तु षडंशश्च तर्पण पञ्चमांशक । शोषण षोडशांशश्च क्वाथभेदा इतीरिता ॥" इति । किञ्च आत्रेयेणाप्युक्त—"पाचनो दीपनीयश्च शोधन शमनस्तथा । तर्पण क्लेदन, शोष क्वाथ सप्तविधो मत ॥ पाचन, पच्यते दोषान् दीपनैर्दीप्यतेऽनल । शोधनो मलशोधी स्यात शमन शमयेत् गदान् ॥ तर्पणस्तर्प्यते धातून् क्लेदी हृत्क्लेदकारक. । विशोषी शोषमादत्ते तस्मात् क्वाथाम्बु

अथ स्वर्णशोधनम्।—

अथ पञ्चमृदा लिप्तं हेम्नः पत्रं पुटानले।
विपचेत्—"

अथ रौप्यशोधनम्।—

"—नागमावाप्य रूप्यञ्चोर्द्ध्वाग्निना धमेत्॥४॥

अथ ताम्रशोधनम्।—

स्नुह्यर्कक्षीरलवण-क्षाराम्लकृतलेपनम्।
तप्ततास्रस्य निर्गुण्ड्या रसे सिञ्चेत् पुनः पुनः॥५॥

परीक्षयेत॥ पाचनोऽर्द्धावशेषः स्यात् शोधनो द्वादशांशकः। क्लेदनस्तुरंशस्य शमनोऽष्टावशेषितः॥ दीपनीयः षडंशस्तु तर्पणः पञ्चमांशकः। विशेषो षोडशांशस्य क्वाथभेदाः प्रकीर्त्तिताः॥" इति। अत्र दूषितरसदोषादिशोषणपूर्वकं नवयौवनस्य कान्त्यादिसम्पादकत्वात् लोहादीनां रसायनानां, तदनुपाने विशेषिक्वाथः षोडशांशावशेषितः विहित इति मन्तव्यम्, यद्वा—षोडशांशावशेषितः इत्यस्य षोडश इति पदं समासान्तर्गतमपि पृथक्कृत्य षोडशगुणं जलं दत्त्वा अंशावशेषितः क्वाथ इति व्याख्या करणीया, एषा च व्याख्या तन्त्रानुसारिणी पानीयकषायेषु, यदुक्तं परिभाषायाम्—"दशरक्तिकमानेन गृहीत्वा तोलकद्वयम्। दत्त्वाऽम्भः षोडशगुणं ग्राह्यं पादावशेषितम्॥" इति। भावप्रकाशेऽप्युक्तं—"पादशिष्टः कषायः स्यात् यः षोडशगुणाम्भसा॥" इति॥ ३॥

इदानीं स्वर्णादिलोहानां शोधनादिकं विवक्षुरादौ स्वर्णशोधनमाह, अथेति।—पञ्चमृदा "इष्टिका गैरिका लोणं भस्म वल्मीकमृत्तिका। रसप्रयोगकुशलैः कीर्त्तिता पञ्चमृत्तिका॥" इत्युक्तेन मृत्पञ्चकेन, सुसूक्ष्मस्वर्णपत्रं पञ्चमृत्तिकया आलिप्य पुटाग्नौ विपचेत्, एवं सुवर्णं विशुद्धं भवति। रसेन्द्रचिन्तामणावप्युक्तं—"वल्मीकमृत्तिका धूमं गैरिकं चेष्टका पटु। इत्येता मृत्तिकाः पञ्च जम्बीरैरारनालकैः॥ पिष्ट्वा लेप्यं स्वर्णपत्रं श्रेष्ठं पुटेन सिध्यति॥" इति। रौप्यशुद्धिमाह, नागमिति।—रूप्यं सूक्ष्मरौप्यपत्रं, नागं सीसकम् आवाप्य कल्कीकृत्य, पिष्टसीसकेन प्रलिप्य इत्यर्थः, ऊर्द्ध्वाग्निना उपरिस्थेन वह्निना, भूधरपुटेनेत्यर्थः, तीक्ष्णाग्निनेत्यर्थः वा, धमेत् पचेदित्यर्थः॥ ४॥

ताम्रशोधनमाह, स्नुहीति।—तप्ततास्रस्य इत्यत्र पत्रमिति शेषः, स्नुह्यर्कक्षीरादिभिः ताम्रपत्रं लिप्त्वा प्रताप्य निर्गुण्डीरसे द्वादशवारं निर्वापयेत्, तथा

अथ वङ्गनागयोः शोधनम्।—

वङ्गनागं रसे तस्मिंस्तन्मूलेनावचूर्णकम् ॥६॥

अथ कान्तलौहस्य लक्षणम्।—

यत्पात्राध्युषिते तोये तैलविन्दुर्न सर्पति।
तारेणाऽऽवर्त्तते यत्तत् कान्तलौहन्तु तत् स्मृतम् ॥७॥

अथ कान्तलौहस्य शोधनम्।—

अयसामुत्तमं सिञ्चेत्तप्तं वरारसे ॥८॥

च रसेन्द्रचिन्तामणि —"स्नुह्यर्कक्षीरलवण-काञ्जिकैस्ताम्रपत्रकम्। लिप्त्वा प्रताप्य निर्गुण्डीरसे सिञ्चेत पुन पुन ॥ वारान् द्वादश तत् शुध्येत् लेपात् तापाच्च शोषणात् ॥" इति ॥ ५ ॥

वङ्गनागशोधनमाह, वङ्गनागमिति।—रसे तस्मिन् निर्गुण्डीरसे, निक्षिप्तमिति शेष। तन्मूलेनावचूर्णक निर्गुण्डीमूलचूर्णेन कृतावचूर्णन, निर्गुण्डीमूलचूर्णेन वङ्गनागपत्रे प्रलिप्य सशोष्य सन्ताप्य च निर्गुण्डीरसे सप्तधा सिञ्चेदिति ॥ ६ ॥

कान्तलौहस्य लक्षणमाह, यदिति।—यत्पात्राध्युषिते अस्य यल्लौहस्य पात्रे अध्युषित स्थित तस्मिन्। न सर्पति न विसरति, विसृति न भजते इत्यर्थ। तारेण रौप्येण द्रुतरौप्यपत्रेणेत्यर्थ, आवर्त्तते गलित सत मिश्रीभवतीत्यथ, यल्लौहपात्रस्थजले निक्षिप्त तैलविन्दु न विसृतो भवति, यच्च लौह रौप्येण सह द्रवीकृतम् एकीभवति तत् कान्तलौहम, अन्यत्राप्युक्त—"यत्पात्रे न प्रसरति जले तैलविन्दु प्रतप्ते हिङ्गुर्गन्ध त्यजति च निज तिक्तता निम्बकल्क। तप्त दुग्ध भवति शिखराकारक नैति भूमिं कृष्णाङ्ग स्यात सजलचणक कान्तलौह तदुक्तम् ॥" इति। अन्यच्च—"स्वादुर्यत्र भवेन्निम्बकल्को रात्रिन्दिवोषित। कान्त तदुत्तम यच्च रूप्येणावर्त्तित मिलेत ॥" इति ॥ ७ ॥

कान्तलौहस्य शोधनमाह, अयसामिति।—अयसामुत्तम कान्तलौहम। वरारसे त्रिफलाक्वाथे, क्वाथविधिश्च रसरत्नाकरे—"त्रिफलाऽष्टगुणे तोये त्रिफलाषोडश पलम। तत्क्वाथे पादशेषे तु लौहस्य पलपञ्चकम् ॥ कृत्वा तप्तानि पत्राणि सप्तवार निषेचयेत्। एव प्रलीयत दोषो गिरिजो लौहसम्भव ॥" इति ॥ ८ ॥

अथ धातूना सामान्यमारणम् ।—

एव शुद्धानि लोहानि पिष्टान्यम्लेन केनचित् ।
मृतसूतस्य पादेन प्रलिप्तानि पुटानले ॥
पचेत्तुल्यस्य वा ताप्य-गन्धाश्महरतेजसः ॥९॥

अथ स्वर्णमारणम् ।—

अथवा मृतनागेन स्नुहीक्षीरेण काञ्चनम् ॥१०॥

अथ रौप्यमारणम ।—

रूप्य स्नुक्क्षीरताम्राभ्या—"

अथ ताम्रमारणम ।—

"—ताम्रं मूत्राम्लगन्धकै ॥११॥

अथ वङ्गमारणम ।—

हरितालपलाशाभ्या वङ्ग—"

सर्वेषा लोहाना सामान्यतो मारणमाह, एवमिति ।—अम्लेन केनचित् जम्बीर-मातुलुङ्गादीनामम्लाना केनचिदम्लेन । मृतसूतस्य पादेन लोहाच्चतुर्थाशेन सूतभस्मना । मतान्तरमाह, तुल्यस्येति ।—गन्धाश्मा गन्धक । हरतेज पारद । अम्लपिष्ट लोहपत्रं तुल्यमानताप्यादित्रयेण लोहपादिकेन प्रलिप्य पुटानले पचेदिति ॥ ९ ॥

अथ प्रत्येकधातूना पृथक् पृथक् मारण निवक्षुरादौ स्वर्णमारणमाह, अथवेति । —अत्र अथवाशब्द सामान्यमारणापेक्षया बोद्धव्य । मृतसीसक स्नुहीक्षीरे पिष्ट्वा तेन स्वर्णपत्रमालिप्य गजपुटे पचेत । अत्र तन्त्रान्तरदर्शनात वक्ष्यमाणा क्रियाऽपि कार्य्या—उक्तरीत्या पुटित स्वर्णपत्रम् उद्धृत्य अष्टमाशमृतनागेन सह अम्लद्रवे पिष्ट्वा ऊर्द्धाध सीसकचूर्णं दत्त्वा च अष्टधा पचेत, यदुक्त रसरत्नाकरे—"मृत नाग स्नुहीक्षीरैरथवाऽम्लेन केनचित । पिष्ट्वा लेप्य स्वर्णपत्र रुद्ध्वा गजपुटे पचेत ॥ आदाय पेषयेदम्लैर्मृतनागस्याष्टमाशकम् । रुद्ध्वा गजपुटे पश्चात् पूर्वनागयुत युतम् ॥ एव पुन॰ पुन पश्चादष्टधा म्रियते ध्रुवम् ॥" इति ॥ १० ॥

रौप्यमारणमाह, रूप्यमिति ।—हतताम्र स्नुहीक्षीरेण पिष्ट्वा तेन रौप्यपत्र-मालिप्य गजपुटे पचेत । ताम्रमारणमाह, ताम्रमिति ।—मूत्र गोमूत्रम् । अम्लं काञ्जिकम ॥ ११ ॥

वङ्गमारणमाह, हरितालेति ।—पलाश पलाशस्वरस , पलाशरसेन हरितालं

अथ सीसकमारणम् ।—

"—नाग मनोह्वया ॥१२॥

अथ वङ्गस्य मारणान्तरम् ।—

पारिभद्रस्य च रसेनाथवा भर्जयेत्त्रपु ॥१३॥

अथ सीसकस्य मारणान्तरम् ।—

चिञ्चाक्षभित्तुवीरद्रु-बोधिवृक्षैरहिं पुनः ।

अहिमाराहिदमनी-वासावज्रलतार्जुनैः ॥१४॥

पिष्ट्वा तेन वङ्गपत्र प्रलिप्य पुट दद्यात । यदुक्त योगरत्नाकरे—"पलाशद्रवयुक्तेन वङ्गपत्राणि लेपयेत । तालेन पुटित भस्म त्रिवार जायते ध्रुवम ॥" इति । क्वचित् हरितालेन सह मात्तिकयोगोऽपि दृश्यते, तथा च रसरत्नाकरे—"मात्तिकं हरितालञ्च पलाशम्बरसेन च । कृतकल्केन सलिप्य वङ्गपत्राणि मारयेत ॥" इति । सीसकमारणमाह, नागमिति ।—मनोह्वया मन शिलया । जलेन मन शिला पिष्ट्वा तेन सीसकमालिप्य यावता पुटेन भस्मता याति तावत् पुटेत् । क्वचित् वासापत्ररसेन ताम्बूलीपत्ररसेन वा मन शिला पिष्ट्वा तेन कल्केन नागपत्र प्रलिप्य त्रिपुटेन द्वात्रिंशत्पुटेन वा नागमारण कार्य्यमिति दृश्यते, तथा च सारकौमुद्या—"मन शिलायुतो नाग वासारसविमर्दित । त्रिभिर्गजपुटैर्भस्म भवेत्तन्मेहरोगजित् ॥" इति । तथा योगरत्नाकरे—"ताम्बूलीरससम्पिष्ट शिलालेपात पुन पुन । द्वात्रिंशद्भिः पुटैर्नागो निरुत्थो जायते ध्रुवम् ॥" इति ॥ १२ ॥

वङ्गस्य मारणान्तरमाह, पारिभद्रस्येति ।—त्रपु वङ्गम् । पारिभद्रस्य रस दत्त्वा दत्त्वा वङ्ग लौहकटाहे भस्मता यावत लौहदण्डेन सञ्चाल्य पचेदिति ॥ १३ ॥

सीसकस्य मारणान्तरमाह, चिञ्चेति ।—चिञ्चा तिन्तिडी, अस्यास्त्वक् । अक्षः बिभीतक । भित्तु श्रावणी । वीरद्रु वीरतरु, भल्लात इत्यर्थ, तन्त्रान्तरे "भल्लात" इति पाठदर्शनात । बोधिवृक्ष अश्वत्थ । अहि सीसकम् । अहिमार विट्खदिर । अहिदमनी नागदमनी । वज्रलता अस्थिसंहार । अत्रोक्त "अहिमाराहिदमनीवासा" इत्यत्र रसरत्नाकरे "बलापामार्ग" इति पाठान्तरम् , तथा च—"चिञ्चाऽश्वभित्तु-भल्लात बलावज्रलताभवै । अपामार्गार्जुनाश्वत्थ भस्मभिर्भर्जयेद्दृढम ॥ लौहपात्रे च सप्ताह तुल्य भस्मानि चाशु च । दण्डे पलाशके चैव म्रियते नात्र संशय ॥" इति । सीसक लौहकटाहे द्रावयित्वा चिञ्चात्वगादिभस्म क्रमात तत्र प्रक्षिप्य च पलाशदण्डेनालोड्यालोड्य भस्मीकुर्य्यादिति ॥ १४ ॥

अथ लौहमारणम्।—

क्षीरस्तन्ये हिङ्गुलेनायः पचेल्लिप्ता पुटेऽनले ॥१५॥

अथ असम्यङ्मारितलौहस्य लक्षणम्।—

सर्वमेव मृतं लौहं सोत्थानं यदि सेवनात्।

शूकवर्णाभकण्ठत्वक्-स्फोटारुचिविबन्धकृत् ॥१६॥

अथ निरुत्थलौहस्य लक्षणम्।—

पक्वं यावन्निरुत्थानं सेव्यं वारितरं हि तत् ॥१७॥

अथ निरुत्थलौहस्य परीक्षा।—

कान्ते पुनः कलाभाग-ताप्ये सक्षौद्रसर्पिषि।

क्षिप्तमावर्त्तितं तारं स्वप्रमाणं भवेद्यदि ॥

जानीयात्तन्निरुत्थानं—" ॥ १८ ॥

लौहमारणमाह, क्षीति।—हिङ्गुलं मानुषीदुग्धेन पिष्ट्वा तेन लौहपत्रीमालिप्य पुटपाकेन पचेत्। रसरत्नाकरे तु हिङ्गुललौहयोर्मानं तथा त्रिफलाक्वाथादिनाऽपि मर्दनमुक्तं, तथा च—"हिङ्गुलस्य पलान् पञ्च नारीस्तन्येन पेषयेत्। तेन लौहस्य पत्राणि लेपयेत् पलपञ्चकम् ॥ रुद्ध्वा गजपुटे पश्चात् कषायैस्त्रैफलैः पुनः। अन्वैरारनालैर्वा विमर्द्दयेत् हिङ्गुलम् ॥ पिष्ट्वा रुद्ध्वा पुटेल्लौहं तथैव पाचयेत् पुनः। चत्वारिंशत्पुटैरेवं कान्तं तीक्ष्णञ्च मुण्डकम् ॥ म्रियते नात्र सन्देहः दत्त्वा दत्त्वा च हिङ्गुलम् ॥" इति ॥ १५ ॥

असम्यङ्मृतस्य लौहस्य लक्षणमाह, सर्वमिति।—सर्वमेव अष्टविधमेवेत्यर्थः, मृतं लौहं सेवनात् यदि शूकवर्णाभकण्ठादिकृत् शूकवर्णाभकण्ठं शूकस्य जल-शूकस्य वर्णः कृष्णवर्णं इत्यर्थः, स इव आभा यत्र तादृशः कण्ठः तदादिकृत्, भवेदिति शेषः तदा तत् सोत्थानम् अनिरुत्थमसितम् इति ज्ञेयम् ॥ १६ ॥

निरुत्थलौहस्य लक्षणमाह, पक्वमिति।—पक्वं मृतं लौहं यावत् यदा वारितरं वारिणि जले तरतीति तादृशं जले प्लवमानं, भवेत् इति शेषः, तदा निरुत्थानम् इति ज्ञेयं, ततः तादृशनिरुत्थलौहं, सेव्यम् ॥ १७ ॥

निरुत्थलौहस्य परीक्षामाह, कान्ते इति।—कलाभागताप्ये कलाभागः षोडशांशः ताप्यं स्वर्णमाक्षिकं यत्र तादृशे। आवर्त्तितं द्रवीकृतम्। स्वप्रमाणं तारप्रमाणम्, षोडशांशस्वर्णमाक्षिकेण तुल्यक्षौद्रसर्पिषा च मिश्रिते कान्तलौहभस्मनि किञ्चित् रौप्यद्रावं निक्षिपेत्, कियदन्तरे तं द्रावं लौहात् पृथक्कृत्य तुलितं यदि दत्तप्रमाणमेव तिष्ठेत्

अथ अनिरुत्थलौहस्य पुनर्मारणम् ।—

"—सोत्थानञ्च मुहुर्मुहुः ।
त्रिफलाक्वाथसम्पृक्तं विपचेत् पुटपावके ॥१९॥

अथ प्रथम द्वितीयलौहकल्पौ ।—

हेम्नो रूप्यस्य वा भस्म वरीभृङ्गाम्बुभावितम् ।
गुञ्जाप्रमाणं त्रिफला-सितामध्वाज्यमिश्रितम् ॥
हृद्यं वृष्यमायुष्यं कामलापाण्डुकुष्ठजित् ॥२०॥

अथ तृतीयलौहकल्पः ।—

गन्धकेन समांशेन प्राग्वत्ताम्रञ्च मारितम् ।
धान्याभ्रकञ्च तुल्यञ्च दशनिष्कं पृथक् पृथक् ॥२१॥
भावितं मातुलुङ्गाम्लेनाऽऽर्द्रकस्य रसेन च ।
ताम्रं सोष्णोदकं गुल्म-प्लीहशूलामवातजित् ॥२२॥

नाधिकं न वा हीनमात्रं भवेत्, तदा तल्लौहं निरुत्थमिति ज्ञातव्यमिति । रसरत्नाकरे तु ताम्रयोगं विनैव परीक्षाविधिरयं परिदृश्यते, तथा च—"मध्वाज्यमृतलौहञ्च सरूप्यं सम्पुटे पचेत् । रुद्ध्वाऽऽध्माप्य तु सङ्ग्राह्यं रूप्यञ्च पूर्वमानकम् ॥ तदा लौहं मृतं विद्यादमृतं मारयेत् पुनः ॥" इति ॥ १८ ॥

सोत्थानस्य पुनर्मारणप्रकारमाह, सोत्थानमिति ।—सोत्थानम् अनिरुत्थं लौहं मुहुर्मुहुः बहुकृत्वः, निरुत्थं यावत्, त्रिफलाक्वाथसम्पृक्तं त्रिफलाक्वाथेन पिष्ट्वा इत्यर्थः ॥ १९ ॥

प्रथमद्वितीयलौहकल्पद्वयमाह, हेम्न इति ।—वरीभृङ्गाम्बुभावितं शतावरीभृङ्गराजयोः रसाभ्यां सप्तधा मर्दितम् । गुञ्जाप्रमाणमिति भस्म इत्यनेन सम्बध्यते ॥ २० ॥

तृतीयलौहकल्पमाह, गन्धकेनेति ।—प्राग्वत् पूर्ववत् "एवं शुद्धानि लौहानि" इत्यादिप्रदर्शितसरण्या, मूत्राम्लगन्धकैर्वा, शोधितताम्रपत्रम् अम्लेन पिष्ट्वा सूतसूत-पादेन लिम्पेत्, ततः ताम्रतुल्यं गन्धकम् ऊर्द्धाधो दत्त्वा पुटाग्नौ पचेत्, अथवा ताम्रतुल्यं गन्धकं मूत्राम्लाभ्यां पिष्ट्वा तत्कल्केन ताम्रपत्रं प्रलिप्य च पचेत् इत्यर्थः, ततः तत् ताम्रभस्म धान्याभ्रकं तुल्यञ्च प्रत्येकं दशनिष्कं गृहीत्वा मातुलुङ्गरसेनार्द्रकरसेन च सप्तधा विभाव्य उष्णोदकेन गुल्मादिषु योजयेदिति । योगेऽस्मिन् ताम्रेण सह तुल्याभ्रयोः संयोगे सत्यपि "ताम्रं सोष्णोदकम्" इत्यनेन यत् केवलं ताम्रमिति कृतं, तत्

अथ ताम्रद्रुतिसञ्ज्ञक चतुर्थलोहकल्प ।—

आर्द्रालकुचभृङ्गाणां रसपिष्टेन कस्यचित् ।
गन्धकेन समांशेन प्राग्वत्ताम्रञ्च मारितम् ॥२३॥
कञ्चुकस्थमिह त्रिंशत्कर्षं चूर्णितगन्धकम् ।
दत्त्वाऽल्पशोऽग्निनाऽल्पेन दत्त्वा धूमं विसर्जयेत् ॥२४॥
प्रस्थाम्बुमर्दितस्यास्य प्रसादान्नि.स्रुत युतम् ।
तुल्यनीलशिलाजाभ्या कर्षांशाभ्या विशोषयेत् ॥२५॥
ताम्रद्रुतिरियं साज्य-मानुषीचौरमाक्षिका ।
काचार्मपिल्लाभिष्यन्द-व्रणशुक्रगतिप्रणुत ॥
तत् किट्टं दद्रुकिटिम-पामादौ लेपनाज्जयेत् ॥२६॥

ताम्रस्य प्राथम्येन उक्तत्वात तस्यैव प्राधान्याच्च । किं वा "गन्धकेन" इत्यारभ्य "पृथक् पृथक्" इत्यन्तेन एको योग, "भावितम्" इत्यादिना च द्वितीयो योग , ततश्च समांशेन गन्धकेन मारित ताम्र धान्याभ्र तुल्यञ्च यथानिर्दिष्ट गृहीत्वा प्राग्वत पूर्व-योगवत् गुञ्जामात्रमेतत चूर्णं त्रिफलादिभि सह खादेत, तच्चूर्णं वृहणादिगुणवत् भवेदिति , तथा केवल ताम्रभस्म मातुलुङ्गार्द्रकरसाभ्या सप्तधा भावयित्वा उष्णाम्बुना पिबेत, तत गुल्मादिनाशन भवेदिति ॥ २१।२२ ॥

ताम्रद्रुतिसञ्ज्ञक चतुर्थलोहकल्पमाह, आर्द्रेति ।—आर्द्रा आर्द्रक । लकुच डहु । कञ्चुकस्थ कञ्चुकाकारलौहभाजनस्थम् , "कञ्चुकस्थम्" इत्यत्र "कन्दुकस्थम्" इति पाठकल्पन साधु, कन्दुकस्य लौहभाजनस्थम् । त्रिंशत्कर्षम् इति पद ताम्रम् इत्यनेन सम्बध्यते । धूमं गृहधूमम् । प्रस्थाम्बुमर्दितस्यास्य प्रसादान्निःस्रुत प्रस्थप्रमाणजलेन सह मर्दितस्य भस्म ताम्रस्य प्रसादात स्वच्छरूपतया निःस्रुत, जलमिति शेष । "प्रसादात्" इत्यत्र "प्रदानात्" इति पाठे—प्रदानात परित्यागा दित्यर्थ, "त्यागो विहापनं दानम्" इत्याद्यमर । तुल्यनीलशिलाजाभ्या तुल्य तथा नीलशिला नीलमणि, यद्वा—तुल्यनील नीलतुल्य नीलवर्णतुल्यविशेष, शिलाः मन शिला, चक्षुष्यत्वात्, तज्जाभ्या, चूर्णाभ्यामिति शेष, कर्षांशाभ्या युतम् । तत् किट्ट किट्टरूप ताम्र, जलेन सह मर्दनात् अध पतित असारभाग । अयमर्थ, —ताम्रतुल्य गन्धकम् आर्द्रादीनामेकतमरसेन पिष्ट्वा तेन ताम्रपत्र विलिप्य च पुटानले पचेत्, तत, तत् पुटपक्क ताम्र त्रिंशत्कर्ष लौहभाजने न्यस्य तुल्यगन्धक-

अथ पञ्चमलोहकल्पः।—

मारितं त्रपु सीसं वा हारिद्रं शृङ्गमाकुली।
कार्पासवासितं तक्रं माहिषञ्च प्रमेहजित्॥२७॥

अथ षष्ठलोहकल्पः।—

नवनवतिस्त्रिफलाया मृतस्य नागस्य शततमो भागः।
दार्व्याकुलीफलत्रयकनकजलप्रस्थपेषितं निखिलम्॥२८॥

मल्पमल्पं दत्त्वा दत्त्वा पचेत्, ततः गृहधूमं दत्त्वा तथैव पचेत्, अथ तत् जलेन प्रस्थमानेन सह गाढं मर्दयित्वा स्थापयेत्, ततः उपरिस्थस्वच्छजलं विस्राव्य जले तस्मिन् कर्षमात्रं तुल्यादिद्वयं दत्त्वा आतपे शोषयेत्, इत्थं निष्पन्नामिमां तास्रद्रुतिम् आज्यादिभिः सह पिष्ट्वा चक्षूरोगे योजयेत्। जलाधःस्थितं किट्टञ्च दद्रुकिटिमादिषु लेपयेदिति॥ २३—२६॥

पञ्चमलोहकल्पमाह मारितमिति।—त्रपु वङ्गम्। सीसं वा इत्यत्र वा शब्दश्चार्थे, त्रपु सीसञ्च। आकुली अङ्कोलः तस्य वीजम्, रसरत्नाकरे "आकुली" इत्यत्र "अङ्कोलवीजकम्" इति पाठदर्शनात्। क्वचिच्च प्रमेहनाशनयोगान्तरे—"आकुली-मुकुलम्' इति पाठदर्शनात् आम्रमुकुलस्य च मेहनाशित्वश्रुतेः आकुलीशब्देन आम्र-मुकुलग्रहणमपि नासङ्गतमित्यस्मद्धृदयम्, तथा च योगरत्नाकरे प्रमेहचिकित्सायाम् आकुल्यादियोगः,—"आकुलीमुकुलं धात्री-हरिद्रामधुना लिहेत्। विंशतिञ्च प्रमेहाणां हन्ति सद्यो न संशयः॥" इति। "आम्रपुष्पमतीसारकफपित्तप्रमेहघ्नं रक्तदुष्टिहरं शीतं वातलञ्च" इति। कार्पासवासितं कार्पासपुष्पेण कृताधिवासनं, तच्च तक्रमध्ये कार्पासपुष्पं संस्थाप्य कार्य्यम्, "कार्पासवासितम्" इत्यत्र "कार्पासवीजमज्जा' इति पाठान्तरम्, "कार्पासपिश्चितम्" इति पाठे—कार्पासवीजमज्जा इत्यर्थः। त्रप्वादिचतुष्टयं कार्पासवासितमाहिषतक्रेण पिष्ट्वा पिबेदिति। योगोऽयं रसरत्नाकरे "मृगमालारसः" इति नाम्ना पठितः, तथा च—"मारितं त्रपुषं सीसं सुदग्धं मृगशृङ्गकम्। कार्पासवीजमज्जा च तुल्यमङ्कोलवीजकम्॥ पेषयेन्माहिषीतक्रैः दिनैकं वटकीकृतम्। माषद्वयं सदा खादेत् मृगमाला प्रमेहजित्॥ अनुपानाभयादार्वी-कषायमनुपाययेत्॥" इति॥ २७॥

षष्ठलोहकल्पमाह, नवेति।—शततमो भागः नवनवत्यपेक्षया शतानां पूरणः, तेन च त्रिफलायाः प्रत्येकं त्रयस्त्रिंशद्भागाः, नागस्य च एको भागः। कनक-

शतगुलिकाप्रमित तत् पीत तक्रेण मेहहरम् ।
पिबत. कषायमभया-दार्व्यंत्त्समांशपाठायाः ॥२९॥

अथ सप्तमलोहकल्प ।—

कृष्णलोहेन योक्तव्यो बालेनोपचितो हि सः ।
कुमारयूनमध्ये तु वरमध्यावरे क्रमात् ॥
एकद्वित्रिगुणात् कालादुपयुक्तं गुणावहम् ॥३०॥

अथ शूले अष्टमलोहकल्प ।—

एरण्डवह्निशम्बूक-वर्षाभूव्योषसैन्धवम् ।
अन्तर्धूमं विदह्यायश्चूर्णं सोष्णाम्बु शूलजित् ॥३१॥

धुस्तूर , दार्व्यादीना जलप्रस्थेन क्वाथप्रस्थेन पेषित, प्रस्थमितं दार्व्यादिषड्द्रव्य चतु-प्रस्थजलेन नि क्वाथ्य प्रस्थावशेष कृत्वा च तेन त्रिफलानागौ मर्दयेत। शतगुलिका-प्रमित वय कोष्ठाद्यनुसारिणी मात्रा स्थिरीकृत्य प्रतिदिनमेकैका गुडिका तक्रेण खादेत, एव शतसङ्ख्याकगुडिकासेवने कृते मेहो नश्यति। अभयेति।—अक्ष विभीतक , अभयादार्व्यक्षै सम त्रिभिस्तुल्य अंशो यस्यास्तादृशी पाठा तस्या., तेन च अभयादीनामेको भाग पाठायाश्चापर , औषधसेवनादनु अभयादिकषाय पिबे-दित्यर्थ ॥ २८।२९ ॥

सप्तमलोहकल्पमाह, कृष्णेति।—बालेन मृदुना इत्यर्थ, मृदुपाकेनेति यावत्, कृष्णलोहेन सह उपचित सम्पन्न प्रकृष्टगुण स नवनवतिरित्यादिनोक्त नागयोग योक्तव्य। "कुमार • •गुणावहम्" इत्यत्र "कुमारयूनोर्मध्ये तु वरो मध्योऽवरः क्रमात्। एकद्वित्रिगुणात् कालादुपयुक्तो गुणावह" इति पाठकल्पना सुगमा, अत्र तु शब्दशार्थं, कुमारे यूनि मध्ये मध्यवयसि च पुंसि बालेन कृष्णलोहेन उपचित स योक्तव्य, तथा एकद्वित्रिगुणात् कालात् एकदिनानन्तर दिनद्वयानन्तरं त्र्यहानन्तरञ्च उपयुक्त सेवित गुणावह, भवेदिति शेष , वरो मध्योऽवर क्रमात् उक्तादिशा एकाहाद्यनन्तरम् उपयुक्त स क्रमात वर मध्य अवरश्च गुणो भवति, एकाहानन्तर प्रयोग वरगुणसम्पन्न, दिनद्वयानन्तर प्रयोग मध्यगुणसम्पन्न, त्रिदिनानन्तर प्रयोगश्च अवरगुणसम्पन्नो भवतीत्यर्थ. ॥ ३० ॥

अष्टमलोहकल्पमाह, एरण्डेति।—"अन्तर्धूम विदह्यायश्चूर्णम्" इत्यत्र "अन्त-र्धूमविदग्धायाश्चूर्णम्" इति तु अपपाठ., लौहयोगाभावे लोहकल्पेति नामवैयर्थ्यात्,

अथ जीर्णज्वरादौ नवमलोहकल्पः ।—

त्रिफलामृतनिर्गुण्डी-मेघनादपुनर्नवा ।
कासमर्दालिधुस्तूर-वज्रिणीनां रसैरिदम् ॥३२॥
भावितं गुडमध्वाज्यैर्जलतक्रानुपायिनः ।
स्वल्पक्षीररसाशस्य हन्याज्जीर्णज्वरं क्षयम् ॥
कुष्ठास्थिस्रावपाण्ड्वर्शः-पक्तिशूलप्लिहामयान् ॥३३॥

अथ क्षयादौ दशमलोहकल्पः ।—

वाकुचीनिम्बपञ्चाङ्ग वेल्लचित्रकवत्सकम् ।
पथ्यानागरशम्याक-गुडूचीकटुकीफलम् ॥३४॥

ननु "एरण्डवह्निशम्बूक वर्षाभूगोक्षुर समम्। अन्तर्दग्ध्वा पिबेद्धिङ्गुणाभि शूल-शान्तये ॥" इत्येव किञ्चित परिवर्त्तिततया वङ्गसेनादिना पठितेऽस्मिन् योगे लौहप्रयोगाभावात "अन्तर्धूमविदग्धायाश्चूर्णम्" इत्येव साधु इति न वाच्यम्, यत "व्योषसैन्धवम्" इत्यत्रोक्तपाठस्थले वङ्गसेनादौ "गोक्षुर समम्" इति पाठान्तरदर्शनात् योगान्तरोऽयमिति मन्तव्यम्, किञ्च "अन्तर्धूमविदग्धाया-श्चूर्णम्" इति प्रयोगस्य असाधुत्वात् प्रकरणविरुद्धत्वाच्च प्रकरणसङ्गतम् "अन्तर्धूम विदग्धायश्चूर्णम्" इत्येव भवितुमर्हति। "अन्तर्धूमविदग्धन्तु" इति क्वाचित्कपाठो-ऽपि न मनोरम, लौहयोगाभावे लौहकल्पनिरूपणम् इति सञ्ज्ञावैयर्थ्यात्। एरण्डादिकमयश्चूर्णञ्च अन्तर्धूम दग्ध्वा सोष्णाम्बु पिबेत्, तच्च शूलजिदिति निष्कर्ष ॥ ३१ ॥

नवमलोहकल्पमाह, त्रिफलेति।—मेघनाद' तण्डुलीयक.। आलि वृश्चिक-पत्री। वज्रिणी स्नुही। इदम् अयश्चूर्णसहितम् एरण्डादिचूर्णम्। "स्वल्प-क्षीररसाशस्य" इत्यत्र "स्वल्पक्षीररसाशस्य" इति पाठ न साधु। अयश्चूर्णसहितम् एरण्डादिचूर्णं त्रिफलादीना यथायोग्य रसेन क्वाथेन वा पृथक् पृथक् सप्तधा भावयित्वा गुडमध्वाज्यै सह पिबेत्, सजलं तक्रञ्चानुपान कुर्यात्, स्वल्पेन क्षीरेण मांसरसेन वा तदा अश्नीयादिति ॥ ३२।३३ ॥

दशमलोहकल्पमाह, वाकुचीति।—वाकुची सोमराजी। निम्बपञ्चाङ्गं निम्बस्य त्वक्पत्रपुष्पफलमूलरूपम्। वेल्लं विडङ्गम्। वत्सकम् इन्द्रयव.। शम्याकः

खदिरासनसारेण भावितं लोहभस्म च ।
कर्षमात्रं समध्वाज्यं क्षयकुष्ठनिषूदनम् ॥३५॥

अथ विविधरोगे एकादशलोहकल्पः ।—

गुडस्य कुडवे पक्वे लोहभस्म पलोन्मितम् ।
कोलप्रमाणं रोगेषु तैस्तैर्योगैः प्रयोजयेत् ॥३६॥

अथ यक्ष्मादौ द्वादशलोहकल्पः ।—

व्योषादिनवकस्यांशस्तथांऽशो लोहभस्मनः ।
अंशोऽश्मजतुनः खण्डस्याष्टौ सर्वं समाक्षिकम् ॥
कान्तपात्रगतं यक्ष्म-ज्वरापस्मारघस्मरम् ॥३७॥

अथ जरादौ त्रयोदश चतुर्दशलोहकल्पौ ।—

निम्बसारत्रिमधुर-त्रिफलालोहगन्धकम् ।
चूर्णमर्जुनपत्राणां वा सभृङ्गत्रिफलायसम् ॥
सेवितं मधुसर्पिर्भ्यां जरावैरूप्यनाशनम् ॥३८॥

आरग्वधः । फलं मदनफलम् । खदिरासनसारेण खदिरासनयोरष्टमाशक्वाथेन, तत्र असनः स्वनामख्यातः । भावितमिति सप्तधा । खदिरासनक्वाथेन भावितं वाकुच्यादिचूर्णकर्षं घृतमधुभ्यां लिह्यादिति ॥ ३४'३५ ॥

एकादशलोहकल्पमाह गुडस्येति ।—तैस्तैर्योगैः तत्तद्रोगनाशकैः द्रव्यैः । गुड-कुडवं यथाविधि पक्त्वा तत्र लोहपलं प्रक्षिप्य च कोलमाना गुडिकाः कुर्यात्, ततः तत्तद्रोगनाशनानुपानेन सर्वरोगेषु योजयेदिति ॥ ३६ ॥

द्वादशलोहकल्पमाह व्योषेति ।—व्योषादिनवकस्य त्रिकत्रयस्य "व्योषं शतावरी त्रीणि फलानि द्वे बले तथा" इत्यनेन चक्रदत्तीययक्ष्माधिकारे विन्ध्यवासियोगोक्तस्य वा अंशः मिलित्वैको भागः । खण्डस्य मत्स्यण्डिकायाः अष्टौ इत्यत्र भागा इति शेषः, व्योषादिनवद्रव्याणां मिलितानामेको भागः, लौहाश्मजतुनोः प्रत्येकमेको भागः, खण्डस्य चाष्टौ भागाः, सर्वमेतदेकीकृत्य कान्तलौहभाजने मधुना सह सम्मर्द्य च स्थापयेत् ततः अग्निबलानुसारिणीं मात्रां खादेदिति ॥ ३७ ॥

त्रयोदश-चतुर्दशलोहकल्पद्वयमाह, निम्बेति ।—त्रिमधुरं "घृतं गुडो माक्षिकञ्च विज्ञेयं मधुरत्रयम्" इत्युक्तमधुरत्रयम् । अर्जुनपत्राणां अर्जुनस्य कोमलपत्रस्येत्यर्थः । सभृङ्गत्रिफलायसं भृङ्गराजत्रिफलालौहचूर्णसंयुक्तम् । मधुसर्पिर्भ्यामिति पदं चूर्ण-

अथ अम्लपित्तादौ पञ्चदशलौहकल्प. ।—

मधुक मृतलोहञ्च धात्री च त्रिगुणोत्तरम् ।
रसेन भावित छिन्नरुहाया' साज्यमाक्षिकम् ॥३९॥
सेवित भोजनस्याऽऽदौ वातपित्तामयान् जयेत् ।
मध्ये विष्टम्भमन्तेऽम्ल-पित्तं शूलञ्च पक्तिजम् ॥४०॥

अथ ग्रहण्यादौ षोडशलौहकल्प ।—

भल्लातकसहस्राभ्या त्रिफलामुस्तचित्रकैः ।
हस्तिपिप्पल्यपामार्ग-सहदेवीकुठेरकै ॥४१॥
कणामूलामृताचव्यैर्द्रोणेऽपां कुडवोन्मितैः ।
पक्के पादस्थे लोहस्थे तुलार्द्धं तीक्ष्णलोहत. ॥४२॥
माणिकाञ्च घृतात् पक्वा विडङ्गं चित्रकत्वचम् ।
त्रिफला पञ्चलवणं त्र्यूषणञ्च पृथक् पलम् ॥४३॥

मित्यनेन सम्बध्यते, एवञ्च निम्बादिगन्धकान्तचूर्णम् अर्जुनपत्रादीना वा चूर्णं मधुसर्पिर्भ्यां लिह्यादिति ॥ ॥ ३८ ॥

पञ्चदशलौहकल्पमाह, मधुकमिति ।—त्रिगुणोत्तरम् उत्तरोत्तरत्रिगुणम्, ततश्च मधुकस्य एको भाग, लौहस्य भागत्रय, धात्र्याश्च नवभागा । छिन्नरुहाया गुडूच्या । मध्ये भोजनमध्ये । "विष्टम्भम्" इत्यत्र "प्रविष्टम्" इति पाठस्तु असाधु. सिद्धयोगे तथा पाठदर्शनात् प्रविष्टमिति पदस्य अर्थसङ्गतिविरहाच्च । अन्ते भोजनान्ते । पक्तिज शूल परिणामशूलम् । सिद्धयोगे तु योगोऽय "धात्री-लौहम्" इत्याख्यया मधुकादीना द्विगुणोत्तरकल्पनाकल्पितो दृश्यते, तथा च— "धात्रीचूर्णस्याष्टौ पलानि चत्वारि लौहचूर्णस्य । यष्टीमधुकरजश्च दद्याद्द्विपल पटे घृष्टम् ॥ अमृताक्वाथेनैतच्चूर्णं भाव्यञ्च सप्ताहम् ॥" इत्यादि । अत्र "अमृताक्वाथेन आमलकीक्वाथेन" इति शिवदासव्याख्या ॥ ३९।४० ॥

षोडशलौहकल्पमाह, भल्लातकेति ।—भल्लातकसहस्राभ्या द्विसहस्रभल्लातक-गुडकेन । सहदेवी दण्डोत्पला, "सहदेवी" इत्यत्र "दण्डोत्पला" इति सिद्धयोगे पाठ । कुठेरक तुलसी । माणिका शरावम्, "माक्षिकाम्" इत्यत्र "कुडवद्वयम्" इति पाठ. सिद्धयोगे दृश्यते, शिवदासस्तु तत्र कुडवस्य द्वैगुण्य स्वीकृत्य

पलानि शूरणस्याष्टौ वाराह्या वृद्धदारकात् ।
चतुष्पलं पुष्परसस्यार्द्धप्रस्थञ्च निक्षिपेत् ॥४४॥
प्रातर्भोजनकाले वा लीढमेतद्रसायनम् ।
निहन्ति च ग्रहण्यर्शः-शूलगुल्मक्रिमिक्षयान् ॥४५॥

अथ क्षयादौ खण्डखाद्याख्यसप्तदशलौहकल्पः ।—

वासाभार्ग्यमृताऽभीरु-वचाखदिरपुष्करैः ।
मुषलीभिक्षुकोरण्टैः सूर्पे चापाञ्च मुष्टिकैः ॥४६॥
पक्वेऽष्टशिष्टे ताम्रस्थे प्रस्थार्धे खण्डसर्पिषोः ।
तार्प्येन रुक्मलौहस्य हतस्याप्यञ्जलित्रयम् ॥४७॥

कुडवद्वयशब्देन षोडशपलमिति व्याख्यातवान्, अत्र तु माणिका ग्रहणात् द्वैगुण्याभाव एव बोद्धव्यः, "न द्वैगुण्यं तुलामाने माणिकायां तथैव च । पलोल्लेखागते माने न द्वैगुण्यमिहेष्यते ॥" इति परिभाषास्मरणात् । कुडवद्वैगुण्यस्य तु सर्वसम्मतत्वाभावात् अत्र द्वैगुण्याभावः ग्रन्थकृत्सम्मत इति बोद्धव्यम् । "पञ्चलवणम्" इत्यत्र सामुद्रोल्लेखादर्शनात् लवणचतुष्टयं तथा "वाराह्या" इत्यत्र "तालमूल्या" इति सिद्धयोगसम्मतः पाठः । पुष्परसस्य मधुनः अर्द्धप्रस्थं द्रवद्वैगुण्यात् शरावद्वयम् । भल्लातकादिचव्यान्तमौषधजातं पृथक् पृथक् कुडवमानं जलद्रोणे पक्त्वा पादशेषम् अवतारयेत, ततः वस्त्रपूतं तं क्वाथं लौहकटाहे तीक्ष्णलौहाज्याभ्यां पचेत्, आसन्नपाके च विडङ्गादीनां चूर्णं प्रक्षिप्य अवतार्य च शीते मधु प्रक्षिपेदिति । योगस्यास्य "भल्लातकलौह" इत्याख्या अर्शोऽधिकारे लिखिते सिद्धयोगे चक्रदत्ते च ॥ ४१—४५ ॥

खण्डखाद्याख्यसप्तदशलौहकल्पमाह, वासेति ।—कल्पोऽयं "खण्डकाद्यं लौहम्" इति नाम्ना सिद्धयोगादौ प्रसिद्धम् । अभीरुः शतावरी । "वचा" इत्यत्र "बला" इति सिद्धयोगे पाठः । मुषली तालमूली । भिक्षुः मुण्डितिका, "भिक्षु" इत्यत्र "मुण्डितिका" इति सिद्धयोगे पाठः । कोरण्टः कुरण्टस्य सहचरस्य इदं झिण्टीमूलमित्यर्थः, "कोरण्टै" इत्यत्र "त्रिफलायास्त्वचः" इति सिद्धयोगे पाठः । सूर्पे चापाः जलद्रोणद्वये, "जलद्रोणे" इति सिद्धयोगोक्तः पाठः साधुः, सूर्पपाठपक्षे द्रवबाहुल्यात् । मुष्टिकैः पलप्रमाणैः, वासादिभिः मुषल्यादिभिश्च सम्बध्यते, "पञ्चपलानि" इति उक्तग्रन्थे पाठः । अष्टशिष्टे अष्टभागावशिष्टे । ताम्रस्थे ताम्र-

पक्वेऽस्मिन्नेंहृता याते कुस्तुम्बुरु शिलाजतु ।
शृङ्गीविडङ्गत्रिफला-जातीफलकटुत्रिकम् ॥४८॥
चातुर्जातञ्च शुक्त्यंशं प्रस्थार्द्धञ्च मधु क्षिपेत् ।
खण्डखाद्यमिदं लीढं कर्षमात्रं रसायनम् ॥४९॥
क्षीरानुपस्य क्षपयेत् क्षयकासारुचिक्लमान् ।
शीतपित्ताम्लपित्तास्र-वातपित्तास्रकामलाः ॥
कुष्ठमेहप्लिहानाह-कार्श्यं शूलञ्च पक्तिजम् ॥५०॥

पावस्थे। प्रस्थाशे खण्डसर्पिषी खण्डसर्पिषी प्रत्येक प्रस्थ, खण्डस्य षोडश पलानि घृतस्य च द्वात्रिंशत पलानीति यावत। तत्त्वचन्द्रिकाकारस्तु 'पलद्वादशक देय कृष्णलौहस्य चूर्णितम्। खण्डतुल्य घृत देय पलषोडशिक बुधै ॥" इति चक्र-घृतपाठस्य "खण्डतुल्यम् इति छेद, तेन खण्डस्यापि द्वादशपलानि (लौहमानम्)। केचित्तु रक्तपित्तहन्तृत्वात खण्डस्य प्रचुरतरमेवाधिकगीतीति घृतपदेन सह खण्डतुल्यमिति योजयन्ति, तत्तु न सम्यक्, लौहयोगत्वादत्र लौहप्राधान्येन तन्मानापकर्षस्यायुक्तत्वात, रक्तपित्तप्रत्यनीकत्वन्तु लौहस्य स्वरूपत एव महाशक्तिक-त्वात् विशेषता रक्तपित्तहरम्, तत्तु द्रव्यपुटादिभावितत्वेन महावीर्यकृततयोपपन्न, व्यवहारस्तु लौहसमतयैव" एव व्याख्या कृतवान्। व्याख्याकुसुमावलीकारस्तु— "रक्तपित्ते मृदुद्रव्यस्य हितत्वात परेण घृतेन सम सम्बन्धात घृतवत् खण्ड षोडशपल ज्ञेयम्। अन्यस्त्वाह—अनन्तरगतविधिपरित्यागे प्रमाणाभावात् लौहे तुल्य खण्ड द्वादशपलमिति। एव प्रचार प्रायेण" इत्याह। ताप्येन स्वर्णमाक्षिकेण हतस्य मारितस्य कृष्णलौहस्य तीक्ष्णलौहस्य, पिष्टस्वर्णमाक्षिकेण लौहपत्रीमालिप्य दग्धस्य वज्रपाण्ड्यादिलौहस्येत्यर्थ अञ्जलिद्वय कुडवद्वय पलद्वादशकमित्यर्थ। कुस्तुम्बुरु धन्याकम्। शुक्त्यंश पलार्द्धम्। चक्रसङ्गृहीतेऽस्मिन्योगपाठे तु—"कुस्तुम्बुरु" इत्यारभ्य "क्षिपेत्" इत्यन्तपाठस्थले—"प्रस्थार्द्धं मधुनो देय शुभाश्मजतुकस्तथा। शृङ्गी विडङ्ग कृष्णा च शुण्ठ्यजाजीपल पलम् ॥ त्रिफला धान्यक पत्र द्वाच मरिचकेशरम् ॥" इति पाठान्तरम्। लीढमिति।—लेहस्यास्य कर्षमात्रता तु पूर्वयुगीयमानवाभि-प्रायेणोक्ता, व्यवहारस्तु त्रि चतु पञ्च वा रक्तिकमारभ्य प्रतिदिन रक्तिवृद्धया शाण यावत। क्षीरानुपस्य लौहसेवनानन्तर क्षीरमनुपिबन, क्षीरपानञ्च लौह अपेक्ष्य चतु षष्टिगुणेन कर्त्तव्य, लौहान्तरे तथा प्रयोगदर्शनात, उक्तञ्च—"अनुपाने

अथ अष्टादशलोहकल्यार्थं लौहमारणप्रकारः ।—

अथोष्णवारिपिष्टेन कान्तलोहं ससिन्धुना ।
कफे कुठारच्छिन्नेन पित्ते वाते गलाऽम्बुना ॥५१॥
उभयेन वय स्तम्भे ताप्येन गलकुष्ठे च ।
कण्ड्वां मनोह्वया स्रोतो-विबन्धे मरिचाङ्घ्रिणा ॥५२॥
छिन्न पक्वेष्टकायन्त्रे द्रावित जलसन्निभम् ।
निषिक्त त्रिफलाक्वाथे पर्पटीभूतमायसे ॥५३॥
सञ्चूर्ण्य तेन क्वाथेन पिष्ट्वा स्थाल्यां विपाचितम् ।
षोडशाङ्गुलगर्त्तान्तः सम्पुटे चापरीक्षणात् ॥५४॥
आर्द्रकाभीरुमुषली-विदारीभृङ्गहस्तिजैः ।
रसैस्तथा मुहुस्ताम्र धान्याभ्र काञ्जिके प्लुतम् ॥५५॥
तेन पिष्टं घृत क्षौद्रे मत्स्याक्षीमेघनादयोः ।
जयन्त्यास्तोयचाङ्गेर्य्योर्मुषलीमाणिमन्थयोः ॥५६॥

चतु षष्टिगुण प्राहु सदा बुधा” इति । एतल्लौहसेवने पथ्यापथ्यविधिरपि सिद्ध-योगाद्युक्त तत्र तत्रैव द्रष्टव्य ॥ ४६—५० ॥

अष्टादशलोहकल्यार्थं लौहमारणप्रकारमाह, अथेति ।—ससिन्धुना सिन्दुवार-सहितमित्यर्थ । कफे कफरोगे, कफरोगे पक्तव्य कान्तलौहम् उष्णोदकपिष्टसिन्दुवार-मूललिप्त “छिन्न पक्वेष्टकायन्त्रे द्रावित जलसन्निभम् “इत्युत्तरेणान्वय । एव पित्ते कुठारच्छिन्नेन, वाते गलाऽम्बुना इत्यादिष्वपि व्याख्येयम्, कुठारच्छिन्नेन कुठारिकया “कन्दगडूच्या” इति कश्चित । गलाऽम्बुना अलम्बुषाक्वाथेन , “अथ गलाम्बुना” इत्यत्र “अथोष्णवारिपिष्टेन वाते लौहञ्च सिन्धुना । कफे कुठारच्छन्नेण पित्ते आर्त्त-गलाम्बुना” इति क्वचित पाठ । उभयेन कुठारच्छिन्नेन गलया च । मनोह्वया मन -शिलया । मरिचाङ्घ्रिणा मरिचमूलेन । “आयसे” इत्यत्र “आयसम्” इति क्वचित् पाठ । तेन क्वाथेन त्रिफलाक्वाथेन । आ परीक्षणात परीक्षण यावत, यावत वारितरादि-रूपमुपक्कलक्षण नोदियात तावदित्यर्थ , “आ परीक्षणात” इत्यत्र “च परिचिपेत्” इति क्वचित पाठ । अभीरु शतावरी । मुषली तालमूली । विदारी विदारिकन्द । भृङ्गी हस्तिकर्णपलाश, कदलीमूल वा । तेन काञ्जिकेन । “घृत क्षौद्रे” इत्यत्र “घृते

वज्रिणीसातलावाट्या-वर्षाभूणा रसेन च ।
क्षीरेण च पृथक् कुर्य्यात् पेषणादिक्रियात्रयम् ॥
कज्जलाभं द्वयञ्चैतत् यथाक्काथे विभावयेत् ॥५७॥

अथ अष्टादशलोहकल्पे दन्त्यादिगणः ।—

दन्तीत्रिवृच्चित्रकहस्तिकर्णी-व्योषाष्टवर्गत्रिफलाविडङ्गम् ।
पलाशबीजाम्बुदजीरकैला व्याघ्री च दन्त्यादिरिह प्रदिष्टः ॥५८॥

अथ अष्टादशलोहकल्पः ।—

पलानि पञ्च कान्तस्य सर्वत्राभ्रकचूर्णयोः ।
सार्द्धे द्वे सप्त सार्द्धानि वाते पित्ते पुनः क्रमात् ॥५९॥

क्षौद्रे" "घृतक्षौद्रे" इति वा पाठ सङ्गत । मत्स्याक्षी शालिञ्च । मेघनादः तण्डुलीयक । तीक्ष्णा राजिका । चाङ्गेरी अम्ललोणिका । माणिमन्थ सैन्धवम् । वज्रिणी स्नुही । सातला चर्मकषा । वाट्या वाट्यालक । पेषणेति ।—पेषण-पुटन मारणरूपकर्मत्रयमित्यर्थ । द्वय ताम्रमभ्रञ्च । यथाक्काथे तत्तद्रोगहरद्रव्यकृते क्काथे । अयमर्थ,—कफादिजरोगे उष्णवारिपिष्टसिन्दुवारादिमूलेन कान्तपत्र-मालिप्य पक्वेष्टकानिर्मितयन्त्रे निक्षिप्य च द्रावयित्वा जलसन्निभ कुर्य्यात, ततस्तं लौहद्राव त्रिफलाक्काथे निक्षिप्य पर्पटीप्राय कुर्य्यात, अथ ता पर्पटी लौहपात्रे चूर्णयित्वा त्रिफलाक्काथेन पिष्ट्वा च स्थालीपाक कुर्य्यात्, तत तत् लौहमार्द्रादीना प्रत्येकरसेन पिष्ट्वा पिष्ट्वा षोडशाङ्गुलगर्त्तमध्ये आ वारित्र पुटेत । तथा ताम्र धान्याभ्रञ्च पुन पुन काञ्जिकेनाप्लाव्य तेनैव काञ्जिकेन पिष्ट्वा सशोष्य च घृतादिभि पृथक् पृथक् पेषणादिक कुर्य्यात्, ततस्ते ताम्राभ्रे एकत्र मर्दयित्वा तत्तद्रोग-हरद्रव्यक्काथेन सप्तधा विभाव्य च स्थापयेदिति ॥ ५१—५७ ॥

अष्टादशलोहकल्पे "दन्त्यादिचूर्णमावाप्य" इत्यग्रे वक्ष्यति, अतस्तदेव दन्त्यादिक-माह, दन्तीति ।—हस्तिकर्णी हस्तिकर्णपलाशः कासालुक इति ख्यातः आलुकविशेषो वा । अष्टवर्ग,—"जीवकर्षभकौ मेदे काकोल्यावृद्धिवृद्धिकौ । एकत्र मिलितैरेतैरष्टवर्ग प्रकीर्त्तित ॥" इत्युक्तरूप । अम्बुद मुस्ता । व्याघ्री कण्टकारी ॥ ५८ ॥

अष्टादशलोहकल्पमाह, पलानीति ।—सर्वत्रेति पदं कान्तस्य इत्यनेन सम्बध्यते, सर्वत्र वाते पित्ते कफे च कान्तस्य पञ्च पलानि । अभ्रकचूर्णयो अभ्रकताम्रचूर्णयोः

पञ्च पादेन युक्तानि पञ्च पञ्च कफे पुनः ।
तत्र कान्ताभ्रके निष्का त्रिफलाक्वाथमाढकम् ॥६०॥
प्रस्थितानि गुणस्याष्टौ क्वाथस्य पयसस्तथा ।
पलानि षोडशाऽऽज्यस्य सिञ्चेत् पाकवशात् पुनः ॥६१॥
वाताद्यपेक्षया पङ्कोल्कारिकावालुकानिभे ।
अफेने वर्णगन्धाढ्ये कटुष्णे पीतसर्पिषि ॥६२॥

वाते क्रमात् सार्द्धे द्वे, पले इति शेष, सार्द्धानि सप्त, पलानीति शेष, वाते सार्द्धपल-द्वयमभ्रकं सार्द्धसप्तपलं ताम्रचूर्णञ्च द्वयमेतत "कज्जलाभम्" इत्यादिना पूर्वोक्त्यनुसारेण कज्जलीकृत्य वातहरद्रव्यक्वाथेन विभाव्य च कान्तपञ्चपलेन सह मिश्रयेत्। पित्ते पुन, क्रमात पञ्च अभ्रकस्य पञ्च पलानि, पादेन युक्तानि इत्यत्र पञ्च इति पदमावृत्त्य योज-नीयम्, ताम्रस्य च सपाद पञ्चपलानीत्यर्थ । कफे पुन अभ्रकताम्रयो प्रत्येक पञ्च पञ्च पलानीत्यर्थ । अत्र लौहाभ्रकयो मात्रानिर्देशार्थमुक्त श्रीचक्रपाणिना स्वसङ्ग्रहे —"अथवा वक्ष्यविधिसस्कृतकृष्णाभ्रकचूर्णमादाय । लौहचतुर्थार्द्धसम द्वि त्रि चतु - पञ्च गुणभागम ॥ प्रक्षिप्यात्र प्राग्वत पचेद्भाभ्यां भवेद्रजो यावत ॥" इत्यादिमानानु-सारेणात्र लौहादर्द्धं समभागञ्चाभ्रक ग्राह्यम्। एतस्य विस्तर तथा क्वाथार्थं त्रिफलाया मानादिकञ्च तत्रैवानुसन्धेयम्। तत्र कान्ताभ्रके मिलितलौहाभ्रकचूर्णे इत्यर्थ, अदाखेण सह ताम्रयोगे सत्यपि केवलाभ्रोक्ति अभ्रस्य प्राधान्यात ताम्रस्य अभ्रेण सहैक्यभावाच्च इति बोद्धव्यम्। प्रस्थितानीति।—क्वाथस्य इत्यत्र सप्तमीविवक्षाया षष्ठी, तस्मिन् क्वाथे इत्यर्थ., गुणस्य गुणवत विशुद्धस्येति यावत, पयस दुग्धस्य अष्टौ, पलानीति परिणान्वय, प्रस्थितानि प्रस्थापितानि, अवचारितानीत्यर्थं, कुर्य्यादिति शेष, आज्यस्य घृतस्य च षोडश पलानि सिञ्चेत। अत्र क्वाथादिदाने शिवदासधृत भोजराजवचन यथा—"घृतेन लौहमालोड्य क्षीरेण समनन्तरम्। तत क्वाथेन संयोज्य मन्देऽग्नौ शनकै पचेत॥ तत सञ्चालयेल्लौह लौहदर्व्याऽतिदीर्घया॥" इति। पाकवशात् पुन पाकानुसारेण पुन वाताद्यपेक्षया वातपित्तकफमपेक्ष्य, पङ्कोल्कारिकावालुकानिभे पङ्कादिसदृशे, तत्र पङ्कनिभे कर्दमतुल्ये सान्द्रे अभ्यक्तदर्विके इति यावत, तादृशत्वञ्च मृदुपाके सति बोद्धव्यम, उल्कारिकानिभे उन्दुरुमृत्तिका-तुल्ये, सुखद खलखलनयोगिनि इति यावत, तथात्वञ्च मध्यपक्वस्य लक्षणम, तथा बालकानिभे बालुकासदृशे, उज्झितदर्विके इत्यर्थ, एतच्च खरपाके सति बोद्धव्यम्।

दन्त्यादिचूर्णमावाप्य स्रापितेनेतरेण वा ।
घृतेन पेषितं भाण्डे घृतस्निग्धे निधापयेत् ॥६३॥

तन्त्रान्तरे तु वाते मध्यपाकि लौह प्रयोज्यम इत्युक्तम, तथा च चक्रपाणिधृत-नागार्जुनवचन—"मृदुमध्यमखरभावे पाकस्त्रिविधोऽत्र वक्ष्यते पनाम। पित्तसमीरण-श्लेष्मप्रकृतीना मध्यमस्तु सम ॥ अभ्यक्तदर्वि लौह सुखदु खसलननयोगि मृदु मध्यम। उज्झितदर्वि खर परिभाषन्ते केचिदाचार्य्या ॥ अन्ये विहीनदर्वीप्रलेपमाखूत्कराकृति ब्रुवते। मृद मध्यमर्द्दचूर्ण सिकतापुञ्जोपमन्तु खरम ॥ त्रिविधोऽपि पाक ईदृक् सर्वेषा गुणकृदेव न तु विफल । प्रकृतिविशेषे सृष्टौ गुणदोषौ जनयतीत्यलम् ॥" इति। मृद्वादिपाकलक्षणे शिवदासधृतामोघवचन यथा—"दर्वीमाश्लिष्यते यत्तु स्वैर स्खलति वा न वा। मृदुपाक विजानीयात पित्ते तु विहित सदा ॥ सितापुञ्जोपम यत्तु मृषिकोत्करसन्निभम। तदय खरपाक स्यात श्लेष्मण्येव प्रकीर्त्तितम् ॥ एकैकगुण-योगित्वान्न तमिच्छन्ति तद्विद । सर्वप्रकृतिसेव्यत्वान्मध्यम बहुपूजितम ॥" इति। अफेने इत्यादौ लौहे इति शेष, पाकवशात् लौहे फेनरहिते सतीत्यर्थः, तच्च पाकार्थ-प्रदत्तदुग्धादेरुपक्षीणतया भवतीति बोद्धव्यम्। "कटुष्णे" इत्यत्र "कटूष्णे" इति पाठ असाधु, तन्त्रान्तरे तथाऽर्थकपाठदर्शनात्, तथा च चक्रपाणिसङ्ग्रहे—"विज्ञाय पाकमेव द्रागवतार्य्य क्षितौ क्षणान् कियत । विश्राम्य तत्र लौहे त्रिफलादे प्रक्षिपे-च्चूर्णम् ॥" इति। अत्र अवतारणानन्तर कियत्काल विश्राम्य त्रिफलादिचूर्णप्रक्षेप विधानादेव कटुष्णत्व प्रतीयते, कटुष्णे ईषदुष्णे इत्यर्थ । पीतसर्पिषि पाकाय दत्ते घृते चोपक्षीणे सतीत्यर्थ । दन्त्यादिचूर्ण पूर्वोक्तम्। स्रापितेनेतरेण वा लौह-पाकाय दत्त घृत यदि अधिकमुपलभ्यते, तदा तदधिक घृत लौहस्य भाविरूक्षता-निवारणार्थं तस्मादाकृष्य पात्रान्तरे स्रापयेत, तेन स्रापितेन, इतरेण वा तादृश-घृताभावे अन्येन वा त्रिफलाक्वाथकल्कसिद्धेन घृतेनेत्यर्थ, एतदर्थं चक्रसङ्ग्रह,—"यदि तु परिप्लुतिहेतोर्घृतमीक्षेताधिक ततोऽन्यस्मिन्। भाण्डे निधाय रक्षेद्भाव्यपयोगो ह्यनेन महान् ॥ अथसि विरूक्षीभूते स्नेहस्त्रिफलाघृतेन सम्पाद्य । एतत्ततो गुणोत्तर-मित्यमुना स्नेहनीय तत ॥ अत्यन्तकफप्रकृतेर्भक्षणमयसोऽमुनैव शमन्ति। केवलमपीद-मश्रित जनयत्ययसो गुणान् कियत ॥" इति। अस्य विस्तरस्तत्रैवानुसन्धेय । एतस्मिन्नौषधे पङ्कादिनिभे तथा अफेनादिलक्षणलक्षिते च सति दन्त्यादिचूर्ण प्रक्षिप्य घृतस्निग्धे भाण्डे निधापयेत्, कालवशात तस्मिन्नौषधे रूक्षीभूते पुन स्नेहनार्थं लौहपाकोच्छलितेन घृतेन, तदभावे त्रिफलाघृतेन वा पेषितं कृत्वा पुनर्निधापयेदिति

कुर्य्यात्तत्कल्पनापाको श्लेष्मणीव रसायने।
स्वस्थ शरन्निदाघाभ्यामन्यथा कृतशोधन. ॥६४॥
घृतमाक्षिकमात्रा वा लौहे लौहेन मर्दित:।
रसायन द्वौ दिवसौ द्वे द्वे गुञ्जे तत. परम् ॥६५॥
वृन्दवृद्ध्या दिने द्वे द्वे पर विंशतिवासरान्।
प्रातर्विंशतिगुञ्जाना भागौ द्वौ भागमेव च ॥६६॥

निष्कर्ष। कुर्य्यादिति।—"कुर्य्यात्तत्कल्पनापाक" इत्यत्र "कार्य्यस्तत्कल्पनापाक" "कुर्य्यात्तत्कल्पनापाकम्" इति वा पाठ साधु, तत्कल्पनापाक तस्य लौहस्य कल्पना कृति, निष्पत्तिरित्यर्थ, तादृश पाक श्लेषपाक इत्यर्थ अथवा—कल्पनापाक पाककल्पना पाकविधिरित्यर्थ, कल्पना प्रयोगकल्पना तदर्थ पाक इत्यर्थो वा, श्लेष्मणीव रसायने श्लेष्मणि यथा वालुकानिभ पाक कार्य्य रसायनेऽपि तथा कार्य्य इत्यर्थ। इदानीं रसायने तस्य मात्रादिकमाह, स्वस्थ इति।—शरन्निदाघाभ्या-मन्यथा शरन्निदाघ वर्ज्जयित्वा अन्यस्मिन् ऋतौ। "घृतमाक्षिकमात्रा वा लौहे लौहेन मर्दित" इत्यत्र "घृतमाक्षिकमात्राभ्या लौहे लौहेन मर्दितम्" इति पाठ सङ्गत, घृतमाक्षिकमात्राभ्याम् अनुरूपघृतमधुभ्याम्, अत्र च मध्वपेक्षया घृतं किञ्चिदधिक देय, तन्त्रान्तरे तथा दर्शनात्, तथा च चक्रदत्ते—"समसत्त्व।मलपात्रे लौहे लौहेन मर्दयेच्च पुन। दत्त्वा मध्वनुरूप तदनु घृत योजयेदधिकम्॥ यन्म दल्लालि यथा मध्वपृथक्तेन पङ्कनिभिषत॥" इति। लौहे लौहपात्रे लौहेन लौहदण्डेन। रसायनम् इद कान्तायस्करसायन द्वौ दिवसौ द्वे द्वे गुञ्जे, भक्षयेदित्युत्तरेणान्वय, प्रथमदिनद्वयं गुञ्जाद्वयमानेन भक्षयेदित्यर्थ, तत पर वृन्दवृद्ध्या दिनद्वय गुञ्जा-द्वयमानेन भक्षयित्वा तृतीयदिवसमारभ्य द्वौ द्वौ दिवसौ कृत्वा गुञ्जाद्वयवृद्ध्या विंशति-दिवसान् यावत वर्द्धयेत, प्रथमदिनद्वय गुञ्जायुगल, ततो दिनद्वय रक्तिचतुष्टय, तत दिनद्वयं रक्तिषट्कम्, एव-क्रमेणैकोनविंशदिने विंशतिगुञ्जा पूर्य्यते, एव विंश-दिवसेऽपि, ततो यावत्कालं तत् भक्षणीय, तावत् विंशतिगुञ्जाप्रमाणेनैव भोक्तव्यम्। अत्र एकोनविंशदिवसे एव विंशतिगुञ्जाया पूर्णायामपि यत् "विंशतिवासरान्" इत्युक्त, तत् "दिने द्वे द्वे" इति युग्मदिनानुरोधात्। इदानीं विंशतिगुञ्जामित लौह किमेकदैव भोक्तव्यम्? उत विभज्य? इत्याह, प्रातरिति।—विंशतिगुञ्जाना द्वौ भागौ त्रिधा विभक्तस्य विंशतिगुञ्जामितस्य लौहस्य भागद्वयं यवचतुष्टयाधिकरक्तिद्वादशक-

प्राग्भक्तमर्द्धमर्द्धं वा भक्षयेदुक्तकालयोः।
एवं मात्राविभागेन व्याधिक्षीणोऽपि सर्वदा ॥६७॥
लौहादष्टगुणं क्षीरं धारोष्णं घृतमेव वा।
वयःस्तम्भेऽनुपातव्यं व्याधौ क्वाथो यथोदितः ॥६८॥
आस्वाद्य चानु मुस्ताना निर्य्यास दन्तपीडितम्।
मूलानि भक्षयेत्तासामास्यवैरस्यनुत्तये ॥६९॥
क्रूरकोष्ठस्तु दीप्ताग्निरनुलोमयितुं मलान्।
तप्तं क्षीरं पिबेद्भूयस्ताम्बूलं भक्षयेन्मुहुः ॥७०॥
स्नानमर्दनविष्टम्भि-विदाह्यम्लमजाङ्गलम्।
सप्तसप्ताहमथवा त्रिःसप्ताहं परित्यजेत् ॥७१॥
शालिमुद्गरसं सर्पिर्वन्ताग्रं बृहतीद्वयम्।
दीर्घं पटोलवार्त्ताकि तालकं मूलकन्दकम् ॥७२॥
शतावर्य्याः सजीवन्ती-शृङ्गाटसुनिषण्णकम्।
तण्डुलीयकधान्याकं सराजक्षववास्तुकम् ॥७३॥

मित्यर्थ, प्रात, तथा प्राग्भक्त भाग भोजनात् पूर्वमेकभाग यवद्वयाधिकरक्तिषट्क-मित्यर्थ, भक्षयेत्। पक्षान्तरमाह, अर्द्धमिति।—वा अथवा उक्तकालयो प्रातस्तथा भोजनात पूर्वञ्च अर्द्धमर्द्धं विंशतिगुञ्जामान द्विधा विभज्य एकैकभागम्। वय स्तम्भे रसायने इत्यर्थ, लौहादष्टगुणं धारोष्ण घृतमेव वा क्षीरम् अनुपातव्यमिति योज्यम। व्याधौ यथोदित तत्तद्रोगाधिकारोक्त, क्वाथ अनुपातव्य इति शेष। आस्वाद्येति।—लौहभक्षणजनितमुखवैरस्यापनोदनाय दन्तचर्वित मुस्तारस पीत्वा मुस्तक भक्षयेत। चक्रदत्ते तु "कान्तक्रामकममल सञ्चर्व्य रस पिबेद्द्विने न तु तत" इत्यनेन मुस्तकरसस्यैव पानविधिर्दृश्यते न तु मुस्तकस्य। "क्रूरकोष्ठ • मुहु" इत्यत्र "क्रूरकोष्ठे स्नुहीक्षीर-मनुलोमयितु मलान्। तप्त क्षीरं पिबेद्रूक्षे ताम्बूल भक्षयेन्मुहु ॥" इति पाठान्तरम्। अजाङ्गलमित्यत्र मांसमिति शेष, अजाङ्गल मांस धन्वमांसम्। दीर्घं इति पद पटोल-वार्त्ताकि इत्यस्य विशेषणम्, दीर्घपटोल पटोलाकारदीर्घफलशाकविशेष, "धुन्दुल" इति "ढेँडश" इति वा ख्यात, दीर्घाकारपटोल वा, वार्त्ताकमपि दीर्घाकार ग्राह्यं, न तु वर्त्तुलाद्याकारम्। शतावर्य्या इत्यत्र मूलमिति शेष.। सराजक्षववास्तुक राजक्षव.

जाङ्गल शफरा: कृष्ण-मीना रोहितमद्गुरी ।
द्राक्षादाडिमखर्जूर-रम्भाकोलञ्च शस्यते ॥७४॥
जीर्णौषधस्तु दीप्तेऽग्नौ प्रात: पित्तात् बुभुक्षित: ।
अर्द्धमात्रं पिबेत् क्षीर सार्द्धमात्र कृशो नर ॥७५॥
दिवसा: सप्त सप्तास्मिन् दिने द्वित्रिगुणा क्रमात् ।
जघन्यमध्यप्रवर सेवाकालो विधीयते ॥७६॥
पूर्वक्रियेय द्विगुणा सोत्तरा नात्र यन्त्रणा ।
यथाकालं मलोत्सर्ग शरीरोदरलाघवम् ॥७७॥
हृदयोद्गारशुद्धिश्च जीर्णलौहस्य जायते ।
लोहाप्रवृत्तौ सामत्व लोहकिट्टप्रशान्तये ॥७८॥

राजसर्षप, "राइ" इति ख्यात, दुग्धिका वा । जीर्णौषध इति ।—"पित्तात" इत्यत्र "पीतात" इति पाठ सङ्गत, प्रात पीतात औषधानुपानतया प्राक्पीतदुग्ध-मपेक्ष्येत्यर्थ अर्द्धमात्रमित्यत्र वय स्थार्थी इति शेष, वय स्थार्थी अर्द्धमात्र दुग्ध पिबेत । सार्द्धमात्र कृशो नर व्याधिक्षीण नर औषधानुपानतया पीतक्वाथमात्रा-मपेक्ष्य सार्द्धमात्र क्षीर पिबेदित्यर्थ । दिवसा इति ।—अस्मिन् दिने वर्त्तमानकाले इत्यर्थ, द्वित्रिगुणा सप्त सप्त दिवसा एकोनपञ्चाशद्दिवसा अष्टनवतिदिवसा तथा सप्तचत्वारिंशदधिकशतदिवसा क्रमाज्जघन्यमध्यप्रवर सेवाकाल । "दिने द्वित्रिगुणा" इत्यत्र "एकद्वित्रिगुणा" इति क्वचित पाठ । पूर्वेति ।—इय "रसायन द्वौ दिवसौ" इत्यादिना उक्ता पूर्वक्रिया मुख्यक्रिया । सोत्तरा उत्तरक्रिया, "नात्युपविष्टो नाप्यतिभाषी नातिस्थितस्तिष्ठेत । अत्यन्तवातशीतातपयानस्नानवेगरोधादीन् ॥ अत्याश्च दिवा निद्रामहितञ्चाकालभुक्तञ्च । वातकृत पित्तकृत सर्वान् कट्वम्लतिक्तकषायान् ॥ तत्त्वगविनाशहेतून् मैथुनकोपश्रमान् दूरे ॥" इत्यादिना चक्रपाणिधृतनागार्जुनोक्ता, अत्राह शिवदास,—"उत्तरक्रिया चात्र द्विगुणा कार्य्या, यदुक्त पातञ्जले 'इति मुख्यक्रियाया स्याद्द्विगुणा चोत्तरक्रिया' इति । उत्तरक्रिया चात्र 'नात्युपविष्टो नाप्यतिभाषी नातिस्थितस्तिष्ठेत' इत्यादिना उक्तैव" इति । जीर्णलौहस्य लक्षणमाह,—यथाकालमिति । भुक्तलौहे अजीर्णे लक्षण चिकित्साञ्चाह, लोहाप्रवृत्ताविति ।—लोहाप्रवृत्तौ लौहाजीर्णे इत्यर्थ, विधिना लौहभक्षणे कृतेऽपि तदजीर्णवशात् यदि मलप्रवृत्तिर्न भवेत्, जीर्णलौहस्यैव यथाकालं मलोत्सर्गादिदर्शनादित्याशय., सामत्वम्

उष्णाम्बु सयवक्षार त्रिदिनात्त्रिदिनात् पिबेत् ।
रसेनागस्त्यपत्राणा विडङ्गञ्चान्तराऽन्तरा ॥७९॥
क्वाथमश्वत्थपत्राणा प्रसङ्गे छर्दिशूलयोः ।
सामान्यसिद्धिमावाप्य भावनापुटपाचनैः ॥८०॥
यथायोगयुत पक्क त्रिफलाक्वाथसर्पिषा ।
साधितं भक्षयेत् कान्तमेकं वा केवलाभ्रकम् ॥८१॥
इह नानुपिबेत् क्षीर न कुर्य्यात्तेन भोजनम् ।
मुद्गयूषं पिबेत्तोये कोष्णञ्च नियतो भवेत् ॥८२॥

एतल्लौहरसायनाख्यममृतं पक्कं यथोक्तक्रमात्
भुञ्जानः प्रतिवत्सर नववपुः साङ्गन्तु वर्णेन्द्रियैः ।
दीर्घायुर्नवयौवनोन्नतकुच-प्रौढाङ्गनावल्लभो
मात्यद्दन्तिबलो जराविरहितः पुत्रावृतः स्यान्नरः ॥८३॥

आमदोषवत्त्व, साममलत्वमित्यर्थ, ज्ञातव्यमिति शेष, अत लौहकिट्टप्रशान्तये अजीर्णे हि लौह किट्ट स्रवति, तेन च शूलादिकमुपजायते, तत्प्रशान्तये। अगस्त्यपत्राणा बकपुष्पपत्राणाम्। चक्रेणापि स्वसङ्ग्रहे उक्त—"ततदुग्धानुपान प्राय सारयति बद्ध-कोष्ठस्य। अनुपीतमम्बु यद्वा कोमलशस्यनारिकेलस्य ॥ यस्य च न तथा सरति सयव-क्षार जल पिबेत कोष्णम। कोष्ण त्रिफलाक्वाथ सनाय क्षार ततोऽप्यधिकम ॥" इति। किञ्च—"क्रिमिरिपुचूर्णं लीढ सहित स्वरसेन वङ्गसेनस्य। क्षपयत्यचिरान्नियत लौहाजीर्णोद्भव शूलम् ॥" इति। छर्दिशूलयो लौहाजीर्णजन्यच्छर्दिशूलयो। मिलित-कान्ताभ्रकयोगमुक्त्वा इदानी तयो पृथक् प्रयोगमाह, सामान्येति।—सामान्यसिद्धि लौहस्य साधारणसाधन त्रिफलादिकम् आवाप्य कल्कीकृत्य, यद्वा—आवाप्य जले प्रक्षिप्य, क्वाथयित्वा इत्यर्थ तेन भावनापुटपाचनै पक्क पश्चात यथायोगयुत तत्तद्रोगापहद्रव्यक्वाथेन मर्दित, त्रिफलाक्वाथसर्पिषा साधितम् एक केवल कान्त केवलमभ्रक वा भक्षयेत। इह अनेन विधिना निष्पादितलौहप्रयोगे। तेन क्षीरेण। मुद्गयूष पिबेत क्षीर नानुपीय मुद्गयूषमनुपिबेदित्यर्थ। तोये तोयकार्य्ये, जलपानादि-कार्य्ये कोष्ण, तोय व्यवहरेदिति शेष। नियत सयतेन्द्रिय। मात्यद्दन्तिबल मात्यतः मदस्राविण दन्तिन गजस्य इव बल यस्य तथाभूत, प्रभूतबलसम्पन्न. ॥७९—८३॥

अथ सर्वरोगे एकोनविंशल्लोहकल्प ।—

अङ्कोल्ललोहमणिटङ्कणमाणिमन्थ-

ताप्यार्द्रकत्रिकटुतुल्यशिलाजतूनाम् ।

भृङ्गोदकेन वटिकाश्च मसूरमात्रा

खादेज्जयाय जरसः सकलामयानाम् ॥८४॥

अथ कुष्ठे विंशल्लोहकल्प ।—

अङ्कोल्लवेल्लाभ्रककान्तताप्य-शिलाजतुव्योषफलत्रयाणाम् ।

चूर्णं मुषल्याः समभागमेतत् कुष्ठानि लीढ़ं मधुना धुनोति ॥८५॥

अथ मेद प्रभृतिषु एकविंशल्लोहकल्प ।—

कान्ताभ्रत्रिफलाविडङ्गरजनी-ताप्याब्ददेवद्रुम-

व्योषैलाऽग्निपुनर्नवाङ्घ्रिगिरिजाङ्कोल्लैः समं गुग्गुलुम् ।

पिष्ट्वा भृङ्गजलेन सूक्ष्मगुलिका खादेत् यथासात्म्यतो

मेदः श्लेष्मसमीरणोल्वणगदेष्वन्येषु वा पूरुषः ॥८६॥

अथ कुष्ठे द्वाविंशल्लोहकल्प ।—

व्योष कणातिलामनस्य कुसुम मण्डूरसैरेयक

दोषाशेलुसितात्रिवृत् क्रमिहरं भृङ्गाणि भल्लातकम् ।

श्रेष्ठावाकुचिकान्तलोहजरसस्तत् कान्तपात्रे स्थितं

खादेत् कुष्ठहर रसायनवर मध्वाज्यसयोजितम् ॥८७॥

एकोनविंशल्लोहकल्पमाह, अङ्कोलेति ।—अङ्कोल अङ्कोठ । मणि मुक्ता । माणिमन्थ' सैन्धव । ताप्य सुवर्णमाचिकम् । भृङ्गोदकेन भृङ्गराजरसेन ॥ ८४ ॥

विंशल्लोहकल्पमाह अङ्कोल्लेति ।—अङ्कोल्ल अङ्कोठ । वेल्ल विडङ्गम् । मुषल्याः तालमूल्या । अत्र अङ्कोल्लादीना मुषल्यन्ताना सर्वेषा समभागता ॥ ८५ ॥

एकविंशल्लोहकल्पमाह, कान्तेति ।—पुनर्नवाङ्घ्रि पुनर्नवामूलम् । गिरिज शिलाजतु । सम गुग्गुलु कान्तादिसर्वचूर्णसम गुग्गलुम् । यथासात्म्यात अग्निबलानुसारेणेत्यर्थ । "यथासात्म्यात" इत्यत्र "यथाशक्तित" इति पाठान्तरम् ॥ ८६ ॥

द्वाविंशल्लोहकल्पमाह, व्योषमिति ।—सैरेयक झिण्टी । दोषा हरिद्रा । शेलुः बहुवारक । क्रमिहर विडङ्गम् । भृङ्ग भृङ्गराज. । श्रेष्ठा त्रिफला । कान्तलोहजरसः

अथ सर्वरोगे वयोविंशलौहकल्पः ।—

मण्डूरत्रिफलामितेतरतिला-जातीविडङ्गाकुली-
वाकुच्यभ्रककान्तगन्धकनिशा-माधूकसारं रजः ।
पिष्ट्वा भृङ्गरसेन तस्य वटकान् खादेत् पयःपाचितान्
सर्वव्याधिहरान् रसायनवरान् मृत्योश्च मृत्युप्रदान् ॥८८॥

अथ नेत्ररोगे कान्तनागाख्यचतुर्विंशलौहकल्पः ।—

बद्धा न्यस्तमहस्त्रयं कमलिनी-पत्रे सधात्रीरसे
धौतं भृङ्गरसेन चुम्बकरजो-युक्तं द्विभागोत्तरम् ।
स्थाल्यां षड्गुणरक्तमारिषरसे यद्दारुदर्व्या धृतौ
सञ्चाल्याम्भसि कल्कशेषितमिदं शीते क्षणाद्गालयेत् ॥८९॥

तस्मादादाय मूषायां स्वल्पायां द्रावयेद्घनम् ।
कान्तनागोऽयमुदकेनाञ्जनं नयनामृतम् ॥९०॥

कान्तलौहभस्मानि, "कान्तलौहजरसः" इत्यत्र "कान्तलौहरजसः" इति पाठान्तरम् । "कान्तलौहहरजः" इति पाठे तु—हरजः पारदः पारदभस्म इत्यर्थः ॥ ८७ ॥

वयोविंशलौहकल्पमाह, मण्डूरेति ।—सितेतरतिलाः कृष्णतिलाः । जाती जातीफलम् । माधूकसारः मधूकपुष्पसारम् । रजः पर्पटकः । पयःपाचितान् पयसि दुग्धे पाचितान् । मण्डूरादिकं भृङ्गराजरसेन पिष्ट्वा वटकान् कारयेत्, ततस्तान् किञ्चिद्दुग्धेन पक्त्वा खादेत । मृत्योश्च मृत्युप्रदान् मृत्युवारकानित्यर्थः ॥ ८८ ॥

कान्तनागाख्यं चतुर्विंशलौहकल्पमाह, बद्धेति ।—सधात्रीरसे कमलिनीपत्रे बद्धा अहस्त्रयं दिनत्रयं न्यस्तं स्थापितम्, "कान्तनागोऽयम्" इति वक्ष्यमाणवाक्यव्याख्यात् "अहस्त्रयम्" इत्यत्र "अहेस्त्रयम्" "अहेस्त्र्यहम्" इति वा पाठः समीचीनतया प्रतिभाति । ततो दिनत्रयानन्तरमुद्धृत्य भृङ्गरसेन धौतं चुम्बकरजोयुक्तं चुम्बकाख्यलौहस्य चूर्णेन भागैकेन युक्तं द्विभागोत्तरं भागद्वयं प्रकरणाल्लौहमिति शेषः, षड्गुणरक्तमारिषरसे लौहापेक्षया षड्गुणरक्ततण्डुलीयरसे स्थाल्यां धृतं स्थापितम्, "धृतौ" "धृतो" वा इत्यत्र "धृतम्" इति पाठकल्पना समीचीनतया प्रतिभाति, दारुदर्व्या काष्ठमयदर्व्या सञ्चाल्य, पचेदिति शेषः, ततः कल्कशेषितं द्रवक्षयात् औषधमात्रावशिष्टमिदं शीते अम्भसि गालयेत प्रक्षिपेदित्यर्थः । क्षणात् क्षणकालानन्तरं तस्मात् जलात् आदाय स्वल्पमूषायां घनं यथा तथा द्रावयेदिति ॥ ८९।९० ॥

अथ रसायने पञ्चविंशल्लोहकल्पः।—

कान्तपात्रे शृतं क्षीरं रसायनमनुत्तमम् ॥८१॥

अथ मृत्युहारिनामा षड्विंशल्लोहकल्पः।—

अथ पत्रं तिलोत्सेधं प्रतप्तं चतुरङ्गुलम्।
एकविंशतिपर्य्यायं धात्र्या निर्वापयेद्रसे ॥८२॥
ततः शतपलं स्थाल्यां क्षिप्त्वा धात्रीरसोत्तमम्।
कृत्वा ततः सुपिहितं भस्मराशौ विनिक्षिपेत् ॥८३॥
मासि मासि समुद्धृत्य लोहदण्डेन घट्टयेत्।
तस्मिन् विशुष्यति प्राग्वद्रसं धात्र्याः प्रदापयेत् ॥८४॥
द्रवीभवति तत् सर्वं वत्सरात् पत्रमायसम्।
ततः समन्ततोऽङ्गुष्ठ-पर्वमात्रमुखेन तु ॥८५॥
आयसेन स्रुवेणाय:-पात्रे कल्कीकृतं ततः।
शृतं पृथक् समांशेन सेवेत मधुसर्पिषा ॥८६॥
जीर्णे साज्यं रसक्षीर-यूषान्यतमसंमिश्रितम्।
षष्टिकौदनमश्नीयादुपयुञ्जीत वत्सरम् ॥८७॥
वर्षमन्यच्च शिष्टाशी यन्त्रितात्मा कुटीं वसेत्।

पञ्चविंशल्लोहकल्पमाह, कान्तेति।—कान्तपात्रे कान्ताख्यलौहभाजने शृतं पक्वम् अङ्गावर्त्तितं वा ॥ ८१ ॥

मृत्युहारिनामा षड्विंशल्लोहकल्पमाह, अथ पत्रमिति।—एकविंशतिपर्य्यायं क्रमेणैकविंशतिवारमित्यर्थः। अङ्गुष्ठेति।—अङ्गुष्ठस्य पर्वमात्रम् अग्रपर्वप्रमाणं मुखं यस्य तादृशेन, आयसेन स्रुवेण लौहस्रुचा, गृहीत्वेति शेषः, एतेनैवास्य लौहस्य सेवनमात्रा प्रदर्शिता भवति, अङ्गुष्ठाग्रपर्वप्रमाणमुखविशिष्टाया लौहस्रुचि यावन्मात्रं लौहद्रवं परिमातुं शक्नोति तावदेव भक्षणीयमिति, शृतं वह्निना सन्तप्तं, ततः पृथक् समांशेन मधुसर्पिषा कल्कीकृतं सेवेत, तादृशस्रुवेण द्रुतलौहपत्रं गृहीत्वा अयःपात्रे किञ्चित् सन्तापयेत्, ततः शीतीभूतं तत् मधुसर्पिषा पिष्ट्वा सेवेतेत्यर्थः। उपयुञ्जीत वत्सरं यावता लौहपत्रेण संवत्सरं सेवनमर्हति, प्रदर्शितरीत्या तावदेव लौहं साधनीयमिति। वर्षमन्यच्च द्वितीयं वर्षं, द्वितीयं वर्षं व्याप्य इत्यर्थः, शिष्टाशी हितभोजी

अगम्यो रुग्जरामृत्युशस्त्राग्निविषवारिभिः॥
जीवेद्वर्षसहस्रं वै सर्वभावेष्वतीन्द्रियः॥९८॥

अथ सप्तविंशादिलोहकल्पत्रयम्।—

ताम्ररौप्यसुवर्णानामयमेव पृथग्विधिः।
द्विगुणं तत् गुणोत्कर्षाज्जानीयादुत्तरोत्तरम्॥९९॥

अथ अरिष्टलक्षणे त्रिंशल्लोहकल्पः।—

हेम धात्रीरसक्षौद्रं गायत्रीरसभावितम्।
लिहन्ननु पिबेत् क्षीरं दृष्टरिष्टोऽपि जीवति॥१००॥

अथ जरादौ एकत्रिंशल्लोहकल्पः।—

मधुमागधिकाविडङ्गसार-त्रिफलाहेमघृतसिताश्च खादन्।
जरयाऽनवलीढदेहकान्तिः समधातुश्च समाः शतञ्च जीवेत्॥
॥१०१॥

यन्त्रितात्मा संयतः सन् कुटौ गृहविशेषे वसेत् कुटीप्रवेशं कृत्वा तिष्ठेदित्यर्थः, कुटीलक्षणञ्चोक्तं चरकेण—"रसायनानां द्विविधं प्रयोगमृषयो विदुः। कुटीप्रावेशिकञ्चैव वातातपिकमेव च॥ कुटीप्रावेशिकस्यादौ विधिः समुपदेक्ष्यते। नृपवैद्यद्विजातीनां साधूनां पुण्यकर्मणाम्॥ निवासे निर्भये शस्ते प्राप्योपकरणे पुरे। दिशि पूर्वोत्तरस्यान्तु सुभूमौ कारयेत् कुटीम्॥ विस्तारोत्सेधसम्पन्नां त्रिगर्भां सूक्ष्मलोचनाम्। घनभित्तिमृतुसुखां सुस्पष्टां मनसः प्रियाम्॥ शब्दादीनामशस्तानामगम्यां स्त्रीविवर्जिताम्। इष्टोपकरणोपेतां सज्जवैद्यौषधद्विजाम्॥" इति। सर्वभावेष्वतीन्द्रियः सर्वेष्वेव विषयेषु अतीन्द्रियज्ञानसम्पन्नो भवति, अतीन्द्रियमपि विषयं ज्ञातुमर्हतीत्यर्थः॥ ९२—९८॥

सप्तविंशादिलोहकल्पत्रयमाह, ताम्रेति।—अयमेव विधिः लोहवत् विधिः। द्विगुणमिति।—ताम्रापेक्षया रौप्यकल्पः रौप्यापेक्षया च स्वर्णकल्पः द्विगुणगुणसम्पन्नो भवतीत्यर्थः॥ ९९॥

त्रिंशल्लोहकल्पमाह, हेमेति।—हेम स्वर्णभस्म। गायत्रीरसभावितं खदिररसभावितम्। गायत्रीरसभावितं हेमभस्म धात्रीरसक्षौद्राभ्यां लिह्यादिति॥ १००॥

एकत्रिंशल्लोहकल्पमाह, मध्विति।—हेम स्वर्णभस्म। समाः शतं शतवर्षम्॥ १०१॥

अथ द्वाविंशादिलोहकल्पचतुष्टयम् ।—

आयुष्कामः शङ्खपुष्प्या समेतं

मेधाकामः काञ्चनं सोग्रगन्धम् ।

लक्ष्मीकामः पद्मकिञ्जल्कयुक्तं

खादेत् कामं कामकामो विदार्य्या ॥१०२॥

अथ रसायने षट्‌त्रिंशल्लोहकल्पः ।—

सपद्मबीजामलकाभयाऽक्तं सर्पिर्मधुभ्यां कनकं लिहन्तः ।

दीर्घायुषो मन्दजरोपतापाः सरीसृपाणाञ्च भवन्त्यगम्याः ॥१०३॥

अथ मृतलोहानां रसत्वकथनम् ।—

मृतानि लोहानि रसीभवन्ति निघ्नन्ति रोगान् परिशीलितानि ।

किञ्चोपचारस्य समग्रयोगात् पुष्णन्ति धातूनतिदीर्घमायुः ॥१०४॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये

मृतलोहकल्पनिरूपणं नामाष्टविंशतितमोऽध्यायः ॥ २८ ॥

द्वात्रिंशल्लोहकल्पात् पञ्चत्रिंशल्लोहकल्पपर्य्यन्तं कल्पचतुष्टयमाह, आयुरिति ।—काञ्चनमिति पदं योगचतुष्टयेन सम्बध्यते । सोग्रगन्धं सवचम् । लक्ष्मीकामः श्रीकामः, सौन्दर्य्याभिलाषीत्यर्थः, धनाभिलाषीत्यर्थो वा, धनार्जनसाधकत्वञ्च सुवर्णस्य सपद्मकिञ्जल्कस्य यावज्जीवं स्वास्थ्यानुवर्त्तनद्वारा । पद्मकिञ्जल्कः पद्मकेशरः । कामं यथेष्टम् । कामकामः कामाभिलाषी ॥ १०२ ॥

षट्‌त्रिंशल्लोहकल्पमाह, सपद्मेति ।—पद्मबीजादयः कनकान्ताः सर्वे तुल्याः । घृतमधुभ्यां लेहः । सरीसृपाणां सर्पादीनाम् ॥ १०३ ॥

मृतलोहानां रसत्वं तथा सामान्यतो गुणांश्चाह, मृतानीति ।—लोहानि स्वर्णादीनि अष्टविधानि । रसीभवन्ति पारदवत् गुणदायीनि भवन्ति, रसायनानि भवन्तीत्यर्थः । परिशीलितानि सततमभ्यस्तानि । उपचारस्य समग्रयोगात् विहिताहारविहारादेः सम्यक् प्रयोगादित्यर्थः ॥ १०४ ॥

इति रसरत्नसमुच्चयबोधिन्याम् अष्टाविंशतितमोऽध्यायः समाप्तः ॥२८॥

अथ एकोनत्रिंशत्तमोऽध्यायः ।

अथ विषकल्पः ।—

अथ विषोत्पत्तौ पौराणिकी कथा ।—

ईश्वर उवाच—

शृणु देवि ! प्रवक्ष्यामि यथोत्पन्नं महाविषम् ।
भेदास्तस्य वरारोहे ! यच्च तत्र सविस्तरम् ॥ १ ॥
देवदैत्योरगाः सिद्धा गन्धर्वा यक्षराक्षसाः ।
पिशाचाः किन्नराश्चैव मिलित्वा च वरानने ! ॥ २ ॥
एकतो बलिराजश्च ब्रह्माद्याश्च तथैकतः ।
मन्थानं मन्दरं कृत्वा नागराजेन वेष्टितम् ॥ ३ ॥
क्षीराब्धिमन्थनं तत्र प्रारब्धं सुरसुन्दरि ! ।
निर्गतास्तत्र रत्नौघाः कामधेन्वादयः प्रिये ! ॥४॥
अमला कमलोत्पन्ना पश्चादुच्चैःश्रवास्ततः ।
ऐरावतो महाकायो निर्गतं देवि ! चामृतम् ॥५॥
अतीव मन्थनाद्देवि ! मन्दराघातवेगतः ।
अहिराजश्रमाद्देवि ! विषज्वाला विनिर्गता ॥६॥
ततोऽतिघोरा सा ज्वाला निमग्ना क्षीरसागरे ।
तया तत्रैव चोत्पन्नं कालकूटं महाविषम् ॥७॥
प्रलयानलसङ्काशः क्रुद्धः काल इवोत्कटः ।
तं दृष्ट्वा विबुधाः सर्वे दानवाश्च महाबलाः ॥८॥
विषण्णवदनाः सद्यः प्राप्ताश्चैव मदन्तिकम् ।
ततस्तैः प्रार्थ्यमानोऽहमपिबं विषमुत्तमम् ॥९॥

युक्तियुक्तं प्रयुक्तस्य विषस्यापि रसायनवत् गुणकारकत्वात्, रसायनविशेषं लौह-कल्पमुक्त्वा विषकल्पं विवक्षुः आदौ तस्य प्रथमोत्पत्त्यादिकं श्रीमद्भगवच्छङ्करमुखेन विवृणोति, ईश्वर इति ।—देवि ! इति पार्वत्याः सम्बोधनम् । मन्थानं मन्थनदण्डम् ।

अथ स्थावरविषाणां जातिभेदाः।—

ततोऽवशिष्टमभवन्मूलरूपेण तत् विषम्।
पत्ररूपेण कुत्रापि मृत्तिकारूपतः क्वचित् ॥१०॥
कुत्रचित्तोयरूपेण धातुरूपेण कुत्रचित्।
कन्दरूपेण कुत्रापि त्रयोदशविधं विषम् ॥११॥

अथ कन्दविषाणां नामानि।—

तेषु श्रेष्ठं कन्दविषं त्रयोदशविधं स्मृतम्।
कर्कटं कालकूटञ्च वत्सनाभं हलाहलम् ॥१२॥
बालुकं कर्दमञ्चैव सक्तुकं मूलकन्तथा।
सर्षपं शृङ्गिकं देवि! मुस्तकञ्च महाविषम्॥
हारिद्रकमिति प्रोक्तं त्रयोदशविधं विषम् ॥१३॥

अथ कर्कटादिकन्दविषाणां लक्षणम्।—

कर्कटं कपिवर्णं स्यात् काकचञ्चुनिभं पुनः।
कालकूटं ततो ज्ञेयं वत्सनाभन्तु पाण्डुरम् ॥१४॥
भङ्गराकन्दवत् देवि! नीलवर्णं हलाहलम्।
बालुकं बालुकाभञ्च कर्दमं कर्दमोपमम् ॥१५॥
सक्तुकं श्वेतवर्णं स्यान्मूलकन्दन्तु मूलकम्।
सर्षपं पीतवर्णं स्याच्छृङ्गिकं कृष्णपिङ्गलम् ॥१६॥
मुस्ताभं मुस्तकं प्रोक्तं रक्तवर्णं महाविषम्।
हारिद्रकं पीतवर्णं विषभेदाः प्रकीर्त्तिताः ॥१७॥

नागराजेन वासुकिना। तत्र क्षीराब्धौ, क्षीराब्धित इत्यर्थः। कमलोत्पन्ना लक्ष्मीराविर्भूता। तया विषज्वालया ॥ १—९ ॥

स्थावरविषाणां जातिभेदानाह, तत इति।—ततोऽवशिष्टं मत्यानावशिष्टम् ॥ १०।११॥

त्रयोदशविधकन्दविषाणां नामान्याह, तेष्विति।—स्पष्टम् ॥ १२।१३ ॥

कर्कटादीनां कन्दविषाणां लक्षणान्याह, कर्कटमिति।—भङ्गुराकन्दवत् भङ्गुरा अतिविषा, सा एव कन्दः तद्वत् अतिविषावदाकृतिविशिष्टम् ॥ १४—१७ ॥

अथ श्वेतादिवर्णभेदेन विषाणां जातिभेद।—

चतुर्द्धा वर्णभेदेन विषं ज्ञेय मनीषिभिः।
ब्रह्मक्षत्रियविट्शूद्रा श्वेतरक्ताश्च पीतकाः॥
कृष्णवर्णः क्रमाज्ज्ञेयो वर्णानामनुपूर्वशः॥१८॥

अथ वर्णभेदेन विषाणां क्रियाभेद।—

मारणे कृष्णवर्णं स्याद्रक्तन्तु रसकर्मणि।
पीतवर्णं क्षुद्रकार्य्ये श्वेतवर्णं रसायने॥१९॥

अथ विषामृतयो तुल्ययोनित्वनिर्देश।—

क्षीरोदसागरे देवि। मथ्यमाने वरानने।।
उत्पन्नममृतं देवि। तथोत्पन्नं महाविषम्॥२०॥

अथ विषस्य मात्रानिर्देश।—

आरोटं भक्षयेत् देवि। विषं सर्षपमात्रकम्।
प्रथमे दिवसे पश्चाद्द्वितीयादौ द्विसर्षपम्॥२१॥

श्वेतादिवर्णभेदेन विषाणा जातिभेदानाह, चतुर्द्धेति।—तत्र श्वेतवर्णं ब्राह्मण, रक्तवर्णं चत्त्रिय, पीतवर्णं वैश्य, कृष्णवर्णं शूद्र इति॥ १८॥

वर्णभेदेन कर्मभेदानाह, मारणे इति।—मारणे हननक्रियाया, जीवनविनाशने इत्यर्थ। रसकर्मणि पुष्टिसाधने इत्यर्थ। क्षुद्रकार्य्ये निर्दिष्टकर्मव्यतिरिक्तेतरकार्य्ये, कुष्ठादिव्याधाविव्यर्थ। तथा च भावप्रकाशधृततन्त्रान्तरवचन यथा—"रसायने विष विप्र चत्रिय देहपुष्टये। वैश्य कुष्ठविनाशाय शूद्र दद्यात् वधाय हि॥" इति॥ १९॥

विषामृतयोराकारसाम्यमाह, क्षीरोदेति।—अत्र विषामृतयोरेकत्रोत्पत्तिप्रदर्शनेन एतदुक्त भवति यत्, अमृत प्राणप्रदमपि अयथाप्रयोगेण विषवन्मारक भवति, तथा विष प्राणहरमपि युक्तियुक्तप्रयोगेण अमृतवत् जीवनकर भवति इति॥ २०॥

प्रयोगार्थं विषस्य मात्रानियममाह, आरोटमिति।—आरोट विशुद्धमित्यर्थ। "सुशोधित रस सम्यगारोट इति कथ्यते" इत्येकादशाध्याये सुशोधितरसार्थे परिभाषितस्यापि आरोटशब्दस्य इह उपचारात् सामान्यत सुशोधितार्थे प्रयोग,।

पञ्चमे दिवसे देवि ! भक्षयेत् सर्षपत्रयम् ।
षट्सप्ताष्टदिनेऽप्येवं नवमे वेदसङ्ख्यया ॥
भक्षयेद्राजिकावृद्ध्या यावद्गुञ्जामितं भवेत् ॥२२॥

अथ प्रयोगकालभेदेन विषस्य क्रियाविशेष ।—

मासमात्रप्रयोगेण कुष्ठान्यष्ट हरेद्विषम् ।
पुण्डरीकं सविस्फोटं श्वेतमौडुम्बरं तथा ॥२३॥
छिन्नाभिन्नं कपालाख्यं क्लिन्नाह्व शवगन्धि च ।
कुष्ठानि गदितान्यष्ट हन्याद्देवि ! महाविषम् ॥२४॥
षण्मासस्य प्रयोगेण कामरूपो भवेन्नर. ।
संवत्सरप्रयोगेण सर्वरोगान् व्यपोहति ॥
द्विवत्सरप्रयोगेण दिव्यदेहो भवेन्नरः ॥२५॥

द्वितीयादौ द्वितीय-तृतीय चतुर्थदिनेषु । एवं सर्षपत्रयमित्यर्थः । नवमे नवमदिने वेदसङ्ख्यया चतु ष्षपमानेनेत्यर्थ । राजिकावृद्ध्या सर्षपवृद्ध्या यावत् गुञ्जामित भवेत् "षड्रजः सर्षप. प्रोक्तस्ते षड्भिर्यव ईरित । एका गुञ्जा यवै षड्भि" इत्येतद्ग्रन्थोक्तपरिभाषानुसारेण षट्त्रिंशता सर्षपै गुञ्जादर्शनात् दशमदिवसादारभ्य प्रतिदिनमेकैकसर्षपवृद्ध्या यावत षट्त्रिंशत् सर्षप पूर्य्येत, तावत् मात्रावृद्धिं कुर्य्यात्, एवञ्च एकचत्वारिंशद्दिवसेन गुञ्जा परिपूर्णा भवति, तत. गुञ्जामानेनैव षण्मासान् वर्षं वर्षद्वय वा सेवेत इति ॥ २१।२२ ॥

प्रयोगकालभेदेन विषस्य क्रियाविशेषमाह,—मासेति । कुष्ठाष्ट इत्युक्त, कानि तानि इत्याशङ्कायां तेषा नामान्याह, पुण्डरीकमिति ।—ननु अत्रोक्तं छिन्नाभिन्न क्लिन्नाह्व-शवगन्ध्यादिकं चरकादौ न दृश्यते, अतश्चरकादिविरुद्धमेतत् कथं सङ्गच्छते ? इति चेदुच्यते—कुष्ठ तावदसङ्ख्येय, कानिचित चरके, कानिचित सुश्रुते, कानिचिच्च तन्त्रान्तरेषु पठ्यन्ते, तथा हि, सुश्रुतोक्तमृक्षय रकसादिक न चरके. चरकोक्त मण्डल चर्मालसक शतारु प्रभृतिकं न सुश्रुते, एवञ्च चरकसुश्रुतयो बहुविधो भेदो दृश्यते, तस्मादय समाधिरुचित यत् कुष्ठानामसङ्ख्येयत्वात् तन्त्राणा तन्त्रकर्तृणामपि बहुत्वाच्च केचित् केचित् कुष्ठप्रकारा केषुचित केषुचित् तन्त्रेषु सन्निविष्टा दृश्यन्ते, चरकेऽप्युक्तं—"कुष्ठं सप्तविधमष्टादशविधमसङ्ख्येय वा" इति ॥ २३—२५ ॥

अथ मात्राऽमात्राभेदेन विषामृतयोर्गुणागुणौ ।—

मात्रया भक्षितं देवि ! विषमप्यमृतायते ।
मात्राधिकं वरारोहे ! ह्यमृतं वा विषं भवेत् ॥२६॥

अथ सात्म्यासात्म्ययोरमृतविषयोः सहसा प्रयोगे दोषः ।—

अमृतं सहसा युक्तं शीलितं विषमेव वा ।
सात्म्यासात्म्यं विकाराय मृत्यवे च वरानने ! ॥२७॥

अथ सहसा विषसेवने अष्टौ वेगाः ।—

वेगाश्चाष्ट प्रजायन्ते सहसा विषशीलिनः ।
प्रथमे त्वग्विकारः स्याद्द्वितीये वेपथुर्भवेत् ॥२८॥
दाहो वेगे तृतीये स्याच्चतुर्थे विकृतो भवेत् ।
फेनोद्गतिः पञ्चमे स्यात् स्कन्धयोर्भञ्जता ततः ॥२९॥
जाड्यता सप्तमे वेगे चाष्टमे मरणं ध्रुवम् ।
एवं ज्ञात्वा वरारोहे ! प्रतीकारं समाचरेत् ॥३०॥

अथ विषसेवने संशोधनविधिः ।—

पित्तान्ते वमनं कुर्य्यादामान्ते च विरेचनम् ॥३१॥

विषामृतयोः मात्राऽमात्राप्रयुक्तयोः गुणागुणावाह, मात्रयेति ।—स्पष्टम् ॥ २६ ॥

प्रकृत्यैव असात्म्यम् अयथाप्रयुक्तं मारकं तथा प्रकृतिसात्म्यमपि द्रव्यं तथाप्रयुक्तं विकारोत्पादकं भवति इति दर्शयितुमाह, अमृतमिति ।—सहसा अविधिनेत्यर्थः । सात्म्यासात्म्यमिति पदं क्रमेण अमृतविषाभ्यां सम्बध्यते, सात्म्यममृतम् असात्म्यं विषमित्यर्थः ॥ २७ ॥

विकाराय मृत्यवे च इत्युक्तं, तत्प्रदर्शनाय विषसेवने अष्टौ वेगानाह, वेगा इति ।—सहसा विषशीलिनः अविधिना विषसेविनः । त्वग्विकारः त्वचो वैवर्ण्यादि । "भञ्जता" इत्यत्र पीडा इति शेषः, "भञ्जता" इति पाठान्तरम् । चरकाचार्य्येण "तृण्मोहदन्तहर्ष—" इत्यादिना यानि वेगलक्षणानि प्रदर्शितानि तानि दृष्टिविषस्य, अत्र तु यानि, तानि उपयुक्तस्य स्थावरस्य लक्षणानि इति न कश्चित् अनयोः विरोधः इति ॥ २८—३० ॥

विषचिकित्सायां प्राक् वमनविरेचनयोः कर्त्तव्यत्वात् तद्विधानमाह, पित्तान्ते

अथ विषघ्नो गणः ।—

जातीनीलीश्वरीसिन्धु-काचमाच्यद्रिकर्णिका ।
त्रिफला करवीरञ्च कुष्ठं मधुकजीरकम् ॥
चीरिवृक्षत्वगेलेति विषघ्नोऽयं गणः स्मृतः ॥३२॥

अथ गव्यघृतस्य विषघ्नत्वोक्तिः ।—

विषघ्नं गोघृतं देवि ! माङ्गल्यं जीवनं स्मृतम् ॥३३॥

अथ विषस्य प्रयोगविधिः ।—

अश्वगन्धां सगोजिह्वां त्रिशूलीं त्रिफलामपि ।
प्रथमं भक्षयित्वा च सेवयेद्गरलं ततः ॥३४॥
ब्रह्मचर्य्यं वरारोहे ! विषकाले समाचरेत् ।
पथ्यं स्वस्थमना भुक्त्वा तदा सिद्धिर्न संशयः ॥३५॥

मिति ।—पित्तान्तं पित्तदर्शनं यावदित्यर्थः । आमान्तम् आमनिःसरणं यावदित्यर्थः । "आमान्तञ्च विरेचनम्" इत्यत्र "कफान्तञ्च विरेचनम्" इति पाठः बहुषु पुस्तकेषु दृश्यते ॥ ३१ ॥

विषघ्नगणमाह, जातीति ।—जाती "चामेली" इति प्रसिद्धवृक्षस्य पत्रम् । नीली शरपुङ्खा नीलवृक्षो वा, उभयोरपि विषनाशकत्वात् । ईश्वरी ईश्वरमूल वन्ध्याकर्कोटकी वा, तस्या मूलम् । सिन्धु सैन्धवलवणम् । काच काचलवणम् । माची काकमाची, "काचमाची" इत्यत्र "काकमाची" इति क्वचित् पाठः । अद्रिकर्णिका गिरिकर्णिका, श्वेतापराजिता इत्यर्थः । चीरिवृक्षत्वक् चीरिवृक्षाणां न्यग्रोधोडुम्बराश्वत्थप्लक्षवेतसानां त्वक् । एला स्थूलैला । गणत्वात् अनेन सर्वा क्वाथादिकल्पना कार्य्या ॥ ३२ ॥

गोघृतस्यापि विषनाशकत्वमाह, विषघ्नमिति ।—जीवनं जीव्यते अनेन इति जीवनं जीवनप्रदमित्यर्थः ॥ ३३ ॥

विषस्य प्रयोगविधिमाह, अश्वगन्धामिति ।—त्रिशूली पारदं, पारदभस्म इत्यर्थः । आदौ अश्वगन्धादीनां चूर्णं मिलितमेकैकशो वा युक्त्यनुरूपं भक्षयित्वा ततो विषं भक्षयेत् इति । विषकाले विषप्रयोगकाले स्वस्थमनाः पथ्यं भुक्त्वा ब्रह्मचर्य्यं समाचरेत् इत्यन्वयः ॥ ३४।३५ ॥

अथ विषसेविनः पथ्यापथ्यविधिः।—

गव्ये क्षीरघृते पेये शाल्यन्नमिदमेव च।
शीतलञ्च पिबेत्तोयं पित्तलानि च वर्जयेत्॥३६॥
जाङ्गलानि च मांसानि छागलोहञ्च मद्गुरान्।
शर्करा माक्षिकं क्षीरं सेवनीयं प्रयत्नतः॥
सेव्यं देवि! सदा पथ्यमपथ्यं दूरतस्त्यजेत्॥३७॥

अथ प्रयोज्यविषाणि।—

उद्धृतं फलपाकेन नवं स्निग्धं घनं गुरु।
अव्यापन्नं विषहरैरवाताऽऽतपशोषितम्॥३८॥
रक्तसर्षपतैलेन लिप्ते वाससि धारितम्।
सक्तुकं मुस्तकं शृङ्गी वालुकं सर्षपाह्वयम्॥३९॥
वत्सनाभञ्च कर्मण्यं कालकूटादिकं ततः।
न जात्वन्यत् प्रयोक्तव्यं—" ॥४०॥

अथ तीक्ष्णविषातियुक्तविषयोश्चिकित्सा।—

"—विषे तीक्ष्णे च चारिते।
अतिमात्रे च कर्मण्ये पेयं घृतमनन्तरम्॥४१॥

"पथ्यं भुक्त्वा" इत्युक्तं, किन्तत् पथ्यं किं वाऽपथ्यमित्याह, गव्ये इति।—छागलोहं छागशोणितम्। "सेव्यम्" इत्यत्र "एकम्" इति पाठे—एकं मुख्यं केवलं वा क्षीरमेव श्रेष्ठं पथ्यं, केवलं क्षीरमेव पथ्यमिति वा सदा प्रयत्नतः सेवनीयम इति॥ ३६।३७॥

ग्राह्यं विषमाह, उद्धृतमिति।—उद्धृतं फलपाकेन आपूर्णवीर्य्यमित्यर्थः। अव्यापन्नं विषहरैः विषनाशकद्रव्यैरनुपहतवीर्य्यम। अवाताऽऽतपशोषितं वाताऽऽतपादिभिरशोषितम, तथाविधविषाणां दूषीविषत्वेन परिणमनात्, यदुक्तं—"जीर्णं विषघ्नौषधिभिर्हतं वा दावाग्निवाताऽऽतपशोषितं वा। स्वभावतो वा गुणविप्रहीणं विषं हि दूषीविषतामुपैति॥" इति। धारितं स्थापितम्। कर्मण्यं कर्मणि प्रयोगकर्मणि हितं, प्रयोज्यमित्यर्थः। ततः अन्यत प्रोक्तसक्तुकादिभ्यः अन्यत्, तेषामतीव तीक्ष्णवीर्य्यत्वात॥ ३८—४०॥

तीक्ष्णविषे उपयुक्ते सक्तुकादौ च प्रयोज्ये विषे अतिमात्रोपयुक्ते अनन्तरकर्त्तव्यं

सभार्गीदधिधूमोत्थ-सारिवातण्डुलीयकम् ।
आगारधूममञ्जिष्ठा-यष्ट्याह्वैर्वा समन्वितम् ॥४२॥
लिह्याद्वा मधुसर्पिर्भ्यां चूर्णितामर्जुनत्वचम् ।
टङ्कणं मेघनादेन मधुना वाऽपि पल्लवान् ॥४३॥

अथ रसायनार्थं विषप्रयोगे विधि ।—

विषं युञ्जीत नित्यं वै रसायनगुणैषिणः ।
घृतोपस्कृतदेहस्य विशुद्धस्य हिताशिनः ॥४४॥

अथ विषप्रयोगार्हपुरुषकालयोर्निर्देश ।—

सात्त्विकस्योदिते भानौ योज्यं शीतवसन्तयोः ।
ग्रीष्मे चाऽऽत्ययिके व्याधौ—" ॥४५॥

माह, विषे तीक्ष्णे चेति ।—तीक्ष्णे निर्दिष्टमत्तकादिभ्य अन्यस्मिन् तीव्रे । चारिते अवचारिते, सेविते इत्यर्थ । अतिनाशे च क्रमशः इत्यत्रापि चारिते इति पद-माकृष्टव्यम । धूमोत्थ गृहधूम विषहन्तृत्वात, वज्रनाराख्यक्षारविशेषो वा। सभार्ग्यादौ आगारधूमेत्यादौ च योगद्वयेऽपि घृतमिति पद सम्बन्धनीयम, भार्ग्यादिचूर्णम् आगारधूमादिचूर्णं वा चतुर्गुणघृतेन आलोड्य पातव्यम् इति। मेघनादेन तण्डुलीयेन, तण्डुलीयरसेनेत्यर्थ, सह टङ्कण पिबेदिति शेष। मधुना वाऽपि पल्लवान् नेत्रपत्राणि। "पल्लवान्" इत्यत्र "यत्नवान्" इति क्वचित पाठ, तथात्वे—मेघनादरसेन मधुना च टङ्कण लिह्यादित्यर्थ ॥ ४१—४३ ॥

रसायनार्थं विषप्रयोगस्य विधिमाह, विषमिति ।—घृतोपस्कृतदेहस्य घृतसेवनेन संस्कृतदेहस्य विशुद्धस्य संशोधनशुद्धस्य, रसायनार्थं विषप्रयोगे कर्त्तव्ये आदौ घृतेन संस्निह्य पञ्चकर्मप्रयोगेण संशोध्य च विष प्रयुञ्ज्यात, तदा हितभोजी च स्यादिति ॥ ४४ ॥

विषप्रयोगार्हं पुरुष कालञ्चाह, सात्त्विकस्येति ।—भानौ उदिते प्रभाते । शीत-वसन्तयोर्योज्यमित्यस्यापवादमाह, ग्रीष्मे इति ।—ग्रीष्मे चात्ययिके व्याधौ अत्ययजनके व्याधौ ग्रीष्मे च ग्रीष्मेऽपि, योज्यमिति पूर्वेण सम्बन्ध, ग्रीष्मर्त्तौ विषप्रतीकार्य्ये व्याधिरुत्पन्नश्चेत आत्ययिको भवति, तदा शीतवसन्तयोरनपेक्षयैव सद्य एव विष दातव्यमिति ॥ ४५ ॥

अथ विषप्रयोगानर्हकालादिनिर्देशः।—

"—न वर्षासु न दुर्दिने।

न क्रोधिनि न पित्तार्त्ते न क्लीवे राजवेश्मनि॥४६॥

तृष्णाश्रमघर्माध्व-व्याध्यन्तरनिपीड़िते।

गर्भिण्यां बालवृद्धेषु न रूक्षेषु न मर्म्मसु॥४७॥

अथ विषे निषिद्धद्रव्याणि।—

अभ्यस्तेऽपि विषे यत्नाद्वर्ज्यवस्तु निवर्त्तयेत्।

कट्वम्ललवणं तैलं दिवास्वप्नानलातपान्॥४८॥

अथ अवस्थाविशेषे विषस्यापकारकत्वनिर्देशः।—

दृग्विभ्रम कर्णरुजमन्यांश्चानिलजान् गदान्।

विषं रूक्षाशिनः कुर्य्यान्मृत्युमेव त्वजीर्णिनः॥४९॥

अथ विषशोधनम्।—

अथ गोमूत्रसंयुक्तमातपे शोषयेत्त्र्यहम्।

विषं बृंहणमेतद्धि विषस्याऽऽदौ प्रशस्यते॥५०॥

विषप्रयोगे निषिद्धं कालं निषिद्धं पुरुषादिकञ्चाह, नेति।—दुर्दिने मेघाऽऽवृत-दिवसे। क्लीवस्य अपूर्णधातुत्वेन राजकुलजस्य च अत्यन्तसुकुमारत्वेन विषवीर्य्या-सहिष्णुतया तयोर्विषं न दातव्यम्। व्याध्यन्तरनिपीड़िते विषसाध्यव्याध्यतिरिक्त-व्याधिपीड़िते। "रूक्षेषु" इत्यत्र "कृशेषु" इति पाठान्तरम्। मर्म्मसु मर्म्मस्थानोत्पन्न-रोगेषु॥४६।४७॥

विषप्रयोगे निषिद्धद्रव्याण्याह, अभ्यस्ते इति।—अभ्यस्तेऽपि दीर्घकालसेवनेन सात्मीभूतेऽपि। "वर्ज्यवस्तु निवर्त्तयेत" इत्यत्र "वर्जनीयान् विवर्जयेत्" इति क्वचित् पाठः। कानि च वर्ज्यानि इत्यपेक्षायामाह,—कट्विति॥४८॥

रूक्षाशिनामजीर्णिनाञ्च विषप्रयोगे अत्ययमाह, दृगिति।—दृग्विभ्रमं दृष्टि-विपर्य्ययम्, अन्यथाभूतस्य वस्तुनः अन्यथा दर्शनम्। अजीर्णिनः अजीर्णरोगिणः॥४९॥

विषस्य शुद्धिमाह, अथेति।—बृंहणमेतद्धि एतत् गोमूत्रेणातपे शोषणं विषस्य बृंहणं बलवर्द्धनम्, अशुद्धस्य विषस्य शुद्धिजननात् रोगनाशनादिशक्तिवर्द्धन-मित्यर्थः॥५०॥

अथ नवज्वरे प्रथमविषकल्पः ।—

तत् पिबेन्मस्तुना वात-ज्वरे क्षीरेण पित्तजे ।
शकृन्मूत्रेण कफजे सर्वजे त्रिफलाम्भसा ॥५१॥

अथ जीर्णज्वरे द्वितीयविषकल्पः ।—

रोध्रचन्दनषड्ग्रन्था-शर्कराघृतमाक्षिकैः ।
क्षीरेण च विषं युक्तं जीर्णज्वरहरं परम् ॥५२॥

अथ जीर्णज्वरादौ तृतीयविषकल्पः ।—

निकुम्भकुम्भत्रिफला-सर्पिर्मधुविषैः कृतः ।
निहन्ति मोदको जीर्णं ज्वरमेहत्वगामयान् ॥५३॥

अथ विषमज्वरे चतुर्थविषकल्पः ।—

शिखिकर्णिरसोपेतं विषमज्वरजिद्विषम् ॥५४॥

अथ रक्तपित्ते पञ्चमविषकल्पः ।—

विषं यष्ट्याह्वयं रास्ना सेव्यमुत्पलकन्दकम् ।
तण्डुलोदकपीतानि रक्तपित्तस्य भेषजम् ॥५५॥

प्रथमविषकल्पमाह, तदिति ।—शकृन्मूत्रेण गोशकृद्रसेन गोमूत्रेण चेत्यर्थः । "शकृन्मूत्रेण" इत्यत्र "यकृन्मूत्रेण" इति पाठश्चिन्त्यः । क्वचित् पुस्तके "अजामूत्रेण" इति पाठो दृश्यते ॥ ५१ ॥

द्वितीयविषकल्पमाह, रोध्रेति ।—षड्ग्रन्था वचा । पूर्वोक्तमानेन विषं गृहीत्वा लोध्रादिचूर्णं घृतमाक्षिकञ्च युक्त्यनुरूपं किञ्चित् किञ्चित् दत्त्वा दुग्धेनालोड्य पेयम् ॥ ५२ ॥

तृतीयविषकल्पमाह, निकुम्भेति ।—निकुम्भकुम्भौ क्षुद्रबृहद्भेदेन दन्तीभेदौ, निकुम्भः दन्ती कुम्भः त्रिवृता इति वा ॥ ५३ ॥

चतुर्थविषकल्पमाह, शिखिकर्णीति ।—शिखिकर्णी अग्निकर्णीनामा वृक्षभेदः, शिखी चित्रकः कर्णी आरग्वधः इति वा ॥ ५४ ॥

पञ्चमविषकल्पमाह, विषमिति ।—सेव्यम् उशीरम् । उत्पलकन्दकं नीलोत्पलकन्दम् । तण्डुलोदकपीतानि इत्यत्र एतानि इति पूरणीयम् ॥ ५५ ॥

अथ श्वासकासे षष्ठविषकल्प ।—

रास्नाविडङ्गत्रिफला-देवदारुकटुत्रयम् ।

पद्मकं चौद्रमन्नृता विषञ्च श्वासकासजित् ॥५६॥

अथ श्वासहिक्कयो सप्तमविषकल्प ।—

सिता रसविषक्षीर-प्रवालमधुकान्विता ।

श्वासहिक्कापहा लीढा—" ॥५७॥

अथ छर्द्यां अष्टमविषकल्प ।—

"—छर्दिघ्नास्तु विषान्विता' ।

क्षौद्रोशीरमधुक्षार-रजनीकुटजत्वचः ॥५८॥

अथ क्षये नवमविषकल्प ।—

च्यवनप्राशनोपेतं विषं क्षपयति क्षयम् ॥५९॥

अथ विषविद्रावणघृताख्य दशमविषकल्प ।—

विजया पिप्पलीमूलं पिप्पलीद्वयचित्रकैः ।

पुष्कराह्वाशटीद्राक्षा-यमानीक्षारदीप्यकैः ॥६०॥

सितायष्टिद्विबृहती सैन्धवैः पालिकैः पचेत् ।

सविषार्द्धपलैः प्रस्थं घृतात्तज्जीर्णभुक् पिबेत् ॥६१॥

दुर्नामशिहगुल्माश्म-तिमिरक्रमिपाण्डुकान् ।

गलग्रहग्रहोन्माद-कुष्ठानि च नियच्छति ॥

विषविद्रावणं नाम घृतं विषरुजं हरेत् ॥६२॥

षष्ठविषकल्पमाह, रास्नेति।—स्पष्टम ॥ ५६ ॥

सप्तमविषकल्पमाह, सितेति।—रस सूतो रस ॥ ५७ ॥

अष्टमविषकल्पमाह, छर्दिघ्ना इति।—मधु यष्टिमधु इत्यर्थ । क्षार' यवक्षार ॥ ५८ ॥

नवमविषकल्पमाह, च्यवनेति।—च्यवनप्राशेन सह विषं मिश्रयित्वा भक्षयेत् इति ॥ ५९ ॥

विषविद्रावणघृताख्य दशमविषकल्पमाह, विजयेति।—विजया भङ्गा । पिप्पलीद्वय पिप्पली गजपिप्पली च। "पिप्पलीद्वय" इत्यत्र "रजनीद्वय" इति क्वचित पाठ. ।

अथ ग्रहण्याम् एकादशविषकल्प ।—

मुस्तावत्सकपाठाग्नि व्योषप्रतिविषाविषम् ।
धातकीमोचनिर्य्यास. चूतास्थि ग्रहणीहरम् ॥६३॥

अथ मूत्रकृच्छ्रे द्वादशविषकल्प ।—

कृच्छ्रघ्नं विषपथ्याग्नि दन्तीद्राक्षानिशावृषाः ॥६४॥

अथ उदावर्त्ताश्मर्य्यो त्रयोदशविषकल्प ।—

शिलाजतु विषं त्र्यूषमुदावर्त्ताश्मरीहरम् ॥६५॥

अथ अश्मर्य्या चतुर्दशविषकल्प ।—

गोमूत्रक्षारसिन्धूत्थ-विषपाषाणभेदकम् ।
वज्रवद्दारयत्येतदेकतः पीतमश्मरीम् ॥६६॥

अथ गुल्मे पञ्चदशविषकल्प ।—

त्रिफलास्वर्जिकाक्षारैर्विष गुल्मप्रभेदनम् ॥ ६७॥

अथ शूले षोडशविषकल्प ।—

पिप्पली पिप्पलीमूलं विष शूलहर तथा ॥६८॥

अथ गुल्म प्लीह्नो सप्तदशाष्टादशविषकल्पौ ।—

विषं द्रवन्ती मधुक द्राक्षारास्नाशठीकणाः ।
विषं वेल्लमिषिक्षीर गुल्मप्लीहनिवर्हणम् ॥६९॥

दीप्यक जीरक । यष्टि यष्टिमधु । द्विबृहती बृहती कण्टकारी च । पालिके प्रत्येक पलमाने कल्के । जीर्णभुक् जीर्णान्न, नर पिबन प्रभातकाले पिबेदित्यथ ॥६०—६२॥

एकादशविषकल्पमाह, मुस्तेति ।—वत्सक इन्द्रयव । अग्नि चित्रक । प्रतिविषा अतिविषा । मोचनिर्य्यास मोचरस । चूतास्थि आम्रास्थिमज्जा ॥ ६३ ॥

द्वादशविषकल्पमाह, कृच्छ्रघ्नमिति ।—वृष वासक ॥ ६४ ॥

त्रयोदशविषकल्पमाह, शिलाजत्विति ।—त्र्यूष त्रिकटु ॥ ६५ ॥

चतुर्दशविषकल्पमाह, गोमूत्रेति ।—एकत ऐकध्यम् ॥६६॥

पञ्चदशविषकल्पमाह, त्रिफलेति ।—स्पष्टम् ॥ ६७ ॥

षोडशविषकल्पमाह, पिप्पलीति ।—स्पष्टम् ॥ ६८ ॥

सप्तदशाष्टादशविषकल्पद्वयमाह, विषमिति ।—द्रवन्ती दन्तीभेद' । विष वेल्लेति । —वेल्ल विडङ्गम् । मिषि. मधुरिका । विषादित्रय क्षीरेण पिबेत् । "विषं

अथ प्लीह्नि एकोनविंशविषकल्पः ।—

प्लीहोदरघ्नं पयसा शताह्वाक्रिमिजिद्विषम् ॥७०॥

अथ कुष्ठे विंशविषकल्पः ।—

वायसीमूलनिःक्वाथ-पीतं कुष्ठहरं विषम् ॥७१॥

अथ कुष्ठे एकविंशविषकल्पः ।—

पयस्याराजवृक्षत्वक्-त्रायन्तीवाकुचीबलात् ।

प्लीहघ्नीभकणाभ्याञ्च विषं क्वाथेन कुष्ठजित् ॥७२॥

अथ कुष्ठे द्वाविंशविषकल्पः ।—

अवल्गुजैडगजयोर्वीजं क्षारद्वयं विषम् ।

लेपः ससैन्धवः पिष्टो वारिणा कुष्ठनाशनः ॥७३॥

अथ विचर्चिकादौ त्रयोविंश-चतुर्विंशविषकल्पौ ।—

चित्रकार्कजटाहस्ति-पिप्पलीवाकुचीविषैः ।

सचन्द्रकैरेडगज-करञ्जफलसैन्धवैः ॥७४॥

सव्योषसर्जिकाक्षार-यवक्षारनिशाद्वयैः ।

अगारधूमसहितैर्वस्तमूत्रेण कल्पितैः ॥७५॥

वेल्लमिषिक्षीरम्" इत्यत्र "विषा वेल्लमिषिक्षारम्" इति कस्यचित् पाठे—विषादि-क्षारान्तैरेक एव योगः ॥ ६९ ॥

एकोनविंशविषकल्पमाह, प्लीहोदरघ्नमिति ।—क्रिमिजित् विडङ्गम् ॥७०॥

विंशविषकल्पमाह, वायसीति ।—वायसीमूलं काकमाचीमूलम् ॥ ७१ ॥

एकविंशविषकल्पमाह, पयस्येति ।—पयस्या क्षीरकाकोली । राजवृक्षत्वक् आरग्वधवल्कलम् । त्रायन्ती त्रायमाणा । वाकुची सोमराजी । बला जटामांसी बोला वा । "बलात्" इत्यत्र "बला" इति क्वचित् पाठः । प्लीहघ्नी रोहीतकः । इभकणा गजपिप्पली । पयस्यादीनामिभकणान्तानां क्वाथेन सह विषं कुष्ठजित् भवेत् ॥ ७२ ॥

द्वाविंशविषकल्पमाह, अवल्गुजेति ।—अवल्गुजः सोमराजी, एडगजः चक्रमर्दः, एतयोर्वीजम् ॥ ७३ ॥

त्रयोविंश-चतुर्विंशविषकल्पद्वयमाह, चित्रकेति ।—अर्कजटा अर्कमूलम् । सचन्द्रकैः चन्द्रकः कपिकच्छुवीजं, रक्तदोषहरत्वात्, तेन सह वर्त्तमानैः । फलं त्रिफला,

भल्लातकाग्निशम्पाक-विषैर्वा मूत्रपेषितैः ।
लेपो विचर्चिकादद्रु-रसिकाकिटिमापहः ॥७६॥

अथ विचर्चिकादौ पञ्चविंशविषकल्पः ।—

शम्पाकपत्रत्वङ्मूलं विषं तक्रञ्च तद्गणम् ॥७७॥

अथ कुष्ठे षड्विंशविषकल्पः ।—

कुष्ठतुम्बुरुबीजानि वाजिगन्धाऽम्लवेतसम् ।
हरिद्रा वायसी रास्ना हरितालं मनःशिला ॥७८॥
पटोलनिम्बपत्राणि कणागन्धकसैन्धवम् ।
विषं दारु शिरीषास्थि तक्रे लेपेन कुष्ठजित् ॥७९॥

अथ कुष्ठे विषतैलाख्य सप्तविंशविषकल्पः ।—

करञ्जकरवीरार्क-मालतीरक्तचन्दनैः ।
आस्फोताकुष्ठमञ्जिष्ठा-सप्तच्छदनिशानतैः ॥८०॥
सिन्धुवारवचाक्ष्वेलैर्गवां मूत्रे चतुर्गुणे ।
सिद्धं कुष्ठहरं तैलं दुष्टव्रणविशोधनम् ॥८१॥

करञ्जफलमिति केचित् । "निशाद्वये" इत्यत्र "निशाह्वये" इति क्वचित् पाठः । वस्तमूत्रेण छागमूत्रेण । "काल्पते" इत्यत्र "कल्किते" इति क्वचित् पाठः । चित्रकेत्यादिना कल्पितैरित्यन्तेन एको योगः भल्लातकादिना च अपरो योगः । अत्र मूत्रपेषिते वस्तमूत्रपेषितं, पूर्वयोगदर्शनात् । "रसिका" इत्यत्र "रकसा" इति पाठः समीचीनतया प्रतिभाति ॥ ७४—७६ ॥

पञ्चविंशविषकल्पमाह, शम्पाकेति ।—शम्पाकः आरग्वधः । तद्गणः विचर्चिकादि नाशनम् ॥ ७७ ॥

षड्विंशविषकल्पमाह कुष्ठेति ।—शिरीषास्थि शिरीषबीजास्थि । तक्रेण पेषणं कर्त्तव्यम् ॥ ७८।७९ ॥

सप्तविंशविषकल्पमाह करञ्जेति ।—मालती जाती । आस्फोता गिरिकर्णिका, "हापरमाली" इति प्रसिद्धम् । सप्तच्छदः सप्तपर्णः । नतं तगरपादुका । क्ष्वेलं क्ष्वेडं, डलयोरभेदात्, विषमित्यर्थः । तैलमत्र सार्षपादीनामन्यतमं कुष्ठहितत्वात्, उक्तं हि चरके—'तैलानि सर्षपाणां करञ्जकोषातकीङ्गुदादीनाञ्च । कुष्ठेषु हितान्याहुस्तैलं

अथ कुष्ठे कुष्ठादितैलाख्य अष्टाविंशविषकल्पः।—

कुष्ठाश्वमारभृङ्गार्क-मूलस्नुक्क्षीरसैन्धवैः।
तैलं सिद्धं विषावापमभ्यङ्गात् कुष्ठजित् परम् ॥८२॥

अथ कुष्ठादौ चन्दनादितैलाख्य एकोनत्रिंशविषकल्पः।—

भद्रश्रीदारुमरिच-द्विहरिद्रात्रिवृद्घनैः।
गोमूत्रपिष्टैः पलिकैर्विषस्यार्द्धपलेन च ॥८३॥
ब्राह्मीरसार्कजक्षीर-गोशकृद्रससंयुतम्।
प्रस्थं सर्षपतैलस्य सिद्धमाशु व्यपोहति ॥
पानाद्यैः शोणित कुष्ठ दुष्टनाडीव्रणापचीः ॥८४॥

अथ श्वित्रादौ त्रिंशविषकल्पः।—

विषं भल्लातकं द्वीपि-गुञ्जानिम्बफलैर्जयेत्।
लेपोऽम्लपिष्टैः श्वित्राणि पुण्डरीकञ्च दारुणम् ॥८५॥

यत्रापि खदिरस्य॥" इति। केचित्तु "सामान्यश्रुतौ प्रधानकल्पत्वेन तिलतैलमेव ग्राह्यं, यत्र तु विशेषश्रुति तत्रैव सार्षपादिग्रहणम्" इत्याहुः। एवमन्यत्रापि एव-जातीये ज्ञेयमिति। सिद्धयोगे तु "निशा" इत्यत्र "निशाह्वय" करञ्जादीनां कल्कानां प्रत्येकमर्द्धपलमानं विषस्य पलमानं तैलस्य च प्रस्थमानमिति विशेषो दृश्यते॥ ८०।८१॥

अष्टाविंशविषकल्पमाह, कुष्ठेति।—अश्वमारः करवीरः। भृङ्गः भृङ्गराजः। विषावापं विषकल्कयुतम्, कुष्ठादीनां विषान्तानां कल्कैः पादिकैः चतुर्गुणजलेन च तैलप्रस्थं पक्तव्यं॥ ८२॥

एकोनत्रिंशविषकल्पमाह भद्रश्रीति।—भद्रश्री श्वेतचन्दनम्। द्विहरिद्रा हरिद्रा दारुहरिद्रा च। पलिकैः प्रत्येकं पलमानैः। भद्रश्र्यादयो विषान्ता कल्काः, ब्राह्मीरसादयः त्रयः द्रवाः प्रत्येकं चतुर्गुणाः॥ ८३।८४॥

त्रिंशविषकल्पमाह, विषमिति।—द्वीपी चित्रकः, "द्वीपी" इत्यत्र "दन्ती" इति पाठान्तरम्। फलमिति गुञ्जा-निम्बयोः उभयत्रापि सम्बध्यते। अम्लपिष्टैः काञ्जिकपिष्टैः॥ ८५॥

अथ श्वित्रे एकविंशविषकल्पः ।—

ककुभारुष्करद्वीपि-स्पृक्कापञ्चैलवालुकम् ।

पिष्टं खादिरतोयेन त्रिरात्रमुषितं पिबेत् ॥

श्वित्री विषेण सङ्घृष्टं—" ॥ ८६ ॥

अथ श्वित्रे क्रियान्तरम् ।—

"—तत्तत्स्फोटान् किलासजान् ।

कण्टकेन विभिद्याशु लेपैर्लिम्पेच्च कौष्ठिकैः ॥८७॥

अथ श्वित्रे द्वाविंशविषकल्पः ।—

अथवा करवीरार्क-मूलवाकुचिकाविषैः ।

बस्ताम्बुपिष्टैः सद्वीपि-द्विपपिप्पल्यरुष्करैः ॥८८॥

अथ आसिकोक्तश्वित्रारितैलाख्य त्रयोविंशविषकल्पः ।—

लाक्षासुराह्वमञ्जिष्ठा-कुष्ठपद्मकसारिवाः ।

गुञ्जा महौ कुरवको लाङ्गली वज्रकन्दकः ॥८९॥

वाराहीकन्दकास्फोता सप्ताह्वा गिरिकर्णिका ।

अर्काश्वमारयोर्मूलं नागपुष्पं नतं निशे ॥९०॥

एकविंशविषकल्पमाह, ककुभेति ।—ककुभः अर्जुनः । अरुष्करः भल्लातकः । द्वीपी चित्रकः । खादिरतोयेन खदिरक्काथेन । सङ्घृष्टः संयुक्तमित्यर्थः, ककुभादिविषान्तद्रव्यजातं खदिरक्काथोदकेन पिष्ट्वा दिनत्रयं स्थापयेत्, ततः ऊर्द्धं पिबेत् इति ॥ ८६ ॥

क्रियान्तरमाह, तत्तदिति ।—तत्तत्स्फोटान् किलासजान् किलासयुक्ते अङ्गे समुत्पन्नान् प्रत्यक्षस्फोटान् । चरकेऽप्युक्तं—"श्वित्रेऽङ्गे ये स्फोटा जायन्ते कण्टकेन तान् भिन्द्यात" इति । लेपैर्लिम्पेच्च कौष्ठिकैः अत्रैव विषकल्पे प्रदिष्टैः कुष्ठनाशनैः लेपैः लिम्पेत ॥ ८७ ॥

द्वाविंशविषकल्पमाह, अथवेति ।—वाकुचिका सोमराजी । बस्ताम्बुपिष्टैः छाग-मूत्रपिष्टैः । द्वीपी चित्रकः । द्विपपिप्पली गजपिप्पली । अरुष्करः भल्लातकः ॥ ८८ ॥

त्रयोविंशविषकल्पमाह, लाक्षेति ।—सुराह्वं देवदारु । महौ गाम्भारी । कुरवकः रक्तपुष्पा झिण्टी । वज्रकन्दकः शर्करकन्दाख्यात्कविशेषः । आस्फोता "हापर-माली" इति ख्यातम् । सप्ताह्वा सप्तपर्णः । गिरिकर्णिका श्वेतापराजिता । अश्वमारः

दन्ती विषं हस्तिविषं पिप्पल्यो मरिचानि च।
तैस्तैलं कटुतैलं वा श्वित्रस्याभ्यञ्जनं पचेत्॥
सवर्णकरणं श्रेष्ठमास्तिकस्य वचो यथा॥९१॥

अथ वाते चतुस्त्रिंशविषकल्पः।—

एरण्डतैलं त्रिफला गोमूत्रं चित्रकं विषम्।
सर्पिषा सहितं पीतं वातार्त्तत्वमपोहति॥९२॥

अथ अग्निदाहे पञ्चत्रिंशविषकल्पः।—

कोरकं क्षीरिनिःक्वाथे लाङ्गलीविषसर्षपैः।
गन्धकाङ्कोल्लमरिचैः ससुक्लोरैर्विपाचितम्॥
जयेज्ज्योतिष्मतीतैलमनलत्वग्गदानपि॥९३॥

अथ वन्ध्यायां षट्त्रिंशविषकल्पः।—

स्वरसं बीजपूरस्य वचाब्राह्मीरसं घृतम्।
वन्ध्या पिबन्ती सविषं सुपुत्रैः परिवार्य्यते॥९४॥

करवीरः। नागपुष्पं नागकेशरः। नतं तगरपादुका। निशे हरिद्राद्वयम्। हस्तिविषं गजपुरीषं पुरीषार्थक-विषशब्दोऽप्यस्तीति मन्तव्यम्। तैः लाक्षादिकल्कैः। तैलं कटुतैलं वा तिलतैलं सार्षपतैलं वा। चित्रस्य श्वित्रस्येत्यर्थः। "चित्रस्य" इत्यत्र "श्वित्रस्य" इति पाठान्तरम्॥८९—९१॥

चतुस्त्रिंशविषकल्पमाह, एरण्डतैलमिति।—एरण्डतैलादिकं सर्वं तुल्यं पान-योग्येन सर्पिषा आलोड्य पिबेदिति। केचित्तु त्रिफलादीनां कल्केन गोमूत्रेण च एरण्डतैलं पक्त्वा घृतेन सह पेयमित्याहुः॥९२॥

पञ्चत्रिंशविषकल्पमाह, कोरकमिति।—कोरकं काकोली चोरकं वा। क्षीरनि-क्वाथे वल्कलक्वाथे, पञ्चवल्कलक्वाथे इति यावत्। "कोरकं क्षीरनिःक्वाथे" इत्यत्र "कटुकीचित्रनिःक्वाथे" इति क्वचित् पाठः। अङ्कोल्लं "धलआँकुडा" इति बङ्गदेशे प्रसिद्धम्। ज्योतिष्मतीतैलं ज्योतिष्मती "लताफट्की" इति भाषा, तस्याः बीजतैलम्। अनलत्वग्गदान् अग्निदग्धजत्वग्गतरोगान् अग्निवीसर्पादिरोगान् वा। क्षीरनिःक्वाथे लाङ्गल्यादिकल्कैः विपाचितं कोरककल्करूपं ज्योतिष्मतीतैलञ्च इत्यन्वयः॥९३॥

अथ मूढगर्भे सप्तत्रिंशविषकल्पः ।—

वीरालाङ्गलिकादन्ती-विषपाषाणभेदकैः ।
प्रयोज्यो मूढगर्भाणां प्रलेपो गर्भमोचनः ॥९५॥

अथ बुद्धिवर्द्धने अष्टत्रिंशविषकल्पः ।—

देवदारु विषं सर्पिर्गोमूत्रं कणकारिका ।
वचा वाक्स्खलनं हन्ति बुद्धेश्च परिवर्द्धनम् ॥९६॥

अथ तिमिरे एकोनचत्वारिंशविषकल्पः ।—

विषं सर्पिः सिता क्षौद्रं तिमिरापहमञ्जनम् ॥९७॥

अथ तिमिरे चत्वारिंशविषकल्पः ।—

विषञ्चैकमजाक्षीरं कल्कितं घृतधूपितम् ॥९८॥

अथ तिमिरे एकचत्वारिंशविषकल्पः ।—

विषं धात्रीफलरसैरसकृत् परिभावितम् ।
अञ्जनं शङ्खसहितं प्रगाढं तिमिरं जयेत् ॥९९॥

षट्त्रिंशविषकल्पमाह, स्वरसमिति ।—वचाविषयोश्चूर्णं ब्राह्मीमातुलुङ्गयो रसेन सघृतेन पिबन्ती वन्ध्या इत्येवं योजनीयम् ॥ ९४ ॥

सप्तत्रिंशविषकल्पमाह, वीरेति ।—वीरा पृश्निपर्णी ॥ ९५ ॥

अष्टत्रिंशविषकल्पमाह, देवदार्विति ।—देवदार्वादिकं तुल्यं सर्पिर्गोमूत्राभ्यामवलेह्यम् । गोमूत्रचतुर्गुणेन देवदार्वादिकल्केन सर्पिः पक्तव्यं वा ॥९६॥

एकोनचत्वारिंशविषकल्पमाह, विषमिति ।—विषचूर्णं घृतादिभिः मर्दयित्वा अञ्जनं कार्य्यम ॥ ९७ ॥

चत्वारिंशविषकल्पमाह, विषञ्चैकमिति ।—छागदुग्धेन विषं पिष्ट्वा स्थापयेत्, ततः निर्धूमाङ्गाराग्नौ किञ्चित् घृतप्रक्षेपात् सञ्जातेन धूमेन तं विषकल्कं धूपयित्वा तेन अञ्जनं दद्यादिति ॥ ९८ ॥

एकचत्वारिंशविषकल्पमाह, विषमिति ।—असकृत् सप्तधा इत्यर्थः । शङ्खसहितं शङ्खनाभिसहितम् ॥ ९९ ॥

अथ काचे द्वाचत्वारिंशविषकल्पः ।—

विषमिन्द्रायुधं स्तन्यैर्घृष्टं काचजिदञ्जनम् ॥१००॥

अथ काचे त्रिचत्वारिंशविषकल्पः ।—

वीजपूररसैर्घृष्टं विषं तद्वत् सितान्वितम् ॥१०१॥

अथ काचे चतुश्चत्वारिंशविषकल्पः ।—

विषं मागधिका द्वे च निशि काचघ्नमञ्जनम् ॥१०२॥

अथ शुक्लार्मे पञ्चचत्वारिंशविषकल्पः ।—

शुक्लार्मजित् विषं कृष्णा-युक्तं गोमूत्रभावितम् ॥ १०३॥

अथ शुक्लादौ षट्चत्वारिंशविषकल्पः ।—

समुद्रफेनस्फटिका-कुरुविन्दरसाञ्जनम् ।

कूर्मपृष्ठञ्च तुल्यानि तेभ्योऽर्द्धांशमनःशिला ॥१०४॥

अर्द्धमानानि मरिच-सैन्धवायोरजांसि च ।

अथो यथोत्तरं दद्यादयसा च समं विषम् ॥१०५॥

रसक्रियेयं मधुना शुक्लपिल्लार्मकाचनुत् ।

अभीक्ष्णं शीततोयेन सिञ्चेन्नेत्रे विषाञ्जिते ॥१०६॥

द्वाचत्वारिंशविषकल्पमाह, विषमिति।—इन्द्रायुधं वज्रं, हीरकभस्म इति यावत्। स्तन्यं नारीक्षीरं ॥ १०० ॥

त्रिचत्वारिंशविषकल्पमाह, वीजपूरेति।—तद्वत् काचजिदित्यर्थः। सितान्वितं शर्करामिश्रितम् ॥ १०१ ॥

चतुश्चत्वारिंशविषकल्पमाह, विषमिति।—मागधिका पिप्पली। अत्रापि वीजपूर-रसेन वर्षणं कार्य्यम्। निशि रात्रावेव अञ्जनं कर्त्तव्यमित्यर्थः, "निशि" इत्यत्र "निशा" इति क्वचित् पाठः ॥ १०२ ॥

पञ्चचत्वारिंशविषकल्पमाह, शुक्लेति।—कृष्णा पिप्पली। गोमूत्रभावितं गोमूत्रे सप्ताहं भावितमित्यर्थः ॥ १०३ ॥

षट्चत्वारिंशविषकल्पमाह, समुद्रफेनेति।—स्फुटिका स्फटिककारिका। कुरुविन्दः पद्मरागमणिः मुस्तकं वा। तेभ्योऽर्द्धांशमनःशिला मिलितसमुद्रफेनादिचूर्णेभ्यो मनःशिलाया अर्द्धांशः। अर्द्धमानानीति।—प्रत्यासत्त्या मनःशिलातः मरिचादीनाम् उत्तरोत्तरम् अर्द्धमानत्वं, तेन च मनःशिलाऽर्द्धं मरिचं, मरिचार्द्धं सैन्धवं, सैन्धवार्द्धं मयोरजः इति क्रमः ज्ञेयः। रसक्रियेयं मधुना "एतत् सर्वं चूर्णं प्रचुरतरमधुना

अथ शुक्रादौ सूर्य्यप्रभावर्त्त्याख्य सप्तचत्वारिंशविषकल्प ।—

रक्तचन्दनमञ्जिष्ठा-तिन्तिडीफलसक्तुकैः ।
अभयालोध्रकतक-निशाशङ्खकणोषणै ॥१०७॥
मनःशिलाकरञ्जाक्ष-बीजोग्राफेनसैन्धवैः ।
अजाक्षीरे समविषैर्वर्त्तयो विहिता हिताः ॥
शुक्रार्म्मासपिल्लेषु ग्रन्थिगण्डार्बुदेषु च ॥१०८॥

अथ पिल्ले अष्टचत्वारिंशविषकल्प ।—

रसोनकन्दमरिच-विषसर्षपसैन्धवै ।
पिल्लेच्चूर्णहितं कार्य्यं सुरसारसपेषितैः ॥
पूरयेत् सर्पिषा चानु सर्पिरेव च पाययेत् ॥१०९॥

अथ नक्तान्ध्ये एकोनपञ्चाशत्तमविषकल्प ।—

मधुकसारमधुक-विषक्षीरजलैर्घृतम् ।
पक्व सन्तर्पणं श्रेष्ठ नक्तान्ध्ये त्वचिरोत्थिते ॥११०॥

समालोड्य वंशनलिकायां स्थाप्यम एतत रसक्रियाविधान वदन्ति" इति तत्त्वचन्द्रिकायां शिवदास ॥ १०४—१०६ ॥

सप्तचत्वारिंशविषकल्पमाह, रक्तचन्दनेति ।—"तिन्तिडी" इत्यत्र "तिन्तिणी" इति पाठान्तरम। सक्तुक स्वनामप्रसिद्ध । "अभया" इत्यत्र "पयसा" इति क्वचित् पाठ । शङ्ख शङ्खनाभि । अक्षबीज विभीतकमज्जा। उग्रा वचा। फेन समुद्रफेन ॥ १०७।१०८ ॥

अष्टचत्वारिंशविषकल्पमाह, रसोनेति ।—पिल्लेच्चूर्णहित पिल्लयुक्तयोरीक्षणयो हित कार्य्यमित्यत्र अञ्जनमिति शेष । सुरसारसपेषिते तुलसीपत्ररसमार्दिते । पूरयेदिति ।—अञ्जनानन्तरं सर्पिषा नेत्रपूरण कुर्य्यादित्यर्थ ॥ १०९ ॥

एकोनपञ्चाशत्तमविषकल्पमाह, मधूकेति ।—सन्तर्पण नेत्रतर्पणमित्यर्थ, पक्वस्नेहेन नेत्रपूरणमिति यावत् । तस्य विधि वाग्भटे यथा—"निवाते तर्पण योज्य शुद्धयोर्मूर्द्धकाययो । काले साधारणे प्रात सायञ्चोत्तानशायिन ॥ यवमाषमयीं पाली नेत्रकोषात् बहि समाम। द्व्यङ्गुलोच्चा दृढां कृत्वा यथास्व सिद्धमावपेत ॥ सर्पिर्निमीलिते नेत्रे तप्ताम्बुप्रविलायितम् । नक्तान्ध्य-वाततिमिर कृच्छ्रबोधादिके वसाम् ॥ आ पक्ष्माग्रादथोन्मेष शनकैस्तस्य कुर्वत.। मात्रा विगणयेत्तत्र वर्त्मसन्धिसितासिते ॥ दृष्टौ

अथ नक्तान्ध्ये पञ्चाशत्तमविषकल्पः ।—

अञ्जनं नरपित्तेन रोचनामधुशृङ्गिभिः ॥१११॥

अथ कर्णशूले एकपञ्चाशत्तमविषकल्पः ।—

स्वर्जिकाक्षारमिश्रस्य शुक्लशुक्लं वरं विषम् ।
कर्णयोः पूरणं तीव्रकर्णशूलनिवर्हणम् ॥११२॥

अथ शिरःशूले द्विपञ्चाशत्तमविषकल्पः ।—

नस्यं शिरोरुक्शमनं प्रत्यक्पुष्पीसिताविषम् ॥११३॥

अथ शिरःशूले त्रिपञ्चाशत्तमविषकल्पः ।—

अथवा नतयष्ट्याह्व-शर्करा विषसंयुता ॥११४॥

च क्रमशो व्याधौ शतं त्रीणि च पञ्च च । शतानि सप्त चाष्टौ च दश मन्ये दशानिले ॥ पित्ते षट् स्वस्थवृत्ते च बलासे पञ्च धारयेत् । कृत्वाऽपाङ्गे ततो द्वारं स्नेहं पाने तु गालयेत् ॥ पिबेच्च धूमं नेचेन व्योम रूपञ्च भास्वरम् । इत्थं प्रतिदिनं वायौ पित्ते त्वेकान्तरं कफे ॥ स्वस्थे च द्व्यन्तरं दद्यादा-दृष्टेरिति योजयेत् ॥" इति । अत्र मधूक-सारादीनां कल्कः स्नेहपादिकः, क्षीरं स्नेहसमं जलञ्च चतुर्गुणम् ॥ ११० ॥

पञ्चाशत्तमविषकल्पमाह, अञ्जनमिति ।—अञ्जनमित्यत्र नक्तान्ध्ये इति शेषः । रोचना गोरोचना । शृङ्गी विषकल्पत्वात् तदाख्यकन्दविषभेदः । शृङ्गिरोचने नरपित्तेन पिष्ट्वा मधुना अञ्जनं कर्त्तव्यमित्यर्थः । "रोचनामधुशृङ्गिभिः" इत्यत्र "पिप्पली मधुसपिषा" इति क्वचित् पाठः ॥ १११ ॥

एकपञ्चाशत्तमविषकल्पमाह, स्वर्जिकेति ।—शुक्लशुक्लं श्वेतलोध्रं श्वेतैरण्डं वा, उभयोरपि कर्णहितत्वात् । वरं कुङ्कुमम् । "शुक्लशुक्लाम्बरम्" इति पाठे—शुक्लं श्वेतलोध्रं श्वेतैरण्डं वा, शुक्ला क्षीरशुक्ला शुक्लभूमिकुष्माण्ड इति यावत् अम्बरम् अभ्रम् इत्यर्थः । "शुक्लशुक्लम्" इत्यत्र "शुक्तयुक्तम्" इति क्वचित् पाठः तत्र—शुक्तं सन्धानविशेषः । सर्वं जलेन पिष्ट्वा तेनैवालोड्य च कर्णे पूरणं कर्त्तव्यम् इति ॥ ११२ ॥

द्विपञ्चाशत्तमविषकल्पमाह, नस्यमिति ।—प्रत्यक्पुष्पी अपामार्गः, तस्या बीजम् ॥ ११३ ॥

त्रिपञ्चाशत्तमविषकल्पमाह अथवेति ।—नतं तगरपादुका, "नत" इत्यत्र "कत" "घृत" इति पाठान्तरद्वयम्, तत्र—कतः कतकफलम् ॥ ११४ ॥

अथ पूतिनस्ये चतुःपञ्चाशत्तमविषकल्पः ।—

शुण्ठी पथ्या विषं पाठा त्रायन्ती पूतिनाशजित् ॥११५॥

अथ मुखरोगे प्रपौण्डरीकादितैलाख्यः पञ्चपञ्चाशत्तमविषकल्पः ।—

प्रपौण्डरीकमञ्जिष्ठा-विषतिन्दुकसमुद्भवैः ।
निहन्ति साधितं तैलं गण्डूषेण मुखामयान् ॥११६॥

अथ मुखरोगे षट्पञ्चाशत्तमविषकल्पः ।—

एलाखदिरकक्कोल-जातीकर्पूरचन्दनैः ।
चीनाब्दबालैर्द्विगुण-विषैः साराम्बुपेषितैः ॥
समूत्रा वटिका क्लृप्ता धृता घ्नन्ति मुखामयान् ॥११७॥

अथ पलितादौ सप्तपञ्चाशत्तमविषकल्पः ।—

कटुतैलविषं नस्यं पलितारुंषिकापहम् ॥११८॥

अथ खलतौ अष्टपञ्चाशत्तमविषकल्पः ।—

स्नुह्यर्कक्षीरभृङ्गाम्बु-गोमूत्रहलिनीविषैः ।
गुञ्जाविशालामरिचैः कटुतैलं विपाचितम् ॥
खलतिं शमयति—" ॥११९॥

चतुःपञ्चाशत्तमविषकल्पमाह, शुण्ठीति ।—अत्र शुण्ठ्यादीनां चूर्णं नस्यविधया प्रयोज्यमिति ॥ ११५ ॥

पञ्चपञ्चाशत्तमविषकल्पमाह प्रपौण्डरीकेति ।—प्रपौण्डरीकं पुण्डरिकाष्ठम् । विषतिन्दु विषं तिन्दु च इति व्यस्तपदं, न तु विषतिन्दु इति समस्तपदं, विषकल्पत्वात् । तिन्दु तिन्दुकम् । समुद्भवैरित्यत्र कल्कैः इति शेषः ॥ ११६ ॥

षट्पञ्चाशत्तमविषकल्पमाह एलेति ।—जाती जातीफलम् । साराम्बुपेषितैः खदिरक्वाथपिष्टैः । समूत्रा गोमूत्रपिष्टा, आदौ खदिरक्वाथेन पिष्ट्वा पश्चात् गोमूत्रेण पेषणं कार्य्यमित्यर्थः । क्लृप्ता कल्पिता । "क्लृप्ता" इत्यत्र "क्रता" इति पाठान्तरम् । धृता इत्यत्र मुखे इति शेषः ॥ ११७ ॥

सप्तपञ्चाशत्तमविषकल्पमाह, कट्विति ।—सुगमम् ॥ ११८ ॥

अष्टपञ्चाशत्तमविषकल्पमाह, स्नुहीति ।—स्नुह्यर्कक्षीरं स्नुहीक्षीरम् अर्कक्षीरञ्च ।

अथ दिग्धाहते एकोनषष्टितमविषकल्प ।—

"—अम्लपिष्टमष्टगुण विषात् ।
सिन्धूत्थकार्पासफलं पिण्डितं सह सर्पिषा ॥
क्षीरेणाऽऽजेन वा लेपाद्विषदिग्धायुधव्रणुत् ॥१२०॥

अथ दुष्टव्रणे षष्टितमविषकल्प ।—

विष रसाञ्जन भार्गी वृश्चिकाली महासहा ।
सवेदने सपाके च व्रणे दुष्टे प्रलेपनम् ॥१२१॥

अथ अपच्या कृतमालादिघृताख्य एकषष्टितमविषकल्प ।—

कृतमालार्कपूतीक वत्सकातिविषाविषम् ।
सिद्ध यदिङ्गुदक्काथे सर्पिस्तदपचीहरम् ॥१२२॥

अथ अपचीघ्नतैलाख्य द्विषष्टितमविषकल्प ।—

काकादनीमागधिका-नलिकातुण्डिकाफलैः ।
जीमूतबीजककोंट-विशालाकृतवेधनैः ॥१२३॥

हलिनी लाङ्गली, विषलाङ्गलिया इति यावत । अव भृङ्गाम्बुगोमूत्राभ्या चतुर्गुणाभ्या द्रवाभ्या मुस्तकादीना कल्केन च तैल पक्तव्यम ॥ ११९ ॥

एकोनषष्टितमविषकल्पमाह, अम्लपिष्टमिति ।—विषादष्टगुण सिन्धूत्थकार्पासफल विषस्यैको भाग, सिन्धूत्थकार्पासयोश्च मिलित्वा अष्टगुणमित्यर्थ, अन्ये तु—अष्टगुणं विषादित्यस्य विषभागमपेक्ष्याष्टगुण, विषमेवाष्टगुणमित्यर्थ, एवञ्च सिन्धूत्थकार्पासफलयोरेकैकभाग विषस्य चाष्टभाग इत्याहु । विषादित्रय काञ्जिकेन पिष्ट्वा घृतेन आजक्षीरेण वा लिम्पत । विषदिग्धायुधव्रणुत विषलिप्तास्त्रादिक्षतनाशन-मित्यर्थ ॥ १२० ॥

षष्टितमविषकल्पमाह, विषमिति ।—वृश्चिकाली "विछटी" इति ख्यातम् । महासहा माषपर्णी ॥ १२१ ॥

एकषष्टितमविषकल्पमाह, कृतमालेति ।—कृतमाल आरग्वध अस्य त्वक् । पूतीक नाटाकरञ्ज । वत्सक इन्द्रयव । कृतमालादीना कल्क इङ्गुदीक्काथ-श्चतुर्गुण ॥ १२२ ॥

द्विषष्टितमविषकल्पमाह, काकादनीति ।—काकादनी गुञ्जा । नलिका,

पाठान्वितैः पलाद्वांशैर्विषकर्षयुतैः पचेत् ।
प्रस्थं करञ्जतैलस्य निर्गुण्डीस्वरसाढके ॥
तज्जयेदपचीं घोरां नावनाभ्यङ्गपानतः ॥१२४॥

अथ अपच्यादौ विषष्टितमविषकल्पः ।—

गुञ्जाटङ्गणशिग्रुमूलरजनी-शम्पाकभल्लातकाः
स्नुह्यर्काग्निकरञ्जसैन्धववचा-कुष्ठाभयालाङ्गलीः ।
वर्षाभूशठभूशिरीषवरण-व्योषाश्वमारा विषं
गोमूत्रं शमयेद्विलिप्तमपची-ग्रन्थ्यर्बुदश्लीपदाम् ॥१२५॥

अथ विषे मन्त्रादिक्रियावैफल्ये प्रतीकारः ।—

विषे प्रतिविषं युञ्ज्यान्मन्त्रतन्त्रैरसिध्यति ।
अतीते पञ्चमे वेगे सप्तमस्यानतिक्रमे ॥१२६॥

अथ सर्पदष्टे चतुःषष्टितमविषकल्पः ।—

युञ्ज्यान्मूलविषं सर्प-दष्टानां पानलेपयोः ॥१२७॥

"नालुका" इति ख्यातम् । तुण्डिकाफलं कार्पासीफलम्, बिम्बीफलमित्यन्ये । जीमूतबीजं घोषकबीजम् । कर्कोटं "काँक्रोल" इति ख्यातम् । कृतवेधनं कोषातकीभेदः ॥ १२३।१२४ ॥

विषष्टितमविषकल्पमाह, गुञ्जेति ।—अग्निः चित्रकः । लाङ्गली "ईशलाङ्गला" इति ख्यातम् । शठः धुस्तूरः, "शठ" इत्यत्र "शठि" इति पाठान्तरम् । भूः मही, गान्धारीत्यर्थः । वरणः वरुणः । अश्वमारः करवीरः ॥ १२५ ॥

मन्त्रौषधादिभिः असिध्यतो विषस्य विषप्रतीकार्य्यतया तत्प्रयोगस्य कालमाह, विषे इति ।—प्रतिविषं विपरीतविषं, स्थावरविषे जङ्गमविषं जङ्गमविषे च स्थावरविषमित्यर्थः । अतीते इति ।—अष्टविधेषु विषवेगेषु मध्ये फेनोद्गमलक्षणकपञ्चमवेगप्रकाशानन्तरं जाड्यतालक्षणकसप्तमवेगातिक्रमात् प्रागेव इत्यर्थः, अष्टमे वेगे मरणदर्शनात्, तेन च स्कन्धभङ्गलक्षणके षष्ठे वेगे सप्तमे च वेगे प्रतिविषं युञ्ज्यादित्यर्थः ॥ १२६ ॥

चतुःषष्टितमविषकल्पमाह, युञ्ज्यादिति ।—मूलविषं क्लीतकाश्वमारगुञ्जादिकम् ॥ १२७ ॥

अथ सर्पविषे मूलविषस्य मात्रा।—

चतुर्भिः षड्भिरष्टाभिर्हीनमध्योत्तमा यवैः।
मात्रा विषस्य मूलस्य प्रयुञ्जीत च सर्वदा ॥१२८॥

अथ कीटविषे मूलविषस्य मात्रा।—

दष्टस्य द्वौ यवौ कीटैः—"

अथ वृश्चिकविषे मूलविषस्य मात्रा।—

"—तिलमात्रन्तु वृश्चिकैः ॥१२९॥

अथ लूताविषे पञ्चषष्टितमविषकल्पः।—

नैव त्वक्स्थे पाने तु लूतादष्टस्य नेष्यते।
अथवा लेपयेद्दंशं तस्य ज्ञात्वा सुनिश्चितम् ॥१३०॥

अथ जङ्गमविषे षट्षष्टितमविषकल्पः।—

क्षीरक्षौद्रघृतैर्युक्तं पीतं हन्ति विषं विषम् ॥१३१॥

अथ जङ्गमविषे सप्तषष्टितमविषकल्पः।—

ससिन्दुवारतगरं सृतमञ्जीवनं विषम् ॥१३२॥

अथ आखुविषे अष्टषष्टितमविषकल्पः।—

शिरीषकुसुमं पत्रं विषमाखुविषापहम् ॥१३३॥

कया मात्रया तत् मूलविषं योज्यम् इत्याह, चतुर्भिरिति।—विषस्य मूलस्य मूलविषस्य ॥ १२८ ॥

कीटविषे मूलविषस्य मात्रामाह दष्टस्येति।—स्पष्टम्। वृश्चिकविषे मूलविषस्य मात्रामाह, तिलेति।—स्पष्टम् ॥ १२९ ॥

पञ्चषष्टितमविषकल्पमाह, नैवेति।—नैव त्वक्स्थे अवगाहने लूताविषे रक्तधातुमप्राप्ते सतीत्यर्थः, पाने पानविषये नेष्यते, विषमिति शेषः। तत्र किं कार्यमित्यत आह, अथवेति।—अथवा मूलविषभेदेन इत्यर्थः। ज्ञात्वा सुनिश्चितं लूताविषमेव इति निश्चितत्वेन ज्ञात्वा इत्यर्थः ॥ १३० ॥

षट्षष्टितमविषकल्पमाह, क्षीरेति।—सुगमम् ॥ १३१ ॥

सप्तषष्टितमविषकल्पमाह, सेति।—सिन्दुवारः निर्गुण्डी ॥ १३२ ॥

अष्टषष्टितमविषकल्पमाह, शिरीषेति।—पत्रमिति शिरीषस्यैव ॥ १३३ ॥

अथ सर्वविषे एकोनसप्ततितमविषकल्पः।—

देवदारु नतं मांसी द्रामिलौ वाकुची विषम्।
कुष्ठञ्च पानलेपाभ्यां समस्तविषनाशनम्॥१३४॥

अथ सञ्ज्ञाजनने सप्ततितमविषकल्पः।—

मनःशिलाऽञ्जनालेला-मिन्दुवारामराह्वयम्।
सरक्तं कुङ्कुमविषं घ्रातं निःसञ्ज्ञबोधनम्॥१३५॥

अथ विषजदाहे एकसप्ततितमविषकल्पः।—

दाहे विषोद्भवे लेपः सक्तुक्षीरघृतैर्युतः॥१३६॥

अथ दुःसाध्यरोगे द्वासप्ततितमविषकल्पः।—

अन्येष्वपि च रोगेषु शेषोपायपरिक्षये।
प्रत्यहं विषकन्दस्य त्रियवं यवमेव वा॥
शुद्धस्य राजिकावृद्ध्या वर्षं भुक्त्वा जयेद्गदान्॥१३७॥

एकोनसप्ततितमविषकल्पमाह, देवदार्विति।—नतं तगरपादुका। द्रामिलौ निर्विषौ॥१३४॥

सप्ततितमविषकल्पमाह, मनःशिलेति।—अञ्जनं रसाञ्जनम्। आलं हरितालम्। अमराह्वयं देवदारु। रक्तं रक्तचन्दनम्। घ्रातं प्रधमनविधया प्रदत्तनस्यम्। निःसञ्ज्ञबोधनं निःसञ्ज्ञस्य विषवेगेन हृतचेतनस्य बोधनं सञ्ज्ञाजननम्॥१३५॥

एकसप्ततितमविषकल्पमाह, दाहे इति।—अत्र विषस्य ग्रहणाभावेऽपि प्रकरणवशात् तथा सक्तुक्षीरघृतैर्युतः लेपः इत्यत्र 'कस्य लेपः?' इत्याशङ्कायां पूरकपदाभावाच्च लेप इत्यत्र विषस्येति शेषो बोध्यः॥१३६॥

द्वासप्ततितमविषकल्पमाह, अन्येष्विति।—शेषोपायपरिक्षये सर्वविधे एव उपाये निष्फले सतीत्यर्थः। शुद्धस्य वमनादिना शोधिताशयस्येत्यर्थः, राजिकावृद्ध्या सर्षपवृद्ध्या, प्रथमदिनमेकसर्षपमारभ्य प्रतिदिनमेकैकसर्षपवृद्ध्या यवं यवत्रयं वा यावत् विषं भक्षयेत्, ततो वर्षं यावत् तथैव मात्रया भक्षयेत्, यद्वा—त्रियवं यवं वा आरभ्य प्रतिदिनं सर्षपवृद्ध्या वर्षं यावत् भक्षयेदिति। अत्र त्रियवं यवमेव वा इति विकल्पनिर्देशस्तु द्वियवमात्राया अपि उपलक्षणं बोद्धव्यम्, एवञ्च उत्तममध्यमाधमक्षमतामपेक्ष्य त्रिद्व्येकयवमात्रया प्रयोगः कार्य्य इति॥१३७॥

अथ रसायने त्रिसप्ततितमविषकल्पः।—

वचागन्धकमिन्धूत्थ-त्रायमाणाम्लवेतसम्।
व्योषाग्निबेल्लपाठाम्ल-कर्णीकरिकणाविषम् ॥१३८॥
चाङ्गेरीनागदमनो वायसीत्रिफलारसैः।
भावित मधुसर्पिर्भ्यां भक्षितं स्याद्रसायनम् ॥१३९॥

अथ रसायने चतुःसप्ततितमविषकल्पः—

विषशुल्वरसव्योष गन्धकानां पलं पलम्।
पलद्वयं हरीतक्याश्चित्रकस्य पलत्रयम् ॥१४०॥
कौन्तीमुस्ताचतुर्जातं कर्षांशञ्च विचूर्णितम्।
त्रिगुणश्च गुडः कार्य्या वटिका माषसम्मिता ॥
भक्षयेत्ता जराग्रस्तो महारोगैश्च पीडितः ॥१४१॥

अथ जयागुडिकाख्य पञ्चसप्ततितमादि चतुर्दशाधिकशततमान्तविषकल्पः।—

हरिद्रा निम्बपत्राणि पिप्पल्यो मरिचानि च।
मुस्ता विडङ्गं मूत्रेण पिष्टमाजेन पिण्डितम् ॥१४२॥
नावनाञ्जनपानेषु गोमूत्रासृग्रसाञ्जनैः।
जयेत् प्रयुक्ता विषम-ज्वरान् सघृतसाधितम् (७५) ॥१४३॥

त्रिसप्ततितमविषकल्पमाह, वचेति।—अम्ल अम्लवेतस, एवञ्च अम्लवेतसम्य भागद्वयं देयम्, "अम्ल" इत्यत्र "अब्द" इति पाठः सङ्गतः। कर्णी आरग्वधः, "कर्णी" इत्यत्र "किणिह्" इति पाठे—किणिह सुराबीजम्। करिकणा गजपिप्पली। "कर्णीकरिकणाविषम्" इत्यत्र "कण्टकारि कणा विषम्" इति पाठान्तरम्। वायसी काकमाची, वचादि विषान्तं द्रव्यजातं चाङ्गेर्य्यादीनां प्रत्येकं रसे सप्तधा भावयेदिति ॥ १३८।१३९ ॥

चतुःसप्ततितमविषकल्पमाह, विषेति।—कौन्ती रेणुकम्। चतुर्जातं त्वगेलापत्र-केशरम्। त्रिगुण इति कर्षभागापेक्षया ज्ञेयः ॥ १४०।१४१ ॥

पञ्चसप्ततितमविषकल्पमारभ्य चतुर्दशाधिकशततमपर्य्यन्तं विषकल्पमाह, हरिद्रेति।—आजेन मूत्रेण इति सम्बन्धः। अत्र अनुक्तमपि विषं प्रकरणानुरोधात् रसेन्द्रसारसंग्रहाच्च एकभागसमं ग्राह्यम्। ततोऽत्र जयावटिकया सह अस्याः

सर्वंज समधु-व्योष (७६) गवा मूत्रेण सूतकम् (७७)।
चन्दनस्य कषायेण (७८) रक्तपित्त वृषस्य वा (७९) ॥१४४॥
क्षय क्षीराश्वगन्धाभ्या (८०) कासश्वास समाक्षिकम् (८१)।
तक्रेण ग्रहणीरोग (८२) कृच्छ्र तण्डुलवारिणा (८३) ॥१४५॥
प्रमेह मधुना (८४) गुल्मं शूलञ्च गुडवारिणा (८५)।
पाण्डुशोफ गवा क्षीरेणाम्भसा त्रैफलेन वा (८६।८७) ॥१४६॥
गवा मूत्रेण कुष्ठानि (८८) क्षौद्रेणोडुम्बराह्वयम् (८९)।
तक्रेण युक्तयाऽऽलेपाद्दद्रुपामाविचर्चिकाः (९०) ॥१४७॥
पीतमुस्ताम्भसा वायुं (९१) तुलस्याऽऽलेपनाद्व्रणान् (९२)।
समूल विस्मृतिं नस्येन (९३) अञ्जनेन दृगामयान् (९४) ॥१४८॥

दृश्यत अनुपानतश्च प्रायश साद्दश्य विद्यते, केवल शुण्ठ्या अत्र न्यूनता, तत्र च शुण्ठीभागो दृश्यते, तथा च—"विष त्रिकटुक मुस्त हरिद्रा निम्बपत्रकम्। विडङ्गमष्टम चूर्णं छागमूत्रै सम समम॥ चणकाभा वटी कार्या स्याज्जया योगवाहिका॥" इति। भावनेत्यादौ सघृतमाधितमित्यन्तेन वाक्यशेष, असृक् कुङ्कमम्, पिण्डित हरिद्रादिक सघृतसाधित घृतेन सह मर्दित गोमूत्रादिभिरनुरूपै सह भावनादिविधौ प्रयुक्त विषमज्वरान् जयेत्, विषमज्वरे घृतेन सहैव रसेन्द्रसारे प्रयोगदर्शनात, तथा च—"जयन्ती वा जया वाऽथ विषमज्वरनुत् घृते" इति। "सघृतमाधितम्" इत्यत्र "सघृतमानिलम" इति क्वचित पाठ, तत्र—हरिद्रादिपिण्ड सघृतम आनिलमनिलज्वर जयेदित्यर्थ। सर्वजमित्यत्र ज्वरमिति शेष, समधुव्योष सर्वज ज्वर जयेदिति। रसेन्द्रे तु "सर्वज्वर मधुव्योषे" इति पाठ। सूतक सूतिकातङ्कम्, "सूतकम्" इत्यत्र "शीतकम्" इति पाठे—शीतज्वरमित्यर्थ। वृषस्य वासकस्य कषायेणेति योजनीयम्। कृच्छ्र मूत्रकृच्छ्रम्। प्रमेह मधुनेति।—रसेन्द्रसारे प्रमेहरोगे मधुना सह पानानन्तर लोध्रादिक्वाथानुपान कर्त्तव्यमिति विधि, तथा च—"जयन्ती वा जया वाऽथ मधुना मेहजित् भवेत्। लोध्रमुस्ताभयातुल्य कट्फलञ्च जले सह॥ क्वाथयित्वा पिबेच्चानु मधुना सर्वमेहजित॥" इति। गुडवारिणा गुडमिश्रितोदकेन। रसेन्द्रसारे तु उष्णजलालोडितगुडेन पानविधि, तथा च—"जयन्तीं वा जया वाऽथ गुडे कोष्णजले पिबेत। त्रिदोषोत्थ हरेत गुल्मम्" इति। कुष्ठानि सर्वकुष्ठानीत्यविशेषवचनम्, उडुम्बराह्वयमिति विशेषवचनम्,

स्यन्दाधिमन्थौ सस्तन्यम् (९५) अर्मकोपं सशोणितम् (९६)।
सकासमर्दं काचादीन् (९७) सभृङ्गोद निशान्धताम् (९८)॥१४९॥
रम्भाकन्दाम्भसा पुष्प (९९) पिल्लं ताम्रमधूत्काटम् (१००)।
सतूलमार्त्तिं दन्ताना गण्डूषेण (१०१) विलेपनात् ॥१५०॥
सगोमूत्रं शिर शूल (१०२) सक्षौद्राम्लं क्षतव्रणान् (१०३)।
भगन्दरापचीग्रन्थीन् सक्षौद्रं (१०४) सगुड व्रणान् (१०५)॥१५१॥
नारिकेलाम्भसा लिङ्ग-विकारान् (१०६) सेवनात् पुनः।
प्रदरं भृङ्गसारेण (१०७) नागपुष्पस्य सर्पिषा (१०८) ॥१५२॥
रम्भाकन्दाम्बुसर्पिर्भ्यां पीतं लिप्तमहेर्विषम् (१०९)।
शीतक्रनरमूत्राभ्यामथाऽऽखो (११०) वृश्चिकस्य तु ॥१५३॥

औडम्बराऽऽख्यं कुष्ठमित्यर्थः। तुलस्याऽऽलेपनात् ग्रहान् तुलसीपत्ररसेन घृष्टा प्रलेपनात् पूतनादिबालग्रहान् देवादिग्रहान् वा जयेत्, ग्रहान् अङ्गग्रहानित्यर्थो वा। समूत्र सगोमूत्र नस्येन विस्मृति स्मृत्यभाव मूर्च्छोन्मादापस्मारादिकमिति यावत्। अञ्जनेन दृगामयान् इत्यत्रापि समूत्रमिति योजनीयम्। स्यन्दादिपिल्लान्ता नेत्ररोगविशेषाः। अर्मकोपम् अर्माख्यनेत्रकोपम्। सशोणित सकुङ्कुम, कुङ्कुमेन कुङ्कमोदकेन वा सह मर्दितमित्यर्थः। ताम्रमधूत्काट ताम्रचूर्णमधुप्रगाढम्। सतूलमिति।—तूला रक्तकार्पासी नीली वा पारीश इति कश्चित्, तया सह घृष्टमित्यर्थः, गण्डूषेण दन्तानामार्त्तिं जयेत्। "सतूलम्" इत्यत्र "समूलम्" इति पाठे—जयेदिति क्रियाया विशेषण, समूल यथा तथा इत्यर्थः। विलेपनादिति पद शिरःशूलमित्यादिलिङ्गविकारान् इत्यन्तेन सम्बध्यते। सक्षौद्राम्लं क्षौद्रञ्च अम्लञ्च अम्लकाञ्जिकञ्च ताभ्यां सह लेपविधया प्रयुक्त क्षतव्रणान् शस्त्रक्षतजनितव्रणान्। भगन्दरेति।—रसेन्द्रसारे भगन्दररोगे शुण्ठ्या सह अस्य प्रयोगविधि, तथा च—"जयन्ती वा जया हन्ति शुण्ठ्या सर्वं भगन्दरम्" इति। लिङ्गविकारान् उपदंशादीन्। सेवनादिति पद प्रदरमित्यादिना योजनीयम्। भृङ्गसारेण भृङ्गराजरसेन, नागपुष्पस्य सर्पिषा नागकेशरकल्कसाधितेन घृतेन, भृङ्गराजरसेन नागकेशरघृतेन वा सेवनात् प्रदर जयेत्। शीतक्र नरमूत्राभ्यामित्यत्रापि पीतं लिप्तमिति योजनीयम्, शीतक्र नरमूत्राभ्यां पीतं लिप्तम् आखोर्विष जयेदित्यर्थः।

सार्कक्षीरं विलेपेन (१११) लूतानान्तु जलौदनम् (११२)।
शतपत्ररसाज्याभ्यां विषं सर्वञ्च सर्वथा (११३) ॥१५४॥
भस्मसूतं गुडक्षौद्र-घृतैः सह निषेवितम् (११४)।
जरां जयेदतो नाम्ना गुडिकेयं जयोदिता ॥१५५॥

अथ जयन्तीवटिकाख्य पञ्चदशाधिकशततमविषकल्पः।—

वचाऽश्वगन्धामरिचोपकुल्या-तालीशमुस्तापिचुमर्दपाठाः।
विषञ्च तेषां वटिका जयन्त्यः फले प्रयोगे च जयासमानाः ॥१५६॥

अथ जयावटिकाख्य षोडशाधिकशततमविषकल्पः।—

वासाऽमृताखदिरनिम्बविडङ्गपथ्या-
क्वाथे विषत्रिकटुचित्रकलोहतिक्ताः।
आवाप्य माषतुलिता वटिका प्रणीता
क्षौद्रान्विता क्षपयति क्षयकुष्ठजातम् ॥१५७॥

अथ रसायने सप्तदशाधिकशततमविषकल्पः।—

कान्ताभ्रकशिलाधातु-विषसूतकमाक्षिकम्।
शीलितं मधुसर्पिर्भ्यां व्याधिवार्द्धक्यमृत्युजित् ॥१५८॥

वृश्चिकस्य तु सार्कक्षीरं विलेपेन। जलौदनं जलसिक्तौदनेन सह इत्यर्थः। "जलौदनम्" इत्यत्र "विषं जयेत्" इति क्वचित् पाठः। शतपत्रं कमलम्। सर्वथा पानालेपनाभ्यामित्यर्थः। भस्मसूतमिति।—गुडादिभिः सह जयागुडिका तथा भस्मसूतञ्च निषेवितं जरां जयेदिति। जयोदिता जया इति नाम्ना संज्ञितेत्यर्थः ॥ १४२—१५५ ॥

पञ्चदशाधिकशततमविषकल्पमाह, वचेति।—अत्रापि अजमूत्रेण मर्दनं कर्त्तव्यं, रसेन्द्रसारसंवादात्। अत्र "मुस्ता" इति पदं रसेन्द्रसारपाठादधिकमिति ज्ञातव्यम्। फले प्रयोगे च जयासमाना प्रयुक्ता इमा वटिकाः फलदाने जयासमाना जया-गुडिकाया गुणवत् गुणप्रदा भवन्तीत्यर्थः ॥ १५६ ॥

षोडशाधिकशततमविषकल्पमाह, वासेति।—तिक्ता कटुकी। आवाप्य कल्कीकृत्य, पिष्ट्वा इत्यर्थः। वासादीनां क्वाथेन विषादिकं मर्दयेदिति ॥ १५७ ॥

सप्तदशाधिकशततमविषकल्पमाह, कान्तेति।—शिलाधातुः शिलाजतु। माक्षिकं स्वर्णमाक्षिकम् ॥ १५८ ॥

अथ वाजीकरणे अष्टादशाधिकशततमविषकल्पः ।—

नष्टशुक्रः पयोद्राक्षा-कपिकच्छु-महाविषम् ।
शीलयेन्मधुसर्पिर्भ्यां सखर्जूरं सयष्टिकम् ॥१५९॥

अथ विषसेवनस्य फलम् ।—

शस्त्रप्रयुक्तादिषतो गराद्वा लूताभुजङ्गाखुविषाज्जराया ।
अकालमृत्युग्रहपाप्मनोऽपि विषाशिनो नास्ति भयं नरस्य ॥
॥१६०॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये विषकल्पो नामैकोनत्रिंशत्तमोऽध्यायः ॥ २९ ॥

अथ त्रिंशत्तमोऽध्यायः ।

अथ रसकल्पः ।—

अथ मृतसूताध्यायः ।—

अथ रसजारणम् ।—

पीतासवाम्लखात् सत्त्वं कान्तं वा तीक्ष्णमेव वा ।
चतुःषष्टितमांशेन प्रमितं क्षिप्तमल्पशः ॥१॥

अष्टादशाधिकशततमविषकल्पमाह, नष्टशुक्र इति ।—महाविषं रक्तवर्णविषभेदः । शीलयेत् दीर्घकालमभ्यसेदित्यर्थः ॥ १५९ ॥

विषप्रयोगस्य फलमाह, शस्त्रप्रयुक्तादिति ।—स्पष्टम् ॥ १६० ॥

इति रसरत्नसमुच्चयबोधिन्याम् एकोनत्रिंशत्तमोऽध्यायः ।

अथ "लौहं मृतं कान्दविषं सूतश्चेति निगद्यते" इत्युद्देशानुसारात् लौहविषयोः कल्पमुक्त्वा अवशिष्टं चरमाध्याये रसकल्पं विवक्षुरादौ रसजारणमाह, पीतेति ।—पीतासवाम्लखात् सत्त्वं पीतं भावनाभिः शोषितं आसवाम्लं, अम्लीभूतसन्धानविशेषः, काञ्जिकाम्लो वा येन तादृशात् खात् अभ्रात् सत्त्वम् । चतुःषष्टितमांशेन

तप्तखल्वेऽम्लयोगेन श्लक्ष्णवर्त्तां विमर्दनात् ।
भूर्जे क्षाराम्ललवण-स्नुह्यर्कक्षीरलेपिते ॥२॥
बद्ध वस्त्रावृते स्विन्नमम्ले समरसे रसम् ।
धौतमुष्णारनालेन शुष्कमङ्गुलिमर्दितम् ॥३॥
पचेत् कच्छपयन्त्रस्थमष्टमांशविडावृतम् ।
स्वप्रमाणो रसस्तिष्ठेज्जीर्णो ग्रासे त्वजीर्यति ॥४॥
पातयेदासवाम्लेन मर्दयेत् स्वेदयेच्च तम् ।
जारणे जारणे वह्निं ग्रासञ्च परिवर्द्धयेत् ॥
द्विगुण योजयेदेवं सत्त्वमभ्रकसम्भवम् ॥५॥

अथ रसजारणे निषिद्धद्रव्याणि ।—

पूतीलोह विषं मूत्र रसक गन्धकत्रयम् ।
न युञ्ज्याज्जारणे सूतस्तैर्जीर्णैः स्फोटकुष्ठकृत् ॥६॥

इति रसभागमपेक्ष्य इत्यर्थः । तप्तखल्वे "अजाशकृत" इत्यादिना प्रागुक्ते । समरसे समजले इत्यर्थः । कच्छपयन्त्रस्थ—"जलपूर्णपात्रमध्ये दत्त्वा घटखर्परं सुविस्तीर्णम्" इत्यादिना नवमाध्यायोक्तयन्त्रविशेषमध्यस्थम् । अष्टमांशविडावृत रसापेक्षया अष्टमांशेन विडेन "गुञ्जासैन्धवयो" इत्यादिना वक्ष्यमाणेन ग्राससाधनेन द्रव्यविशेषेण आवृतम् । स्वप्रमाण इति ।—एवं पक्व सूत जीर्णः सन् स्वप्रमाण एव तिष्ठेत न तु क्षीयमाणो भवेदित्यर्थः । ग्रासे अभ्रादिसत्त्वे अजीर्यति अजीर्यमाणे सतीत्यर्थः, पातयेत ऊर्द्ध पातयेत । अयमर्थः,—आसवाम्लमर्दिताभ्रसत्त्व तीक्ष्णलौहं कान्तलौहं वा रसापेक्षया चतुःषष्ट्यंशम् अल्पश तप्तखल्वस्थे रसे क्षिपेत, ततः काञ्जिकेन सुश्लक्ष्ण मर्दयित्वा क्षारादिलिप्ते भूर्जपत्रे संस्थाप्य च वस्त्रेण बद्ध्वा समजलेन काञ्जिकेन दोलायन्त्रे पचेत्, ततः उद्धृत्य उष्णारनालेन प्रक्षाल्य च शोषयेत। अथ अङ्गुलीभिरभिमर्दितस्य तस्य औषधस्य उपर्य्यध रसापेक्षया अष्टमांशविडं संस्थाप्य कच्छपयन्त्रेण पचेत, एवं यदि रस स्वप्रमाण एव तिष्ठेत, तदा सुजीर्णं ग्रासाभ्रादिकं सर्वकर्मक्षमश्च सञ्जात इति जानीयात। यदि स्वप्रमाणापेक्षया अधिको भवेत, तदा ग्रासमजीर्णं रसञ्चापि असम्यक् जीर्णं ज्ञात्वा पुनरूर्द्धपातनादिकं कर्म कुर्य्यात, प्रतिवार जारणाकाले ग्रास वह्निञ्च द्विगुणं वर्द्धयेदिति ॥ १—५ ॥

जारणे निषिद्धद्रव्याण्याह, पूतीति ।—पूतीलोह नाग वङ्गञ्च । मूत्र गोमूत्रम् ।

अथ बडवानलो विड।—

गुञ्जासैन्धवयाःस्वर्णं देवदालीदलद्रवैः।
टङ्कणं किंशुकरसैर्जम्बीराम्लेन चूलिकाम्॥७॥
मूलकक्षारगोमूत्र-प्रसादेन च गन्धकम्।
स्वर्जिकाभूखगव्योम शिग्रुमूलरसेन च॥८॥
शतशो भावयेत् सर्वं विडोऽयं बडवानलः।
एवमग्निसहो—"	॥९॥

अथ मतान्तरे रसजारणम्।—

—"लोह सयुक्त केवलोऽथ वा।
नियामकौषधसिताङ्कोलमूलरसादिभिः॥१०॥
वैक्रान्तप्रमुखैर्वाऽपि रसेन्द्रः सह मर्दितः।

रसक खर्परम्। गन्धकत्रय प्रागुक्त रक्तपीतश्वेतभेदेन त्रिविधगन्धकम्, केचित्तु गन्धकत्रयशब्देन शिलातालगन्धक गृह्णन्ति। तैर्जीर्णै स्फोटकुष्ठकृत जीर्णै तैः पूतीलोहादिभि सह अवस्थित सूत, स्फोटकुष्ठकृत, भवेदिति शेष। "जीर्णै" इत्यत्र 'जीर्ण" इति पाठ सङ्गत॥ ६॥

रसजारणे बडवानलाख्य विडमाह, गुञ्जेति।—देवदालीदलद्रवे घोषकपत्र-रसे। चूलिका लवणविशेष नरसारमिति यावत। मूलकेति।—गोमूत्रगालित-मूलकक्षारस्य प्रसादभागेन। रसेन्द्रचिन्तामणौ तु—"मूलकार्द्रकवह्नीना क्षार गोमूत्र-गालितम्। वस्त्रपूतं द्रव ग्राह्य गन्धक तेन भावयेत्॥' इति पाठ। भू मृत् सौराष्ट्रमृत्तिका इत्यर्थ। खग स्वर्णमाक्षिक रसाञ्जन वा। व्योम अभ्रम्, "व्योम" इत्यत्र "व्योष" इति क्वचित पाठ। शतश शत वारान्। बडवानल बडवानलाख्य इत्यर्थ। एवम् उक्तप्रकारेण विडजारित रस अग्निसह, भवेदिति शेष॥ ७—९॥

रसभस्मप्रकारमाह, लोहेति।—अथ लोहसयुक्त केवलो वा रसेन्द्र, नियामकौषध "कर्कोटीफणिनेत्राभ्याम" इत्यादिना एकादशाध्यायोक्त रसचाञ्चल्य-निवारक द्रव्यगणविशेष, तथा सिताङ्कोलमूल शुभ्राङ्कोठमूलञ्च, तेषा रसादिभि, आदिपदेनात्र क्वाथकल्कादीना ग्रहणम्, सह मर्दित., अथवा वैक्रान्तप्रमुखै. वैक्रान्त-

यन्त्रस्थः क्रमवृद्धेन वह्निनोर्द्ध्वेन पाचितः ॥
मृतोऽधराग्निना तस्मोऽप्यक्षीणो नोर्द्ध्वमाश्रयेत् ॥११॥

अथ द्विविध रसमारणम् ।—

अथापामार्गतैलेन तथा पुष्करतण्डुलैः ।
अथवा मलपूक्षीर-भावितः श्वेतहिङ्गुना ॥
मर्दितः पुटपाकेन भस्मतां प्रतिपद्यते ॥१२॥

अथ रसमारणे प्रकारान्तरम् ।—

गोमूत्रद्रोणपुष्पाभ्यां पाकाद्वा कान्तभाजने ॥१३॥

अथ प्रकारान्तरम् ।—

कङ्गुणीकृष्णधुस्तूर-तैलाभ्या वा विमर्दितः ॥१४॥

सूर्य्यकान्तहीरकादिभि चतुर्थाध्यायोक्तैर्मणिभि सह मर्दितः, क्रमवृद्धेन मृदुमध्य-खराग्निक्रमेण ऊर्द्ध्वेन वह्निना उपरिष्टात् दत्तेन अग्निना इत्यर्थ, यन्त्रस्थ पाचित, यन्त्रमध्ये पूर्वोक्तविधया मर्दित रस संस्थाप्य दत्त्वा च मुखावरण भूम्यन्त किञ्चित् प्रोथयित्वा ऊर्द्ध्व पुट दद्यादित्यर्थ । मृत इत्यादि ।—उक्तप्रकारेण मृतो रसः अधराग्निना यन्त्रनिम्नभागे प्रदत्तेन अग्निनाऽपि अक्षीण उड्डयनसामर्थ्याभावात् क्षरन्न एव, तिष्ठेदिति शेष, न ऊर्द्ध्वमाश्रयेत पक्षच्छेदात अग्निसन्तापेनापि नोर्द्ध्वम् उड्डयेत इत्यर्थ ॥ १०।११ ॥

द्विविध रसमारणमाह, अथेति ।—अथ एव पाकानन्तरम् । पुष्करतण्डुलैः पुष्करबीजै पद्मबीजैर्वा पुष्करबीजक्वाथै पद्मबीजक्वाथैर्वा इत्यर्थ । अपामार्गतैल-पुष्करबीजक्वाथाभ्या भावित, अथवा मलपूक्षीरभावित काठोडुम्बरकक्षीरेण सप्ताह भावित, श्वेतहिङ्गुना मर्दित, भावनाऽनन्तरमिति शेष ॥ १२ ॥

रसमारणे प्रकारान्तरमाह गोमूत्रेति ।—गोमूत्रद्रोणपुष्पाभ्या सह मर्दयित्वा कान्तभाजने पाकाद्वा भस्मता प्रतिपद्यते इति पूर्वोक्तेनान्वय । द्रोणपुष्पशब्देनात्र द्रोणपुष्परसो ग्राह्य ॥१३॥

प्रकारान्तरमाह, कङ्गुणीति ।—कङ्गुणीशब्देन तद्बीजतैलं ग्राह्यम् । रसः कङ्गुणीकृष्णधुस्तूरतैलाभ्या सह विमर्दित कान्तभाजने पाकात् भस्मता प्रतिपद्यते इत्यन्वय ॥ १४ ॥

अथ प्रकारान्तरम्।—

मृणालतन्तुवर्त्तिस्थः पीनगन्धर्वतैलयुक्।
ज्वलितो याममात्रं वा मृतवैक्रान्तसयुतः ॥१५॥

अथ प्रकारान्तरम्।—

बन्ध्याऽमृताकन्दगतः पचनाद्भूधरेऽथवा ॥१६॥

अथ प्रकारान्तरम्।—

चपलोपलनिर्गुण्डी-रसाभ्यां रसकेन वा ॥१७॥

अथ प्रकारान्तरम्।—

वाराहीरसयुक्तेन चक्रमर्दरसेन वा ॥१८॥

अथ प्रकारान्तरम्।—

गन्धपाषाणयुक्तेन बद्धं वा वाससा रसम्।
पचेत् गन्धकतैलेन यावदाखोटबन्धनम् ॥१९॥

प्रकारान्तरमाह, मृणालेति।—पीनगन्धर्वतैलयुक् स्थूलैरण्डतैलसयुक्त, स्थूलैरण्डतैलेन सह रस मर्दयित्वा वैक्रान्तभस्मना सह सम्मिश्र्य च तेन मृणालतन्तुमालिप्य याममात्र प्रज्वालयेत्, एव भस्मता प्रतिपद्यते ॥ १५ ॥

प्रकारान्तरमाह बन्ध्येति।—बन्ध्या बन्ध्याकर्कोटकी अमृता कन्दगुडूची, तयो कन्दगत कन्दान्त स्थित भूधरे भूधरयन्त्रे पचनात् भस्मता प्रतिपद्यते इति ॥ १६ ॥

प्रकारान्तरमाह, चपलेति।—चपलोपल द्वितीयाध्यायोक्त महारसविशेष। रसक खर्पर, चपलरसकाभ्या समाभ्या तुल्यो रसेन्द्र निर्गुण्डीरसेन सह मर्दितः भूधरे पचनात् भस्मता प्रतिपद्यते ॥ १७ ॥

प्रकारान्तरमाह, वाराहीति।—अथवा वाराहीरसयुक्तेन चक्रमर्दरसेन मर्दित भूधरे पचनादित्याद्यन्वय ॥ १८ ॥

प्रकारान्तरमाह, गन्धेति।—अथवा गन्धपाषाणयुक्तेन गन्धकयुक्तेन वाससा वस्त्रेण बद्ध रस, रस गन्धकञ्च वस्त्रमध्ये संस्थाप्य बद्धा च इत्यर्थ, आखोटबन्धन यावत यावता कालेन आखोटबन्धन—"बन्धो य खोटता यातो ध्मातो ध्मात च्यय व्रजेत। खोटबद्ध स विज्ञेय शीघ्र सर्वगदापह ॥" इत्येकादशाध्यायोक्तलक्षणक बन्धविशेषम्, "खोटक स्वर्णमन्तल्य समावर्त्तञ्च कारयेत। कुक्कुटाण्डनिभ सूत पटुभेदि भवेत् यदा ॥ आवर्जित पुनस्तद्वत् खोटबद्धरसाकृति ॥" इति रसेन्द्र-

गन्धाश्मपिष्टं द्विगुण-गन्धं वा कान्तसम्पुटे ।
गन्धकाद्वा तृतीयांशं कान्तपर्पटमिश्रितम् ॥
मूलिकामर्दितं लोह-पर्पटान्तर्गतं धमेत् ॥२०॥

अथ प्रकारान्तरम् ।—

यद्वा गन्धकपादेन मर्दितं मूलिकारसैः ।
लोहसम्पुटमध्यस्थमङ्गारैर्ध्मातमुत्खनेत् ॥
रोगोक्तयोगयुक्तोऽयं तत्तद्रोगहरो भवेत् ॥२१॥

अथ ज्वरे प्रथमरसकल्पः ।—

समुस्तपर्पटक्काथो भस्मसूतो हरेज्ज्वरम् ॥२२॥

अथ त्रिदोषज्वरे द्वितीयरसकल्पः ।—

दशमूलकषायेण पिप्पल्या च समस्तजम् ॥२३॥

चिन्तामण्युक्तजलचणकबन्ध इव बन्धनमिति वा, प्रागुक्तादिति शेषः, रसेन्द्रचिन्तामणौ खोटप्रकार उक्तः, यथा—"दरदगुटिकाचन्द्रचौरैर्निरन्तरमावृतामरणिकनके । विल्वागन्धाश्मना सह भूरिणा रचय सिकतायन्त्रे पाकम् ॥ मुहुर्मुहुरित्यसौ हुतभुजि वसन् वस्थेमान (?) कथञ्चन मुञ्चति ॥ सिद्धमतखोटा" इति । तावत् गन्धकतैलेन पचेत् । तत गन्धाश्मपिष्टं तुल्यगन्धकेन सह पिष्टम् अथवा द्विगुणगन्धं रसापेक्षया द्विगुणगन्धकेन सह पिष्टम्, अथवा गन्धकात् तृतीयांशं गन्धकभागमपेक्ष्य तृतीयमंशं रसं, त्रिगुणगन्धकं रसमित्यर्थः, कान्तपर्पटमिश्रितं पर्पटाकारकान्तलौहपत्रमिश्रितं मूलिकाभिः सर्पाक्षीचोरिणीत्यादिना उक्तानां रसमारकद्रव्याणां मूलरसैः मर्दितं लोहपर्पटान्तर्गतं पपटाकारलौहपत्रमध्यगतं कृत्वा कान्तसम्पुटे कान्तलौहनिर्मितपुट-मध्ये धमेत् अङ्गारे पचेदित्यर्थः ॥ १९।२० ॥

प्रकारान्तरमाह यद्वेति ।—कान्तपर्पटमिश्रितमिति पदमत्रापि योजनीयम्, अथवा गन्धकपादेन पादमितगन्धकेन सह कान्तपर्पटमिश्रितं रसं मूलिकारसैः रस-मारकद्रव्याणां मूलरसैः मर्दितं लोहसम्पुटमध्यस्थं कान्तसम्पुटे अङ्गारैर्ध्मातम् उत्खनेत् भस्मीकुर्य्यादित्यर्थः ॥ २१ ॥

प्रथमरसकल्पमाह, समुस्तेति ।—स्पष्टम् ॥२२॥

द्वितीयरसकल्पमाह, दशमूलेति ।—पिप्पल्या पिप्पलीचूर्णेन । समस्तजं त्रिदोषजं ज्वरमित्यर्थः, हरेदिति पूर्वोक्तेन सम्बन्धः ॥ २३ ॥

अथ रक्तपित्ते तृतीय-चतुर्थरसकल्पौ।—

माक्षिकाभयया वामा-पिप्पल्या वाऽस्रपित्तनुत् ॥२४॥

अथ कासे पञ्चमरसकल्प।—

कण्टकारीकषायेण पिप्पल्या च स कासजित् ॥२५॥

अथ क्षये षष्ठ-सप्तमरसकल्पौ।—

अजायाः क्षीरसिद्धेन कणायुक्तेन सर्पिषा।
त्रिफलागन्धकव्योष-गुडैर्वा क्षपयेत् क्षयम् ॥२६॥

अथ क्षयादौ अष्टमरसकल्प।—

अथ लौहमयीं मूषामायामे द्वादशाङ्गुलाम्।
मर्दितं हेमवाराही-गृहकन्यारसै रसम् ॥२७॥
रसोनपिण्डे दधतीं लौहमय्या सुरन्ध्रया।
निर्गुण्डीपत्रनिर्य्यास-पीतपादसुगन्धया ॥२८॥
गर्भमूषिकया युक्ता सचक्रा सपिधानकाम्।
लम्बिता जलपात्रस्थ-खर्परद्वारि पाचयेत् ॥२९॥

तृतीय चतुर्थरसकल्पद्वयमाह, माक्षिकेति।—अस्रपित्तनुत् रक्तपित्तहर। रसः इति कर्त्तृपद सर्वस्मिन्नेव कल्पे योजनीयम् ॥ २४ ॥

पञ्चमरसकल्पमाह, कण्टकारीति।—स्पष्टम् ॥ २५ ॥

षष्ठ सप्तमरसकल्पद्वयमाह, अजाया इति।—पिप्पलीकल्कपाटेन चतुर्गुणच्छाग-क्षीरेण च पक्वघृतेन अथवा त्रिफलादिभि सह भक्षितो रस क्षय क्षपयेत ॥ २६ ॥

अष्टमरसकल्पमाह, अथेति।—हेम धुस्तूर, वाराही वाराहीकन्द गृहकन्या घृतकुमारिका, हेमादिरसैर्मर्दित तथा रसोनपिण्डे रसोनपिण्डान्त स्थापित रसं दधती मूषामित्यन्वय कार्य्यं। सुरन्ध्रया सु शोभन मानानुरूपमित्यर्थं, रन्ध्रं यस्या तया रन्ध्रयुक्तया इत्यर्थ, गर्भमूषिकया इत्यस्य विशेषणमेतत, "सुरन्ध्रया" इत्यत्र "सरन्ध्रया" इति पाठान्तरम्। निर्गुण्डीति।—निर्गुण्डीपत्रनिर्य्यास पीतो येन तादृश निर्गुण्डीपत्ररसभावित इत्यथ, पाद रसापेक्षया चतुर्थांश सुगन्ध यस्या तथाभूतया, "पादसुगन्धया" इत्यत्र "पादांशगन्धया" इति पाठान्तरम्, गर्भमूषिकया मूषा एव मूषिका, गर्भे या मूषिका तया स्थूलमूषान्तरवस्थानार्हं-

ऊर्द्धं वनोत्पलैश्चित्रैरङ्गारैः खादिरैरधः।
एवमष्टगुणे जीर्णे गन्धके क्षयकुष्ठजित् ॥३०॥

अथ हिक्कायां नवमरसकल्पः।—

हिक्कां निहन्ति रुचक-बीजपूराम्लमाक्षिकैः ॥३१॥

अथ छर्दिदाहघ्नौ दशमैकादशरसकल्पौ।—

छर्दिदाहौ मधुसिता-लाजामुद्गसिताम्बुभिः ॥३२॥

अथ अर्शःसु द्वादशरसकल्पः।—

अर्शांसि तैलसिन्धूत्थ-पुटपाचितशूरणैः ॥३३॥

स्वल्पमूषयेत्यथ। सचक्रां सुखसञ्चालनार्थं चक्रचतुष्टयसमन्वितताम्। सपिधानकां साच्छादनाम्। जलपात्रस्थखर्परद्वारि लम्बितां सजलकुम्भाद्युपरि स्थापितस्य मृत्पात्रविशेषस्य, "ताओया" "चाट" इति प्रसिद्धस्य अपूपादिपाकार्थं अभ्राकार-लौहमयपात्रविशेषस्य वा मध्यस्थकृतरन्ध्रे लम्बमानामित्यर्थः। वनोत्पलैः आरण्य-गोमयैः। चित्रैः अद्भुतैः, अद्भुतत्वञ्च ऊर्द्ध्वाधो द्विविधाग्निना पाकात् इति बोध्यम्। अयमर्थः—द्वादशाङ्गुलविस्तारा चक्रसमन्विता सपिधाना लौहमयी मूषामेकां कृत्वा तत्र हेमादिरसमर्दितं रसोनपिण्डान्तःस्थं रसं संस्थापयेत्। अपराञ्चैकां नागवल्लीपत्ररसभावितेन रसपादिकेन गन्धकेन पूर्णां लौहनिर्मितां सच्छिद्रां स्वल्पाकारां मूषां स्थूलमूषागर्भे संस्थाप्य मूषामुखमावृत्य च सजलकुम्भाद्युपरि स्थापितस्य मृत्पात्रविशेषस्य लौहपात्रविशेषस्य वा मध्यभागस्थितकृतरन्ध्रे स्थूलमूषां तां लम्बितां कुर्यात्, अथ यन्त्रस्य ऊर्द्धदेशे आरण्यगोमयम् अधश्च खादिराङ्गारं प्रज्वाल्य पचेत् जीर्णे च तस्मिन् गन्धके पुनः रसपादं गन्धकं स्वल्पमूषायां दत्त्वा पूर्ववत् पचेत्, एवं यावता रसापेक्षया अष्टगुणगन्धको जीर्णो भवेत्, तावत् पुनः पुनः (द्वाविंशद्वारं) कुर्यादिति ॥ २७—३० ॥

नवमरसकल्पमाह हिक्कामिति।—रुचकं सौवर्चलम्, उक्तञ्च चक्रदत्ते—"मधु-सौवर्चलोपेतं मातुलुङ्गरसं पिबेत्" इति ॥ ३१ ॥

दशमैकादशरसकल्पद्वयमाह, छर्दिरिति।—मधुसितालाजामुद्गेन भृष्टमुद्गक्वाथे मध्वादिकं प्रक्षिप्य तेन, तथा च चक्रसङ्ग्रहे—"कषायो भृष्टमुद्गस्य सलाजमधुशर्करः। छर्द्यतीसारहृद्दाहज्वरघ्नः सम्प्रकाशितः ॥" इति। सिताम्बुभिः शर्करोदकेन वा रसभस्म छर्दिदाहौ शमयेदित्यर्थः ॥ ३२ ॥

द्वादशरसकल्पमाह, अर्शांसीति।—स्पष्टम्। चक्रसङ्ग्रहेऽप्युक्तं—"स्विन्नं शौरणं

अथ अतीसारे त्रयोदशादिरसकल्पत्रयम्।—

त्वक्‌पल्लवे कषायाणां शृतेनोदश्विदम्भसा।
चोरिण्या वाऽप्यतीसार—"

अथ विसूच्यां षोडशरसकल्पः।—

"—विसूचीं कणहिङ्गुना॥३४॥

अथ अजीर्णे सप्तदशरसकल्पः।—

अजीर्णं काञ्जिकैरण्ड-क्वाथपथ्यावलेहतः॥३५॥

अथ प्रवाहिकायाम् अष्टादशैकोनविंशरसकल्पौ।—

कषायपल्लवैः पक्वं बालबिल्वं सनागरम्।
सगुडं सरसं हन्ति बिम्बिसीं दारुणामपि॥
बिल्वकर्कटिकागर्भं मसूरक्वथिताम्बु वा॥३६॥

कन्दं पक्वाऽग्नौ पुटपाकवत्। अद्यात् सतैललवणं दुर्नामविनिवृत्तये॥" इति। अत्रापि रसभस्म द्वाल कर्षपदं बोद्धव्यम्॥३३॥

त्रयोदशादिपञ्चदशान्तरसकल्पत्रयमाह, त्वगिति।—कषायाणां न्यग्रोधादीनां क्षीरिवृक्षाणामित्यर्थः, कषायरसवद्वृक्षाणामित्यर्थो वा, त्वक्‌पल्लवे शृतेन क्वतेन क्वाथेन, वा अथवा उदश्विदम्भसा उदश्वित् "दध्यम्भसी यदि समे तदुदश्विदाहु—" इति राजनिघण्टौ अर्द्धजलं तक्रं तदम्भसा तद्द्रवेण उदश्विद्द्रवेणेत्यर्थः, चोरिण्याः 'चौरद' इति ख्यातं तस्याः स्वरसेन क्वाथेन वा रसभस्म अतीसारं निहन्तीति योजनीयम्। षोडशरसकल्पमाह, विसूचीमिति।—स्पष्टम्॥३४॥

सप्तदशरसकल्पमाह, अजीर्णमिति।—एरण्डक्वाथः एरण्डमूलक्वाथः॥३५॥

अष्टादशैकोनविंशरसकल्पद्वयमाह, कषायेति।—कषायपल्लवैः कषायाणां जम्बूदाडिमादीनां पल्लवैः पक्वं; यदुक्तं चक्रसङ्ग्रहे—"जम्बूदाडिमशृङ्गाट पाठाकच्छटपल्लवैः। पक्वं पर्य्युषितं बालं बिल्वं सगुडनागरम्॥" इति। सरसं रसभस्मसहितम्। बिम्बिसीं प्रवाहिकाम्। बिल्वेति।—सरसं बिल्वकर्कटिकागर्भं मसूरक्वथिताम्बु वा बिम्बिसीं हन्ति इत्यन्वयः। बिल्वं बिल्वशलाटु कर्कटिका एर्वारुफलत्वक् तस्या एव द्रव्यगुणे अतीसारहन्तृत्वदर्शनात्, एतद्द्वयं गर्भे यस्य तादृशं मसूरक्वथिताम्बु बिल्वकर्कटिकयोः कल्कसाधितेन मसूरक्वाथेन सह रसभस्मसेवनं कुर्य्यात्॥३६॥

अथ मूत्रकृच्छ्रे त्रिंशरसकल्पः ।—

कृच्छ्रं मृतरसः चोर-चोरिणीक्षुरमाक्षिकैः ॥३७॥

अथ मेहेषु एकत्रिंशरसकल्पः ।—

पारदभस्मशिलाजतुकृष्णा-लोहमलत्रिफलाकुलिबीजम् ।
ताप्यनिशारजकोपलकान्त-व्योषरजः खपुरस्य कपित्थात् ॥३८॥
सर्वमिदं परिचूर्ण्य समांशं भावितभृङ्गरसं दिवसादौ ।
विंशतिवारमिदं मधुलीढं विंशतिमेहहरं हरिदृष्टम् ॥३९॥

अथ प्लीहादौ द्वात्रिंशत्त्रयोत्रिंशरसकल्पौ ।—

न्यग्रोधाद्यसनाद्यैर्वा क्वाथयुक्तो मृतो रसः ।
पश्चाल्लशुनगोमूत्रैः प्लीहगुल्मनिवर्हणः ॥४०॥

अथ पक्तिशूले चतुर्त्रिंशरसकल्पः ।—

कलाययूषशम्बूक-क्षाराभ्यां पक्तिशूलनुत् ॥४१॥

अथ आमशूले पञ्चत्रिंशरसकल्पः ।—

सत्र्यूषणतिलक्वाथेनाऽऽमशूलस्य नाशनः ॥४२॥

त्रिंशरसकल्पमाह, कृच्छ्रमिति ।—चोरिणी "चोरक" इति भाषा । इक्षुरः कोकिलाक्ष, "कुलेखाडा" इति भाषा, चोरादिभिः सह मृतरसः कृच्छ्रं मूत्रकृच्छ्रं हन्ति । "चोरचोरिणीक्षुरमाक्षिकैः" इत्यत्र "चोरगोक्षुरचोरमाक्षिकैः" इति क्वचित् पाठः ॥ ३७ ॥

एकत्रिंशरसकल्पमाह, पारदेति ।—कल्पोऽयं सप्तदशाध्याये मेहहरनाम्ना पठितः व्याख्या तत्रैव द्रष्टव्या ॥ ३८।३९ ॥

द्वात्रिंश त्रयोत्रिंशरसकल्पद्वयमाह, न्यग्रोधादीति ।—न्यग्रोधाद्यसनाद्यैः "न्यग्रोध-पिप्पल—" इत्यादिना "असनतिनिशभूर्ज—" इत्यादिना च वाग्भटोक्तैः, न्यग्रोधादीनाम् असनादीनां वा क्वाथेन मृतरसं मर्दयित्वा पश्चात् रसोनगोमूत्रैः सह पिबेत्, "पश्चाल्लशुन" इत्यत्र "पथ्यालशुन" इति पाठान्तरम् ॥ ४० ॥

चतुर्त्रिंशरसकल्पमाह, कलायेति ।—कलायः वर्त्तुलकलायः । पक्तिशूलनुत् परिणामशूलहृत् ॥ ४१ ॥

पञ्चत्रिंशरसकल्पमाह, सेति ।—सुगमम् ॥ ४२ ॥

अथ उदरे षड्विंशरसकल्पः ।—

नवनीतसुधाक्षार-भाविताभययोदरे ॥४३॥

अथ कामलायां सप्तविंशरसकल्पः ।—

स हितः सहितो यष्टी-वारिणा कामलामये ॥४४॥

अथ पाण्ड्वादौ अष्टाविंशरसकल्पः ।—

फलत्रिकादिक्वाथेन पाण्डुशोफे सकामले ॥४५॥

अथ शोथे एकोनत्रिंशरसकल्पः ।—

शोफे सविश्वभूनिम्ब-क्वाथगोमूत्रसंयुतः ।

निम्बामलककद्रुष्टे प्रशस्तः स मृतो रसः ॥४६॥

अथ कुष्ठे त्रिंशैकत्रिंशरसकल्पौ ।—

रसोनराजिकावह्नि-नीलिमार्कवपल्लवैः ।

तुल्यं भल्लातकं क्षिप्त्वा क्षीरे तैलं विपाचितम् ॥४७॥

भूशिरीषसुपर्णाक्ष्योः पञ्चाङ्गं माक्षिकं घृतम् ।

रसञ्च लीढ्वा कुष्ठार्त्तो लिम्पेत्त्रिकटुना तनुम् ॥

रसगन्धकपिष्ट्या वा कटुतैलाभियुक्तया ॥४८॥

षड्विंशरसकल्पमाह नवनीतेति ।—सुधाक्षारं स्नुहीभस्मकृतक्षारं, तद्भाविता-भयया स्नुहीक्षारोदकभावितहरीतक्या उदरे उदररोगे ॥ ४३ ॥

सप्तविंशरसकल्पमाह, स इति ।—स मृतो रसः ॥ ४४ ॥

अष्टाविंशरसकल्पमाह, फलेति ।—फलत्रिकादिक्वाथेन "फलत्रिकामृतावासा-तिक्ताभूनिम्बनिम्बजः । क्वाथः क्षौद्रयुतो हन्यात् पाण्डुरोगं सकामलम् ॥" इत्युक्त-द्रव्याणां निर्य्यूहेण ॥ ४५ ॥

एकोनत्रिंशरसकल्पमाह, शोफे इति ।—निम्बामलककद्रुष्टे तुल्ये सह मर्दितो मृतो रसः सविश्वभूनिम्बक्वाथगोमूत्राभ्यां संयुतः शोफे प्रशस्त इत्यन्वयः ॥४६॥

त्रिंशैकत्रिंशरसकल्पद्वयमाह, रसोनेति ।—नीली नीलवृक्षः मार्कवपल्लवं भृङ्ग-राजदलम् । तुल्यं भल्लातकं रसोनादीनां मिलितानां समं भल्लातकमित्यर्थः, क्षिप्त्वा कल्कत्वेन दत्त्वा इत्यर्थः, क्षीरे चतुर्गुणे दुग्धे, रसोनादिभल्लातकान्तानां पादिककल्केन चतुर्गुणदुग्धेन च तैलं पक्तव्यम् । भूशिरीषः शिरीषः, सुपर्णाक्षी नागकेशरः, अनयोः

अथ कुष्ठे द्वात्रिंशत्त्रयस्त्रिंशरसकल्पौ ।—

कर्पूरमूलीसहनिम्बतैल-पातालमूलीरसभावितेन ।
रसेन लिह्यात् सकलं हठं वा विचूर्णितं पुष्परसेन कुष्ठी ॥४९॥

अथ कुष्ठे चतुस्त्रिंशरसकल्पः ।—

फेनिलफलाहिदर्वी-कन्दरसं खादतोऽनुदिनम् ।
फेनिलमूलोद्वर्त्तनमाचरतोऽपि च कुतः कुष्ठम् ॥५०॥

अथ किलासे पञ्चत्रिंशरसकल्पः ।—

चित्रकवानरिवायसीतुण्डी-वाकुचिका द्विगुणाः परिपीताः ।
मूत्रयुता मृतसूतसमेतास्तक्रभुजः शमयन्ति किलासम् ॥५१॥

पञ्चाङ्ग पत्रपुष्पत्वक्मूलफलरूपम् । रस मृत रसम्, तैलादिकं सर्वमेकीकृत्य कुष्ठी लिह्यात । लिम्पेदिति ।—रसभस्मसेवनानन्तर त्रिकटुचूर्णेन सकटुतैलेन रसगन्धक-कल्केन वा सकटुतैलेन सदद्रु लिम्पेदिति ॥ ४७।४८ ॥

द्वात्रिंश-त्रयस्त्रिंशरसकल्पद्वयमाह, कर्पूरमूलीति ।—कर्पूरमूली कर्पूरवृक्षस्य कन्द-मूलम्, "कर्पूरमूली" इत्यत्र "कर्पूरवल्ली" इति पाठे—कर्पूरलता इत्यर्थः । सह' सहचर खराचोरौ वा अनयो रस । पातालमूली पातालवासिनी ताम्बूलदल-मित्यर्थ । रसेन सूतरसेनेत्यर्थ । सकल रोहितदृष्णाम । हठ जलकुम्भिकाम् । "सकलं हठम्" इत्यत्र "समुवर्णकम्" इति क्वचित् पाठ । पुष्परस मधु । कर्पूरमूल्यादि-भावितो रस सकलचूर्णं पुष्परसञ्च एतत सर्वम एकीकृत्य लिह्यात् अथवा नाकरस हठचूर्णं पुष्परसञ्च सर्वम् एकीकृत्य लिह्यादिति ॥ ४९ ॥

चतुस्त्रिंशरसकल्पमाह, फेनिलेति ।—फेनिलफलं रीठाकरञ्ज । अहि' स्नुही, दर्वी गोजी तयो कन्द मूलम् । रस मृतरसम् । अनुदिन प्रतिदिनम् । फेनिल-फलादिचूर्णं रसञ्च एकीकृत्य उपयुक्तानुपानेन खादेत, फेनिलमूलकल्केन उद्वर्त्तनञ्च कुर्यादिति ॥ ५० ॥

पञ्चत्रिंशरसकल्पमाह, चित्रकेति ।—वानरी शूकशिम्बि । वायसी काकमाची । तुण्डी आरण्यबिम्बिका । "वायसतुण्डी" इति पाठे—काकतुण्डी "केओयाठुँटी" इति भाषा । द्विगुणा इति ।—मृतसूतापेक्षया चित्रकादिचूर्णाना मिलिताना द्वैगुण्यमित्यर्थ. ॥ ५१ ॥

अथ श्वित्रे षट्त्रिंशरसकल्पः ।—

द्रुतगगनमरीची वाकुचीतालपत्र्यौ
सलिलरिपुनकुल्यौ कृष्णागुरुशठ्यौ सभृङ्गम् ।
मरिचमसितसोमश्वित्रकाङ्कोलबीजं
वरतिलशशिलेखे त्वक् च शाखोटकस्य ॥५२॥
फलत्रयञ्च तत सर्वं मृतसूतसमन्वितम् ।
क्षीरान्नवर्त्तनो जग्ध्वा श्वित्रमाशु निवर्त्तयेत् ॥५३॥

अथ क्रिमौ सप्तत्रिंशरसकल्पः ।—

सनिम्बपल्लवक्षौद्रः क्रिमीन् हन्ति मृतो रसः ॥५४॥

अथ वातरोगे अष्टत्रिंशरसकल्पः ।—

पीतो लशुनसिद्धेन तैलेनानिलजान् गदान् ॥५५॥

अथ गृध्रस्याम् एकोनचत्वारिंशरसकल्पः ।—

विश्वैरण्डमृतक्षीर-सहितो गृध्रसीं जयेत् ॥५६॥

अथ वातरक्ते चत्वारिंशरसकल्पः ।—

गुडाभयागुडूच्यम्बु-युक्तः पवनशोणितम् ॥५७॥

षट्त्रिंशरसकल्पमाह, द्रुतेति ।—द्रुतगगनम् अभ्रसत्त्वम् । मरीचि श्वेतमरिचम्, वाकुची सोमराजी । तालपत्री तालमूली । सलिलरिपु अनल भल्लातकमित्यर्थः ; कुञ्जल इति कश्चित् । नकुली शङ्खपुष्पी जटामांसी वा, उभयोरपि कुष्ठहितत्वात् । कृष्णा कृष्णागुरु । सभृङ्गमित्यस्य मरिचमित्यनेनान्वय, भृङ्ग भृङ्गराज । असितं यव । सोम कर्पूर । वरतिल कृष्णतिल । शशिलेखा गुडूची । क्षीरान्नवर्त्तन, क्षीरान्नभुक् ॥ ५२।५३ ॥

सप्तत्रिंशरसकल्पमाह, सनिम्बेति ।—स्पष्टम् ॥ ५४ ॥

अष्टत्रिंशरसकल्पमाह, पीत इति ।—लशुनसिद्धेन रसोनकल्केन चतुर्गुणजलेन च पक्वतैलेनेत्यर्थ, तैले रसोनं भृष्टा तेन तैलेनेत्यर्थो वा ॥ ५५ ॥

एकोनचत्वारिंशरसकल्पमाह, विश्वेति ।—विश्वा शुण्ठी ॥ ५६ ॥

चत्वारिंशरसकल्पमाह, गुडेति ।—अभयागुडूच्या क्वाथे गुडं प्रक्षिप्य तेन सह सेवित रसभस्म वातरक्तं हन्यात् ॥ ५७ ॥

अथ स्थौल्ये एकचत्वारिंशरसकल्पः ।—

त्रिकटुत्रिफलावेल्लैः समांशो गुग्गुलुर्जयेत् ।
वातारितैलसंयुक्तः स्थौल्यं भस्मरसान्वितः ॥५८॥

अथ स्थौल्ये द्वाचत्वारिंशरसकल्पः ।—

मधूदकाभ्यां युक्तो वा—"

अथ कार्श्ये त्रिचत्वारिंशरसकल्पः ।—

"—कार्श्यन्तु शर्करान्वितः ॥५९॥

अथ अपस्मारादौ चतुश्चत्वारिंशरसकल्पः ।—

हिङ्गुसौवर्चलव्योष-मूत्रसिद्धेन सर्पिषा ।
रसो हन्यादपस्मारमुन्मादञ्च—" ॥६०॥

अथ अपस्मारादौ पञ्चचत्वारिंशरसकल्पः ।—

"—तथाऽञ्जनात् ।
मधूककुनटीतार्क्ष्य-पारावतमलैर्युतः ॥६१॥

एकचत्वारिंशरसकल्पमाह, त्रिकट्विति ।—वेल्लं विडङ्गम् । अत्र त्रिकट्वादीनामेको भागः गुग्गुलोश्चापरः । वातारितैलम् एरण्डतैलं तच्च मदनयोग्यम् । त्रिकट्वादियुक्तः वातारितैलसंयुक्तः भस्मरसान्वितश्च गुग्गुलुः स्थौल्यं जयेदिति ॥ ५८ ॥

द्वाचत्वारिंशरसकल्पमाह, मध्विति ।—अथवा मधूदकाभ्यां युक्तो भस्मरसान्वितः गुग्गुलुः स्थौल्यं जयेदित्यन्वयः । त्रिचत्वारिंशरसकल्पमाह, कार्श्यमिति ।—शर्करान्वितः भस्मरसान्वितश्च गुग्गुलुः कार्श्यं जयेदिति ॥ ५९ ॥

चतुश्चत्वारिंशरसकल्पमाह, हिङ्ग्विति ।—अत्र हिङ्गुप्रभृतीनां पञ्चानां प्रत्येकं पलद्वयं कल्कः गोमूत्रञ्च चतुर्गुणम्, यदाह चक्रपाणिः,—"हिङ्गुसौवर्चलव्योषैर्द्विपलांशैर्घृताढकम् । चतुर्गुणे गवां मूत्रे सिद्धमुन्मादनाशनम् ॥" इति । हिङ्ग्वादिसिद्धेन घृतेन सेवितः रसभस्म उन्मादापस्मारं हन्यादिति ॥ ६० ॥

पञ्चचत्वारिंशरसकल्पमाह, तथेति ।—मधूकं "महुया" इति ख्यातम् । कुनटी मनःशिला । तार्क्ष्यं रसाञ्जनम् । पारावतमलं कपोतविट् । मधूकचूर्णादिसहितरसभस्मकृता अञ्जनवर्त्तिः प्रयुक्ता उन्मादापस्मारं हन्यादिति । चक्रदत्ते मधूकविरहित-

अथ पद्मशाते षट्चत्वारिंशरसकल्प।—

धान्याम्लपिष्टाष्टमपिप्पलीकान् कार्पासबीजान् करमर्दनेन।
आदाय तैलं मृतसूतयुक्तमक्ष्णि प्रयुञ्जीत विशीर्णरोगिणि ॥६२॥

अथ नेत्ररोगे सप्तचत्वारिंशरसकल्प।—

बर्बूरनिम्बकिसलाऽऽजपुरीषधूमैः
कासेक्षुराश्मवनितास्तनजेन घृष्टम्।
भल्लातधूपितरसाञ्जनमञ्जयित्वा
साभ्यञ्जनस्नपनमक्ष्णि रुजं निहन्ति ॥६३॥

कुमार्यादिभि अञ्जनविधिर्दृश्यते, तथा च—"मनोह्वा तार्क्ष्यजञ्चैव शकृत् पारावतस्य च। अञ्जनं हन्त्यपस्मारमुन्मादञ्च विशेषत ॥" इति ॥ ६१ ॥

षट्चत्वारिंशरसकल्पमाह, धान्याम्लेति।—धान्याम्लपिष्टा अष्टमी अष्टमांशा पिप्पली यत्र तादृशान्, एवञ्च कार्पासबीजानां सप्त भागा पिप्पल्याश्च अष्टमो भाग। करमर्दनेन पाणिभ्यां मर्दयित्वेत्यर्थ। "करमर्दनेन" इत्यत्र "करमर्दकेन" इति पाठे—करञ्जफलेनेत्यर्थ। विशीर्णरोगिणि पद्मशालाख्ये नेत्ररोगे। काञ्जिकेन पिप्पली पिष्ट्वा तेन सह पिष्टकार्पासबीजं मिश्रीकुर्य्यात्, तत काञ्जिकेनैव तदालोड्य पाणिना मर्दयित्वा च तैलं गृह्णीयादिति ॥ ६२ ॥

सप्तचत्वारिंशरसकल्पमाह, बर्बूरेति।—बर्बूर बब्बोल "बाबला" इति भाषा, तथा निम्ब तयो किसल किसलय। धूम शिल्हक। कास कासतृण, "कास" इत्यत्र "कास्य" इति क्वचित पाठ। इक्षुर कोकिलाक्ष, कासेक्षुर इत्येकपदत्वे कासतृणमित्यर्थ। अश्म स्वर्णमाक्षिक। वनितास्तनजेन नारीपयसा। भल्लातधूपितरसाञ्जनम् इत्यत्र रसाञ्जनशब्देन मृतरसकृतमञ्जन बोध्य, न तु रसाञ्जनं, रसकल्पत्वात, अञ्जयित्वा सञ्चयित्वा। साभ्यञ्जनस्नपनम् अभ्यञ्जनम अभ्यङ्ग स्नपनं स्नान तैलाभ्यङ्गपूर्वकस्नानमित्यर्थ। अयमत्र कल्प,—मृत सूत स्वर्णमाक्षिक शिला-रसञ्च बर्बूरनिम्बकिसलयरसेन अजापुरीषक्वाथेन कासेक्षुरयो क्वाथेन नारीस्तन्येन च घृष्ट्वा भल्लातकधूमेन धूपयेत्, तत तेनाञ्जयित्वा तैलाभ्यङ्गपूर्वकं स्नायादिति। "धूमै" इत्यत्र "धूपै" इति पाठे—बर्बूरादीनां धूपै. धूपितरसाञ्जनं तथा भल्लातधूपित-रसाञ्जनमिति योजनीयम् ॥ ६३ ॥

अथ तिमिरे अष्टचत्वारिंशरसकल्पः ।—

महाभेरीमूलं तुरगपृथुकाम्भोधिकुवलं
रसो जम्बीराम्ले जयति तिमिरं काचमपि च ॥६४॥

अथ जाड्ये एकोनपञ्चाशत्तमरसकल्पः ।—

उपात्तं जीमूताद्रविजधरपर्णाम्बुमृदितात्
रसस्तैलं लेपादिह विविधजाड्यञ्च गुदजान् ॥६५॥

अथ केशकृष्णीकरणे महानीलतैलाख्यपञ्चाशत्तमरसकल्पः ।—

वटप्ररोह पिण्डीत-मूलत्वक्कृष्णसैर्य्यकैः ।
केतकीस्तननिर्य्यास-शकलीत्रिफलार्जुनैः ॥६६॥
पृथक् दशपलैः सार्द्धं चतुर्द्रोणेष्वपां पचेत् ।
अष्टभागावशिष्टेऽस्मिन् भृङ्गस्वरसपेषिते ॥६७॥

अष्टचत्वारिंशरसकल्पमाह, महेति।—महाभेरी वचाविशेषः तस्या मूलम्। तुरगः अश्वगन्धा। पृथुका हिङ्गुपर्णी। अम्भोधिः देशान्तरप्रसिद्धः, "अम्भोधि" इत्यत्र "अम्बुधि" इति कल्पना सुगमार्था, अम्बुधिः समुद्रफेनः, चक्षुष्यत्वात्। कुवलं नीलोत्पलम्, चक्षुष्यत्वात्। रसः मृतरसः। जम्बीराम्ले इत्यत्र घृष्ट इति शेषः ॥ ६४ ॥

एकोनपञ्चाशत्तमरसकल्पमाह, उपात्तमिति।—जीमूतात् घोषकवीजात् इत्यर्थः, रविजधरपर्णाम्बुमृदितात् रविजः अर्काङ्कुरः, धरपर्णः गिरिपर्णः गिरिनिम्ब इत्यर्थः, तयोरम्बु रसः ताभ्यां मृदितात् जीमूतात् तैलं तथा रसः इत्यन्वयः कार्य्यः। रविजः अर्कक्षीरं धरः कार्पासमूलं पर्णं ताम्बूलम् इति काश्चित्, "पर्णाम्बु" इत्यत्र "पर्ण्यम्बु" इति पाठे—रविजं जलम् "आदित्याज्जायते वृष्टि" इति स्मरणात्, तस्य धरः मेघः, मुस्तकमित्यर्थः, पर्णी सप्तपर्णः तयोरम्बु। गुदजानित्यस्य जयति इति पूर्वोक्तेनान्वयः ॥ ६५ ॥

पञ्चाशत्तमरसकल्पमाह वटेति।—वटप्ररोहः वटावरोहम्। पिण्डीतकः मदनफलं, तद्वृक्षस्य मूलत्वक्। कृष्णसैर्य्यकः कृष्णपुष्पझिण्टीविशेषः, नीलझिण्टीति यावत्। केतकीस्तननिर्य्यासः केतकीस्तनः केतकीवृक्षस्य स्तनाकारः अंशविशेषः तस्य निर्य्यासः त्वक् क्षीरं वा, "निर्य्यास" इत्यत्र "भृङ्गाय" इति क्वचित् पाठः। शकली शकलम् आमलकं फलत्वेन अस्यास्तीति शकली आमलकपत्रम्। "भृङ्गस्वरसपेषिते" इत्यस्य

त्रिफलानीलयवचूर्णैः पृथक् द्विपलिकैर्युतम्।
तैलाढक समक्षीर पक्वा भृतरसान्वितम् ॥६८॥
महानील समुद्गस्थ मण्डल धान्यमध्यगम्।
अभ्यङ्गविधियोगेन केशाना रञ्जनं परम् ॥६९॥

अथ व्रणे एकपञ्चाशत्तमरसकल्प।—

त्रिफलापटोलमूलव्योषगुडूचीविडङ्गवीजानि।
समगुग्गुलानि मारितरसमिलितानि व्रणघ्नानि ॥७०॥

अथ ग्रन्थौ द्विपञ्चाशत्तमरसकल्प।—

ग्रन्थीन् विलेपयेत्तेषा लेपात्—"

अथ मसूरिकायां त्रिपञ्चाशत्तमरसकल्प।—

"—मूलरसान्वितम्।
नारिकेलोदकं तद्वत् पीतं हन्ति मसूरिकाः ॥७१॥

विशेष्यपदाभावात "भृङ्गस्वरसपोषिते" इति पाठकल्पन समीचीनम्, तथात्वे—भृङ्गस्वरसेन भृङ्गराजरसेन पोषिते भयोजनात वर्द्धिते अस्मिन् क्वाथे इत्यर्थ। त्रिफलानीलयवचूर्णाना प्रत्येक द्विपलाना कल्क। महानील केशाना कार्ष्ण्यातिशय्य-सम्पादनात महानीलेत्याख्य तैल समुद्गस्य सम्पुटस्थ मण्डलम् अष्टचत्वारिंशत् दिनानि व्याप्य धान्यमध्यग धान्यराशिमध्यस्थम ॥ ६६—६९ ॥

एकपञ्चाशत्तमरसकल्पमाह, त्रिफलेति।—समगुग्गुलानि त्रिफलादिमिलितचूर्ण-समगुग्गुलभागयुक्तानीत्यर्थ। व्रणविषया प्रयोज्योऽय कल्प ॥ ७० ॥

द्विपञ्चाशत्तमरसकल्पमाह, ग्रन्थीनिति।—तेषा त्रिफलादीना मारितरसान्ताना लेपात ग्रन्थीन् विलेपयेत लिप्तान स्वाचितानिव विलीनान कुर्यादित्यर्थ, शरीरेण सह एकीभूतान् कुर्यादिति फलित भिषक् इति शेष। "विलेपयेत" इत्यत्र "विलोपयेत्" इति कल्पना साध्वी। "विनाशयेत" इति क्वचित पाठ। त्रिपञ्चाशत्तमरसकल्पमाह, मूलेति।—मूलरसान्वितम् इति पद नारिकेलोदक-मित्यनेन सम्बध्यते, मूलरसान्वित भीरटान्वितम इक्षुमूलरसान्वितमित्यर्थ, इक्षुमूलस्य भावप्रकाशे मसूरिकाहरत्वदर्शनात तथा द्रव्यगुणे "रक्तकृच्छ्रातपित्ताना नाशन" "रक्तास्रपित्तश्रमशमनपटु" इत्यादिगुणदर्शनाच्च। तद्वत रसभस्मवत्। मृतरस इक्षुमूलरस-नारिकेलोदकाभ्या पीत, मसूरिका हन्ति ॥ ७१ ॥

अथ श्वित्रादौ चतु पञ्चाशत्तमरसकल्प ।—

मञ्जिष्ठा शवरोद्भव तुवरिका लाक्षा हरिद्राद्वयं
नेपाली हरितालकुङ्कुमगदा गोरोचना गैरिकम् ।
पत्रं पाण्डु वटस्य चन्दनयुगं कालेयक पारदं
पत्तङ्ग कनकत्वचं कमलज वीजं तथा केशरम् ॥७२॥
सिक्थं तुल्यं लोहकिट्टं वसाज्यमाज क्षीर क्षीरवृक्षाम्बु चाग्नौ ।
सिद्ध सिद्धं व्यङ्गनील्यादिनाशि वक्त्रच्छायामैन्दवीमाशु धत्ते ॥७३॥

अथ अस्थिस्रावे पञ्चपञ्चाशत्तमरसकल्प ।—

कार्पासपल्लवानन्ता-रसतैलयुतो हितः ।
अस्थिस्रावे मृतरसो—" ॥७४॥

चतु पञ्चाशत्तमरसकल्पमाह, मञ्जिष्ठेति ।—शवरोद्भव शावरलोध्र श्वेतलोध्र मित्यर्थ । तुवरिका सौराष्ट्रमृत्तिका । नेपाली मनःशिला । गदा पाटलवृक्ष । वटस्य पाण्डुपत्र परिणतपत्रम् । चन्दनयुग श्वेतरक्तभेदेन चन्दनद्वयम् । कालेयक कृष्णागुरु, "कालीयकम" इति वाग्भटपाठे—कालीयकाष्ठमित्यर्थ । पारद मृत-पारदमित्यर्थ । पत्तङ्ग "वकमकाष्ठ" इति लोके । कनकत्वच चाम्पेयत्वचम् । सिक्थ मधूच्छिष्टम् । वसाज्यमाज क्षीरमित्यत्र वसाज्ये अपि आजे एव ग्राह्ये क्षीरसाहचर्य्यात । क्षीरवृक्षाम्बु उडुम्बरत्वक्क्वाथम् । अत्र वसाज्ये स्नेह, मञ्जिष्ठादीना कल्क, आजक्षीर स्नेहसमं क्षीरवृक्षाम्बु च स्नेहचतुर्गुण, सर्वं यथायथं पक्तव्यम् । "सिक्थम्" इत्यारभ्य "धत्ते' इत्यन्तस्थाने वाग्भटे—"सिक्थ तुल्य पद्मकाह्व वसाज्य मज्जा क्षीर क्षीरिवृक्षाम्बु चाग्नौ । सिद्ध सिद्ध व्यङ्गनील्यादिनाशि वक्त्रे च्छायामैन्दवीमाशु धत्ते ॥" इति पाठान्तरम, वाग्भटोक्त "पद्मकाह्वम्" इत्यत्र "पद्मकाद्य " इति पाठे--पद्मकाद्य "पद्मकपुण्ड्रौ वृद्धितुगर्द्ध्य शृङ्ग्यमृता दशजीवन सज्ञा " इत्युक्तगण । अत्र वसाज्यमज्जान स्नेहा,, क्षीर गव्य स्नेहसम, क्षीरिवृक्षाम्बु क्षीरिपञ्चकस्य क्वाथ । द्वितीय सिद्ध सिद्धफलम ॥ ७२,७३ ॥

पञ्चपञ्चाशत्तमरसकल्पमाह, कार्पासेति ।—अनन्ता अनन्तमूलम् । कार्पास-पत्रानन्तमूलयो स्वरस तिलतैल मृतरसश्च सर्वमेतत् एकीकृत्य लेपविधया प्रयोजयेदिति ॥ ७४ ॥

अथ विषे षट्पञ्चाशत्तमादिरसकल्पषट्कम्।—

"—विषे स्थावरजङ्गमे।

तण्डुलीयकमूलेन वीरामूलेन वा युतः॥

तण्डुलोदकसम्मिश्रः पाननावनलेपने॥७५॥

अथ विषे द्विषष्टितमरसकल्पः।—

सुरभिशकृद्रसभावितकर्पूरसमन्वितो मृतः सूतः।

स्थावरजङ्गमकृत्रिमविषजिन्नस्यासितो दध्ना॥७६॥

अथ सर्पविषे त्रिषष्टितमरसकल्पः।—

यक्षाक्षफेनिलरसोनकटुत्रयोग्रा-

राजी-वराङ्घ्रिवकुलं लकुचाम्बुपिष्टम्।

छायाविशोषितमिदं नरवारिघृष्टं

सर्पापहं सरसमञ्जनतस्त्रिवारान्॥७७॥

अथ सर्पविषे चतुःषष्टितमरसकल्पः।—

पिशाचः पञ्चवर्णस्य बीजं मूलं पुनर्नवात्।

देवदाल्याः फलं मूलं मूलञ्च विषपर्णतः॥

पेषितं नरमूत्रेण सर्वथाऽहिविषापहम्॥७८॥

षट्पञ्चाशत्तमादि एकषष्टितमान्तरसकल्पषट्कमाह, विषे इति।—तण्डुलीयक-मूलेन स्वल्पमारिषमूलेन। वीरा चीरकाकोली, तण्डुलीयमूलचूर्णयुतः वीरामूल-चूर्णयुतो वा मृतरसः तण्डुलोदकेन पानादिषु प्रयुक्तः स्थावरजङ्गमविषं हन्यात्॥७५॥

द्विषष्टितमरसकल्पमाह, सुरभीति।—गोमयरसेन सप्तवारभावितकर्पूरयुक्तः। सेव्ययोगोऽयम्॥ ७६॥

त्रिषष्टितमरसकल्पमाह यक्षेति।—यक्षः वटवृक्षः। अक्षः विभीतकः। फेनिलः "रीठा" इति ख्यातम्। उग्रा वचा। राजी रक्तसर्षपः। वरा श्वेतापराजिता, विषहन्त्रीत्वात्, तस्या अङ्घ्रि मूलम्। नरवारिघृष्टं नृमूत्रपिष्टम्। सरसं मृतरस-सहितम्॥ ७७॥

चतुःषष्टितमरसकल्पमाह, पिशाच इति।—पिशाचः शाखोटकः तस्य त्वक्, "पिशाच" इत्यत्र "पिशाचा" इति पाठान्तरम्, "सर्पिषा" इति क्वचित् पाठः। पञ्चवर्णस्य धुस्तूरस्य। विषपर्णतः देवताडात् मूलं वीषकमूलमित्यर्थः। योगेऽस्मिन् अनुक्तोऽपि प्राकरणिकत्वात् रसभागः प्रदातव्यः। अनेनापि नेत्राञ्जनं कर्त्तव्यम्॥७८॥

अथ उन्दुरुविषे पञ्चषष्टितमरसकल्पः ।—

कपित्थपञ्चकं नीरं रसश्चाऽऽखुविषापहम् ॥७९॥

अथ वृश्चिकविषे षट्षष्टितमादिरसकल्पचतुष्टयम् ।—

कांस्ये ताम्बूल्या नागरं पिष्टमद्भिः
पत्रं शैरीषं पिप्पली छागदुग्धे ।
पत्रं कार्पासात् सर्षपा वाऽपि लेपात्
सूतेनैतेनं वृश्चिकानां विषघ्नम् ॥८०॥

अथ विषदिग्धव्रणे सप्ततितमादिरसकल्पद्वयम् ।—

भावितं चणकाम्लेन वस्त्रमम्लेन मर्दयेत् ।
तेन वाकुचिचक्राह्व-कार्पासागस्तिपल्लवान् ॥८१॥
एकस्य लकुचस्याम्ले स्वरसेन रसेन यः ।
प्रक्षालितः प्रयात्येव विषदिग्धव्रणः शमम् ॥८२॥

पञ्चषष्टितमरसकल्पमाह, कपित्थेति ।—कपित्थपञ्चकं कपित्थस्य पत्रपुष्पफल-मूलत्वक्रूपमङ्गपञ्चकम् । नीरं जलकम् । रसः शुद्धपारदः, भक्षयेदिति शेषः, तद्द्वयम् आखुविषापहमिति योजनीयम् ॥ ७९ ॥

षट्षष्टितमरसकल्पादेकोनसप्ततितमरसकल्पमाह, कांस्ये इति ।—कांस्ये कांस्य-भाजने । ताम्बूल्या ताम्बूलीरसेन । अद्भिरित्यस्य पत्रं शैरीषमित्यनेन सम्बन्धः । कल्पचतुष्टयेऽपि "सूतेनार्पितम्" इति पदं योजनीयम् ॥ ८० ॥

सप्ततितमैकसप्ततितमरसकल्पद्वयमाह, भावितमिति ।—चणकाम्लेन वस्त्रं वस्त्र-खण्डमित्यर्थः, भावितं, कुर्यादिति शेषः "भावितं चणकाम्लेन वस्त्रमम्लेन मर्दयेत्" इत्यत्र 'भावितश्चणकाम्लेन रसः खल्वे विमर्दयेत्" इति क्वचित् पाठः । ततः तेन वस्त्रेण, वाकुच्यादिपल्लवान्, अन्तरितान् कृत्वा इति शेषः अम्लेन काञ्जिकेन मर्दयेत् । चक्राह्वः चक्रमर्दः । अथवा अम्ले काञ्जिके, पिष्टस्येति शेषः, एकस्य केवलस्य लकुचस्य स्वरसेन । कल्पद्वयमेतत्, उभयत्रापि रसेन इति सम्बन्धनीयम्, तथा च—चणकाम्लभावितवस्त्रान्तरितानां वाकुच्यादिपल्लवानामम्लपिष्टानां स्वरसेन रस-युक्तेन, तथा अम्लपिष्टस्य केवललकुचस्य स्वरसेन रसयुक्तेन वा यः विषदिग्धव्रणः प्रक्षालितः भवतीति शेषः, स शमं प्रयात्येव इति ॥ ८१।८२ ॥

अथ रसायने हिमसतितमरसकल्पः ।—

रसायनोक्तविधिना शुद्धो लब्धबलः पुनः ।
प्रातः प्रातः कणापथ्या-विश्वसैन्धवचित्रकम् ॥८३॥
पीत्वा सरत्कषायाग्नेरीषदुष्णेन वारिणा ।
भृङ्गामलकनिर्य्यासे भावितं व्योमकान्तयोः ॥८४॥
भस्माय सम्पुटे धान्ये स्थापितं मधुसर्पिषा ।
खादेन्निशि कणापथ्या मासमेकं तथा पुनः ॥८५॥

अथ रसायने विसप्ततितमरसकल्पः ।—

पातनाभस्म वा युक्तमथ सूतस्य भस्मना ।
जीर्णाल्पहेम्नः षण्मासाच्छतावर्य्या रसेन च ॥८६॥

हिमसतितमरसकल्पमाह, रसायनेति ।—रसायनोक्तविधिना शुद्ध पञ्चकर्म-संशुद्ध लब्धबल पुन शोधनानन्तर संसर्जनादिक्रमेण यदा जातबलो भवेत तदा इत्यर्थ, "पुन" इत्यत्र "पुमान्" इति क्वचित् पाठ । धान्ये धान्यराशिमध्ये मासमेक स्थापितमित्यन्वय, अत्रापि व्योमकान्ताभ्या सह अनुक्तस्यापि रसस्य भागो देय, प्राकरणिकत्वात् इति ज्ञातव्यम्, यदि वा—"मृतानि लोहानि रसीभवन्ति" इति वचनेन रसोल्लेखाभावेऽपि व्योमकान्तयोभस्मयोगात् अस्य रसकल्पत्व न विरुद्धमिति ज्ञातव्यम्, कि वा "सूतस्य पातनाभस्म वा" इति वक्ष्यमाणेनान्वय कार्य्य । प्रात कणादिचूर्णमग्निबलानुरूपमुष्णोदकेन पीत्वा भृङ्गराजामलकक्वाथभावित लोहपात्रे स्थित लोहाभ्रयो भस्म मासमेक धान्यराशि-मध्ये स्थित रसभस्मसहित मधुघृताभ्या खादेत्, ततो निशि पुनरुष्णवारिणा कणापथ्याचूर्ण पिबेदिति ॥ ८३—८५ ॥

विसप्ततितमरसकल्पमाह पातनेति ।—अथवा जीर्णाल्पहेम्न जीर्ण शोधित-मित्यर्थ, अल्प स्वाभाविकमात्रापेक्षया न्यून, यवमानमिति यावत, "द्वौ यवौ तत्र हेम्नस्तु" इति वचनेन यवद्वयस्य पूर्णमानत्वात्, हेम्न तस्य भस्मना युक्तम्, "जीर्णान्यहेम्न" इत्यत्र "जीर्णाभ्रहेम्न" तथा "जीर्णाल्पहेम" इति च पाठान्तरद्वयम्, सूतस्य पातनाभस्म ऊर्द्धपातनायन्त्रयोगेन शोधनपूर्वक भस्म; "पातनाभस्म वा" इत्यत्र "पातनाभस्मना" "सुनागभस्मना" इति क्वचित् पाठ. ॥ ८६ ॥

अथ रसायने चतुःसप्ततितमरसकल्पः ।—

त्रिफला मधुसर्पिर्भ्यां खादिरासनभाविताम् ।
मृतहेमरसोपेतां भक्षयेन्नाशयेज्जराम् ॥८७॥

अथ रसायने पञ्चसप्ततितमरसकल्पः ।—

गन्धकेन हतं सूतं कान्तं धात्रीरसेन च ।
त्रिफलासहितं खादेज्जीवेदाचन्द्रतारकम् ॥८८॥

अथ रसायने षट्सप्ततितमरसकल्पः ।—

चित्रकं त्रिफला भृङ्गी हरिद्राऽञ्जनपत्रिका ।
रसस्त्रिमधुरश्चापि जरावैरूप्यनाशनः ॥८९॥

अथ रसायने सप्तसप्ततितमाद्यशीतितमान्तरसकल्पः ।—

रसौषधीनां रसभावितानां सितायुतैः क्षीरमधूदकाज्यैः ॥९०॥

अथ रसायने एकाशीतितमरसकल्पः ।—

जरां रसो हन्ति च कान्तपात्रे क्षीरं शृतं काञ्चनपादपिष्ट्या ॥९१॥

चतुःसप्ततितमरसकल्पमाह, त्रिफलामिति ।—मृतहेमरसोपेतां खदिरासन-भावितां त्रिफलां मधुसर्पिर्भ्यां भक्षयेत् इत्यन्वयः । षण्मासात् जरां भक्षयेत् इति वाक्यं, द्विसप्ततितमादिकल्पत्रयेऽपि योजनीयम् ॥ ८७ ॥

पञ्चसप्ततितमरसकल्पमाह, गन्धकेनेति ।—त्रिफलाचूर्णधात्रीरसाभ्यां सह रस-लौहयोः भक्षणं कार्य्यम् ॥ ८८ ॥

षट्सप्ततितमरसकल्पमाह, चित्रकमिति ।—अञ्जनं रसाञ्जनम् । पत्रिका जातीकोषः । त्रिमधुरं घृतमधुगुडरूपमधुरत्रयम्, चित्रकादिरसान्तं सर्वं त्रिमधुरेणाव-लेह्यम् ॥ ८९ ॥

सप्तसप्ततितमादिरसकल्पचतुष्टयमाह, रसौषधीनामिति ।—रसभावितानां विदार्य्यामलकादीनां रसायनद्रव्यसमूहानां सर्पाक्ष्यादीनां रसमारकद्रव्यसमूहानां वा रसेन भावितानां, रसौषधीनां पारदसंयुक्तौषधानाम्, सितायुतैरिति पदं क्षीरादिभिः प्रत्येकेन संयोजनीयम्, तथा च—सिताक्षीराभ्यां सितामधुभ्यां सितो-दकाभ्यां सिताज्याभ्यां वा सह इत्यर्थः, प्रयोग इति शेषः, जरां हन्ति इति परेणान्वयः । कल्पचतुष्टयमेतत् ॥ ९० ॥

एकाशीतितमरसकल्पमाह, जरामिति ।—रसः मृतरसः । कान्तपात्रे काञ्चनपाद-

अथ रसायने वज्रखञ्जररसाख्य द्व्यशीतितमरसकल्प।—

चेत्रीकरणमित्युक्तं वज्रभस्मसमं रसम्।
हंसपादीरसैर्घृष्ट विपचेत्तत पुटानले ॥८२॥
तुल्यमन्य रसं तेन पूर्ववन्मर्दितं पचेत्।
यावच्छक्यं चतुर्थांश-मानेन रसभस्मना ॥८३॥
अम्लपिष्टेन सौवर्णं पत्रमालिप्य मारयेत्।
राजिकाद्वाड्ंमारभ्य यावन्माष विवर्द्धित ॥८४॥

पिष्ट्या काञ्चनपादस्य पादमितकाञ्चनस्य, पादमितत्वञ्चात्र क्षीरापेक्षया बोद्धव्य, पिष्ट्या चक्रिकया। मृतरस कान्तपात्रे काञ्चनचक्रिकया घृतक्षीरेणालोड्य पेय इति ॥ ८१ ॥

द्व्यशीतितमरसकल्पमाह, चेत्रीकरणमिति।—चेत्रीकरण देहस्य रसवीर्य्यसहन-क्षमीकरणमित्यर्थ, वज्रसमरससेवने देह रसवीर्य्यसहनक्षमो भवतीत्याशय। रसेन्द्रचिन्तामणौ चेत्रीकरणमुक्त, तद्यथा—"स्निग्ध स्विन्न विरिक्त यन्नीरुज सिद्धभेषजै। एतत चेत्र समासेन रसवीजार्पणक्षमम॥ स्निग्ध प्रातस्त्रिदिन घृतसैन्धवपानेन। विरिक्तमिच्छाभेदिना वान्त वचादिरसेन॥ पलाशवीज विडङ्गं गुडमोदकभक्षणात् कीटपातनम्। नीरुजं सवत्सरमयन वा परिशीलितै॥ अङ्गाराभ्र लक्ष्मीविलासाद्यरसप्रधानप्रयोगै। इति शुद्धे जातबल शाल्योदन-जाङ्गलादिसुन्दररसै॥ चेत्रीकृतनिजदेह कुर्वीत रसायन मतिमान्। अकृते चेत्री-करणे रसायन यो नर प्रयुञ्जीत॥' तस्य क्रामति न रस सर्वाङ्गदोषजत् भवति। घनसत्त्वपादजीर्णोऽर्द्धकान्तजीर्णश्च तीक्ष्णसमजीर्ण ॥ चेत्रीकरणाय रस प्रयुज्यते भूय: आरोग्याय॥" इति। अस्यैव एकादशैऽप्युक्त यथा—"सुशोधितरस सम्यगारोग्य इति कथ्यते। स चेत्रकरणे श्रेष्ठ, शनैर्व्याधिविनाशन॥" इति। तत वज्रभस्मसमं रसम्। तुल्यमिति।—तेन पूर्वोक्तरसभस्मना तुल्यम् अन्य रस पारद, पूर्ववत् मर्दित हसपादीरसैर्घृष्ट यावच्छक्य यावन्त पुट दातु शक्नुयात् तावत् पचेत्, पुटानले इति शेष, यद्वा—अन्य रस महारसोपरसादिक यावच्छक्य यावत्काल पुट दातु शक्नुयात तावत्काल पूर्ववत मर्दितं पचेत। चतुर्थांशमानेन इति पद सौवर्णपत्रापेक्षया बोध्यम्। रसभस्मना पूर्वोक्तदिशा भस्मीकृतेन रसेन, "रसभस्मना" इत्यत्र "अनेन भस्मना" इति क्वचित् पाठ। राजिकाऽर्द्धाद्दे राजिकाया, सर्षपस्य अर्द्धस्य अर्द्धं

चित्रकार्द्रकसिन्धूत्थ-तीक्ष्णसौवर्चलैः सह ।
सेवितः पलपर्य्यन्तं रसोऽयं वज्रपञ्जरः ॥
प्रख्यः परिभूतानां व्याधिवार्द्धकमृत्युभिः ॥९५॥

अथ रसायने पञ्चामृतरसाख्यं त्र्यशीतितमरसकल्पः ।—

हेममाक्षिककान्ताभ्र-वज्रभस्म प्रवेशयेत् ।
रसे महेम्नि सप्ताहं मूलिकारसमर्दिताम् ॥९६॥
तां पिष्टिं यन्त्रयोगेन पचेत् पञ्चामृताह्वयः ।
रसोऽयं मधुसर्पिर्भ्यां युक्तः पूर्वाधिको गुणैः ॥९७॥

अथ रसप्रयोगे उपचारावधिः ।—

घनसारचतुर्जात-कक्कोलं कटुकीफलम् ।
फलं ताम्बूलवल्लीनां रसस्याऽऽक्रमणं परम् ॥९८॥

राजिकापादमित्यर्थः । विवर्द्धितं प्रतिदिनं राजिकापादक्रमेण वर्द्धितं इत्यर्थः । तीक्ष्णं वचा । पलपर्य्यन्तं राजिकापादमारभ्य प्रतिदिनं पादवृद्धिक्रमेण माषं यावत् वर्द्धयेत्, एवं यावत्कालसेवनेन मिलित्वा पलमानं पूर्य्यते तावत् सेवितः । अयमर्थः,—आदौ वज्रभस्मना तुल्यं रसं हंसपादीरसे पुटपाकं कुर्य्यात्, ततः तेन रसभस्मना सह समपरिमितमन्यं रसं पूर्ववत् पचेत्, ततः स्वर्णपत्रापेक्षया चतुर्थांशेन कल्क-पिष्टेन तेनैव रसभस्मना सह मारितं सुवर्णभस्म चित्रकादिभिः सह यथोक्तमानेन प्रयोजयेदिति निष्कर्षः ॥ ९२—९५॥

त्र्यशीतितमरसकल्पमाह, हेममाक्षिकेति ।—हेममाक्षिकं स्वर्णमाक्षिकम् । स्वर्णमाक्षिकभस्मादिकं महेम्नि रसे पूर्वप्रदर्शितविधिना रसभस्मामिश्रस्वर्णपत्रकृतभस्मनि प्रवेशयेत मिश्रयेदित्यर्थः । सप्ताहं मूलिकारसमर्दितां सर्पाक्ष्यादीनां रसमूलिकानां रसेन सप्ताहं मर्दितां तां पिष्टिं हेममाक्षिकादिकृतां चक्रिकाम् । पूर्वाधिकः वज्रपञ्जरोक्तगुणादप्यधिकः ॥ ९६।९७ ॥

रससेवायाम् उपचारविधिमाह, घनसारेति ।—घनसारः कर्पूरः । कटुकीफलं लताकस्तूरीबीजम्, "कटुकीफलम्" इत्यत्र "कटुकं फलम्" इति पाठे—कटुकं त्रिकटुकं फलं त्रिफला जातीफलं वा । फलं ताम्बूलवल्लीनां गुवाकफलमित्यर्थः; "फलं ताम्बूलवल्लीनाम्" इत्यत्र "फलं ताम्बूलवल्ली च" इति पाठकल्पना सुगमा; तथात्वे—फलं जातीफलम् । ताम्बूलवल्ली पर्णलता । रसस्य परम् आक्रमणं

भुञ्जीत शालिगोधूम-यवषष्टिकजाङ्गलम्।
मुद्गयूष गवा क्षीरं मस्तु स्नायात् सुखाम्भसा॥
रूपयौवनसम्पन्नामनुरूपा प्रिया भजेत्॥९८॥

अथ रससेवने अपथ्यानि।—

अभ्यङ्गं कटुतैलेन काञ्जीतैलं सुरां दधि।
कालिङ्गकारवेल्लाम्ल-लशुनासुरिमूलकम्॥१००॥
द्विदल विल्ववार्त्ताकं छत्राकं काकमाचिकाम्।
सङ्गमं मर्दनं रात्रौ जागरं स्वपनं दिवा॥१०१॥
अत्यम्लतिक्तलवणं स्वादूष्ण शिशिरौषधम्।
शोकवातातपक्रोध-चिन्ताश्च परिवर्जयेत्॥
साहसं रसलोहानां मारकञ्च विशेषतः॥१०२॥

अथ निषिद्धद्रव्यव्यवहारे दोष।—

सेवया परिहार्य्याणा रसस्याजरणा भवेत्।
शूलो नाभितले जाड्यं निद्रालस्य ज्वरस्तमः॥
अङ्गभङ्गोऽरुचिर्दाह.—"॥१०३॥

सञ्चारण, रससेवने एतेषा सेवनं रसवीर्य्यस्य शीघ्र सर्वदेहे विक्षेपकरणमित्यर्थ। सुखाम्भसा ईषदुष्णोदकेन। मुद्गयूष अखण्डितमुद्गकृतयूष इति बोध्य, परन्तु द्विदलनिषेधात्॥९८।९९॥

अपथ्यमाह, अभ्यङ्गमिति।—काञ्जीतैल काञ्जिकविशेष। कालिङ्गं "तरमुज" इति ख्यातम्। आसुरि राजिका। द्विदलमिति मुद्गादन्यत् मसूरादिकमित्यर्थ, विदलीकृतमुद्गादिकमित्यर्थो वा। छत्राक भूच्छत्राक, छेदक शाकविशेष इति यावत। रसलोहाना मारकं रसमारकद्रव्यगण लौहमारकद्रव्यगणञ्च विशेषतः वर्जयेत॥१००—१०२॥

निषिद्धसेवने दोषानाह, सेवयेति।—अजरणा जरणाभाव, सेवितो रसो न जीर्य्यतीत्यर्थ.॥१०३॥

अथ निषिद्धद्रव्यव्यवहारजदोषे प्रतीकारः ।—

"—पिबेत्तत्र दिनत्रयम् ।
सौवर्चलं सगोमूत्रं कर्कोटीमूलवारिणा ॥
मातुलुङ्गस्य वाऽम्लेन मार्गिमन्थ्य सनागरम् ॥१०४॥

अथ नागवङ्गयुक्तरससेवने प्रतीकारः ।—

नागवङ्गयुतः सूतः प्रमादाद्भक्षितो यदि ।
सैन्धवं कारवेल्लस्य कन्दं मूत्रे पिबेद्गवाम् ॥१०५॥
कर्कोटीगरुडीपथ्या-शरपुङ्खैर्विपाचिते ।
अष्टभागावशिष्टं वा गोमूत्रं सैन्धवान्वितम् ॥१०६॥
यत् चेत्रीकरणं पूर्वं वेधकश्च रसः ततः ।
सेवेत तस्य सिद्धिः स्यादन्यथा मरणं ध्रुवम् ॥१०७॥

अथ रसायने मृतसञ्जीवन्याख्यः चतुरशीतितमरसकल्पः ।—

कान्ताभ्रताप्यसत्त्वानां वज्रहेम्नो रसस्य च ।
सप्ताहमम्लपिष्टानां गोलके लेपितेऽन्वहम् ॥१०८॥
गोजिह्वावायसीपथ्या-निर्गुण्डीमधुसैन्धवम् ।
स्विन्ने भूधरयन्त्रस्थे पश्चात् कठिनतां गते ॥१०९॥

निषिद्धद्रव्यसेवनजदोषे प्रतिकारमाह, पिबेदिति ।—मार्गिमन्थ्य सैन्धवम् ॥१०४॥

अशुद्धपारदसेवने प्रतीकारमाह नागेति ।—नागवङ्गयुतः सम्यक्शोधनाभावात् अनपगतनैसर्गिकनागवङ्गदोषः । मूत्रैरिति पदं कर्कोट्यादिविपाचितैरित्यन्तश्लोकार्द्धेनान्वीयते । गरुडी गुडूची । विपाचितैरिति पदं विभक्तिविपर्य्यासेन विपाचितमिति पठित्वा अष्टभागावशिष्टं गोमूत्रमित्यनेन सम्बन्धनीयम् । "विपाचिते" इत्यत्र "विपाचितम्" इति क्वचित् पाठः । ततः नागवङ्गदोषयुक्तरससेवनजनितदोषशोधनाय सैन्धवादियोगद्वयान्यतरयोगसेवनानन्तरं यत् य चेत्रीकरणं चेत्रीकरणयोग्यं सम्यक्शोधितमित्यर्थः, वेधकं वेधाख्यसंस्कारसंस्कृतञ्च रसं पूर्वम्, उक्तामिति शेषः, तं सेवेत इत्यन्वयः ॥ १०५—१०७ ॥

चतुरशीतितमरसकल्पमाह कान्तेति ।—सप्ताहम् अम्लपिष्टानां काञ्जिकपिष्टानां कान्तादीनां गोलके, तथा अन्वहं प्रतिदिनं, सप्ताहमित्यर्थः, गोजिह्वादिरसं मधुसैन्धवञ्च, दत्त्वा दत्त्वा इति शेषः, लेपिते, भूधरयन्त्रस्थे स्विन्ने कठिनतां गते भूधर-

यवचिञ्चापलाशाक्ष-राजिकार्पासतण्डुलैः।
आवर्त्तितान्तर्लिप्तायां मूषायां खदिराग्निना ॥११०॥
टङ्कणं श्वेतकाचञ्च दत्त्वा दत्त्वा विशोषिते।
मूषायां विडयोगेन समांशं हेम जारयेत् ॥१११॥
संवत्सरं मुखधृता मृतसञ्जीवनी मता।
गुटिका शुक्रस्तम्भं कुरुते हरते च जरामरणम् ॥११२॥

अथ वाजीकरणे मदनवर्द्धनाख्य पञ्चाशीतितमरसकल्प।—

समचीर्णजीर्णहेममाक्षिकयोगेन मारितो वृष्यः।
घृतमधुशतावरीरसदुग्धयुतो मदनवर्द्धनः सूतः ॥११३॥

अथ वाजीकरणे षडशीतितमरसकल्प।—

लोहितागस्त्यसारेण कृष्णरम्भाफलद्रुतम्।
रसञ्च घनसारञ्च पीत्वा स्त्रीषु वृषायते ॥११४॥

यन्त्रस्थे तस्मिन् गोलके स्विन्ने पक्के कठिनतां गते च स्वेदादेव काठिन्यं प्राप्ते सति, पश्चात् पश्चादुक्तैः यवचिञ्चा चौरिणी, अक्ष विभीतकं, राजी राजिका, कार्पासं कार्पासबीजं, तण्डुल तण्डुलीयशाकं तैः आवर्त्तितान्तर्लिप्तायां मर्दितयवचिञ्चादिभिः लिप्तोदरायां मूषायां, मध्याप्येति शेष, टङ्कणं तथा श्वेतकाचं सोरक शुभ्रकाचचूर्णं वा, दत्त्वा दत्त्वा किञ्चित् किञ्चित् प्रक्षिप्य, खदिराग्निना खदिरकाष्ठाङ्गारेण विशोषिते मूषायां पूर्वोक्तायामेव विडयोगेन रसमारकविडसहकारेण समांशं गोलकतुल्यं हेम स्वर्णं जारयेत्, अनन्तरं गुटिकाकारं कृत्वा स्थापयेच्चेति। "गुटिका शुक्रस्तम्भं कुरुते हरते च जरामरणम्" इति पाठस्य भग्नवृत्ततादिदोषदुष्टत्वात् "स्तम्भाति गुटिका शुक्रं हरते मरणं जराम्" इति पाठकल्पनं सङ्गतम् ॥ १०८—११२ ॥

पञ्चाशीतितमरसकल्पमाह, समेति।—समं तुल्यं सूततुल्यमित्यर्थः, चीर्णं भक्षितं, गृहीतमित्यर्थः, जीर्णञ्च जारितञ्च यत् हेममाक्षिकं तद्योगेन मारितः सूत इत्यन्वयः ॥ ११३ ॥

षडशीतितमरसकल्पमाह, लोहितेति।—लोहितागस्त्यसारेण रक्तवकपुष्पस्वरसेन। कृष्णरम्भाफलद्रुतं कृष्णवर्णकदलीफलनिर्यासम्। घनसारं कर्पूरम्। कृष्णरम्भादिकं समभागं रक्तागस्त्यरसेन पिबेदिति ॥ ११४ ॥

अथ रसायने सन्दिग्धान् प्रति उक्तं ।—

युगस्वभावात् यदि चौषधीनां क्रियासु शक्तिः परिकल्प्यतेऽल्पा ।
आयुर्बलादिष्वपि सा तथेति तस्मान्निषेव्याणि रसायनानि ॥ ११५ ॥

न चौषधीनामपि सर्वथैव प्रभावहानिः परिकल्पनीया ।
फलं प्रयात्यूर्द्धमधश्च्छिन्नत्त्व प्रत्यक्षतः कस्य न सिद्धमेतत् ? ॥ ११६ ॥

अथ औषधानां गुणदोषवत्त्वे प्रयोक्तुः अज्ञत्वाज्ञत्वयोः हेतुता ।—

अदेशकालोपहितानि सात्म्यान्यप्यत्यूष्णतीक्ष्णानि यथौषधानि ।
नाशं नयन्ते सहसैव देहं सम्यक् प्रवृत्तानि यथैव वृद्धिम् ॥ ११७ ॥

जित्वा तस्मादिन्द्रियादिप्रदुष्टान् कालोपेतः श्रद्दधानो यथावत् ।
आयुष्मान्नातिजसा यद्विवृद्धैर्वीर्योपेतं शीलयेदौषधं तत् ॥ ११८ ॥

अथ आचाररसायनम् ।—

शास्त्रानुसारिणी चर्य्या चित्तज्ञाः पार्श्ववर्त्तिनः ।
बुद्धिरस्खलिताऽर्थेषु परिपूर्णं रसायनम् ॥ ११९ ॥

ये खलु विभ्रमन्त्या सततमेव ब्रुवते यत इदानीमौषधयः अल्पवीर्य्याः सञ्जाताः न ताभिः किञ्चित् फलं लभ्यते सुतरां प्रयोगस्तासां निष्फलः, तान् प्रत्याह, युगस्वभावादिति।—आयुर्बलादिष्वपि इत्यत्र आदिपदेन अग्निप्रभृतीनां ग्रहणं, सा तथा शक्तिरल्पा जाता, अल्पायुष्कादिके पुंसि अल्पशक्तिकमेवौषधं प्रयोज्यं, न महावीर्य्यं सोढ़ुमशक्यत्वात्। फलं मदनफलम् ऊर्द्धं प्रयाति वामयतीत्यर्थः ॥ ११५।११६ ॥

औषधानां फलप्रदत्वे प्रयोक्तुः विमृश्यकारितायाः हेतुतामाह, अदेशेति।—अदेशकालोपहितानि तत्तदौषधप्रयोगानर्हे देशे काले च प्रयुक्तानीत्यर्थः मिथ्योपयुक्तानीति यावत्। सात्म्यानि प्रकृतिसुखावहान्यपीत्यर्थः। सम्यक् प्रवृत्तानि देशकालादिकं विभज्य यथायथं प्रयुक्तानि। "यथैव" इत्यत्र "तथैव" इति पाठकल्पना साधीयसी। इन्द्रियादिप्रदुष्टान् कामक्रोधादीन् मानसदोषानित्यर्थः। कालोपेतः अनतीतौषधप्रयोगकालः ॥ ११७।११८ ॥

इदानीमाचाररसायनमाह, शास्त्रेति।—शास्त्रानुसारिणी चर्य्या शास्त्रविहिताचारानुष्ठानम्। चित्तज्ञा इङ्गितज्ञाः पार्श्ववर्त्तिनः सहचराः, तुल्यशीलाः सखाय इत्यर्थः। अर्थेषु इन्द्रियार्थेषु अस्खलिता अप्रमत्ता, न विपर्यस्ता बुद्धिः, रूपादिषु

दानं शीलं दया सत्यं ब्रह्मचर्य्यं कृतज्ञता ।
रसायनानि मैत्री च पुण्यायुर्वृद्धिकृद्गणः ॥१२०॥

अथ आयुर्वेदोपदेशस्य अवश्यपालनीयतोक्तिः ।—

एतदागमसिद्धत्वात् प्रत्यक्षफलदर्शनात् ।
मन्त्रवत् सम्प्रयोक्तव्यं न मीमांस्यं कथञ्चन ॥१२१॥

अथ कुवैद्यानां वर्जनीयतोक्तिः ।—

लोभयन्त्यातुरं मूर्खा विचित्रैः कर्मकौशलैः ।
तेभ्यो रक्षेत् सदाऽऽत्मानमात्मा यस्मात् सुदुर्लभः ॥१२२॥
ते घुणाक्षरवत् कश्चिदुत्थाप्य नियतायुषम् ।
घ्नन्ति वैद्याभिमानेन शतान्यनियतायुषाम् ॥१२३॥
अज्ञातशास्त्रसद्भावान् शास्त्रमात्रपरायणान् ।
तान् वर्जयेद्भिषक्पाशान् पाशान् वैवस्वतानिव ॥१२४॥

अनासक्तत्वात् जितेन्द्रियत्वम् इत्यर्थः । परिपूर्णं रसायनं रसायनयोगसेवनमन्तरेणापि एतत् सर्वं रसायनफलप्रदं भवेदित्यर्थः । मैत्री सर्वभूतेषु मित्रबुद्धिः । गणः एष दानादिसमूहः, पुण्यायुर्वृद्धिकृत्, अत एव रसायनानि दानादिसम्पन्नाः पुरुषाः नित्यमेव रसायनफलमजरत्वादिकं समश्नुवन्ति इत्यर्थः ॥११९।१२०॥

आयुर्वेदोपदेशस्य रसायनस्य च अवश्यकरणीयत्वमाह, एतदिति ।—एतत् आयुर्वेदानुशासनं रसायनं वा । न मीमांस्यं कथञ्चन युक्त्यादिप्रदर्शनपुरःसरं समूलकत्वामूलकत्वे विश्वसनीयत्वाविश्वसनीयत्वे च न स्थापनीये इत्यर्थः, उक्तञ्च—"पुराणं मानवो धर्मः साङ्गो वेदश्चिकित्सितम् । आज्ञासिद्धानि चत्वारि न हन्तव्यानि हेतुभिः ॥" इति ॥ १२१ ॥

कुवैद्यानां दोषं वर्जनीयत्वञ्चाह, लोभयन्तीति ।—मूर्खाः वैद्याभिमानिनः अज्ञाः इत्यर्थः, भिषक्छद्मचराः इति यावत् । विचित्रैः अद्भुतैः मोहजनकैरित्यर्थः, कर्मकौशलैः चिकित्साकर्मसु आत्मनो नैपुण्यख्यापनैरित्यर्थः । ते मूर्खवैद्याः घुणाक्षरवत् घुणाक्षरन्यायेन घुणाख्यकाष्ठकीटोत्कीर्णाक्षरवत्, नियतायुषम् आयुष्मन्तं कञ्चित् आतुरम् उत्थाप्य रोगादुत्तार्य्य वैद्याभिमानेन अहं सुवैद्यः अमुकममुकरोगादुत्तारयिषमिति गर्वेण । शास्त्रमात्रपरायणान् शास्त्रनिविष्टवर्णश्लोकमात्रधारणशीलान् किन्तु अज्ञातशास्त्रसद्भावान् अज्ञातः शास्त्राणाम् आयुर्वेदादितन्त्राणां, सद्भावः प्रकृताभिप्रायः, निगूढार्थ इति यावत्, यैस्तान् शास्त्रमर्मानभिज्ञान्, भिषक्पाशान् कुत्सितो भिषक्

अथ शास्त्रज्ञवैद्यस्य साफल्यमाह ।—

प्रदीपभूतं शास्त्रं हि दर्शनं विपुला मतिः ।
ताभ्यां भिषक् सुयुक्ताभ्यां चिकित्सन्नापराध्यति ॥१२५॥

भिषक्पाशं तान् कुवैद्यान् वैवस्वतान् पाशान् यमपाशानिव, जीविताकर्षकत्वात् । चरकेणाप्युक्तं—"श्रुतदृष्टक्रियाकाल-मात्राज्ञानबहिष्कृताः । वर्जनीया हि ते मृत्योश्चरन्त्यनुचरा भुवि ॥ वृत्तिहेतोर्भिषङ्मानपूर्णान् मूर्खविशारदान् । वर्जयेदातुरो विद्वान् सर्पांस्ते पीतमारुताः ॥ ये तु शास्त्रविदो दक्षाः शुचयः कर्मकोविदाः । जितहस्ता जितात्मानस्तेभ्यो नित्यं कृतं नमः ॥" इति । अन्यच्च—"वरमात्मा हुतोऽज्ञेन न चिकित्सा प्रवर्त्तिता । पाणिचाराद्यथाऽचक्षुरज्ञानाद्भीतभीतवत् । नौर्मारुतवशेवाज्ञो भिषक् चरति कर्मसु ॥ यदृच्छया समापन्नमुत्तार्य नियतायुषम् । भिषङ्मानी निहन्त्याशु शतान्यनियतायुषाम् ॥" इति ॥१२२—१२४ ॥

अधिगतशास्त्रार्थस्य धीमतो भिषजः चिकित्सिते साफल्यं दर्शयति, प्रदीपभूतमिति ।—शास्त्रं शास्त्राभ्यासः, प्रदीपभूतं प्रदीपस्वरूपम्, अज्ञानतमोनाशकत्वात् । विपुला महती, ऊहापोहवती, मतिः बुद्धिः दर्शनं नेत्रभूतम् । सुयुक्ताभ्यां शोभनं यथा तथा मिलिताभ्यां ताभ्यां शास्त्रमतिभ्यां, न केवलं शास्त्रं न वा केवला मतिः, किन्तु शास्त्रमात्ममतिञ्च उभयमेव प्रमाणीकृत्य इत्यर्थः, दीपाभावे चक्षुष्मतोऽपि यथा ज्ञानं न सम्भवति यथा च दीपसत्त्वेऽपि चक्षुर्विहीनस्य न ज्ञानं जायते, किन्तु दीपचक्षुषोरुभयोरेव युगपत्प्रवृत्तौ ज्ञानं भवति, एवमनधीतायुर्वेदः विपुलमतिरपि अथवा अधीतायुर्वेदोऽपि मूढधीश्चेत् न सुचिकित्सां कर्त्तुमर्हति, किन्तु ऊहापोहपूर्वकं शास्त्रमाश्रित्य चिकित्सन् चिकित्सां कुर्वन् नापराध्यति आतुरेषु न प्रमाद्यति, साध्यरोगिणमवश्यमेव रोगेभ्यः प्रमोचयतीत्यर्थः । चरकेणाप्युक्तं—"तस्माच्छास्त्रेऽर्थविज्ञाने प्रवृत्तौ कर्मदर्शने । भिषक् चतुष्टये युक्तः प्राणाभिसर उच्यते ॥ हेतौ लिङ्गे प्रशमने रोगाणामपुनर्भवे । ज्ञानं चतुर्विधं यस्य स राजार्हो भिषक्तमः ॥ शस्त्रं शास्त्राणि सलिलं गुणदोषप्रवृत्तये । पात्रापेक्षीण्यतः प्रज्ञां चिकित्सार्थं विशोधयेत् ॥ विद्या वितर्को विज्ञानं स्मृतिस्तत्परता क्रिया । यस्यैते षड्गुणास्तस्य न साध्यमतिवर्त्तते ॥ विद्या मतिः कर्मदृष्टिरभ्यासः सिद्धिराश्रयः । वैद्यशब्दाभिनिष्पत्तावलमेकैकमप्यदः ॥ यस्य त्वेते गुणाः सर्वे सन्ति विद्यादयः शुभाः । स वैद्यशब्दं सद्भूतमर्हन् प्राणिसुखप्रदः ॥ शास्त्रं ज्योतिः प्रकाशार्थं दर्शनं बुद्धिरात्मनः । ताभ्यां भिषक् सुयुक्ताभ्यां चिकित्सन्नापराध्यति ॥" इति ॥ १२५ ॥

अथ चिकित्सायाः त्रिवर्गसाधकत्वमिति ।—

क्वचिदर्थः क्वचिन्मैत्री क्वचिद्धर्मः क्वचित् यशः।
क्वचिदभ्यासयोगश्च चिकित्सा नास्ति निष्फला ॥१२६॥

अथ कुवैद्यस्य निरयभाक्त्वमिति ।—

ये क्रिया विक्रिया कुर्वन्त्युपेक्षन्ते स्खलन्ति वा।
खादन्ति ते परप्राणान् निजानि सुकृतानि च ॥१२७॥

अथ यावच्छ्वास चिकित्साया कर्त्तव्यत्वमिति ।—

यावदुच्छ्वसिति प्राणो यावद्भेषजमस्ति च।
तावच्चिकित्सा कर्त्तव्या दैवस्य कुटिला गतिः ॥१२८॥

अथ वैद्यातुरयोरन्योऽन्यकर्त्तव्यनिर्देश ।—

अनाथान् रोगिणो वैद्यः पुत्त्रवत् समुपाचरेत्।
प्राणाचार्य्यश्च पितृवत् सम्पूज्य शक्तिभक्तितः ॥१२९॥

अथ वैद्याना सुखभाजीवत्वनिर्देश ।—

न प्राणिरहितो देशो न च प्राणी निरामयः।
तस्मात् सर्वत्र भिषजा कल्पिता एव वृत्तयः ॥१३०॥

चिकित्सायास्त्रिवर्गसाधकत्वमाह, क्वचिदिति।—सुगमम् ॥ १२६ ॥

कुवैद्यस्य निरयभाक्त्वमाह, ये इति।—क्रिया चिकित्साकर्म, विक्रिया विपरीता दूषितामित्यर्थ, अज्ञानादिति शेष। उपेक्षन्ते, क्रियाकालमातुर वा इति शेष, अत्रापि अज्ञानादिति शेषो बोध्य, एवमुत्तरत्रापि। स्खलन्ति प्रमाद्यन्ति, चिकित्सायामिति शेष ॥ १२७ ॥

यावच्छ्वास चिकित्सायाः करणीयत्वमाह, यावदिति।—स्पष्टम् ॥ १२८ ॥

वैद्यातुरयोरन्योऽन्यकर्त्तव्यमाह, अनाथानिति।—प्राणाचार्य्य प्राणाना गच्छता हितोपदेशादिना रक्षणात आचार्य्य इव आचार्य्य, "शीलवान् मतिमान् युक्तः द्विजाति शास्त्रपारग" इत्येव-लक्षणक भिषगित्यर्थ। यदुक्त चरके—"शीलवान् मतिमान् युक्त. द्विजाति. शास्त्रपारग। प्राणिभिर्गुरुवत पूज्य प्राणाचार्य्य. स हि स्मृत. ॥" इति। शक्तिभक्तित शक्ति भक्तिश्चानतिक्रम्य, भक्तिपूर्वक यथाशक्ति इत्यर्थ ॥ १२९ ॥

वैद्याना सुखभाजीवत्वमाह, नेति।—सुगमम् ॥ १३० ॥

अथ पुरावृत्तवर्णनद्वारा वैद्यस्य सर्वपूज्यत्वनिर्देशः ।—

यज्ञस्य च शिरश्छिन्नमश्विभ्यां सन्धितं पुरा ।
पातिता दशना पूष्णो भगस्य च विलोचने ॥१३१॥
राजयक्ष्मार्दितश्चन्द्रस्ताभ्यामेव चिकित्सितः ।
भार्गवश्च्यवनः कामी वृद्धः सन् विकृतिं गतः ॥
वीर्य्यवर्णबलोपेतः कृतस्ताभ्यां पुनर्युवा ॥१३२॥
एभिश्चान्यैश्च बहुभिः कर्मभिर्भिषगुत्तमौ ।
बभूवतुर्भृशं पूज्याविन्द्रादीनां महात्मनाम् ॥१३३॥
सौत्रामण्याञ्च भगवानश्विभ्यां सह मोदते ।
अश्विभ्यां सहितः सोमं प्रायः पिबति वासवः ॥१३४॥
अश्विभ्यां कल्पितो भागो यज्ञेषु च महर्षिभिः ।
अश्विनावग्निरिन्द्रश्च वेदेषु सुतरां स्तुताः ॥१३५॥
वैद्यावित्यश्विनौ देवौ पूज्येते विबुधैरपि ।
अजरैरमरैर्नित्यं सुखितैरेवमादृतैः ॥१३६॥
व्याधिमृत्युजराग्रस्तैर्दुःखप्रायैः सुखार्थिभिः ।
किं पुनर्भिषजो मर्त्यैः पूज्याः स्युर्नाऽऽत्मशक्तितः ? ॥१३७॥

पुरावृत्तोद्घाटनपुरःसरं वैद्यानां पूज्यत्वमाह, यज्ञस्येति ।—यज्ञस्य हि शिरश्छिन्नं पुरा दक्षयज्ञकाले नन्दीकेश्वरेण यज्ञस्य मस्तकं त्रुटितमिति वार्त्ता । सन्धितं सयोजितम् । पूष्णः पूषाख्यस्याऽऽदित्यभेदस्य दशनाः दन्ताः पातिताः भग्नीकृताः, वीरभद्रेणेति शेषः । भगस्य तदाख्यस्याऽऽदित्यभेदस्य, उभयत्रापि "अश्विभ्यां सन्धितं पुरा" इति वाक्यं विभक्तिविपरिणामेन "अश्विभ्यां सन्धिताः सन्धिते" इति कृत्वा योजनीयम् । ताभ्याम् अश्विभ्याम् । भिषगुत्तमौ अश्विनौ । सौत्रामण्यां सुत्रामा इन्द्रो देवता अस्य इति सौत्रामणी तस्यां तदाख्ययागभेदे । भगवान् जिष्णुः । मोदते सोम-रसादिपानेन नन्दति । सोमं सोमरसम् । "प्रायः" इत्यत्र "प्रातः" इति चरक-सम्मतः पाठः, तथा च चरके—"प्रातश्च सवने सोमं शक्रोऽश्विभ्यां सहाश्नुते" इति । सुतराम् अतिशयेन, अन्यदेवापेक्षया इत्यर्थः, तथा च चरकः,—"इन्द्राग्नी चाश्विनौ चैव स्तूयन्ते प्रायशो द्विजैः । स्तूयन्ते वेदवाक्येषु न तथाऽन्या हि देवताः ॥" इति । वैद्यौ

अथ उपसंहारः।—

रसरत्नसमुच्चयो मयेत्थं रचितः साधु नितान्तमाद्रियन्ताम्।
सुधियो यदि विद्यतेऽत्र दोषः क्वचिदर्हन्ति ममाप्यलं विसोढुम्॥
१३८॥

इति श्रीवैद्यपतिसिंहगुप्तस्य सूनोर्वाग्भटाचार्य्यस्य कृतौ रसरत्नसमुच्चये
रसकल्पो नाम त्रिंशत्तमोऽध्यायः॥ ३०॥

चिकित्सको इति इति कृत्वा, इति हेतोरित्यर्थः। आदृतैः सर्वलोकपूजितैरित्यर्थः, आदरवद्भिरित्यर्थो वा। दुःखप्राये दुःखबहुले, व्याध्यादिग्रस्तत्वात्, अत एव सुखार्थिभिः सुखकामैः, दुःखहानाभिलाषिभिरित्यर्थः। आत्मशक्तितः सामर्थ्यानुसारेण, "अतिशक्तितः" इति चरके पाठः, किं पूज्या न स्युः? इति काकुः, अपि तु पूज्या एवेत्यर्थः॥ १२१—१३७॥

उपसंहरति, रसेति।—साधु सम्यक् यथा तथेति रचितः इत्यस्य विशेषणम्। अलम् अत्यर्थम्। विसोढुं क्षन्तुम्॥ १३८॥

इति रसरत्नसमुच्चयबोधिन्यां त्रिंशत्तमोऽध्यायः समाप्तः॥ ३०॥

समाप्तोऽयं ग्रन्थः।